निशम्य रेवतीवाक्यं [2] रामायणोऽतिविस्मितः । निर्गत्य रेवतीगेहादाजगाम स्वमन्दिरम् ॥ ५३ ॥
स्वान्तर्गतं विचार्योच्चैः क्षिप्रयत्किंपुरस्सरीम् । [3] अगमामप्यसेनोऽपि ससपो निजमानसम् ॥ ५४ ॥
सक्षेत्रेऽपि तदा संघो मनोवेगेन वीक्षितः । न च दोषकनिपातो न च्युता रेवती परम् ॥ ५५ ॥
जिनरूपं विहायाथ क्षौल्लकं वेषमाश्रितः । ससलवेदनाग्रस्त [4] पपात विशिखान्तरे ॥ ५६ ॥
छर्दि कुर्वन् चरित्रैर्धि पुस्तकरमपि सर्वगम् । रेवती श्राविकासंघाच्छ्रुत्वाव्यवस्थित [5] ॥ ५७ ॥
सापि तन्मन्दिरं प्राप्य रेवतीभवनस्य गतौ । द्वारे ससाम धावनावि पतितः क्षुल्लकः पथि ॥ ५८ ॥
रेवती तस्य [6] श्रुत्वा माहेशं क्व स तिष्ठति । तत्कृपया च साऽवादि विशिखान्ते [7] स तिष्ठति ॥ ५९ ॥
तत्पत्रस्थो गता सापि रेवती तत्समीपकम् । तमादाय करेणाशु स्वगृहं पुनराययौ ॥ ६० ॥
क्षुल्लकः प्राप्य तद्गेहं रेवतीं निजगाविदम् । क्षुधातिसंक्लिष्टाय देहि मे भोजनं द्रुतम् ॥ ६१ ॥
तत्र सुखोपविष्टस्य क्षुधार्तस्य विचेतसे । रेवतीश्राविका पात्रे तस्मै भक्तं ददौ मुदा ॥ ६२ ॥
यावदानयति सा शुद्धान् दरान्तस्मै मनोरमान् । तावद्धि भक्षितं भक्तं तेन मायाप्रपञ्चतः ॥ ६३ ॥
यावद् घृतं ददात्यस्मै रेवती सरसं घनम् । तावच्च तेन तत् पीतं मायाक्षुत्प्रेरमोचनम् ॥ ६४ ॥ [8]
यावदेषा ददात्यस्मै घृतपूरान् मनोहरान् । तावदेतेन ते सर्वे भक्षिता हि क्षुधं विना ॥ ६५ ॥
यावद्ददात्यसौ तस्मै व्यञ्जनानि घनानि च । तावदेषोऽखिलान्येतानि चखाद ग्रासमात्रतः ॥ ६६ ॥
यावद्ददात्यसौ तस्मै कठिनं दधिसुन्दरम् । तावत्कल्प विना शीघ्रं भक्षितं मायिनाऽमुना ॥ ६७ ॥
यावदेषा ददात्यस्मै मण्डकान् दुग्धं सशर्करम् । तावदेतेन निःशेषं पीतं तन्मण्डकैर्विना ॥ ६८ ॥
यथाभिरोचते तस्मै किंचित्स्वरसभोजनम् । तत्तद्दर्शितवीर्ये वा चपलात्मा प्रमायया ॥ ६९ ॥
एवं भुक्तवतोऽपि यदा तृप्तिं न यातवान् । तदा ये रेवती प्राह साहसं खेदवर्जितम् ॥ ७० ॥
श्रुत्वा त्वत्कीर्तिमत्याहं सत्सम्यक्त्वसमुज्ज्वलाम् । त्वदन्तिकं समायातः [9] क्षुधार्ताकन्दर्पमिव ॥ ७१ ॥ [10]
किन्तु यास्याम्यहं तृप्तिं भोजनेन मनस्विनि । नाहं त्वत्करदत्तेन प्रीणितोऽस्मि न सम्मतम् ॥ ७२ ॥
तस्मादानय मे शीघ्रं भोजनं सरसं बहु । येनाहं तृप्तिमायामि तदेव कुरु साम्प्रतम् ॥ ७३ ॥ [11]
क्षुल्लकस्य वचः श्रुत्वा रेवती बहुविस्मया । वैमनस्यं परं त्यक्त्वा भूयोऽन्नं दातुमुद्यता ॥ ७४ ॥
भक्तं बहुविधं पुनः परिष्कृत घृतपूरकम् [12] । मण्डकाशोकवर्तिन्यो वारिधाः पूपपत्रिकाः ॥ ७५ ॥
व्यञ्जनानां तथा श्रेणी मोदकानामपि स्तूपम् । तदा विमलया दत्तमेतत्तेन च भक्षितम् ॥ ७६ ॥
पयसां चञ्चूर्णानां स्वर्णकेभ्यो [13] घनेषमः । पीता चषकस्य तत्पात्रेण सत्कामसातत ॥ ७७ ॥
एतद्धं समादाय भानामेदरसं पठम् । मायी [14] करीर्विर्मूर्ति चकारायं पुनः पुनः ॥ ७८ ॥
तदान्तामेघ्यसंघातं दुर्गन्धामोदिताशकम् । आदाय स्वकरेणेमं चिक्षेप रेवती ॥ ७९ ॥
रेवत्या विनयं दृष्ट्वा वैयावृत्त्यमनुत्तमम् । विहाय क्षौल्लकं [15] रूपं खेटरूपं ददर्श सा ॥ ८० ॥
हारराजितवक्षस्कं स्वर्णकुण्डलभासितम् । दिव्यपरिमलामारसितीकृतनभस्तलम् ॥ ८१ ॥
दिव्यरूपधरं दृष्ट्वा रेवती पुरतः स्थितम् । इमं पप्रच्छ कोऽसि त्वं केन कार्येण चागतः ॥ ८२ ॥
रेवतीवचनं श्रुत्वा जगादेमां स खेचरः । विद्धि विद्याधरं मां त्वं मनोवेगं मनस्विनि ॥ ८३ ॥

---

1 क एष मायावाक्यतो 2 प दुष्प्राम्, क दुरत्रम्, ज दुष्प्रवेशम्, 3 क एवमपरो 4 क वचसदावाव॰ 5 पज स्थाने. 6 प विपत्तिश्रो 7 प विशिखान्ते 8 प omits ६४ and ६५ after confusing some lines. 9 [क्षुधाक्लान्तं॰]. 10 क interchanges ७१ and ७२. 11 प बहुभक्ष्यम्, पज बहुभक्ष्यमीषद्. 12 क घृतपूरक. 13 प स्वर्ग॰ ज स्वर्ण॰ 14 क मायी. 15 पज क्षौल्लं. 16 पज रूपं.

कृत्वा स्थापितदेवानां मया सद्धि विकुर्वणा । विधाय क्षौल्लकं रूपं त्वत्परीक्षार्थमागतः ॥ ८४ ॥
स्पार्तं यन्मुनिगुप्तेनाभव्यसेनस्य योगिनः । तथापि दर्शनं सारं तत्सर्वं विरितं मया ॥ ८५ ॥
मुनिगुप्तेन गुप्तेन मनोवाक्कायकर्मभिः । आशीर्वचनमत्युग्रं प्रहितं तव रेवति ॥ ८६ ॥
पदानि सप्त सम्प्राप्य तत्सन्मुखमुदारधीः । ववन्दे तत्पदद्वन्द्वं रेवती शिरसाऽऽदरात् ॥ ८७ ॥
कथयित्वा स्ववृत्तान्तं तत्साक्षां च परीक्ष्य सः । अदर्शनं ययौ क्वापि मनोवेगः प्रशान्तधीः ॥ ८८ ॥
खेटः प्रदक्षिणीकृत्य जिनमन्दिरमुन्नतम् । जिनं स्तुत्वा सुसाधुं वा भव्यसेनं गणाधिपम् ॥ ८९ ॥
भाषितास्तित्वध्यासार्थं श्रावकैर्जिनदेवतैः । तत्रोपविश्य शुश्राव तद्व्याख्यानं स खेचरः ॥ ९० ॥
तद्व्याख्यानमुपश्रुत्य मनोवेगेन वेगिना । भव्यसेनो बहिर्भूमिं विधातुं प्रययौ तदा ॥ ९१ ॥
दृष्टपत्रकलं भस्मविकृतिस्थेन मायिना । विद्याबलेन सर्वीत सर्वं चक्षुर्गोचरम् ॥ ९२ ॥
बहिर्भूमिं विधात्वात्र श्रावकोऽभाषि योगिना । कुतोऽप्यन्वेषणं कृत्वा तूर्णं विकृतिमानय ॥ ९३ ॥
तदुक्तः श्रावकः सोऽपि मृत्स्नामादाय शोभनाम् । आगत्य च मुनेः पार्श्वं स जगाद सकौतुकः ॥ ९४ ॥
विकृतिर्मे विभोरापि न लब्धा क्वापि सप्त । ततो गृहाण सन्मृत्स्नां प्रासुकां मदुपाहृताम् ॥ ९५ ॥
सचित्तं वीक्ष्य योगीन्द्रस्तामादाय क्षणेन सः । जगाद श्रावकं भूयः पृथिवीकायसंज्ञयी ॥ ९६ ॥
बुवन्ति केचिदाचार्याः पृथिव्यादिषु धारिणः । सजीवानिति निक्षेपान् मनोवेगमतीङ्गितान् ॥ ९७ ॥
एवमुक्त्वा तकं सोऽपि परादिप्राप्यसंशयः । जलप्रक्षाल्य पङ्के तथा शुचिकृत्वा यतिः ॥ ९८ ॥
रेवती श्राविकां मत्वा सत्सम्यक्त्वविभूषिताम् । परादिजीवसंदेहकारिणं योगिनं तथा ॥ ९९ ॥
मुनिगुप्तं मुनिं प्राप्य वन्दित्वा तं पुनः पुनः । तद्वृत्तान्तं समावेद्य स्वं धाम गतवानसौ ॥ १०० ॥
भव्यदृष्टिप्रध्वंसियं सम्यक्त्वक्षयकारिणी । न विद्यासतयोरेकं स्वरूपं ज्ञायते मुनिः ॥ १०१ ॥
ज्ञानं ज्ञानी मुनिः सिद्धाः सिद्धायतनकानि च । चारित्रं तद्युतः साधुरेवान्यायतनानि षट् ॥ १०२ ॥
जीवानां भयभीतानां धर्मबुद्धिविधायिनाम् । एतेभ्योऽन्यानि दुःखाय सन्त्यनायतनानि वै ॥ १०३ ॥
जिनसाधुपदाम्भोजधर्मरञ्जितसाङ्गिनी । मोहं न रेवती याता विद्याधरविडम्बने ॥ १०४ ॥

॥ इति अमूढदृष्टिरेवतीकथानकमिदम् ॥ ७ ॥

*

८ चेलनामहादेवीकथानकम् ।

अथ विदग्धनावासं पुरन्दरपुरोपमम् । नगरं पाटलीपुत्रं बभूव वसुधातले ॥ १ ॥
तत्पुरे पाति भूपेन्द्रो विशाखो नाम विश्रुतः । दोर्दण्डखण्डितनिःशेषवैरिवारविमण्डलः ॥ २ ॥
पद्मपत्रसमानाक्षी पद्मपादकरद्वया । मधुपपक्षसद्दक्षा विशाखा तत्प्रियाऽभवत् ॥ ३ ॥
तयोर्वैशाखनामाऽभूत् पुत्रः पुत्राभिलाषिणोः । कीर्तिव्याप्तसमस्ताशो विनयी गुणवारिधिः ॥ ४ ॥
कनककनकसदृशशरीरश्च निरञ्जिताम् । उपयेमे विधानेन वैशाखः कनकश्रियम् ॥ ५ ॥
अन्यदा यावदुद्युक्तो वैशाखो निजमन्दिरम् । आस्तेऽनया समं तत्र प्रोत्कनकश्रिया ॥ ६ ॥
प्रियामण्डनसक्तस्य तावदास्तस्थोऽस्य सः । मुनिदत्तो मुनिः प्राप भिक्षार्थं तद्गृहं क्रमात् ॥ ७ ॥
कुमारोऽपि मुनिं दृष्ट्वा प्रोत्थाय त्वरितान्वितः । तत्सन्मुखमभीयाय भक्तिप्रोद्भिन्नतनूरुहः ॥ ८ ॥
विधाय तच्छुद्धिं भक्त्या नीत्वाऽर्घं निजमन्दिरम् । अन्वदाद् बहुभेदेन मुनिदत्तं ततः स ॥ ९ ॥
मुनिराहारमाहृत्य तद्गृहाद्विषयो ततः । कुमारोऽप्यमुना सार्धं प्रियामापृच्छ्य निर्गतः ॥ १० ॥

---

1 पज ज्ञात्वा. 2 फ सद्भः 3 पज विवेचनः. 4 फ शुद्धभिः. 5 पज तत्पदं. 6 फ विभोरपि
7 प ज्ञात्वा, फ कुम्म्, ज कुम्भमिदम्. 8 प तथापिदम्

संसारासारतां ज्ञात्वा शरीरं रोगि सक्षयम् । मुनिदत्तान्तिके शीघ्रं वैशाखोऽपि तपोऽग्रहीत् ॥ ११ ॥
ततस्तपःस्थितं श्रुत्वा धर्मं[1] मिथ्यात्वमाप्य च । कनकश्रीर्मृतिं कृत्वा बभूव व्यन्तरी तदा ॥ १२ ॥
अन्यदा योगिनं दृष्ट्वा विभङ्गज्ञानतः स्फुटम् । विहरन्तं तं वैशाखं[2] व्यन्तरी क्रोधमागता ॥ १३ ॥
अयं विहाय मां क्रूरो निर्लज्जो नवयौवनाम् । मयि कोपं गतायां हि करिष्यति कथं वद ॥ १४ ॥
मासोपवासयुक्तस्य मुनेरेकविहारिणः । आहारसमये साऽपि करोतीन्द्रियघर्षणम् ॥ १५ ॥
मासमेकमुपोष्यायं पारणार्थं महातपाः । विवेश विहरन् सोऽपि तदा राजगृहं पुरम् ॥ १६ ॥
उपवासपरिश्रान्तं योगिनं वीक्ष्य चेलना । स्वगृहाभिरमायातं समुत्थाय तमग्रहीत् ॥ १७ ॥
अथ स्थानस्थितं दृष्ट्वा पारणार्थं तपस्विनम् । कनकश्रीचरी चक्रे व्यन्तरीन्द्रियघर्षणम् ॥ १८ ॥
सोपसर्गं मुनिं दृष्ट्वा चेलना भक्तिवत्सला । काण्डादिकं पटं चक्रे जनमस्तनमीक्षिता[3] ॥ १९ ॥
विधाय मोचनं योगी वैराग्याहितमानसः । चेलनावन्दितस्तूर्णं निर्जगाम तदालयात् ॥ २० ॥
विपुलाद्रिगिरौ स्थित्वा ध्यानेनासौ[4] मुनीश्वरः । निहत्य घातिकर्माणि केवलज्ञानमाप्तवान् ॥ २१ ॥
विदित्वाऽऽसनकम्पेन वैशाखस्य[5] मुनेरिदम् । केवलज्ञानमुत्पन्नं सहसाऽगुः सुरेश्वराः ॥ २२ ॥
सम्प्राप्य सुराः सर्वे मस्तकन्यस्तपाणयः । पूजां केवलिनश्चक्रुः पुष्पधूपाक्षतादिभिः ॥ २३ ॥
विज्ञाय केवलोत्पत्तिं वैशाखस्याशु योगिनः । चेलनादिजनः प्राप नन्तुं केवलिनं मुदा ॥ २४ ॥
नत्वा केवलिनं भक्त्या चेलना सुरसंसदि । पप्रच्छ किंकृतं तेऽत्र घोपसर्गं वदाशु मे ॥ २५ ॥
चेलनावचनं श्रुत्वा प्राहेमां केवली तदा । कनकश्रीरतिक्रूरा बभूव चललोचना ॥ २६ ॥
वैशाखस्यैव सा पूर्वं परिणीताऽतिरागतः । कनकश्रीरियं क्रुद्धा योगिनीव भयावहा ॥ २७ ॥
अन्यदा मठं प्राप्तो मुनिदत्तो भ्रमन् क्वचित् । मयाऽयं परमार्थेन प्रीणितो मित्रकारणात् ॥२८॥
मुनिनाऽहं समं यातः कनकश्रीनिकेतनात् । सोऽहमन्तरमतिक्रम्य दीक्षितोऽस्मि तदन्तिके ॥ २९ ॥
श्रुत्वा मद्वचनं क्रुद्धा मिथ्यात्वं प्राप्य तत्क्षणात् । मृत्युमासाद्य सञ्जाता व्यन्तरीयं भयानका[6] ॥ ३० ॥
मां तपस्स्थं प्रविज्ञाय विभङ्गज्ञानतः[7] स्फुटम् । तेन वैरानुबन्धेन चकारेन्द्रियघर्षणम् ॥ ३१ ॥
मासोपवासयुक्तस्य त्वन्मन्दिरमुपेयुषः । मोचनार्थं स्थितस्येयं चकारेन्द्रियघर्षणम् ॥ ३२ ॥
मासोपवाससमाप्त्यन्ते धर्मवत्सा त्वयेप्सितम् । कृतं तत्पटयोगेन[8] तदानीं तन्निवारणम् ॥ ३३ ॥
स्वगृहे मोचनं कृत्वा सोपसर्गविनिर्मितः[9] । गत्वा ध्याने स्थितस्तत्र कायोत्सर्गेण तस्थिवान् ॥ ३४ ॥
दग्ध्वा ध्यानाग्नियोगेन घातिकर्मेन्धनानि मे । केवलज्ञानमुत्पन्नं लोकालोकावलोकनम् ॥ ३५ ॥
नवयौवनसंपूर्णा विनयसम्बन्धमामके । अमोघेयं मया मुक्ता[10] तपो येन प्रकुर्वता ॥ ३६ ॥
पश्चात्तां प्राप्तया सद्यो मिथ्यात्वं मतयाऽन्यया । उपसर्गः कृतो मे हि व्यन्तरीत्वमुपेतया ॥ ३७ ॥
यत्प्रोक्तं त्वया भद्रे सम्यक्त्वरत्नमुपेतया । उपगूहनकारिण्या स्फारं तद्विचिन्तितं मया ॥ ३८ ॥[11]
इति केवलिना प्रोक्ते स्ववृत्तान्ते सुरासुराः । विस्मयं परमं प्राप्य नेमुस्तं नतमस्तकाः ॥ ३९ ॥
आखण्डलादयो देवा नत्वा केवलिनं मुदा । चेलनादिजनाः सर्वे जग्मुस्ते निजमालयम् ॥ ४० ॥
निहत्य शेषकर्माणि दग्धरज्जुसमानि स । वैशाखकेवली[12] मुक्तिं प्राप्तवान् सुखसागराम् ॥ ४१ ॥
यथा चेलनया भूने कृतं यत्युपगूहनम् । तथाऽन्येनापि कर्तव्यं धर्मयुक्तस्य कस्यचित् ॥ ४२ ॥

॥ इति चेलनामहादेवीकृत वैशाखस्योपगूहनाख्यानकमिदम् ॥ ८ ॥

1 फ धर्मं. 2 प विशाखाखं. 3 फ जिनस्तनं 4 पज्ञ ध्यानेनामी 5 प वन्दितः. 6 प विमाख्यस्, ज विमावस्त. 7 प भयानिता. 8 प घट्टयोगेन. 9 फ सोपसर्गो विनिर्मित 10 प मुक्त्वा. 11 पजञ उपगूहनम्. 12 प विशाख ज विशाख

९ श्रेणिकनृपकथानकम् ।

अथास्ति मगधे देशे नगरं बहुभूतिकम् । धनदस्येव शोभाढ्यं सद्राजोपपदं गृहम् ॥ १ ॥
सम्यग्दर्शनसंपन्नः प्रतापाक्रान्तशात्रवः । राजपूर्वगृहे राजा श्रेणिकः पाति गुरुधीः ॥ २ ॥
रूपयौवनसंपन्ना नीलोत्पलदलाक्षिका । सुधर्मिणस्तस्य भार्याऽऽसीच्चेलना नाम विश्रुता ॥ ३ ॥
अन्यदाऽऽख्ये सुराधीशो देवमध्ये सुरप्रियः । सद्रत्नकथासक्तः स्वर्गे सौधर्मनामनि ॥ ४ ॥
मर्त्यलोके समस्तेऽपि श्रेणिकादपरस्य च । सम्यक्त्वं क्षायिकं नास्ति सुरेन्द्रेणेति भाषितम् ॥ ५ ॥
सुरेन्द्रवचः श्रुत्वा तस्य सम्यक्त्वप्रशंसनम् । श्रेणिकस्य पुरः प्राप कोऽपि देवोऽत्यसूयकः ॥ ६ ॥
मुनिरूपं समादाय तद्वनसरोवरे । बृहज्जालकलापेन जग्राह शफरानयम् ॥ ७ ॥
अत्रान्तरे महाराजः श्रेणिकश्चतुरङ्गया । सेनया सहितो द्रष्टुं सरोवरमगात् पुरः ॥ ८ ॥
स्तोकमन्तरमतिक्रम्य यावद्व्रजति भूपतिः । तावत्सरोवराभ्याशे संयतं पश्यति स्म सः ॥ ९ ॥
आदाय मीनसंघातं करेणानायतं स्थले । पिटके निक्षिपन्तं तं रोमाञ्चार्चितविग्रहम् ॥ १० ॥
दूराद्विलोक्य तं राजा हस्तिनो मदशालिनः । उत्ततार महाभक्त्या जिनाज्ञापालनोद्यतः ॥ ११ ॥
त्रिः परीत्य च तं भक्त्या कुड्मलन्यस्तपाणिकः । ववन्दे हृष्टचित्तोऽसौ जानुस्पृष्टमहीतलः ॥ १२ ॥
श्रेणिकोऽस्य पुरः स्थित्वा विनयानतविग्रहः । जगाद तं मुनिं धीरो धीरगम्भीरया गिरा ॥ १३ ॥
त्वयाऽनेन लिङ्गेन मोक्षमार्गप्रवर्तिना । न मीनहिंसनं कर्तुं युक्तं संसृतिबन्धनम् ॥ १४ ॥
मम त्वं प्रेक्षणं देहि मत्स्यबन्धनकारणे । पिटके स्वेन मुञ्चामि साधो त्वं दूरतो भव ॥ १५ ॥
श्रेणिकस्य वचः श्रुत्वा किंचिन्नोवाच संयतः । जालं समर्पयामास नृपेन्द्रस्य कुतूहलात् ॥ १६ ॥
यथा सरोवरे यावज्जालं क्षिपति गुरुधीः । तावन्निवार्य तं प्राह विरतो हृदि विस्मितः ॥ १७ ॥
शफरैरपरै राजन् न किंचिन्मे प्रयोजनम् । उचितं स्वगृहं याहि जिनशासनभावितः ॥ १८ ॥
राजाऽन्यस्य करे कृत्वा जालं मीनकदम्बकम् । तदान्वितः समं तेन विवेश निजमन्दिरम् ॥१९॥
अथ सिंहासनारूढे यावदास्ते स्ववेश्मनि । तावदुपवनस्योर्वी शुभामेति वचो नृपः ॥ २० ॥
कथं जालेन गृह्णाति मुनिर्मत्स्यान् स्वपाणिना । कथं वा नृपतिर्भक्तिं करोत्यस्य विमूढधीः ॥ २१ ॥
महापरसामन्तमस्तकोपात्तशासनः । तथाप्यसत्पतिमूढो निर्देशं कुरुतेऽस्य किम् ॥ २२ ॥
स्वसामन्तवचः श्रुत्वा जिनशासनदूषणम् । तन्मोहनविनोदाय दध्यौ कार्यं महीपतिः ॥ २३ ॥
ग्रामपत्तनदेशानां पत्रिकाशासनानि च । वेष्टयित्वोपरि स्पष्टं पुरीषेणातिपूतिना ॥ २४ ॥
जिनशासनमहानिन्दातत्परेभ्यः कुशाग्रधीः । नृपतिभ्यो ददौ राजा श्रेणिको जिनभाक्तिकः ॥२५॥
आदाय ताः स्वहस्तेन दुर्गन्धामोदिताशकाः । करेण पुष्पसंसर्गैर्धैर्विदधुर्निजमस्तके ॥ २६ ॥
यावत्ते मस्तके कुर्युः शासनानि च पत्रिकाः । गूथावगुण्ठितास्तावज्जगादेति नताननम् ॥ २७ ॥
गूथावगुण्ठितांश्चैव पत्रिकागुण्ठिकादिकम् । स्वमस्तके कृतं कस्माद् भवद्भिस्तद्वदन्तु मे ॥ २८ ॥
श्रेणिकस्य वचः श्रुत्वा ते वदन्ति नरेश्वरम् । भवत्प्रसादतोऽस्माकं गूथं के कुङ्कुमायते ॥ २९ ॥
स्वसामन्तोदितं श्रुत्वा प्रमाणेतान् पुरःस्थितान् । तदुक्तमाकर्ण्य तान् प्राकार्षीत् शिरःकृतकरद्वयान् ॥३०॥
मद्गृह्यार्के यथा सर्वमेतद्वै पत्रिकादिकम् । युष्माभिर्विहितं भक्त्या शिरसि प्रणतात्मकैः ॥ ३१ ॥

---

1 क करेणानायतं., [करेणानायत]. 2 पज गुरुधी, ज गुरुधी, 3 पज श्रेणी, [श्रेणी]. 4 पज मिरेतर. 5 क निरमम् पज विरुमीरम्, 6 क निमजुवरा 7 प विरमर्थित: 8 पप गुरुधीः, ज दुष्कमीरम्, 9 [दुष्कर्मा]. 10 पज यदाथे 11 प मस्तके. 12 पक दुरिता 13 प कमल इन. 14 क तदुक्तमाकर्ण्य [तदुक्तमाकर्ण्य]. 15 [कर्ते मस्तं].

मीनमन्यनस्थस्य मुनिरूपानुकारिणः । जिनभक्त्या त्वयाऽस्वामिन् प्रकृतं वन्दनादिकम् ॥ ३२ ॥
यावदेव नृपस्येषां विदधाति प्रबोधनम् । दिव्यरूपः पुरस्तावदभूत्तावत् स धीवरः ॥ ३३ ॥
हारराजितवक्षस्कः कर्णकुण्डलभासितः । जगौ तदा सभामध्ये श्रेणिकं विबुधो हसन् ॥ ३४ ॥
शङ्कादिदोषनिर्मुक्तं रविकोटिकरोज्ज्वलम् । सम्यक्त्वं श्रेणिकस्यैव भाति नान्यस्य भूतले ॥ ३५ ॥
इदं सुरवरेन्द्रेण शंसितं सुरसंसदि । श्रुत्वा 'सर्वमसह्यस्य' प्राप्तोऽहं भवदन्तिकम् ॥ ३६ ॥
कृतं धीवररूपं मे त्वत्परीक्षणहेतुना । साम्प्रतं गतसंदेहो भवद्दर्शनकारणात् ॥ ३७ ॥
दिव्यं मुक्तामयं हारं हस्तान्यस्तमसं करे । श्रेणिकायेन्द्रनूताय दत्त्वा देवो दिवं ययौ ॥ ३८ ॥
जिनभक्तिं परां दृष्ट्वा हारदाने सुरेण च । श्रुत्वा भूगोचरस्यापि श्रेणिकस्येन्द्रवर्णनम् ॥ ३९ ॥
केचित् परिग्रहं हित्वा बाह्याभ्यन्तरभेदकम् । महाव्रतधरा धीरा बभूवुः श्रमणास्तदा ॥ ४० ॥
केचिच्छ्रावकतां प्राप्ताः केचित्सम्यक्त्वतोषिणः । केचित्प्रशंसनं कुर्युः जिननाथस्य शासने ॥ ४१ ॥
यथा श्रेणिकभूपेन्द्रः सत्सम्यक्त्वविभूषितः । पूज्यः सुरेन्द्रतः प्राप्तस्तथान्योऽपीह तत्समः ॥ ४२ ॥

॥ इति श्रीसम्यक्त्वसमन्वितश्रेणिकोपगूहनाख्यानकमिदम् ॥ ९ ॥

*

१० सोमशर्म-वारिषेणकथानकम् ।

पूर्वोक्तभवने श्रीमान् श्रेणिकः श्रीपतिः प्रभुः । आसीत्तस्य प्रिया भार्या चेलना श्रीगुणालया ॥ १ ॥
सम्यग्दृष्ट्योस्तयोः सज्जातस्तनुभवान्वितः । वारिषेणो बभूवायं गुणसंस्थानवारिधिः ॥ २ ॥
चतुर्दश्यां स सर्वस्येष प्रोषधं प्रविधाय च । एकवस्त्रधरो धीरः शर्वरीप्रतिमामधात् ॥ ३ ॥
अत्रैव नगरे ख्याते विद्युच्चोरोऽभवत् तदा । अञ्जनादिकसत्सिद्धिगुटिकासिद्धिकोविदः ॥ ४ ॥
तत्प्रिया गणिका चासीत् कामाग्नितिलका यथा । कामिलोकमनःपालोकस्तम्भनैकवागुरा ॥ ५ ॥
अथ मुक्तामयं हारं सूत्रेण परिवर्जितम् । सुरदत्तं स्वतेजोभिर्धवलीकृतखाङ्गनम् ॥ ६ ॥
इमं कामलताभिख्या विलोक्य गणिकाऽभवत् । चेलनाग्रमहादेव्या वने यान्त्या ज्वरातुरा ॥ ७ ॥
हारलोभग्रहग्रस्ता तापज्वरसमन्विता । विद्युच्चोरप्रिया तस्थौ खट्वामाश्रित्य मूर्च्छिता ॥ ८ ॥
अत्रान्तरे समायातो विद्युच्चोरो निजं गृहम् । तत्र पश्यति भार्यां च खट्वासुप्तां ज्वरातुराम् ॥ ९ ॥
उत्तिष्ठ किं प्रिये शेषे देहि मे वचनं शुभम् । किं स्थिताऽसि विना कार्यं ब्रूहि किं करवाणि ते ॥ १० ॥
स्नेहवाक्यं समाकर्ण्य जगादेवं नितम्बिनी । तवोपरि न मे कोपः किंतु मद्वचनं शृणु ॥ ११ ॥
दिव्यो हारो मया दृष्टो भासुरश्चेलनागले । तदभावे ज्वरग्रस्ता तिष्ठामि सुखवर्जिता ॥ १२ ॥
श्रुत्वा कामलतावाक्यं विद्युच्चोरो जगाद ताम् । आनयामि तव क्षिप्रं हारमुत्तिष्ठ सुन्दरि ॥ १३ ॥
विश्रम्भीकृत्य तां कान्तां निःसृत्य निजमन्दिरात् । मोहयित्वा नरान् सर्वान् राजागारस्थवसितान् ॥ १४ ॥
क्रमेण श्रेणिकावासं प्राप्य द्वारभेदनम् । विधाय सर्पपातैर्विनिःश्रायं तदन्तिकम् ॥ १५ ॥
राजमानम् तं हारं द्योतिताकाशमण्डलम् । तन्मन्दिरनगोपुरान्निर्ययौ त्वरितं स च ॥ [illegible] ॥
गतनिद्रैर्नरैर्दृष्टो हारोद्योतेन तस्करः । तन्मार्गतोऽनुधावद्भिर्निरुद्धः भीमयष्टिभिः ॥ १७ ॥
चितास्थानस्थितस्यास्य वारिषेणस्य धीमतः । मुमोच तस्करो हारं चरणोपरि वेगतः ॥ १८ ॥

---

1 क दिव्यकम्, पञ्च दिव्यकमिदम्. 2 ख गर्जेयः, क सर्वेन्द्र. 3 क चतुष्कम्, पञ्च चतुष्कुम्भदिदम् 4 ख मुक्तम्, क मुक्तम्, ज मुक्तमिदम्. 5 Mss. are not regular in putting इति but I have uniformly used it 6 ख मुक्तम्, क मुक्तम्, ज मुक्तमिदम्. 7 क अद्यां 8 ख मे

हारोऽस्यैतेन संप्राप्य कायोत्सर्गस्थितं तदा । वारिषेणं प्रपश्यन्ति ते नराः शस्त्रपाणयः ॥ १९ ॥
भार्यासमन्वितस्यास्य श्रेणिकस्य क्षितिक्षितः । वारिषेणं सहारं च तस्करं निगदन्ति ते ॥ २० ॥
सुतवार्तां समाकर्ण्य हारचोरणसम्भवाम्[1] । आदिदेश तत्क्षणं राजा पुत्रनिग्रहणाय सः ॥ २१ ॥
आगत्य यावदेतेऽपि युगपच्छस्त्रघातयत् । शिरश्छेदं प्रकुर्वन्ति तस्य प्रासासिसायकैः ॥ २२ ॥
व्रतस्थैर्यसमेतस्य वारिषेणस्य तत्क्षणात् । आयुधानि समस्तानि प्रययुः पुष्पमालताम् ॥ २३ ॥[2]
तस्योपरि कलं मन्द्रं दुन्दुभिर्नदति स्फुटम् । गन्धोदकं तथा देवा ववृषुः कृतसंस्तवाः ॥ २४ ॥
भूयोऽपि तं परिप्राप्य निगदन्ति नरोत्तमाः । शस्त्राणि पुष्पमालाः स्युर्वारिषेणस्य भूपते ॥ २५ ॥
दुन्दुभिस्ताडितो देवैस्तस्योपरि नभोगतैः । गन्धोदकमपि क्षिप्रं प्रमुक्तं गन्धसुन्दरम् ॥ २६ ॥[3]
राजा निशम्य तद्वाक्यं हृष्टरोमा जगौ प्रियाम् । तोषपूरितसर्वाङ्गीं नितान्तं विकसन्मुखीम् ॥ २७ ॥
अमलकुलनभश्चन्द्र श्रीमित्याक्षेपभूतल । वारिषेणः कथं कान्ते चौर्यं विदधात्ययम् ॥ २८ ॥[4]
जानताऽपि मया भद्रे सद्भावं तस्य शोभनम् । तथापि हिंसने बुद्धिर्मूढेन विहिता कथम् ॥ २९ ॥
सद्भूतं चौरमप्येष पक्षपातात् प्रमुञ्चति । परं साधुमपि क्षिप्रं निहन्ति निजकारणात् ॥ ३० ॥
मया जनभयात् कर्तुं प्रारब्धं मारणं सुते । अयं तु रक्षितः पुण्यैः स्वकीयैरमरैरपि ॥ ३१ ॥[5]
यावदेषोऽनया सार्धं जल्पतीदं महीपतिः । तावद्व्योम्नि सुरैस्तूर्यैर्गम्भीरं ध्वनितं तदा ॥ ३२ ॥
श्रेणिकश्चेलनालोकः सर्वो विस्मितमानसः । वारिषेणान्तिकं प्राप प्रभातसमये सति ॥ ३३ ॥
कायोत्सर्गं विहायायं वारिषेणोऽर्कोदये । उपविष्टो वरपृष्ठे वैराग्याहितमानसः ॥ ३४ ॥
नृपश्चेलनया सार्धं पादावाराध्य जल्पति । क्षमस्व मे त्वमज्ञस्य पुत्र महोग्रभूपते ॥ ३५ ॥
पुनरर्पितसङ्क्लेशमशोपसर्गितामर । भविकलोचनानन्द प्रोत्थाय स्वगृहं व्रज ॥ ३६ ॥[6]
पित्रोर्वचनमाकर्ण्य तदानीं पादलग्नयोः । वारिषेणो जगादेतौ बाष्पविप्लुतलोचनौ ॥ ३७ ॥
उपसर्गोऽयमस्माकं यदि क्षेमेण यास्यति । ततो वयं करिष्यामः पाणिपात्रेण पारणम् ॥ ३८ ॥[7]
एवं विनिश्चयं ज्ञात्वा वारिषेणस्य धीमतः । श्रेणिकश्चेलनालोको विवेश निजमन्दिरम् ॥ ३९ ॥
हित्वा परिग्रहं सर्वं वारिषेणो विशुद्धधीः । धर्मसेनगुरोः पार्श्वे तपो जैनमशिश्रियत् ॥ ४० ॥
पुष्पालमठपुत्रेण मित्रेण सोमशर्मणा । पलाशोपपदे कूटे ग्रामेऽनेन निवासिना ॥ ४१ ॥
वीरं नन्तुं भ्रमन् षष्ठे वारिषेणोऽन्यवासरे । प्रीणितः परमान्नेन विधिना मित्रकारणात् ॥ ४२ ॥
प्रियां दृष्ट्वा[8] स्थितोऽनेन सह लोकस्थितिं विदन् । सोमशर्मा पुरो वीक्ष्य क्षीरवृक्षं जगावमुम् ॥ ४३ ॥
वटवृक्षं मुने पश्य तथा ह्यस्य सरोवरम् । प्रबुद्धपद्मसंघाते गन्धागतमधुव्रतम् ॥ ४४ ॥[9]
इदं प्रदर्शयन् तस्य सोमशर्मा हृष्यपि । नाभाषि प्रभुणा किंचिद्विश्वस्तत्वादनेन सः ॥ ४५ ॥
वारिषेणोऽपि संप्राप सहसा सोमशर्मणा । क्रमाद् वीरजिनेन्द्रस्य सरणं समवादिकम् ॥ ४६ ॥
स्तुत्वा वीरं यथायोग्यं संवन्द्य च दिगम्बरान् । वारिषेणोऽमुना सार्धं स्वस्थाने समुपाविशत् ॥ ४७ ॥
वारिषेणसमीपे च दृष्ट्वा तं समवस्थितम् । कोऽपि साधुर्जगौ वाक्यं सहासं धीरसंसदि ॥ ४८ ॥
अयं पुण्यगृहीतात्मा सोमशर्मा विशुद्धधीः । सखाऽत्र वारिषेणेन तपः कर्तुं समागतः ॥ ४९ ॥
श्रुत्वा तद्वचनं मित्रो विलक्षः सदसि द्रुतम् । अभ्यागमनकाङ्क्षो जगाद परमं तरः ॥ ५० ॥
अथ वीणां समादाय सन्मनोहरपञ्चमाम् । किन्नरैः किन्नरीयुक्तैः प्रारेभे गीतमुत्तमम् ॥ ५१ ॥

---

1 क चोरणसंभवम्. 2 चफ युग्मम्, ज युगलमिदम्. 3 च युग्मम्, फ युग्मम्, ज युगलमिदम्. 4 फ चतुष्कम्, फज चतुष्कमिदम्. 5 चफ युग्मम्, ज युगलमिदम्. 6 च युग्मम्, फ युग्मम्, ज युगलमिदम्. 7 फ दृष्ट्वा 8 च युग्मम्, फ युग्मम्, ज युगलमिदम्. 9 फ सता.

कुवलयदलसमरुचिनयने सरसिजदलनिभकरचरणे ।
श्रुतिसुखकरपरमृतकलवचने कुरु जिननुतिमिमि सखि विधुवदने ॥ ५२ ॥
बहुमलमलिनशरीरा मलिनकुचेलाधिविगततनुशोभा ।
त्वद्गमनदग्धहृदया शोकातपशुष्कमुखकमला ॥ ५३ ॥
विमना गतलावण्या वरकान्तिकलापपरिमुक्ता ।
किं जीविष्यत्यवनिका नाथेऽपि गतेऽप्ययं मोक्षम् ॥ ५४ ॥[1]

कलगीतमुपश्रुत्य सोमशर्मा जिनान्तिकात् । चचाल सोमिलावासं प्रति निश्चितमानसः ॥ ५५ ॥
विज्ञाय सोमशर्माणं गतं विकारगीततः । जिनाज्ञां प्राप्य तत्पश्चाद् वारिषेणो विनिर्ययौ ॥ ५६ ॥
संप्राप्य सोमशर्माणं वारिषेणो जगाविदम् । प्रथमं मद्गृहं यावो यास्यावस्त्वद्गृहं पुनः ॥ ५७ ॥
श्रुत्वा तद्वचनं रम्यं सानुकम्पाप्रीतमानसः । सोमशर्माऽमुना सार्धं वारिषेणगृहं ययौ ॥ ५८ ॥
गृहागतं समालोक्य[3] वारिषेणं ससंभ्रमम् । सोमशर्मसमायुक्तं चेलनापि तमग्रहीत् ॥ ५९ ॥
स्वहस्तेन समानीय सरागं कृतरासनम् । परीक्षार्थं ददौ चान्यद्वीतरागं हि चेलना ॥ ६० ॥
वीतरागे[4] समासीनो वारिषेणो महामुनिः । सरागे सोमशर्मा च स्थिरे मूढमानसः ॥ ६१ ॥
नमस्कारं विधायास्य वारिषेणस्य तत्क्षणम् । चेलना मुक्तचेतस्का तस्थौ तत्पुरतो मुदा ॥ ६२ ॥
विलोक्य मातरं पुत्रो जगौ तां भ्रान्तमानसाम् । आनय त्वरितं मातर्वधूसंघं मदन्तिकम् ॥ ६३ ॥
वारिषेणवचः श्रुत्वा दृष्टिसंज्ञं प्रविधाय सा । वधूनामन्तिकं शीघ्रं सदानयनकारणात् ॥ ६४ ॥
ततो यावद्वधूसंघो नूनमागच्छति प्रभो । तावद्धर्मकथां ब्रूहि कर्णामृतरसायनम्[5] ॥ ६५ ॥
जननीवाक्यमाकर्ण्य वारिषेणो जगाद ताम् । त्वमेव प्रथमं ब्रूहि बहुजन्मनिमित्तवः ॥ ६६ ॥
निशम्य भारतीमस्य विपाककठिनचेतसः । जगौ कथानकं रम्यं चेलना धर्मभाविता ॥ ६७ ॥
कस्मिंश्चिदपि पुरे भद्र सुभद्रा वनिताऽभवत् । तस्याः पुत्रः सुभद्राख्यो गोवत्सपरिपालकः ॥ ६८ ॥
अन्येद्युर्भक्षिता क्षीरी सुभद्रेण मनोहरी । अन्येन केनचिद्दत्ता गोपालेन सरोवरे ॥ ६९ ॥
उक्ता माता सुभद्रेण गृहं भक्तान्नवासरे । अम्बिके क्षीरिकां देहि मह्यं त्वं पुत्रवत्सले ॥ ७० ॥
तयाऽन्यापि पुनः पुत्रो न दुग्धं न च तन्दुलाः । कथं सुत भवेत् क्षीरं वदाद्य शुभ साम्प्रतम् ॥ ७१ ॥
सुभद्रावचनं श्रुत्वा सुभद्रः प्राह तां पुनः । ददासि मे यदि क्षीरं[6] ततो रक्षामि वत्सकान् ॥ ७२ ॥
तदाग्रहं परिज्ञाय फल्गुरेः सुतस्य च । सुभद्रस्य तया क्षीरिः[7] प्रविपक्वा सुभद्रया ॥ ७३ ॥
याचयित्वा परं दुग्धं तन्दुलानपि मातृका । तत्संस्कारविधिं कृत्वा ददौ क्षीरीं सुताय सा ॥ ७४ ॥
महागर्द्धिसमेतेन भक्षिता साऽमुनाऽखिला । भूयः प्रार्थयितः क्षिप्रं तया पात्रे प्रतीक्षिता ॥ ७५ ॥
भूयोऽपि भक्षिता मातर्देहि मे तां मुहुर्मुहुः । तत्प्रार्थिता तया दत्ता भक्षिता तेन साखिला ॥ ७६ ॥
ततो मुनेऽस्य किं युक्तं वत्सपालस्य निन्दितम् । सर्वभक्षणकं कर्तुं ब्रूहि मे तत्सुसंमत ॥ ७७ ॥

तथा चोक्तम्—

यानीह दत्तानि पुरा नरेन्द्रैर्दानानि धर्मार्थयशस्कराणि ।
निर्माल्यवत्संप्रति मानितानि को नाम साधुः पुनराददीत ॥ ७८ ॥

चेलनावचनं श्रुत्वा वारिषेणो जगाद ताम्[8] । जिनधर्मसमासक्तजातनिश्चलमानसाम् ॥ ७९ ॥
उज्जयिन्यां पुरि ख्यातो वसुपालो नराधिपः । आसीदस्य प्रिया तन्वी परा वसुमती सती ॥ ८० ॥

1 क कमलदल. 2 क निश्चलम्, पज निश्चलमीरम्. 3 क समालोक्य. 4 क वीतरागे ख वीतरागे. 5 पज रसायनम्. 6 क क्षीरि. 7 पज क्षीरि. 8 क जगाद्वै.

अनयो रूपसंपन्ना सुता गुणवती प्रिया । कुमारी लोकविख्याता नारीगुणगणोदधिः ॥ ८१ ॥
अन्यदा सा सुखं सुप्ता शयनीये मनोहरे । कुतोऽप्यागत्य वेगेन दष्टा सर्पेण कोपिना ॥ ८२ ॥
ततस्तत्क्षणमात्रेण विषव्याप्तशरीरका । निश्चेष्टीभूतसर्वाङ्गी कुमारी सहसाऽभवत् ॥ ८३ ॥
सुतावार्तां समाकर्ण्य दन्दशूकसमुद्भवाम् । तत्पिताऽऽहूतवानाशु भिषजान् विषघातिनः ॥ ८४ ॥
ततः समागताः सर्वे तत्पत्तननिवासिनः । उपविष्टा यथास्थानं तदानीं मतिमानिनः ॥ ८५ ॥
तान्भूपतिरिति संमान्य तत्पिता भिषगादिमान् । मत्सुताजीवनं सन्तः कुर्वन्तु मतिशालिनः ॥ ८६ ॥
चिरेणापि विधायाशु भूपतिं निगदन्ति ते । त्वत्सुतासंग्रहोऽस्माकं राजन् सिध्यति नो स्फुटम् ॥ ८७ ॥
ततस्तद्वचनस्यान्ते धन्वन्तरिरिमं जगौ । शक्नोमि नागमानेतुं त्वत्सुतोत्थापनं न तु ॥ ८८ ॥
धन्वन्तरिवचः श्रुत्वा वसुपालो जगाविमम् । अष्टनागकुलाह्वानं कुरु त्वं मण्डलं च भोः ॥ ८९ ॥
अनन्तं वासुकिं चैव कर्कोटं तक्षकान्वितम् । तथा पद्ममहापद्मौ कुलिकं शङ्खपालकम् ॥ ९० ॥
एतान् सर्वान् समाहूय मण्डलस्थविगतानरम् । धन्वन्तरिरसौ चक्रे वसुपालनिदेशतः ॥ ९१ ॥
अग्निकुण्डं विधायोच्चैः खदिराङ्गारसंभृतम् । धन्वन्तरिस्त्वथैतान् सकलानपि भोगिनः ॥ ९२ ॥
वसुपालसुता दष्टा येन पापेन भोगिना । स परं तिष्ठतु क्षिप्रं यान्त्वन्ये मण्डलाद्बहिः ॥ ९३ ॥
विषघातिवचः श्रुत्वा सप्तनागकुलान्यगुः । कुलिकस्तु सदोषत्वात्तस्थौ तत्रैव मण्डले ॥ ९४ ॥
धन्वन्तरिरमुं प्राह नागं कुलिकसंज्ञकम् । गृहाणात्मविषं पाप विशाग्निं वाऽर्चिषोज्ज्वलम् ॥ ९५ ॥
धन्वन्तरिगिरं श्रुत्वा दन्दशूकोऽपि तद्विषम् । विहाय निर्भयो मंक्षु अग्निकुण्डं विवेश सः ॥ ९६ ॥

तथा चोक्तम्—

वरं प्रविष्टं ज्वलिते हुताशने न चापि भग्नं चिरसंचितं व्रतम् ।
वरं हि मृत्युः सुविशुद्धकर्मणां न शीलवृत्तस्खलितस्य जीवितम् ॥ ९७ ॥

स्वरूपलेखलोकाभैर्जितशत्रुधनूजनम् । रत्नाभरणभाभारभासिताभ्रसमुज्ज्वलम् ॥ ९८ ॥
पादनूपुरझंकारबधिरीकृतदिङ्मुखम् । अन्तःपुरं कृतानन्दं संप्रापयेन्नान्तिकम् ॥ ९९ ॥
निरीक्ष्यान्तःपुरं सर्वं सोमशर्ममुनिं तदा । जगाद वारिषेणोऽपि भोगनिःस्पृहमानसः ॥ १०० ॥
अन्तःपुरमिदं कान्तं मणिहस्तितुरङ्गमान् । सोमशर्मन् गृहाण त्वं मदीयं सकलं धनम् ॥ १०१ ॥
वारिषेणोदितं श्रुत्वा सोमशर्माऽतिविस्मितः । वैराग्याहितचेतस्को दध्यौ मनसि धीरधीः ॥ १०२ ॥
अहो त्यागो महानस्य अहो धैर्यमहो तपः । अहो सत्त्वमहो वीर्यमहो कान्तिरहो महः ॥ १०३ ॥
अहो वचनसौभाग्यमहो रूपमहो गुणः । अहो शीलं गुणागारमहो विनयकारणम् ॥ १०४ ॥
एवं विचिन्त्य शुद्धात्मा कान्तासुखविरक्तधीः । वारिषेणं जगौ धीरं सोमशर्मा गुणाकरम् ॥ १०५ ॥
नूनं निर्मुक्तिमायातं मित्रत्वं तव शोभनम् । मां नियोजयतो मुक्तेर्मार्गे रत्नत्रयात्मके ॥ १०६ ॥
तस्मादुत्तिष्ठ यास्यावो महावीरजिनान्तिकम् । विधायालोचनां तत्र शोधनं नो भविष्यति ॥ १०७ ॥
सोमशर्मोदितं श्रुत्वा तत्सर्वं निरमायतः । जननीनन्दितो भक्त्या वारिषेणो महामतिः ॥ १०८ ॥
केवलामलनेत्रस्य सुरासुरनतस्य च । क्रमेण वीरनाथस्य समीपं प्राप्तवानसौ ॥ १०९ ॥
आलोचनाविधिं कृत्वा तत्सकाशे प्रशान्तधीः । महावैराग्यसंपन्नः सोमशर्मा मुनिर्बभौ ॥ ११० ॥

---

1 पज्ञ धर्मोऽस्माकं राजन् वैश्वासि भो 2 फ कुतोऽप्यागत्य 3 फ मण्डलं च मे 4 फ यथा 5 प दन्दशूकेन, 6 प कुम्भम्, फ कुम्भम्, ज्ञ कुम्भमिदम्, 7 फ वल्ली. 8 फ सोमशर्मणे° 9 प कुम्भम्, फ कुम्भम्, ज्ञ कुम्भमिदम्, 10 फ वसुधाधनम्, पज्ञ वसुधाधनमिदम्. 11 जननी.

यथा कृतः स्थिरीकारो वारिषेणेन तस्य सः । भार्यानिहितचित्तस्य सुतरां सोमशर्मणः ॥ १११ ॥
तथान्येनापि धीरेण धर्मभावितचेतसा । कर्तव्यो धर्मयुक्तस्य सम्यक्त्वाद्विच्युतस्य वै ॥ ११२ ॥

॥ इति श्रीसोमशर्मवारिषेणस्थिरीकरणकथानकमिदम् ॥ १० ॥

*

११ विष्णुकुमारकथानकम् ।

अथोऽवन्तीमहादेशे श्रीमदुज्जयिनी पुरी । तस्यां बभूव राजेन्द्रः श्रीधर्मा श्रीधरो महान् ॥ १ ॥
प्रियंवदा महाभार्या नामतः श्रीमती परा । कलाविज्ञानसंपन्ना श्रीमती भूपतेरभूत् ॥ २ ॥
बलिर्बृहस्पतिश्चैव प्रह्लादो नमुचिस्तथा । चत्वारो मन्त्रिणस्तस्य भूपतेरभवन् प्रियाः ॥ ३ ॥
अकम्पनादियोगीन्द्राः श्रुतसागरपारगाः । तदुद्यानवनं प्राप्ता विहरन्तः सलीलया ॥ ४ ॥
एकं दिनं तदुद्याने स्वाध्यायगतचेतसाम् । अकम्पनमुनिः सर्वेषां ददौ मौनं महामतिः ॥ ५ ॥
एको मुनिर्न तन्मध्ये केवलं श्रुतसागरः । भिक्षाय नगरं यातः स्थितस्तत्राङ्गनेच्छया ॥ ६ ॥
सौधोपरि स्थितो यावन्मन्त्रिभिः सह तिष्ठति । तावत्पश्यत्ययं लोकं व्रजन्तं वनसन्मुखम् ॥ ७ ॥
ततोऽप्राक्षीत्तदा राजा मन्त्रिणो निकटस्थितान् । ब्रूत लोकः किमर्थं भो वनं याति विनोत्सवम् ॥ ८ ॥
निशम्य भूपतेर्वाक्यं तदानीं तं जगौ बलिः । आययुस्त्वत्पुरोद्याने श्रमणा नग्नरूपिणः ॥ ९ ॥
गृहीत्वा सर्वभावेन पुष्पपूजाक्षतादिकम् । तद्वन्दनायमायाति तत्कृते निखिलो जनः ॥ १० ॥
बलिवाक्यं समाकर्ण्य भूपश्चकितमत्सरः । उवाच तं तदा धीरस्तदालोकनकौतुकः ॥ ११ ॥
तदेहि तद्वनं यावो गत्वा तान् मुनिपुङ्गवान् । श्रुत्वा धर्मं दयाढ्यं च समेष्यामो गृहं ततः ॥ १२ ॥
बलिः प्रोवाच भूपोऽसि भूपस्य वचनादिमम् । धर्मस्य लोकमध्यस्य वेदो मूलं मतेश्वर ॥ १३ ॥
या श्रुतिः स भवेद्वेदो धर्मशास्त्रं स्मृतिः स्मृता । सकलेष्वेषु मीमांसा यमस्ताभ्यां यमो युतः ॥ १४ ॥
श्रुतिस्मृतिमयं धर्ममधितिष्ठति यः सदा । इहत्यं स सुखं प्राप्य प्रभुङ्क्ते नाकजं तथा ॥ १५ ॥
इदं वेदे समुद्दिष्टं वाक्यं जनसुखावहम् । लोके प्रमाणतां यातं ब्रह्मवक्त्रविनिर्गतम् ॥ १६ ॥
यदि पृच्छसि मां भूप धर्मं वेदमतं परम् । सर्वलोककृतं शुद्धं निर्मलं कथयामि ते ॥ १७ ॥
नग्नश्रमणधर्मोऽयं श्रुतिस्मृतिबहिष्कृतः । विप्रभूपपरित्यक्तः संमतो न विपश्चिते ॥ १८ ॥
श्रुत्वा बलिवचोऽनेन भाषितोऽयं महीभुजा । अवश्यमेव गन्तव्यं मुनिपार्श्वे मया बले ॥ १९ ॥
बलिनाप्यथ भूपोऽसि भूपतिर्धर्मधीयुषा । विजिग्ये तानहं वादात् त्वं मध्यस्थो भव प्रभो ॥ २० ॥
राजा तद्वचनं श्रुत्वा कौतुकव्याप्तमानसः । जगाम मन्त्रिभिः सार्धं वनं मुनिसमाकुलम् ॥ २१ ॥
यावत्संभाषणं तत्र कुर्वन्ति मुनिभिः समम् । मौनमादाय तिष्ठन्त्याचलरूपं वदत्स्वलम् ॥ २२ ॥
अक्षमतो मतिभ्रष्टोमी भ्रमभ्रैर्मूढराशिभिः । न किंचिदुत्तरं दत्तं तथापेभ्योऽपि भूपते ॥ २३ ॥
नियम्य मन्त्रिणः साधून् मौनमादाय संस्थितान् । निगदन्ति स्म भूपालं सोपहास्यमनूद्दा ॥ २४ ॥
यदस्माभिः कृतं भूप दोषदं वाग्मिपुङ्गवैः । तद्वत्वान् श्रमणान् प्राप्य विलीनं हृदये च तत् ॥ २५ ॥
तस्मादुत्तिष्ठ गच्छामस्त्वरितं निजमन्दिरम् । न कार्यमन्तरेणात्र स्थानं युक्तं मनस्विनाम् ॥ २६ ॥
एवं निगद्य भूपालं चत्वारोऽपि वनान्तरात् । निजमुक्तोपसंपृक्ता भवनं गन्तुमिच्छवः ॥ २७ ॥

---

1 पक मुण्य् ज मुनय. 2 प वद ज यायो 3 प लोकस्तत्र. 4 पज हेम. 5 पज द्युरूप. 6 प भूरी. 7 प अग्ने. 8 क शिखम्य् पज शिखमतिम.

एकोऽन्यदान् समायाति गर्वहीनः पुरान्तरम् । नग्नरूपधरो राज्ञो दर्शितो बलिना मुनिः ॥ २८ ॥
वने पुरः स्थितं दृष्ट्वा प्राहेदं श्रुतसागरः । आगतोऽसि कुतो भद्र ब्रूहि मे त्वरितं शठ ॥ २९ ॥
बलिस्तद्वचनं श्रुत्वा जगौ स नृपसाक्षिकम् । ज्ञानी त्वं मां न जानासि पुरस्थनगरागतम् ॥ ३० ॥
भवन्तं वेद्म्यहं नूनमिहत्यनगरागतम् । पृच्छामि श्वभ्रतिर्यक्त्वमनुष्यसुरत्वं भवम् ॥ ३१ ॥
श्रुतसागरसद्वाक्यं श्रुत्वा बलिर्जगाद तम् । यते किं कोऽपि जानाति अन्यजन्मभवान्तरम् ॥ ३२ ॥
नृपोऽयं मुनिनाऽवाचि तद्भवान्तरवेदिना । भवद्भवान्तरं वेद्मि शृणु त्वं कथयामि च ॥ ३३ ॥
इहैव नगरे विप्रो स्थाणीरुद्रसंभवः । कोपमानादिसंग्रस्तः कपिलः कपिलोऽभवत् ॥ ३४ ॥
अन्यदा धनलोभेन दम्भादपि कृषाकृषि । शुद्धमासीत्कृताकर्म्यं तव देवगमस्य च ॥ ३५ ॥
अनेन पञ्चतां नीतः कोपात्स्वनिरीक्षणः । करवालसमाघातान्नरकं प्रथमं गतः ॥ ३६ ॥
उत्तीर्य दुःखतस्तस्मादत्रापि क्षयमागते । स्तोकपुण्यानुभावेन बभूव हरिणो वने ॥ ३७ ॥
भूयोऽपि गीतदोषेण कर्मबन्धनहारिणा । व्याधेन पञ्चतां नीतो हरिणो मुग्धमानसः ॥ ३८ ॥
देवकीदेवसंभूतो मिथ्यात्वग्रहदूषितः । जातो मन्त्री नृपस्यास्य साम्प्रतं बलिरुत्तमः ॥ ३९ ॥
यथा च बलिना प्रोक्तं तेन तच्च सुदूषितम् । प्रमाणनयनिक्षेपैः प्रमोक्ते अनेकधा ॥ ४० ॥[4]
राजा तोषं परं प्राप्तः श्रुत्वा बलिभवान्तरम् । या जन्ममूकत्वं स्मार्तं श्रुतसागरयोगिना ॥ ४१ ॥
नत्वा मुनेः पदाम्भोजं श्रुतसागरयोगिनः । विलक्षमतिभिः सार्धं जगाम स्वमन्दिरम् ॥ ४२ ॥
जित्वा वादं सुखव्यस्था तदानीं श्रुतसागरः । अकम्पनगुरोः पार्श्वं प्राप्य तस्थौ प्रणम्य तम् ॥ ४३ ॥
पृष्टस्तु पुरतः सूरिर्वदति स्म कृतागसम् । तत्र विहाय चान्यत्र कायोत्सर्गेण तिष्ठ भो ॥ ४४ ॥
अकम्पनगुरोर्वाक्यं श्रुत्वा हि श्रुतसागरः । हित्वा गणं पुराभ्याशे कायोत्सर्गेण तस्थिवान् ॥ ४५ ॥
श्रुतसागरनामानं मुनिं ध्यानस्थितं निशि । नगराभ्यर्णदेशस्थं दृष्ट्वा क्रूरमन्त्रिणः ॥ ४६ ॥
आदाय करवालानि दधावन्तस्तदा भृशम् । वेष्टयित्वा क्रोधोपेताः सर्वतस्तेऽवतस्थिरे ॥ ४७ ॥
आकृष्टकरनिस्त्रिंशा भ्रुकुटीभीषणाननाः । ललज्जिह्वमुखाभोगाः कोपात्स्वनिरीक्षणाः ॥ ४८ ॥
तत्सपापतत्परिम्या तदा देवतया मुनिम् । परितः स्तम्भितास्तस्याः पदमुद्राप्रभावेन ते ॥ ४९ ॥
दुःखविह्वलचित्तानां मुनिनिन्दाविधायिनाम् । अनयाऽवस्थया तेषां शर्वरी विलयं गता ॥ ५० ॥
प्रभातस्योदये जाते दृष्ट्वा तांस्तत्र संस्थितान् । प्राप्ता राजादयः सर्वे हाहाकारं विधाय ते ॥ ५१ ॥
महाकलकलं श्रुत्वा बधिरीकृतदिङ्मुखम् । लोकानां नृपतिं प्राह देवता गगनस्थिता ॥ ५२ ॥
महावासस्थितं साधुं मुनिं हन्तुं समुद्यतान् । निकारकारिणो हन्मि नृपतेऽद्य त्वदग्रतः ॥ ५३ ॥
देवीवचनमाकर्ण्य नृपतिः प्राह तां पुनः । महात्मतो विमुञ्चार्ये दुर्बुद्धीनानिमानरम् ॥ ५४ ॥
मुमोच नृपवाक्येन देवतैतान् कृतागसः । महतामुपरोधेन प्रसीदन्ति हि देवताः ॥ ५५ ॥
विमुक्तजन्मना सन्तो मुक्ता देव्या नरेशिना । निर्घाटिता द्रुतं देशाद्वसतोऽपि मलीमसाः ॥ ५६ ॥
देवताऽपि मुनिं नत्वा समाप्तनियमं तदा । जगामाप्यस्ततां क्वापि सोपकारा हि देवताः ॥ ५७ ॥
आश्चर्यमिदमाकर्ण्य श्रुत्वा धर्ममतः परम् । केचिच्छ्रावकतां प्राप्ताः केचिन्मध्यस्थतां पराम् ॥ ५८ ॥
नृपोऽपि नमनं कृत्वा मुनेरस्य प्रशान्तधीः । लोके मुनिगुणग्राही जगाम स्वं निकेतनम् ॥ ५९ ॥
उपसर्गजयं कृत्वा नृपलोकनमस्कृतः । जगाम स्वगुरोः पार्श्वं निर्दोषः श्रुतसागरः ॥ ६० ॥

---

1 पज स्थित. 2 °वेदिना. 3 प जनमेन. 4 Only in फ. 5 पज रोषे वरं मतं 6 फ सूर्यमानर्षे for करपकाकि. 7 पफ कुसुम, ज कुसुमसिद्ध. 8 प निश्चितमिष्याविश्रम 9 फ महापद°

यथान्यद्विकृतं जातं येन विधानं तदुच्यते । कुरुजाङ्गलदेशेऽस्ति हस्तिनागपुरं परम् ॥ ६१ ॥
तत्राभवन्महापद्मो नृपतिर्जनवल्लभः । लक्ष्मीमती महादेवी तस्य लक्ष्मीसमन्विता ॥ ६२ ॥
तयोर्द्वौ नन्दनौ जातौ पद्मविष्णुमहाबलौ । विनयाचारसंपन्नौ प्रतापहतशात्रवौ ॥ ६३ ॥
कदाचिद्विहरन्नाप हस्तिनागपुरे वनम् । श्रुतसागरचन्द्राख्यः सूरिराचारपण्डितः ॥ ६४ ॥
महापद्मनृपः श्रुत्वा चन्द्रान्तं श्रुतसागरम् । मुनिं नन्तुं जगामार्यं ससुतो वनमुत्तमम् ॥ ६५ ॥
श्रुत्वा धर्मकथां तत्र दत्त्वा पद्माय स्वपदम् । विष्णुना श्रुतपर्यन्ते महापद्मस्तपोऽग्रहीत् ॥ ६६ ॥
अत्रान्तरे परिप्राप्य हस्तिनागपुरं तके । पूर्वोक्तमन्त्रिणो भूयो जाताः पद्मस्य मन्त्रिणः ॥ ६७ ॥
अथ सिंहबलो राजा कोट्टनामा महाबलः । व्याघ्रसिंहादिभिर्भीमे पर्वतान्ते वसत्यसौ ॥ ६८ ॥
धनधान्यहिरण्यानि रूप्यहस्तितुरङ्गमान् । आदाय पद्मदेशस्य स तस्थौ कोट्टमध्यके ॥ ६९ ॥
स्वदेशलुण्टनं श्रुत्वा पद्मः पद्मदलेक्षणः । हस्त्यश्वरथपादातयुक्तोऽपि हृदि खिन्नवान् ॥ ७० ॥
विमनस्कं तदा पद्मं पद्माऽऽलिङ्गितवक्षसम् । जगादेति गुणावासो बलिर्विज्ञातचेष्टितः ॥ ७१ ॥
मूर्च्छितोऽसि किं राजन् शोकवान् दुःखितोऽसि किम् । यदिष्टं तद्वद क्षिप्रं सर्वं संपादयामि ते ॥ ७२ ॥
मदीयो लुण्ट्यते देशो बले सिंहबलेन च । दुर्गमाश्रित्य दुष्टेन तेन दुःखं ममाधिकम् ॥ ७३ ॥
पद्मस्य वचनं श्रुत्वा बलिरूचे नृप पुनः । वशीकरोमि तं शत्रुं संपश्य धीरतां मम ॥ ७४ ॥
बलिर्वाक्यं समाकर्ण्य तोषकण्टकिताङ्गकः । अमुष्य तत्क्षणादेव पद्म पद्मनिभेक्षणः ॥ ७५ ॥
अन्येद्युर्बलिवाक्येन सानुकूले दिने शुभे । नक्षत्रे रजनीनाथे प्रस्थानमकरोत्प्रभुः ॥ ७६ ॥
गोमिकासु सुदीर्घासु पृथुलासु घनासु च । विचित्रचित्रविचित्रासु कृतासु वरशिल्पिभिः ॥ ७७ ॥
प्रासादकुन्तदेशादिभासितासितविग्रहान् । बलिः प्रवेशयामास पुरुषान्पुरुविक्रमान् ॥ ७८ ॥
अञ्जनादिसमानेषु महिषेषु कृतासना । गुरूनारोपयामासुः पुमांसो गोमिकास्थकाः ॥ ७९ ॥
महामहिषसार्थोऽयं महापुरुषसंगतः । प्रयातु बलिवाक्येन हस्तिनागपुरान्तरम् ॥ ८० ॥
ततः क्रमेण संप्राप्तस्त्वरा सिंहबलं पुरम् । महामहिषसार्थोऽपि बलिनाऽधिष्ठितो महान् ॥ ८१ ॥
तत्कोट्टमध्यकं प्राप्य गोमिकान्तरतो नराः । पातयित्वा तु ताः शौर्यनिर्यद्युक्तविलासिनः ॥ ८२ ॥
ततः सिंहबलो दृष्ट्वा परचक्रं समागतम् । दृश्यन्तमन्दमानन्दं कुन्तप्रासासिभीषणम् ॥ ८३ ॥
अधिरुह्य समावेगं तुरङ्गं चलचामरम् । तत्सन्मुखमभीयाय कोपलोहितलोचनः ॥ ८४ ॥
ततो बलिरपि स्पष्टं दृष्ट्वा सिंहबलं पुरः । ससैन्यसमुदायेन तत्सन्मुखमवाप सः ॥ ८५ ॥
खड्गखेटसमापन्नैः करवालकरैर्भटैः । बलिः सिंहबलं शीघ्रं जीवग्राहं गृहीतवान् ॥ ८६ ॥
आदाय तं महासत्त्वं नृपं सिंहबलं बलिः । आजगाम स्वसैन्येन हस्तिनागपुरं परम् ॥ ८७ ॥
अमात्यानसितत्रासान् पद्मस्याप्तनयाश्रयः । बलिः समर्पयामास तदा सिंहबलं नृपम् ॥ ८८ ॥
दृष्ट्वा सिंहबलं राजा प्रणामेन कृतानतिम् । क्रियते किं तवेदानीमसुखं वा सुखं वद ॥ ८९ ॥
श्रुत्वा पद्मवचो दीनं तकं सिंहबलोऽवदत् । यत्तुभ्यं रोचते देव तदेव कुरु साम्प्रतम् ॥ ९० ॥
निशम्यास्य वचःसारं तोषं प्राप्य नराधिपः । ददावङ्गपरिस्पृष्टं तस्मै कटकादिकम् ॥ ९१ ॥
कारयित्वा निजां सेवां संधिं वा सार्वकालिकम् । मुक्तोऽमुनाऽऽगमत्सोऽपि संतुष्टो निजपत्तनम् ॥ ९२ ॥
अत्रान्तरे बलिं प्राह पद्मो हृष्टतनूरुहः । वरं वृणीष्व भद्र त्वं तुष्टोऽहं समभीप्सितम् ॥ ९३ ॥

---

1 अ कुरुवर्णवे. 2 अ कोट्टपनो 3 [विमनस्कवरं] 4 प कुम्भ, क कुपक्व, अ कुम्भीरक. 5 अ केरांतोप.

स्वस्वामिवचनं श्रुत्वा बलिरूचे प्रभुं पुनः । भास्तां तावद्वरो नाथ निक्षेपो मे त्वयि स्थितः ॥९४॥
अथ योगी तपोराशिः पूजार्हः पूजितः सताम् । अतः सप्तभिरायुक्तो मुनीनां शुद्धचेतसाम् ॥९५॥
अकम्पनमुनिर्ज्ञानी श्रीमदुज्जयिनीपुरात् । हस्तिनागपुरोद्यानं नानादेशान् समाययौ ॥ ९६ ॥[1]
अकम्पनमुनिं धीरं समुनिं मुनिनायकम् । हस्तिनागपुरोद्यानमागतं धर्मदेशकम् ॥ ९७ ॥
श्रुत्वा निजगृहं तिष्ठन् भ्रमन्तो जनवाक्यतः[2] । गत्वा वनमसौ दृष्ट्वा दध्यौ बलिरिदं समी ॥९८॥
श्रीमदुज्जयिनीतोऽत्र प्रह्लादादिभिरन्वितः । निर्घाटितोऽधुना किं वा घाटयिष्यन्ति मां न किम् ॥९९॥
प्रत्यापयन्ति नो यावद्योगिनो मम घाटकम् । तावत्करोम्यहं किंचिदेतेषां नाशनं लघु ॥ १०० ॥
एवं विचिन्त्य संप्राप्य भूपतिं साधुवत्सलम् । बलिर्मधुरगम्भीरं यथाचे प्राक्तनं वरम् ॥ १०१ ॥
तद्वाक्यतोऽमुनाऽऽयाचि पद्मेनार्यं विवेकिना । ग्रामहस्तितुरङ्गादीन् गृहाण त्वं वदे ध्रुवम् ॥१०२॥
नरेन्द्रवाक्यमाकर्ण्य भाषितो बलिना नृपः । दिनानि सप्त मे राज्यं देहि राजेन्द्र निश्चितम् ॥१०३॥
महीपालोऽपि तद्राज्यं प्रदाय दिनसप्तकम् । प्रविश्यान्तःपुरं तस्थौ दुःखव्याकुलमानसः ॥ १०४ ॥
अकम्पनादियोगीन्द्रान् विलोक्य प्रवनस्थितान् । बलिप्रभृतयस्तेषामुपसर्गं प्रचक्रिरे ॥ १०५ ॥
चतुर्ष्वपि च पार्श्वेषु यज्ञशालाः प्रवर्तिताः । मुनीनां बलिनाऽऽदिष्टैर्भटैर्धर्मभटैरिव ॥ १०६ ॥
तत्रत्यहतजीवोत्थनाद्‌नादितपुष्कराः । मद्यानिलशिखाक्षिप्तविभ्रान्तकृतधूमकाः ॥ १०७ ॥[3]
महिषादीन् चिक्षन् जीवांश्छिन्दन्ति बलिचोदिताः । मद्य मुनिसकाशे च क्षिपन्ति पूरितस्रुवाः ॥ १०८ ॥
कायोत्सर्गं विधायात्र मोचनावधिं मुनीश्वराः । प्रत्याख्यानं च सालम्बं तस्थुः स्थिरशरीरकाः ॥१०९॥
अथ विष्णुकुमारस्य मिथिलानगरीस्थितः । गुरुर्ददर्श नक्षत्रं श्रवणं चलितं कम्[4] ॥ ११० ॥
दृष्ट्वा श्रवणनक्षत्रं चलं विष्णुगुरुर्जगौ । अहो मुनिनिकायस्य घोपसर्गः प्रवर्तते ॥ १११ ॥
क्षुल्लकः पुष्पदन्ताख्यः श्रुत्वा विष्णुगुरोर्वचः । दिव्यज्ञानयुतं सरिसुचावेति विचक्षणः ॥ ११२ ॥
कस्मिन् स्थाने मुने केषां कुतो वा स विनश्यति । एतत्सर्वं समाचक्ष्व दिव्यज्ञानविलोचन ॥११३॥
पुष्पदन्तवचः श्रुत्वा जगौ विष्णुगुरुस्तकम् । अकम्पनादियोगीशा हस्तिनागपुरे वरे ॥ ११४ ॥
कदर्थितोऽधुना नूनं बलिना पापमन्त्रिणा । उपसर्गो महानत्र नितरां जनदुःसहः ॥ ११५ ॥
क्षिप्रं विष्णुकुमारेण तपःफलेन योगिना[5] । ऋद्धियुक्तेन धीरेण तत्क्षणात्स निरस्यते ॥ ११६ ॥
श्रुत्वा मुनीन्द्रसद्वाक्यं संशयोच्छेदकारणम् । पुष्पदन्तोऽगमत् क्षिप्रं धरणीभूषणं गिरिम् ॥११७॥
तद्गुहावासिनं नत्वा कुमारं विष्णुपूर्वकम् । जगाद पुष्पदन्ताख्यः क्षुल्लको धर्मवत्सली ॥ ११८ ॥
अकम्पनादिसाधूनामुपसर्गो महानयम् । हस्तिनागपुरे नाथ काले संप्रति वर्तते ॥ ११९ ॥
विकुर्वणादिका सिद्धिर्विपदे[8] भवतामियम् । तस्मात् प्रभावतो नाशमुपसर्गः प्रयास्यति ॥ १२० ॥
ततः स विस्मयोपेतस्तस्य क्षुल्लकस्याप्यतः । करं गुहोन्मुखं चक्रे विधायोर्ध्वं महातपाः ॥ १२१ ॥[10]
ततो विकुर्वणामुख्यमात्मानमवगम्य सः । साधूपसर्गहान्यर्थं मतिं चक्रे महामतिः ॥ १२२ ॥
यथापि सा गुहाभित्तिः विष्णुपाणिविदारिता । लोकातिशयसंपन्ना विपते धरणीतले ॥ १२३ ॥
अथ विष्णुकुमारोऽयं[11] गुरुणाऽपि विसर्जितः । पद्मपार्श्वं परिप्राप्य जगादेनं ससंभ्रमम् ॥१२४॥
अस्मत्कुलसमायातो जिनधर्मः स दीक्षितः । उपसर्गो न केनापि मुनिधर्मस्य वा कृतः ॥ १२५ ॥

---

1 क पुष्पकम्, पञ पुष्पकमित्यम्, 2 प विनयावनताः 3 पफ कुसुमम्, ज कुसुमम्, 4 प चालितचक्रम्, 5 पञ योगीन्द्रा 6 पञ द्रुते. 7 पफ विकुर्वम्, ज विकुर्वम्, 8 प सिद्धिर्विपदे 9 पफ विकुर्वम् ज विकुर्वम्, 10 Omitted in क. 11 प कुमारोऽपि

युष्माकं यान्तां धर्मं समक्षममुना सताम् । साधूपेक्षा न सा युक्ता विधातुं नीतिशालिनाम् ॥१२६॥
येन राज्यमं[1] देशस्य न याचज्ञपतामपि । विनाशो जायते तावद्विधेयस्त्वया हि माहनाः ॥ १२७॥
श्रुत्वा विष्णुकुमारस्य वचनं नरकुञ्जरः । उवाचेमं पुनः साधुं तन्मतस्मितमानसः ॥ १२८ ॥
यथैतेषां मया पूर्वं वरो दत्तोऽस्तिदोषिणाम् । तत्र किमपि कुर्वन्तो धर्तुं शक्या[2] न माहनाः ॥१२९॥

तथोक्तम्—

सकृज्जल्पन्ति राजानः सकृज्जल्पन्ति साधवः ।
सकृत्कन्या प्रदीयन्ते त्रीण्येतानि सकृत्सकृत् ॥ १३० ॥

येन त्वं याच्यसे येऽत्र तावत् सोऽपि माहनः । ब्रवीमि नोभयथापि सममाया हि साधवः ॥१३१॥
ततो निवृत्य वेषेण कृत्वा रूपं स वामनम् । समासितं बलिं प्राप वेदध्वनिमथोच्चरन् ॥ १३२ ॥
पठित्वा मन्त्रमस्याग्रे स पादत्रयभूमिकाम्[3] । प्रययाचे बलिं पूज्यमातृपितृनिमित्ततः ॥ १३३ ॥
बलिः सरूपमालोक्य वामनस्य त्रिपादगाम्[4] । भूमिं ददौ प्रहृष्टात्मा करे तोयं विधाय वै ॥१३४॥
ततो विकुर्वणां कृत्वा निजकायस्य वामनः । चिक्षेपैकं पदं मेरौ द्वितीयं मानुषोत्तरे ॥ १३५ ॥
क्षेत्रमप्राप्नुवन्नन्यत्तृतीयचरणोऽस्य सः । अन्तराले भ्रमन्नास्ते वदन्निव पदं क्व ॥ १३६ ॥
ततो किन्नरदेव्याद्याः क्षमेत्य भयविह्वलाः । पूजयन्ति च तत्पादं विविधकनकाम्बुजैः ॥ १३७ ॥
साधूपसर्गमाहत्य बलियागे विकीर्यं च । पश्चात्कृतं बन्धयुक्ता बलिं शासनदेवता ॥ १३८ ॥
निधाय मस्तके भस्म पश्चाद्विरचितबन्धनम् । खरारोहं बलिं कृत्वा भ्राम्यन्ति नगरं सुराः ॥१३९॥
भूयोऽपि किंनराः देव्यः पादलग्ना वदन्ति ते । विधाय नो दयां पूत त्वं पादमुपसंहर ॥ १४० ॥
घोषा सुघोषनामा च महाघोषा मनोहरी । वितीर्णं किंनरैस्तुष्टैरस्य वीणात्रिकं परम् ॥ १४१ ॥
सुघोषाऽसिं भव विष्णोर्वल्लकी किंनरामरैः । इहलविजयार्धस्य सिद्धकूटजिनालये ॥ १४२ ॥
वीणाऽन्या[5] दक्षिणश्रेण्यामुत्तरस्यां कृता परा[6] । विजयार्धस्य संदत्ता विद्याधरगणाय तैः ॥१४३॥
सर्वे विद्याधरा देवा[7] विस्मयाहितबुद्धयः । देव्योऽपि सत्वरं नत्वा ययुर्धाम यथायथम् ॥ १४४ ॥
तथाऽप्यन्ये नृपाः सर्वे बलिप्रभृतिमन्त्रिणः[8] । अकम्पनादिसाधूनां प्रणेमुः पादपङ्कजम् ॥ १४५ ॥
दृष्ट्वाऽतिविस्मयमीदृशं प्रापुः केचिन्महाव्रतम् । केचिच्छ्रावकतां सुष्ठु केचिच्चोपशमं परम् ॥ १४६ ॥
येऽपि मिथ्यादृशो लोकाः क्रोधादिकलुषीकृताः । जिनधर्मं प्रशंसन्तस्तस्थुर्मुदितचेतसः ॥ १४७ ॥
उपसर्गं सहित्वा ते यतयोऽकम्पनादयः[9] । क्षमाज्ञानसंयुक्ता धर्मयोग्यं पदं ययुः ॥ १४८ ॥
विधाय मुनिवात्सल्यं कुमारो विष्णुपूर्वकः । आलोचनां[10] गुरोः[11] पार्श्वे कृत्वा योग्यं पदं ययौ ॥१४९॥

॥ इति सम्यक्त्ववात्सल्यविष्णुकुमारकथानकमिदम् ॥ ११ ॥

*

१२ वैरकुमारकथानकम् ।

अथ नागपुरे रम्ये नागो नाम नराधिपः । पाळश्रीरस्य भार्याऽऽसीद् चारुदिव्यतनुप्रभा ॥ १ ॥
तस्य पुरोहितो विप्रो रुद्रदत्तोऽभवत्प्रियः । तद्भार्याऽपि च सोमिल्ला सुमतिमतिनी सखा ॥ २ ॥
बभूव सोमदत्तोऽस्या नन्दनो लोकनन्दनः । सद्गुणान्वितविज्ञानजितचन्द्रकरोत्करः ॥ ३ ॥
अहिच्छत्रपुरे राजा दुर्मुखोऽभवदग्रणीः । दुर्मुखी तस्य भार्या च कलागुणविशारदा ॥ ४ ॥

---

1 पञ यज्ञस्य. 2 पञ याचते. 3 पञ भूमिकम्. 4 पञ त्रिपादगाम्. 5 क पठोऽन्ये विधाय है. 6 ज सुखेभ्योऽपि. 7 क देवाम्ना. 8 क चो. 9 क विद्याधरेश. 10 क आलोचनं 11 प गुरो

सुमतिर्मातुलस्तस्य नाम तत्पुरेऽपि पुरोहितः । तद्भार्या कश्यपी तस्याः सोमभूतिः सुतोऽभवत् ॥ ५ ॥
सोमभूतेः स्वसा चार्वी कलाविज्ञानकौशला । रूपयौवनसंपन्ना यज्ञसेनेति कीर्तिता ॥ ६ ॥
अन्यदा सोमदत्तोऽपि हस्तिनागपुरादरम् । शास्त्राभ्यासकृतप्रीतिरहिच्छत्रपुरं ययौ ॥ ७ ॥
विश्रान्तस्तद्दिने सोऽपि कृतप्राघूर्णकक्रियः । सुखासनोपविष्टः सन्मातुलं निजगाविति ॥ ८ ॥
क्षिप्रं दर्शय मां राज्ञो मातुल स्नेहवत्सल । यत्प्रसादतो येन वर्तनं मे प्रजायते ॥ ९ ॥
उक्तोऽपि मातुलोऽनेन भूयो भूयः प्रजल्पितैः । महामात्सर्यसंयुक्तो न स नयति भूभुजम् ॥ १० ॥
ज्ञात्वा मातुलसद्भावं पैशुन्येन समन्वितम् । पिशाचरूपमादाय स विवेश नृपालयम् ॥ ११ ॥
ततो राजाऽपि तं दृष्ट्वा सोपचारं जगाविमम् । कोऽसि त्वं केन कार्येण समायातो मदन्तिकम् ॥ १२ ॥
नृपवाक्यं समाकर्ण्य जगादायं नराधिपम् । हस्तिनागपुरान्नृप सोमदत्तोऽहमागतः ॥ १३ ॥
यदि कस्यास्ति विज्ञानं शस्त्रे शास्त्रकलासु च । ततो मया समं राजन्नागच्छतु करोतु तत् ॥ १४ ॥
इति तद्वचनं श्रुत्वा केचिद्भूपसमान्तराः । उत्थिताः सहसा कर्तुं तत्समं स्वगुणान्तरम् ॥ १५ ॥
ततस्ते युगपत्सर्वे सोमदत्तेन धीमता । धनुर्वेदेन शास्त्रेण कलाभिरपि निर्जिताः ॥ १६ ॥
धनुर्वेदादिविज्ञानैर्जितं दृष्ट्वा नृपव्रजम् । ततोऽयो भूपतिस्तस्मै ददौ मन्त्रिपदं महत् ॥ १७ ॥
ततोऽन्यदा विलोक्येमं महाभूतिं पुरोहितः । सुमतिर्मातुलः प्रीतो ददावस्मै सुतां स्वकाम् ॥ १८ ॥
यज्ञदत्ताख्यया रतिं तेन सोमदत्तेन भोगिना । बभूव सहसा गर्भो धन्विकल्पः सुतेजसः ॥ १९ ॥
पुरःस्थितां मनःकान्तां कान्तां तामवदत् प्रियः । किमर्थं वल्लभे ब्रूहि शोकयुक्तेव दृश्यसे ॥ २० ॥
श्रुत्वा कान्तवचः क्षिप्रं यज्ञदत्ता जगौ धवम् । आम्राणि खादितुं नाथ दोहदं मे मनःप्रियम् ॥ २१ ॥
भार्यावचनमाकर्ण्य सोमदत्तोऽगमद्द्रुतात् । आम्राणि तानि चानेतुं घनकालेऽपि दुःखितः ॥ २२ ॥
नदीतीरं समासाद्य वनाम्रवनमाश्रितम् । फलिताम्रतरोर्मूले ददर्शाय यतीश्वरम् ॥ २३ ॥
मुनिप्रभावतश्चाम्रा संजाताऽन्यत्र शाखिनि । इति मत्वाऽन्यदस्थे च कान्तायै प्रजिघाय सः ॥ २४ ॥
त्रिः परीत्य तमीशानं मुनिमाचार्यमादरात् । श्रुत्वा धर्मं ससुप्यान्ते सोमदत्तोऽग्रहीत्तपः ॥ २५ ॥
ततो हि विहरन् क्वापि संघेन गुरुणा सह । सोमदत्तः पुरं प्राप सोपारमागमोक्तवम् ॥ २६ ॥
श्रुत्वाऽऽगमं गुरोः पार्श्वे सोपारे नगरे स्थितः । निःसृत्य सोमदत्तोऽस्मात्संप्रापन्नाभिपर्वतम् ॥ २७ ॥
ततो नाभिगिरौ तत्र कायोत्सर्गेण धीरधीः । सोमदत्तमुनिर्ग्रीष्मे तस्थौ वरशिलातले ॥ २८ ॥
यज्ञदत्ता सुतमादाय बन्धुवर्गसमन्विता । ददर्श सा तदा क्रुद्धा कायोत्सर्गस्थितं मुनिम् ॥ २९ ॥
तत्पादोपरि तं पुत्रं मुक्त्वा निष्ठुरमानसा । ययौ निजगृहं क्रुद्धा यज्ञदत्ता रोदनाकुला ॥ ३० ॥
उपसर्गो महानेष यदि क्षेमेण यास्यति । तदाहारशरीरादेः प्रवृत्तिर्मे भविष्यति ॥ ३१ ॥
अत्रान्तरे महाखेटो देवान्तो हि दिवाकरः । मुनिं वन्दितुमायातो महादेवीसमन्वितः ॥ ३२ ॥
दृष्ट्वा खेटोऽपि तं बालं मुनिपादोपरि स्थितम् । उपसर्गार्थमानीय मुक्तं केनापि हेतुना ॥ ३३ ॥[3]
एवं संचिन्त्य तं बालं गृहीत्वा निजपाणिना । खेटः समर्पयामास पुत्रहीनः स्वयोषितः ॥ ३४ ॥[4]
मुनिपूजां विधायाशु पुष्पगन्धानुलेपनैः । कृत्वा नामास्य बालस्य कुमारं वैरपूर्वकम् ॥ ३५ ॥
कृत्वा मुनिनमस्कारं भक्तिशोभाकुरान्वितः । भार्यावैरकुमाराभ्यां खेचरो निजपुरं ययौ ॥ ३६ ॥[6]
ततो वृद्धिमनुप्राप्य पञ्चवर्षसमुद्भवाम् । वैरादिकुमारोऽयं सर्वखेटमनोहरः ॥ ३७ ॥

1 पज मनसीना. 2 प ष्टा, ज हृष्टा. 3 क omits 33 4 प पुत्रकम्, ज पुत्रकमीरम्. 5 ज विधाय च. 6 पक पुत्रकम्, ज पुत्रकमीरम्.

कनकादिपुरे रम्ये मित्रमैत्रमुनिकस्य[1] च । विमलोपपदस्यान्ते वाहनस्य महात्मनः ॥ ३८ ॥
दिवाकरादिदेवेन विद्यागुणगणाश्रये । नीतो वैरकुमारोऽयं बालादित्यसमप्रभः ॥ ३९ ॥[2]
कुल्मासितपोविद्याशास्त्रवारिधिपारगः[3] । नूनं वैरकुमारोऽपि निर्ममो तद्गृहे वरम् ॥ ४० ॥
अन्यदाऽस्य नरेन्द्रस्य रूपराजितविभ्रमा । इन्द्रपूर्वा मतिः पुत्री बभूव कलनिःस्वना ॥ ४१ ॥[4]
तदा वैरकुमारोऽपि रममाणो वयस्यकैः । इन्द्रमला च तत्पुत्र्या सहासमवतिष्ठते ॥ ४२ ॥
दृष्ट्वा वैरकुमारं च दीप्यन्तं सुतयाऽनया । तस्मिन्वा कान्तया सार्कं क्रीडां प्रतिनिषिद्धवान् ॥४३॥
आसीद् गरुडवेगस्य श्रीसमाख्यखेचरपि । सुता पवनवेगेति रूपातिशयशालिनी ॥ ४४ ॥
इयं विद्याधरी धीरा विद्यां प्रज्ञप्तिमूर्जिताम् । आराधयितुमुद्युक्ता हीमन्तं पर्वतं ययौ ॥ ४५ ॥
यावदसावयं खेचरा विद्यां सत्साधनतत्परा । क्रमेण महता मुक्ता मम स्थाने[5] कङ्कसयम् ॥ ४६ ॥
सहायैः कुलसम्भूतैर्विद्याधरकुमारकैः । तावद्वैरकुमारोऽपि संप्राप्तस्तं नगं तदा ॥ ४७ ॥
सिद्धिमायान्त्युपस्थानि विद्या विघ्नाय कण्टकैः । कराऽपाकुरुते कोऽपि तांस्तदेयं च सिध्यति ॥४८॥
दृष्ट्वा विद्याधरीमेव बदरीकण्टकैस्तु ताम्[6] । लोचने वानरि क्षिप्र तीक्ष्णतुण्डाचिरस्तवान् ॥ ४९ ॥
कन्या निःशल्यतां प्राप्य कुमारं निजगौ पुनः । भवत्प्रसादतः सिद्धा विद्या मम नरोत्तम ॥ ५० ॥
चेतसो मदभीष्टं ते तत्कार्येण महामते । प्रयच्छामि परं प्रीत्या तुभ्यं पूर्णमनोरथा ॥ ५१ ॥
खेचरीवचनं श्रुत्वा कुमारो वैरपूर्वकः । ययाचे तां महाविद्यां सावधि दिनसप्तकम्[7] ॥ ५२ ॥
तदा वैरकुमाराय सुकुमाराय धीमते । विद्या दत्ता तया स्नेहात्सर्वेप्सितकारिणी ॥ ५३ ॥
ततो विद्यां समादाय गत्वाऽसावमरावतीम् । कनिष्ठजनकेनामा सुखमास्तु च निरस्तवान् ॥५४॥
तदानीममरावत्यां यथेष्टं सुरसंसदि । जनकं स्थापयामास कुमारो नतिपूर्वकम् ॥ ५५ ॥
एवं तिष्ठति यावच्च कुमारः प्रीतमानसः[8] । तावत्पूर्वोक्तखेचर्यास्तातोऽन्यैरपि सुन्दरः ॥ ५६ ॥
ज्ञात्वा गरुडवेगस्तद् वृत्तं पत्न्या निवेदितम् । ददावस्मै सुतां श्रीमान् विधिनोत्सवपूर्वकम् ॥ ५७ ॥
तत्र वैरकुमारोऽयं भुञ्जानः सुखसंपदम् । देवेन्द्रभोगसंकल्पां सतोषं व्यवतिष्ठते[10] ॥ ५८ ॥
प्रणम्य श्वशुरं श्वश्रूमवाप्याज्ञामथैतयोः[11] । आगमदमरावतीं सोऽयं सार्कं पवनवेगया ॥ ५९ ॥
अन्यदा भ्रातृकार्येण ज्ञात्वा मातृव्यं सकः । पप्रच्छ पितरं तात त्वत्पुत्रोऽहं भवे न वा[12] ॥ ६० ॥
श्रुत्वा वैरकुमारस्य वचनं जनकेन तत् । समाख्यातं यथावृत्तं तस्य कौतुकचेतसः ॥ ६१ ॥
श्रुत्वा पितृवचः सत्यं जगादेदं स धीरधीः । तात यामि गुरोः पार्श्वं संसारोच्छेदकारिणः ॥६२॥
कुमारवचनं श्रुत्वा भूयोऽप्यापि स च भूमिपः । पितृमातृसमायुक्तैस्तात तावद्य गम्यते ॥ ६३ ॥
पितृवाक्यं निशम्यार्थं जनकं प्राह सोत्सुकम् । तात गन्तव्यमस्माभिर्निश्चितं किं बहूदिते ॥६४॥
तस्यैवं निश्चयं श्रुत्वा कुमारस्य महात्मनः । विद्याधरगणाः सर्वे तमादाय पुरस्तत्र ॥ ६५ ॥
उत्तरोपपदश्रीकैम्पुरस्थवर्तिनी । क्षान्तिकाख्या गुहा दिव्या राजते कनकाद्रिभिः ॥ ६६ ॥
यस्यां साधुसमेतस्य सोमदत्तगुरोरिमे । यदाप्यार्थं परिप्राप्तुस्तस्थुः खेचराधिपाः ॥ ६७ ॥
त्रिः परीत्य च भावेन सोमदत्तादियोगिनः । दिवाकरादिदेवाद्याः[14] प्रणेमुः खेचरा मुदम् ॥ ६८ ॥
उपविश्य यथास्थानं सोमदत्तमुनीश्वरम् । दिवाकरादिदेवोऽयं जगौ प्रणतमस्तकः ॥ ६९ ॥

---

1 क मैत्रकस्य 2 चक कुप्यम्, ज कुलमित्रम्, 3 क [illegible] 4 क प्रजापाने 5 ज स्थिरम् 6 क स्पर्धिन्ते ज [illegible] 7 क श्रीश्री ज श्रीमं 8 क [illegible] 9 [illegible] 10 क [illegible] मार्दोऽपि. 11 क अवेक्ष्य 12 ज श्रीम 13 [खेचराधिपाः] 14 क यथास्थाने

यस्त्वत्साद्यान्तिकाधीतो नन्दनो लोकनन्दनः । सोऽयमस्माभिरानीतः सविद्यो भवदन्तिकम् ॥७०॥
श्रुत्वाऽस्य वचनं योगी तोषपूर्णो जगाविमम् । सविद्योऽयं समानीतो भवद्भिः शोभनं कृतम् ॥७१॥
अत्रान्तरे स्तुतिं भक्त्या विधाय करकुड्मलम् । तोषी वैरकुमारोऽपि सोमदत्तगुरुं जगौ ॥ ७२ ॥
भगवन् देहि मे दीक्षां संसारार्णवतारिणीम्[1] । आहर्त्रीं[2] नाकसौख्यस्य मोक्षसौख्यस्य च क्रमात् ॥७३॥
श्रुत्वा वैरकुमारस्य भव्यसिंहस्य भारतीम् । ददौ दैगम्बरीं दीक्षां सोमदत्तगुरुस्तदा ॥ ७४ ॥
विद्याकारादिदेवाद्या विद्याधरकुमारकाः । विधाय महतीं पूजां ययुस्ते निजमन्दिरम् ॥ ७५ ॥
इदं प्रकटमन्यच्च कारणं तावदुच्यते । पूर्वोक्तमथुरा चासीन्नगरी परमोदया ॥ ७६ ॥
तस्यां पूतिमुखो राजा बभूव विनयान्वितः । नीतिशास्त्रकृताभ्यासो निर्जिताखिलशात्रवः ॥ ७७ ॥
धर्मप्रभावनासक्ता सत्सम्यक्त्वविभूषिता । उर्विलाऽस्य महादेवी विद्यते गुणसागरा ॥ ७८ ॥
तस्यामेव पुरि श्रेष्ठी दत्तान्तः सागरादिकः । आसीत् समुद्रदत्ताऽस्य गेहिनी गेहमण्डनम् ॥७९॥
दारिद्रिका सुता जाता दारिद्र्योपहतानयोः । कालेन तद्धने नष्टे मृतः शोकेन वाणिजः ॥ ८० ॥
ततः समुद्रदत्ताऽपि दुःखसंतप्तमानसा । मृतिं करोति सा दीना परप्रेषणकारिणी ॥ ८१ ॥
दारिद्रिका क्षुधाक्रान्ता भ्रमन्ती नगरान्तरे । देहलीदत्तसिक्थानि भक्षयन्ती च तिष्ठति ॥ ८२ ॥
अन्यदा नन्दनो योगी तथाऽन्योऽप्यभिनन्दनः[3] । प्रविष्टौ[4] नगरं साधू चर्यामार्गेण सक्रमम् ॥८३॥
तदा दारिद्रिका दृष्ट्वा[5] बुभुक्षाग्रस्तचेतसाम् । मुनिर्दयागृहीतात्मा कनिष्ठो वदतीत्वरम् ॥ ८४ ॥
अहो कथमियं बाला शरावोच्छिष्टकान्यलम् । बभाति मस्तके भिक्षा शरावचककैरपि ॥ ८५ ॥
पुष्पिकापत्रसंघातैर्व्याहता विकृतैःस्वराम् । भुङ्क्ते तन्मलमुच्छिष्टं रुधिरारुणविग्रहा ॥ ८६ ॥
कनिष्ठमुनिसद्वाक्यं श्रुत्वा ज्यायाञ्जगाद तम् । दिव्यज्ञानसमायुक्तो नन्दनो भव्यनन्दनः ॥ ८७ ॥
नेयं कन्या त्वया दृष्टा शरावोच्छिष्टकाशनी । इहत्यनगरेशस्य वल्लभाऽग्रे भविष्यति ॥ ८८ ॥
अत्रैव नगरे भिक्षुर्बुद्धधर्मा सुधीवरी । प्रविष्टः पिण्डवृत्त्यर्थं शुश्राव वचनं मुनेः ॥ ८९ ॥
अमघोऽमोघसद्वाक्यः श्रूयते जनवाक्यतः । इमां कृर्हि प्रसाध्यार्तसंस्थामादाय गृहं ययौ ॥ ९० ॥
विधाय सत्समाहारं स्नापयित्वा विधानतः । प्रीतो पप्रच्छ तां सोऽपि कोऽस्ति ते निगदाशु मे ॥९१॥
श्रुत्वा तद्वचनं बाला जगादेमं कलस्वना । ममैका विद्यते माता नापरः कोऽपि पावनः[7] ॥ ९२ ॥
तद्वाक्यात् तां समादाय भिक्षुरादरसंयुतः । प्राप्य तन्मातरं चेमावगाद प्रियसंगताम् ॥ ९३ ॥
भगिनी त्वं तथेयं च भागिनेयी मम स्फुटम् । यदहं ते करिष्यामि श्राम्यसि क्रिययाऽपि तत्॥९४॥
श्रुत्वा समुद्रदत्ताऽपि तद्वचो हृदयंगमम् । तथैवेत्यनुमेने सा बुभुक्षाक्षामविग्रहा ॥ ९५ ॥
तद्बान्धवान् समापृच्छ्य भगिनीं भागिनेयिकाम् । प्रतिपन्नां निजाधारं स्वविहारं जगाम सः ॥९६॥
सुगन्धचक्रतैलेन दुर्गन्धमपनीय च । कोष्ठशुद्धिं विधायास्या वमनादिविधानतः[8] ॥ ९७ ॥
स्निग्धान्नमधुरस्निग्धभक्ष्यघृतादिभिः । शरीरं पुष्टिमानिन्ये तस्या भिक्षुरतन्द्रितः ॥ ९८ ॥[9]
क्रमेण सा वयः प्राप्य बाला द्वादशवर्षकम् । करोति दोलकारूढा भव्यौ गीतं मनोहरम् ॥ ९९ ॥
अथ राजा स्वसैन्येन चतुरङ्गेण भूयसा । स निर्गच्छन् पुरात्तीव श्रुत्वा च श्रुतिपेशलम् ॥१००॥[10]

---

1 फ °तारिणीम्　2 प आहर्त्री ब आहर्ती फ आहत्री.　3 ब तथान्योऽप्यभिनन्दनः.　4 प प्रविष्टे　5 पब दृष्टि　6 फ बुभुक्षा　7 प पावना　8 फ वमनादिप्रमाणतः　9 पफ पुष्टम् ब पुष्टम्,
10 पब add one more line after 100 यावत्पूर्णाति नहीने श्रुत्वा च श्रुतिपेशलम्, and it is a contamination of the two lines on either side

यावच्छृणोति संगीतं स्थित्वा तुरगसंस्थितः । तावद्ददर्श सद्रूपां कन्यकां भूपतिः पराम् ॥ १०१ ॥
किं किंनरी किमिन्द्राणी किं यक्षी खेचरी च किम् । इति संचिन्त्य भूपोऽसौ मुमूर्च्छ रतिविह्वलात् ॥
चेतनां प्राप्य भूपोऽयं निजगौ पार्श्ववर्तिनः । कस्येयं सुन्दरी लोकाः क्षिप्रं मम निवेद्यताम् ॥१०३॥
भूपवाक्यं समाकर्ण्य ते वदन्ति नरेश्वरम् । राजन् रूपसमायुक्ता कन्येयं सुदत्तधर्मणः ॥ १०४ ॥
श्रुत्वा तद्वचनं भूपः कन्याध्यानपरायणः । विवेश सद्गृहं भूयो विह्वलीकृतचेतनः ॥ १०५ ॥
ततः कन्यानिमित्तेन भूपतिर्विह्वलमानसः । क्षीप्रं प्रवेशयामास सचिवान् सुदत्तधर्मणः ॥ १०६ ॥
उपविश्य यथास्थानं तद्विहारे मनीषिणः । वदन्ति सुदत्तधर्माणमिति भूपतिमन्त्रिणः ॥ १०७ ॥
सुवर्णरत्नग्रामपुरपत्तनजनपदान् । यदीच्छसि ततः कन्यां प्रयच्छ त्वं महीभुजे ॥ १०८ ॥
श्रुत्वा तद्वचनं कान्तं सुदत्तधर्मा जगौ सज्जनान् । वितीर्णा मया मेऽस्वामि कन्या मुनिमनोहरी ॥१०९॥
निशम्य तद्वचस्तेऽपि सुन्दरीजनतोषिणः । चक्रुर्नरपतेः पार्श्वे कन्यावृत्तान्तमाशिषः ॥ ११० ॥
शोभने दिननक्षत्रे योगे च रजनीपतौ । तयोर्विधानतो वृत्तं पाणिग्रहणमङ्गलम् ॥ १११ ॥
राजा प्रीतो विवाहान्ते पुरग्रामपदादिकम् । यथान्यायं महादेवीपदं प्रीणितमार्गणः ॥ ११२ ॥
महारत्नसद्ग्राममणिमुक्ताविभवश्रियः । राज्ञा सन्मानदानेन सुदत्तधर्मा प्रपूजितः ॥ ११३ ॥
अथ फाल्गुनमासस्य शुक्लपक्षेऽष्टमीदिने । उर्विलायाः च रथं जैनं निःसारयितुमुद्यता ॥ ११४ ॥
श्रुत्वा नृपमहादेवी सपत्नीरथनिर्गमम् । उर्विलां प्राह दर्पात्मा पतिप्रेमसमन्विता ॥ ११५ ॥
पूर्वं बुद्धरथो यातु मध्येऽस्य नगरस्य मे । पश्चाज्जिनरथस्तव ॥ ११६ ॥
श्रुत्वा दारिद्रिकावाक्यं वज्रेणेव समाहता । उर्विला सोमदत्तान्तं जगामाश्रितमङ्गला ॥ ११७ ॥
उर्विला सोमदत्तस्य विधाय शिरसा नतिम् । जगौ सर्व यथावृत्तं सपत्नीविहितं मुनेः ॥ ११८ ॥
तस्मात्तवास्य मार्गस्य सामर्थ्यस्य महामुने । अधमेव च प्रस्तावो नान्योऽस्ति भवतामिति ॥११९॥
भारतीवचनं श्रुत्वा सोमदत्तगुरुस्तदा । जगौ वैरकुमारं च विद्यानिकरभूषितम् ॥ १२० ॥
तपोबलेन तद्भेदं मयेमारि च सर्वथा । कर्तव्यं यतिना यत्नाज्जिनपूजाप्रवर्तनम् ॥ १२१ ॥
निमित्तमिदं तत्र कृत्वा स विसर्ज्य गुरुर्दितात् । ततो वैरकुमारोऽप्यादमरावतिकाक्रमात् ॥१२२॥
विद्याकलाप्रदिवोऽयं सर्वविद्यापरायणम् । दृष्ट्वा प्रणम्य भावेन तस्थुर्मुदितचेतसः ॥ १२३ ॥
खेचरान् सवातुभावाय पृथ्वेऽजीमि ससंभ्रमम् । तदा वैरकुमारोऽपि कुशलप्रश्नपूर्वकम् ॥ १२४ ॥
पूर्वोक्तपरमसुरम्यपुरनगरीमध्ये । जिनेश्वरमहापूजाप्रभाव सुष्ठु प्रवर्तते ॥ १२५ ॥
सन्मतेन ततः सर्वे कोपात्मनिरीक्षणाः । विद्यापरमनाः क्षीप्रं सोमदत्तान्तिकं ययुः ॥ १२६ ॥
प्रणम्य सोमदत्तादीन् तपोराशीन् महामुनीन् । पूर्वोक्तमथुरान्ते च प्रययुः खेचरेश्वराः ॥ १२७ ॥
व्यापयित्वा पुरं सर्वं गगनं च समन्ततः । श्रीपद्माकरसंयुक्तस्वस्थितांसो नभश्चराः ॥ १२८ ॥
महादेवीरथान् सर्वान् मुद्रापाशसितानपि । सेव्य विध्वंसयामासुर्मार्पयित्वा नृपादिकम् ॥ १२९ ॥
भ्रामयित्वा रथाञ्जैनान् महानन्देन पत्तनं । उर्विलाप्रवर्तितान् स्नपनान् महामायिकनिर्मितान् १३
तूर्याणि समवाद्यन्ति माङ्गल्यानि सान्यलम् । कारयित्वा समस्तानि श्रीखण्डध्वनियुतानि च ॥१३१॥
महारजतनिर्माणान् खचितान् मणिनायकैः । पञ्चस्तूपान् विधायाग्रे सम्मुखजिनवेश्मनाम् ॥ १३२ ॥
मध्यमानीरैर्युते स्निग्धे क्षीरैर्विविधाङ्गलैः । गन्धादकानि सरमं स्नापयांचक्रिरे जिनम् ॥१३३॥"

1 प. सुप्रभाभि अ. सुमरावि " प. समाचार्य पवार्थ 3 प. तरिता 4 प. उर्विला 5 प. वर्तिन्य. 6 प. तरिता. 7 प. पुस्तम् अ. पुत्रमीराम्. 8 प. संमिता 9 प. जिनवैश्रवर. 10 प. विवार. 11 प. मधुरम्मर् पत्र मधुरमणीरम.

कर्पूरकुङ्कुमेनापि समालम्भनमुत्तमम् । चक्रुर्नभश्चरा भक्त्या जिनानां क्षीणकर्मणाम् ॥ १३४ ॥
गन्धान्धीकृतभृङ्गौघैः पञ्चवर्णैः समुज्ज्वलैः । अर्चयन्ति जिनान् पुष्पैः खेचराः शुद्धचेतसः ॥१३५॥
शाल्यन्नौदनसन्मुद्गघृतादिचरुभिर्वरैः । पूजां कुर्वन्ति खेटौघा जिनानां पुरतः पराम् ॥ १३६ ॥
श्रीखण्डवासकर्पूरसिह्लादिसत्सिल्हादिकम् । उत्क्षिपन्ति ततो धूपं जिनानां खचरेश्वराः ॥ १३७ ॥
सिद्धभक्तिस्तुतां सारां भव्यभवभयहारिणीम्[3] । जिनस्तुतिं प्रकुर्वन्ति विद्याधरकुमारकाः ॥ १३८ ॥
विपञ्चीवंशकंसाल्लमृदङ्गपटहमर्दलैः । गर्जन्निभपुरं तूर्यैराहते शिल्पिपाणिभिः ॥ १३९ ॥
करणैरङ्गहारैश्च संयुक्तं भक्तितत्पराः । आनन्दनाटकं खेटाः प्रनृत्यन्ति जिनाग्रतः ॥ १४० ॥
पञ्चाचारपरान् शान्तपञ्चेन्द्रियतुरङ्गमान् । प्रणमन्ति स्म योगीन्द्रान् खेचरेन्द्राः प्रमोदिनः ॥१४१॥
पूजामहं जिनेन्द्राणां यः करिष्यति मानवः । तस्य पीडां करिष्यामो वयं शृणुत सज्जनाः ॥१४२॥
एवमुक्त्वा नृप लोकान् जिनं नत्वा मुनीनपि । तथा वैरकुमारं च खेचराः स्वपदं ययुः ॥ १४३ ॥
जिनधर्मप्रभावं च दृष्ट्वा मुदितमानसौ । नृपतिस्तन्महादेवी श्रावकौ तौ बभूवतुः ॥ १४४ ॥
केचिन्मुनित्वमापन्नाः केचिच्छ्रावकतां पराम् । केचिन्मध्यस्थतां लोकाः केचिन्मनसि तोषिणः ॥१४५॥
धर्मस्य कथको ज्ञानी निमित्तज्ञः प्रवाद्यपि । तपस्वी चेति पञ्चैते सिद्धान्तोद्योतका मताः ॥१४६॥

तथा चोक्तम्—

धर्मकथी[6] प्रावचनी वादी नैमित्तिको तपस्वी च ।
पञ्चैते पतिरूपमाः प्रवचनस्योद्योतकाः प्रोक्ताः ॥ १४७ ॥

यथा वैरकुमारेण कृता धर्मप्रभावना । तथाऽन्येनापि कर्तव्या साधुना धर्ममिच्छता ॥ १४८ ॥

॥ इति श्रीवैरकुमारसम्यक्त्वगुणप्रभावनाकथानकमिदम् ॥ १२ ॥

*

१३ विनयधरनृपकथानकम् ।

अथ कुम्भिपुरे श्रीमान् राजा श्रीविनयंधरः । तस्य भार्या मनःकान्ता विनयादिमतिः परा ॥ १ ॥
उपसमोपपन्नो दासो राज्ञः श्रेष्ठी बभूव सः । उपसमोपपन्ना दासी श्रेष्ठिनो रमणी प्रिया ॥ २ ॥
अन्योन्यप्रेमसंबन्धचेतसोरनयोरभूत् । नन्दनो जनतानन्दी जिनदासः प्रियंवदः ॥ ३ ॥
पुण्यप्रभावतः किंचित्कार्यमसंभवे हि यत् । तत्तत्सिद्धिं यतो याति सिद्धार्थाह्वोऽप्यतोऽभवत्[7] ॥४॥
अथानेकमहाव्याधिविह्वलीभूतमानसः । निद्रां न लभते नक्तं दिवाऽपि विनयंधरः ॥ ५ ॥
अस्थिचर्मावशेषोऽभूद् भूपतिर्व्याधिराशिभिः । भिषग्भिरपि संत्यक्तो बहुभिः कृतकर्मभिः ॥ ६ ॥
अत्रान्तरे नृपोऽवाचि श्रावकेण महात्मना । सिद्धार्थनामयुक्तेन व्याधिविह्वलविग्रहः ॥ ७ ॥
त्वं करोषि यदि स्पष्टं मद्वचो धरणीधर । ततो व्याधिमहं क्षिप्रं निहन्मि तव निश्चितम् ॥ ८ ॥
सिद्धार्थवचनं श्रुत्वा राजेमं पुनरब्रवीत् । अयुक्तमपि ते वाक्यं करोमि हितकारिणः ॥ ९ ॥
इदं तु भणितं प्रोक्तं त्वया किं न करोम्यहम् । मज्जीवितं त्वया दत्तं तथा राज्यमपि ध्रुवम् ॥१०॥
भूपालवचनं श्रुत्वा दीनकं कृपयाऽऽर्द्रधीः । तमादाय करे यातः सिद्धार्थो जिनमन्दिरम् ॥ ११ ॥
कृत्वा जिनमुनिस्तोत्रं कारयित्वा नृपेश्वरम् । सिद्धार्थो भक्त्या सार्धं निविष्टोऽत्र यथासनम् ॥१२॥
गन्धाम्भःक्षीरसंपातैर्दधिमन्थोदकैरपि । कुङ्कुमैः कुसुमैर्धूपैर्भक्ष्यदीपफलैरपि ॥ १३ ॥
तूर्यघोषनिनादेन बधिरीकृतदिङ्मुखम् । सिद्धार्थः कारयामास तदा जिनमहामहम् ॥ १४ ॥

---

1 प जिनं पुण्यैः 2 प मिथ्यात्वातप 3 प भव्यभयापहारिणीम्. 4 पफज पुष्पम्. 5 पज मण्डिताः 6 फ धर्मकथा. 7 ज सिद्धार्थो योऽन्यतो. 8 पज जिनं

जिनगन्धोदकं क्षिप्य सर्वौषधि मुनेरपि । पादप्रक्षालनं सोऽपि पाययामास भूपतिम् ॥ १५ ॥
यावत्पिबति तद्भूपो मन्यमानोऽमृतादिकम् । तावद्व्याधिरसौ नष्टस्तद्भयादिव वेगतः ॥ १६ ॥
दृष्ट्वा सानुभवं राजा व्याधिनिर्गमकारणम् । जिनभक्तिसमायुक्तः श्रावकत्वं प्रपन्नवान् ॥ १७ ॥
विधाय महतीं पूजां महासन्मानदानयाम् । सिद्धार्थाय नृपस्तुष्टो महाग्रामशतं ददौ ॥ १८ ॥
यथा भगवतो जैनं मतं पापविनाशनम् । मुनिपादोदकं पीते व्याधिर्नष्टोऽमुतः क्षणात् ॥ १९ ॥
साधुनाऽपि तथा पूतं जन्ममृत्युजरापहम् । पातव्यं भुक्तिकामेन धर्मपानीयमादरात् ॥ २० ॥

॥ इति जिनमतश्रद्धानपरविनयधरत्वकथानकमिदम् ॥ १३ ॥

*

१४ बुद्धिमतीकथानकम् ।

काशीजनपदे सारे वाराणस्यां पुरि प्रभुः । राजा विश्वासहतोऽभूत् तद्भार्या कनकप्रभा ॥ १ ॥
चित्रचित्रकरस्तत्र विचित्रो नाम विश्रुतः । विचित्रादिपदा[1] कान्ता तद्भार्याऽपि बभूव सा ॥ २ ॥
तत्सुता बुद्धिसंपन्ना रूपसंचितविग्रहा । नीलोत्पलदलश्यामा नाम्ना बुद्धिमती मता ॥ ३ ॥
जिनस्य चित्रशालायां विशालायां एकदान्तरे । चित्रं चित्रकरश्चित्रं विचित्रं कुरुतेतराम् ॥ ४ ॥
अन्यदा भक्तमादाय पितुर्बुद्धिमतीस्वयी[2] । विचित्रचित्रशालां तामाजगाम विलासिनी ॥ ५ ॥
मणिकुट्टिमभूम्यन्ते मयूरपिच्छमुत्तमम् । लिलेख तत्पिता रम्यं निर्मलीभूतभूतलम् ॥ ६ ॥
तत्काले चित्रशालां च विवेश नृपतिः पराम् । ददर्श चन्द्रकव्याप्तं शिखिपिच्छं प्रमोद्भवम् ॥ ७ ॥
कौतुकेन करेणेदं यावद्गृह्णाति भूपतिः । बुद्धिमत्या च तावद्धि विमूर्खोऽयं प्रभाषितः ॥ ८ ॥
श्रुत्वा तद्वचनं राजा लज्जाविनतमस्तकः । निश्चलो मूकतां प्राप्य तस्थौ मनसि दुःखितः ॥ ९ ॥
ततोऽन्यदिवसे जाते भूपस्य पुरतो जगौ । पितरं तत्सुता दक्षा चित्र कुलाप्यमुत्तमम् ॥ १० ॥
यौवनं याति नो यावदोदनस्य पयोरितम् । कुरु त्वं भोजनं तावद्विलम्बितं न सांप्रतम् ॥ ११ ॥
वाक्यं तद्वचो राजा प्राहैवं स सकौतुकः । ओदनस्य च किं भद्रे यौवनं ब्रूहि सांप्रतम् ॥ १२ ॥
निशम्य भूपतेर्वाक्यं जगौ बुद्धिमती तकम् । ओदनस्योष्णता यद्धि ततस्त्वमतिमूर्खकः ॥ १३ ॥
नृपोऽन्यदिवसे भुङ्क्ते चित्रकर्मपदासनम् । मधुबोऽन्य चकारासौ बुद्धिमत्याः परीक्षितुम् ॥ १४ ॥
दधिमधुयुतं कुम्भं विहायान्यं विलोकते । तथापि भाषितो भूपो महामूर्खो भवानिति ॥ १५ ॥
तद्वाक्यानि समस्तानि परुषाणि निशम्य सः । जगाद कोपरक्ताक्षस्तां बुद्धिमतीं नृपः ॥ १६ ॥
रे रे शठे दुराचारे मत्तमातङ्गगामिनि । जिह्वामामूलतस्तेऽहं छिनद्मि क्रूरभाषिणि ॥ १७ ॥
नृपवाक्यं समाकर्ण्य निजगौ सा नरेश्वरम् । कस्मादिह त्वं भासि मम त्वं कारणं विना ॥ १८ ॥
चापल्यमद्भुतावाक्यं सत्त्वो स्खलनं गृहे । एते भोगाः प्रजापार्श्वे नाहं तद्व्याप्यतां मिथो ॥ १९ ॥
मयूरपुच्छमादातुं चित्रस्थं नैव शक्यते । ओदनस्योष्णता सारा सम्यक्त्वं चित्रमीक्षत ॥ २० ॥
श्रुत्वा बुद्धिमतीवाक्यं राजा विस्मितमानसः । बभूव प्रीतिसंपन्नस्तद्रूपोद्धृतलोचनः ॥ २१ ॥
अङ्गप्रसारतो राज्ञा यावत्तद्रूपमीक्षितम् । तावद्विह्वलतां प्राप्य मुमूर्च्छ क्षणमात्रतः ॥ २२ ॥
चेतनत्वं पुनः प्राप्य सिक्तश्चन्दनवारिणा । राजा तत्पितरं प्राह देहि कन्यामिमां मम ॥ २३ ॥
तत्पिता तद्वचः श्रुत्वा ददावस्मै स्वकन्यकाम् । परिणीता विधानेन भूभुजेयं सुतोपतः ॥ २४ ॥
ततोऽन्तःपुरमाहूय समस्तं च शुभप्रभाम् । बुद्धिमत्यै महीपालो महादेवीपदं ददौ ॥ २५ ॥

1 क वालुकं 2 क 'चनपन्य 3 कख प्रमोदितम्, 4 क वितानिधानवर्गभग्न्य, 5 क मूर्खक. 6 क नृपोऽन्यस्मादिने भुङ्क्ते 7 कख चकारेति च. 8 क 'पद्मामं' 9 क omits 24

अथान्तःपुरमागत्य बुद्धिमत्यन्तिकं तदा । महादेवीति संभाष्य स्वकोशाणां शतं ददौ ॥ २६ ॥[1]
एवं तिसृषु सन्ध्यासु तस्यां च पुरत्रयः । यत्नेन महता कृत्वा छद्म यान्ति स्वमन्दिरम् ॥२७॥
स्थित्वा बुद्धिमती जैने मन्दिरे निन्दती स्वकम् । मत्समा वनिता देव नोत्पन्ना कदाचन ॥२८॥[2]
अथ तां दुर्बलां दृष्ट्वा नृपतिः प्राह वल्लभाम् । केन ते विप्रियं कान्ते ब्रूहि मे हन्मि तं द्रुतम् ॥२९॥
प्रियस्य वचनं श्रुत्वा जगौ बुद्धिमती स्वकम् । न कोऽपि विप्रियं नाथ करोति मम सांप्रतम् ॥ ३० ॥
यदोक्ताऽपि प्रिया किंचिन्न वक्ति जनविप्रियम् । तदा च चित्रशालान्ते भूपस्तस्थौ तथापि च ॥३१॥
जिनपार्श्वान्तिके यावत्सा करोति स्वनिन्दनम् । पूर्ववच्चावरागत्य भणन्ति तां द्योतकैस्त्रयः ॥ ३२ ॥
अथान्तरे स भूपालो निःसृत्य जिनमन्दिरात् । निहत्याथ कशाघातैस्तान् निस्सारितवानरम् ॥ ३३ ॥
ततोऽभिषिच्य तां भूपः कुम्भैर्मर्मविनिर्मितैः । तस्यै समर्पयामास स्वनामाङ्कितकङ्कणम् ॥ ३४ ॥
यथा बुद्धिमती राज्ञा पूजिता स्वं सुनिन्दती । तथा साधुरपि क्षिप्रं निन्दन् पूज्यः सुरेश्वरैः ॥३५॥
॥ इति श्रीबुद्धिमतीस्वनिन्दनकथानकमिदम् ॥ १४ ॥

*

१५ प्रियवीराकथानकम् ।

साकेताख्यपुरे राजा श्रीमान् दुर्योधनोऽभवत् । तस्यापि च महादेवी श्रीधरी नाम विश्रुता ॥ १ ॥
तत्राभवदुपाध्यायः सुमित्रोऽपि षडङ्गवी । चतुर्वेदपरिज्ञानी जरावेष्टितविग्रहः ॥ २ ॥
तद्भार्या तस्मी चासीत् प्रियवीरा प्रियंवदा । यौवनेन समाक्रान्ता यथा भ्रमति तत्पुरे ॥ ३ ॥
कामभोगं प्रभुञ्जाना प्रियवीराऽभिभूतिना । क्रमेण यौवनस्थेन मदोन्मत्ता च तिष्ठति ॥ ४ ॥[3]
अथैनमुपाध्यायं वृद्धं जनकसन्निभम् । जघान निष्ठुरस्वान्ता प्रियवीराभ्यसेन सा ॥ ५ ॥
कर्त्रिकान्तर्गतं कृत्वा मस्तके तद्विधाय च । नक्तं जगाम दुष्टात्मा प्रियवीरा श्मशानकम् ॥ ६ ॥
यावत्तां मुञ्चति क्षिप्रं चितायां प्रियवीरका । तावच्छिरसि सा देव्या निश्चला विहिता तदा ॥७॥
उत्क्रन्दन्ती प्रधावन्ती फूत्कारं कुर्वतीमपि । देवताऽपि तकां प्राह गगनस्थितविग्रहा ॥ ८ ॥
मया जारनिमित्तेन कुमारपतिराहतः । नगरस्य चतुर्दिक्षु भ्रमन्ती वचनं वद ॥ ९ ॥
अनेन च विधानेन कर्त्रिका पतति द्रुतम् । हितोपायमिमं मन्ये नास्याः पातोऽस्ति जातुचित् ॥१०॥
देवतावचनं श्रुत्वा भयवेपितविग्रहा । भ्राम्यति त्वरितं साऽपि सर्वतो नगराद्बहिः ॥ ११ ॥
अहो जनाः स्फुटं वाक्यं मदीयं शृणुताशु मे । कुमारपतिरानीतः पश्यतां जारहेतुना ॥ १२ ॥
एवं यावद् वदन्त्येषा भ्रमन्ती पत्तनाद्बहिः । तावत्सा कर्त्रिका[10] तस्याः पतिता क्वापि दूरतः ॥१३॥
यथा सा कर्त्रिका[11] तस्याः पतिता क्वापि सत्वतः[12] । स्वगर्हणं प्रकुर्वन्त्या [13]जाताऽतो दोषवर्जिता ॥१४॥
मुनिनैवं तथा[14] गत्वा गुरुपार्श्वे प्रयत्नतः । निन्दा गर्हा प्रकर्तव्या संसारोच्छेदमिच्छता ॥ १५ ॥

तथा चोक्तम्–

आलोचनैर्निन्दनगर्हणैश्च व्रतोपवासैः स्तुतिसंकथाभिः ।
एभिः प्रयत्नैः क्षपणं करोमि विषप्रतीघातमिवाप्रमत्तः ॥ १६ ॥

॥ इति प्रियवीरामहागर्हाकथानकनामकमिदम् ॥ १५ ॥

*

1 ब स्वकाणां. 2 Omitted in क. 3 क तथा च मित्र 4 च पार्श्वान्ते 5 ब द्योतकैः. 6 क repeats this verse. 7 कख अभिभूता 8 ख सुसमर्थ. 9 क interchanges 12 and 13 10 क यन्त्रिका, ब कर्त्रिका. 11 कख कर्त्रिका 12 कख सत्वरं. 13 च जाताऽतो 14 कख तथा सद्गुरुः. 15 क °च्छेदमिच्छता

१६ सोमशर्मकथानकम् ।

पूर्वदेशे वरेन्द्रस्य विषये धनभूषिते । देवकोट्टपुरं रम्यं बभूव भुवि विश्रुतम् ॥ १ ॥
सोमशर्माऽभवद्विप्रश्चतुर्वेदषडङ्गवित् । तद्भार्या वल्लभा चार्वी सोमिल्लास्या प्रियंवदा ॥ २ ॥
अग्निभूत्यादिभूती भवेतां नन्दनौ तयोः । अन्योन्यस्नेहसंपन्नौ वेदशास्त्रविशारदौ ॥ ३ ॥
तत्रैव नगरे विप्रो विष्णुदत्तोऽभवद्धनी । विष्णुश्रीरस्य भार्या च कलागुणविशारदा ॥ ४ ॥
अन्यदा धनमादाय विष्णुदत्तस्य सत्वरम् । सोमशर्माऽगमद्देशं वाणिज्याय प्रशान्तधीः ॥ ५ ॥
यावद् वनान्तरं याति तस्याथ सुमहानपि । तावद्बहुभिरागत्य दस्युभिः परिलुण्ठितः ॥ ६ ॥
अत्रान्तरे समायातो महाधातुमदन्तिकम् । वैराग्याहितचेतस्कः सोमशर्माऽभवद्यतिः ॥ ७ ॥
यथासौ विहरन् क्वापि सोमशर्मा मुनिः सुधीः । देवकोट्टपुरं सारमाजगाम महातपाः ॥ ८ ॥
विलोक्य तं मुनिं प्राह विष्णुदत्तोऽव्यवस्थ्या । यावद्धनं न मे दत्तं तावन्मा याहि सांप्रतम् ॥ ९ ॥
यावच्च विष्णुदत्तेन सोमशर्मा मुनिर्धृतः । तावन्नगरलोकोऽपि तयोः पार्श्वं समागतः ॥ १० ॥
अवादि विष्णुदत्तोऽयं शिष्टैर्धैर्यैर्महात्मभिः । सोमशर्ममुनिः कस्माद्भवता विधृतो वद ॥ ११ ॥
विष्णुदत्तोऽपि तानाह ममायं धरते धनम् । दत्त्वा निःशेषं यातु नान्यथा गमनं मुनेः ॥ १२ ॥
शिष्टास्तद्वच श्रुत्वा निगदन्ति मुनीश्वरम् । भवद्भिर्धनमेतस्य किं दातव्यं न वा वद ॥ १३ ॥
शिष्टवचनं श्रुत्वा सोमशर्मा जगाविमम् । अहमस्मि व्रती शान्तो न धनं विद्यते मम ॥ १४ ॥
ऋणं दातुं धनं यस्तु समर्थोऽस्ति सुतो मम । तस्मात्स एव जानाति नाहं किमपि वेद्म्यतः ॥ १५ ॥
सोमशर्मवचः श्रुत्वा विष्णुदत्तो जगावमुम् । नाहं पुत्रं न जानामि त्वं धनं वितरस्व मे ॥ १६ ॥
धर्मोऽत्यन्ताऽस्ति ते सारस्तं क्रीत्वा देहि मे धनम् । अन्यो न विद्यते सायो मोचनो गमनस्य ते ॥ १७ ॥
विष्णुदत्तवचः श्रुत्वा मुनिं प्रोऽनुविचक्षणाः । धर्मं क्रीत्वा स्वयं देहि धनमस्मै ततो व्रज ॥ १८ ॥
शिष्टवाक्यमाकर्ण्य सोमशर्ममुनिस्तदा । विसर्ज्य तान् प्रभाते च धनं दास्यामि ते ध्रुवम् ॥ १९ ॥
सोमशर्मवचः श्रुत्वा गृहं जग्मुर्यथायथम् । सोमशर्ममुनिर्यातः श्मशानं भीषणं निशि ॥ २० ॥
देवता लोकमात्रस्य महार्घं शृणुतादरात् । सत्यस्वरूपतां प्राप्तां यथार्थत्वमपि स्फुटम् ॥ २१ ॥
महाव्रतानि पञ्चापि तथा समितयोऽपि च । गुप्तयोऽपि प्रशस्तास्तपो द्वादशभेदकम् ॥ २२ ॥
गुणाः शीलानि सर्वाणि धर्मो दशविधः परः । एतत्सर्वं प्रगृह्णातु कोऽपि यस्यास्ति कार्यकम् ॥ २३ ॥
मुनिवाक्यं समाकर्ण्य देवता गगनस्थिता । ज्ञात्वोपसर्गसंपन्नं मुनिं तस्य वत्सरा ॥ २४ ॥
रत्नानां पचवर्णानां महास्तूपं समुज्ज्वलम् । पातयामास तत्रैव स्वप्रभाभासिताम्बरम् ॥ २५ ॥
देवकोट्टजना सर्वे कौतुकव्याप्तमानसाः । प्रभाते सोमशर्मान्तं विष्णुदत्तादयो ययुः ॥ २६ ॥
पञ्चवर्णमहारत्नराशिमध्ये तमुद्भटम् । विष्णुदत्तादयो दृष्ट्वा मुनिं रत्नगुरुस्मयम् ॥ २७ ॥
यथाक्रमोपविष्टेषु विष्णुदत्तादिषु स्फुटम् । सोमशर्मा जगावेतान् विस्मयव्याप्तमानसान् ॥ २८ ॥
गृहाण रत्नसंघातं मूल्येन परिवर्जितम् । विष्णुदत्त प्रभावाढ्योचितासंख्यमूल्यकम् ॥ २९ ॥
अत्रान्तरे स्थिता देवी नादपूरितदिङ्मुखा । तदा जनोत्करं सर्वमुवाच प्रीतमानसा ॥ ३० ॥

1 पत्र देवकट्ट. 2 पत्र चतुर्वेद. 3 प देवताभि 4 प वणिजारे 5 फ चतुर्वर्णाढ्य. 6 फत्र देवकोट्टपुरे. 7 फ धनम. 8 पत्र नमो 9 फ धर्म दत्तं 10 पफ गुणम, ज गुणम. 11 ज विसर्ज्य 12 पत्र महार्घ. 13 फ प्राप्त. 14 प गुणम, पत्र गुणशीलम. 15 फ कार्यमिदम्. 16 फ तत्पर 17 फ गुणम पत्र गुणम् 18 फ देवकोट्ट. 19 फ महान्तं 20 फ प्रीतिमानसा

धर्मो विक्रेतुमारब्धः श्मशानं प्राप्य योगिना । उपसर्गविनाशार्थं किंचिद्वचनमुदाहृतम् ॥ ३१ ॥
मनुष्याङ्गुलियोगेन वैकवारेण यत्नतः । उत्पाद्यन्ते यके केशाः पुरुषैर्मुनिमस्तके ॥ ३२ ॥
महो लोकक्रृतानन्द कृतकोलाहलस्वन । तेषामपि च केशानां न मूल्यं भवति स्फुटम् ॥ ३३ ॥
जिनधर्मस्य भव्यानां संसारोच्छेदकारिणः । त्रैलोक्याधिकमूल्यस्य केन मूल्यं विधीयते ॥ ३४ ॥
तथापि दत्तमस्माभिर्मुने किंचिदिदं धनम् । उपसर्गापनोदाय गृहाणत्वमीं ततो धन ॥ ३५ ॥[1]
देवता मुनिवाक्यस्त्वं विधाय प्रीतमानसा[2] । कृतयोगिनमस्कारा जगामादर्शनं क्षणात् ॥ ३६ ॥
देवीवचनमाकर्ण्य विष्णुदत्तादयो जनाः । विस्मयं परमं प्राप्य निगदन्ति परस्परम् ॥ ३७ ॥
सर्वासामेव शुद्धीनां तपःशुद्धिः प्रशस्यते । तपःशुद्धिप्रयुक्तानां किंकरायितसा नृणाम् ॥ ३८ ॥
अहो व्रतमिदं जैनं देवानामपि पूजितम् । अहो जैनेश्वरो धर्मो लोकद्वयफलप्रदः ॥ ३९ ॥
धनलाभादरं धर्मलाभो भवति शोभनः । धनलाभस्तु जन्तूनां भवबन्धनकारणम् ॥ ४० ॥
एवं विचिन्त्य शुद्धात्मा वैराग्याहितमानसः । सोमशर्मान्तिके जैनं विष्णुदत्तोऽग्रहीत्तपः ॥ ४१ ॥
एवाऽऽश्चर्यमिदं केचिज्जिनधर्मस्य शोभनम् । जिनधर्मं परं प्राप्ता केचिन्मध्यस्थतां गताः ॥ ४२ ॥
ततो विस्मयमासाद्य जिनधर्मप्रशंसनम् । कृत्वा नृपादयो लोका जग्मुर्निजगृहं मुदा ॥ ४३ ॥
विष्णुदत्तस्तपः कुर्वन् परमं सोमशर्मणा । विजहार महीपृष्ठ मोक्षार्थं संप्रसाधयन् ॥ ४४ ॥
देवलोकसुखसाराधनसद्ध्याने प्रधानिका । रत्नवृष्टिस्ततो देव्या कोटित्रीर्थं बभूव तत् ॥ ४५ ॥

॥ इति सोमशर्ममुनिप्रतिपद्मलोभाकथानकमिदम् ॥ १६ ॥

*

१७ वीरभद्रकथानकम् ।

कस्मिंश्चिदपि पुरे साधुर्वीरभद्रोऽभवद्बुधः । अटवीं प्राप्य सोऽकाले श्रुतं पठति संततम् ॥ १ ॥
अन्यदा स कदाचिच्च पठन्नागममुत्तमम् । श्रुतदेव्या निशि सार्धं प्रोक्तोऽकाले दिगम्बरः ॥ २ ॥
तक्रार्थं नार्यमादाय कलशं तक्रसंभृतम् । मस्तके भ्राम्यति स्वयमग्रतः पार्श्वतो मुने ॥ ३ ॥
परिपक्वकपित्थोत्थगन्धामोदितदिङ्मुखम् । गृहाण शीतलं तक्रं मुने कान्तिबलप्रदम् ॥ ४ ॥
योगी तद्वाक्यमाकर्ण्य जगादेमां पुरःस्थिताम् । वातग्रस्ताऽसि किं मूढे किं पिशाचसमीरिता ॥५॥
किं खेटं खर्वटं नान्यस्थानं पुरमेवनम् । ग्रामादिकं न विद्येत येनायासि मदन्तिकम् ॥ ६ ॥
अर्थपो भीमरूपायां गृहीत्वा मथितं खले । पठितैं काऽसि किं वृथे नरकाकरनिन्दिते ॥ ७ ॥
साधोर्वचनमाकर्ण्य श्रुतदेवी मुनिं जगौ । जिनागमसमासंगनित्यभावितमानसा ॥ ८ ॥
स्निग्धं मधुरगम्भीरं भव्यलोकसुखप्रदम् । शुद्धं जिनमुखाम्भोजनिर्यातं पापनाशनम् ॥ ९ ॥
एवंविधं श्रुतं साधो यदकाले पठन्परम् । गर्हितस्थोऽसि किं न त्वं च धर्मोऽप्रकाशनम् ॥ १० ॥
देवीवचनतो योगी यावदालोकते नभः । तावत्स्वाध्यायवेलेयमतिक्रान्ता प्रमादतः ॥ ११ ॥
यदकाले श्रुतं ध्यानं पठितं च मयाऽखिलम् । तदस्य चातिचारस्य मिथ्या मे दुष्कृतं भवेत् ॥१२॥
ततः प्रभातकालेऽगात् वीरभद्रोऽन्तिकं गुरोः । आलोच्य शर्वरीवृत्तं स जातः परिशुद्धधीः ॥१३॥
अयमेव मुनिः प्राप्य धर्म जिनपरोदितम् । पापठीति श्रुतं काले स्वाध्यायाहितमानसः ॥ १४ ॥

---

1 प वसावन्ते 2 फज श्रुभावः 3 फ वस्ति श्रमम् पज परुभवतीयम् 4 फ मौविकारण. 5 पज मध्यास्थितो 6 फ अंसमाताम 7 पज जन्ततम. 8 फज महीस्थिताधी 9 फज पापी इति. 10 फ निषम्, पज विज्ञमीयम्, 11 प भीरुप्रदस्त्र.

पूर्वोक्तयोगिनं दृष्ट्वा पठन्तं कालतः श्रुतम् । पूजयित्वा च तं भक्त्या ययौ देवी स्वमास्पदम् ॥१५॥
प्रणम्य क्षेत्रं तथा कालं भावं चेति विशोधयेत् । पठन्निदं श्रुतं साधुः परलोकं प्रसाधयेत् ॥ १६ ॥

॥ इति वीरभद्रमुनिकालाध्ययनकथानकमिदम् ॥ १७ ॥

*

१८ अभिनन्दनमुनिकथानकम् ।

तथाभिनन्दनः साधुः कस्मिन्नपि पुरे वसन् । स्वभावार्जवसंपन्नो विवेकपरिवर्जितः ॥ १ ॥
स्वाध्यायसमयस्तत्र वेला भवनस्योदये सति । उपदेशं गुरोः प्राप्य श्रुतं पठति मूढधीः ॥ २ ॥
कालाकालमनालोच्य मिथ्यात्वपापमोहितः । यतो जानाति नैतस्य तत्त्वं वाचामगोचरम् ॥ ३ ॥
पठन्नपि तथा ग्रन्थमभ्यस्य नावधारयेत् । असमाधानतो योगी गतः कालेन पञ्चताम् ॥ ४ ॥
आर्तध्यानसमायोगान्मिथ्यात्वमरणादपि । मन्दाकिनीतटे जातो महामीनः प्रमादतः ॥ ५ ॥
ततो गङ्गानदीतीरे स्थितोऽसौ शफरो महान् । मुनिपाठध्वनिं श्रुत्वा तदा जातिस्मरोऽभवत् ॥६॥
तत्र स निन्दितुं लग्नः पापिष्ठोऽहं दुराशयः । श्रुताविचारतो जातो मीनः सुरसरिज्जले ॥ ७ ॥
ज्ञात्वा स्वमसमीप्य सम्यक्त्वादिकमाप्य च । प्रपञ्चाणुव्रतभावं मृतः स च सुरोऽभवत् ॥ ८ ॥
गुणदोषान् समालोच्य पठितव्यं श्रुतं ततः । साधुभिः साधुताचारैः काले सहितमिच्छुभिः ॥ ९ ॥

॥ इति अभिनन्दनमुन्यकालाध्ययनकथानकमिदम् ॥ १८ ॥

*

१९ ज्ञानविनयकथानकम् ।

विख्ये वत्सकावत्यां कौशाम्बी विद्यते पुरी । धनसेनो नृपस्तस्यां धनश्रीस्तस्य कामिनी ॥ १ ॥
धर्मिष्ठा श्राविका जाता सम्यग्दर्शनभूषिता । पतिर्भागवतस्तस्याः परिव्राजकभक्तिमान् ॥ २ ॥
सुपरिव्राजकस्तत्र सुप्रतिष्ठस्तपाः पुनः । राज्ञो भोजनवेलायां प्रभुङ्क्ते सर्वदाप्यसौ ॥ ३ ॥
यमुनानिम्नगातीरे वृसिकोपरि संस्थितः । भगवान् सुप्रतिष्ठोऽसावत्यात्मनविषया ॥ ४ ॥
पद्मासनोपविष्टोऽसावभ्यस्तेन सर्वदा । जापं करोति दुष्टात्मा लोकविस्मयकारकः ॥ ५ ॥
विद्युत्प्रभोऽभवद्राजा पत्तने रत्नपुरे । सम्यग्दर्शनसंपन्नो द्वादशाणुव्रतान्वितः ॥ ६ ॥
उपवासघनक्षयपशरीरोपोषिताम्बरा । परिव्राजकधर्मभक्ता विद्युद्वेगाऽस्य वल्लभा ॥ ७ ॥
विद्युत्प्रभोऽन्यदा सार्धं वन्दनार्थं जिनेश्वरान् । स्वकायोद्योतिताकाशमथापाठ रत्नपुरात् ॥ ८ ॥
द्योतमानो नभस्सर्वं मुक्ताहारकरोत्करैः । क्रमेण यमुनां प्राप वत्सपुरीतटोषसाम् ॥ ९ ॥
यमुनापारस्थं दृष्ट्वा सुप्रतिष्ठं वृषीस्थितम् । विद्युद्वेगा जगौ कान्त भक्तियुक्तानुरक्ता ॥ १० ॥
पश्य कान्तास्य माहात्म्यं तपसो हि तपस्विनः । भगवतस्य मदीयस्य गुरुत्वस्यान्ययोगिभिः ॥११॥
माघमासे कृताकम्पे लोकानां हिमशीकरैः । पश्य त्वं यमुनामध्ये कथं योगेऽवतिष्ठते ॥ १२ ॥
पद्मासनस्थितो ह्यात्मस्वरूपं प्रभावयन् । विद्याबलभयं कान्त यमुनान्तेऽवतिष्ठते ॥ १३ ॥
विद्युद्वेगावचः श्रुत्वा जगौ विद्युत्प्रभस्तकाम् । किं तपोऽस्य वराकस्य विद्याबलमपि प्रिये ॥१४॥
मूढोऽसि कान्तयाऽऽत्मापि वल्लभो रोपभाषया । विद्याबलं तपस्तोऽत्र नान्येषां प्रतिभासते ॥ १५ ॥

---

1 क स्वाध्यायस्य वेला वेला 2 क मिथ्यात्वं प्राप मोहितः 3 क गङ्गा पाठध्वनिं 4 क भगवान् सुप्रतिष्ठो 5 क धनश्रय 6 क रोपयम्, 7 क योगमवतिष्ठते 8 ब °ष्ठितं क मितिवत्

ततो विद्युत्प्रभोऽवोचद् विद्युद्वेगां स्वयं गताम् । विद्याफलं तपस्तेऽहं दर्शयाम्यस्य सांप्रतम् ॥१६॥
डोम्बवेषं विधायाशु सुप्रतिष्ठोपरि द्रुतम् । स्थितौ तौ कुथितं चर्म क्षालयन्तौ सुदुःसहम् ॥ १७ ॥
तदम्भोबकदुर्गन्धिव्याप्ताशेषशरीरकः । सुप्रतिष्ठोऽगमत्तस्मात् स्थानादुपरि संस्थितः ॥ १८ ॥
ईषत्प्रहसनं कृत्वा तौ तदानीं चलान्वितौ । [1]उपरिष्ठाद्गतौ तस्य तत्प्रक्षालनकारिणौ ॥ १९ ॥
भूयोऽपि सुप्रतिष्ठोऽयं क्रोधरक्तनिरीक्षणः । तस्थौ तदुपरि क्षिप्रं ददन् गालीकदम्बकम् ॥ २० ॥
सत्प्रियाप्रत्ययं कृत्वा तमुत्तीर्य तकौ तदा । [2]पताकावलिभी रम्यं चक्रतुर्नगरं द्रुतम् ॥ २१ ॥
चतुर्गोपुरसंयुक्तं प्राकारपरिखावृतम् । नानासौधापणायुक्तं वाप्युद्यानविभूषितम् ॥ २२ ॥
ततो नगरमालोक्यादृष्टपूर्वं मनोहरम् । तत्समीपेऽपि तौ डोम्बौ दध्याविति स विस्मितः ॥ २३ ॥
मयेदं पुरं जातु न दृष्टं चारुदर्शनम् । तस्मात् कृतमिदं नूनमेताभ्यां विस्मयास्पदम् ॥ २४ ॥
एकां विद्यां विजानामि चलस्तम्भनकारिणीम् । प्राप्नोम्येतामपि स्पष्टं किमसाध्यं भवेन्मम ॥२५॥
सुप्रतिष्ठो विचिन्त्यैवं विस्मयव्याप्तमानसः । समाप्य तत्समीपं च सप्रणामं जगाविमौ ॥ २६ ॥
साधो विद्यामिमां देहि मम त्वं पुरकारिणीम् । साध्यं करोमि येनाहं नगरं सुखरञ्जनम् ॥ २७ ॥
सुप्रतिष्ठवचः श्रुत्वा पाणो वदति तं तदा । स्वकार्यकरणासंगविह्वलीभूतमानसम् ॥ २८ ॥
आवां पापौ भवान् विप्रस्तपस्वी च महागुणः । अस्मत्प्रसत्तेर्विद्यासिद्धिमायाति नान्यथा ॥२९॥
विद्या सिद्धा कथंचित्ते नूनं नतिमकुर्वतः । भूयो विनाशतां चेयं यास्यति क्षणमात्रतः ॥ ३० ॥
तद्वचोविस्तरं श्रुत्वा दध्यौ विस्मितमानसः । सुप्रतिष्ठस्तदा क्षिप्रं किंकर्तव्यविमूढधीः ॥ ३१ ॥
इतो व्याघ्रः समायाति इतस्तिष्ठति दोतटी । इतो लोकप्रभुत्वं मे इतो विद्यासमागमः ॥ ३२ ॥
विद्यासमागमं पूर्वं प्रपद्यामि ततोऽपरम् । भविष्यति प्रभुत्वं मे लोके विद्यासमागमात् ॥ ३३ ॥
कृत्वा गर्दभसंरावं क्रियते धनरक्षणम् । धनानि येन जायन्ते लोकद्वयहितान्यलम् ॥ ३४ ॥

तथा चोक्तम्—

कृत्वा गर्दभरटितमपि त्वं धनमनुरक्षय मित्र ।
येन धनानि भवन्ति तवोच्चैर्यानि हितान्युभयत्र ॥ ३५ ॥

ततस्तौ त्रिःपरीत्यायं मूर्धन्यस्तकरद्वयः । सुप्रतिष्ठः प्रणम्योचैर्देहि विद्यां मम प्रभो ॥ ३६ ॥
सुप्रतिष्ठं पुरो दृष्ट्वा जानुस्पृष्टमहीतलम् । पाणोऽसौ पुरविद्यां तां ददौ पूर्वविचारतः ॥ ३७ ॥
ततो विद्यां प्रदायास्मै जिनताखिलमूर्तये । यातवन्तौ तकौ क्वापि तत्परीक्षानिमित्ततः ॥ ३८ ॥
प्राकारपरिखासौधं वाप्युद्यानादिभूषितम् । चकार नगरं रम्यं विद्ययाऽथ तथा पुनः ॥ ३९ ॥
उपसंहृत्य तां विद्यां तोषपूरितमानसः । सुप्रतिष्ठः सुविद्योऽसौ राजान्तिकमुपाययौ ॥ ४० ॥
राजा विलोक्य स हृष्टो विनयानतमस्तकम् । तत्सन्मुखसमीपाय पञ्चषाणि पदानि सः ॥ ४१ ॥
सर्वपक्षस्थितं कृत्वा सुप्रतिष्ठं महीपतिः । प्रणामपूर्वकं प्राह तन्मुखाम्भोजवीक्षणः ॥ ४२ ॥
क्व गतोऽसि प्रभो धीर विरूपं ते प्रयोजनम् । अतिक्रान्तोऽद्य संजातो भोजनस्य यदाशु मे ॥ ४३ ॥
निशम्य भूपतेर्वाक्यं क्रोधकण्टकितात्मकः । जगाद सरसं भूपं सुप्रतिष्ठोऽकनिष्ठकः ॥ ४४ ॥
अनारतं प्रकुर्वद्भिर्ध्यानमध्ययनं तपः । सांप्रतं लब्धमस्माभिर्जन्मनस्तपसः फलम् ॥ ४५ ॥
सुप्रतिष्ठवचः श्रुत्वा निजगौ भूपतिस्तकम् । किं जन्मनः फलं नाथ ब्रूहि त्वं तपसोऽपि मे ॥४६॥
तथापि भूपतिस्तेन सुप्रतिष्ठेन तोषिणा । किं जल्पितेन राजेन्द्र ज्ञास्यसि क्रिययाऽपि तत् ॥४७॥
अन्तःपुरेण सर्वेण नानाजनचयेन च । राजन्नय गुणाधारं भोजनं कुरु मन्मठे ॥ ४८ ॥

1 क चलितमती 2 क पताकाध्वजमीरम्यं ज पताकावलिभीरम्यं 3 चपक धुम्मम्, ज धुम्मीरम्, 4 क धुमवाम्, 5 च मन्मर्थं

भगवो ममुनाऽऽख्यापि विस्मयव्याप्तचेतसा । किं सत्यमिदमेव[1] न सत्यं राजेन्द्र नान्यथा ॥ ४९ ॥
उक्त्वा नृपसमं सोऽपि निमन्त्र्य नृपतिं क्षणात् । तोषपूरितचेतस्को निर्जगाम नृपालयात् ॥ ५० ॥
अथ सौधैः सुधाशुभ्रैः शातकुम्भैरपि शोभने । आपणैर्धनसंपूर्णैः पौरलोकसमाकुले ॥ ५१ ॥
परिखातोरणै रम्यैस्तुङ्गगोपुरकैरपि । प्राकारवापिकोद्यानवनैरपि मनोहरे ॥ ५२ ॥
वितानध्वजमालाभिर्नानावर्णैः प्रसारितैः । [2]राजमाने पुरं चक्रे सुप्रतिष्ठः स्वविद्यया ॥ ५३ ॥
राजाऽन्तःपुरलोकौघैः कृतकोलाहलध्वनिः । आजगाम पुरं तेन धनसंपत्समीयुषा ॥ ५४ ॥
नृपावरोधलोकानां [4]यथास्वमनुयायिनाम् । अमत्राणि पवित्राणि सौवर्णानि ददुर्जनाः ॥ ५५ ॥
इक्षुप्रभान्नं दध्यन्ने सालनकानि च । ओदनो मुद्गसंयुक्तो घृतं तक्रघनिर्मितम् ॥ ५६ ॥
अत्रान्तरे तकौ पापौ प्राप्तौ गोपुरमण्डपम् । दृष्टिगोचरमायातौ सुप्रतिष्ठतपस्विनः ॥ ५७ ॥
सुप्रतिष्ठेन चादिष्टं किञ्चात्रास्तस्थिरासनम् । यावत्कुर्वन्ति ते तावत्स्थितं शून्यं कुटीरकम् ॥ ५८ ॥
न भोजनं न भोज्यं च न पुरं न गृहादिकम् । सुप्रतिष्ठो नृपस्तस्थौ केवलं सजनैः समम् ॥ ५९ ॥
सुप्रतिष्ठं ततः प्राह कृष्णवर्मा सकौतुकः । किं जातं तपसश्छिद्रं ते च मे ब्रूहि सांप्रतम् ॥ ६० ॥
नृपवाक्येन तेनोक्तं किं तपो नियमो गुणः । अस्माकं हि कृतमानां नृपते शीलमेव वा ॥ ६१ ॥
पश्यैतौ त्वया खेचरौ विद्या नगरसंभवा । वन्देयं भवमेताभ्यां राजन् प्रणतिपूर्वकम् ॥ ६२ ॥
तल्लब्ध्वा प्रणामा मे राजन् हि न कृतोऽनयोः । अनेन कारणेनार्यं विद्यैताभ्यां हृता पुनः ॥ ६३ ॥
राजा तद्वचनं श्रुत्वा भक्त्या प्राप्य तदन्तिकम् । त्रिःपरीत्य तकौ नत्वा ययाचे विनयक्रमान्वयम् ॥ ६४ ॥
राज्ञो वचनमाकर्ण्य खेचराभ्यां तमवोचताम् । यावदेवं त्वया भूप कर्तव्या नुतिरानयोः ॥ ६५ ॥
भक्तिपूर्वं विना विद्या सिद्धाऽपि क्षयमेष्यति । भगवत्स्वेव मूढस्य कृतमस्य दुरात्मनः ॥ ६६ ॥

तथा चोक्तम्—

विनयेन विना क्व श्रीः क्व निशा शशिना विना ।
रहिता सत्कवित्वेन कीदृशी वाग्विदग्धता ॥ ६७ ॥

एवमुक्त्वा पुनस्ताभ्यां विद्या दत्ता महीभुजे । तेनापि भक्तिभावाभ्यां तदा तत्स्तुतिपूर्वकम् ॥ ६८ ॥
गतौ तावपि तकौ देशान्तरमिषपरोद्धुतौ । सविद्यया पुरं कृत्वा ययौ राजा स्वमन्दिरम् ॥ ६९ ॥
यावदास्थानमासाद्य भूपतिर्यावतिष्ठते । पापौ च तावदागत्य तिष्ठतो द्वारि भूपतेः ॥ ७० ॥
ततः क्रमेण तौ दृष्टौ भूभुजाऽऽस्थानमीयुषा । आस्थानतः समुत्थाय ययौ तत्सन्मुखं नृपः ॥ ७१ ॥
त्रिः परीत्य तकौ राजा तद्भक्तिस्थिरमानसः । समासनसमर्थं च ननाम सरसं तदा ॥ ७२ ॥
दृष्ट्वा भक्तिं नृपस्यास्य विनयक्षितिशालिनः । खेचरं परं रूपं दर्शयामासतुस्तकौ ॥ ७३ ॥
दृष्ट्वा रूपं तयोः कान्तं विस्मयं प्राप भूपतिः । सभाजनैः समं सर्वैः कौतुकव्याप्तमानसैः ॥ ७४ ॥
पृष्टौ नृपतिना [10]हर्षप्रसाहितचेतसा । किं किंनरोऽसि किं देवः किं खेटः किं धनाधिपः ॥ ७५ ॥
नृपवाक्यं समाकर्ण्य ययौ विद्याधरोऽपि तम् । विद्युत्प्रभोऽस्म्यहं राजन् विद्युद्वेगेति मत्प्रिया ॥ ७६ ॥
रथनूपुरनाथोऽस्मि सर्वविद्याधराधिपः । भवद्विनयतः प्रीतस्त्वत्पदप्राप्तमानसः ॥ ७७ ॥
धनसेनं नृपं धर्मे न्ययुङ्क्त सम्प्रमाणतः । स्वकान्तां सुप्रतिष्ठस्य विद्याधारो[11]ऽर्पितेतराम् ॥ ७८ ॥
सितं मुक्तामयं हारं कुण्डले मणिनिर्मिते । विद्युत्प्रभः प्रदायासौ सपत्नीकः पुरं ययौ ॥ ७९ ॥

---

1 फज सत्यमिदमेवेत 2 क राजमाने 3 क निमन्त्र्य, फज निमन्त्रितम्, 4 क यथास्वमनुयायिनाम्, 5 क न च भोज्यमीज्यं च. 6 फज किं जातं तपस 7 क निमन्त्र्य, फज निमन्त्रितम्, 8 Omitted in क. 9 क विद्याधरपरं, ज वैद्याधरं. 10 फज हर्ष पत्युःश्रीदक्षेतसा 11 क अर्पितैः.

सुप्रतिष्ठेन हीनेन कृतघ्नेन दुरात्मना । विद्या लब्धाऽप्यतो नष्टा मन्दभाग्येन पापिना ॥ ८० ॥
धनसेनेन भूपेन विद्या लब्धाऽतिभक्तितः । विपुलश्रमास्यखेटेन पूजितेन त्रिमूनिभिः ॥ ८१ ॥
ज्ञानस्य मुक्तिमार्गस्य विवेकज्ञैः प्रयत्नतः । विनयोऽस्ति प्रकर्तव्यः साधुना मुक्तिमिच्छता ॥ ८२ ॥

॥ इति श्रीज्ञानविनयाख्यानकमिदम् ॥ १९ ॥

*

२० ज्ञानाचरणकथानकम् ।

अथाभवद्धिष्ठ्ये वसुपाले नराधिपः । भार्या वसुमती तस्य पुत्री वसुमती शुभा ॥ १ ॥
तदा सहस्रकूटाख्यं नगोत्तुङ्गमनोहरम् । अकारयदिदं राजा जिनायतनमुत्तमम् ॥ २ ॥
तस्मिन् पार्श्वजिनेन्द्रस्य प्रतिमामतिशोभनाम् । लेपकारः कल्पधारः करोति स्म प्रयत्नतः ॥ ३ ॥
प्रभाते यावदायाति लेपकारस्तदन्तिकम् । तावत्तां प्रतिमां तत्र ददर्श पतितामसौ ॥ ४ ॥
भूयोऽपि मृत्तिकापिण्डैर्लेपकारो विधाय ताम् । विविधरूपसंपन्नां जिनार्चां यातवो गृहम् ॥ ५ ॥
अथ राजा समागत्य निरूप्य प्रतिमामसौ । पतितां रोषमापन्नो लेपकारं विसृष्टवान् ॥ ६ ॥
एवं बहुषु यातेषु लेपकारेषु केषुचित् । अन्यः समागतो भूप लेपकारो महामतिः ॥ ७ ॥
लेपकारं समालोक्य भूपतिः पुरतः स्थितम् । प्रमाणेति च तं क्रुद्धो विनीताकारधारिणम् ॥ ८ ॥
अस्माभिर्लेपकाराणां धनं दत्तं यथेप्सितम् । तथापि प्रतिमा नैवा समाप्तिं मूढचेतसाम् ॥ ९ ॥
इदानीं त्वं समायातश्चित्रविचित्रकरो महान् । गृहीत्वेमां कुरु क्षिप्रं ते दास्यामि महद्धनम् ॥ १० ॥
अथवेदं न विज्ञानं विद्यते तव शोभनम् । तदा याहि गृहाद्द्वारमसस्वच्छिरसा द्रुतम् ॥ ११ ॥
नृपवाक्यं समाकर्ण्य लेपकारो जगाविमम् । करोमि प्रतिमां राजन् बहुना जल्पितेन किम् ॥१२॥
प्रदायास्मै स्वहस्तेन ताम्बूलं नरनायकः । विससर्ज तकं सोऽपि जगाम निजमन्दिरम् ॥ १३ ॥
लेपकारो जिनस्तोत्रं विधाय बहुभक्तितः । गुरुभक्तिं चकारासौ गुरोरुपकारवेदिनः ॥ १४ ॥
गुरुभक्तिं विधायासावुपविश्य तदन्तिके । जगाद मुनिचन्द्रं च भक्तिनिर्भरमानसः ॥ १५ ॥
मद्यस्य मधुमांसस्य क्षीरवृक्षफलस्य च । दधिदुग्धघृतस्यापि रमणीरमणस्य च ॥ १६ ॥
यावत्पार्श्वजिनेन्द्रार्चा निष्पत्तिं नोपगच्छति । तावन्निवृत्तिमेतेषां मुनिचन्द्र प्रदेहि मे ॥ १७ ॥
यदुक्तं तेन तत्सर्वं वितीर्णं तस्य योगिना । आदाय भक्तितः सोऽपि सप्रमाणं समुत्थितः ॥ १८ ॥
समस्तलक्षणोपेतां सर्वावयवसुन्दरीम् । लेपकारश्चकारैतां पार्श्वनाथप्रयासनाम् ॥ १९ ॥
ततोऽयं वसुपालेन धनधान्यादिसंपदा । विधाय बहुसन्मानं पूजितः सरसं तदा ॥ २० ॥
विधायावग्रहं तेन प्रतिमा विहिता यथा । अमुना पूजितनालं मधिकायनमुनिभिः ॥ २१ ॥
तथैव साधुनाऽवश्यमागमं पठता सता । अवग्रहः प्रकर्तव्यस्तद्भक्तिकृतचेतसा ॥ २२ ॥
तस्मिन् समाप्तिमापन्ने प्राप्य पूजां नरादिकाम् । अनवगमसुखं भूयो लभिष्यति मुनीश्वरः ॥ २३ ॥

॥ इति श्रीज्ञानाचरणकथानकम् ॥ २० ॥

*

1 पञ्ज [illegible] 2 क देवालय 3 क ज्योतिर्धुखदेवालयम्. 4 क [illegible] 5 क पुस्तगर्भि-स्ती. 6 क पुस्तक, पञ्ज पुस्तकमिदम्. 7 क [illegible]. 8 पञ्ज [illegible]. 9 ज [illegible], क [illegible].

२१ ज्ञानबहुमानकथानकम् ।

तत्र काशीजनान्तेऽभूद् नृपतिर्वृषभध्वजः । वाराणस्यां पुरि श्रीमान् साधिताराति-मण्डलः ॥ १ ॥
भूपतेरस्य सत्कान्ता तन्वी लोकविलोचना । बभूव वसुमतीश्री[1] सा निधानं शीलसंपदाम् ॥ २ ॥
वाराणसीसमीपे च गङ्गारोधसि सुन्दरः । पलाशोपपदः कूटो ग्रामो बहुधनोऽभवत्[2] ॥ ३ ॥
आसीदशोकनामाऽत्र ग्रामे बहुधनो धनी । [3]महत्तरोऽस्य भार्या च नन्दा तन्मानसप्रिया ॥ ४ ॥
ततोऽन्या[4] सचिवोद्भूता सुनन्दा नाम कन्यका । परिणीता साऽशोकेन नन्दा वन्ध्येति सुन्दरी ॥ ५ ॥
अशोकः शोकसंत्यक्तोऽनेकगोकुलनायकः । संतिष्ठतेऽभीष्टाभ्यां नन्दिताशेषबान्धवः ॥ ६ ॥
वृषभध्वजभूपाय घृतकुम्भसहस्रकम् । वर्षे वर्षे प्रदायास्ते भुञ्जानो गोकुलानि सः ॥ ७ ॥
एकदाऽशोको महाधृतिः तथा नन्दासुनन्दयोः । अर्धार्धं गोकुलं कृत्वा ददौ कार्यविचक्षणः ॥ ८ ॥
तदा[5] गोपालभाण्डानां गवां च परिपालने[6] । चकार सा सुनन्दा च बहुमानं दिने दिने ॥ ९ ॥
ग्रामाद् गवां प्रयान्तीनामटवीं स्तोकमन्तरम् । प्रयाति च समं तासां[7] सुनन्दा स्नेहतत्परा ॥ १० ॥
भूयोऽप्येकैकशो गाः सा गणयित्वा पुनः पुनः । गोपालकसमूहानां समर्प्य याति मन्दिरम् ॥ ११ ॥
वनाद् गृहं विशन्तीनां गवामायाति सन्मुखम् । भूयोऽपि गणयित्वा ताः प्रवेशयति मन्दिरम् ॥ १२ ॥
आगतानां गृहं तासां बहु वल्कलं वरम् । ददाति सा पुनस्तस्यै दुग्धं ददति ता बहु ॥ १३ ॥
तथा गोपालकेभ्योऽपि दुग्धं दधि घृतं बहु । ददाति भोजनं स्नानं पर्वमासिकमेव सा ॥ १४ ॥
गच्छतामटवीं तेषां गोपालानामनारतम् । सक्तुकं च प्रदायैभ्यो विससर्ज तदङ्गना ॥ १५ ॥
तेऽपि गोपालका दृष्ट्वा यत्र निर्झरनीरकम् । क्षेमस्थानि च शष्पाणि सन्ति तत्र नयन्ति गाः ॥ १६ ॥
दुग्ध्वा[8] दुग्धानि या गोपाः पिबन्ति प्रीतमानसाः[9] । सुनन्दाकरसंदत्तसमस्तभोजनकारिणः ॥ १७ ॥
अटव्यां भक्तभोपानां पादत्राणमनोज्ञते । सुस्वाप्य[10] स्नानपानादिसत्कारं करोति सा ॥ १८ ॥
सुगन्धि शीतलं तोयं पाययित्वा पुनः पुनः । मधुस्निग्धानि शष्पाणि चारयित्वा तृणान्यपि ॥ १९ ॥
तरुच्छायासु मध्याह्ने किंचित्कालं निवेश्य ताः । गोकीयान्वेषणेनात्र स्वहिताः कुर्वतेऽन्वहम् ॥ २० ॥
एवं गोपालकाः प्रीतास्तत्कृता बहुमानिताः । वनं सुखेन गा नीत्वा आनयन्ति पुनर्गृहम् ॥ २१ ॥[11]
भाण्डकेषु पुनस्तेषु दुग्धं दधि घृतं तथा । क्रियते तेषु संस्कारं करोति सततं सदा ॥ २२ ॥
नन्दा सुयौवनोन्मत्ता सुखलम्पटतया भृशम् । गोगोपभाण्डकानां च सन्मानं न करोति सा ॥ २३ ॥
गवां [12]वल्कलं नैषां गोपालानां न भोजनम् । भाण्डकानां न संस्कारं करोति मदविह्वला ॥ २४ ॥
गावो ददति नो दुग्धं विना सन्माननेन ताः । किंचिद् ददति चेदल्पं दुग्ध्वा गोपाः पिबन्ति तत् ॥ २५ ॥
यत्किंचिदल्पकं दुग्धं स्थाप्यते भाण्डकेषु तत् । तद्भाण्डेषु च सर्वेषु विनाशमुपगच्छति ॥ २६ ॥
नास्ति नन्दागृहे दुग्धं न वा दधि घृतं न च । बहुमानं विना लोके न स्नेहो जायते नृणाम् ॥ २७ ॥
अत्रान्तरे समाहूय नन्दाऽऽस्यां पूर्ववल्लभाम् । अशोकः प्राह तां कान्तां सर्वेषां पुरतः स्थिताम् ॥ २८ ॥
घृतकुम्भसहस्रं च वृषभध्वजभूभुजे । दातव्यमधुनाऽस्माभिर्निर्विकल्पं मनस्विनि ॥ २९ ॥
शतानि घृतकुम्भानां पञ्च त्वं देहि मे प्रिये । एतावन्त्येव चान्यानि सुनन्दा दास्यति ध्रुवम् ॥ ३० ॥
अशोकवचनं श्रुत्वा नन्दा वदति तं कृशा । तावत्पञ्चशतान्यासन् घृतस्यैकं घटं न हि ॥ ३१ ॥

---

1 प °मतीश्री ज °मतीश्रीरीतिविख्याता 2 प यतो धनी. 3 प ज्येष्ठपत्नीदास, ज महत्तरस्य. 4 क ततोऽन्या 5 क तथा 6 प प्रपालनम्. 7 क वल्कलं. 8 प दुग्ध्वा दुग्धा या. 9 प प्रीतिमानसाः. 10 पज सुखाप. 11 क सुखम्, पज सुखम्. 12 क वल्कलं.

नन्दावचनमाकर्ण्य सुनन्दा जनवाक्यतः । घृतकुम्भसहस्रं वै ददावस्मै यथाय सा ॥ ३२ ॥
घृतकुम्भसहस्रं च दृष्ट्वा स स्वपुरः स्थितम् । अशोको गोकुलं तस्याः सुनन्दायाः समर्पयत् ॥ ३३ ॥
गृहं च स्वधनं चैव स सर्वं जीवितं तथा । अशोकोऽपि सुनन्दायाः ददौ तत्प्रीतमानसः ॥ ३४ ॥[1]
अशोकमानसोत्तीर्णा खादन्ती भक्ष्यमानकम् । नन्दा सुदुःखतस्त्वसौ स्थिता तत्र कुटीरके ॥ ३५ ॥
गोगोपालकभाण्डानां बहुमानमकुर्वती । नन्दा निर्वासिता गेहादशोकेन वराकिका ॥ ३६ ॥[2]
गोगोपालकभाण्डानां बहुमानं प्रकुर्वती । सुनन्दा पूजिता तेन जाता तस्यातिवल्लभा ॥ ३७ ॥
एवं साधुरपि स्पष्टं बहुमानं करोति नो । ज्ञानस्य समवाप्नोति संतापं चिरदुःसहम् ॥ ३८ ॥
साधुर्ज्ञानस्य भावेन बहुमानं करोति यः । ज्ञानमासाद्य सोऽपीन्द्रैः सुनन्दावत्प्रपूज्यते ॥ ३९ ॥

॥ इति श्रीज्ञानबहुमानाख्यानकमिदम् ॥ २१ ॥

*

२२ गुरुनिह्नवकथानकम् ।

अथावन्तीमहादेशे श्रीमदुज्जयिनी पुरी । अस्यां बभूव मानाढ्यो धृतिषेणो महीपतिः ॥ १ ॥
तस्यामवन्महादेवी श्रीकीर्तिधृतिरूपगा । मायाऽमलमती नाम चण्डप्रद्योतनयो सुतः ॥ २ ॥
सिन्धातटपुरे[3] रम्ये सोमशर्माऽभवद् द्विजः । सौम्या च तत्प्रिया कालसंदीवस्तनयोऽनयोः ॥ ३ ॥
षडङ्गशास्त्रकुशलश्चतुर्वेदषडङ्गवी । अष्टादशलिपिज्ञोऽसौ मीमांसाऽऽहितमानसः ॥ ४ ॥
चण्डप्रद्योतस्य संजातश्चोपाध्यायो विशुद्धधीः । वैदिकः कालसंदीवः कलाविज्ञानकोविदः ॥ ५ ॥[4]
विवेद कालसंदीवात् सकलां लिपीरसौ । न चैकाममधीयानो लिपिं यवनसंभवाम् ॥ ६ ॥
यदा यवनदेशोत्थां भूयोभूयः प्रदर्शिताम् । न गृह्णाति लिपिं शुद्धां कुमारः सुकुमारकः ॥ ७ ॥
उपाध्यायेन रुष्टेन परिणामहितेन सः । चण्डप्रद्योतो हतो मूर्ध्नि तदा पादेन निर्दयम् ॥ ८ ॥
महादुःखं परिप्राप्य स शिरःपादताडनात् । उवाच कालसंदीवं चण्डप्रद्योतोऽस्तखेदम ॥ ९ ॥
कालपर्यायोगेन यदि मे राज्यसंभवः । ततः पादं कुठारेण छेत्स्यामीमं स्फुटं तव ॥ १० ॥[5]
कुमारवचनं श्रुत्वा बालविभ्रमकारणम् । जगाद कालसंदीवश्चण्डप्रद्योतं प्रकोपितम्[6] ॥ ११ ॥
कुमार यदि ते राज्यं भविष्यति विसंशयम् । ततो मदीयपादस्य पहपदं करिष्यसि ॥ १२ ॥
अष्टादशलिपिज्ञं हि कृत्वा कष्टेन पाठकः । ततो जगाम संतुष्टो दक्षिणापथमादरात् ॥ १३ ॥
जिनधर्मं समाकर्ण्य श्रुतसागरयोगिनः । समीपे कालसंदीवो दीक्षां दैगम्बरीं दधौ ॥ १४ ॥
ततः समस्तराद्धान्तपारगः श्लोककल्पतः । बभूव कालसंदीवो विधाता तपसामलम् ॥ १५ ॥[7]
अथ दृष्ट्वा महामेघं विमानाकारधारिणम् । तत्क्षणाद् विलयं यातं धृतिषेणः प्रशान्तवान् ॥ १६ ॥
चण्डप्रद्योतमाहूय राज्यपट्टं बबन्ध सः । अमुष्य कृतकृत्यस्य सामन्तादिपुरःसरम् ॥ १७ ॥
विहाय सकलं संगं स्वशरीरेऽपि निःस्पृहः । धृतिषेणो दधौ दीक्षां शान्तो जैनभरी तदा ॥ १८ ॥
ततः कलकलपतदुज्जयिन्यां पुरि प्रभुः । चकार विपुलं राज्यं चण्डप्रद्योतभूपतिः ॥ १९ ॥[8]
अथान्यदा महामानी नृपो यवनसंभवः । प्राहिणोति स्म तल्लेखं चण्डप्रद्योतभूपतेः ॥ २० ॥[9]
श्रीमदुज्जयिनीमध्ये सामन्तादिजनोऽखिलः । न कोऽपि तां लिपिं तत्र विवेद यवनोद्भवाम्[10] ॥ २१ ॥

1 प अशोकोऽपि सुनन्दाय ददौ तत्प्रीतमानसः ।   2 Omitted in प   3 क सिन्धुपुरे.
4 क वैक्रम.   5 कख कुमार ख कुमारेण.   6 कख स्फोटयिष्य.   7 ख ते.   8 क भूयो   9 क omits 20.   10 क यवनोद्भवम्.

ततस्तं लेखमादाय सत्करेण विमृश्य तम् । प्रवाच्य नृपतिः स्वेन तदर्थं ज्ञातवानसौ ॥ २२ ॥
धरणीमण्डलं सर्वं यत्नेन महता भृशम् । अन्विष्य सद्गुरुः सम्यग् शिष्यमानीयतामिति ॥ २३ ॥
तदाज्ञां प्राप्य तद्भृत्याः श्रीमदुज्जयिनीपुरः । निर्ययुस्तं समानेतुमुपाध्यायं कृतत्वराः ॥ २४ ॥
ददृशुर्मासमासस्थं कालसंदीवयोगिनम् । [1]चिन्तावटपुरस्यान्ते परमागमवेदिनम् ॥ २५ ॥
दृष्ट्वा वदन्ति ते तत्र जिनपादनमस्कृताः । वयं भवन्तमानेतुं प्रेषिताः प्रभुणा प्रभो ॥ २६ ॥
तस्मादागच्छ गच्छाम तदभ्यासे मुनीश्वर । ताम्यत्यपि न गृह्णाति त्वद्दर्शनतः प्रभुः ॥ २७ ॥
तत्प्रभृत्यसदावाक्यं श्रुत्वा भक्तिसमन्वितम् । जगाम कालसंदीवश्चण्डप्रद्योतमन्दिरम् ॥ २८ ॥
विलोक्य कालसंदीवं चण्डप्रद्योतस्त्वरान्वितः । तत्सन्मुखसमीपाय विधाय करकुड्मलम् ॥ २९ ॥
स्वयमेवासनं दत्त्वा कालसंदीवयोगिने । चक्रे तदासनस्थाय पादप्रक्षालनं नृपः ॥ ३० ॥
घनसारसमृद्धेन कुङ्कुमेनातिवासिना । लिम्पति स्म गुरोः पादौ स्वयमेव क्षितीश्वरः ॥ ३१ ॥
जयप्रस्वयं पङ्कं कालसंदीवपादयोः । चण्डप्रद्यो यजत्यार्यं मुक्तचूर्णविभूतिभिः ॥ ३२ ॥
गन्धान्धीकृतभृङ्गौघैर्नानापुष्पैर्मनोरमैः । कालसंदीवपादौ हि पूजयामास भूपतिः ॥ ३३ ॥
श्रीखण्डघनसारादि[2] धूपं संधूपिताम्बरम् । समुत्क्षिपति भूपालः कालसंदीवपादयोः ॥ ३४ ॥
करौ शिरसि विन्यस्य चण्डप्रद्योतभूपतिः । ननाम कालसंदीवं मनोवाक्कायकर्मभिः ॥ ३५ ॥
ततः प्रणामं पुनः कृत्वा चण्डप्रद्यो जगौ गुरुम् । भगवन् देहि मे दीक्षां संसारार्णवतारणीम्[3] ॥ ३६ ॥
नरेन्द्रवचनं श्रुत्वा जगादेवं मुनीश्वरः । संसारवाससभीतं गुरुभक्तिपरायणम् ॥ ३७ ॥
दिव्यज्ञानेन विज्ञाय भव्यतामस्य भूपतेः । तदानीं कालसंदीवो ददौ दीक्षां विमुक्तये ॥ ३८ ॥
दीक्षानन्तरमेवास्य शरीरं तपसो बलात् । गोदुग्धकुन्दपुष्पाभं बभूव विधुसंनिभम् ॥ ३९ ॥
नानातपोविधानज्ञो निगृहीतेन्द्रियः स्थिरः । ततोऽयं गुरुणाऽऽज्ञीत श्वेतसंदीवनाम सन्[4] ॥ ४० ॥
ततस्तौ द्वावपि क्षिप्रं गुरुशिष्यौ प्रजग्मतुः । ख्यातमात्रमनोहारि परं राजगृहं पुरम् ॥ ४१ ॥
विपुलाद्रिगिरौ वीरः शरणे समवायिके । मुनिदेवादिसंकीर्णे तस्थौ केवललोचनः ॥ ४२ ॥
ततो वीरजिनेन्द्रस्य समवसानमुत्तमम् । जगाम कालसंदीवः श्वेतसंदीवसंयुतः ॥ ४३ ॥
विलोक्य श्वेतसंदीवं समवसानतो बहिः । जगाद श्रेणिको नाम कस्य पार्श्वे तपोऽग्रहीत् ॥ ४४ ॥
श्रेणिकस्य वचः श्रुत्वा कौतुकव्याप्तचेतसः । जगौ तं श्वेतसंदीवो वितपासक्तमानसः ॥ ४५ ॥
अहं प्रसिद्धिमापन्नो राजराजसुपूजितः । मद्गुरुः कालसंदीव इत्याख्यातं जनं नृपे ॥ ४६ ॥
अस्माकं हि महीपाल श्रीजिनेन्द्रोपदेशकः । ज्ञानाम्भोधिस्तपोराशिर्महाधीरो मदगुरुः ॥ ४७ ॥
एवं [5]निगदतस्तस्य शरीरं शशिसंनिभम् । अङ्गारराशिसंकाशं तत्क्षणेन बभूव तत् ॥ ४८ ॥
श्रुत्वा तद्वचनं राज्ञा चिन्तितं मनसि स्फुटम् । शरीरं कथमायातं किं मुनेरस्य कृष्णताम् ॥ ४९ ॥
एवं विचिन्त्य राजेन्द्रः प्राप्य गौतमसंनिधिम् । भक्त्या प्रणम्य तं नाथं पप्रच्छेति स कौतुकात् ॥ ५० ॥
कुन्दपुष्पसमानाभं शरीरं विधुनिर्मलम् । कृष्णत्वं किं गतं ब्रूहि श्वेतसंदीवयोगिनः ॥ ५१ ॥
आकर्ण्य तद्वचः सत्यं गौतमोऽपि तमब्रवीत् । कौतुकव्याप्तचेतस्कं जिनपादनतिप्रियम्[6] ॥ ५२ ॥
असत्यभाषणादस्य त्वया निजगौरवात् । सितं शरीरमापन्नं कृष्णत्वं गुरुनिह्नवात् ॥ ५३ ॥
निशम्य गौतमेनोक्तं श्रेणिको भव्ययोगिनम् । जगाद श्वेतसंदीवं कृष्णीभूतशरीरकम् ॥ ५४ ॥
सितकुन्दसमानाभं त्वच्छरीरं मनोहरम् । गुरुनिह्नवदोषेण कृष्णतां समुपागतम् ॥ ५५ ॥

---

1 क निकट 2 क मुनिवर 3 क चरणौ. 4 क °पादिपोयं 5 ख °वैभिनसनिर क °वैभिन्नं नितिः 6 क श्वेतसंदीवनामकम्. 7 Only in क. 8 ख निमग्न 9 क विस्मृत.

तस्मान्निजगुरुं प्राप्य शीघ्रमालोचनां कुरु । येन संपद्यते साधो कारणं तव शोभनम् ॥ ५६ ॥
श्रेणिकस्य वचः श्रुत्वा परिणामहितं परम् । जगाम स्वगुरोः पार्श्वं वैराग्याहितमानसः ॥ ५७ ॥
विपरीतस्तमीशानं वन्दित्वा च पुनः पुनः । निजगौ कृष्णसंदीवो गुरुनिह्नवकारणम् ॥ ५८ ॥
श्रुत्वा शिष्यवचः सोऽपि प्रायश्चित्तं वितीर्णवान् । तस्मै [1]स्वनिन्दनासक्तकारिणे भवभेदिने ॥५९॥
गुरुदत्तं विधायोच्चैः प्रायश्चित्तं मुनिः सकः । बभूव केवलज्ञानी लोकालोकावलोकनः ॥ ६० ॥

॥ इति श्रीगुरुनिह्नवाख्यानकमिदम् ॥ २२ ॥

*

२३ व्यञ्जनकथानकम् ।

मगधाविषये रम्ये पुरे राजगृहेऽभवत् । वीरसेनो नृपः शूरो वीरसेनाऽस्य वल्लभा ॥ १ ॥
अनयोर्नन्दनो जातः सिंहः सिंहपराक्रमः । उपाध्यायोऽभवत्तस्य[2] सोमशर्माऽतिपण्डितः ॥ २ ॥
अथोत्तरापथे देशे पुरे पोदननामनि । राजा सिंहरथो नाम सिंहसेनाऽस्य सुन्दरी ॥ ३ ॥
एष सिंहरथो राजा सिंहविक्रमराजितः । वश्यो न वीरसेनस्य नताशेषमहीपतेः ॥ ४ ॥
अन्यदा वीरसेनोऽस्य गतः सिंहरथोपरि । स्वसैन्यसमुदायेन चतुरङ्गेन भूयसा ॥ ५ ॥
तत्क्षेत्रवेष्टनं कृत्वा वीरसेनः समन्ततः । महाबलसमृद्धोऽपि तद्वशीकरविह्वलः ॥ ६ ॥
वीरसेनोऽपि तत्रस्थो दध्यौ विस्मितमानसः । एकः पुत्रोऽस्ति मे बालः स किं पठति वा न वा ॥७॥
चिन्तयित्वा चिरं तत्र वीरसेनो नराधिपः । प्राहिणोति स्म सल्लेखं महादेवीं स्वमभिणाम् ॥ ८ ॥
स्वस्ति श्रीपोदनासिस्थपुरवैरिविमर्दनः । सामन्ताधिपतिः श्रीमान् वीरसेनो महाबलः ॥ ९ ॥
राजराजगृहे रम्ये पुरे राजगृहेऽखिलान् । आदिदेश महादेवी मन्त्रिमुख्यान् समङ्गलम् ॥ १० ॥
महोत्सविक्थीभूतमसद्वत्यन्तदुर्लभम् । रमणीमषिसंघातं सिंहमध्यापय द्रुतम् ॥ ११ ॥
यावच्छत्रोर्वशीकारं विदधामि बलीयसः । तावत्सुतस्य कर्तव्यं भवद्भिः परिरक्षणम् ॥ १२ ॥
रिपुं स्ववशमाधाय करीभूतमानतम् । आगमिष्याम्यहं क्षिप्रं स्थेयं सर्वैः प्रयत्नतः ॥ १३ ॥
लेखवाहगले कृत्वा लेखं संवेष्ट्य यत्नतः । पुरं राजगृहं सोऽपि प्राहिणोच्च महीपतिः ॥ १४ ॥
लेखवाहो द्रुतं प्राप्य तत्प्रियां भक्तिसंयुताम् । लेखं मुमोच हृष्टात्मा सप्रणामं तदग्रतः ॥ १५ ॥
लेखार्थमवगम्याशु समुद्धृत्य लेखकस्तदा । तेषां तदर्थमाधाय [3]'सिंहोऽन्धीक्रियतामिति ॥ १६ ॥
सिंहोऽन्धकः कृतो मूढैः कायस्थवचनातकैः । शोकविह्वलचेतोभिर्गर्भस्थैर्भूपतेर्भयम् ॥ १७ ॥
अत्रान्तरे वशीकृत्य भीमं सिंहरथं रिपुम् । वीरसेनो नृपः शीघ्रमाजगाम निजं पुरम् ॥ १८ ॥
प्रविश्य मन्दिरं राजा चोपविश्य सभागृहे । सिंहमाहूय सस्नेहं मुदाऽसौ परिषस्वजे ॥ १९ ॥
सिंहस्य लोचनद्वन्द्वं दृष्ट्वा परिविवर्जितम् । जगाद भूपतिः कान्तां मन्त्रिणोऽपि पुरःस्थितान् ॥२०॥
सिंहाक्षियुगलं लोकाः विनष्टं केन हेतुना । शीघ्रं वदत मे स्पष्टं यथातथ्यं प्रयोजनम् ॥ २१ ॥
वीरसेनवचः श्रुत्वा ते वदन्ति नरेश्वरम् । त्वल्लेखदर्शनादस्य नाशितं लोचनद्वयम् ॥ २२ ॥
श्रुत्वा तद्वचनं राजा भूयोऽपि निजगादमुम् । लेखार्थः कथितः केन लेखकेनेति ते जगुः ॥ २३ ॥
आकर्ण्य तद्वचो भूपो लेखकं पुरतः स्थितम् । जगाद कोपरक्ताक्षो भृकुटीभीषणालिकः ॥ २४ ॥
रेरे शठ दुराचार सिंहलोचननाशन । कूटलेखक पापिष्ठ महेशाय निवेदय ॥ २५ ॥
वीरसेनवचः श्रुत्वा लेखको निजगाद तम् । [4]'त्वयेदं लिखितं वाक्यं सिंहमध्यापय द्रुतम् ॥ २६ ॥

---

1 क स्वनिन्दनसत्कारिणे 2 ख उपाध्यायो मतीयस्य 3 ख ज सिंहम्बीक्रियतामिति 4 ख दस

भवद्भिरिप्सितं यस्य आनीतममिदं बुधाः । युष्माभिः कृतकार्यैश्च सिंहाभीक्रियतामिति ॥ २७ ॥
लेखकस्य निशम्योक्तं भूयो भूयो जगादमून् । शृणुतास्य वचस्सार्थं सिंहमध्यापय द्रुतम् ॥ २८ ॥
सिंहस्य मत्सुतस्यास्य कारापयत भक्षणम् । अध्यापनं श्रुतस्येदं पावनं श्रीममक्षरात् ॥ २९ ॥
वीरसेननृपस्येदं निशम्य वचनं बुधाः । परं प्रमोदमायाता निन्दन्ति स्म लेखकम् ॥ ३० ॥
कारयित्वा खरारोहं लेखकस्य दुरात्मनः । मद्यानि पानवित्तानि पचनभ्रमणं तथा ॥ ३१ ॥
एवं विधाय राजेन्द्रो लेखकं दुष्टमानसम् । खलीकृत्य चकारास्य स्वदेशादपसारणम् ॥ ३२ ॥
यथायं लेखकः प्राप खलीकारं सुदुःसहम् । व्यञ्जनेन परित्यक्तं भाषमाणस्त्वभीप्सितम् ॥ ३३ ॥
जिनवक्त्राम्बुजायातं भव्यकर्णरसायनम् । अपवर्गपराकाशिभव्यजन्तुहितप्रदम् ॥ ३४ ॥
व्यञ्जनच्युतकं ज्ञानं तथा साधुरपि क्षितौ । पठन् मूर्खत्वमासाद्य भवं भ्राम्यति दुःखितः ॥ ३५ ॥

॥ इति श्रीव्यञ्जनकथानकमिदम् ॥ २३ ॥

२४ अर्थहीनकथानकम् ।

अथायोध्यापुरी कान्ता विनीता विषयेऽभवत् । वसुपालो नृपस्तस्यां प्रिया वसुमती मता ॥ १ ॥
तनयो रूपसंपन्नो वसुमित्रः सुतोऽभवत् । उपाध्यायोऽस्य संजातो गर्गो विद्यासमन्वितः ॥ २ ॥
अवन्त्यां च महादेशे श्रीमदुज्जयिनी च पूः । वीरदत्तो नृपस्तस्यां वीरदत्ता च तत्प्रिया ॥ ३ ॥
वसुपालनरेन्द्रस्य विद्विषीभूतवैरिणः । आज्ञायत्तः कथोलेप वीरदत्तो नृपः सदा ॥ ४ ॥
चातुरङ्गेण सैन्येन तत्पुरं परिवेष्ट्य सः । वसुपालनृपस्तस्थौ तत्पराक्रमविस्मितः ॥ ५ ॥
वसुपालेऽपि तत्रस्थो दध्यौ कोट्टबहिः स्थितः । कालेन कियता मे हि वीरदत्तो भवेद्वशः ॥ ६ ॥
अयोध्यायामहं तावल्लेखं च प्रहिणोम्यहम् । मत्सुतो वसुमित्रोऽपि येनायं पठति स्फुटम् ॥ ७ ॥
चिन्तयित्वा चिरं स्नेहात्सुतविद्यासमागमात् । लेखं प्रलेखुमारेभे वसुपालो नराधिपः ॥ ८ ॥
स्वस्ति श्रीपुष्पमुख्याया उज्जयिन्या नरेश्वरः । वसुपालप्रतापाग्निसाधितारातिमण्डलः ॥ ९ ॥
विनीतायां स्थितां देवीं भार्यां वसुमतीं तथा । मैथिवं पारिदेशाद्य कुशलप्रश्नपूर्वकम् ॥ १० ॥
कार्यं च लिख्यते चारु वसुमित्रसुतास्पदे । उपाध्यायस्य कर्तव्यं गौरवं विविधं बहु ॥ ११ ॥
कुन्दपुष्पसमाभाम चाध्याप्य सुसिक्थकम् । शालिभक्तं च दातव्यं घृतं च मषिसंयुतम् ॥ १२ ॥
राज्ञा विसर्जितः शीघ्रं लेखवाहो हि तत्समम् । अयाय सरसं सोऽपि स्वामिकार्यपरायणः ॥ १३ ॥
ततः क्रमेण संप्राप्य वसुपालनृपालयम् । भूपालवल्लभामर्पिलेखस्तकादिसमन्वितम् ॥ १४ ॥
ततः क्रमोपविष्टेषु सर्वेषु नृपबन्धुषु । लेखकोऽपि च तल्लेखं तत्समक्षं अवाचि सः ॥ १५ ॥
भोजनानि विचित्राणि शालिभक्तं सुगन्धि च । घृतं च मषिसंयुक्तं दातव्यं पाठकस्य वै ॥ १६ ॥
उपाध्यायस्य गर्गस्य पठति प्रीतिमानसः । महताऽर्थं प्रयत्नेन वसुमित्रसमन्वितः ॥ १७ ॥
आसने स्वर्णमादाय स्वर्णपात्र्यां मषिप्रभम् । भावनो गुरुसंघोऽपि घृतं तदञ्जननिर्मितम् ॥ १८ ॥
दीयतेऽस्मै ततोऽङ्गारमपी तदञ्जननिर्मिता । वपुनैरिदं सर्वं गर्गो मुक्तेऽस्तिमितः ॥ १९ ॥
एवं मषीयुतं भक्तं भुञ्जानस्य दिने दिने । गर्गस्य दुर्बलं जातं शरीरं मक्षीपिति ॥ २० ॥

---

1 च omits 27–28 2 क कपीकृत. 3 चक सुलभम्, ज सुलभ्, 4 चज भावनमीप° 5 क पुरी.
6 क वयादः 7 चज विचकोपित्य क विकल्प्य, 8 च कपिन्द. 9 च मपि=मुद्रमपि क मपि
10 क सम्भाषि. 11 ज मषि क मषि. 12 चक सुलभम्, ज सुलभम्.

वसुमित्रोऽपि[1] गर्गेण तदाश्रममागच्छता । विद्यायाः[2] पात्रतां नीतः[3] स्वकीयाया महात्मना ॥ २१ ॥
अत्रान्तरे वशीकृत्य वीरदर्पं महाबलम् । वसुपालः कृतानन्दो विवेश निजमन्दिरम् ॥ २२ ॥
उपविश्य नृपस्तत्र गर्गमाहूय सादरम् । सुतं चोत्सङ्गमारोप्य जगादेमं ससंभ्रमम् ॥ २३ ॥
किं कृशोऽसि गुणाधान सूपाध्याय महामते । किं न संपद्यते किंचिन्मद्गेहे[4] तव शोभनम् ॥ २४ ॥
निशम्य वसुपालस्य वचनं स्नेहसंगतम् । गर्गो जगाद तं वीरं दुर्बलः स्खलिताक्षरम् ॥ २५ ॥
स्वर्णपट्टोपविष्टाय स्वर्णपात्रे प्रदीयते । शालिभक्तं समग्रं मे घृतं सुरभिनिर्मलम् ॥ २६ ॥
कूष्माण्डारमयी[5] यष्टी घृतपूरा सपूरका । व्यञ्जनानि प्रशस्तानि दधिक्षीरावसानकम् ॥ २७ ॥
एवमादि वरं भोज्यं सताम्बूलभोजनम् । भवत्प्रसादतो राजन् सर्वं संपद्यते मम ॥ २८ ॥
मत्कुले समाचारो विषमो नरनायक । कूष्माण्डारमयी[6] येन दीयते मे महत्यपि ॥ २९ ॥
यतस्त्वया प्रभो लेखः प्रेषितो मत्प्रियोषिताम् । ततः प्रभृति भुञ्जानो मषीं तिष्ठामि संततम् ॥ ३० ॥
मसिवर्मावरोपस्य धनस्यासितुरेसुपः । अनेन कारणेनेश शरीरं दुर्बलं मम ॥ ३१ ॥[7]
उपाध्यायवचः श्रुत्वा वसुपालो विशुद्धधीः । जगाद क्रोधरक्ताक्षो लेखकं पुरतः स्थितम् ॥ ३२ ॥
रे लेखक दुराचार लेखार्थं ब्रूहि मत्पुरः । नो चेदेवं करोषि त्वं निहन्मि त्वां स्वयं तथा ॥ ३३ ॥
शालिभक्तं सदुग्धस्य गौडिभक्तं मयोदितम् । घृतं चान्यं[8] परिप्रोक्तं मषीकज्जलमेव तैलं ॥ ३४ ॥
सूपस्त्वदीयलेखस्य लेखार्थः परिकीर्तितः । एवमेवविधोऽस्माभिः कुरु त्वमनुनोचितम् ॥ ३५ ॥[12]
लेखकोक्तं समाकर्ण्य वसुपालो जगाद तम् । शालिभक्तं वरं प्रोक्तं घृतमान्यं[13] तथैव च ॥ ३६ ॥
इषा खलाटकी दाडिम मपि[13] परिकीर्तिता । अत्र दोषः समायातस्तव मूढमतेरिति ॥ ३७ ॥
गर्दभारोपणं शीघ्रं जयघण्टकमेव च । चन्दनं पञ्चबिल्वानां पत्तनभ्रमणं तथा ॥ ३८ ॥
कारयित्वा स्वकीयस्य लेखकस्य प्रमादिनः । स्वदेशाद् गमनं चक्रे वसुपालो महामतिः ॥ ३९ ॥[14]
अर्थहीनं यथा लेखं लेखको वाचयन् हतम् । अमुना वसुपालेन स्वदेशादपसारितः ॥ ४० ॥
तथा मुनिरपि ज्ञानं जैनमर्थपरिच्युतम् । पठन् अवस्थमासाद्य संसारमवगाहते ॥ ४१ ॥

॥ [15]इति श्रीअर्थहीनकथानकमिदम् ॥ २४ ॥

२५ व्यञ्जनार्थहीनकथानकम् ।

कुरुजाङ्गलदेशेऽस्ति हस्तिनागपुरं परम् । महापद्मोऽत्र भूपालः सम्यग्दर्शनभूषितः ॥ १ ॥
पद्मपत्रविशालाक्षी पद्मपादस्फुरद्युता । सम्यग्दर्शनसंपन्ना पद्मश्रीरस्य कामिनी ॥ २ ॥
तपोधरापथे देशे पोदनाख्ये पुरेऽभवत् । सिंहनादो नृपः श्रीमान् वैर्यनेककेसरी ॥ ३ ॥
अन्यदाज्यं महापद्मो महाबलविभूतिभिः । सिंहनादोपरि क्रोधात् पोदनाख्यं पुरं ययौ ॥ ४ ॥
ततो रोधं विधायाशु पोदनस्य पुरस्य सः[16] । स्वसैन्यसमुदायेन महापद्मः प्रतिष्ठितिः[17] ॥ ५ ॥
सहस्रकूटमुत्तुङ्गं पोदनस्थं जिनालयम् । पूर्वं स्तम्भसहस्रेण युक्तं राजा[18] विसिष्मिये ॥ ६ ॥

---

1 कज वसुमित्रैव. 2 क °यान्यक. 3 कज महते 4 क मषी 5 क मषी. 6 क मत्प्रियोचितम्, 7 क मषी. 8 प पद्मकमीरम्, ज पद्मकमीरम्, क पद्मकम्. 9 प चान्यं 10 क मषीकज्जलमेव च. 11 क अनुपमम्, ज अनुपमम्, प अनुपमकमीरम्. 12 प कूष्माण्ड 13 क मपि: 14 प पुष्पम्, कज पुष्पम्. 15 ज अर्थहीनकथानकमिदम्, प अर्थहीनकथानकमिदमाप्तम्. 16 क च. 17 क प्रतिष्ठते. 18 क राजा

ईदृशं सौधमुत्तुङ्गं हस्तिनागपुरे परम् । कारापयामि जैनेन्द्रं चित्रकूटविराजितम् ॥ ७ ॥
अथवा किं विकल्पेन बहुना चिन्तितेन मे । लेखं संप्रेषयामास आयामप्रिय(?)णस्य च ॥ ८ ॥
स्वस्ति श्रीपोदनस्थानान्महासामन्तसेवित । श्रीपतिः श्रीमहापद्मो गुणरञ्जितभूतलः ॥ ९ ॥
श्रीहस्तिनपुरे रम्ये पद्मश्रीजिनमन्त्रिण । आज्ञापयति सस्नेहं कुशलप्रश्नपूर्वकम् ॥ १० ॥
कार्यं च लिख्यते श्रेष्ठं सत्रिर्जिनगृहं प्रति । बहुस्तम्भसहस्राणां कर्तव्यः संग्रहो महान् ॥ ११ ॥
नृपलेखं समादाय लेखवाहस्त्वरान्वितः । हस्तिनागपुरं प्राप्य विवेश नृपमन्दिरम् ॥ १२ ॥
प्रवाच्य लेखको लेखमवधार्य तदर्थकम् । पद्मश्रीमन्त्रिसंधानामिति धीरं जगाद सः ॥ १३ ॥
स्तम्भानां लेख्यकानां हि सहस्राणि बहून्यपि । सीकर्तव्यानि युष्माभिर्जिनालयनिमित्ततः ॥ १४ ॥
व्ययवरस्य वचः श्रुत्वा महापद्मसहस्रशः । लेख्यकानां सहस्राणि गृहीतानि धनेनकम् ॥ १५ ॥
अत्रान्तरे वशीकृत्य सिंहनादं महाबलम् । आजगाम ततो हृष्टो महापद्मो निजालयम् ॥ १६ ॥
सभामण्डपमासाद्य चोपविश्य यथाऽऽसनम् । महापद्मनृपः प्राह मन्त्रिणं पुरतः स्थितम् ॥ १७ ॥
बहुस्तम्भसहस्राणि गृहीतानि न वा त्वया । जिनायतनहेतुत्वात् मन्त्रिणो भूत मे द्रुतम् ॥ १८ ॥
महापद्मस्य तद्वाक्यं निशम्योचुर्महत्तराः । देव स्तम्भसहस्राणि तिष्ठन्तीमान्यनेकशः ॥ १९ ॥
मन्त्रिवाक्यं समाकर्ण्य महापद्मो जगाद तान् । मया स्तम्भसहस्राणि समादिष्टानि न स्तम्भाः ॥ २० ॥
तथापि नृपतिर्भूयो मन्त्रिभिर्दीनमानसैः । लेखको देव जानाति न वयं चात्र वस्तुनि ॥ २१ ॥
सचिवोक्तं समाकर्ण्य महापद्मोऽपि लेखकम् । जगाद क्रोधसंभारकम्पिताखिलविग्रहः ॥ २२ ॥
महापापमिदं श्रुत्वा लेखको नियमात्मजम्(?) । यान्यन्यान्यपराण्यत्र लेखकोक्तानि तानि मे ॥ २३ ॥
लेखकोऽभाणि नृपेन देवानामपि कल्पयः । कृत्यलेखक दुर्बुद्धे लेखार्थं ब्रूहि मत्पुरः ॥ २४ ॥
बहुस्तम्भसहस्राणि विहायार्थमनुं पुनः । बहुस्तम्भसहस्राणि लेखार्थं वक्ति लेखकः ॥ २५ ॥
व्यञ्जनार्थं परित्यज्य वदन् वाक्यं सभान्तरे । निर्धाटितः खलीकृत्य महापद्मेन लेखकः ॥ २६ ॥
ज्ञानं जिनोदितं पथ्यं संसारार्णवतारणम् । अज्ञानमलनिर्णाशि सम्यक्कर्मरसायनम् ॥ २७ ॥
पठन् साधुरिदं मूढो व्यञ्जनार्थविवर्जितम् । अज्ञानमल्पमासाद्य भ्रमतीति भवार्णवम् ॥ २८ ॥

॥ इति श्रीव्यञ्जनार्थहीनकथानकमिदम् ॥ २५ ॥

*

२६ व्यञ्जनार्थोभयशुद्धिकथानकम् ।

तथा सौराष्ट्रदेशेऽस्ति नगरं गिरिपूर्वकम् । धर्मसेनो नृपस्तत्र धर्मसेनाऽस्य सुन्दरी ॥ १ ॥
तत्रत्यवनसमीपे च चन्द्रोपपदिका गुहा । संतिष्ठते गुरुस्तस्यां धरसेनो महामुनिः ॥ २ ॥
आचाराङ्गस्य चैकस्य वेत्ता शिष्यसमन्वितः । व्याख्यानं तत्र कुर्वाणस्तिष्ठति स्म मुनीश्वरः ॥ ३ ॥
हरिद्राभिधे ग्रामे वृषभौ द्वौ सितप्रभौ । प्रदक्षिण प्रकुर्वाणौ ददर्शासौ यतीश्वरः ॥ ४ ॥
प्रभातसमये साधू देवपुष्पादिकौ यती । आजग्मतुः कृतश्लोकौ जिनयोगीन्द्रपादयोः ॥ ५ ॥
उपविश्य क्षणं स्थित्वा प्रोचतुस्तौ मुनीश्वरम् । नाथ ग्रहीतुमायातौ त्वत्तो विद्यां मनोरमाम् ॥ ६ ॥
श्रुत्वा तद्भारतीं योगी निजगाद तको मुनी । ददामि भवतोर्विद्यां सुसमाहितचेतसोः ॥ ७ ॥

1 प विमानकम्. 2 प omits and confuses some lines. 3 प confuses some lines. 4 फ omits 28. 5 प हरिद्राभिधे ग्रामे.

यथैकस्मै ददौ विद्यां हीनवर्णां परीक्षितुम् । अधिकाक्षरसंयुक्तामन्यस्मै मुनिनायकः ॥ ८ ॥
ताभ्यां चतुर्थमादाय विद्याराधयितुं सतौ । एकस्य काणिका देवी चान्यस्योद्दन्तुरागता[1] ॥ ९ ॥
विलोक्य देवतां व्यग्रामेताभ्यां चिन्तितं तदा । काणिकोद्दन्तुरा देवी दृश्यते न कदाचन ॥१०॥
शोधयित्वा पुनर्विद्यां मन्त्रव्याकरणेन तु । ऊनाधिकाक्षरं दत्त्वा हित्वा ताभ्यां विचिन्तितम् ॥११॥
भूयोऽपि चिन्तिता विद्या ताभ्यां देवी समागता । सर्वलक्षणसंपूर्णा किंकर्तव्यसमाकुला ॥ १२ ॥
विसर्ज्य देवतां साधू सिद्धविद्यौ तपस्विनौ । गुरोः समीपतां प्राप्य प्रोचतुस्तौ यथाक्रमम् ॥१३॥
भवन्निर्दत्तविद्यायां दत्तमेकं मयाऽक्षरम्[2] । तथा निरस्तमेकं च महाऽतीचारकारिणा ॥ १४ ॥
कृतातीचारपापस्य प्रायश्चित्तं समाश्रयोः । प्रदेहि सांप्रतं येन स्याच्चेतःशुद्धिमिच्छतोः ॥ १५ ॥
निशम्य तद्वचो योगी महासत्त्वसमन्वितम् । उवाच तौ भृशं प्रीतौ विनीताकारधारिणौ[3] ॥ १६ ॥
ऊनाधिकाक्षरे विद्ये परीक्षार्थं यथाक्रमम् । वितीर्णे ते भवद्भ्यां मे न वा दोषोऽल्पकोऽपि सः ॥१७॥
एवं निगद्य शुद्धात्मा धरसेनो मुनीश्वरः । आचाराङ्गं ददौ ताभ्यां विनीताभ्यां ससंभ्रमम् ॥ १८ ॥
आदाय तौ तदा विद्यां समस्तामस्तकल्मषौ । पूजितौ सुरलोकेन जग्मतुः स्वमनीषितम्[4] ॥१९॥
यथा तौ योगिनौ विद्यां व्यञ्जनार्थोभयात्मिकाम्[5] । शोधयित्वा सुखाधारौ जातौ सुरनरार्चितौ ॥२०॥
तथा साधुरपि ज्ञानं व्यञ्जनार्थोभयात्मकम् । शोधयित्वा पठन्नाशु याति निर्वाणतामसौ ॥ २१ ॥

॥ इति श्रीव्यञ्जनार्थोभयशुद्धिकथानकमिदम्[6] ॥ २६ ॥

*

२७ नागदत्तमुनिकथानकम् ।

मगधाविषये सारे पुरं राजगृहं परम्[7] । अभूत्तत्र प्रजापालो नृपतिः पालितप्रजः ॥ १ ॥
प्रियधर्माऽभवद्भार्या नृपतेरस्य रूपिणी । प्रियादिधर्ममित्रान्तौ पुत्रौ स्यातां तयोरिमौ ॥ २ ॥
अन्यदा धर्ममाकर्ण्य जैनौ तौ भ्रातरौ मुदा । दीक्षां समवसरणान्ते जैनीं जगृहतुः क्षमी ॥ ३ ॥
उग्रं तपो विधायेमौ दक्षौ कर्मविनाशने । आराध्याराधनां धीरौ जातौ देवौ महर्द्धिकौ ॥ ४ ॥
प्रियधर्मचरो देवः प्रियमित्रचरं सुरम् । व्याजहार नगात् नाकस्थः कनिष्ठमिति तद्भवम् ॥ ५ ॥
द्वयोरेको यदि क्षिप्रं मर्त्यं याति सुरालयात् । तद्वशेन बोद्धव्यो भोगासक्तमतिः सकः ॥ ६ ॥
ज्यायसो वचनं श्रुत्वा स्नेहनिर्भरचेतसः । निजगादानुजस्तत्र तोषकण्टकिताङ्गकः ॥ ७ ॥
साधु संजल्पितं भ्रातः स्नेहसंबन्धमिच्छता । त्वया मया भवत्तस्य प्रतिपद्य स्फुटं प्रभो ॥ ८ ॥
अस्त्यवन्तीमहादेशे श्रीमदुज्जयिनी पुरी । नागधर्मा नृपस्तस्यां नागदत्ता च तत्प्रिया ॥ ९ ॥
प्रियमित्रचरो देवः स्वर्गादेत्यायुषः क्षयात् । पुत्रोऽनयोर्बभूवायं नागदत्ताख्यया पुनः ॥ १० ॥
ततोऽन्या नागदत्तस्य भगिनी रूपशालिनी । नागश्रीरिति विख्याता नागिनीव मनोहरी[8] ॥ ११ ॥
विषये वत्सकावत्यां कौशाम्बी नगरी परा । जिनदत्तो नृपोऽस्यां स्याज्जिनदत्ताऽस्य वल्लभा ॥१२॥
अनयो रूपसंपन्नो नन्दनो जिनपालितः । नागश्रीनागदत्तेन दत्ताऽस्मै स्नेहमिच्छता ॥ १३ ॥
प्रियधर्मचरो देवो दिव्यनारीमनःप्रियः । स्वर्गे संतिष्ठते सोऽत्र भुञ्जानः सुखसंपदम् ॥ १४ ॥

---

1 प चान्यस्य दन्तुरागता　2 प दत्तमक्षरं　3 प विनीताकारधा°, फ ज विग्रहम्, 4 फ ज स्वमनीषितम्, 5 प °भयात्मकम्, ज °भयात्मकम्, 6 फ ज often omit इति श्री and इदम्. 7 फ पुरम्. 8 फ omits some lines.

अन्यदाऽभिमासाद्य धर्मश्रीर्नि महोत्सवम् । सर्पक्रीडां प्रकुर्वाणं नागदत्तं ददर्श स ॥ १५ ॥
अथ सर्पद्वयं क्षिप्त्वा करण्डे भीषणाकृति । कुम्भरूपधरो देवस्तत्समान्तरमासिषत् ॥ १६ ॥
तत्समान्तरमासाद्य पाणो वदति तत्सभाम् । आगत्य मत्समं कोऽपि नागक्रीडां करोत्वरम् ॥१७॥
श्रुत्वा तद्वचनं धीरो नागदत्तस्त्वरान्वितः । तत्सन्मुखं समागत्य जगादेदं कलध्वनिः ॥ १८ ॥
रेरे कुम्भ दुराचार मुञ्च सर्पं मदन्तिकम् । येनाहं निर्विषं क्षिप्रं करोम्येनं विसंशयम् ॥ १९ ॥
श्रुत्वा तद्वचनं कुम्भः क्रुद्धस्तत्सन्मुखं तदा । मुमोच भीषणं सर्पं कोपारुणनिरीक्षणम् ॥ २० ॥
दृष्ट्वा सन्मुखमायान्तं दन्दशूकं महाजवम् । भस्तिपन्यं पक्षरास नागदत्तो महामतिः ॥ २१ ॥
कुण्डलीकरणं शीर्षे पतितल्यं मुखस्य च । पदप्रवेशनं चक्रे नागदत्तोऽस्य भोगिनः ॥ २२ ॥
एकं सर्पं वशीकृत्य नागदत्तो जगादमुम् । रेरे कुम्भामुना मुञ्च द्वितीयमपि पन्नगम् ॥ २३ ॥
नागदत्तवचः श्रुत्वा कुम्भोऽपि निजगौ तकम् । नाहं मुञ्चामि रक्षार्थं पन्नगं कालान्तसमकम् ॥२४॥
राज्ञे[1] राजकुमारस्य प्रमादो यदि जायते । अमुतः सर्पतो भीमात् ततो दोषो न मे स्फुटम् ॥२५॥
पापवाक्यं समाकर्ण्य नागदत्तोऽपि तं जगौ । अभयं तस्य ते[2] मुञ्च दन्दशूकं भयानकम् ॥२६॥
कुम्भः कुमारवाक्येन स्फुरन्तं भीमविग्रहम् । भीमभोगं फणविद्धं मुमोच फणिनं तदा ॥ २७ ॥
दृष्ट्वोरगं समायान्तं[4] यावद्गृह्णाति पाणिना । नागदत्तोऽमुना तावत्संदष्टः पन्नगेन सः ॥ २८ ॥
दंष्ट्राग्रक्षतो भूमौ पपात विषवेगतः । नागदत्तोऽस्य सद्बन्धुवर्गमाकुल्यतां परम् ॥ २९ ॥
दृष्ट्वा नष्टं कुमारं च विषविह्वलविग्रहम् । तद्बन्धुजनः सर्वो कुम्भान्तिकमुपाययौ ॥ ३० ॥
नागदत्तपिता दुःखदुःखविह्वलमानसः । जगादेति विनीतात्मा पार्श्वे कृत्वानूत्तम् ॥ ३१ ॥
सुवर्णधनधान्यानि ग्रामपत्तनकर्बटान् । ममाधिकं गृहाण त्वं पुत्रसंजीवनं कुरु ॥ ३२ ॥
तद्वाक्यं समाकर्ण्य पापोऽपि निजगाद तम् । निराकर्तुं न शक्नोमि नागसेवस्य हन्तुविषम्[7] ॥३३॥
अथवा जीवनोपायो विद्यते त्वत्सुतस्य च । यदि दीक्षां गृह्णाति नान्यथा कथितं तव ॥ ३४ ॥
अनयाऽवस्थया दत्तो वरो मे गुरुभिर्नृप । जीवत्यनेन भवेन यो दीक्षां विदधाति स ॥ ३५ ॥
पापवाक्यं समाकर्ण्य तन्मातापितरौ तदा । रुदतुस्तौ महाशोकदुःखखिन्नचेतसौ ॥ ३६ ॥
अस्मत्सुताय शीघ्रं जीवितं देहि शोभनम् । पश्चादेनं प्रगृह्णातु[8] तपो जैनमनुत्तमम् ॥ ३७ ॥
कुम्भो निशम्य तद्वाक्यं जगादेदं कलध्वनिः । करोमि जीवितं सूनोरनयाऽवस्थया द्रुतम् ॥ ३८ ॥
ततस्तद्वाक्यतः शीघ्रं विह्वलीभूतमानसम् । कुम्भोऽपि निर्विषं चक्रे नागदत्तं स्वमायतः ॥ ३९ ॥
ततश्चेतनतां प्राप्य जयमङ्गलनिस्वनैः । नागदत्तः समुत्तस्थौ विषेण परिवर्जितः ॥ ४० ॥
स्वस्थीभूतशरीरस्य नागदत्तस्य तत्क्षणे । निजरूपं तदा देवो दर्शयामास शोभनम् ॥ ४१ ॥
नागदत्तोऽपि तं दृष्ट्वा जगाद कृतकौतुकः । कोऽसि त्वं शोभनाकार कथयाशु मम स्फुटम् ॥४२॥
नागदत्तवचः श्रुत्वा जगादेदं सुरस्तदा । प्रियधर्मोऽस्म्यहं भद्र प्रियमित्रो भवानपि ॥ ४३ ॥
जैनं तपः समाराध्य कष्टं कृत्वा समाधिना । जातो महर्द्धिको देवो सुरूपो द्यपि स्फुटम् ॥४४॥[9]
त्वमपि च मया नाके समतः सत्यं तदा । यदि कोऽपि द्वयोरेको विषयी मेदिनीमितः ॥ ४५ ॥
विषयासक्तचित्तस्य ध्रुषिणीतव्यासिनः । प्रबोधस्तस्य कर्तव्यो नाकस्थेन सुरेण तु ॥ ४६ ॥
भवविज्ञानमासाद्य धृतोऽसि त्वं मया भुवि । सर्पक्रीडां प्रकुर्वाणो विषयासक्तमानसः ॥ ४७ ॥

---

1 प धर्मश्री 2 प दो°भारतने. 3 क त 4 प समायान्तं. 5 प तत्पार्श्वं 6 क °भयानि 7 कख दुर्गति., प दुर्गतिविषम्. 8 क भयादि. 9 प repeats 43–44 as 45–46 again.

सोऽहं तद्वोधमाधातुं स्नेहनिर्भरमानसः । डोम्बवेषं समादाय संप्राप्तो भवदन्तिकम् ॥ ४८ ॥[1]
श्रुत्वा देववचः सत्यं नागदत्तो मुमूर्च्छ सः । चेतनां प्राप्य भूयोऽपि जगादेमं कृतानतिः ॥ ४९ ॥
यदस्तित त्वया साधो नीतं निर्वहणं हितम् । अनेनागमनेनेश भ्रातृस्नेहो नवीकृतः[2] ॥ ५० ॥
जीवितं च चलं लोके शरीरं रोगमन्दिरम् । कदलीगर्भनिःसारं यौवनं च शरीरिणाम् ॥ ५१ ॥
भोगिभोगसमा भोगा अमला संपदः खला । स्नेहोऽपि बन्धुभिः सार्धं भ्रातः शक्रेन्द्रचापवत् ॥५२॥
इति संचिन्त्य शुद्धात्मा हित्वा सर्वं परिग्रहम् । अन्ते संयमसेनस्य नागदत्तोऽग्रहीत् तपः ॥५३॥[3]
कृतकृत्यत्वमासाद्य नागदत्तं तपःक्रियाम् । कारयित्वाऽमरः क्षिप्रं जगाम दिवमुद्धताम्[4] ॥ ५४ ॥
नागदत्तस्य वृत्तान्तं श्रुत्वा देवनिवेदितम् । नागधर्मा जनः सर्वो विस्मयं परमं ययौ ॥ ५५ ॥
विद्युद्योतयुतधाराभ्रघनगर्जितभूरिभि । घनागमे घनध्वान्ते तस्थौ तरुतले मुनिः ॥ ५६ ॥
मार्तण्डकरसंतप्ते शिलोच्चयशिलातले । धराधरशिरो योगी तस्थौ प्रतिमया सुधीः ॥ ५७ ॥
तुषारकणसंदग्धसमस्तनलिनीवने । शीतकाले सुखं तस्थौ नगरादेर्बहिर्मुनिः ॥ ५८ ॥
पश्चात्स्मारियोगेन नानावर्षमहत्तरणैः । यथाऽऽगमनशायी[5] स चकार क्षिपितं वपुः ॥ ५९ ॥
नानातपः प्रकुर्वाणः पूर्वदेशं प्रगत्य सः । तत्र तीर्थानि सर्वाणि ववन्दे भक्तितत्परः ॥ ६० ॥
पूर्वदेशात् समागच्छन् विन्ध्ये प्रत्यन्तवासिना । शूरदत्तेन संप्राप्तो नागदत्तो यतिस्तदा ॥ ६१ ॥
विन्ध्यमध्यस्थितं साधुं दृष्ट्वाऽसौ म्लेच्छनायकः । शूरदत्तः स्वयं सर्वे स्वनादापूरिताम्बराः ॥ ६२ ॥
नागदत्तसुता यावन्नागश्री रूपराजिता । साऽधुना प्रस्थिता गन्तुं कौशाम्बीं नगरीं प्रति ॥ ६३ ॥
कथयिष्यति नो[9] वार्ता राजपुत्रीजनस्य वै । अतो निरुध्यते तावन्मुनिरत्रैव नायकः ॥ ६४ ॥[10]
म्लेच्छवाक्यं समाकर्ण्य शूरदत्तो जगाविमान् । [11]गुञ्जाफलसमानाक्षान् कज्जलाञ्जनप्रभान् ॥ ६५ ॥
अयं मुनिः समासंग [12]सुखदुःखसमानकः । यातु नो भिद्यते साधुर्न किंचिद्वदति ध्रुवम् ॥ ६६ ॥
मुक्तो[13] मुनिर्गतः सोऽपि शूरदत्तमतेन तैः । पथ्ये भ्रमन् वनस्यान्ते नागदत्ताजनन्यसौ ॥ ६७ ॥[14]
नागदत्तमुनिं वीक्ष्य नागदत्ता जगाविमम् । न कोऽपि तस्करो पथ्ये भगवन् ब्रूहि मे मुने ॥ ६८ ॥
ममेदं भावसंसक्तो मातृव्यक्तदर्शनम् । अनालोच्य ययौ क्वापि जिनकल्पी विशुद्धधीः ॥ ६९ ॥
स्तोकमन्तरमेतौ सार्थो यावद्गच्छति तद्वने । तावदागत्य वेगेन गृहीतः सधनोऽपि तैः ॥ ७० ॥
नागदत्तां सुतायुक्तां सुवर्णरजतादिकम् । आदाय तस्कराः क्षिप्रं ययुर्निजपदं पुनः ॥ ७१ ॥
आस्थानमण्डपस्थस्य शूरदत्तस्य तस्कराः । नागदत्तादिकं कोशं निदधुः पुरतोऽस्य ते ॥ ७२ ॥
विलोक्य शूरदत्तोऽपि तत्सर्वं पुरतः स्थितम् । जगाद तस्करान् सर्वान् हसन्निति सविस्मयः ॥७३॥
म्रियते मुनिरत्रैव युष्माभिर्गदिते यथा । कथयिष्यत्ययं वार्तामस्मदीयां जनस्य सः ॥ ७४ ॥
वचनं प्रोक्तमस्माभिस्तदानीं भवतां पुरः । मुनिर्व्रजतु नो किंचिद्वक्ष्यति दोषम्य निःस्पृहः ॥७५॥
अस्मदीयकथाऽन्येन न[16] स्यात्ता साधुना सता । अस्य सार्थसमूहस्य च धनत्वमुपेयुषः ॥७६॥[17]
शूरदत्तवचः श्रुत्वा नागदत्ताऽपि तं जगौ । कोपसंभ्रान्तरक्ताक्षी दष्टदन्तच्छदा तदा ॥ ७७ ॥

---

1 प वदन्कमीरम्, फज वदन्म. 2 फज नवीकृतः 3 फज ब विस्मयमीयत्. 4 प दिवमुत्तमाम्, 5 प आगमनकायीस. 6 ज यथाऽऽगमनशायी फ यथाऽऽगमनशायी 7 प पूर्विदे 8 फ संप्राप्तो. 9 फज नायकस्य इत्य. 10 फज मा. 11 फज निरुध्यताम् प निरुध्यमीयम्. 12 प गुञ्जार्ता 13 फज 'संगमुखा' 14 फ सुखेमुनि ज सुखदु 15 प मुक्तः, फज मुक्तो. 16 फ विस्मयः. 17 प धनत्वमीयम् फ धनत्वम्, ज धनत्वम्.

यस्त्वया वर्णितो नाथः श्रमणः क्रूरमानसः । नृशंसो निर्दयोऽशान्तो निर्लज्जः पिशुनः खलः ॥७८॥
क्रियासमभिहारेण निःस्पृहं स्वतनावपि । विनिन्द्यानन्दितं चित्ते शूरदत्तं जगाद सा ॥ ७९ ॥
शूरदत्तोऽस्ति सोऽयं मदीये जठरे धृतः । क्षुरिकां देहि मे वत्स पाटयाम्यधुनोदरम् ॥ ८० ॥[1]
नागदत्तोदितं श्रुत्वा प्रणम्य निजगौ तकाम् । या त्वं तस्य मुनेर्माता ममापि त्यज कोपनम् ॥८१॥
एवमुक्त्वा तकां शीघ्रं मणिरत्नधनादिभिः । नागदत्तामसौ निन्ये कौशाम्बीं सुतया समम् ॥ ८२ ॥
शूरदत्तनरेन्द्रोऽपि नागदत्तमुनीश्वरम् । समाप्य भक्तिसंपन्नो ननाम कृतनिःस्वनः ॥ ८३ ॥
पुनः पुनः प्रणम्येमं सामन्तैर्भूमिपैः समम् । शूरदत्तोऽपि जग्राह दीक्षां दैगम्बरीमसौ ॥ ८४ ॥
मातरं भगिनीं दृष्ट्वा पीड्यमानां मलिम्लुचैः । नागदत्तमुनिर्मोहं न जगाम यथाऽन्यथा ॥ ८५ ॥
पीड्यमानः कृतान्ताद्यैः परीषहमहाभटैः । क्षपकोऽपि तथा जातु मोहं याति न शुद्धधीः ॥ ८६ ॥

॥ इति श्रीनागदत्तमुनिकथानकमिदम् ॥ २७ ॥

२८ शूरमित्रशूरचन्द्रादिकथानकम् ।

पूर्वमालवके देशे [illegible]नामनि । एकलम्बं पुरं तत्र बभूव जनसंकुलम् ॥ १ ॥
तत्राभवत् प्रतापाढ्यः शूरसेनो नराधिपः । तद्भार्या शूरसेना च कन्दोत्पलदलेक्षणा ॥ २ ॥
बभूव शूरदत्तोऽत्र श्रेष्ठी धनसमन्वितः । शूरदत्ता प्रिया चास्य रमणी गुणभूषिता ॥ ३ ॥
शूरादिमित्रचन्द्रान्तौ नन्दिताखिलबान्धवौ । अभूतां नन्दनौ कान्तौ सुता मित्रवती तयोः ॥ ४ ॥
अथ कालं गतः श्रेष्ठी द्रव्यं च क्षयमागतम् । दरिद्रतां परिप्राप्ताः शूरमित्रादयः स्फुटम् ॥ ५ ॥
शूरमित्रः समं तेन शूरचन्द्रेण दुःखितः । प्रययौ सिंहलद्वीपं रत्नार्थी धनतृष्णया ॥ ६ ॥
तत्र द्वादशभिर्वर्षैरनर्घ्यो मणिनायकः । लब्धस्ताभ्यां प्रभादीप्तो रविर्वा तेजसा स्फुरद् ॥ ७ ॥
ततो रत्नं समादाय शूरमित्रोऽनुजेन सः । पथि प्रचलयामास लोभपूरितमानसः ॥ ८ ॥
करे मणिं समादाय तस्थौ ज्यायान् वनान्तरे । शूरचन्द्रो गतो भिक्षामाहर्तुं ग्राममन्तिकम् ॥९॥
शूरमित्रस्ततो दध्यौ करस्थितमणिस्तदा । अनुजं हन्मि येनेदं रत्नं भवति मेऽनघम् ॥ १० ॥
अविचारनिवर्त्याः स्युः परिणामा हि देहिनाम् । ततो निनिन्द स ज्यायानात्मानं सुचिरं तदा ॥११॥
हाऽसुन्दरं कर्म ध्यातं मया संसारवर्धनम् । सहोदरं न हन्तुं मे पितृकल्पस्य युज्यते ॥ १२ ॥
एवं चिन्तयतस्तस्य शूरचन्द्रः समागतः । भिक्षामादाय संक्षेपात् भुक्त्वा तौ जग्मतुस्ततः ॥१३॥
अन्येद्युः शूरमित्रोऽपि भिक्षार्थं नगरं गतः । मणिमादाय हस्तेन शूरचन्द्रो वने स्थितः ॥ १४ ॥
मणिहस्तः पुनर्दध्यौ शूरचन्द्रोऽपि तत्क्षणम् । ज्येष्ठं निहन्मि येनेदं मम रत्नं प्रजायते ॥ १५ ॥
हा हा विरूपकं ध्यातं मया दुःखनिमित्तकम् । ज्येष्ठस्य पितृतुल्यस्य हिंसने विहिता मतिः ॥१६॥
यावदेवंविधं वाक्यं ध्यायति स्मानुजोऽत्र सः । तावज्ज्येष्ठः समायातो भिक्षामादाय शोभनाम् ॥१७॥
भुक्त्वा तौ भोजनं तत्र ससायासमन्वितौ । क्रमेण निम्नगां प्राप्तौ स्वपत्तनसमीपगाम् ॥ १८ ॥
प्रपाय शीतलं तोयं स्थित्वा वेत्रवतीतटे । शूरमित्रोऽनुजं प्राह शूरचन्द्रं पुरःस्थितम् ॥ १९ ॥
अलमेतेन दिव्येन रत्नेन मम सांप्रतम् । शूरचन्द्र गृहाणेदं मूल्येन परिवर्जितम् ॥ २० ॥
शूरमित्रवचः श्रुत्वा प्रणामेन कृतानतिः । शूरचन्द्रः कृतध्यानः कौतुकव्याप्तमानसः ॥ २१ ॥
समानमावयो रत्नं कुतो मे यच्छसि प्रभो । सत्येन भाषितः क्षिप्रं यथावृत्तं निवेदय ॥ २२ ॥

---

1 प॰ज धरे. 2 प॰ज मित्रम्, प मित्रमतिस्. 3 प॰ज खलेन 4 क °निर्वर्त्या. 5 प प्रजायते

आकर्ण्य शूरचन्द्रस्य वचनं कृतकौतुकम् । जगाद शूरमित्रस्तु स्नेहनिर्भरमानसः ॥ २३ ॥
यावत् मत्करे रत्नं तिष्ठतीदं मुहुर्मुहुः । तावत्प्रभृति मच्चित्तं वर्तते त्वन्निपातने ॥ २४ ॥
अनेन कारणेनेदं गृहाण रुचिभासुरम् । अलं तेन सुवर्णेन यत्कुर्यात् कण्ठकर्तनम् ॥ २५ ॥[1]
अग्रजस्य वचः श्रुत्वा शूरचन्द्रो जगाद तम् । ममापि चेदृशो भावो रत्ने करगतेऽभवत् ॥ २६ ॥
श्रुत्वाऽन्योन्यसमालाप स्वनिपातनकारणम् । अशोभनमिदं ताभ्यां निक्षिप्तं तत्सरिज्जले ॥ २७ ॥
ततस्तौ भ्रातरौ शान्तौ स्नेहनिर्भरमानसौ । शोभनाचारसंपन्नौ जग्मतुर्निजमन्दिरम् ॥ २८ ॥
पतितं तन्नदीमध्ये मत्स्येन गिलितं तदा । जालेनाथ समाकृष्टो धीवरेण स मीनकः[2] ॥ २९ ॥
ततस्तेन समुद्धृत्य विक्रेतुं त्रिशिखान्तरे । नीतोऽवतिष्ठते तत्र समुच्चे रोहिताख्यया ॥ ३० ॥
माता पुत्री विलोक्यैतौ तदानीं गृहमागतौ । तोषपूरितचेतस्का बभूव सुतया समम् ॥ ३१ ॥
तदाऽऽगतक्रिया कृत्वा पादप्रक्षालनादिकम् । माताऽऽपणं जगामाशु क्रेतुं मत्स्यमादरात् ॥३२॥
आदाय रोहितं मीनं धर्मस्नेन तदन्विता[3] । आजगाम पुनर्गेहं तस्याधूमकविह्वला ॥ ३३ ॥
यावच्छिनत्ति तं मीनं तन्माता स्नेहतत्परा । तावत्पपात तन्मध्यान्मणिर्मूल्यविवर्जितः ॥ ३४ ॥
मणिमादाय हस्तेन तोषपूरितमानसा । दध्यौ तदा च तन्माता चेतसीदं मिथो[4] भृशम् ॥ ३५ ॥
धारये ह्यपि क्षिप्रं सुतां मत्प्रीतिकारिणीम् । निहन्मि येन तिष्ठामि स्वगृहे प्रीतमानसा ॥३६॥
ममेदं युज्यते नैव पुत्रपुत्रीविनाशनम् । विषात्तु हीनसत्त्वानामपि दुःखावहं भवेत् ॥ ३७ ॥
पश्चात्तापमिमं कृत्वा सुतायै रत्नमुत्तमम् । ददौ तन्मातृका शीघ्रं सुतसद्भावकारिणी ॥ ३८ ॥
सुता रत्नं समादाय दध्यौ मनसि मूढधीः । मातरं भ्रातरौ नूनं विषं दत्त्वा निहन्म्यहम् ॥३९॥
हा हा कष्टं मया ध्यातं महापापनिमित्तकम् । संसारकारणं तद्धि महादुःखविधायकम् ॥ ४० ॥
चिन्तयित्वा चिरं दीनं रत्नं भ्रात्रोः समर्पितम् । शुभसङ्कल्पमासाद्य तया बुद्धिसमेतया ॥ ४१ ॥
दृष्ट्वा रत्नमिदं तौ च भ्रातरौ स्नेहतत्परौ । विज्ञाय भवतत्त्वं तौ वैराग्यं परमं गतौ ॥ ४२ ॥
शर्वरीप्रथमे यामे शूरदत्ता जगौ सुतम् । पुत्र द्वादशभिर्वर्षैः[9] किमानीतं त्वया वद ॥ ४३ ॥
जननीवाक्यमाकर्ण्य शूरदत्तो जगाद ताम् । आवाभ्यां रत्नमुत्कृष्टं लब्धं [10]दीप्तिभासुरम् ॥४४॥
मदक्षसंगतं रत्नं कनिष्ठं हन्ति मे मतिः । यदाऽस्य हस्तसंप्राप्तं ज्येष्ठं हन्तीति भूरिशः[11] ॥४५॥[12]
एवं संचिन्तयन्तौ तौ संप्राप्तौ सरयूतटीम्[13] । ततस्तेऽन्योन्यमालोच्य स्वस्वभावनिरूपणम् ॥४६॥
असुन्दरमिदं रत्नमावाभ्यां सरयूह्रदे । निक्षिप्तं तद्विरक्ताभ्यां भ्रातृभ्यां भवदन्तिकम् ॥ ४७ ॥[14]
पुत्रवाक्यं समाकर्ण्य शूरदत्ता जगावमुम् । गताऽहं हट्टमालोक्य भवन्तौ गृहमागतौ ॥ ४८ ॥
तत्र मत्स्यं समादाय मूल्येन गृहमाप्य च । मीनस्य खण्डने यावद्विदधामि महानसी ॥ ४९ ॥
तावन्महामणिं दृष्ट्वा तत्तले परिगृह्य तम् । पुत्र तोषे परिप्राप्ता महामणिसमागमात् ॥ ५० ॥
हस्तप्राप्ते मणौ भावः संजातो मम चाऽधमः[15] । भवन्तौ हन्मि पुत्रीं च वत्स्यामसि पातकम् ॥ ५१ ॥[16]
भूयो विरक्तिमासाद्य बहुमूल्यमणेरपि । निर्वीर्योऽयं मया पुत्र सुतायै स्नेहकारणात् ॥ ५२ ॥[17]

---

1 पज निरयम्, प निरयमिदम्. 2 प धनि:. 3 पज धर्मीनतं. 4 पज मिथिते. 5 पज स्नेहेन प (स्नेन्मेन) 6 पज तदन्विता. 7 प चेतसीदं मथो [चेतसीदमथो]. 8 प पुत्रं पुत्री 9 महारत्नं 10 प दीप्ति॰ 11 पज भूरि का 12 प has lost a line here. 13 पज एवं चिन्तयन्तौ भ्रातरौ सरयूतटे. 14 पज निक्षिप्तं 15 प चाधुनामिदम्, प चाधुना॰ ज चाधमम्, 16 पज वाञ्छा. 17 प वि॰ 18 प चाधमकमिदम्, फ चाधमकम् ज चाधमम्.

सुताऽपि धन्नीवाक्यं निशम्य स्नेहवत्सला । समाह मातरं साऽपि पुत्रद्वयसमन्विताम् ॥ ५३ ॥
यतः प्रभृति मे रक्तं त्वया दत्तं मनोहरम् । ततः प्रभृति मातोऽयं मे मातर्भास्वतेऽपरः ॥ ५४ ॥
मातरं यच्छमां हन्मि भ्रातरावपि निश्चितम् । अशोभनः पुनर्दोषो भ्रातृभ्यां हि मया[1] मतिः ॥ ५५ ॥
मातृसम्बन्धं श्रुत्वा महावैराग्यकारणम् । भ्रातरौ भोगनिर्विण्णौ चक्रतुर्दीक्षणे मतिम् ॥ ५६ ॥
रत्नमालाद्य ते सर्वे महावैराग्यसंगताः । दत्त्वा मणिं जिनायाशु नन्दनान्ते प्रवव्रजुः ॥ ५७ ॥
अन्योन्यं क्षमापयित्वा प्रशमं प्राप्य ते यथा । स्वतपसः सर्वे दैवीं गतिमुपाययुः ॥ ५८ ॥
तापसोऽपि यथा लोके सर्वसत्त्वहितमिच्छकः । क्रोधादिकं विनिर्जित्य दिवं मोक्षं च यान्ति ते ॥ ५९ ॥

॥ इति श्रीधरमित्रधरचन्द्रादिपरस्परकोपार्जनम-
विधाननिराकरणकथानकम् ॥ २८ ॥

२९ वासुदेवकथानकम् ।

सुराष्ट्रेऽत्र देशेऽस्ति पुरी द्वारवती परा । यस्यां बभूव भूपालो वासुदेवो महाबलः ॥ १ ॥
सत्यभामादिसद्भार्या बभूवुस्तस्य शोभनाः । रूपविभ्रमयुक्ते यासां न कस्यापि समा भवेत् ॥ २ ॥
अन्यदाऽसौ महीपालो विवाहकन्यकुट्टनम् । नारायणो यथामेदं[2] मुनिर्दंशसमाकुलम् ॥ ३ ॥
कृत्वा जिनमुनिस्तोत्रं हरिः स्थित्वा यथाऽऽसनम् । विलोक्य पुरुषं साधुं जीवितस्मभिवेष्टित ॥ ४ ॥
ज्ञात्वा विष्णुमतं वैद्यः समुत्थाय जिनालयात् । राजा सर्वे नित्यं क्षौद्रं नगरीनामकल्पना ॥ ५ ॥
भाग्यवान् घटकान् कृत्वा श्रावकाणां पदे पदे । स्थापयामास वैद्योऽपि वासुदेवमतेन सः ॥ ६ ॥[3]
प्रथमं घटकं दत्त्वा योगिने स्नानमीश्वरे[4] । तत्कृपये कृते पश्चात्प्रभावातिशयान्वितम् ॥ ७ ॥
श्रावकाणां जनस्यैव समस्तस्य च तत्पुरे । जीवंधरो ददौ शिष्यां[5] तदा विष्णुपुरस्सरम् ॥ ८ ॥
यत्रैव च पदे योगी मुनिस्तिष्ठति सर्वदा । तत्रैवासौ जनः सर्वो घटकं भक्तितो ददौ ॥ ९ ॥
योगिनं मोहकर्मस्य मुनेः श्रावकवेश्मनि । पुनर्नवमिदं जातं शरीरं रोगवर्जितम् ॥ १० ॥
अन्यदा वासुदेवोऽयं सर्वं समस्तादिकम् । ययौ नेमिजिनेन्द्रस्य सर्वं वैद्येन संयुतः ॥ ११ ॥
नेमिनाथस्तुतिं कृत्वा सद्भक्त्या विश्वंभराम् । चलितोऽयं पुरं यावत् वासुदेवः सवैद्यकः ॥ १२ ॥
आगच्छन्तं योगिनं दृष्ट्वा स्वस्थीभूतशरीरकम् । वैद्यस्य कुर्वन्तं विष्णुः प्रणामं सकौतुकः ॥ १३ ॥
विष्णुवाक्यं समाकर्ण्य स योगी नियमात्मकम् । सारता का शरीरस्य रक्षन् धर्मच्युतस्य योः ॥ १४ ॥
मुनेर्वचनमाकर्ण्य दध्यौ जीवंधरस्तदा । अनेन मुनिना विष्णोः पुरतो वञ्चितं कथम् ॥ १५ ॥
साधुर्वदति यद्येवं नारायणपुरस्सरम् । कायस्तच्छरीरस्यैवेन शोभनो विहितो मम ॥ १६ ॥
ग्रामक्षितिसुवर्णौघं धनधान्यादिकामनम् । ददात्यन्ये ततो राजा पारितोषिकपूर्वकम् ॥ १७ ॥
एवं चिन्तयतस्तस्य चार्थप्राणपरीक्षणम् । जीवितं क्वापि संनार्दं[10] तस्यैवस्य मयाऽऽदिव ॥ १८ ॥
रैवतमभ्यगते तुङ्गे नानावृक्षविराजिते । पर्वते भीषणे वैद्यो भूतनायोऽर्थकारिः[11] ॥ १९ ॥
क्वाप्यसौ विहरन् क्वापि साधुर्वं प्राप्य पर्वतम् । तस्थौ घनागमे तत्र विन्ध्यीकृतरोरव ॥ २० ॥

---

1 ब मया° 2 फज विष्वम् प विष्वमीवम्, 3 फ रेवती° ब रैवती 4 फज यथामेदं 5 प मुनिवर, 6 फज lose some lines here. 7 प स्नानमीश्वरे. 8 फज शिष्यं [शिष्यां]. 9 प पक्ष्मणमीरप्, फज पक्ष्मणम्. 10 फज जीवितं. 11 फ भोगादिः. 12 प हरीत्यावर्तम्

घण्टापातसमाघातपातितेनोपरिस्थिता । स मुनिर्भिक्षपयः स्थाण्वाग्रेण तिष्ठते ॥ २१ ॥
उपसर्गोऽयमीदृक्षो यदि क्षेमेण यास्यति । ततो मम प्रवृत्ति साहाहारादेन चान्यथा ॥ २२ ॥
तावदस्य विलोक्येमं मुनिं मर्कटनायकः । परिदध्यौ हरिः स्पष्टं तन्मुखाम्भोजवीक्षया ॥ २३ ॥
यो निर्मोऽपि शरीरेऽस्मिन् निर्ममत्वो महामुनिः । स ममत्वं कथं कुर्यादन्यस्यापघने परम् ॥ २४ ॥
पर्यन्तस्थितशाखाग्रं चक्रुर् यष्टीकदम्बकैः । नोपरिष्टच्छाखा च नम्रीकृत्यात्र मर्कटः ॥ २५ ॥
सर्वेषोत्सवनं कृत्वा मर्कटानां कदम्बकम् । गतमन्यत्र शाखायां सा शाखा निगताऽमुतः ॥ २६ ॥
ततोऽवतीर्य तद्वृक्षान्मर्कटो मर्कटैः समम् । प्रणम्यौषधियोगेन रोहणं कृतवानसौ ॥ २७ ॥
तत्र पुरः स्थितं दृष्ट्वा मर्कटं मुनिसत्तमः । कृपाम्बुपरिप्लवहृदयो निजगादमुम् ॥ २८ ॥
तैरश्चीं गतिमापन्नो येषो तीर्थंकर स्फुटम् । आर्तध्यानान्स्मृतिं प्राप्य मत्सम हरिणोऽदिते ॥ २९॥
दिनानि सप्त जानीहि कपीन्द्र तव जीवितम् । ततो महाघनाच्छीघ्र कुरुष्व हितमात्मनः ॥ ३० ॥ [1]
मुनिवाक्यं समाकर्ण्य संसारत्रस्तमानसः । जगाद तं हरिः क्षिप्रं देहि मेऽनशनं विभो ॥ ३१ ॥
स्थितक्लेपविधाय मर्कटस्य महात्मने । ददावनशनं योगी धर्मविन्यस्तचेतसे ॥ ३२ ॥
क्रोधं क्षमाबलेनायं मानं मार्दवयोगतः । मायामार्जवयोगेन लोभं शौचबलेन च ॥ ३३ ॥
चतुर्गतिकसंसारवासवासितदेहिनाम् । दुर्गतेर्हेतुकानेतान् कषायांश्चतुरो जय ॥ ३४ ॥ [2]
आराधनां समाराध्य विधिनाऽपि चतुर्विधाम् । कृत्वा काल हरिः क्षिप्रं सप्तमे दिवसेऽनघः ॥३५॥
अणिमादिगुणोपेतः सुरनारीमनःप्रियः । बभूव प्रथमे नाके दिव्यरूपधरोऽमरः ॥ ३६ ॥ [4]
किं दत्तं किं मया भुक्तं किं तपोऽनुष्ठितं पुरा । येनाहं कृतपुण्यः सन् उत्पन्नो नाकजे पदे ॥३७॥
अवधिज्ञानमासाद्य स्मरन् मर्कटजन्मनम् । विवेदेमं सुरस्तूर्णं तन्मुनेस्तदेशतः ॥ ३८ ॥
ज्ञात्वा नाकसुखप्राप्तिमात्मनो मर्कटामरः । तद्वन्दनाय शीघ्रात्मा प्रस्थानमकरोदसौ ॥ ३९ ॥
रम्यैः कनकनिर्माणैरम्यैः पवनधारिभिः । हस्तिभिर्मददाराभिः सिंहगणनसस्सैः परैः ॥ ४० ॥
हाररामितवक्षोभिः सिन्दूरकरकर्णैः । अधिरूढैः सुरैः सार्धं व्योमाक्षेपनमण्डलम् ॥ ४१ ॥
वृक्षमूलस्थितं साधुं भक्तिप्रह्वतनूरुहः । सुरैः समं कृतानन्दैरनसीन्मर्कटामरः ॥ ४२ ॥
महारत्नवनिर्माणैः कर्मठैरस्य योगिनः । अर्चयित्वा स्वयं पादावपारीत् प्लवगामरः ॥ ४३ ॥
तिर्यग्यातिसमुत्पन्नो मर्कटोऽहं पुरा भवे । अधुना त्वत्प्रणीतेन संन्यासेन सुरोऽभवम् ॥ ४४ ॥
श्रुत्वाऽमरवचः साधुजयादेन विशुद्धधीः । यदीच्छसि हितं स्वस्य मानोन्मानं करिष्यसि ॥४५॥
श्रुत्वा मौनीश्वरं वाक्यं भूयोभूयः प्रणम्य तम् । नतेन शिरसा देवो ययौ निजकलेवरम् ॥ ४६ ॥
गोशीर्षचन्दनैः श्रेष्ठैः कुङ्कुमागरुमिश्रितैः । कृत्वा पूजां स्वकायस्य ययौ देवो निजां दिवम् ॥ ४७ ॥
कृत्वाऽमरेश्वरेणेव पूजा साधुशरीरके । तेनामरेश्वरं तीर्थं बभूव भुवि विश्रुतम् ॥ ४८ ॥
यथाऽत्र वासुदेवेन वैयावृत्यं योगिनः । कृतं तीर्थकरस्येदं गोत्रं भुवनशेखरम् ॥ ४९ ॥
तथाऽन्योऽपि प्रकुर्वाणो वैयावृत्त्यं चतुर्विधे । संघे नरो हि बध्नाति तीर्थकृद्गोत्रमुत्तमम् ॥ ५० ॥

॥ इति श्रीवासुदेववैयावृत्यतीर्थंकरगोत्रबन्धन
कथानकमिदं संपूर्णम् ॥ २० ॥

•

---

1 प क ज चतुष्कम्, 2 प क ज त्रिकम्, 3 प क ज युग्मम्, 4 प क ज कुलकम्
[illegible] [त्रिकम्]. 7 प क ज त्रिकम्. 8 क करोत्, प [illegible] 9 [illegible]

३० मृतकसंसर्गनष्टमालाकथानकम् ।

अथोत्तरापथे देशे पद्मदेवपुरस्य च । प्रतापनिर्जितारातिः राजाऽऽसीद् पद्मवर्धनः ॥ १ ॥
रूपरञ्जितसर्वाङ्गी नीलोत्पलसमप्रभा । बभूवास्य नरेन्द्रस्य रमणी कुलवर्धनी ॥ २ ॥
तस्मिन्नेव पुरे चासीद्धनश्रेष्ठी महाधनः । धनदत्तोऽस्य सद्भार्या धनदत्ता प्रकीर्तिता ॥ ३ ॥
रूपयौवनसंपूर्णा मुखनिर्जितचन्द्रमा । कनत्कनकसद्वर्णा धनदेवी सुताऽनयोः ॥ ४ ॥
तत्रैव नगरे श्रीमान् धनश्रेष्ठी प्रियंवदः । पूर्णभद्रोऽभवत्तस्य पूर्णचन्द्रा प्रिया वरा ॥ ५ ॥
तयोः परस्परप्रेमासक्तमानसयोः सुतः । पूर्णचन्द्रोऽभवद् भव्यः पूर्णचन्द्रसमाननः ॥ ६ ॥
ययाचे पूर्णभद्रस्तं धनदत्तं मनोहरीम् । सुताय पूर्णचन्द्राय धनदेवीं कलावतीम् ॥ ७ ॥
पूर्णभद्रवचः श्रुत्वा धनदत्तो जगाद तम् । यच्छामि कुट्टिकां तेऽहं यदि देहि धनं बहु ॥ ८ ॥
निशम्य धनदत्तोक्तं पूर्णभद्रो जगाद तम् । कुट्टिकां देहि मे शीघ्रं गृहाण त्वं धनं बहु ॥ ९ ॥
ततो दत्त्वा धनं तस्मै परिणीताऽमुना तदा । धनदेवी कलाख्याता धनदेवीव रूपिणी ॥ १० ॥
यस्मिन्नेव दिने पोढा धनदेवी निशि सुतम् । तस्मिन्नेव दिने बाला मृता कन्याऽप्यचेतना ॥ ११ ॥
ततो मृतां सुतां दृष्ट्वा शोकविह्वलमानसः । धनदत्तस्तदा दध्यौ किंकर्तव्यविमूढधीः ॥ १२ ॥
धनेनानेन मे किंचिच्चिन्तितं न प्रयोजनम् । अहं शोभां करोम्यस्याः धनदेव्याः प्रभावतीम् ॥ १३ ॥
धनेनानेन सर्वेण पुष्पमालां मनोहराम् । गृहीत्वा धनदत्तोऽपि सुतोपरि ददौ तदा ॥ १४ ॥
तच्च श्रुत्वा तदा श्रेष्ठी स्नुषां पञ्चत्वमागताम् । पूर्णभद्रो धनाकाङ्क्षी धनदत्तान्तिकं ययौ ॥ १५ ॥
धनदत्तं परिप्राप्य पूर्णभद्रोऽपि सं जगौ । धनदेवी मृता देहि मदीयं सकलं धनम् ॥ १६ ॥
पूर्णभद्रगिरं श्रुत्वा धनदत्तो जगाद तम् । पुष्पमाला समारब्धा त्वदीयेन धनेन मे ॥ १७ ॥
किंच पञ्चत्वमापन्ना त्वत्सामान्येन मत्सुता । मत्सुता च स्थितं माल्यं नश्येत्कालेन सहेत च ॥ १८ ॥
लौकिकनामयं न्यायस्त्वमुक्तवयतत्त्व । महाजनकृतो दण्डो भवेदस्य किं विधेः ॥ १९ ॥
मृतपुत्रीपरिस्पृष्टां नानापुष्पसमन्विताम् । पुष्पमालां गृहाणेमां तारापङ्क्तिमिवोज्ज्वलाम् ॥ २० ॥
निशम्य भारतीमस्य पूर्णभद्रो जगाविमम् । देहि मे सकलं द्रव्यं माल्येन न प्रयोजनम् ॥ २१ ॥
एवं कलहकालापे प्रवृत्ते पक्षयोस्तयोः । विशिष्टेषु समायातः समाहूतस्तदन्तिकम् ॥ २२ ॥
कोऽपि वृद्धो जगौ तत्र पूर्णभद्रं महामतिः । अनेन धनदत्तेन संबन्धमेषकं वद ॥ २३ ॥
वृद्धवाक्यं समाकर्ण्य पूर्णभद्रो जगाद तम् । धनदेव्या धनं दत्तं बहु मे तद्ददात्वयम् ॥ २४ ॥
पूर्णभद्रोदितं श्रुत्वा पर्यायाभिजगाविमम् । धनदत्त वद सत्यं ब्रूहि मत्पुरतोऽनघ ॥ २५ ॥
वृद्धस्य वचनं श्रुत्वा धनदत्तोऽवदत्तकम् । धनेन सकलेनास्य पुष्पमाला मया कृता ॥ २६ ॥
सुतोपरि कृता माला शुभशोभानिमित्ततः । मृतोऽस्मीमामयं शीघ्रं गृह्णातु कुसुमोज्ज्वलाम् ॥ २७ ॥
वृद्धवाक्येन सा माला गृहीताऽनेन शोभना । पूर्णभद्रः समादाय तां ययौ विपणान्तरे ॥ २८ ॥
पुष्पमालां न कोऽप्येतां गृह्णाति शवसंभवाम् । कपर्दकेन चैकेन बहुमूल्यामपि स्थिताम् ॥ २९ ॥
यथा सा बहुमूल्याऽपि पुष्पमाला मनोहरी । सर्वैरपि परित्यक्ता जनैर्मृतकसंगता ॥ ३० ॥
तथा दुर्जनसंसर्गात् पुरुषो भाग्यवानपि वा । अन्यैरपि गुणैस्तुल्यो यत्नात् परिमुच्यते ॥ ३१ ॥

॥ इति श्रीमृतकसंसर्गनष्टमालाकथानकमिदम् ॥ ३० ॥

*

1 क अथोत्तर 2 ख हरिचन्द्रपत्नाम् 3 ख omits 9 4 ख त्वत्सामान्येन 5 ख पुष्पम्, ग्रन्थ पुष्पम्, 6 ख विशिष्टामागताः 7 क वदति 8 क कपर्दकेन, ख कपर्दैन 9 ख संबंध

३१ कल्लालमित्रसगतिशिवमूर्तिकथानकम् ।

विषये वत्सकाख्यस्यां कौशाम्बी नगरी वरा । धनपालो नृपोऽस्यां स्याद् वसुपाला प्रियाऽस्य सा ॥ १ ॥
तस्मिन्नेव पुरे श्रेष्ठी[1] पूर्णभद्रोऽभवद्धनी । माणिभद्रा प्रिया चास्य वसुमित्रा सुताऽनघा[2] ॥ २ ॥
अन्यदाऽऽदिवसे सवस्त्रविवाहे निमन्त्रितः । भुक्तश्च विधिनाऽऽसर्वं पूर्णभद्रनिकेतने ॥ ३ ॥
शिवमूर्तिर्द्विजो मित्रं स्मृतिवेदविशारदः । समस्तशास्त्रसंवेदी महेश इव विदितो बुधैः ॥ ४ ॥
ममैव मद्गृहे विप्रो भोजनं विदधाति नो । धनेन बहुना चाऽपि तदा मे जीवितेन किम् ॥ ५ ॥
एवं ध्यात्वा चिरं श्रेष्ठी पूर्णभद्रस्त्वरान्वितः । शिवमूर्तिं परं प्राप्य सस्नेहं निजगादिमम् ॥ ६ ॥[3]
यदि मित्र मया कार्यं विद्यते तव सन्मते । ततोऽद्य सरस साधो मद्गृहे भोजनं कुरु ॥ ७ ॥
पूर्णभद्रवचः श्रुत्वा शिवमूर्तिर्जगाद तम् । त्वयाऽतिशोभनं प्रोक्तं मित्र भावमनःप्रियम्[4] ॥ ८ ॥
ब्राह्मणानां कुले किंतु मित्र लोकविरुद्धकम् । तथा स्मृतिविरुद्धं च जायते कार्यमीदृशम् ॥ ९ ॥
वेदस्मृतिविविधज्ञोऽपि शूद्राहारपरिप्लुतः । यदि शूद्रगृहे भुङ्क्ते विप्रो लोकविरुद्धकम् ॥ १० ॥
शूद्रभोजनशुश्रूषा शूद्रप्रेषणता तथा । वितीर्णाऽन्नेन या वृत्तिर्नरकाय भवेदिदम् ॥ ११ ॥
हविष्कृतं तथोच्छिष्टं मतिं [5]धर्मकथानकम् । व्रतं चैतानि शूद्राय न दीयन्ते कदाचन ॥ १२ ॥

तथा चोक्तम्—

शूद्रान्नं शूद्रशुश्रूषा शूद्रप्रेषणकारिता ।
शूद्रदत्ता च या वृत्तिः पचास नरकाय तत् ॥ १३ ॥

न शूद्राय मतिं दद्यान्नोच्छिष्टं न हविष्कृतम् । न चास्योपदिशेद्धर्मं न चास्य व्रतमादिशेत् ॥ १४ ॥
अनेन कारणेनार्य भवद्गृहभोजनम् । करोमि तेन नो मित्र नूनं स्मृतिविरोधतः ॥ १५ ॥
शिवमूर्तिवचः श्रुत्वा पूर्णभद्रोऽपि तं जगौ । खेदनिर्भरचेतस्को म्लानवक्त्रसरोरुहः ॥ १६ ॥
मद्गृहे भोजनं मित्र विरुद्धं यदि जायते । ततो [6]विप्रगृहेऽन्नं च संस्कृत्य बहुभेदकम् ॥ १७ ॥
द्राक्षाम्रक्रमुकाम्भूकलवलीपल्लवितं वनम् । कदलीनालिकेरादितरुखण्डविराजितम् ॥ १८ ॥
ईदृशं वनमासाद्य फलपुष्पमनोहरम् । स्वपक्षिभिरमा मित्र भोजनं कुरु मत्समम् ॥ १९ ॥[7]
तव तद्गृहरोधेन तदानीं वनभोजनम् । इष्टमासीत् सहर्षं च परमं शिवमूर्तिना ॥ २० ॥
अन्येद्युः पूर्णभद्रोऽपि गृहीतवरभोजनः । शिवमूर्तिसमं भूत्वा ययावुपवनं वने ॥ २१ ॥
पूर्णभद्रस्तदा सार्धं बहुभिर्निजबान्धवैः । शिवमूर्तिरपि क्षिप्रमुपविष्टो यथासनम् ॥ २२ ॥
सर्वे तिष्ठन्ति ते तत्र पूर्णभद्रादयो जनाः । शिवमूर्तिः पुनर्दुग्धं तत्समीपे गुडान्वितम् ॥ २३ ॥
अथ दूरस्थितेनायं शिवमूर्तिर्विलोकितः । पुरुषेणान्तरस्थेन भूपतेर्दुग्धमापिबत् ॥ २४ ॥
शिवमूर्तिं जगौ सोऽपि तिष्ठन्तं भयमादरात् । कल्लालेन समं तत्र पूर्णभद्रेण भूपतेः[8] ॥ २५ ॥
राजाऽऽकर्ण्य वचस्तस्य विस्मयव्याप्तमानसः[9] । तथानयेत्यवक् शीघ्रं वदन्त प्रादिशोत्तरम् ॥ २६ ॥
ततोऽतीवप्यतस्तेन दूरस्थेन समाहूतः । शिवमूर्तिः पुनर्मधु नीतो राजान्तिकं तदा ॥ २७ ॥
दृष्ट्वा पुरःस्थितं क्षिप्रं[10] शिवमूर्तिं जगौ नृपः । अनिष्ठ दुष्ट पापिष्ठ मद्यं पिबसि किं वद ॥ २८ ॥

---

1 प [illegible]. 2 [illegible]. 3 प [illegible]. 4 क [illegible] 5 [illegible] 6 [illegible]. 7 क [illegible]. 8 [भूपते]. 9 प [illegible]. 10 क [illegible].

श्रुत्वा नृपवचो विप्रो जगौ भूपं कृपान्वितम् । मया पितामहो नैव राजन् दृष्टमिति ब्रुवन् ॥ २९ ॥
तथापि भक्त्या भूपः शिवभूतिं जुहवत् । अर्धं कुरु पुनर्येन दुग्ध पश्यामि सांप्रतम् ॥ ३० ॥
दत्त्वाङ्कुशमियं कर्दि चकार नृपशासनात् । क्षीरसागरपरिलक्षं विलोक्येमां नृपो यथा ॥ ३१ ॥
गर्भचन्द्रं गले दत्त्वा शिवभूतिं करेण सः । पुरान्निःसारयामास खटीकृत्य नरेश्वरः ॥ ३२ ॥
यथा दोषविहीनोऽपि गुणवान् लोकपूजितः । कल्लालसंगतो राज्ञा विप्रो निर्घाटितः पुरात् ॥ ३३ ॥
तथा साधुरपि क्षिप्रं तपस्वी संयमी गुणी । निर्दोषी दोषमाप्नोति स्फुटं दुर्जनसेवया ॥ ३४ ॥

तथा चोक्तम्—

न स्थातव्यं न गन्तव्यं सहात्र दुष्कर्मणा ।
शौण्डैः सह पयः पीतं वारुणी मन्यते जनः ॥ ३५ ॥

॥ इति कल्लालमित्रसंगतिशिवभूतिनिर्घाटनकथानकमिदम् ॥ २१ ॥

२२ घूकसंगतहंसकथानकम् ।

अथास्ति मगधादेशे पुरं पाटलिपुत्रकम् । प्रजापालोऽत्र भूपालो वनमालाऽस्य वल्लभा ॥ १ ॥
घूकस्तत्रोपपुरगोपुरमध्ये समानके । अन्यत्र भ्रमणं कृत्वा वसति प्रीतमानसः ॥ २ ॥
सोऽन्यदा विहरन् क्वापि गङ्गापुलिनसंगतान् । प्रययौ शर्वरीमध्ये नन्दनस्थानात् कल्पवनात् ॥ ३ ॥
दत्त्वा सुवर्णसद्मनि संभाषणपुरस्सरम् । राजहंसो जगादैनं कौशिकं सुस्वागमितम् ॥ ४ ॥
कोऽसि त्वं शोभनाकारः कुतो वेह समागतः । एतत्सर्वं मम स्पष्टं कथयाशु महामते ॥ ५ ॥
घूकोऽपि तस्य श्रुत्वा जगादेदं पुरःस्थितम् । हंसवक्त्रमिथ्यस्य विनयानतमस्तकम् ॥ ६ ॥
अहं सखे वरनामो महावंशसमुद्भवः । अहं समस्तसामन्तमस्तकोपात्तशासनः ॥ ७ ॥
चन्द्रप्रियः कलाधारः कीर्त्याप्रसरितमानसः । एवंविधोऽपि सखेऽहं युष्मद्गृहं समागतः ॥ ८ ॥
कौशिकस्य वचः श्रुत्वा मराळः प्रीतमानसः । जगाद्भो कल्याणनामन्विताक्षेपसुन्दर ॥ ९ ॥
महाराज महीनाथ भवद्भिः शोभनं कृतम् । यदस्मान् प्रत्युपागत्य पावनीयाननारतम् ॥ १ ॥
भूपो सुवर्णसद्मानि क्षेमस्थानि धनानि च । अतो राजहंसोऽस्मै स्नेहनिर्भरमानसः ॥ ११ ॥
अन्योन्यप्रेमसंबन्धतुल्यमानसयोस्तयोः । बभूव परमा मैत्री मयूरचन्द्रयोरिव ॥ १२ ॥
ततो जगाद तं हंसं घूको मुदितमानसः । मम प्राघूर्णको भोऽपि मित्रस्य मत्पुरे भव ॥ १३ ॥
अन्तःस्थाननिषिद्धोऽपि साधुस्तस्य स्नेहान्वितः । ययौ तदोपरोधेन हंसो घूकसमं क्षिति ॥ १४ ॥
अत्रान्तरे प्रजापालः स्कन्धावारेण भूयसा । तदा विजिगीषुं कर्तुं चचाल नगरान्तरम् ॥ १५ ॥
अथ घूको जगौ हंसं कस्मुत्साहितलोचनः । भूपतिं सहसा मित्र कथमन्तं धारयामि किम् ॥ १६ ॥
घूकवाक्यं समाकर्ण्य हंसोऽपि निजगौ तकम् । गच्छन्तं भूपतिं मित्र मत्पुरे वारय द्रुतम् ॥ १७ ॥
निशम्य तद्वचो घूको गोपुरद्वारतः क्षणात् । हंसेन सह निःसृत्य प्राप राज्ञान्तिकं खलः ॥ १८ ॥
घूकस्तच्छिवे वामे चकार विरसं स्वरम् । नृपोऽपि तद्ध्वनिं श्रुत्वा तस्थौ तत्र ससैन्यकः ॥ १९ ॥
प्रभूतैकमासाद्य तत्र घूकः सहंसकः । तदाप्यतः पुनः प्राप्य वामपार्श्वं स भूपतेः ॥ २० ॥
ततः कौशिको भूपस्यके शब्दं मनोरमम् । प्रजापालोऽपि तं श्रुत्वा चचाल बलसंयुतः ॥ २१ ॥

---

1 पत्रम विरूपम्. 2 पत्र महीशः. 3 पत्र मित्र मत्पुरे 4 क. मधुरमार्गं 5 पत्र °शितलोचनम्.

स्थित्वा हंससमं तत्र स्रोतकेतौ स घूकक:[1]। प्राप्य तद्विवरं मार्गं चकार ध्वनिमाकुलम् ॥ २२ ॥
श्रुत्वा घूकस्वरं राजा कोपलोहितलोचन:। चापमारोपयामास मण्डलीकृतविग्रहम् ॥ २३ ॥
आकर्णाकृष्टमस्तुग्रमनुत्तम्य[2] नराधिप:। क्रोधपूरितचेतस्क: कर्णिकाण्डं मुमोच स: ॥ २४ ॥
अनेन[3] कर्णिकाण्डेन नृपमुक्तेन सत्वरम्। निर्दोषोऽपि हतो हंसो घूको दुष्ट: पलायित: ॥ २५ ॥
निर्दोषोऽपि यथा हंसो निहतो घूकदोषत:। प्रजापालेन नृपेन क्रोधसंभारमीयुषा ॥ २६ ॥
तपोज्ञानगुणाधार: संयतश्चिरदीक्षित:। तथा दुर्जनसंगेन महान्तं दोषमाप्नुयात् ॥ २७ ॥

तथा चोक्तम्—

अकालचर्यां विषमैस्तु गोष्ठीं कुमित्रसेवां न कदापि कुर्यात्।
पश्याण्डजं पद्मवने प्रसुप्तं धनुर्विमुक्तेन हतं शरेण ॥ २८ ॥

॥ इति श्रीदुष्टघूकसंगसमप्रजापालनृपतिहतहंसकथानकमिदम् ॥ ३२ ॥

३३ हरिषेणश्रीसमागमनकथानकम्।

अथास्त्यत्र महादेशे काम्पिल्यनगरं परम्। राजा सिंहध्वजो रूपी सिंहविक्रमराजित: ॥ १ ॥
सम्यग्दर्शनसंपन्ना द्वादशाणुव्रतान्विता। रूपयौवनसंयुक्ता शीलभूषणधारिणी ॥ २ ॥
आषाढे कार्तिके मासे फाल्गुने च महामहम्। जिनानां या चकारास्य वप्रा सा वल्लभाऽभवत् ॥ ३ ॥[4]
कलाविज्ञानसंपन्नो रूपराजितविग्रह:। हरिषेणोऽभवत् पुत्रोऽनयोश्चक्री भविष्यति ॥ ४ ॥
मिथ्यात्वमोहितस्वान्ता सौभाग्यमदविह्वला। चण्डकोपा खरस्वाना जिनधर्मपराङ्मुखी ॥ ५ ॥
द्वयर्थिता[5] शुकस्येव गुञ्जाफलविलोचना। अन्या लक्ष्मीमती तस्य नृपतेरभवत् प्रिया ॥ ६ ॥
अथ वप्रा रथं जैनं यावदष्टाह्निकामहे। नगराभ्यन्तरे रम्ये मुदा भ्रमयति स्फुटम् ॥ ७ ॥
तावल्लक्ष्मीमती क्रुद्धा प्राप्य वप्राग्रतं[6] तदा। जगादेवां पतिस्नेहगर्वान्मन्थरनादिनी ॥ ८ ॥
पुरे मदीयो रथ: पूर्वं भ्रमतु द्रुतम्। पश्चाज्जैनरथो वप्रे त्वदीयोऽपि यथाविधि ॥ ९ ॥
एवं निगद्य तां वप्रां पतिवल्लभकारणात्। लक्ष्मीमती जगामारं सतुष्टा निजमन्दिरम् ॥ १० ॥
श्रुत्वा लक्ष्मीमतीवाक्यं[7] बाष्पविप्लुतलोचना। चक्रे मनसि वप्रा च प्रतिज्ञामतिदु:खिता ॥ ११ ॥
प्रथमं हि रथो जैनो भ्रमिष्यति पुरे यदि। ततो मम प्रवृत्ति: स्यादाहारादेर्न चान्यथा ॥ १२ ॥
यावदेवं च दु:खार्ता वप्रा तिष्ठति मन्दिरे। हरिषेणोऽपि संप्राप मातरं तावदाकुलम् ॥ १३ ॥
विलोक्य जननीं गेहे[8] हरिषेणो जगाद ताम्। ब्रूहि केन कृतं मातस्तव शोकस्य कारणम् ॥ १४ ॥
हरिषेणवच: श्रुत्वा जगौ माताऽपि स सुतम्। लक्ष्मीमत्या रथो जैनो निषिद्धो विचरन् पुरे ॥ १५ ॥
पूर्वं भ्रमरथो मेऽद्य तावद्भ्रमतु पत्तने। पश्चाद्भ्रमरथो जैनस्त्वदीयोऽपि मनोहर: ॥ १६ ॥
मयाऽपि तद्वच: श्रुत्वा प्रतिज्ञेयं कृता सुत। यदि जैनरथ: पूर्वं भ्रमिष्यति[9] मम ध्रुवम् ॥ १७ ॥
भोजनं चन्दनाम्बूलपुष्पगन्धानुलेपनम्। प्रहीष्यामि तत: पुत्र नान्यथाऽहं कदाचन ॥ १८ ॥
अनेन च निमित्तेन शोकसंतप्तमानसा। स्थिताऽहं वेश्मिके[10] पुत्र रुदन्ती कथितं तव ॥ १९ ॥
मातुर्वचनमाकर्ण्य दु:खपूरितमानस:। हरिषेणो महासत्त्वो दध्यौ मनसि धीरधी: ॥ २० ॥

---

1 प घूकक:. 2 क अनेन. 3 प क ज पुष्पम्. 4 प लक्ष्मीमती. 5 प क ज पुष्पम्. 6 प रथम्. 7 प लक्ष्मीमती. 8 प वप्रागेहे. 9 क यत:. 10 प क ज चतुष्कम्.

यदि लक्ष्मीमती हन्मि पिता शोकेन शुष्यते । रुदन्तीं मातरं चाहं न शक्नोमि समीक्षितुम् ॥ २१ ॥
तातसेन समं युद्धं किं करोम्यविवेकिना । ममैतदपि नो युक्तं कर्तुं युक्तमिवेक्षितम् ॥ २२ ॥
इदं चेतसि संचिन्त्य हरिषेणो महामतिः । वैराग्याहितचेतस्को निर्जगाम गृहान्तरम् ॥ २३ ॥
पुरं ग्रामं सरोदेशं गोकुलं पर्वतं नदीम् । अतिक्रम्य वनं भीमं हरिषेणो विवेश सः ॥ २४ ॥
भेदपल्लीं[1] महापल्लीं सकलाशुभफलप्रदाम् । पश्येत् स्वल्पान्तरे यावत्तावच्छुश्राव स ध्वनिम् ॥ २५ ॥
रोधनं छेदनं भेदं बन्धनं कुरुतास्य रे । युष्माकं येन राजास्य ददाति विविधं धनम् ॥ २६ ॥
श्रुत्वा वाक्शोभनं तत्र शुकस्य भयकारणम् । ततो निःसारयामास हरिषेणस्त्वरान्वितः ॥ २७ ॥
ततो निर्गच्छमानः सन् यावद्व्रजति सोऽन्यतः । शुश्राव तावदन्यस्य शुकस्य कलनिःस्वनम् ॥ २८ ॥
आसनं भोजनं शुद्धं ताम्बूलं वस्त्रयुग्मकम् । बहुमूल्यं कुमाराय सुकुमाराय दीयताम् ॥ २९ ॥
इमं कीरकलालापं निशम्य मनसः प्रियम् । जगादेति शुकं हृष्टो हरिषेणो गतभ्रमः ॥ ३० ॥
त्वत्समः कोऽपि मां वीक्ष्य वदति क्रूरमानसः । मारणादिकमेतस्य रभसं कुरुत द्रुतम् ॥ ३१ ॥
देवोऽसि किं मनुष्योऽसि किं मायी कोऽपि दानवः । किं मां कथयितुं प्राप्तस्त्वं सत्यं ब्रूहि कोऽसि मे ॥[4]
हरिषेणवचः श्रुत्वा शुकः कोऽपि जगावमुम् । त्वदागमनसंतोषनादपूरितपुष्करः ॥ ३३ ॥
मम तस्य विहङ्गस्य मातैका जनकोऽपि वा । नीतोऽहं समानीतो मुनिभिः स गवाशनैः[5] ॥ ३४ ॥
गवाशनसमूहस्य शृणोति वचनं सकः । अहं योगिनिकायस्य[6] श्रुतयुक्तस्य सूक्तये ॥ ३५ ॥
अवनिर्विस्तरेदे[7] कार्यमेतद्विलोकितम् । संसर्गसंभवा दोषा गुणा वा स्युर्महीतले ॥ ३६ ॥

तथा चोक्तम्—

माताऽप्येका पिताऽप्येको मम तस्य च पक्षिणः ।
अहं मुनिभिरानीतः स चानीतो गवाशनैः ॥ ३७ ॥
गवाशनानां वचनं शृणोति अहं च राजन् मुनिपुङ्गवानाम् ।
प्रत्यक्षमेतद्भवताऽपि दृष्टं संसर्गजा दोषगुणा भवन्ति ॥ ३८ ॥

पूसकोक्तं समाकर्ण्य तोषपूरितमानसः । हरिषेणो जगामेमं शतमन्युसमाश्रयम् ॥ ३९ ॥
हरिषेणं विलोक्याथ शतमन्युः ससंभ्रमः । चक्रे तस्य महापूजां भोजनाच्छादनादिकम् ॥ ४० ॥
शतमन्योर्महादेवी चासीन्नागवती प्रिया । चम्पापुरीप्रभुः श्रीमान् सुतोऽपि जनमेजयः ॥ ४१ ॥
रूपराशिविसर्पाङ्गी बालकुरङ्गलोचना । शतमन्युसुता चार्वी [8]तरुणी मदनावली ॥ ४२ ॥
उड्राधिपतिना तेन[9] याचिता सा प्रयत्नतः । न दत्ता नामयत्तस्मै महाविभवभागिने ॥ ४३ ॥
नैमित्तिकेन चादिष्टं त्वत्सुता मदनावली । भविष्यति कलत्रत्वं स्त्रीरत्नं चक्रवर्तिनः ॥ ४४ ॥
उड्राधिपतिनाऽऽगत्य चम्पाख्या नगरी रुधा । स्वसैन्यसमुदायेन सर्वतः परिवेष्टिता ॥ ४५ ॥
अत्रान्तरे भयत्रस्ता सुतामादाय मातृका । शतमन्युसमीपं च गता सा ससुरत्नया ॥ ४६ ॥
परस्परं समालोक्य स्नेहनिर्भरयोस्तयोः । [10]प्रमाद-मदनावल्योः सानुरागो महानभूत् ॥ ४७ ॥
देशिकेन समं सार्धं किं करोषि वृथा सुते । चक्रवर्तिप्रिया क्षिप्रं भविष्यति[11] सुन्दरि[12] ॥ ४८ ॥
एवं नागवती पुत्रीं निवारयति तां प्रति । न करोति मतिं मातुस्तथाऽपि मदनावली ॥ ४९ ॥[13]

---

1 पकज तत्रो न च समं. 2 पफ चतुष्कम्, ज चतुष्कम्. 3 प मेदपल्लीमभिलप्ती. 4 पकज निश्चयम्. 5 प पदायर्ये—सोऽर्थः, ज—र्थीः, फ गवाशनैः. 6 प योगनिकायस्य. 7 प पंरोदे. 8 ब तरुणी. 9 पकज उड्राधिपतिनैतेन. 10 प प्रयाणं—रीरेषा. 11 [भविष्यसि]. 12 ब सुन्दरी. 13 प पुत्रम्, पकज पुत्रम्.

ज्ञात्वाऽन्ययोः परां प्रीतिं शतमन्युः कुशाग्रधीः । तत्सुताहितचेतस्कं हरिषेणं विसृष्टवान् ॥ ५० ॥
शतमन्युवचः श्रुत्वा सुता भयपराङ्मुखम् । हरिषेणसमं कृत्वा वेषं सिन्धुनदं ययौ ॥ ५१ ॥
तस्मिन् सिन्धुनदीतीरेऽभवत् सिन्धुनदं पुरम् । राजा सिन्धुनदः श्रीमानस्य सिन्धुमती प्रिया ॥५२॥
मुखेन कमठं चन्द्रं नादेन कलवल्लकीम् । जयन्ती कोकिलामासीत् सिन्धुदेवी सुताऽनयोः ॥ ५३ ॥
अथ कन्याशतोपेता जलक्रीडनकौतुका । सिन्धुदेवी परिप्राप तदा सिन्धुनदीह्रदम् ॥ ५४ ॥
शतमन्युसुतास्नेहरागरञ्जितमानसः । हरिषेणोऽपि तं प्राप धीरः सिन्धुनदीह्रदम् ॥ ५५ ॥
कन्याशतं विलोक्याय मकरध्वजमानदम् । स्वकान्तिद्योतिताकाशं कामबाणैः समाहतः ॥ ५६ ॥
कन्याशतं विलोक्येमं जलक्रीडां विहाय तत् । तत्सन्मुखमभीयाय तत्प्राहतमानसम् ॥ ५७ ॥
यावत्तत्सरसाजैकसुखसङ्गतमानसम् । तथाप्त कन्यकावृन्दं सुरूपं व्यवतिष्ठते ॥ ५८ ॥
यावद्गिरिसमुत्तुङ्गो मन्दमन्दगतिक्रियः । संप्राप्तो मत्तमातङ्गस्तं ह्रदं निजलीलया ॥ ५९ ॥
विलोक्य तं नगाकारं तदानीं राजहस्तिनम् । सिन्धुदेव्यादिकन्यौघो बभूव भयविह्वलः ॥ ६० ॥
दृष्ट्वा करिणमायान्तं हरिषेणो महाद्भुतम् । विमुखीकृत्य कन्यौघं दध्यौ मनसि धीरधीः ॥ ६१ ॥
यावत्क्रूरं खनत्युच्चा विपाशाम्भो न पर्वतम् । छिनत्ति हि नरो रम्भां खड्गेन न शिलां घनाम् ॥ ६२ ॥
मृदोः परिभवं कुर्याज्जनो दुर्जनचेष्टितः । विधातुमसुखं क्लीबो न वाञ्छति बलीयसि ॥ ६३ ॥
कृपास्ते तापसा हीना येषां शान्तिर्मया कृता । न हि हस्ती पराभूतो हस्तिनो भवति क्षितौ ॥ ६४ ॥
इति संचिन्त्य तुष्टात्मा सिंहनादं विधाय सः । आधोरणं जगौ मन्दं हरिषेणो भयच्युतः ॥ ६५ ॥
रे रे हस्तिपक क्षिप्रं हस्तिनं दूरतो नय । अन्यथा मरणं मत्तः प्राप्स्यसि त्वं खलाधुना ॥ ६६ ॥
श्रुत्वा हस्तिपको वाक्यं हरिषेणस्य धीमतः । जगावमुमय वीरः कोपाकम्पितविग्रहः ॥ ६७ ॥
आत्मानं हस्तिनं मूढ मन्यसे मतिदुर्विध । जरत्तृणमिवाबलं हस्तिनं तं महाबलम् ॥ ६८ ॥
मूढ त्वं जम्बुको भूत्वा समं सिंहेन किं कलिम् । करोषि किं गतायुस्त्वं निर्विण्णोऽसि स्वजीविते ॥६९॥
आधोरणवचः श्रुत्वा हरिषेणो जगावमुम् । मत्सन्मुखमिमं मुञ्च निर्मदं विदधाम्यहम् ॥ ७० ॥
हरिषेणवचः श्रुत्वाऽऽधोरणो रक्तलोचनः । मुमोच हस्तिनं वेगादुद्यद्धस्तं तकं प्रति ॥ ७१ ॥
दृष्ट्वा हस्तिनमायान्तं कुण्डलीकृतशुण्डकम् । मुमोच तत्पुरः भीमं हरिषेणो विचक्षणः ॥ ७२ ॥
यावत्करी करेणेदं गृह्णाति स पुरः स्थितः । तावदन्तान्तरे पादौ निधायाधिरुरोह तम् ॥ ७३ ॥
जित्वा हस्तिपकं भूमौ निमर्दीकृतकुञ्जरम् । नानाकरणमार्गेण हरिषेणो हि दान्तवान् ॥ ७४ ॥
येन राजकरी दान्तो देवानामपि दुर्दमः । तस्मै कन्याशतं दत्तमस्माभिः प्राङ्नगरे ॥ ७५ ॥
तूर्यशङ्खनिनादेन कल्पमारुतगामिना । गत्वा स समुदायेन घोषमानयत स्फुटम् ॥ ७६ ॥
श्रुत्वा भूमिपतेर्वाक्यं विगतं परमत्सरः । हरिषेणं परिप्रापुर्महापत्तिसमन्विताः ॥ ७७ ॥
तूर्यमधुरनिर्घोषैरानादितनभस्तलैः । सद्युक्तो हरिषेणोऽपि विवेश नृपमन्दिरम् ॥ ७८ ॥
हरिषेणोऽवतीर्याशु हस्तिनो मदशालिनः । कृतभूपतिसन्मानः स्वासने चोपविष्टवान् ॥ ७९ ॥
सुखोपविष्टमालोक्य हरिषेणं नराधिपः । जगाद विस्मितस्वान्तस्तोषपूरितमानसः ॥ ८० ॥
दुर्दमेभवशीकारादस्माभिस्त्वमुपागते । तुभ्यं कन्याशतं दत्तं स्वरूपजितदेवतम् ॥ ८१ ॥

---

1 प निरवषयत्स्वमनं [illegible]. 2 प झ हरिषेण [illegible]. 3 प [illegible]. 4 प सिन्धुनदं ह्रदम्. 5 प मनसित. 6 प [illegible]. 7 प झ [illegible]. 8 प [illegible]. 9 [illegible]. 10 प झ दे विभ्रम.

शोभने दिननक्षत्रे चारयोगे निशाकरे । तस्य तासां समं पुत्र पाणिग्रहणमङ्गलम् ॥ ८२ ॥
अथ कन्यासमेतेनोच्चैः प्रासादे सप्तभूमिके । हरिषेण सुखं तस्थौ संसुप्तः शयने निशि ॥ ८३ ॥
सुप्तं सुप्तं कुमारं तं ज्ञात्वा वेगवती तदा । आदाय सहसाऽप्यासीद् गगनस्थितविग्रहा ॥ ८४ ॥
अथ निद्राक्षये जाते समीरणसमागमात् । हरिषेणो जगादैतां क मां नयसि सुन्दरि ॥ ८५ ॥
साऽपि तद्वचनं श्रुत्वा जगौ तं कृतकौतुकम् । सूर्योदयं पुरं रम्यं विजयार्धनगे भवेत् ॥ ८६ ॥
अथ चेन्द्रधनू राजा तस्य बुद्धिमती प्रिया । कलाविज्ञानसंपन्ना जयचन्द्रा सुताऽनयोः ॥ ८७ ॥
कोऽपि लोके नरो नास्ति मद्रूपसमविभ्रमः । एवं प्रति विरक्ताऽसौ दुर्मनस्का सदाऽन्यदा ॥ ८८ ॥
अनिच्छन्ती नरं चान्यं त्वद्रूपं पटसंस्थितम् । दृष्ट्वाऽपि मोहमासाद्य चेतनां प्राह मां पुनः ॥ ८९ ॥
मच्चित्तलोचनानन्दं यदि नानयसि द्रुतम् । एतं मराम्यहं मुग्धे निर्विकल्पं मनस्विनि ॥ ९० ॥
तन्निश्चयं परिज्ञाय तत्समायमसंशयम् । त्वत्समीपमहं प्राप्य त्वां नयामि तदन्तिकम् ॥ ९१ ॥
एवं तद्वचनं श्रुत्वा सोपकण्ठक्रियात्मकः । मौनमादाय संप्राप्तो हरिषेणस्तदन्तिकम् ॥ ९२ ॥
त्वच्चित्तचोरणः पुत्रि जयचन्द्रे जनप्रियः । आनीतोऽयं मया भद्रे कुमारस्ते समर्पितः ॥ ९३ ॥
अन्योन्यदृष्टिसंपातजातस्नेहसमागमौ । बभूवतुरुभौ प्रीतौ जातविस्मयमन्मथौ ॥ ९४ ॥
जयचन्द्रामलं प्राप्य तत्पिताऽत्र समागतः । दृष्ट्वाऽमुं रूपसंपन्नं तोषमाप स तत्क्षणात् ॥ ९५ ॥
सुखोपविष्टमालोक्य जनकं प्राह तत्सुता । तात त्वं देहि मामस्मै नान्यमिच्छाम्यहं वरम् ॥ ९६ ॥
सुतावचनमाकर्ण्य दृष्ट्वा जामातरं तथा । सर्वलक्षणसंपूर्णं प्राहेमां तोषतः पिता ॥ ९७ ॥
धन्या त्वमसि मुग्धाऽपि चतुरा पुत्रि सांप्रतम् । येन कान्तस्त्वया लब्धो जातानन्दो मनस्विनि ॥ ९८ ॥
सुतावचनतोऽनेन शक्रचापेन शोभनम् । अनयोः कारितं शीघ्रं पाणिग्रहणमङ्गलम् ॥ ९९ ॥
अथ गङ्गाधरः श्रुत्वा जयचन्द्रां मनःप्रियाम् । वितीर्णां देशिकस्याशु जगाम कोपपाविताम् ॥ १०० ॥
श्रमं विधाय कोपाग्नेः शान्तितोयेन भूयसा । भागिनेयः परं दूतं प्रविधाय तदन्तिकम् ॥ १०१ ॥
शक्रचापं परिप्राप्य गङ्गाधरवचोहरः । जगादेति वचो धीरं स्वनामाङ्कितमादरात् ॥ १ २ ॥
त्वं मातुल सुतां स्वस्य जयचन्द्रां महादरात् । असमर्थं देहि तां योग्यां स्वरूपानिमित्ततः ॥ १०३ ॥
श्रुत्वा दूतवचः प्रोक्तं जगादेन्द्रधनुस्तकम् । अनया स्वयमेवायं गृहीतः किं करोम्यहम् ॥ १०४ ॥
इन्द्रचापवचः श्रुत्वा जगौ दूतोऽपि तं पुनः । देहि मह्यं सुतां नो चेत्संग्रामाय भव द्रुतम् ॥ १०५ ॥
एवं निगद्य स दूतः स्वनाथान्तिकमादरात् । संग्रामनिहितस्वान्तो ययौ स्वामिहितः कृती ॥ १०६ ॥
अथ जामातरं क्षिप्रमाहूय श्वशुरस्तदा । यशोऽभ्यासमस्तार्थं जगाद पुरतः स्थितम् ॥ १०७ ॥
रुष्टो गङ्गाधरः पुत्र भागिनेयो ममोपरि । सुतादानादतस्तिष्ठ त्वमत्रैव पुरे स्थितः ॥ १ ८ ॥
प्रयाम्यहमनेनाशु योद्धुं मत्सुता प्रिया । चतुरङ्गेण सैन्येन सहितोऽतिरुषाऽन्वितः[1] ॥ १ ९ ॥
निशम्येन्द्रधनुर्वाक्यं हरिषेणो जगावमुम् । मत्प्रयोजनमेवेदं याम्यतः प्रधनाय तम् ॥ ११० ॥
एकं रथं धृतं शस्त्रैर्निःशेषैर्धनुभेदकैः । देहि सारथिना युक्तं कुशलेन न मेऽपरैः ॥ १११ ॥
जामातुर्वचनं श्रुत्वा श्वशुरो निजगाद तम् । एवमस्त्विति संपाद्य युक्तोऽनेन समाहृतम् ॥ ११२ ॥
समीरणमनोवेगैस्तुरगैः कतिभिः कृतैः । रथैः कनकनिर्माणैर्मर्दैर्यमभयंकरैः ॥ ११३ ॥
एतैरन्यैरपि क्षिप्रं विद्याधरकदम्बकैः । हरिषेणः समाश्रये तदा गङ्गाधरं प्रति ॥ ११४ ॥
श्रुत्वा देशिकसर्वमतृप्तमधिष्ठितवाहिनीम् । आयान्तीमिन्द्रचापस्य हसित्वा धी महाकृपा ॥ ११५ ॥

1 क ज सर्वाभिरान्, 2 कख ज पटस्थितम्, 3 क मयाप्तम्, 4 [°स्याऽभिरा], 5 [देशिकस्यापर°].

अथ रथैर्गजैश्चित्रैर्भटैरपि ससंभ्रमैः । सहितौ चेलतुस्तूर्णं गङ्गाधर-महीधरौ ॥ ११६ ॥
सैन्यद्वयमपि प्राप्तं कृतान्योन्यमहारवम् । नानायुधकृतोद्योतं वैतालिककलस्वनम् ॥ ११७ ॥
गजो गजेन संलग्नस्तुरङ्गेण तुरङ्गमः । रथो रथेन च क्षिप्रं भटेनापि भटो रुषा ॥ ११८ ॥
एवं महति संजाते संग्रामे भयदायिनि । परस्परकलध्वानपूरिताकाशभूतले ॥ ११९ ॥
केनापि वारणो ध्वस्तः केनापि च तुरङ्गमः । रथस्थेन रथो यातः पत्तिकोऽपि पदातिना ॥१२०॥
हरिषेणबलेनेदं गङ्गाधरबलं तदा । भयवेपितसर्वाङ्गं हतं भग्नं पलायितम् ॥ १२१ ॥
दृष्ट्वा पलायितं सैन्यं निजं गङ्गाधरो बली । समं तेन वरेणापि तस्थौ नो तत्सुखे परः ॥ १२२ ॥
दृष्ट्वा पुरःस्थितं वीरं गङ्गाधरखगेश्वरम् । तत्संमुखमभीयाय हरिषेणः कलध्वनिः ॥ १२३ ॥
गङ्गाधर विलोक्येमं चक्रहस्तं पुरःस्थितम् । हरिषेणो जगौ मन्दं मुधात्र कोपयामि ते ॥१२४॥
श्रुत्वा च निनदं क्रुद्धो गङ्गाधरखगेश्वरः । तत्संमुखं मुमोचेदं चक्रं रविसमप्रभम् ॥ १२५ ॥
आगत्य वेगतश्चक्रं त्रिः परीत्य समुज्ज्वलम् । हरिषेणकरे तस्थौ पुण्यतः किं न सिध्यति ॥ १२६ ॥
हरिषेणः करेणेदं चक्रं यावद्विमुञ्चति । गङ्गाधरः खगस्तावद्भयात्स्वीयं पलायितः ॥ १२७ ॥
ततो मर्म समालोक्य सिंहविक्रमराजितः । हरिषेणोऽपि पार्श्वं संजगाम रथादरम् ॥ १२८ ॥
परिवार्य ततो वन्दीर्जयनन्दादिकारिभिः । मागधैः कलनिस्वानैः स्तूयमानः समङ्गलम् ॥ १२९ ॥
हस्तिभिर्मदसंयुक्तैः सप्तिभिश्चलचामरैः । स्यन्दनैश्चक्रचीत्कारैर्भटैर्वल्गनकारिभिः ॥ १३० ॥
ध्वजैः श्वेतकल्याणैस्तूर्यध्वानैर्विमिश्रितैः । हरिषेणो विवेशाथ मथुरस्य पुरं परम् ॥ १३१ ॥
पञ्चवर्णमणिव्रातैर्मण्डिते मणिविस्तरे । चतुष्के चोपविष्टस्य हरिषेणस्य धीमतः ॥ १३२ ॥
सुवर्णमणिकुम्भाद्यैर्मधुरः स्वकरोद्धृतैः । अभिषेकं चकारास्य कलमङ्गलनिस्वनैः ॥ १३३ ॥
षट्खण्डां पृथिवीं सारां नगराकरमण्डिताम् । वशीचकार संक्षेपात् सप्तभिर्वासरैरयम् ॥ १३४ ॥
यस्य चपलवेगानां कोटयोऽष्टादश वाजिनाम् । हस्तिनां च तथा लक्षाण्यशीतिश्चतुरुत्तरा ॥१३५॥
द्वात्रिंशच्च सहस्राणि भूपतीनां स्फुरत्त्विषाम् । रमणीनां सहस्राणि नवतिस्तु षडुत्तरा ॥ १३६ ॥
चतुर्दश च रत्नानि निधयोऽपि नवाऽपरे । रथानां हस्तिसंस्थानं चास्योगो दशाङ्गकः ॥१३७॥
अथाष्टकोटयः सन्ति धेनूनां शुभपयस्विनाम् । सुवर्णशृङ्गयुक्तानां हलकोटी तथा परा ॥ १३८ ॥
इत्यादिचक्रसंभूतां राज्यश्रियमहीनकाम् । हरिषेणः समं प्राप जिनधर्मसमागमात् ॥ १३९ ॥
श्रेणिद्वये च ये खेटा विद्याबलसमन्विताः । खगान् सर्वान् वशीकृत्य चकार मधुरानुगान् ॥१४०॥
चारुरूपं शक्रचापं स तथा बुद्धिमतीमपि । जयचन्द्रां समादाय ययौ तापसपल्लिकम् ॥१४१॥
शतमन्युसुतां चोढां विधिना मदनावलीम् । स्वसैन्यसमुदायेन प्राप काम्पिल्यपत्तनम् ॥ १४२ ॥
चक्रवर्तिश्रियं प्राप्तं हरिषेणं विलोक्य सः । सिंहध्वजनृपो यत्र परितोषं ययौ परम् ॥ १४३ ॥
आनन्दं परमं तत्र हरिषेणसमागमे । सिंहध्वजश्चकारायं सदानी नूनसंपदा ॥ १४४ ॥
लक्ष्मीमतीरथं भव्यं मणिकाञ्चननिर्मितम् । हरिषेणः स्वहस्तेन भ्रामयामास कोपतः ॥ १४५ ॥
अष्टाह्निकमहं कृत्वा छत्रतूर्यादिभिः स्वनैः । हरिषेणो रथं जैनं मातुर्भ्रामयति स्म सः ॥ १४६ ॥
वेणिकां मोचयित्वाऽनु जिनपूजाविधानतः । शोकापनयनं मातुश्चकारायं विशुद्धधीः ॥ १४७ ॥
षट्खण्डभूमिसीमध्ये पर्वते निम्नगान्ते । सरोवरे नदीप्रान्ते ग्रामपत्तनकादिके ॥ १४८ ॥

1 प ध्वंसेऽवर॰ 2 पक्रम विरुम्य 3 प शुभ्रम्, पञ्च शुभम् 4 प श्वेतदर 5 प मधुरपः 6 प चतुर्भिः शुभम्, प चतुर्भि कालम्, ब चतुष्पम्

भक्तिसम्पन्जिनाधानि जिनवेश्मानि सन्तत । हरिषेणो विशुद्धात्मा कारयामास भक्तितः ॥ १४९ ॥
चक्रवर्तिश्रियं तत्र भुञ्जानोऽत्र इत्यास्थितम् । हरिषेणोऽधिकं राज्यं चकार सरस सुधीः ॥ १५० ॥
ग्रामेऽपि नगरे घोषे मडम्बे कर्वटादिके । बभूव सकले लोके हरिषेणमयी कथा ॥ १५१ ॥
दुन्दुभिध्वनादेन शृण्वन् म्लेच्छसमागमम् । कठोरनिनादेन क्षतमन्युपदं भजन् ॥ १५२ ॥
यथा समस्तसामन्तमस्तकोरोपशासनम् । हरिषेणो महाराज्यं प्राप्तवान् साधुसंश्रयात् ॥ १५३ ॥
तथा मुनिरपि क्षिप्रं लभन् दुर्जनसंगमम् । यशोऽनर्घमवाप्नोति सत्संगस्य समाश्रयात् ॥ १५४ ॥

॥ इति श्रीदुर्जनाश्रयत्यजनसत्संगगमनहरिषेणश्रीसमागमन
कथानकमिदम् ॥ ३३ ॥

*

३४ विष्णु-प्रद्युम्नकथानकम् ।

सौराष्ट्रकदेशेऽस्ति द्वारवत्यां पुरि प्रभुः । वासुदेवोऽस्य भार्या च रुक्मिणी मनसः प्रिया ॥ १ ॥
अनयोर्विनयसंपन्नः सर्वलोकमनोहरः । बभूव नन्दनो रूपी प्रद्युम्नः कुलनन्दनः ॥ २ ॥
गुणानुरञ्जनास्थायां कथायामनुरक्तधीः । सौधर्मो विबुधान्यत्र जगौ नरगुणान्तरम् ॥ ३ ॥
सौधर्मेन्द्रवचः श्रुत्वा नरानन्तगुणस्तवम् । कोऽपि देवो जगादैनं कौतुकव्याकुलमानसः ॥ ४ ॥
किं गुणो विद्यते देव नराणां भूमिवासिनाम् । येन त्वं देवराजोऽपि करोषि नरकीर्तनम् ॥ ५ ॥
इदं वाक्यं समाकर्ण्य नरमात्सर्यसंगतम् । जगाद मत्सुपकारस्य तदाज्य पुरन्दरः ॥ ६ ॥
द्वारवत्यां पुरि श्रीमान् वासुदेवः सुतान्वितः । अन्येषां दोषमप्येष गुणं गृह्णाति शुद्धधीः ॥ ७ ॥
सौधर्मेन्द्रस्य तद्वाक्यं निशम्य विबुधः क्रुधा । जगाम सहसा सोऽपि पुरीं द्वारवतीमसौ ॥ ८ ॥
अत्रान्तरे महीपालः वेलया चतुरङ्गया । ऊर्जयन्ते समस्थाने प्रवसे वन्दितुं जिनम् ॥ ९ ॥
अथ हस्तिसमाकारं दुर्गन्धामोदिताम्बकम् । महाकुष्ठपरिक्लिष्टं किमिकुलसमाकुलम् ॥ १० ॥
विधाय मायकं वर्षं स्वरूपं भयानकम् । पपात तत्पथे देवस्तस्थानी तत्परीक्षितुम् ॥ ११ ॥
तेन तद्गन्धमाघ्राय दर्वेरपि सुदुस्सहम् । प्राणरोधं विधायाशु सर्वं सैन्यं पलायितम् ॥ १२ ॥
स्वयं सद्यः समर्थोऽपि जिनशासनभावितः । ज्ञातपुत्रस्तथासौ हरिस्तस्थौ स तत्पुरः ॥ १३ ॥
विष्णुं पुरः स्थितं दृष्ट्वा देवो मायकरूपकम् । विधाय तं जगादेति तत्परीक्षणकारणात् ॥ १४ ॥
महाराज जयश्रीमान् बहुकालं भवानथ । त्वमुत्तिष्ठामुतः स्थानात्वत्तो भर्तुं न शक्यते ॥ १५ ॥
विप्रस्य वचनं श्रुत्वा विस्मयव्याप्तचेतसः । जगादेति हरिस्तं च महत्याकुलमानसः ॥ १६ ॥
चन्द्रकान्तमणिच्छाया शोभना द्विजपङ्क्तिः । रक्तोत्पलदलाभोष्ठा पद्मरागसमप्रभा ॥ १७ ॥
सुखसम्पत्समन्विता चार्वी जिह्वा यस्य विराजते । समुद्भवत्रयोपेतमपुष्पितमुखोत्पने ॥ १८ ॥
स्वमात्रिगुणोपेतं शरीरं यस्य राजते । स कथं निन्द्यते विप्र मण्डले दीप्तिमण्डलः ॥ १९ ॥
श्रुत्वा विष्णुवचो देवस्तोषकम्पितमानसः । स्वरूपधरः श्रीमान् जगादेव स्वविस्मयः ॥ २० ॥
यथा त्वं वर्णितो राजन् सौधर्मेण गुणान्वितः । तथाधिकगुणाम्भोधिस्त्वत्समो नापरः पुमान् ॥ २१ ॥
कथयित्वा स वृत्तान्तं दत्त्वाऽसौ हारमुत्तमम् । स्मृत्वा गुणान्तरम्भोधिर्देवः स्वं प्रययौ दिवम् ॥ २२ ॥

---

1 पफज सुमम् [illegible] पफज राजन् 3 Here फ has an additional line the same as the first line of 2. 4 प मायकंवर्ण. 5 पफज चतुरङ्गम.

गृह्णन्नन्यगुणान् विष्णुर्यथा देवेन पूजितः । प्रद्युम्नप्रमुखसुतको मदसङ्गविसंगतः ॥ २३ ॥
तथा साधुरपि स्पष्टं पूज्यते सुरकुञ्जरैः । असमानगुणाधारः प्रकृत्यार्जवभूषितः ॥ २४ ॥

॥ इति श्रीविष्णुप्रद्युम्नगुणग्रहणकथानकमिदम् ॥ ३४ ॥

३५ चोल्लकाख्यानकथानकम् ।

विनीताविषये कान्ते साकेता नगरी परा । अस्यां चक्राधिपो भोगी ब्रह्मदत्तो बभूव सः ॥ १ ॥
सामन्तोऽस्य महासत्त्वः सहस्रभटनामकः । नानाग्रामपतिर्धन्यो वसुमित्राऽभवत् प्रिया ॥ २ ॥
वसुदेवोऽनयोः पुत्रो बभूव गुणवर्जितः । नानाशुभसमाचारपरिज्ञानपराङ्मुखः ॥ ३ ॥
अन्यदा पञ्चतां प्राप सहस्रारिभटो बली । कृतान्तमुखतः को वा बलवानपि नश्यति ॥ ४ ॥
तस्मात्ते नृपेणेदं सहस्रभटजीवनम्[1] । निश्चितं दत्तमन्यस्मै हेतिभ्रमणिधायिने ॥ ५ ॥
वसुदेवस्ततो दुःखी जनन्या वसुमित्रया । तदानीं भूमिकोत्खाते तस्थौ जीर्णकुटीरके ॥ ६ ॥
वसुदेवोऽनया शीघ्रं वाचनं वसुमित्रया । शिक्षापितोऽभवत् सोऽपि वाचति स्म त्वरान्वितः ॥७॥
अन्यदाम्भूतमास्योपैर्भक्ष्यभोजनकारिभिः । भूतं गौमत्तकं चास्मै ददौ शिक्षां तयाऽम्बिका ॥ ८ ॥
त्वत्पिताऽपि सुताधावत्[5] ब्रह्मदत्तपतेः पुरः । तस्मात्त्वं प्रयत्नेन कुरु सेवां यथोचिताम् ॥ ९ ॥
कक्षामूले विधायाशु तदा गौमत्तकं[6] परम् । जननीवाक्यतः सोऽपि ब्रह्मदत्तान्तिकं ययौ ॥ १० ॥
वसुदेवः क्षुधां धर्मां यथयेवाभिमानतः । कष्टसेवां चकारासौ ब्रह्मदत्तस्य चक्रिणः ॥ ११ ॥
अन्यदा ब्रह्मदत्तोऽयं दुष्टाश्वेन हृतोऽटवीम् । नीतोऽनेन समं धीमान् वसुदेवो ययौ तदा ॥ १२ ॥
ततस्तुरङ्गमात् क्षिप्रादनेनोत्तारितो भुवि । वसुदेवेन भूपालः क्षुधापिपासाकदर्थितः ॥ १३ ॥
स च स्निग्धतले दिव्ये पातयित्वाऽभिमन्त्र्य च । तापयित्वाऽग्निनानेन पापापनिकरानपि ॥ १४ ॥
निक्षिप्य तान् घटे स्तोके स्नापयित्वाऽमुना नृपम् । स्वस्थीकृत्य पुनश्चास्मै ददौ लड्डुकभोजनम् ॥ १५ ॥
तदन्ते पुष्पताम्बूलं गन्धामोदितदिङ्मुखम् । वसुदेवो ददावस्मै भूत्यसन्मानकारिणे ॥ १६ ॥
स्वस्थीभूतस्ततः पश्चादानीतो नगरान्तिके । ब्रह्मदत्तोऽमुना शीघ्रं तदा परमबन्धुना ॥ १७ ॥
वसुदेवाय दत्वाऽस्मै स्वनामाङ्कितकङ्कणम् । ब्रह्मदत्तो विवेशाथ स्वपुरं सैन्यसम्पदा ॥ १८ ॥
आस्थानमण्डपस्थोऽयं नताशेषनराधिपः । ब्रह्मदत्तो जगादेदं वचनं निजसंसदि ॥ १९ ॥
निःसृतो मे पुरं वेगात् स्वनामाङ्कितकङ्कणम् । पतितं यदपि तत्क्षिप्रं तलाराऽन्विष्यतामिति ॥ २० ॥
भूपालवचनं श्रुत्वा स्वप्रमाणं ततो गतः । आपणान्तं तलारोऽपि नानाजनसमाकुलम् ॥ २१ ॥
ददन्तं[10] हट्टमध्ये च मूल्येन नृपकङ्कणम् । वसुदेवं परिज्ञाय अग्राहीदेनं तलारकः ॥ २२ ॥
प्रार्थ्यंकृत्य[11] सर्वं साधुं विक्षिपान्तरमध्यतः । वसुदेवं निनायासौ ब्रह्मदत्तान्तिकं तदा ॥ २३ ॥
वसुदेवं विलोक्येमं निबद्धं दृढबन्धनात् । विधाय मोचनं स्वेन ब्रह्मदत्तान्तिकं तदा ॥ २४ ॥
त्वदीयस्योपकारस्य तावकस्य महात्मनः । प्रतीकारं न शक्नोमि विधातुं भवतोऽधिकम् ॥ २५ ॥
तथाऽपि त्वं वरं ब्रूहि मनोवाञ्छितमुत्तमम् । तद्विश्राद्धितचेतस्क वसुदेव ददामि ते ॥ २६ ॥
ब्रह्मदत्तवचः श्रुत्वा वसुदेवो जगाद तम् । मन्माता विद्यते नाथ सा जानाति वरं प्रति ॥ २७ ॥

---

1 पक्ष भाषितः. 2 क परपरी. 3 क जीवनं 4 क भूमिकोत्खाते. 5 ब सुताधावत्, 6 क गोमत्तकं. 7 ब पम्पालवृता 8 पचपक्ष पदुष्पकम् 9 The page of क being torn, some letters are lost here and there. 10 ज ददर्श. 11 ज प्राप्ये ब प्राप्यंकृत्य=सत्कृत्य. 12 [ब्रह्मदत्तोऽब्रवीत्].

आकर्ण्य वसुदेवस्य साकल्येन सुभाषितम् । जगाद नृपतिर्भूयस्तां तदानीं कुतूहलात् ॥ २८ ॥
यथैव ते स्फुटं भद्र मातृवाक्यप्रमाणकम् । ततो याहि द्रुतं वत्स तामानय मदन्तिकम् ॥ २९ ॥
नृपवाक्येन संप्राप्य मातरं पुत्रवत्सलाम् । अमतस्ता विधायाशु राजान्तिकमसावित ॥ ३० ॥
दृष्ट्वा तन्मातरं राजा प्राहेमां प्रीतमानसः । ब्रूहि भद्रे वरं श्रेष्ठं क्षिप्रं संपादयामि ते ॥ ३१ ॥
वचनं भूभृतस्तस्य निशम्य प्रीतमानसा । वसुमित्रा जगादेति सरसं मोहतत्परम् ॥ ३२ ॥
भोज्यं भवद्गृहे भुक्त्वा मणिकाञ्चनभाजने । विचित्रपुष्पताम्बूलवस्त्राभरणपूर्वकम् ॥ ३३ ॥
ततः षट्खण्डमेदिन्यां स्वकीयायां नराधिप । भोज्यं गृहे गृहे भुक्त्वा परिपाट्या यथाक्रमम् ॥ ३४ ॥
भूयोऽपि भोजनं भोक्ष्ये त्वद्गृहे पुत्रसंगता । चोल्लकाख्यमिदं भोज्यं देहि मे भोजनं ध्रुवम् ॥ ३५ ॥
ततस्तद्वचनं श्रुत्वा नृपतिस्तोषसंगतः । तद्भोजनं विधानं तु विधिना दातुमुद्यतः ॥ ३६ ॥
आकारयित्वा विधानेन भोजयित्वा प्रदाय च । वस्त्राभरणताम्बूलमणिरत्नादिकं धनम् ॥ ३७ ॥
यथेदं भोजनं भद्रे मद्गृहे विहितं मुदा । तथा मन्मेदिनीवेश्मभोजनं प्रविधाय च ॥ ३८ ॥
भूयोऽपि मद्गृहं प्राप्य भोजनं कुर्वते क्रमात् । एवमुक्त्वा ततो क्षिप्रं प्रददतो विसर्जयन् ॥ ३९ ॥
अन्तःपुरादिगेहेषु स्वस्वमण्डलेशसद्मसु । यथाक्षणे परं लब्ध्वा पुत्रेण सहिता पुनः ॥ ४० ॥
चक्रवर्तिगृहं भूयो वसुमित्रा सुतान्विता । कदाचिद्दैवयोगेन समायाति ससंभ्रमा ॥ ४१ ॥
मनुष्यजन्मकल्याणं प्राप्य यैकत्र जन्मनि । भूयश्चतुर्गतीर्भ्रान्त्वा जीवो नाप्नोति निश्चितम् ॥ ४२ ॥
मनुष्यभवमासाद्य भवकोटिषु दुर्लभम् । व्रतशीलगुणेष्वेषु यत्नः कार्यो विचक्षणैः ॥ ४३ ॥

॥ इति श्रीचोल्लकाख्यानककथानकमिदम् ॥ १५ ॥

१६ पासकद्यूतकथानकम् ।

मगधाख्यमहादेशे शतद्वारं पुरं महत् । शतद्वारो नृपस्तस्य शतद्वाराऽस्य सुन्दरी ॥ १ ॥
विचित्रचित्रसर्वाङ्गं जनानेत्रमनोहरम् । शतद्वारास्यभूपेन तत्र द्वारशतं कृतम् ॥ २ ॥
विचित्ररूपविचित्राणां स्तम्भानां मणिशालिनाम् । एकैकस्मिन् सति द्वारे शतान्येकशतान्यभवन् ॥ ३ ॥
एकैकस्तम्भनोऽभूवन् नूनं षण्णवतिः पराः । अंसिकास्तासु चैकैकस्मिन् द्यूतं प्रवर्तते ॥ ४ ॥
रममाणास्तु तं द्यूते द्वारं स्तम्भांसिकमनारतम् । द्यूतकारान् परिप्राप्य शिवशर्मा द्विजोऽब्रवीत् ॥ ५ ॥
भवतां द्यूतकाराणां द्वारादिस्थानगामिनाम् । यदि दायः पतत्येकः समर्पयत तं मम ॥ ६ ॥
शिवशर्मवचः श्रुत्वा द्यूतकारा जगुश्च तम् । यदा दायोऽर्थ्यं द्रव्यं दासास्ते वयं द्विज ॥ ७ ॥
एवं निवेदिते तस्य तद्दिने दिनसप्तमे । स एवं पतितो दायस्तमसानां प्रतीप्सताम् ॥ ८ ॥
ततस्तत्सकलं द्रव्यं संख्यानपरिवर्जितम् । द्यूतकारैः सर्वतोऽपि वितीर्णं शिवशर्मणे ॥ ९ ॥
लब्ध्वा स्वर्णं ततो विप्रस्तोषपूरितमानसः । आशीर्वादं ददौ तेभ्यो वेदस्वस्तिसुमङ्गलम् ॥ १० ॥
नृपः प्रतीक्षते विप्रस्यामेव परिपाटिकाम् । नासावायास्यति क्वापि तस्य लुब्धस्य विप्रकः ॥ ११ ॥
यथा स कदाचिच्च यथागच्छति विप्रकः । मानुषत्वं भवं नूनं जीवो न लभते पुनः ॥ १२ ॥

॥ इति श्रीपासकद्यूतकथानकमिदम् ॥ १६ ॥

---

1 पब प्रीतिमानसः. 2 पफज [illegible]. 3 पफज [illegible]. 4 पफज निश्चम्. 5 पब भोजन-स्वरूपमुत्तमम्. 6 प [illegible] प [illegible] [स्तम्भकेऽभूवन्]. 8 प [illegible]. [illegible] ब [illegible] फ [illegible]. 10 पफज [illegible]. 11 फ [illegible]. 12 पफज [illegible].

३७ सर्षपादिधान्यकथानकम् ।

पल्यमेकमथ स्थास्त योजनानां पृथुत्वत । पल्यं चकार कोऽपीदं जम्बूद्वीपप्रमाणकम् ॥ १ ॥
सिद्धार्थकादिधान्येन निविडं परिपूर्यते । भीमसेनसमेनेदं पुरुषेण बलीयसा ॥ २ ॥
आकण्ठाकृष्टनिर्मुक्त तत्र काण्ड निमुच्यते । नरेणार्जुनकायेन दोर्दण्डबलशालिना ॥ ३ ॥
तस्योपरि निःखातं द्विगुणीकृतचक्रकम् । विज्ञायते मृतं तद्धि पुरुषै पुरुषशिभि ॥ ४ ॥[1]
सर्षपादिकधान्यानां शतमेकं दिने दिने । निरस्यते नरेणाशु कौतुकव्याप्तचेतसा ॥ ५ ॥
एवंविधमपि स्पष्टं कदाचिद्दैवयोगत । जम्बूद्वीपप्रमाण वा तत्पल्य[2] रिक्ततां व्रजेत् ॥ ६ ॥[3]
मनुष्यजन्मतो जीवो निर्गतः पर्यटन् भवे । नानाकुयोनिलक्षाणि परिपाट्या समाप्य च ॥ ७ ॥
अणिमादिगुणोपेतो यद्देवोऽपि तदिच्छति । तत्स्थिरं मनुष्यत्वं देही न लभते पुन ॥ ८ ॥

यथा चोक्तम्—

धण्णादिसरिसवाण जंबूदीव तु पल्ल भरिय ।
ठव वरिससरिसवाण य देवो मवमिजदे सयलं ॥ ९ ॥
एक्कभवपिडमाण समणो जइ सो दु सरिसवं धण्ण ।
इह दुल्लहमाणुसय पोहिसमाही कुदो होदि ॥ १० ॥

॥ इति सर्षपादिधान्यकथानकम् ॥ ३७ ॥

*

३८ श्रीधान्यकथानकम् ।

अथ चैव प्रवक्ष्यं धान्याख्यानकमुत्तमम् । साधुभिर्जिनदृष्टान्तसमासगविचक्षणै ॥ १ ॥
विनीताख्यमहादेशे विनीता नगरी परा । अस्यां बभूव भूपालः प्रजापालः प्रजाप्रिय ॥ २ ॥
विद्यते भरतावेशे पुरं गजपुरं नृप । जितशत्रु प्रिया चास्य रुक्मिणी रूपशालिनी ॥ ३ ॥
अन्यदा कोपमासाद्य प्रजासाङ्गं नृपुङ्गव । जितशत्रुश्चचालोच्चैर्विनीताविषयं प्रति ॥ ४ ॥
तस्मात्सर्वं समासाद्य सत्धान्यानि धनेश्वरा । निक्षिप्तानि समस्तानि चैकस्मिन्नूपकोष्ठके ॥ ५ ॥
एवंकृतेषु धान्येषु जितशत्रुरशक्नुवन् । प्रजापाल वशीकर्तुं जगाम स्वपुरं पुन ॥ ६ ॥
जितशत्रुं गतं ज्ञात्वा प्रजा संप्राप्य भूपतिम् । स्वस्वधान्यानि याचन्ते तदा दुःखितमानसा[4] ॥७॥
याचमाना प्रजा वीक्ष्य स्वस्वधान्यं पुरःस्थिताः । प्रजापालः पुनः प्राह कौतुकव्याप्तमानस[5] ॥८॥
स्वस्वधान्यं परिज्ञाय जनसंघ गृहाण तत् । परकीये गृहीते हि धान्ये दोष प्रजायते ॥ ९ ॥[6]
कदाचिदा प्रजा धान्यमेकत्र मिश्रितं निजम् । विज्ञाय तत्तथा स्तु स्वीकर्तु चिरकालत ॥१०॥
नानाकुयोनिधान्येषु भ्रत्वा सत्येषु देहवान् । मनुष्ययोनिधान्येषु प्रवर्तुं न शक्नुयात् ॥ ११ ॥

॥ इति श्रीधान्यकथानकमिदम् ॥ ३८ ॥

*

३९ द्यूताख्यानकथानकम् ।

शतद्वारपुरे सारे द्वारा पञ्चशतानि च[7] । एकैकस्मिन् सन्ति द्वारे स्तम्भो मणिराजिते ॥ १ ॥

---

1 प निर्वि 2 पफाज पुरुषम्, 3 फज तत्पल्यं, 4 प पुरुषम् फज पुरुषम्, 5 [ग्रातुकपि]. 6 पज °मानस 7 प confuses some lines. 8 फ omits No. 9 9 प स्वमर्त संपूर्ण, 10 फ द्वारस्तम्भानि च

शतानि द्यूतकाराणां पञ्च पञ्च विलासिनाम् । तन्मध्ये सद्विकस्त्वेको द्यूतं जुषति सर्वदा ॥ २ ॥
रममाणैस्ततस्तैः सर्वैः सद्विकोऽप्य कृतव्यनि । [1]कृता कपर्दिका सर्वे द्यूतकारैः पराजिता ॥ ३ ॥
सर्वे विषं समादाय पवनं प्रविहाय तत् । द्यूतकाराः पुनस्सर्वे दिशः सर्वा ययुः क्षपात् ॥ ४ ॥
सद्विको द्यूतकारस्तु ख्या [2]कर्ता क्वापि संगता । कदाचित्संभवत्येष परस्परसमागमः ॥ ५ ॥
मनुष्यत्वं परिप्राप्य मत्त तद्विप्रयोगतः । भूयो न लभते जीवः शुभकर्मपराङ्मुखः ॥ ६ ॥

तथा चोक्तम्—

सयदारम्मि य णयरे दारे दारेसु पंच सया ।
एक्केक्कम्मि य खल्ये जूयारा पच पंच सया ॥ ७ ॥
सव्वेहिं जिदो एक्को पुणो वि तेणेव जेओ एक्कको ।
सो दु कया वि समाणे दुल्लहमिह माणुसो लंभो ॥ ८ ॥

॥ इति श्रीद्यूताख्यानकथानकम् ॥ ३९ ॥

४० कपर्दकद्यूतकथानकम् ।

अत्र चैव समाख्यातं द्यूतस्य च कथानकम् । कोटिदैर्गुणसंपन्नैर्लोकविख्यातकीर्तिभिः ॥ १ ॥
पूर्वोक्तनगरे रम्ये श्रवणपारिनामके । द्यूतकारो वसत्येको मुक्तो निर्लक्षणाख्यया ॥ २ ॥
एष सत्रान्तरेऽपीह न किंचिज्जयति स्फुटम् । द्यूतं च रमते पापमनिर्विण्णो दिवानिशम् ॥ ३ ॥
अनेन रममाणेन कदाचिद्दैवयोगतः । विजिता द्यूतकाराणां कृता सर्वे कपर्दकाः ॥ ४ ॥
तदशेषं परिप्राप्य सर्वानीप ससत्त्विकः । निर्लक्षणो ददौ सर्वान् देशिकेभ्यः कपर्दकान् ॥ ५ ॥
अथानन्तरमेवैते तोषसंतुष्टमानसाः । निर्गत्य पवनाच्चीमे ययुः स्थानं यथायथम् ॥ ६ ॥
देशिकेषु गतेष्वेषु क्वचिद्दिवीक्ष्य समादरात् । निर्लक्षणं वदन्तीम द्यूतकाराः पुनः पुनः ॥ ७ ॥
निर्लक्षणसमादाय धर्मव्यसिंघनं गुरु । अस्माकमानय क्षिप्रं सर्वान् कर्ता कपर्दकान् ॥ ८ ॥
निशम्य तद्वचः सोऽपि जगादैतान् पुरःस्थितान् । कौतुकव्याप्तचेतस्कान् विनयाचारसंगमान् ॥ ९ ॥
देशिकेभ्यो मया दत्ता नूनं कर्ताः कपर्दकाः । तदपि तान् क्षीममादाय ययुः स्थानं यथोचितम् ॥ १० ॥
निशम्य तद्वचस्तेऽपि द्यूतकारा निरुत्तराः । निर्गताः सर्व पुनर्जग्मुः कृतकोपाहतमनसः ॥ ११ ॥
निर्लक्षणः कदाचित् स ता कर्तास्ते कपर्दकाः । नूनमेकीभवन्त्येते तदानीं दैवयोगतः ॥ १२ ॥
प्राप्य मानुष्यकं सारं जन्मकोटिषु दुर्लभम् । जीवो न लभते मार्गं रत्नं वा सागरेऽन्तगम् ॥ १३ ॥

॥ इति श्रीकपर्दकद्यूतकथानकम् ॥ ४० ॥

४१ मनुष्यत्वप्राप्त्यादिकथानकम् ।

भरतः समरमन्त्री भगवान् धर्मसंयुतः । तथा सनत्कुमारोऽभूच्छान्तिः कुन्थुररोऽमरः ॥ १ ॥
महापद्मः सुभूमोऽपि हरिषेणो जितारथी । जयसेनोऽपरो विद्वान् ब्रह्मदत्तोऽभवद् बली ॥ २ ॥
एष द्यूतमविदेषैर्नितान्तं परिरक्षित । ते देवाः स भविष्ये च पृथिवीपतिविभ्रजिनः ॥ ३ ॥

1 [कर्ता]. 2 प कुष्यर, पत्त कुष्यम्. 3 क समागम. 4 [कर्ता]. 5 प गते. 6 प (अनन्तरम्).
7 पत्त °मनन्तरमेस.

ते जीवास्ते नरा विप्या स चक्री स मणि पर । कन्याविदैवयोगेन प्राप्नुवन्ति समागमम् ॥४॥
मनुष्यत्वमपि प्राप्तं मुक्तिश्रीप्राप्तिकारणम् । समाधिर्बोधिना सार्धं देहिभिर्दुर्लभो भवेत् ॥ ५ ॥
॥ इति श्रीमनुष्यत्वप्राप्तिदुर्लभबोधिसमाधिसमागमकथानकम् ॥४१॥

*

४२ मनुष्यभवप्राप्तिकथानकम् ।

सागरदत्तिकल्पस्य श्रेष्ठिनो जलमायिन । करादनर्घरत्नानि न्यपतन् सागरान्तरे ॥ १ ॥
आगमाहितचेतोभिर्यत्तोऽप्यावविगन्तरे । उपलम्भवरत्नस्थानमिदं वक्तव्यमादरात् ॥ २ ॥
एकः कोऽपि नर सुखभक्ती स्वयमसमागमात् । स जीव सोऽपि वा स्वप्नो दुर्लभो मानुषो भव ॥३॥
विषये लोकविख्याता श्रीमदुज्जयिनी पुरी । चेलकाख्यो नर कोऽपि वसतस्यां सुदुर्विध ॥ ४ ॥
अन्यदा सोऽर्थी गत्वा व्याघ्रान्यादाय भूरिश । तद्धारसिंहलस्थान्तो मुमोचैतानि दुःखितः ॥५॥
सुखसुप्तस्य तस्यारं श्रीमदुज्जयिनीवने । वक्तव्य पुरो प्राप्ते कथानकमिदं भुवि ॥ ६ ॥
॥ इति श्रीमनुष्यभवप्राप्तिकथानकमिदम् ॥ ४२ ॥

*

४३ अर्जुनचन्द्रकवेधकथानकम् ।

त्रिसहस्रारकं चक्रं स्तम्भा द्वाविंशति पर । तच्चन्द्रकं परामागे निगदन्ति मनीषिण ॥ १ ॥
चन्द्रकस्यास्य वेधं य करोति धीरमानस । तस्मै उत्तमराभार्यां कन्यारत्नं ददाम्यहम् ॥ २ ॥
तानि भिन्नाणि तत्रकं विध्यते केनचित्सदाम् । मानुष्यं चन्द्रकं लोके दुर्लभतो विध्यते पुनः ॥ ३ ॥
अथवाऽनेन भेदेन चान्द्रकं वेधमुत्तमम् । वदन्ति सूरयो लोके ज्ञाननिष्पातबुद्धय ॥ ४ ॥
स्थित्वा भ्राम्यन् क्रमेणायमादिम सप्तमं क्रमात् । त्रीणि त्रीणि पदानीत्वा चैकैकं पुरतो हि पद ॥५॥
तच्छिद्रेऽपि परिभ्राम्यन् सरोजकयोगत । सज्ज सन् विध्यति क्षिप्रं चन्द्रकाख्यं ध्यायं नरः ॥६॥

तथा चोक्तम्–

स्थित्वा भ्राम्यदनुक्रमेण युगपत्सत्क्रमेणारिम
त्रीणि त्रीणि पदान्यतीत्य पुरतोऽप्येकैकमेवं हि पद् ।
तच्छिद्रभ्रमदष्टवन्तरसिरोऽभ्यन्तर्गतो दर्पणे
सद्यमेति य एव विध्यति नर सावन्द्रकाख्यं व्यथ ॥ ७ ॥

द्रुपदराज्येन काकन्द्यां पुरि चन्द्रकम् । कृष्णानिमित्तमाविद्धं नरेण विदुषा द्रुतम् ॥ ८ ॥
प्रापीयसाऽपि कालेन विश्वं यत्नं प्रकुर्वत । जीवोऽपि न च शक्नोति मनुष्यभवचन्द्रिकम् ॥९॥
॥ इति श्रीअर्जुनचन्द्रकवेधद्रौपदीनिमित्तकथानकम् ॥४३॥

*

४४ नन्दकच्छपकथानकम् ।

एकोऽपि यो भवेज्जीवो यैर्दैवे परिरक्षित । ते सुरास्ते पराक्रमा दुःखिनो जीवराशयः ॥ १ ॥
जीवास्ते तेऽमरा देव्यस्तावकं मारतेऽन्वये । एते सर्वेऽपि लभ्यन्ते मानुषत्वं सुदुर्लभम् ॥ २ ॥

---

1 पञ्च जीवितमयः. 2 प (अतिक्रममुत्क्षीणम्). 3 [कोर्भवं]. 4 प व्याघ्रसत्यारूपमयि. 5 पकञ्च दुष्मम्. 6 [तच्छिद्रे भ्रमत्पर्वताग्रविरोध]. 7 [भिंदं]. 8 [चन्द्रकाख्यं]. 9 ज (अनुज्ञेय). 10 क मुर्तं ज मूर्धा 11 प यत्नं 12 [illegible] 13 [[illegible]]

सुमूलनक्रिसमक्रममोपार्जं सुदर्शनम् । पृथिवीकायिका जीवा देवयक्षसदक्षकम् ॥ ३ ॥
धर्मसिन्धुप्रदेशस्य कच्छपोऽपि निराधिनः । एकस्थानस्थितं दृष्ट्वा पूर्वयोगविधानतः ॥ ४ ॥
नूनं कदाचिदप्येषां सर्वेषां समवस्थितिः । न पुनर्जातु नष्टस्य मनुष्यभवजन्मनः ॥ ५ ॥
यार्यो स्वयम्भूरमणे कच्छपो नन्दनात्मकः । सतिष्ठते महाकायो निद्राघूर्णितलोचनः ॥ ६ ॥
केनापि वह्निना यद्वं तप्यमानस्य चमचमः । भूयोऽपि बोधमायाति नन्दो वपसदस्तव ॥ ७ ॥
नन्दः प्राप्नोति तच्छिद्रं भूपः कार्येण केनचित् । दुर्लभं हि मनुष्यत्वं कुतो बोधिसमाधिता ॥ ८ ॥
तिर्यग्लोकस्य सर्वस्य स्वयम्भूरमणोदधिः । यथप्रमाणमात्रोऽसौ वाक्यमेतज्जिनेशिनाम् ॥ ९ ॥
एकत्र कच्छपस्तत्र नन्दनामा महाबलः । यत्रापघनसंयुक्तो वसति प्रीतमानसः ॥ १० ॥
नूनं स्वकर्मतो मूढे जलमध्ये विसारिणः । सममाऽपि समानं स्यात् स्वयम्भूरमणोदधेः ॥ ११ ॥
गम्भराऽऽत्मसहसेन यन्मध्ये जलसंकुले । नन्देन जातुचिद् दृष्टमम्बरमेव भास्करः ॥ १२ ॥
दृष्ट्वाऽऽश्चर्यमिदं यावन्नन्दो दर्शयते रविम् । स्वजनानामसौ तावत्तानागमयत्स्वतां क्रमात् ॥ १३ ॥
यथवाऽऽश्चर्यमसि सद्यो दृष्टान्तो मरितो भुवे । समस्तजनतावाचिपरजनासक्तमानसे ॥ १४ ॥
विस्तीर्णपूर्वदेशस्य जलमध्ये वसन् सकः । दृष्ट्वा मध्याह्नवेलायां मार्तण्डं धर्मरश्मकः ॥ १५ ॥
यावत्स्वबन्धुमित्राणां नन्दो दर्शयते रविम् । तावत्तच्छिद्रमप्याशु नष्टं क्वापि यथादिव ॥ १६ ॥
पुनः पुनः कदाचिच्च तच्छिद्रं पश्यति स्म सः । मानुष्यकमिदं नष्टं न जीवो लभते ध्रुवम् ॥ १७ ॥
पूर्वापरौ परिक्षिप्तं क्षमितोऽपरवारिधौ । युगं तयोः समासंगः कदाचिदपि जायते ॥ १८ ॥
चतुर्गतिकसंसारे क्लेशमानाद्दिनीरके । नृजन्म भेषमासिन्धं न जीवो लभते यतिम् ॥ १९ ॥
योपदम्भचतुर्दश्य सर्वेषां यत्क्रिया भवेत् । कृतमेवमसौ भूपः परमार्थो क्षयं प्रजत् ॥ २० ॥
सुपक्षे देहिनस्ते च स दण्डमक्रियो भुवि । दुर्लभं साधु मानुष्यं कुतो बोधिः समाधिना ॥ २१ ॥

॥ इति श्रीनन्दकच्छपकथानकमिदम् ॥ ४४ ॥

४५ समुद्रदत्तकथानकम् ।

विषये वत्सकाख्ये कौशाम्बी नगरी परा । तस्यां बभूव भूपालः प्रजापालो गुणाकरः ॥ १ ॥
सितसुधासमानाभदन्तोद्योतितदिङ्मनिः । बभूव भूपतेर्भार्या जयादिमविरूपमा ॥ २ ॥
तस्यामारक्षिको नाम यमदण्डो यमोपमः । बभूव भासुरकारो भीषयन् सकलं वनम् ॥ ३ ॥
तस्यामेव पुरि श्रीमान् कीर्तिव्याप्तनभोम्बरः । श्रेष्ठी सागरदत्तोऽभूद् गुणरञ्जितभूतलः ॥ ४ ॥
तद्भार्या रूपसंपन्ना हरिणीलोललोचना । बभूव विनयोपेता दत्तान्ता सागरादिका ॥ ५ ॥
यातः समुद्रदत्तोऽभूत्तयोरत्यन्तवल्लभः । रममाणः पुरे आस्मिन् दिव्याभरणभूषितः ॥ ६ ॥
अत्रैव नगरे निःस्वो वामनो नाम वाणिजः । सप्तव्यसनसंयुक्तो बभूव क्रूरमानसः ॥ ७ ॥
योषित्पानं च पापर्द्धिद्यूते मिलितं तथा । एतच्चतुष्टयं नूनं कामजं परिकीर्तितम् ॥ ८ ॥
वाच पचनपारुष्यं दण्डपारुष्यमेव च । अर्थस्य दूषणं चेति क्रोधजं त्रिविधं मतम् ॥ ९ ॥
अथवा द्यूतकं पानं कुत्सिता वनिता वधः । परयोषिद्दत्तं च मांसभक्षणमेव च ॥ १० ॥
एतानि सप्त निन्द्यानि व्यसनानि शुभस्थले । दुःखदायीनि जन्तूनां निगदन्ति मनीषिणः ॥ ११ ॥

---

1 [कच्छपस्य]. 2 क कन्या ख कन्यां 3 ख omits some lines here. 4 प एकस्था.
5 प विस्तार्य ख सकलार्थ 6 पचस्य कुलम्, 7 पचस्य कुलम्,

तथोक्तम्—

द्यूतं पानं कुत्सितवेश्या परदारं हिंसाऽदत्तं मांसमकार्येष्वतिकष्टम् ।
एते दोषाः सप्त च नृणामतिपापाः स्थित्यैर्दुष्ट्या दुर्गतिमार्गान् प्रभवन्ति ॥ १२ ॥

सौम्यनाम्नी प्रिया चास्य सौम्यः पुत्रोऽनयोः शिशुः । पभूव रूपसंपन्नो दारिद्र्यव्यग्रचेतसोः ॥ १३ ॥
शयनं भोजनं स्नानं गमनं रमणं तराम् । सौम्यः समुद्रदत्तेन करोति स्म निरन्तरम् ॥ १४ ॥
अन्यदा रममाणौ तौ स्नेहनिर्भरमानसौ । वामनस्य गृहं क्षीर्णं प्रम्मतुः कण्ठनिस्वनौ ॥ १५ ॥
समुद्रदत्तमालोक्य दिव्याभरणभूषितम् । समुतं स्वगृहे तत्र दध्याविति स वामनः ॥ १६ ॥
चिन्तयित्वा चिरं सोऽपि साळंकारं पुरःस्थितम् । महालोभपरिग्रस्तो ममार क्रूरमानसः ॥ १७ ॥
समुद्रदत्तरत्नानि बहुमूल्यानि वामनः । आदाय तं परिक्षिप्य स्वगृहमध्ये सकम्बलम् ॥ १८ ॥
यस्मिन् समये चक्रे तं स्वगृहान्ते च गतासुकम् । तस्मिन्नेव ददर्शायं तत्सुतः सौम्यसंज्ञकः ॥ १९ ॥
स्वपुत्रादर्शनादेतौ विह्वलीभूतमानसौ । तदा तत्पितरौ दीनौ रुदन्तौ स्थितौ(?)ऽधिकम् ॥ २० ॥
अथ वामनपुत्रोऽसौ रममाणः स्वलीलया । स्मृत्वा समुद्रदत्तस्य तद्गृहं प्रययौ मुदा ॥ २१ ॥
कृत्वा सौम्यकमुत्सङ्गे श्रेष्ठिनी दीनमानसा । पप्रच्छेति समं स्पष्टं बाष्पविप्लुतलोचना ॥ २२ ॥
समुद्रदत्तनामायं त्वद्वयस्यो ममात्मजः । यदि दृष्टस्त्वया क्वापि वद त्वं पुत्र सांप्रतम् ॥ २३ ॥
श्रुत्वा सागरदत्ताया वचनं सोऽब्रवीच्छिशुः । एषः समुद्रदत्तोऽयं मया मद्भवनान्तरे ॥ २४ ॥
आदाय दिव्यरत्नानि क्षिप्त्वा गर्ते निधाय सः । प्रदाय कम्बलं तत्र मत्कं गुप्तवान् पिता ॥ २५ ॥
श्रुत्वा तद्वचनं सत्यं ज्ञात्वा सागरदत्तया । वामनेन सुतो मेऽद्य नियतं निहतः कथम् ॥ २६ ॥
किंकरन्ती तदा 'हा हा' रुदन्ती सागरदत्तया । तदा सागरदत्तस्य शोकविह्वलचेतसः ॥ २७ ॥
ततः सागरदत्तोऽपि श्रुत्वा वाक्यं स्वयोषितः । यमदण्डतलारस्य समुद्रान्तमनापत ॥ २८ ॥
श्रुत्वा सागरदत्तस्य वचनं क्रोधसंगतम् । यमदण्डो 'नगामेम भवनं वामनस्य सः ॥ २९ ॥
यावदन्वेषणं तत्र गृहमध्ये करोति सः । तावद्ददर्श तं बालं मृतं भास्वरविग्रहम् ॥ ३० ॥
धनमादाय निःशेषं स्वलीकृत्य स दुर्मतीः । वामनो यमदण्डेन नगराद्व्यपसारितः ॥ ३१ ॥
यथा वामनपुत्रेण सौम्यकाख्येन भाषितम् । कार्याकार्यमनालोच्य श्रेष्ठिन्याः प्रगुणं भुवि ॥ ३२ ॥
तथैव क्षपकेणापि सूरिस्थले यथास्थिता । आलोचना प्रकर्तव्या संसारोच्छेदमिच्छुना ॥ ३३ ॥

॥ इति श्रीकौशाम्बीनगरीसमुद्रदत्तसोमकाख्यकथास्वरूपनिवेदनसागरदत्तकथानकम् ॥ ४५ ॥

*

४६ असत्यभाषणकथानकम् ।

अथ प्रणम्य वीरेशमाखण्डलनतक्रमम् । निहताशेषकर्माणं ध्वस्तकन्दर्पवारणम् ॥ १ ॥
यातस्य सस्तरं येन क्षपकस्य शुभेतसः । नश्यन्ते यदाशु साम्प्रतं वक्ष्यामि सांप्रतम् ॥ २ ॥
यदा चाश्विनिनक्षत्रे क्षपको म्रियते सस्तरम् । तदा हि स्वातिनक्षत्रे नर्क कष्टं करोति सः ॥ ३ ॥
भरणीये प्रगृह्णाति क्षपकः संस्तरं यदि । कष्टं करोति रेवत्यां प्रदोषेऽसौ समाधिना ॥ ४ ॥

---

1 पक read रमणन्तराम्. 2 प समुतं. 3 प सालंकारं 4 पक read भद्भवेन etc. as the second line of No. 16 and other lines are serially adjusted. 5 प समुद्रदत्तेन.
6 [illegible] 7 [illegible] 8 प [illegible] 9 पक तदपि 10 प [illegible]

संस्तरं यदि गृह्णाति कृत्तिकायां विशुद्धधीः । उत्तराफाल्गुनीभे च मध्याह्ने मरणं भवेत् ॥ ५ ॥
क्षपकः संस्तरं याति रोहिण्यां यदि शुद्धधीः । कालं श्रवणनक्षत्रे निशीथे विदधाति सः ॥ ६ ॥
मृगादिशिरसाभेन क्षपकः संस्तरं श्रितः । ²पूर्वफाल्गुनिनक्षत्रे तत्र कालं करोति सः ॥ ७ ॥
आर्द्रायां यदि नक्षत्रे क्षपकः संस्तरं भजेत् । तत्तद्दिवसे सोऽयं कालं कुर्यात्समाधिना ॥ ८ ॥
अथवा तद्दिने कालं कदाचित्र कथंचिद्भवेत् । क्षपकः शुद्धचेतस्कः प्रभाते विदधाति सः ॥ ९ ॥
पुनर्वसुनि नक्षत्रे याति संस्तरकं यदि । अपराह्णे ततोऽश्विन्यां क्षपकः कुरुते मृतिम् ॥ १० ॥
क्षपकः पुष्यनक्षत्रे याति संस्तरकं यदि । मृगादिशिरसा कालं नक्षत्रेण करोत्ययम् ॥ ११ ॥
क्षपकोऽश्लेषनक्षत्रे संस्तरं भजते यदि । निशायामयं तत्र कालं विदधाति समाधिना ॥ १२ ॥
यदा मघाख्यनक्षत्रे संस्तरं प्रतिपद्यते । क्षपकस्तद्दिने नूनं कुर्यात् कालं तदा सुधीः ॥ १३ ॥
³पूर्वफाल्गुनिनक्षत्रे क्षपकः संस्तरं भजेत् । धनिष्ठायां तत्र कालं मध्याह्ने विदधाति सः ॥ १४ ॥
उत्तरोपपदायां चेत् फाल्गुन्यां संस्तरं भजेत् । ततो मूलेन मेनायं प्रदोषे कुरुते मृतिम् ॥ १५ ॥
क्षपको हस्तनक्षत्रे संस्तरं भजते यदि । ततो भरणिनक्षत्रे प्रभाते कुरुते मृतिं ॥ १६ ॥
याति चित्राख्यनक्षत्रे क्षपकः संस्तरं यदि⁴ । मृगादिशिरसा येन निशीथे कुरुते मृतिम्⁵ ॥ १७ ॥
क्षपकः स्वातिनक्षत्रे याऽऽरूढे संस्तरं यदि । ततो रेवतिनक्षत्रे प्रभाते भजते मृतिम् ॥ १८ ॥
विशाखाख्येऽत्र नक्षत्रे क्षपको याति संस्तरम् । दिवसेऽश्लेषनक्षत्रे कुर्यात् कालमसौ सुधीः ॥ १९ ॥
अनुराधाख्यनक्षत्रे क्षपकः संस्तरं भजेत् । तत्र पुष्येण संध्यायां कालं कुर्यात् समाधिना ॥ २० ॥
यदि ज्येष्ठाख्यनक्षत्रे क्षपकः संस्तरं भजेत् । पूर्वभाद्रपदाख्ये ये दिने कालं करोति सः ॥ २१ ॥
क्षपको मूलनक्षत्रे यदि गृह्णाति संस्तरम् । उत्तराभिकमधान्ते मे दिनार्धे मृतिं भजेत् ॥ २२ ॥
पूर्वाषाढाख्यनक्षत्रे याति संस्तरकं यदि । क्षपकस्तद्दिने कालं त्वपराह्णे करोति सः ॥ २३ ॥
उत्तराषाढनक्षत्रे यदि गृह्णाति संस्तरम् । तत्तद्दिवसे योगी चापराह्णे मृतिं भजेत् ॥ २४ ॥
यदि श्रवणनक्षत्रे क्षपकः संस्तरं गतः । उत्तराभिकपदान्ते मे मृतिं तद्दिने भजेत् ॥ २५ ॥
धनिष्ठायां च नक्षत्रे यदि गृह्णाति विस्तरम् । क्षपकस्तद्दिने कालं करोति स समाधिना ॥ २६ ॥
अथवा दैवयोगेन कदाचित्तद्दिने न तम् । ततोऽन्यस्मिन् दिने कालं क्षपको विदधात्ययम् ॥ २७ ॥
नूनं शतभिषाख्ये तु नक्षत्रे संस्तरं भजेत् । यदि योगी धनिष्ठायां कुर्यात्कालं दिनात्यये ॥ २८ ॥
पूर्वभद्रपदायां च क्षपकः संस्तरं भजेत्⁶ । पुनर्वसुनि नक्षत्रे नक्तं कालं करोत्ययम् ॥ २९ ॥
नक्षत्रे चोत्तरभद्रपदायां यदि संस्तरम् । क्षपको याति कालं च तद्दिने विदधाति सः ॥ ३० ॥
रेवत्यां यदि गृह्णाति क्षपकः संस्तरं तदा । मघायां कुरुते कालमप्यास्थितपरीषहः ॥ ३१ ॥
इदं सर्वं परित्यज्य नक्षत्रादिकमादरात् । कालमनुरूपसंभूतैर्निमित्तैर्विबुधा स्थितेः ॥ ३२ ॥
परीक्ष्य लक्षणानि तथा निर्यापकगणोऽपि । क्षपकं संस्तरारूढं कारयति त यती ॥ ३३ ॥
अथ दक्षिणदेशेऽस्ति या प्रदेशसमीपतः । श्रीपर्वतः समुत्तुङ्गो नानावनोत्करसंकुलः ॥ ३४ ॥
तस्याग्निमदिशाभागे मन्दप्रवरला नदी । सुमनाक्षेऽमलपुष्पमन्त्रककल्लोलसंकुला ॥ ३५ ॥
तदन्तिके तत्र रम्यं सामुरमभवत् पुरम् । राजा यशोधरोऽस्मिन्निवासार्थाऽपि वसुंधरा ॥ ३६ ॥
अनन्तोपपदो वीरः श्रीधरः प्रियवल्लभः । तस्या इमे त्रयः पुत्राः बभूवुः प्रभुवर्धनः ॥ ३७ ॥

---

1 क omits two lines here. ² क पूर्वफाल्गुनि° ³ क पूर्वफाल्गुनि. ⁴ क यदले नक्षत्रे यदि. 5 क omits two lines here. 6 क भिवेत्.

अन्यदा सुतदारौघैरमात्यैस्परिगेन्तरम् । प्रासादशिखरारूढस्तदा राजा यशोधरः ॥ ३८ ॥
गगने पश्यता तेन हिमाचलसमप्रभः । दृष्टो विमानसंकाशो नीरदश्चित्रकूटकः ॥ ३९ ॥
चिन्तयन्निमं नराधीशश्चिन्तामेतामुपागतः । कारयामि जैनेन्द्रं मन्दिरं मन्दरोपमम् ॥ ४० ॥
यावदेव धरापृष्ठे लिखति स्म महीपतिः । तावद्विलयमापन्नो मेघोऽयं सहसा दिवि ॥ ४१ ॥
दृष्ट्वा घनं क्षयं [1]यातं भोगनिःस्पृहमानसः । यशोधरो निनिन्दायं मनुष्यविभवादिकम् ॥ ४२ ॥
कदलीगर्भनिस्सारं यौवनं देहिनां भवेत् । आयुस्तडिद्विलोलं च तरङ्गचपला श्रियः ॥ ४३ ॥
चिन्तयित्वा चिरं राजा राज्यश्रियमहीनकाम् । ज्येष्ठपुत्राय निश्शेषां तदानीं दातुमुद्यतः ॥ ४४ ॥[2]
नेच्छतीमां तनूजोऽयं ज्येष्ठो भोगपराङ्मुखः । श्रीधराय पुना राजा वितरीतुं श्रियं श्रितः ॥ ४५ ॥
श्रीधरोऽपि यदा राज्यं न वाञ्छति मनागपि । तदा यशोधरो राजा प्रियचन्द्राय तद्ददौ ॥ ४६ ॥
यशोधरः [3]सुपुत्राभ्यां हित्वा सर्वं परिग्रहम् । वरदत्तमुनेः पार्श्वे दीक्षां केवलिनोऽग्रहीत् ॥ ४७ ॥
शुक्लध्यानगजारूढो व्रतकञ्चुकभूषितः । गुप्त्युत्थितसितच्छत्रः समितिशुक्लचामरः ॥ ४८ ॥
तपोयानेन खड्गेन शिरश्छित्त्वा यशोधरः । संसारप्रतिपक्षस्य प्राविशत् सिद्धिपत्तनम् ॥ ४९ ॥[4]
आराधनां समाराध्य कृत्वा कालं समाधिना । विधिनाऽनन्तवीर्योऽपि प्राप्तोऽनुत्तरवासिताम् ॥५०॥
अथ नानातपो घोरं कुर्वाणः श्रीधरः शुचौ । कायोत्सर्गेण संतस्थे श्रीपर्वतमधिष्ठितः ॥ ५१ ॥
प्रपञ्चनाटकं दिव्यमतिसुकुमकल्पे । प्रियचन्द्रो सुखेन दृष्टः पञ्चत्वमागतः ॥ ५२ ॥ [5]
प्रियचन्द्रे नृपे जाते पञ्चतां दैवयोगतः । न कोऽपि राज्ययोग्योऽस्ति तद्वंशे विधुनिर्मले ॥ ५३ ॥
अत्रान्तरे शुचं प्राप्य परां सर्वेऽपि मन्त्रिणः । यशोधरादियोगीशान् प्रणिपत्य पुरस्सरम् ॥ ५४ ॥
सर्वा दिशः परिभ्रम्य तद्वार्तामवगम्य ते । प्राप्य समभिसामन्तांस्तद्वृत्तान्तं बभाषिरे ॥ ५५ ॥
निहत्याशेषकर्माणि मोक्षं प्राप्तो यशोधरः । अनुत्तरविमानं च गतोऽनन्तबलोऽपि सः ॥ ५६ ॥
श्रीपर्वतं परिप्राप्य श्रीधरोऽपि महामुनिः । अभ्राद्यातापनं योगं ग्रैष्मादिसमयस्थितः ॥ ५७ ॥ [6]
तद्वार्तां कथयित्वा ते तोषपूरितमानसाः । तद्विधे वरमार्गे तस्थिवांसो विचक्षणाः ॥ ५८ ॥[7]
निशम्य तद्वचो मन्त्री तोषकम्पितमानसः । श्रीपर्वतं परिप्राप्य ददर्श श्रीधरं यतिम् ॥ ५९ ॥
प्रणम्य तं मुनिं मन्त्री समासननियमं तदा । शोकतोषसमायुक्तो जगाद पुरतः स्थितः ॥ ६० ॥
भगवन् प्रियचन्द्रोऽसौ मृतिं प्राप्तो सुतो हितः । तस्मादुत्तिष्ठ गच्छामः कुरु राज्यं सुखास्पदे ॥६१॥
आकर्ण्य सचिवस्योक्तं श्रीधरः श्रीसमुत्सुकः । जगाम सपदं शीघ्रं तदानीं सततीप्सया ॥ ६२ ॥ [8]
राजानो मन्त्रिणः सर्वे तूर्यमङ्गलनिस्वने । राजपट्टं ददुः पुष्पे श्रीधरस्य कृतत्वराः ॥ ६३ ॥
राज्यपट्टे यतो बद्धस्तस्य तैर्मुण्डमस्तके । ततो मुण्डितराजोऽयं विख्यातो धरणीतले ॥ ६४ ॥
यतः श्रियं परिप्राप्य श्रीधरः पर्वतेऽत्र सः । तत्र श्रीपर्वतस्यार्थे अयामार्यं महीधरः ॥ ६५ ॥
वंशोऽस्य मुण्डितस्वामिस्य श्रीधरस्य विलासिनः । समस्तलोकविख्यातः प्रसिद्धिं भुवने गतः ॥६६॥
ततो मुण्डितवंशे च भगवान् ज्ञानसागरः । नेमिनाथजिनः श्रीमान् वरदत्ताम्बरचन्द्रमाः ॥ ६७ ॥ [9]
वरदत्तमुनीन्द्रस्य गणेशस्य तदन्वये । जातो मुण्डितवंशोऽयं केवलेन विलासिनः ॥ ६८ ॥
पारंपर्येण भूपानां तदनुक्रमयायिनाम् । अयं मुण्डितवंशोऽपि जगाम भुवि विस्तरम् ॥ ६९ ॥
अत्रैवैकदेशस्थकर्मराष्ट्रजनान्तिके । बेण्यातटपुरं रम्यं विद्यते जनसंकुलम् ॥ ७० ॥
बभूवात्र पुरे राजा मुण्डवंशसमुद्भवः । लोकपालस्त्यसंपन्नो धनदो धनदोपमः ॥ ७१ ॥

1 क °दिव्यमतम्. 2 क यातं. 3 पचपञ्च निश्शेषां. 4 क वातुशसं. 5 क °हीदि°. 6 पचपञ्च मुण्डम्. 7 [यातो]. 8 प पत्. 9 पचपञ्च मुण्डम्.

श्रावकाणुव्रतोपेतो धार्मिकः श्रुतसागरः । कलाविज्ञानसंपन्नो जिनशासनभावितः ॥ ७२ ॥
सर्वकालं सभामध्ये जिनधर्मकथामलम् । आक्षेपण्यादिकामेष विदधाति चतुर्विधाम् ॥ ७३ ॥
एवं धर्मकथां नूनं सदा कथयताऽमुना । समस्तोऽपि जनस्तत्र नीतः श्रावकतां पराम् ॥ ७४ ॥
तथा क्षमेदिनी सर्वा ग्रामपत्तनकादिका । विहिताऽनेन सा तेन जिनभवनमण्डिता ॥ ७५ ॥
अत्रैव दैवयोगेन कोऽपि बौद्धः समुद्गतः । विहारं सौगतं शुभ्रं कारयामास भक्तितः ॥ ७६ ॥
तस्मिन् बौद्धविहारेऽत्र नानाशास्त्रविशारदः । बुद्धश्रीर्भिक्षुरेको हि वसति प्रीतमानसः ॥ ७७ ॥
उपासकोऽस्य शिष्योऽस्ति संघश्रीर्भुवि विश्रुतः । धनदस्य महामन्त्री जिनधर्मपराङ्मुखः ॥ ७८ ॥
तस्य संघश्रियो भार्या विमलश्रीः प्रकीर्तिता । सुताऽनयोः सुरूपा स्याद् विमलश्रीमतिः परा ॥७९॥
सा च राज्ञो महादेवी सर्वान्तःपुरनायिका । विहाय सौगतं धर्मं जिनधर्ममुपाश्रिता ॥ ८० ॥
मन्त्री पुनः सदा सम्यक् संघश्रीर्जिनभाषितम् । धर्मं कथयतोऽपीमं न शृणोति महीपतेः ॥ ८१ ॥
राजाऽन्यदा महादेवीमभियुक्तः प्रविष्टते । वर्णयन् सौधमूर्धस्थप्रासादानां गुणान्तरम् ॥ ८२ ॥
दिशावलोकनं कुर्वन् व्योम्नि चारणयुग्मकम् । ददर्श धनदो भूपो भक्तिप्रह्वतनूरुहः ॥ ८३ ॥
प्रोत्थाय विष्टरादाशु भूपतिः पदसप्तकम् । [1]तत्सन्मुखमभिप्राप्य वन्दित्वेमौ जगाद सः ॥ ८४ ॥
स्वामिनौ ज्ञानसंपन्नौ सर्वसत्त्वकृपान्वितौ । धर्मं कथयतं सारं दयां कृत्वा ममोपरि ॥ ८५ ॥
श्रुत्वा तद्वचनं साधू चारणौ गगनाङ्गणात् । अवतीर्य तदभ्यासं प्राप्तवन्तौ क्षमाम्बुधी ॥ ८६ ॥
सत्त्वं भूरि त्वयादत्तं सर्वं च परयोषित । दयां सकलसत्त्वेषु धर्मं कुरु जिनोदितम् ॥ ८७ ॥
साधुवाक्यं समाकर्ण्य प्राहेदं वसुधापतिः । वन्दे चारणयोगीन्द्रसंगनिर्धूतकल्मषः ॥ ८८ ॥
जिनधर्मनयं मन्त्री संघश्रीनामको मम । कथ्यमाने बुधैः श्रोतुं मनसाऽपि न वाञ्छति ॥ ८९ ॥
स्वच्छधीर्मं यथा चार्वं भवद्भ्यो रोचतेऽपि वा । विधातव्यं तथा सर्वं यदभिप्रेतमिच्छसि ॥ ९० ॥
मुनिनाऽस्य तथा धर्मः कथितो जिनदेशितः । यथाऽयं जातसंबोधो दध्यौ विस्मितमानसः ॥ ९१ ॥
अहो जैनस्य धर्मस्य माहात्म्यं परमं भुवि । सर्वकालमहं पापो वञ्चितोऽस्मि कुहेतुभिः ॥ ९२ ॥
देवपापप्रमोहादिवर्जितं जिनदेशितम् । धर्मं जग्राह संघश्रीः सम्यक्त्वप्रसितमतिः ॥ ९३ ॥
ग्राहयित्वा मुनी धर्मं मन्त्रिणं जिनभाषितम् । चारणौ जग्मतुः क्वापि मन्त्रिकर्मोद्यमादरम् ॥ ९४ ॥
ततो जगाद राजेन्द्रो मन्त्रिणं प्रीतमानसः । मम मातुल संबोधो जातस्त्वद्धर्मसंग्रहात् ॥ ९५ ॥
अपरं च त्वया साधो सभामध्यगतस्य मे । प्रभाते खलु वक्तव्यं चारणाहृतमादरात् ॥ ९६ ॥
निशम्य भूपतेर्वाक्यं संघश्रीः परमोदयम् । जगादेमं विनीतात्मा तोषपूरितमानसः ॥ ९७ ॥
त्वं महाराज तिष्ठ श्वो निखिलजनसंसदि । निराकरोम्यहं धर्मं बौद्धादीनां सहेतुभिः ॥ ९८ ॥
तिर्यग्नरकदुःखान्तं स्वर्गमोक्षप्रदायकम् । प्रकाशयामि जैनेन्द्रं धर्मं सम्यक्सुखावहम् ॥ ९९ ॥
चारणानां मुखं पश्य यथा यत् सभान्तरे । एवं कृतप्रतिज्ञोऽसौ निर्जगाम नृपान्तिकम्[3] ॥१००॥
संघश्रीः प्रीतचेतस्को निर्गत्य नृपमन्दिरात् । बुद्धभिक्षुं परिभाष्य ययौ जिनवराश्रित ॥ १०१ ॥
दृष्ट्वा संघश्रियं स्वस्य वन्दनादिविवर्जितम् । बुद्धश्रीः क्षपितः प्राह कोपलोहितलोचनः ॥ १०२ ॥
बन्धूपासक भो बौद्धो भवद्धर्मं सुभावित । गुरुर्दस मम त्वं कस्माद् वन्दनां न करोषि किम् ॥१०३॥
बुद्धश्रीवचनं श्रुत्वा संघश्रीर्निजगादमुम् । बुद्धधर्मेण शून्येन चिरकालं प्रवञ्चितः ॥ १०४ ॥
जिनधर्मं गृहीत्वाऽहं सांप्रतं समुपागतः । बुद्धधर्मं च नेच्छामि मनोवाक्कायकर्मभिः ॥ १०५ ॥

---

1 [illegible], 2 क [illegible], 3 [नृपान्तिकम्].

अमुना नृभुजा सार्धं प्रासादे स्थिता मया । एवं चारणयुग्मं हि कुर्वन्नकथां पराम् ॥ १०६ ॥
श्रुत्वा संघश्रियो वाक्यं गुणश्रीर्निजगाद तम् । अनयस्त्वं च मा कुर्यान्मोहान्धतमसावृत ॥ १०७ ॥
किं न श्रुतं त्वया वाक्यं यत्प्रोक्तं पिटकत्रये । यथा शून्यमिदं सर्वं नितान्तं प्रतिभासते ॥ १०८ ॥
महेन्द्रजालसंवेदी यो नृपोऽस्ति भुवस्तले । मायया दर्शितं तेन तव चारणयुग्मकम् ॥ १०९ ॥
अलीकं मानुषं रूपं दृष्ट्वा गगनगोचरम् । तेन त्वं मोचनं मत्वा बुद्धधर्मस्य मा कुरु ॥ ११० ॥
इदं सतां मनोहारि प्रसिद्धं सत्कथानकम् । कथ्यमानं मया स्पष्टं शृणु त्वं सुसमाहितः ॥ १११ ॥
काशीजनपदे रम्ये वाराणस्यां पुरि प्रभुः । उग्रसेनोऽभवच्छ्रीमान् धनश्रीर्वल्लभाऽस्य सा ॥ ११२ ॥
तस्य पुरोहितो विप्रः सोमशर्माऽभवत् सुधीः । भार्या पद्मावती चास्य पद्मपत्रनिभेक्षणा ॥ ११३ ॥
पद्मश्रीस्तनयो पुत्री स्नेहनिर्भरचेतसोः । कुमारी रूपसंपन्ना बभूव कलभाषिणी ॥ ११४ ॥
सोमशर्मा द्विजस्तत्र गुणी भागवते मठे । चकार महतीं पूजां परिव्राजकसंहते ॥ ११५ ॥
वन्दनादिकं कृत्वा सितीकृतनभस्तलम् । ददावाहारदानं स तेभ्यो भक्तिसमन्वितः ॥ ११६ ॥
अत्रान्तरे परो विद्वान् रूपयौवनगर्वितः । परिव्राजकसंयुक्तो मगधो विहरन् क्वचित् ॥ ११७ ॥
आगत्य द्रुतं स्थितो मन्दमन्दं गतिक्रियः । सोमशर्मालये तस्थौ सुवर्णखुरनामकः ॥ ११८ ॥
अथ प्रसाधितं साधु परिविष्टं तया परम् । पद्मश्रिया प्रसन्नात्मा भुङ्क्ते स्वर्णखुरो हसन् ॥ ११९ ॥
तस्यागमनतो नित्यं स्वगेहभ्रमणात् । अनयोः प्रेमसंबन्धो बभूव रतिकारणात् ॥ १२० ॥
पद्मश्रिया विना चान्यां स्वादु क्षणमपि स्फुटम् । सुवर्णखुरकः सोऽपि तां विना नाशकत् तदा ॥ १२१ ॥
अन्योन्यमासक्तमाने तौ स्नेहनिर्भरमानसौ । निर्गम्यतुः पुरात्क्वापि सुविदौ धनसंपदा ॥ १२२ ॥
निशम्य सोमशर्माऽयं पद्मश्रीहरणं तदा । धावति स्म तयोः पश्चात् कोपात्सन्निरीक्षण ॥ १२३ ॥
पद्मश्रियं यदा नायं पश्यति स्म स्वयत्नतः । तदाऽऽशु नृपतिं प्राप्य विलापं दुःखितः ॥ १२४ ॥
विज्ञेयस्य सोमशर्माणं महाकारुण्यसंयुतः । विलापकारणं राजा पप्रच्छेमं पुरःस्थितम् ॥ १२५ ॥
महीपालवचः श्रुत्वा सोमशर्मा जगाद तम् । नीता स्वर्णखुरेणाद्य पद्मश्रीर्मत्सुता नृप ॥ १२६ ॥
सोमशर्मवचः श्रुत्वा सत्वरं प्राह भूपतिः । तं परिव्राजकं दुष्टं सकन्यं शीघ्रमानय ॥ १२७ ॥
ततस्तेन सत्वरेण नृपवाक्येन प्रेषितः । आनीय कृत्वार्पमानीतो नृपतेः पुरतः कृतः ॥ १२८ ॥
दुराचारमिमं दृष्ट्वा सुवर्णखुरसंज्ञकम् । पप्रच्छ नृपतिर्विप्रांस्तत्त्वज्ञानी धर्मपाठकान् ॥ १२९ ॥
विहितं येन दुष्टेन कन्यया सह साहसम् । तस्मै को दीयते दण्डो ब्रूत शीघ्रं द्विजाः स्फुटम् ॥ १३० ॥
नृपेन्द्रवचनं श्रुत्वा वदन्तीमं पुनर्द्विजाः । अनेन च विधानेन नीयतामेष पञ्चताम् ॥ १३१ ॥
मातुलस्य यथा रक्त मूर्धा न पतति ध्रुवम् । तथायं मार्यतां भूप यतो हि मनुभाषितः ॥ १३२ ॥
ततो ब्राह्मणवाक्येन शुष्ककूपे श्मशानके । उत्तम्भितो नृपेणासौ गतः कालेन पञ्चताम् ॥ १३३ ॥
उत्तम्भितं समाकर्ण्य सुवर्णोपपदं खुरम् । पद्मश्रीः शोकसंतप्ता बभूव क्षणमात्रतः ॥ १३४ ॥
श्रीखण्डपुष्पताम्बूलधूपकस्तूरिकं तदा । पद्मश्रीर्निजमादाय ययौ तं प्रापयत्ययम् ॥ १३५ ॥
वस्त्रभूषणसंयुक्तं पुष्पदामस्वलंकृतम् । सत्कलेवरमालिङ्ग्य पद्मश्रीः प्रययौ गृहम् ॥ १३६ ॥
ततो विलोक्य भूपेन यो यथाविधिविभूषितम् । सत्कलेवरमानीतं भस्मतां कोपतः क्षणात् ॥ १३७ ॥
नृपः सर्वविधानेन नवमागस्य वालिका । तद्गतिपुस्तकं कृत्वा चिक्षेप सन्निवेशनम् ॥ १३८ ॥

---

1 क चारणयुग्मे　2 क कलभाषिणी.　3 क interchanges 117 and 118　4 क परम्.
5 क दृष्ट्वा.　6 क स्पष्टीतो　7 क कलेवर°　8 क कलेवरं.　9 क नवमागस.

मकरन्दसपुष्पमालिङ्ग्य तयोरम्भाऽतिमरीचया । मुक्तकण्ठं रुरोदासौ साधुमानसदुःखदम् ॥ १३९ ॥
दृष्ट्वा पद्मश्रियं तत्र रुदन्तीमतिविह्वलाम् । वत्सस तस्या दुःखी चिक्षेप सरितो ह्रदे ॥ १४० ॥
ततः पूर्वविधानेन ते ह्रदं प्राप्य दुःखिता । रोदिति स्म सखा तत्र तद्दुःखेपस्मारिणी ॥ १४१ ॥
मृतकालिङ्गने तत्र गृहे च प्रथमसङ्गमे । किं कदाचित् सुखं प्राप्तं किं दृष्टो वल्लभोऽनया ॥ १४२ ॥
यथा सुखं तथा नाथ मनस्संकल्पकल्पितम् । पद्मश्रिया न दृष्टो वा प्रियः सर्वसुखो भवः ॥ १४३ ॥
तथा बुद्धिविहीनानां बौद्धधर्ममकुर्वताम् । उपोपपद्यते ज्ञानं सत्त्वानां न कदाचन ॥ १४४ ॥
तपःसंयमचारित्रं मोक्षसंप्राप्तिकारणम् । विद्यतेऽन्यं यथा सर्वं त्वं विद्धि परशासने ॥ १४५ ॥
नास्ति किंचिद्ध्रुवं वस्तु स्वसिद्धान्ते प्रदर्शितम् । ज्ञानबुद्धेन बुद्धेन लोकत्रयप्रकाशिना ॥ १४६ ॥
सर्वं शून्यमिदं वस्तु प्रकारैः सकलैरपि । न श्रुतं सौगतं वाक्यं येन त्वं यासि मूढताम् ॥ १४७ ॥
इदं बौद्धं मतं शून्यं ज्ञानवद्भिर्न सेवितम् । कुहेतुभिः कुदृष्टान्तैरयो नीतो विमूढताम् ॥ १४८ ॥
बुद्धश्रियो निशम्येदं वाक्यं सांशयिकं तदा । वसु बभाषे संयमी संदेहवक्रमानसः ॥ १४९ ॥
यदि राजा प्रभाते मां समाहूतो वदति ध्रुवम् । त्वया चारणयुग्मं च किं दृष्टं वद सांप्रतम् ॥ १५० ॥
एवं भूपतिना पृष्टे सभामध्ये विपश्चिता । अस्माभिः किं प्रवक्तव्यं तद्गुरो ब्रूहि सांप्रतम् ॥ १५१ ॥
श्रुत्वा सधर्मियो वाक्यं सविहसमन्वितम् । भूयो जगाद बुद्धश्रीर्बौद्धशास्त्रान्तकोविदः ॥ १५२ ॥
परमोपासको भूत्वा विज्ञातपरमार्थकः । बुद्धधर्मं विहायेमं जिनधर्मं प्रकाशसे ॥ १५३ ॥
तेन सर्वप्रकारेण चारणयुगलं मया । न दृष्टं चाश्रुतं वाक्यं प्रवक्तव्यमिदं त्वया ॥ १५४ ॥
अपरं च त्वया साधो प्रभाते नृपमन्दिरम् । सन्मानदानलोभेन न गन्तव्यं यशस्विना ॥ १५५ ॥
श्रुत्वा तस्य वचो गत्वा भुक्त्वा मौनं विधाय च । संघश्रीर्मञ्चके तस्थौ बद्धलोचनपट्टकः ॥ १५६ ॥
ततोऽन्यदिवसे जाते प्रभाते रविसंगते । प्राभातिकीं क्रियां कृत्वा तस्थौ सदसि भूपतिः ॥ १५७ ॥
क्षणमेकं ततः स्थित्वा तत्रस्थान् पार्श्ववर्तिनः । सम्मानिति च राजेन्द्रो जगौ विस्मितमानसः ॥ १५८ ॥
मया मध्यार्धया संघश्रिया मत्पार्श्ववर्तिभिः । चारणानां युगं दृष्टं व्याख्यानं विदधत् परम् ॥ १५९ ॥
धर्मोत्थानं विधायाथैर्भव्यपापविनाशनम् । जगाम देवमार्गेण पवित्रं तन्मुनिर्युगः ॥ १६० ॥
श्रुत्वा नरेन्द्रसद्वाक्यं सुपविस्मयकारणम् । ऊचुर्नरेश्वरं हृष्टा महासामन्तकुञ्जराः ॥ १६१ ॥
मुनयश्चारणाभिख्या राजन्नम्बरगामिनः । विपुण्यैर्नृनमस्याभिर्न दृश्या धर्ममूर्तयः ॥ १६२ ॥
सभ्यानां वाक्यमाकर्ण्य चारणेक्षणमिष्टकाम् । जगाद भूपतिर्भूयस्तान् स्वीकर्तुमादरात् ॥ १६३ ॥
भवतां न प्रतीतिश्चेज्जायते मम भाषिते । ततः संघश्रियं पृष्ट्वा निश्चयं कुरुतात्र भोः ॥ १६४ ॥
एवमस्त्वेव चेदीश संघश्रीर्भवनादिह । आकार्यतां यथा याति सर्वसंतोषकारणम् ॥ १६५ ॥
राज्ञा तद्वचनप्रीत्या प्रेषिताः सादिता भटाः । तदन्तिकं परिप्राप्य ते वदन्ति यथायथम् ॥ १६६ ॥
नाथ किंचित्तरं कार्यमुत्थितं सचिव द्रुतम् । एहि भूपतिसामीप्यमतो भव सांप्रतम् ॥ १६७ ॥
तेषां वाक्यमुपश्रुत्य संघश्रीस्तान् जगौ पुनः । नाहं गन्तुं प्रशक्नोमि मम लोचनवेदना ॥ १६८ ॥
तद्वचस्तं पुनः सोऽपि भाषितोऽमीभिरादरात् । अवश्यमेव गन्तव्यं समीपं भूपतेस्त्वया ॥ १६९ ॥
तस्माद्वचनात् सोऽपि बद्धलोचनपट्टकः । राजान्तिकं परिप्राप्य यथासनमुपाविशत् ॥ १७० ॥
तं सुखोपविष्टं तं सवादं सदसे नृपः । उवाच प्रीतिचेतस्कः सामन्तान्तःपुरान्वितः ॥ १७१ ॥

1 घ ज सुखम्. 2 घ ज पदपीयः. 3 घ ज श्रीदत्तर्थं 4 घ यदपिनः. 5 घ ज [illegible].
6 घ ज [illegible] 7 घ [illegible].

मया त्वया महादेव्या प्रासादोपरि तिष्ठता । अपराह्णेऽम्बरे मया दृष्टं चारणयुग्मकम् ॥ १७२ ॥
श्रुत्वा नरेश्वरस्येदं वचनं शुभसंसदि । जगाम भूपतिं क्षिप्रं संभ्रमीभूतमानसः ॥ १७३ ॥
अहो सभ्या मया जातु न दृष्टं चारणं युगम् । अत्र काले कुतो दृष्टा चारणानामवस्थितिः ॥१७४॥
असत्यभाषणादस्य जल्पने पतिते भुवि । पृष्टो भूपोऽपि भूपेन सत्यं वद यथायथम् ॥ १७५ ॥
भूपोऽपि भाषितं तेन निपतद् भूपवाक्यतः । न दृष्टं तन्मया क्वापि चारणानां युगं मृषा ॥१७६॥
एवं निगदितेऽन्येन विष्टरात् पतितो भुवि । अथ पृष्टो नरेन्द्रेण सत्यं ब्रूहि यथायथम् ॥ १७७ ॥
निशम्य भूभुजो वाक्यं न दृष्टं वक्ति तन्मया । धरातो नरकं प्राप्य संभ्रमीदुःखमानसः ॥ १७८ ॥
तन्मुखेनोदयं प्राप्तं कर्म तस्य दुरात्मनः । व्यन्तरा अपि साहाय्यं कुर्वन्ति कलिताश्रयाः ॥ १७९ ॥
यावन्मात्रं तदायुष्यं तन्मात्रात् पाकमागतम् । असंभाव्यं[1] महापापमसत्याद् यत्र न किंचन ॥१८०॥
यथात्वमसत्यप्रभो मिथ्यात्वग्रहदूषितः । अलीकभाषणासक्तो जातोऽसौ दीर्घसंसृतिः ॥ १८१ ॥
तस्यान्वये सर्वे जातास्तास्तनयोऽभवन् । तदुपार्जितदोषेण मिथ्यात्वं हि मलीमसम् ॥ १८२ ॥
यद्वाऽन्तिमयमीक्ष्य बहवो नरकुञ्जराः । मिथ्यात्वविषमुत्सृज्य बभूवुः श्रावकास्तदा ॥ १८३ ॥
राज्यं दत्त्वाऽर्हद्दासाय सुताय नरकुञ्जरः[2] । अन्ते समाधिगुप्तस्य दीक्षां जग्राह भूपतिः ॥ १८४ ॥
जिनश्रीमतिर्देवी सर्वान्तःपुरसंगता । जिनदत्तार्यिकापार्श्वे गुरुं नत्वा दधौ तपः ॥ १८५ ॥
ततोऽनेकसमाः कृत्वा नानाविधतपांसि तु । जनकः स मुनिर्विज्ञानाप्यासितपरीषहः ॥ १८६ ॥
दिव्यनामपुरीसामस्थितगोवर्धपर्वते । जगाम निर्वृतिं धीरो गिरीन्द्रस्थिरमानसः ॥ १८७ ॥[3]
जिनश्रीप्रमुखास्तास्तार्यिकाः शुद्धचेतसः । नानातपो विधायोच्चैर्यथायोग्यं दिवं ययुः ॥ १८८ ॥

॥ [4]इति असत्यभाषणकथानकमिदम् ॥ ४६ ॥

*

४७ नागदत्तकथानकम् ।

यथावन्तीमहादेशे श्रीमदुज्जयिनी पुरी । तस्यामभून्महीपालो धर्मपालः प्रतापवान् ॥ १ ॥
धर्मश्रीस्तस्य भार्याऽभूत् धर्मतत्परमानसा । विनयाचारसंपन्ना कामिनीव मनोभुवः ॥ २ ॥
तस्यामभवन्महाश्रेष्ठी दत्तान्तः सागरादिकः । तद्भार्याऽपि सुभद्राऽऽख्या भद्रभावा प्रियंवदा ॥ ३ ॥
कान्तो नागकुमाराभो नागदत्तोऽभवत् सुतः । अनयो रूपसंपन्नः शुभजन्माभिलाषिणोः ॥ ४ ॥
तस्यामेव पुरि श्रेष्ठी धनधान्यसमन्वितः । समुद्रोपपदो दत्तो भार्या तस्यामसंगता ॥ ५ ॥
रूपयौवनसंपन्ना कन्दोद्दलकलोचना । अनयोः पद्मसदृक्का प्रियङ्गुश्रीः सुताऽभवत् ॥ ६ ॥
नागदत्तकुमाराय सुकुमाराय धीमते[5] । पितरौ दत्तवन्तौ तौ प्रियङ्गुश्रियमूर्जिताम् ॥ ७ ॥
प्रियङ्गुश्रियमालोक्य चिकीर्षामप्य भोगिनः । तदा मैथुनिकः क्षिप्रं नागसेनो दधौ रुषम् ॥ ८ ॥
अन्यदा नागदत्तोऽपि मन्दिरं जैनपुङ्गवम् । सोपवासः परिप्राप्य यत्र शुभात्म शुद्धधीः ॥ ९ ॥
जिनमायानुरक्तोऽयं जिनमन्दिरमायतः । तस्थौ प्रतिमया धीरो नागदत्तस्तमीमुखे ॥ १० ॥
प्रतिमास्थं विलोक्येमं जिनभक्तिपरायणम् । नागसेनो मुमोचाशु स्वहारं तत्पदोपरि ॥ ११ ॥
दृष्ट्वा हारमयं दिव्यं तत्पदोपरि दुष्टधीः । चौर चौरेति वाचा पुरान्तर्घोषयति द्रुतम् ॥ १२ ॥

---

1 पज असंभाव्यमसा 2 पज दिव्यनामपुर° 3 पप ज युग्मम्. 4 पज संपन्नीभूत°
5 प धीमते

घोषेषणास्ता जिनधर्मानुरागेण नेन च । किंवदन्ती समस्ता सा मनुजैर्विनिवेदिता ॥ १३ ॥
तस्याघोषणं श्रुत्वा सत्वहीनं नरपतिः । पत्तनाधिपतिः भूयो हुतमेनं समानय ॥ १४ ॥
भूपवाक्यं समाकर्ण्य खड्गानी घनसंनिभौ । नागदत्तमथाकोपेमां प्रतिज्ञां योगनिःस्पृहः ॥ १५ ॥
उपसर्गोऽस्मदीयोऽयं यदि क्षेमेण यास्यति । ममातः पाणिपात्रेण पारणं प्रभविष्यति ॥ १६ ॥
जिनधर्मानुरागस्थो धर्मध्यानपरायणः । कायोत्सर्गेण संतस्थे नागदत्तो गिरीन्द्रवत् ॥ १७ ॥
मन्त्रिणापि च सन्मार्गं नागदत्तस्य शोभनम् । अन्यायकारकार्थं सार्धं जगाद नृपतिः ॥ १८ ॥
यावद्यातं तं राजा कृपाणेन गले रुषा । तावद्धारलता जाता दिव्यमुक्ताफलान्विता ॥ १९ ॥
नभस्स्थैरमरैस्तूर्यैर्गन्धामोदितदिङ्मुखा । नागदत्तोपरि क्षिप्रं पुष्पवृष्टिः प्रपातिता ॥ २० ॥
अहो धर्मानुरागोऽयं परमो जिनशासने । विज्ञेयो नागदत्तस्य समुद्भूय प्रघोषणा ॥ २१ ॥
प्रत्यक्षमेतस्य प्रशान्ता बहवो नराः । श्रामण्यं जिनधर्मं च प्रतिपन्ना महाधियः ॥ २२ ॥
अनेन भूभुजा सार्धं ज्ञात्वा संसारफल्गुताम् । समीपे धर्मसेनस्य नागदत्तोऽग्रहीत् तपः ॥ २३ ॥

॥ इति श्रीजिनधर्मानुरागसहितनागदत्तकथानकमिदम् ॥ ४७ ॥

*

४८ वसुमित्रकथानकम् ।

विनीताविषयेऽयोध्यापुरे यशोधरो नृपः । विद्यते सुन्दरी चास्य सुवर्णश्री रतिप्रभा ॥ १ ॥
तस्यैव नृपतेः श्रेष्ठी वसुमित्रोऽभवद्धनी । अत्यन्तश्रावको विद्वान् कीर्तिव्याप्तदिगन्तरः ॥ २ ॥
जिनवरचरणद्वन्द्वसेवापद्प्रमत्त । प्रेमानुरागरक्तोऽसौ निर्मितो जिनशासने ॥ ३ ॥
अन्यदा वसुमित्रोऽसौ जिनभक्तिसमन्वितः । नक्तं प्रतिमया तस्थौ श्मशाने दृढमानसः ॥ ४ ॥
एवं स्थितस्य तस्यान्यो देवः कुटिलमानसः । उपसर्गं चकारेमं तत्परीक्षणकारणात् ॥ ५ ॥
वसुमरम्भीषणभुवनपान्थारिकं तदा । आदाय सवर्कं देवस्तस्य निरयो सकः ॥ ६ ॥
सम्यक्त्वरत्नसहितो निश्चलो धर्मशासने । प्रेमानुरागरक्तोऽयं प्रतिमास्थो विनिश्चितः ॥ ७ ॥
ततो देवोऽपि संतुष्टस्तस्मै प्रणिपात्य सः । आकाशगामिनीं विद्यां दत्त्वाऽस्मै अगमो दिवम् ॥ ८ ॥
तस्यातिशयमालोक्य केचिदीक्षां प्रपेदिरे । जैनं धर्मं तथाऽन्ये च शान्तिचिन्तनचेतसः ॥ ९ ॥

॥ इति श्रीप्रेमानुरागयुक्तवसुमित्रकथानकमिदम् ॥ ४८ ॥

*

४९. जिनदत्तादिकथानकम् ।

अथ सागरदत्ताख्यः सार्थवाहो महाधनः । वसति स्म गुणावासः श्रीमदुज्जयिनीपुरि ॥ १ ॥
द्वौ वणिजौ वणिग्व्यापारे श्रावकौ श्रुतिसागरौ । तस्सार्थं प्रस्थितौ गन्तुं परमं दक्षिणापथम् ॥ २ ॥
उत्तीर्य मध्ये गच्छद्भिस्ससत्त्वीवने । स सार्थो लुण्ठितश्चौरैः सघनो भीमविग्रहैः ॥ ३ ॥
जिनदत्तजिनदासौ द्वौ जिनशासनभाविनौ । जिनमार्गाचारसंपन्नौ धर्मचिन्तास्थचेतसौ ॥ ४ ॥
धर्मानुरागरक्तौ तौ मरणस्थानं द्विमेरुकम् । वने जगृहतुर्धीरौ स्वशरीरेऽपि निःस्पृहौ ॥ ५ ॥
तत्रैवान्यो द्विजो भद्रः सोमशर्मा महामतिः । तयोः पार्श्वे परिमाप्य धर्मं शुश्राव सौख्यदम् ॥ ६ ॥
पिपीलिकादिजीवानां क्षुधाद्युपसर्गकम् । सहित्वा पक्षमासान् सौधर्मेऽजनि यस्सौ सुरः ॥ ७ ॥

---

1 प घुणोघषणाः 2 फ्ल जिनधर्मानु॰ 3 फ्ल अन्यायकारिणं. 4 फ्ल °कथानकम्. 5 [सवर्कं].
6 प सवर्कं, but सवर्कं in the margin [सवर्कं]. 7 ज जिनदासाविति 8 प सुमन, क सुमन

ततोऽवतीर्य संजातः श्रेणिकस्य महात्मनः । अभयादिकुमारोऽसौ रूपसौभाग्यभाग्यवान् ॥ ८ ॥
ततो द्वावपि तौ तत्र समाधिं प्राप्य वाणिजौ । सौधर्मे धर्मसंभारादभूतां विबुधौ परौ ॥ ९ ॥

॥ इति श्रीधर्मानुरागसहितजिनदत्तवसुदत्तसोमशर्मकथानकमिदम् ॥ ४९ ॥

५० लकुचकथानकम् ।

अथावन्तीमहादेशे श्रीमदुज्जयिनी पुरी । धनवर्मोऽभवद् राजा धनधर्माऽस्य वल्लभा ॥ १ ॥
अत्यन्तप्रेमसंभारसंसक्तमनसोस्तयोः । बभूव लकुचः पुत्रो युवराजो विचक्षणः ॥ २ ॥
अन्यदा कालमेघेण म्लेच्छेनोपद्रुतं द्रुतम् । स्वदेशं लकुचः कोपात् स जगाम ससाधनः ॥ ३ ॥
प्राग्बद्ध्वा तं च वन्ये बहुशत्रुभयावहे । विवेश स्वपुरीं शीघ्रं लकुचः प्रीतमानसः ॥ ४ ॥
जनकस्य ततोऽनेन कालम्लेच्छे समर्पिते । जगाद नृपतिः पुत्र वरं ब्रूहि मनोगतम् ॥ ५ ॥
निशम्य जनकस्योक्तं लकुचो निजगादमुम् । कामचारं वरं देहि मह्यं जनक सांप्रतम् ॥ ६ ॥
पुत्रवाक्यं समाकर्ण्य जगाद जनकोऽपि तम् । दत्तस्तेऽभिमतस्तोक कामचारो वरो मया ॥ ७ ॥
लकुचोऽप्यन्तरे कामी तोषपूरितमानसः । लब्धकामवरस्त्वसौ श्रीमदुज्जयिनीपुरि ॥ ८ ॥
अन्यदा यौवनोन्मत्तां पङ्गुश्रेष्ठिवधूं पराम् । नागधर्माभिधां तत्र परासक्तां ददर्श सः ॥ ९ ॥
लकुचोऽपि तया सार्कं तिष्ठति प्रीतमानसः । तदानीं पङ्गुलश्रेष्ठी वैरमासाद्य तस्थिवान् ॥ १० ॥
एवं सति गते काले लकुचः क्रीडितुं मुदा । नागधर्मासमं यातो नन्दनोपमं वनम् ॥ ११ ॥
धर्मसेनमुनिं तत्र दृष्ट्वा नत्वा च तं पुनः । धर्मं श्रुत्वा विहायेमां लकुचोऽयं तपोऽग्रहीत् ॥ १२ ॥
विहृत्य देशमागत्य पूर्वोक्तां नगरीमसौ । महाकालवने तस्थौ कायोत्सर्गेण निश्चलः ॥ १३ ॥
अथासौ पङ्गुलश्रेष्ठी दृष्ट्वा तं लकुचं मुनिम् । पूर्ववैरानुबन्धेन प्रकोपारुणलोचनः ॥ १४ ॥
कायोत्सर्गस्थितस्यास्य श्रेष्ठी लोहशलाकिकाः । सर्वसन्धिषु दुष्टात्मा निचखान महामुनेः ॥ १५ ॥
धर्मानुरागयुक्तोऽसौ धर्मध्यानपरायणः । अरोषो मृत्युमासाद्य नाकलोकं ययौ क्षणात् ॥ १६ ॥

॥ इति धर्मानुरागयुक्तलकुचकथानकमिदम् ॥ ५० ॥

५१ पद्मरथनृपकथानकम् ।

विदेहाख्यमहादेशे मिथिला नगरी परा । यस्यां पद्मरथो राजा पद्मा भार्याऽस्य चाभवत् ॥ १ ॥
अन्यदा ध्वजमालाभी रुद्धाऽऽदित्यप्रभोत्करम् । अथ प्रजापतिः श्रीमान् सुधार्मं नगरं ययौ ॥ २ ॥
सुधर्माख्यगणेन्द्रस्य वदतो ज्ञानिनः कथाः । आक्षेपिण्यादिकाः दिव्याः शुश्रुवांश्च नृपतिः ॥ ३ ॥
धर्मं श्रुत्वा जिनेनोक्तं सर्वसत्त्वसुखावहम् । सम्यक्त्वादिकमादाय पप्रच्छेममिदं नृपः ॥ ४ ॥
लोकत्रयेऽपि किं नाथ विद्यतेऽन्यो भवत्समः । ब्रुवाणो धर्ममीदृक्षं भव्यजन्तुहितप्रदम् ॥ ५ ॥
श्रुत्वा पद्मरथ वाक्यं सुधर्ममुनिरब्रवीत् । अमुं विस्मयचेतस्कं सोत्कण्टकिताङ्गकम् ॥ ६ ॥
अङ्गाख्यविषयेऽस्तीह चम्पाऽऽख्या नगरी श्रुता । यस्यां त्रिलोकपूजार्हो वासुपूज्यो जिनेश्वरः ॥ ७ ॥
त्रिलोकेश्वरीभूतसरणे समवायिके । पुरन्दरघनस्तुत्यस्त्रिलोकसदसि स्थितः ॥ ८ ॥

---

1 प ...मी पुत्र 2 प has an additional reading विहर्त 3 प आक्षेपिण्या दिव्या
4 प धर्मप्रियकार- 5 फ धरणीभूत- ज धरणीभूत

एकयोजनसन्मार्गं प्रयान्त्या हि धावन्त्यतः । मारत्योऽकृष्टो नूनं भूप ह्यवश्यमेव योजनम् ॥ ९ ॥
सम्यग्भवभयहारिण्या मितया हितयाऽङ्गिनाम्[1] । अर्धमागधया भाष्या धर्मं कथयति स्म च[2] ॥ १० ॥
सुधर्मवचनं श्रुत्वा भक्तिरक्ततनूरुह[3] । उवाचेदं महाभक्त्या भोगनिःस्पृहमानसः ॥ ११ ॥
गुणरत्नोदधिः सर्वो युष्माकमधिको यदि । प्रत्यक्षोऽवश्यमेवाशु वासुपूज्यजिनो मया ॥ १२ ॥
सुधर्ममुनिमानम्य भक्तिरागरतो जिने । भोगोपभोगकं हित्वा निर्जगाम पुराच्च[4] ॥ १३ ॥
गच्छत पथि भूपस्य विघ्नानरसुरेण च । पुरवाहो धनं भूर्दं सिंहरूपं महाभयम् ॥ १४ ॥
म्लेच्छजनो च घनं भीमं समुद्रो मारसंकुलः । विकुर्वणाकृतं सर्वमेतत्तस्य पुरो ह्यहो ॥ १५ ॥
हित्वोपद्रवमीदृक्षं द्वारं तूर्णं कलुषसनम् । प्रातिहार्यं च सम्प्राप्तवान् वासुपूज्यजिनान्तिकम् ॥ १६ ॥
अनित्यतां परिप्राप्य शरीरादेर्नराधिपः । वासुपूज्यजिनस्यान्ते प्रव्रज्याम महामतिः ॥ १७ ॥
रत्नत्रयपरमासाद्य तथा धर्मरथो मुनिः । महागणधरो जातो जिनभक्त्या विशुद्धधीः ॥ १८ ॥

॥ इति श्रीजिनभक्तिसहितधर्मरथनृपगणधरप्रासिकथा ॥ ५१ ॥

*

५२ ब्रह्मदत्तचक्रवर्तिकथानकम् ।

काम्पिल्यनगरे रम्ये राजा ब्रह्मरथोऽभवत् । रामिल्लाऽस्य महादेवी रूपयौवनशालिनी ॥ १ ॥
तयोः पुत्रः कलाधारो निखिलक्षत्रियनायकः । ब्रह्मदत्तोऽभवच्चक्री नेमिपार्श्वजिनान्तरे ॥ २ ॥
अन्यदाऽयं क्षुधाक्रान्तो ब्रह्मदत्तोऽत्रलाम्छनः[5] । भोक्तुं महानसे विष्टः साधितारातिमण्डलः ॥ ३ ॥
पायसं सूपकारेण जयसेनेन शोभनम् । अतीवोष्णं वितीर्णं तद् ब्रह्मदत्तस्य भाजने ॥ ४ ॥
पायसेन पुनस्तेन रुष्टश्चक्री प्रक्षेपतः । तदस्य मस्तके क्षिप्तं मृत्युवाऽयं मृतः क्षणात् ॥ ५ ॥
तत्र क्षारसमुद्रान्तः रत्नद्वीपे मनोहरे । जातोऽयं व्यन्तरो देवो रूपराजितविग्रहः ॥ ६ ॥
ज्ञात्वा पूर्वभवं देवो ब्रह्मदत्तनिपातितम् । क्रुद्धो भावं[6] मनुष्यात्मा सतापसवेषधरः ॥ ७ ॥
कदलीनालिकेरादिफलानि विविधानि सः । आदाय तानि तं द्रष्टुं परिव्राजकवेषभाक् ॥ ८ ॥
दृष्ट्वा तानि फलान्यद्भुतैर्भूपस्त्विग्धोपसंगतः । जिनधर्माचारसंपन्नो जगादेदं पुरःस्थितम् ॥ ९ ॥
तवेदृशानि पक्वानि नानास्वादयुतान्यलम् । फलान्येतानि किं सन्ति न वा ब्रूहि यथायथम् ॥ १० ॥
ब्रह्मदत्तवचः श्रुत्वा तपस्वी वदति स्म तम् । मदाश्रमे ममैतानि सन्ति राजन्ननेकशः ॥ ११ ॥
ब्रह्मदत्तनृपं नीत्वा वार्धिमध्ये फलार्थिनम् । उपसर्गं चकारासौ देवः क्रुद्धमानसः ॥ १२ ॥
उपसर्गमिमं ज्ञात्वा प्रत्याख्यानं विधाय च । सावद्यं नृपस्तत्र दध्यौ पञ्चनमस्कृतिम् ॥ १३ ॥
दृष्ट्वाऽपि तं पुनः पञ्चनमस्कारपरायणम् । अशक्तः पश्यतो भेत्तुं स देवोऽपि बलवानपि ॥ १४ ॥
अशक्नुवन्निमं हन्तुं स देवोऽकलधोषनः[7] । जगाद निष्ठुरं वाक्यं धीरिमामसि भीतिदम् ॥ १५ ॥
अहं स सूपकारोऽस्मि मस्तके यस्त्वया हतः । पायसेनोष्णकेनाशु गतः कालेन पञ्चताम् ॥ १६ ॥
रे रे पाप दुराचार नीतिहीन नराधम । करोमि हिंसनं तेन तवाद्यैव विसन्ध्ययम् ॥ १७ ॥
अथवाऽस्ति तवोपायो जीवितस्य नराधिप । अनेन विधिना नूनं यत्समायेन चारुणा ॥ १८ ॥
भूम्यां यदि नमस्कारं लिखित्वा चरणेन चेत् । मार्ष्टि[8] ते जीवितोपायो नान्यथा गदितं मया ॥ १९ ॥
लिखित्वाऽनेन पञ्चनमस्कारो पदाहतः । तदानीं देववाक्येन व्यापादितोपसर्जितः[9] ॥ २० ॥

---

1 क हितदाङ्गिनाम्, 2 च ना 3 पाठ अनुरागम्, 4 पाठ पुरम 5 पाठ त्रपारिलावण्य च भा त्र. 6 कज्ज दुष्टात्मा च आकाल 8 [मर्दि] 9 पाठ जीवितोपाय

चक्री पञ्चनमस्कारं यावन्मर्दयति द्रुतम् । पादेन तावदभ्येत्य तं ममार सुरोऽप्यसौ ॥ २१ ॥
ब्रह्मदत्तो मृतः सन् स सप्तमं नरकं ययौ । हीनसत्त्वं दुराचारं न हि कोऽपि विमुञ्चति ॥ २२ ॥
सामन्तमन्त्रिणो मुख्या अन्तःपुरमहत्तराः । चिन्तयन्तो नमस्कारप्रभावं भक्तितत्पराः ॥ २३ ॥
उपसर्गं सहित्वाऽमुं तदानीं देवनिर्मितम् । याम्यां गतिं गतश्चक्री नमस्कारविलोपनात् ॥ २४ ॥
सर्वैरनिमर्दं कृत्वा तापसामरदुष्टधीः । नाकलोकं ययौ शीघ्रं मन्दिरस्थिरमानसः ॥ २५ ॥[1]

॥ इति श्रीपञ्चनमस्कारप्रभावब्रह्मदत्तचक्रवर्तिकथानकमिदम् ॥ ५२ ॥

*

५३ जिनदासकथानकम् ।

अत्रास्ति पाटलीपुत्रे जिनदत्तः पुरोत्तमे । तस्योत्तमा प्रिया भार्या जिनदासी कलस्वना ॥ १ ॥
तयोः पुत्रोऽभवद्धन्यो धनकोटीश्वरो महान् । श्रावको जिनदासाख्यः कीर्तिव्याप्तदिगाननः ॥ २ ॥
अन्यदा जिनदासोऽसौ श्रावकव्रतभूषितः[2] । सम्यग्दर्शनसंपन्नः स्वर्णद्वीपं ययौ मुदा ॥ ३ ॥
योजनानां शतं चैकं साधिकं प्राप्य वारिधौ । बोहित्थं[3] द्रव्यसंपूर्णं जिनदासो ययौ क्षणात् ॥४॥
ततो जलधिमध्ये च जलकल्लोलसंकुले । [4]कालिकाख्यसुरो गर्जन् सरोषं निजगादिमम् ॥ ५ ॥
जीवितं यदि युष्माकं वल्लभं नितरां भवेत् । जिनस्य शासनं नास्ति वदतैवं वचो मृषा ॥ ६ ॥
अभिधत्त न चेदेवं जिनशासनभाविताः । यदा सर्वजनाभ्यर्णं खण्डोऽयं क्रियते मया ॥ ७ ॥
तदा लोकसमूहानां भयव्याकुलचेतसाम् । क्षिपेऽहं पोतमाक्रान्तानि वहमान्यपि संततम् ॥ ८ ॥
प्रकृतीनां गुणान् सारान् विदन्तो वणिजोऽखिलाः । ते कृपाणविनिर्माणा प्रपश्यन्ति भयातुराः ॥९॥
निशम्य तद्वचस्तत्र जिनशासनभावितः । जिनदासोऽवदत् तांश्च तत्रत्यांश्च कृपामयी ॥ १० ॥
उत्तमं सर्वधर्माणां सम्यक्त्वं विधुनिर्मलम् । देववाक्येन संत्यज्य जीवितार्थी मतिभ्रमात् ॥ ११ ॥
मर्दितं स्म यः स्वपादेन महामन्त्रं पुरावकम् । किं न पश्यत चक्रेशं ब्रह्मदत्तमधोगतम् ॥ १२ ॥[5]
जिनदासवचः श्रुत्वा वणिजो धीरचेतसः । प्रत्याख्यानाहितस्वान्ता जिनशासनभाविताः ॥ १३ ॥
सम्यक्त्वाहितचेतस्का मस्तकन्यस्तपाणयः । प्रणम्येशं महावीरं निगदन्ति परस्परम् ॥ १४ ॥
पोतं भवतु चान्यत्र राक्षसश्चूर्णयत्वरम् । नापवादं जिनेन्द्राणां विधास्यामो महाश्रियाम् ॥ १५ ॥
नत्वेति तं महावीरं संस्थिताः पुटपाणिभिः । मुमुचुस्ते प्रसूनानि जिनपादाम्बुजालिभिः ॥ १६ ॥
उत्पातितकुरोर्पातं मानूद्यसुपिञ्जरम् । सौरेन्द्रमिरसुमे देवचक्रं प्रपश्यति ॥ १७ ॥
स एको मकुटेनान्येन निहतो मददर्पकः । छिन्नरश्मिरिवेन्दुः स खात् पतितो वडवानले ॥ १८ ॥
धरते तस्य पोतं धावति भीः कराम्बुजा । पोतो जलधितीरं संप्राप्तो विघ्नतो विना ॥ १९ ॥
ततस्ते प्रतिमासाद्य प्रातिहार्यं च देवतः । सुखेन पाटलीपुत्रं स्वपुरं प्रापुरुत्तमम् ॥ २० ॥
दृष्ट्वाऽतिशयमीदृक्षं बहवो नरकुञ्जराः । सम्यक्त्वं संयमं प्रापुस्तथा भव्यसत्त्वाः परे ॥ २१ ॥
जिनदासोऽवधिज्ञानलोचनं वीक्ष्य योगिनम् । उपसर्गविधानं च पप्रच्छ विनयान्वितः ॥ २२ ॥
जिनदासोदितं श्रुत्वा योगी धर्मविस्तरात् । जगादाख्यानकं चास्य वैरसंबन्धकारणम् ॥ २३ ॥

॥ इति श्रीसम्यक्त्वसमन्वितजिनदासकथानकम्[6] ॥ ५३ ॥

*

1 प युग्मम्, फज युगलम्. 2 फज श्रावकव्रतभूषितः 3 प बोहित्थेऽप्योत्... 4 फज ...
5 पफज त्रिकम्. 6 [युगलम्]. 7 पफज युग्मम्. 8 [illegible]

५४ रुद्रदत्तप्रियाप्रबोधकथानकम् ।

अस्त्यदेशैकदेशेऽस्ति तोमिमं गिरिपार्श्वगम् । धनधान्यसुखावास नगरं गुरुखेटकम् ॥ १ ॥
जिनदत्तोऽभवत्तत्र श्रावको जिनपूजकः । जिनदत्ताऽस्य सत्कान्ता जिनधर्मपरायणा ॥ २ ॥
तयोः सुता कलाधारा जिनशासनभाविता । बभूव विनयोपेता जिनोपपदिका मतिः ॥ ३ ॥
तस्मिन्नेव पुरे श्रेष्ठी नागदत्तोऽभवद्धनी । रूपयौवनसंपन्ना नागदत्ताऽस्य गेहिनी ॥ ४ ॥
अनयोर्नन्दनो रूपी नन्दिताशेषबान्धवः । रुद्रदत्तोऽभवद् गुण्यो रुद्रधर्मपरायणः ॥ ५ ॥
अन्यदा नागदत्तोऽसौ रुद्रदत्तनिमित्तकम् । जिनादिमतिकां कन्यां जिनदत्तं प्रयाचते ॥ ६ ॥
नागदत्तवचः श्रुत्वा जिनदत्तो जगावमुम् । अहं जैनेश्वरोऽत्यन्तं त्वं च माहेश्वरः परः ॥ ७ ॥
श्रावकाणां हि संबन्धो घटते न मनागपि । माहेश्वरजने सार्धं विपरीतव्रतात्मभिः ॥ ८ ॥
जैनदत्तं वचः श्रुत्वा रुद्रदत्तोऽपि तं जगौ । एक एव परं धर्मो न विशेषोऽस्य विद्यते ॥ ९ ॥
जिनधर्मं प्रपत्स्यामि मातुलाहमपि ध्रुवम् । एवमुक्त्वा जिनावासं रुद्रदत्तो ययौ तदा ॥ १० ॥
मुनेः समाधिगुप्तस्य समीपं प्राप्य लोभतः । हित्वा माहेश्वरं धर्मं जिनधर्ममसौ श्रितः ॥ ११ ॥
रुद्रदत्तमिमं ज्ञात्वा जिनधर्मपरायणम् । जिनदत्तो ददावस्मै तदा जिनमतिं सुताम् ॥ १२ ॥
परिणीय तकां कन्यां रुद्रदत्तोऽतिवञ्चकः । जिनधर्मं विहायाशु शिवधर्मं गृहीतवान् ॥ १३ ॥
अथ प्रस्तावमासाद्य रुद्रदत्तः सगोचरम् । भुक्त्वा सुखोपविष्टां तां जगौ जिनमतिं मुदा ॥ १४ ॥
सर्वदुःखान्तकृद्दीक्षा विशुद्धा दोषवर्जिता । पशुभ्योऽपि हिता तन्वि रुद्रेण परिभाषिता ॥ १५ ॥
नाकर्मकल्मषतो दीक्षा शैवी सा परिहन्यते । हिताय प्रोदिता पुंसामाह गौरीसखो हरः ॥ १६ ॥

तथा चोक्तम्—

पापक्षयकरी दीक्षा निरवद्या सुनिर्मला ।
पशूनां तु हितार्थाय महादेवेन भाषिता[1] ॥ १७ ॥

न पापकर्मशतेनापि शिवदीक्षा विहन्यते । गुरुप्रोद्भुवां पुंसामित्याह परमेश्वरः ॥ १८ ॥
जिनधर्मं विहायेमं विशिष्टमनवर्जितम् । शैवं धर्मं गृहाण त्वं मुक्तिसौख्यविधायकम् ॥ १९ ॥
भर्तृवाक्यं निशम्योचे तदा जिनमतिर्वचम् । जिनधर्मं प्रिय त्यक्तुं मनो मे न विकल्पते ॥ २० ॥
किं पुनस्त्वं विहायेमं शिवधर्मं मनःप्रियम् । जिनधर्मं मनस्युच्चैः स्थिरं कुरु बुधप्रियम् ॥ २१ ॥
भार्यावचनमाकर्ण्य रुद्रदत्तो जगाविमाम्[2] । शिवदीक्षां विहायान्यः शैवो धर्मः कथं परः ॥ २२ ॥
भूयोऽपि जिनमत्याऽभ्यधायि दयितस्तदा । कुरु त्वं शैवधर्मं तु जिनधर्मं करोम्यहम् ॥ २३ ॥
रमणीवाक्यमाकर्ण्य रमणो निजगावमुम् । जिनधर्ममहं भद्रे न विधातुं ददामि ते ॥ २४ ॥
धर्ममवधमाऽन्योन्यं कुर्वाणिकलहेन च । कालधारणकेनापि याति कालस्तयोरयम् ॥ २५ ॥
रुद्रदत्तः प्रियां प्राह भूयोऽपि पुरतः स्थिताम् । जिनधर्माचारसंपन्नां जिनशासनभावितम् ॥ २६ ॥
पश्यामि यदि गच्छन्ती कदाचिज्जिनमन्दिरम् । मुनिभ्यो ददती भिक्षां गृहान्निःसारयाम्यहम्[3] ॥ २७ ॥
रुद्रदेवकुलं गत्वा शैवेभ्यो यदि भक्तितः । भिक्षां दत्से ततः कान्ते भवती दत्तपात्रका ॥ २८ ॥
रुद्रदत्तवचः श्रुत्वा जगौ जिनमतिर्ध्रुवम् । कारयसि भामेतद्यदि नाथ मराम्यहम् ॥ २९ ॥
भवता गच्छ मा नाथ रुद्रदेवकुलं क्वचित् । जिनार्चां वन्दितुं नूनं न यामि जिनमन्दिरम् ॥ ३० ॥
विधाय द्वारि क्षिप्रं प्रतिज्ञां ध्यम्यगोचराम् । भाग्यवशं प्रकुर्वाणो तस्यास्तुर्नित्यमन्दिरम् ॥ ३१ ॥

---

1 प भाषिता 2 फ जगाविमम्, 3 प °म्यहम्, 4 फ [illegible]

अस्ति पूर्वदिशो मार्गेऽरण्यानी तरुसंकुला । [1]म्लेच्छनाहलसंकीर्णा व्याघ्रसिंहादिसेविता ॥ ३२ ॥
अन्यदाऽऽगत्य तद्देशाद् भिल्लसंघेन वेगतः । अग्निना ज्वालितं सर्वं नगरं गुडखेटकम् ॥ ३३ ॥
ततोऽग्निना प्रदीप्तेऽस्मिन् नगरे सकले जनः । पुत्रदारादिभिः सार्धं जगामाकुलतां पराम् ॥ ३४ ॥
चतुर्ष्वपि च पार्श्वेषु ज्वालोद्योतितपुष्करः । रुद्रदत्तगृहाभ्यासं संप्राप्तोऽग्निर्भयंकरतराम् ॥ ३५ ॥
अत्रान्तरे परिप्राप्य रुद्रदत्तं हरप्रियम् । जगौ जिनमतिः कान्तं विकसन्मुखपङ्कजा ॥ ३६ ॥
शिवधर्मस्तव स्वामिन्निष्टान्तं गदितोऽपि मे । तथाऽपि न स्थितश्चित्ते मदीये जिनरञ्जिते ॥ ३७ ॥
मयाऽपि निगदन्त्या हि जिनधर्मं परं प्रभो । तथाऽप्ययं बुधश्रीनिजननो रुचितो न च ॥ ३८ ॥
उपसर्गोऽद्य स्वामिन् यो देवो रक्षति स्फुटम् । अस्मानस्माद्ध सोऽयं देवः शरणमावयोः ॥ ३९ ॥[2]
जिनमत्या वचः श्रुत्वा रुद्रदत्तोऽपि तां जगौ । भद्रे जनमनोहारि शोभनं गदितं त्वया ॥ ४० ॥
गौरीशस्य महादेवं महावृषभवाहनम् । विहाय देहिनामन्यः परित्राणं करोति कः ॥ ४१ ॥
अथवाऽन्यस्य देवस्य जगदानन्ददायिनः । प्रवर्तन्ते वशे किं वा भुवनानि चतुर्दश ॥ ४२ ॥
भूतग्रामः समस्तोऽपि देवतान्तिययाः वशे । वर्तन्ते यस्य देवस्य धर्म्यन्ते तद्गुणाः कथम् ॥ ४३ ॥
निशम्य तद्वचो भूयस्तदा जिनमतिः प्रियम् । जगाद विभ्रमोपेतं रुद्रभक्तिपरायणम् ॥ ४४ ॥
भवदेवस्य माहात्म्यं विद्यते यदि किंचन । अग्निविध्यापनं कान्त स देवो विदधातु रम् ॥ ४५ ॥
समाकर्ण्य वाक्यमाकर्ण्य रुद्रदत्तो जगाद ताम् । जिनभक्तिसमासंगतोपकण्टकिताङ्गकम्[3] ॥ ४६ ॥
हरभक्तिसमेतस्य कृतकृत्यस्य सांप्रतम् । मम किं वह्निना गम्यं नश्वरेण नितम्बिनि ॥ ४७ ॥
एवमुक्त्वा प्रियां सोऽपि दधिदूर्वादिसंभृतम् । अर्घ्यपात्रं समादाय समुत्तस्थौ कृतध्वनिः ॥ ४८ ॥
रुद्रदेवनमस्कारं रुद्रदत्तो विधाय च । उत्तराभिमुखो भूत्वा मस्तकेऽर्घ्यं चकार सः ॥ ४९ ॥
भो भो शृणुत मे वाक्यं लोकपालाः मनोहरम् । लोकपालनसंयुक्तो रुद्रदत्तो जगौ तदा ॥ ५० ॥
यदि माहेश्वरो धर्मो देवो वा परमः शिवः । तस्येच्छया प्रवर्तेत जगदेतत् हृदि स्थितम् ॥ ५१ ॥
यदि निर्वाणदीक्षा स्यान्निर्मलाऽपवर्गिता[4] । स देवो रक्षतान्मां च सर्वं लोकं सबान्धवम् ॥ ५२ ॥
महादेवस्य सद्धाम गृह्णतोऽप्यस्य सत्वरम् । द्विगुणस्त्रिगुणो वाऽग्निर्वर्धतेऽसौ तथाऽधिकम्[5] ॥ ५३ ॥
ततो जिनमतिः प्राह रुद्रदत्तं भयाकुलम् । भूयोऽप्यन्यस्य देवस्य स्मर त्वं सुसमाहितः ॥ ५४ ॥
भवस्कन्दहरीनमिरविचन्द्रवृहस्पतीन् । भार्यां गौरीं च संदध्यौ रमणीवचनादसौ ॥ ५५ ॥
यावत्तथापि वह्निर्न ज्वालाभासितपुष्कलः । क्षयमाप्तसंदीप्तो रुद्रदत्तो जगौ प्रियाम् ॥ ५६ ॥
प्रिये लौकिकदेवानां मध्ये देवो न कोऽपि सः । योऽस्मान् स्मरणभूयो वा शिखिनः परिरक्षति ॥ ५७ ॥
सांप्रतं जिननाथं प्राप घोतिताशाय सुन्दरि । अर्घ्यं देहि वयं येन भवामो निरुपद्रवाः ॥ ५८ ॥
श्रुत्वा तद्वचनं तस्य मद्गुणादिकस्य सा । प्रत्याख्यानं विधायाशु द्विविधं निजगौ पुनः ॥ ५९ ॥
केवलज्ञानसंपन्ना वीतरागा गतापदः । रागमोहपरित्यक्ता यथाऽर्हन्तो भवन्त्यमी ॥ ६० ॥
अहिंसालक्षणो धर्मः सर्वसत्त्वदयापरः । लोकत्रयसुखाधारस्तद्गुणो विद्यते यदि ॥ ६१ ॥
यदि निर्वाणदीक्षा स्यात् संसारोच्छेदकारिणी । ततो मां पतिपुत्रादिसंयुक्तां रक्षतु द्रुतम् ॥ ६२ ॥
एवमुक्त्वा कलध्याननादिताशेषभूतला । अर्घ्यं दत्त्वा जिनायासौ कायोत्सर्गेण तस्थुषी ॥ ६३ ॥
कायोत्सर्गेण यावत्सा तिष्ठति स्थिरमानसा । [11]तावदग्निर्गतः क्वापि म्लेच्छसंघोऽपि तद्भयात् ॥ ६४ ॥

---

1 प म्लेच्छनाहर. 2 फज हरिप्रियम्. 3 पफ भगुणकम्, ज भगुणम. 4 फज °निर्वाणदीक्षया. 5 फ °वर्गिते. 6 फ रक्षतान्मां च. 7 प वह्निः गुणम् फज परश्चकाम. 8 [°भ्रमणभूतो]. 9 पफज विभ्रमम्. 10 पफ भगुणकम् ज भगुणम्. 11 फज तावदग्निरि°

धूमध्वजस दीप्तस्य ज्वलतस्तन्मयाचिष । उपसर्गो गतः क्वापि जनानां भीतचेतसाम् ॥ ६५ ॥
तं सदाऽतिशयं दृष्ट्वा रुद्रदत्तः प्रशान्तधीः । शिवधर्मं विहायार्यं जिनधर्मं गृहीतवान् ॥ ६६ ॥
केचिन्निर्ग्रन्थतां प्राप्य चान्येऽपि बहवो नराः । सम्यक्त्वादिकमासाद्य बभूवुः श्रावकाः परे ॥६७॥

॥ इति श्रीरुद्रदत्तप्रियाप्रबोधसम्यक्त्वयुक्तिकथानकमिदम् ॥५४॥

*

५५ श्रेणिककथानकम् ।

अथास्ति मगधे देशे पुरं राजगृहं परम् । तत्रोपश्रेणिको राजा तद्भार्या सुप्रभा प्रभा ॥ १ ॥
तयोरन्योन्यसंप्रीतिविश्रब्धमनसोरभूत् । तनयः श्रेणिको नाम सम्यक्त्वकृतभूषणः ॥ २ ॥
अथ प्रत्यन्तवासी च नागधर्मोऽभवन्नृपः । भृत्यः श्रीश्रेणिकस्यार्थं निर्जितारातिसंततेः ॥ ३ ॥
शुक्लशिरो महारूपो दुष्टचेष्टोऽस्य भूपतेः । पूर्ववैरानुबन्धेन चात्मार्थं प्रेषितोऽमुना ॥ ४ ॥
दृष्ट्वाऽमुं वाजिनं दिव्यं सशिलप्रमलक्षितम् । श्रीश्रेणिकोऽपिरूढोऽयं चेतुकल्याणमानसः ॥ ५ ॥
ततस्तेन तुरङ्गेण भूपतिः कन्दुकस्थिते । नीतो महाटवीं वेगात् सिंहव्याघ्रादिसेवितम् ॥ ६ ॥
यमदण्डोऽभवत्तत्र पल्लीनाथो महाबलः । तद्भार्या रूपसंपन्ना विद्युद्वेगमतिः श्रुता ॥ ७ ॥
योषितां तिलकीभूता कलाविज्ञानकोविदा । तिलकवतीमती पुत्री समुत्पन्नाऽनयोः परा ॥ ८ ॥
तदा श्रीश्रेणिकं भूपं हरिशृङ्गस्य वञ्चितम् । ददर्श पल्लिमायातं यमदण्डो यमोपमः ॥ ९ ॥
स्नानाशनादिपानाद्यैस्तथाऽपरैरनेककैः । कृत्वा श्रमं नरेन्द्रस्य पराऽन्ते प्रयत्नेन च ॥ १० ॥
अनयाऽन्यसमाऽन्येन वितीर्णोऽस्य स्वकन्यका । यो भविष्यति पुत्रोऽस्यास्तस्य राज्यसमागमः ॥११॥
श्रीश्रेणिकनरेन्द्रेण स्वप्रयोजनमिच्छता । परिणीता च तत्कन्या वचमात्रनिसृनैः ॥ १२ ॥
तिलकवतीमतीं कन्यां परिणीय विधानतः । केतुध्वजवितानाढ्यं विवेश स्वपुरं नृपः ॥ १३ ॥
रूपयौवनसंपन्नः प्रतापाक्रान्तशात्रवः । कालेन पुत्रस्तस्यामिलातपुत्रोऽभवत् ध्रुवः ॥ १४ ॥
यौवनस्थमिमं दृष्ट्वा पुत्रं श्रीश्रेणिको नृपः । भद्रोऽन्यं कस्य भावीदं दध्यौ मनसि धीरधीः ॥ १५ ॥
चिन्तयित्वा चिरं राजा प्राप्य नैमित्तिकान्तिकम् । पप्रच्छेम सुतः को वा मद्राज्ये प्रभविष्यति ॥१६॥
श्रीश्रेणिकवचः श्रुत्वा संदेहेन समन्वितम् । नैमित्तिकः पुनः प्राह भूपतिं धीतसंशयः ॥ १७ ॥
यः सिंहासनमारूढः भम्भेरीं प्रताडयेत् । दत्तं पायसं श्वभ्यः स्वयं भुङ्क्ते स राज्यभाक् ॥१८॥
नैमित्तिकवचः श्रुत्वा तत्परीक्षार्थमादरात् । नैमित्तिकोदितं सर्वं कारयामास भूपतिः ॥ १९ ॥
श्रेणिकः शुभनक्षत्रे दिने वारे च शोभने । सिंहासनमितः साधु तद्यानी धनकाश्रया ॥ २० ॥
रूप्याणि तत्र दिव्यानि वस्त्राणि विविधानि च । निधाय भूपतिर्मन्दं राजपुत्रान् बभाष सः ॥२१॥
यद्यन्मनोगतं वस्तु तत्तद् गृह्णातु शोभनम् । कुमारैरुचितं स्वस्य गृहीतं सकलं तदा ॥ २२ ॥
भेरीं प्रताड्य सत्साय श्रेणिको हरिविष्टरे । दत्त्वा च पायसं श्वभ्यो बुभुजे तत्स्वयं मुदा ॥ २३ ॥
भूयोऽपि मण्डलं मुक्ता भङ्गुरा सिंहविक्रमाः । कपित्थाक्षा वृषादन्य मुक्ताः पयस्ततास्तया ॥ २४ ॥
श्रेणिको मण्डलान् दृष्ट्वा स्वसम्मुखसमागतान् । भेरीं प्रताड्य तेभ्यः पायसं संप्रयच्छति ॥ २५ ॥
धीरो महीनगम्भीरो नगराजस्थिरो महान् । कुमारस्तस्सुमः पश्चात् पायसं परिभुक्तवान् ॥ २६ ॥
श्रीश्रेणिको विलोक्येमं श्रेणिकं प्रीतमानसः । दध्यौ विस्मितचेतस्कस्तथ्यं नैमित्तिकेरितम् ॥२७॥

1 प मगधेविषये 2 प परिपूर्णम्, 3 फज भणपातौ 4 फज छन्न 5 फ धीमाव्यर्थं. 6 प विधाय 7 प कदम्बकम्भागो

अथ राज्यधुरां गुर्वीं धारयिष्यति मे सुतः । कलाविज्ञानसंपन्नः प्रतापाक्रान्तशात्रवः ॥ २८ ॥
अथ मण्डलकोऽस्सिष्टमहाघोषोदितमानसः । एतस्य भोजनं वासो यो ददाति स दोषभाक् ॥ २९ ॥
विधाय घोषणामेवं नगरे विषयेऽपि च । श्रेणिको मनुजा शीघ्रं शत्रुभीतैरपाकृतः[1] ॥ ३० ॥
तदा मध्याह्नवेलायां क्षुधातपकदर्थितः । एकाकी ब्राह्मणावासं नन्दग्रामं जगाम सः ॥ ३१ ॥
ब्राह्मणैः स पुनस्तस्माद्धाटितो नृपभीतितः । पारिव्राजं मठं तत्र विवेशाविदितः परैः ॥ ३२ ॥
विधाय भोजनं तस्मै परिव्राजकयोगिना । तद्धर्मनिश्चितस्वान्तः श्रेणिको विहितव्रतः ॥ ३३ ॥
ततोऽपि निर्गतः शीघ्रं दक्षिणापथमण्डले । द्रविडाख्यमहादेशं प्राप्तोऽज्ञातोऽयं महामनाः ॥ ३४ ॥
एवं हि गच्छतस्तस्य नगराद्विक्रमादरात् । इदमन्यच्च सञ्जातं प्रकटं क्षितिपालिना ॥ ३५ ॥
महाद्रविडदेशेऽस्ति काञ्चीनगरमुत्तमम् । वसुपालो नृपस्तस्य भार्या वसुमतिः परा ॥ ३६ ॥
रूपादिविभवाङ्गी शीललक्षणसमन्विता । विशालवत्सनेत्रा वसुमित्रा सुताऽनयोः ॥ ३७ ॥
तस्यैव नृपतेर्मन्त्री सोमशर्माऽभवद् द्विजः । सोमश्रीस्तस्य भार्या च सोमद्युतिविराजिता ॥ ३८ ॥
अभयादिमतिस्तस्याः कलाऽलंकृतविग्रहा । बभूव तनया चार्वी कलापारमिताऽङ्गना ॥ ३९ ॥
अन्यदा सोमशर्माऽयं तद्भक्तिप्रेरिताशयः । ब्राह्मणाचारसंयुक्तः प्रयातस्तीर्थयात्रया ॥ ४० ॥
स्नानं विधाय गङ्गायामागच्छन् स्वपुरं पुनः । मिलितः श्रेणिकस्याथ सोमशर्मा विशुद्धधीः ॥ ४१ ॥
व्रजन्तौ द्वावपि क्षिप्रं पथि श्रेणिकभूपतिः । जगावसु विशुद्धात्मा सोमशर्माणमादरात् ॥ ४२ ॥
मां स्कन्धेन वह त्वं भो त्वां वा पथि वहाम्यहम् । अनेन च विधानेन मार्गो गम्यो भवेद् द्विज ॥४३॥
श्रेणिकस्य वचः श्रुत्वा सोमशर्मा विचिन्त्य सः । संभावयति चित्तेऽयमेष कोऽपि गहिल्लकः ॥४४॥
पथि क्षेत्रं विलोक्याथ कुमारो वदति स्फुटम् । क्षेत्रपालक किं क्षेत्रं भक्षितं भक्षयिष्यते ॥ ४५ ॥
वृक्षमूले स्थितश्छत्रं धत्ते शिरसि भूपतिः । ग्रीष्मे तु स्कन्धमारोप्य गच्छति प्रीतिमानसः ॥ ४६ ॥
[2]तथोपानद्युगं [3]भूयो जलमध्ये पदानुगम् । विधायेदं स्थले [4]पाणौ व्रजति स्थिरमानसः ॥ ४७ ॥
एवं तौ द्वावपि क्षिप्रमन्योन्यविहितोत्तरौ । वनादिक्रमतिक्रम्य काञ्चीनगरमीयतुः ॥ ४८ ॥
सोमशर्मा तदा कृत्वा श्रेणिकं नगराद्बहिः । विवेश स्वगृहं हृष्टः स्फुरत्काञ्चलीचयम् ॥ ४९ ॥
विलोक्य पितरं स्थिरं यथाऽभयमतिस्तदा । विरहोपगतं सार्धं जगादेदं विचक्षणा ॥ ५० ॥
एकाकी किं समायातः किं नरेण समं पितः । कथयैतन्मम सर्वं कुशलप्रश्नपूर्वकम् ॥ ५१ ॥
सुतावचनमाकर्ण्य सोमशर्मा जगावमूम् । स्नानं विधाय गङ्गायामागतः शुचि पावनम् ॥ ५२ ॥
एको गहिल्लको मार्गे मया सार्धं समागतः । नगरासन्नदेशस्थस्तिष्ठति भ्रमहानये ॥ ५३ ॥
निशम्य जनकस्योक्तं तयनूद्य प्रणम्य तम् । कथं गहिल्लकस्तात यस्त्वया सह नागतः ॥ ५४ ॥
सुतावचनमाकर्ण्य जनकः प्राह तां पुनः । शृणु तत्कारणं येन मयोक्तोऽयं गहिल्लकः ॥ ५५ ॥
गच्छताऽनेन च यानं मया सार्धं मनस्विनि । अहं निगदितो वत्से मतिवर्जितचेतसा ॥ ५६ ॥
स्कन्धारोहणकादीर्थं[8] मां सुते निजगाद सः । अतो गहिल्लको प्रोक्तो मयाऽलं पुरतस्तव ॥५७॥
सुतया बुद्धिशालिन्या पिता प्रोक्तोऽतिमुग्धकः । तातायं मतिसंपन्नो नानाशास्त्रविचक्षणः ॥ ५८ ॥
स्कन्धारोहणवाक्यस्य तवार्थं निगदाम्यहम् । आकर्णयैकचित्तेन तावत्त्वं मुग्धमानस ॥ ५९ ॥
मित्र मे ब्रूहि चित्तस्य शोभनं हि कथानकम् । अहं वा ते वदामीति सुखेन पथि गम्यते ॥ ६० ॥
संशीतिमुतचित्तस्य मतिवर्जितचेतस । अधुना क्षेत्रवाक्यस्य निगदामि तवार्थकम् ॥ ६१ ॥

---

1 घ मनुष्यैरपाकृतः ञ मनुष्यैरपाकृता 2 ञ त्वोपानयुगं 3 क भूयो. 4 क पाणौ. 5 घ काञ्च पुत्रम 6 घ पुत्रम काञ्च पुत्रम 7 घ मक्षितं नाम. 8 घ °रोहणकादीनां

यदि मर्कं समादाय परकीयं हि भुज्यते । ततो भक्षितमेवेदं क्षेत्रं जनक मूढ ॥ ६२ ॥
प्राप्य येरमावना मर्कं सुखेन यदि भुज्यते । तत स्यादति तत्क्षेत्रं सांप्रतं तद्विगमते ॥ ६३ ॥
मम चेदं गृहं सार्धं जीर्णं यदि विमुच्यते । वाक्य तदुच्यते तात स्थावयिष्यति निश्चितम् ॥६४॥
अन्यच्च तस्मूलस्सरछत्र धरति मस्तके । काकविष्ठादिसंपाते मयत[1] स नरः पित ॥ ६५ ॥
तथा 'मामहितं सुग्मं 'कृत्वा हिसु चले तत । कन्यादिकमयात् तात स्थले पापी स गच्छति ॥६६॥
एवंविधा यतिर्यस्य पयिकस्य महात्मनः । स गुणाम्भोधिरत्सुद कथं तात गहिलकः ॥ ६७ ॥
तस्मात्त्वमानय क्षिप्रं येन पश्यामि सांप्रतम् । कीर्तिव्याप्तसमस्ताशा गुणिनो हि गुणप्रिया ॥६८॥
सुतावाक्येन तनाशु जनकेन तदन्तिकम् । प्राप्योरुप्रमयेन स्वगृहं स प्रवेशित ॥ ६९ ॥
विलोक्य पथिकं कन्या कर्दमालिप्तपादकम् । मार्गगमनखिन्नाय ददावस्मै वरासनम् ॥ ७० ॥
तद्रूपहस्तचेतस्का तत्परीक्षणकारणात् । तस्मै सर्वं ददौ तत्र विदग्धा साऽल्पतण्डुके ॥ ७१ ॥
ज्ञातकन्याभिप्राया पट समस्तं व्यपनीय तम् । तचतुर्भागनीरेण प्रधाव्य चरणौ स्वकौ ॥ ७२ ॥
तां वह्निकीं जलापूर्णां किंचिद्रत्नां स भूपतिः । तस्याः समर्पयामास चार्द्रं विस्मितचेतसः ॥७३॥
ततोऽसमयमतिस्तुष्य भोजनान्ते महामतिः । जगाद पितरं तात मामेतस्मै प्रयच्छ भोः ॥ ७४ ॥
पिताऽसमयमतिं कन्यां तद्वाक्येन विशुद्धधीः । श्रेणिकाय कुमाराय सुकुमाराय दत्तवान् ॥ ७५ ॥
ततः कामीपुरे रम्ये श्रेणिकोऽपि नवोरया । तया समं प्रभुञ्जानः कामभोगान् विनिष्ठते ॥७६॥
अथान्तरे महारम्यां वसुदत्तो जिनादरः । संन्यासस्थितविप्राय कर्मचाप ददौ मुदा ॥ ७७ ॥
तत्र विप्रः सुमध्यानात् कालं कृत्वा समाधिना । सौधर्मे धर्मसंपन्नो जातो देवो महर्द्धिकः ॥७८॥
च्युत्वा सौधर्मनाकस्माद्भयाद्विमते सुनः । अभयादिकुमारोऽभूच्छ्रेणिकप्रीतिकारकः ॥ ७९ ॥
अन्यदाऽन्यमहादेशं विजयाहितमानसः । जगाम वसुपालोऽयं भूपतिः सैन्यसंपदा ॥ ८० ॥
तत्रैकस्तम्भसपर्यं 'प्रासादं षड्भूमिकम् । ददर्श वसुपालोऽयं तद्गतमानसः ॥ ८१ ॥
तत्प्रासादनिमित्तेन मन्त्रिणं सोमशर्मणम् । दूतं प्रेषयामास वसुपालो वसुप्रियः ॥ ८२ ॥
मन्त्रिणं सोमशर्माणं प्राप्य दूतो जगाद तम् । एकस्तम्भमयं सौधं कारयत भूपालये ॥ ८३ ॥
निशम्य तद्वचो मन्त्री श्रेणिकं प्राह सत्वरम् । एकस्तम्भविनिर्माणं सौधं कुरु महामते ॥ ८४ ॥
एकस्तम्भमयं दिव्यं प्रासादं तन्निवेशितः । चकार श्रेणिको राजा मन्दिरे षड्भूमिकम् ॥ ८५ ॥
विधाय विजयं राजा प्रविश्य निजमन्दिरम् । एकस्तम्भं विलोक्यैवं प्रासादं प्राह मन्त्रिणम् ॥८६॥
सोमशर्मन् कथं केन प्रासादो विहितो महान् । एकस्तम्भो महामान कथयेमं ममाकुला ॥८७॥
वसुपालवचः श्रुत्वा सोमशर्माऽवदत् तकम् । असमद्भिर्विज्ञानी कर्मणो[11] विद्यते नृप ॥ ८८ ॥
कन्याविज्ञानसुक्तेन पठमन मनीषिणा । मत्सुतारमणनाय प्रासादो विहितः प्रभो ॥ ८९ ॥[12]
आकर्ण्य ममनः कान्त वचनं सोमशर्मणः । जगादेमं महीपालः प्रोपहृष्टतनूरुहः ॥ ९० ॥
नाम यस्य जामाता ममापि स्तुत्यः स । आहूय श्रेणिकं तस्मै वसुमित्रां ददौ सुताम् ॥ ९१ ॥[13]
धनिरोऽभयमन्याऽऽस्या तया च वसुमित्रया । काञ्चीपुरवरे भोगान् भुञ्जानो व्यवस्थितः ॥ ९२ ॥
अथ प्रश्रेणिको राजा भोगनिःस्पृहमानसः । राज्यं चिलातपुत्राय प्रदाय मृत्तमाक्षिकम् ॥ ९३ ॥

---

1 [...] ... 3 प ... 4 प ... प ...
... correct ... like this ... 8 प ... 9 प ...
10 प ... [...]. 11 [...]. 12 प ... 13 प ...

अन्ते संयमसेनस्य गुरोराचारवेदिनः । विहाय सकलं सङ्गं दीक्षां[1] दैगम्बरीमितः ॥ ९४ ॥[2]
तदा चिलातपुत्रोऽपि मगधाधिपतिर्मुदा । चकार विपुलं राज्यं पुरे राजगृहे वरे ॥ ९५ ॥
कुमार्गिनामुना राज्यं लोकोद्वेगविधायिना । प्रवर्तितास्तदाऽन्याया धर्मविध्वंसहेतवः ॥ ९६ ॥
ततः श्रेणिकराजस्य काञ्चीपुरनिवासिनः । मन्त्रिभिः प्रहितो[3] दूतः प्राप्य तं निजगाद सः ॥ ९७ ॥
राजन् भवत्पिता राज्यं स्वकीयं परमोदयम् । दत्त्वा चिलातपुत्राय बभूव श्रमणो महान् ॥ ९८ ॥
लोकश्चिलातपुत्रेण सकलः परिपीड्यते । तेन त्वं शीघ्रमागत्य कुरु राज्यं यथोचितम् ॥ ९९ ॥[4]
दूतस्य वचनं श्रुत्वा म्लानवक्त्रसरोरुहः । गमनाय मनश्चक्रे श्रेणिकः स्वपदेच्छया ॥ १०० ॥
वसुपालनृपं सोमशर्माणं श्वशुरद्वयम् । अभयादिमतिं पृष्ट्वा वसुमित्रामपि प्रियाम् ॥ १०१ ॥
भूयो भार्याद्वयं प्राह श्रेणिकः प्रीतमानसः । अन्योन्यप्रेमसंबन्धं तन्मुखाम्भोजवीक्षणम् ॥ १०२ ॥
यदि कस्यापि मे कार्यं पुरे राजगृहे वरे । पाण्डुरादिकुटीं दृष्ट्वा स समागच्छतु द्रुतम् ॥ १०३ ॥[5]
एवमुक्त्वा प्रिये द्वे तु निर्गत्य श्वाशुरात् पुरात् । श्रेणिकः प्रीतचेतस्कः संप्राप्तश्चानकं पुरम् ॥१०४॥
चिलातं क्वापि निर्वास्य स्थित्वा कनकविष्टरे । चकार श्रेणिको राज्यं स्थिरं राजगृहे पुरे ॥ १०५॥
अन्यदा मातरं दृष्ट्वा पप्रच्छेमं कुतूहलात् । अभयादिकुमारः स्वां क्व पिता मेऽवतिष्ठते ॥ १०६ ॥
श्रुत्वाऽभयकुमारस्य वचो विस्मितचेतसः । अभयादिमतिस्तोकं जगाद प्रीतमानसा ॥ १०७ ॥
मगधाधिपते पुत्र पुरे राजगृहे स्फुटम् । शुक्लादिकुटिकां प्राप्य त्वत्पिता व्यवतिष्ठते ॥ १०८ ॥[7]
ततोऽसौ मातरं पृष्ट्वा कुमारोऽभयपूर्वकः । निजगाम कृतानन्दः काञ्चीपुरवरादरम् ॥ १०९ ॥
प्रापाभयकुमारस्तं नन्दग्रामं महाधनम् । [8]अग्राहारं द्विजावासं पूर्वं पितृनिषेवितम् ॥ ११० ॥
यस्मिन्विप्रैः पिता पूर्वं धार्ष्ट्यैः सन्मठे स्थितः । भागवतं मठं पुत्रो विवेश श्रमहानये ॥ १११ ॥
माहनास्तं मठं प्राप्य चिन्ताऽऽकुलितमानसाः । एकत्र मिलिताः सर्वे दुःखिनस्तेऽवतस्थिरे ॥११२॥
विलोक्य ब्राह्मणान् भीतान् विषण्णमनसोऽखिलान् । पप्रच्छेति कुमारोऽयं कुतो भूतं भयं द्विजाः ११३
निशम्य तद्वचो विप्रा वदन्तीमं भयाकुलाः । कुमार भूभुजाऽस्माकं दत्ताऽऽज्ञा हि क्लेशकी ॥११४॥
वटकूपो भवद्ग्रामे लम्बुशत्कलस्वरम् । विधत्ते श्रुतमस्माभिस्त्वमानयत मत्पुरे ॥ ११५ ॥
विप्रा न कुरुथैवं चेत्तत सर्वमिमं द्रुतम् । ग्रामं विनाशयामीति संगरोऽयं मम स्फुटम् ॥ ११६ ॥
भूपप्रेषितविप्रस्य चोत्तरं दातुमक्षमाः । विषण्णास्तेन तिष्ठामः कुमाराय महामते ॥ ११७ ॥[9]
विप्रवाक्यं समाकर्ण्य कुमारोऽभयपूर्वकः । जगाद तानिति स्पष्टं भयविह्वलविग्रहान् ॥ ११८ ॥
विप्रश्चतां परिप्राप्य स्नानभोजनमादरात् । यूयं कुरुत दास्यामि चोत्तरं तस्य भूभुजः ॥ ११९ ॥[10]
तदाव्यत सद्दानेन भोजनं विहितं द्विजैः । तोषपूरितचेतस्कैः कृतवेदध्वनैरलम् ॥ १२० ॥
ब्राह्मणौ द्वौ परिप्राप्य कुमारवचनेन तम् । धाविकौ श्रेणिके चेदमूचतुः कठिनस्वने ॥ १२१ ॥
महाराज भवत्पादौ नन्दग्राममहाजनः । प्रणम्योवाच सस्नेहमाशीर्वादपुरःसरम् ॥ १२२ ॥
अस्माभिः सर्वथा प्रोक्तो वटकूपो नरेश्वर । याहि त्वं स्वामिनोऽस्माकं समीपं न च याति सः ॥१२३॥
नन्दग्रामेण सर्वेण तथोक्तोऽपि न गच्छति । तालं दत्त्वा तदा सोऽयं [11]नन्दग्रामाद्बहिष्कृतः ॥१२४॥
बहिःस्थितोऽपि सप्रोक्तो वटकूपो महाजनैः । त्वमस्मत्स्वामिनः पार्श्वं भद्र गन्तुं स नेच्छति ॥१२५॥[12]
नन्दग्रामद्विजश्रेष्ठो नत्वा त्वत्पदपङ्कजम् । भूयोऽपि ज्ञापयामास छलान्यस्तपापिकः ॥ १२६ ॥

1 [दीक्षां]. 2 पफज कुम्मम्. 3 फज प्रहितो 4 पफज विश्वम्, 5 फ यु॰. 6 पफज निष्कम्. 7 पफज कुम्मम्. 8 [अग्राहारं]. 9 पफज चतुष्पमम्. 10 पफज कुम्मम्. 11 फ भज यम्तु च वेष्कति. 12 फ omits 125

कुरु प्रसादमस्माकं नन्दिताशेषभूतल । इत्याश्लिष्टमहाराते माऽऽज्ञाभङ्गो भवेदयम् ॥ १२७ ॥
वशीकरणमध्ये तु समस्ते वसुधातले । भवन्ति योषितः पुंसां वशीकरणमुत्तमम् ॥ १२८ ॥
ददाति किं न वा किं न करोति वनितार्थिनः । नृपाग्नी याचितामेति मुण्डितकमपर्श्वेति ॥ १२९ ॥

तथोक्तं वररुचिना —

किं न कुर्यात् किं न दद्यात् स्त्रीभिरभ्यर्थितो नरः ।
अनश्वोऽप्यश्वतां यातः पर्वण्यपि मुण्डितं शिरः ॥ १३ ॥

वारण्योऽपि महाहस्ती न करिण्या विना यथा । भर्तुं वा वारिबन्धं वा न नेतुं शक्यते नरैः ॥ १३१ ॥
एवं स वटकूपोऽपि भूप कूपिकया विना । आनेतुं मत्तहस्तीव त्वत्समीपं न शक्यते ॥ १३२ ॥
स्वच्छमृष्टजलापूर्णा लक्षिता वटकूपिका । नदीसरोवरमाला वारिबन्धप्रवेशदा ॥ १३३ ॥
वनग्रामे द्विजापूर्णे द्विजातिभिरुपासिते । आज्ञाभङ्गो भवेद्राजन् नृपाद्येमां प्रवेशय ॥ १३४ ॥
येनानया समं राजन् प्रेमनिर्भरमानसः । वटकूपः समायाति त्वत्पुरं परमोदयम् ॥ १३५ ॥
एवमेभिस्तदा विप्रैर्वेदध्वनिविशारदैः । विज्ञापितो नरेन्द्रोऽसौ तूष्णीभावमुपाश्रितः ॥ १३६ ॥
निर्वासितुं निजाद्देशात् शक्तो हन्तुमप्यहम् । अकृतागसोऽपि ब्रुवन् विप्रलोकमपवादतः ॥ १३७ ॥
अन्यदा श्रेणिको राजा नन्दग्रामनिवासिनाम् । नरं प्रेषयामास ब्राह्मणानां कुधाऽन्वितः ॥ १३८ ॥
विह्वलीभूतचेतस्कान् सुतकम्पान् कृतागसः । स नरः प्राप्य विप्राणामुवाचेति विचक्षणः ॥ १३९ ॥
भयेऽस्मिन् मदमात्तो गृहीतो बहुमूल्यतः । अस्मत्पुरे न कोऽप्यस्ति तन्मानकुशलः पुमान् ॥ १४० ॥
तुल्या तोलयित्वेमं पलभारप्रमाणसौ । यः करोति कलाधारः स बुद्धिवृद्धिमावहेत् ॥ १४१ ॥
भवद्ग्रामे पुनर्विप्रा वेदस्मृतिविशारदाः । कलाविज्ञाननिष्णाता भवन्ति विधिसन्निभाः ॥ १४२ ॥
भवन्तस्तेऽपि सर्वेऽपि पलभारप्रमाणकम् । तुल्या तोलयिताऽऽशु प्रेषितस्य गजस्य हि ॥ १४३ ॥
अन्यथा धनमादाय पुत्रदारादिबन्धुभिः । सम निपातयामीति संगरोऽयं भवेदयम् ॥ १४४ ॥
एवं निगद्य दूतोऽसौ श्रेणिकस्य महानरः । तेभ्यः समर्पयामास करिणं बहुमूल्यकम् ॥ १४५ ॥
ततोऽभयकुमारेण कोविदेन मनस्विना । जलमध्ये गजो नावि स्थापितो बहुभिर्नरैः ॥ १४६ ॥
सद्य दन्तिसमाक्रान्ता तस्मात् नौर्महत्यपि । एतावन्मात्रनिर्मग्नामवधार्याङ्कितस्य ताम् ॥ १४७ ॥
नावं हस्तिप्रमाणेन प्रावभिः परिपूर्य च । तानुत्तार्य ततः क्षिप्रं सकलानपि भूतले ॥ १४८ ॥
तुल्या तोलयित्वेमान् पलभारप्रमाणकम् । विधाय दन्तिनोऽनेन प्रहितं तन्नृपान्तिकम् ॥ १४९ ॥
तदेष्टिं विलोक्येदं जगदाश्चर्यकारणम् । तदानीं विस्मितस्वान्तः श्रेणिको लोकरक्षकः ॥ १५० ॥
अन्यदा भूपतिः सर्वान् नन्दग्रामद्विजान्नरान् । आज्ञापयति विस्पष्टं स्वकीयपुरुषेण तान् ॥ १५१ ॥
नन्दग्रामस्य सर्वस्य वटकूपोऽस्य पश्चिमे । स्थितवान्तं दिशाभागं निर्विकल्पं मदुक्तितः ॥ १५२ ॥
अतः पश्चिमदिग्भागे नृपवाक्येन वेगतः । स्थापितो वटकूपस्य नन्दग्रामो द्विजैरयम् ॥ १५३ ॥
नन्दग्रामस्य सा वार्ता भूपस्य कथिता नरैः । निशम्यैतां पुना राजा तूष्णीभावमुपागमत् ॥ १५४ ॥
अथ राजा रुषं प्राप्य नन्दग्रामोपरि द्रुतम् । यावदायाति तं दग्धुं तावदुक्तो नरेण सः ॥ १५५ ॥
नन्दग्रामस्य नो दोषो भूप ज्ञातमिदं मया । माहन्ती कोऽपि सद्ग्रामे नरस्तिष्ठति दुर्मधीः ॥ १५६ ॥
तन्मतेन कृतं सर्वं त्वदीयं वचनं नृप । ततो निर्वासिततामेव वशीकृत्य स्वदेशतः ॥ १५७ ॥

---

1 [मूल्य]. 2 पक भूपस्य. 3 पक निधारित. 4 पक भवेतोलप्रमाणतो 5 पक दरकाप्य. 6 पक मनुष्यस्य क मनुष्यस्य.

आकर्ण्य तद्वचो राजा कोपटोपितलोचनः । स्वकीयेन नरेणाशु नन्दग्रामजने जगौ ॥ १५८ ॥
भयमागच्छतु क्षिप्रं मत्समीपं कुलेश्विकः । अनेन च विधानेन महाजन विमुच्यताम् ॥ १५९ ॥[1]
मा दिवा मा रजन्यां च मा पथा मा वृथा खलः । याने नाथ सुदुष्टात्मा तूर्णमेतु मदन्तिकम् ॥१६०॥
यद्येवं न समायाति दुष्टचेष्टितविग्रहः । नन्दग्रामं निहन्मीमं भवद्भिः सह निश्चितम् ॥ १६१ ॥
ततोऽभयकुमारोऽपि सन्ध्याकाले महामतिः । [2]गडिकालम्बिकारूढो जगाम श्रेणिकान्तिकम् ॥१६२॥
दृष्ट्वाऽभयकुमारं च श्रेणिकः प्रीतिमानसः । क्षेमं दत्त्वा पुनः स्नेहाच्चुम्ब शिरसि स्फुटम् ॥१६३॥
ततोऽभयमतिं [3]कान्तां वसुमित्रां च सत्वरम् । आनाय्य स्वनरैस्तत्र मुदं तस्थौ नराधिपः ॥१६४॥
अथ [4]चक्रविदे देशे विशाली नगरी नृपः । यस्यां चेटकोऽस्य भार्याऽऽसीत् यशोमतिरिनप्रभा ॥१६५॥
विनयाचारसंपन्नः प्रतापाक्रान्तशात्रवः । अभूत् साधुकृतानन्दश्चेटकस्य सुतोऽन्वयी ॥ १६६ ॥
भद्रमाता सुभद्राऽस्य वभूव वनितोत्तमा । अस्या दुहितरः सप्त वभूवू रूपराजिताः ॥ १६७ ॥
तन्मध्ये प्रथमा प्रोक्ता परमा प्रियकारिणी । द्वितीया सुप्रभा ज्ञेया तृतीया च प्रभावती ॥ १६८ ॥
प्रियावती चतुर्थी स्यात् सुज्येष्ठा पञ्चमी परा । षष्ठी च चेलना दिव्या सप्तमी चन्दना मता ॥१६९॥
त्रिदिवादवतीर्णानां सप्तानामपि पुण्यतः । भविष्यन्ति चरित्राणि शुभचित्तहराणि वै ॥ १७० ॥
सप्तानामपि कन्यानां स्वावासभवने प्रिये । कारयामि परं चित्रं शुभाढ्यं प्राह भूपतिः ॥ १७१ ॥
यदि चित्रकरः कोऽपि लभ्यते निपुणः परः । ततश्चित्रमिदं भद्रे कारयामि स्वमन्दिरे ॥१७२ ॥
तत्रैको वर्धकिर्दिव्यः कोकासो नाम विश्रुतः । तेन स्त्रीरूपसंयुक्तं कृतं यन्त्रशतं तदा ॥ १७३ ॥
रम्भारूपेण यन्त्रेण नरमोहनकारिणा । तेन चित्रकरा दिव्या बहवोऽपि कदर्थिताः ॥ १७४ ॥
अत्रान्तरे समायातः पुरात् राजगृहाद् भ्रमन् । विचित्रमूर्तिरिति ख्यातस्तदा चित्रकरो महान् ॥१७५॥
तत्रालेख्यं विलोक्यार्य देवादीनां च तत्पुरे । चित्रमूर्तिरिदं चित्रं कम्पचित्तसमाकुलः ॥ १७६ ॥
तत्रैकं पुरुषं दृष्ट्वा पृच्छति स्म कुतूहली । लोकचित्रकरो विद्वांश्चित्रमूर्तिर्महादरः ॥ १७७ ॥
भद्रात्र नगरे दिव्ये रूपकारः प्रियंवदः । नरेश्वरवल्लभोऽतीव भूपतेः कुशलस्तराम् ॥ १७८ ॥
श्रुत्वा तद्वचनं सोऽपि जगादेमं पुरः स्थितम् । विद्यते वर्धकिः साधो कुशलः सर्वकर्मसु ॥१७९॥
सोऽपि चित्रकरः क्षिप्रं तदा तद्वचनेन च । तत्समीपं जगामाऽऽशु कौतुकव्याप्तमानसः ॥ १८० ॥
विलोक्य वर्धकिस्तत्र चित्रमूर्तिं समागतम् । प्रासादिकं चकारास्य तदा विस्मितचेतसः ॥१८१॥
चित्रमूर्तिरपि स्पष्टं चोपकारं विधाय सः । तस्थौ मुदितचेतस्कस्तदा वर्धकिनो गृहे ॥ १८२ ॥
ततः स्वागमनं सोऽपि कथयित्वाऽस्य सत्वरम् । नाकमेकं गृहे स्थित्वा नृपस्य भवनं ययौ ॥१८३॥
ततो नृपतिनाऽनेन कृत्वा सभाजनं मिथः । आवासो विहितोऽप्यस्य चित्रमूर्तिः स्थितोऽत्र सः ॥१८४॥
यन्त्रप्रवेशनं [8]पश्चात्संचारजनकं तथा । हस्तग्रहणमन्यच्च कृत्वा यन्त्रविनाशनम् ॥ १८५ ॥
आत्मकुड्ये तथाऽऽलम्ब्य लेखनं प्रविधाय च । नाकं निर्गमनं प्राप्य विधाय द्वारि मोहनम् ॥१८६॥
एतत्सर्वं परिप्राप्य तदा भूपतिशासनात् । चित्रमूर्तिः सुसंतुष्टो महानसगृहं ययौ ॥ १८७ ॥
चित्रमूर्तिं समालोक्य कृतलोककुतूहलम् । अहो चित्रकरः साधुर्जगादेति जनो मुदा ॥ १८८ ॥
चित्रमूर्तिं निशम्याशु कृतलोककौतुकम् । याचयित्वा शुभप्रेमं भूपतिं कृतकौतुकम् ॥ १८९ ॥

---

1 The surface of the pages of च is spoiled here and there; so some words cannot be read. 2 I have followed ज; the reading is lost in फ and is not clear in च. 3 फ °भयमतिकान्तां. 4 [चक्रविषे]. 5 ज भूपकारः. 6 फज चित्रमूर्तिस्तथागतम्. 7 ज समाप्तिं. 8 फ पश्चात्संचारजनकं. 9 चफज निजकम्.

लेखचित्रकरं साधुं चित्रमूर्तिं मनोहरम् । निनाय वासगेहं सा वैदुष्यं मदनं यथा ॥ १९० ॥[1]
सुभद्रादिककन्यानां सखीनां प्रतिरूपकम् । सजीवमिव तत्रैव वासगेहे लिलेख सः ॥ १९१ ॥
विलोक्य पतितं तत्र चेलनोपरि लाञ्छनम् । दृष्ट्वा नरेन्द्रकोपं च स्थितं मानसधामनि ॥ १९२ ॥
चेलनारूपसंयुक्तं लिखित्वा पटमादरात् । चित्रमूर्तिस्तमादाय ययौ राजगृहं पुरम् ॥ १९३ ॥[2]
चित्रमूर्तिः पटं तं च चेलनारूपचित्रितम् । तदानीं दर्शयामास श्रेणिकस्य महात्मनः ॥ १९४ ॥
निरूप्य तं पटं राजा विह्वलीभूतमानसः । पपात विष्टरादाशु मोहतो भुवमागतः ॥ १९५ ॥
भूयोऽपि चेतनां प्राप्य सिक्तश्चन्दनवारिणा । मूर्च्छायाः कारणं पृष्टः श्रेणिको हितबन्धुभिः ॥१९६॥
निशम्य तद्वचो राजा जगादेमान् पुरःस्थितान् । पटस्थदर्शनात्प्राप्ता मूर्च्छा मे कथितं हि वः ॥१९७॥
श्रुत्वाऽभयकुमारोऽस्य वचनं काममोहितः । जगाद जनकं शीघ्रमानयामि तकामहम् ॥ १९८ ॥
विश्रम्भीकृत्य तं तातं भूरूपे विधाय सः । पटेऽभयकुमारोऽयं मनोहारि सदात्मनि ॥ १९९ ॥
वणिग्वेषं विधायायं सार्थवाहैर्जनावृतः । विशालिकां पुरीं प्राप्य क्रमेण कृतसंमदः[4] ॥ २०० ॥
आदाय सारवस्तूनि बहुमूल्यानि भूरिशः । ददर्श चेटकं भूपं कुमारोऽभयपूर्वकः ॥ २०१ ॥
ततो नरपतिस्तुष्टः प्राहेमं विनयस्थितम् । किमत्र वाञ्छसे स्पष्टं कथयाशु ममाधुना ॥ २०२ ॥
श्रुत्वा चेटकराजोऽस्य वचनं स जगावमुम् । नगरेऽत्र प्रभूतं ते करोमि क्रयविक्रयम् ॥ २०३ ॥
भवत्कन्यागृहान्ते च करोमि[5] विशिष्टं नृप । दानं ददामि सर्वस्मै वोढोऽहं वणिगुत्तमः ॥२०४॥
प्रसादं कुरु राजन् त्वमिच्छं विदधाम्यहम् । यो यदिच्छति मे भाण्डं ददाम्यस्मै धनं विना ॥२०५॥
एवमस्तु कुमारोऽसौ नृपवाक्येन तत्पुरे । तिष्ठति प्रीतचेतस्को वणिजो वोढनामकः ॥ २०६ ॥
चित्रकर्म विधायेदं फलके जनविस्मयम् । पुष्पधूपादिकं दत्त्वा चकार स्तुतिमस्य सः ॥ २०७ ॥
पश्चान्महाजनस्यातैः कोलाहलविधायिभिः । समं वोढवणिक् तत्र करोति क्रयविक्रयम् ॥ २०८ ॥
अथान्तरे कन्यकाश्चेलनाचेटिका मुहुः । गमागमं प्रकुर्वन्ति वोढस्वामिवणिक्पथे ॥ २०९ ॥
वोढे वणिक्सुतस्तासां चेटिकानां मुहुर्मुहुः । श्रेणिकस्य स्वनाथस्य माहात्म्यं कथयत्यसौ ॥२१०॥
पटस्थं चित्रकर्मेदं श्रेणिकस्य विलोक्य ताः । चेलनां प्राप्य संतुष्टा निगदन्ति समं तदा ॥२११॥
स्वामिन्यस्मत्पुरे कोऽपि मूर्खोऽस्त्यो वाक्स्वामिनः । आत्मनाथवरं रूपं लेखयित्वा पटे पुनः ॥२१२॥
सजीवचित्रकर्मेदं [11]स्वपतिप्रतिरूपकम् । प्रभाते पूजनं कृत्वा स्तुत्वा स्तुतिशतैरपि ॥ २१३ ॥
पश्चाद्यो महद् द्रव्यं [12]याच्यते मूल्यतो विना । तस्मै यथेप्सितं वस्तु ददाति प्रीतमानसः ॥२१४॥
निशम्य तद्वचः कन्या कौतुकव्याप्तमानसा । चेलना प्राप्य तद्रूपं पश्यति स्म मनोहरम् ॥२१५॥
श्रेणिकस्य परं रूपं पटस्थं प्रविलोक्य च । मुमोह चेलना कन्या विभ्रम्य स्वगृहं ययौ ॥२१६॥
भूयो समागमं कृत्वा चेटिका हृष्टचेतसः । तत्रस्थं श्रेणिकस्यासां माहात्म्यं निगदन्ति ताः ॥२१७॥
चटीवचनमाकर्ण्य कन्याः[13] कन्दर्पविह्वलाः । कौतुकव्याप्तचेतस्काः स्पष्टं द्रष्टुमाययुः ॥ २१८ ॥
विलोक्य श्रेणिकं रूपं पटस्थं वरकन्यकाः । वोढं वदन्ति चैकान्ते काममायासमाहताः ॥२१९॥
गृहीत्वाऽस्मान् व्रज क्षिप्रं वोढ त्वं श्रेणिकान्तिके । जीवामो येन तं प्राप्य सुखेन सुस्थिताः प्रियम् ॥२२०॥
तदाकर्ण्य कुमारोऽपि सुरङ्गां निचखान सः । स्ववासान्तर्गतां यावत्कन्याप्रासादमादरात् ॥२२१॥
ततोऽभयकुमारोऽपि प्रार्थितः सुरङ्गया । निनाय चेलनां कन्यां ज्येष्ठया सहसा सह ॥ २२२ ॥

---

1 पफज सुभ्रम्, [2] पफज सुभ्रम्, 3 फ महात्मनिः 4 ज कृतसंमदः 5 पफज सुभ्रम्, 6 फज करोमि 7 पफज चतुष्पथम्, 8 फ वाचनातः 9 फज वोढ॰ 10 फज स्वपिति 11 [स्वपते]. 12 प कस्मा. 13 फज °व्याप्तका

विलोक्य चेलना ज्येष्ठां स्वसमं निर्गतां पुरात् । इयमेतां जगादैषा मद्रूप्याणि[1] गृहाण च ॥२२३॥
यावदादाय रूप्याणि स्वगृहं याति सत्वरम् । ज्येष्ठा तावदसौ [2]याता चेलना सत्समं मुदा ॥२२४॥
अभयादिकुमारोऽपि गृहीत्वा चेलनामरम् । तोषपूरितचेतस्कः [3]प्राप राजगृहं पुरम् ॥ २२५ ॥
ततो ज्येष्ठाऽपि [4]तद्गत्य तन्मार्गेण विनिर्गता । चेलनां तामपश्यन्ती बभूवामाकुलमानसा ॥ २२६ ॥
ततो यशोमतिं प्राप्य स्वसारं जनकस्य सा । आर्यिका गुरुमानम्य दीक्षां [5]जग्राह तत्पुरे ॥२२७॥ [6]
अथाभयकुमारोऽपि समामभ्यनुयायिनः । श्रेणिकस्य नरेन्द्रस्य दर्शयामास चेलनाम् ॥ २२८ ॥
विलोक्य चेलनां राजा तोषविस्फारितेक्षणः । [7]प्रवरं च विधायास्या महादेवीपदं ददौ ॥२२९॥
ततोऽभयकुमारं च चेलनाऽऽनयनादृतम् । ग्रामादिसंपदा हृष्टः पूजयामास भूपतिः ॥ २३० ॥
परस्परमुखाम्भोजवीक्षणासक्तलोचनौ । अन्योन्यप्रेमसंबद्धौ दम्पती तौ बभूवतुः ॥ २३१ ॥
अथ कालानुभावेन चेलनाया गुणाकरः । बभूव वारिषेणाख्यो नन्दनः कुलनन्दनः ॥ २३२ ॥
तथा हि धारिणीगर्भे समुत्पन्नः प्रियंवदः । कोणिकाख्यः सुतः श्रीमान् विनयी रूपराजितः ॥२३३॥
जातः श्रेणिकभूपालो भागवतासक्तमानसः । चेलनाऽपि महादेवी जिनभक्तिपरायणा ॥ २३४ ॥
श्रेणिको भगवद्धर्मं चेलना जैनमुत्तमम् । वक्ति चान्योन्यसंवादो वर्तते सततं तयोः ॥ २३५ ॥
एवं याति तयोर्लोके कलहेन दिवानिशम् । श्रेणिकश्चेलनां प्राह विनयेन पुरःस्थिताम् ॥ २३६ ॥
रमणो देवता नार्या लोकानां भाषणं तथा । इदं शुभमनोहारि श्रूयते वचनं भुवि ॥ २३७ ॥
भर्ताऽहं देवता तेऽत्र कुरु भक्तिं ममाधुना । यो धर्मो मम देवो वा कर्तव्यस्तेन स त्वया ॥२३८॥
ये मत्तपस्विनः केचिद्विष्णुदेवसमक्रियाः । अर्चितव्यास्त्वया तेऽपि नगरेऽत्र मम प्रिये ॥२३९॥[8]
श्रेणिकस्य वचः श्रुत्वा चेलना वदति स्म तम् । आज्ञां दत्से यथा भर्तस्तथैवाहं करोमि ताम् ॥२४०॥
एवमुक्त्वा वचसान्ते परिव्राजकसंहतिम् । परिप्राप्य जगादैतान् चेलना भर्तृबान्धवाः ॥ २४१ ॥
मद्गृहेऽद्य प्रभोक्तव्यं भवद्भिः सकलैरपि । एवमस्त्विति तैरुक्ता जगाम स्वगृहं च सा ॥ २४२ ॥
ततो मध्याह्नवेलायां श्रुत्वा सर्वेऽपि माहनाः । महादेवीगृहं प्राप्ता मणिनिर्मितभित्तिकम् ॥२४३॥
कृत्वा सर्वोपकारं[9] च तेषामासनयायिनाम् । चेलना श्रेणिकप्रीत्या पुष्पधूपादिकं ददौ ॥ २४४ ॥
अवतारं प्रकुर्वन्तु विष्णुपादा वचप्रियाः । एवं निगद्य तान्पार्श्वे शिखी [10]प्रज्वालितेऽनया ॥२४५॥
एवं [11]प्रज्वालिते वह्नौ परिव्राजकसंहतिः । भयवेपितसर्वाङ्गा नष्टा सर्वाऽपि तत्क्षणात् ॥ २४६ ॥
ज्ञात्वा वृत्तान्तमेतेषां श्रेणिकः क्रुद्धमानसः । जगाद चेलनां तत्र कोपारुणनिरीक्षणः ॥ २४७ ॥
यदि त्वं भाविका देवि परमाऽसि नितम्बिनि । यशोभ्यासमसक्षाध्ये स धर्मस्ते न रोचते ॥२४८॥
ततो मध्याह्नवेलायां क्षुधासम्पातकर्षिताः[12] । किं कदर्थयितुं युक्ता वद देवि तपस्विनः ॥ २४९ ॥[13]
श्रेणिकोक्तं निशम्योचे चेलना रमणं तदा । कारणेन विना नाथ किं कुप्यसि ममोपरि ॥ २५० ॥
ये ते तपस्विनो देव देवता वाऽधिकं श्रुति । ते मेऽपि देवता किंतु पुण्यवन्तस्तपस्विनः ॥२५१॥
येषां करोषि सुष्ठु त्वं भक्तिं निर्मलचेतसाम् । तेषामहमपि स्पष्टं करोमि स्थिरमानसा ॥ २५२ ॥
ततो भक्त्या मया वह्निस्तत्समीपे नरेश्वर । प्रज्वालितो न रोषेण शृणु तत्त्वं कथानकम् ॥ २५३ ॥
विषये वत्सकावत्यां कौशाम्बी नगरी नृप । प्रजापालो बभूवास्यां सद्भार्या च यशोमतिः ॥२५४॥

---

1 ज रत्नानि=आभरणानि. 2 [याता]. 3 फ प्राप 4 फज उत्पाद्य [उत्पाद्य]. 5 प जगृहे 6 फज प्रधानपद महादेवी प also like that, but corrected later in this manner 7 प प्रवर्नं=विवाहम्, 8 ज चतुष्कम्, पफ चतुष्कम्, 9 [सर्वोपचारं]. 10 [प्रज्वालितो]. 11 फ प्रज्वलितो. 12 [°कर्षिताः]. 13 पफज भिक्षवः.

तस्यामेव पुरि श्रेष्ठी भूरिवर्धनसंयुतः । अस्ति सागरदत्तोऽस्य भार्या वसुमती परा ॥ २५५ ॥
अपरोऽपि द्वितीयोऽस्यां पुरि श्रेष्ठी महाधनः । नाम्ना समुद्रदत्तोऽस्ति कान्ता तस्यामसंमता ॥२५६॥
तनयोः श्रेष्ठिनोरस्यां सुखेन वसतोः सतोः । बभूव परमा प्रीतिरमेया सुजनैरपि ॥ २५७ ॥
अथ सागरदत्तोऽपि स्नेहनिर्भरमानसः । समुद्रोपपदं दत्तं जगाद सरसं हितम् ॥ २५८ ॥
यदि मे तनया यातु जायते तनयस्तव । ततो मयाऽस्य सा दत्ता भवत्सुतस्य निश्चितम् ॥२५९॥
अथवा मे सुतो भावी ते सुता दैवयोगतः । मत्सुताय तदा देया त्वया संबन्धमिच्छता ॥ २६० ॥
श्रुत्वा तद्वचनं सारं स्नेहसंबन्धकारणम् । समुद्रोपपदो दत्तः प्राहेम पुरतः स्थितम् ॥ २६१ ॥
शोभनं गदितं साधो त्वया स्नेहगरीयसा । प्रतिपन्नं मयाऽप्येतद्भवता सुमनीषितम् ॥ २६२ ॥
ततः सागरदत्तस्य वसुमत्याश्च योषितः । सर्पो बभूव कृष्णाङ्गो रक्ताक्षो लोलजिह्वकः ॥ २६३ ॥
दिवा भवति सर्पोऽयं भीमभोगभयंकरः । दिव्यरूपधरो नक्तं पुरुषः सन्मनोहरः ॥ २६४ ॥
देवविद्याधराकारः कर्णकुण्डलराजितः । हारराजितवक्षस्को वसुमित्राख्यया भुवि ॥ २६५ ॥
ततः समुद्रदत्तस्य नागदत्ता सुताऽभवत् । रूपराजितसर्वाङ्गी नागिनीव मनोहरी ॥ २६६ ॥
एषा समुद्रदत्तेन नागदत्ताऽतिरूपिणी । वितीर्णा वसुमित्राय परिणीता विधानतः ॥ २६७ ॥
वसुमित्रो दिने सर्पो नक्तं दिव्यनरो भवेत् । भोगं यथेप्सितं दिव्यं भुञ्जानो नागदत्तया ॥२६८॥
पश्चात्करण्डकान्तस्थस्तोषपूरितमानसः । संतिष्ठते महाभागी पाताले चमरो यथा ॥ २६९ ॥
तत्र समुद्रदत्तेयं नागदत्तां पुरःस्थिताम् । पप्रच्छ महास्नेहात्तोषकम्पिताङ्गिका ॥ २७० ॥
भर्तास्ति सुते कीदृग्गुणी रूपी न वा भवेत् । स वा वसति सप्रीतः कथयेदं ममाधुना ॥२७१॥
निशम्य जननीवाक्यं सुता प्रीतिपरायणम् । तोषपूरितचेतस्का नागदत्ता जगादमूम् ॥ २७२ ॥
अम्बिके वल्लभो भीमः करण्डे कनकोज्ज्वले । दिव्येन्द्रनीलसंकाशः सर्पो भूत्वा वितिष्ठते ॥२७३॥
नक्तं पुनरसौ कान्तो दिव्यरूपधरः पुमान् । मया समं महाभोगान् भुञ्जानो व्यवतिष्ठते ॥२७४॥
प्रभातसमये सोऽयं करण्डे मणिभासुरे । भूत्वा सर्पोऽम्बिके भोगी तिष्ठति प्रीतमानसः ॥ २७५ ॥
श्रुत्वा समुद्रदत्ताऽपि नागदत्तावचः परम् । जगौ सुतां महाप्रीत्या नानाश्चर्यविचक्षणा ॥ २७६ ॥
सर्वकाले यथा पुत्रि वसुमित्रो नरो भवेत् । तथा तं ते करिष्यामि विश्रब्धीभव बालिके ॥२७७॥
एवं निगद्य तां पुत्रीं भवनान्तरगामिनीम् । तदा समुद्रदत्ता सा नागदत्तागृहं ययौ ॥ २७८ ॥
अथ नक्तं करण्डान्तात् कान्तासंगमसुत्सुकः । दिव्यरूपो नरः श्रीमान् वसुमित्रो विनिर्ययौ ॥२७९॥
यस्मिंस्तु समये सर्पो निर्यातोऽन्तः करण्डकात् । तस्मिन्नेव स निक्षिप्तः करण्डोऽग्नौ तयाऽऽदरात् २८०
करण्डे भस्मतां प्राप्ते वसुमित्रो दिवानिशम् । रूपयौवनसंपन्नो बभूव परमः पुमान् ॥ २८१ ॥
तस्मिन्करण्डके दग्धे भुञ्जानो योषितं शुभम् । सर्वकालं नरो भूत्वा वसुमित्रोऽवतिष्ठते ॥२८२॥
स्वामिन् यथा तया दग्धः समुद्रादिकदत्तया । करण्डः स्वसुतादेवीभोगनिन्यस्तचेतसा ॥ २८३ ॥
तस्मिन्निद्रारके दग्धे वसुमित्रः सुखान्वितः । दिव्यरूपः पुमान् भूत्वा तस्थौ मुदितमानसः ॥२८४॥
तथा मयाऽपि राजेन्द्र स्वपानो समर्थितः । निष्कुटान्ते गतानां हि शरीरे दहनं कृतम् ॥२८५॥
भर्तादि मदपः सत्सु भवेत्तोनयनप्रिय । न रोषस्त कृते स्वामिन् तदेतद्दहनं मया ॥ २८६ ॥

1 [भ्रष्ट]. 2 पक्त्रमा विषयम्. 3 प मुभ्यम् पक्त्रमा मुण्यम्. 4 प मुभ्यम् पक्त्रमा मुगतम्. 5 प त्यताद्धोदवे. 6 पक्त्रमा मुत्यम् 7 पक्त्रमा भाजुत्यम्. 8 प. मया 9 पक्त्रमा विषयम्.

विहायापघन येन विष्णुलोकं समागता । विष्णुलोके प्रभुञ्जाना भोगांस्तिष्ठन्ति ते परान् ॥२८७॥
तथा तप प्रकुर्वन्ति हित्वा पूतिकलेवरम् । विष्णुलोकपरिप्राप्ते संसारभस्तचेतस ॥ २८८ ॥
कलेवरमिदं दग्ध्वा बाह्याभ्यन्तरतोऽशुचि[1] । इहत्यमनुजा यान्तु विष्णुलोकं महासुखम् ॥ २८९ ॥
अनेन कारणेनेश कथितं तच्छरीरकम् । दग्धं मयाऽतिभावेन तत्सुखावाप्तिकारणात् ॥ २९० ॥[2]
ततो राजा महादेव्या निशम्य वचनं तथा । तूष्णीभाव परिप्राप्य तस्यावन्त प्रकोपवान् ॥२९१॥
अन्यदा प्रस्थितो राजा पापस्पर्शी[3] कुध्यमानस । पथि स्थानस्थितं धीरं दृष्ट्वा यमधरं मुनिम् ॥२९२॥
दुष्पापेनेन नेमेन भमपेन दुरात्मना । मृगयाप्रस्थितस्याशु कृतो मेऽपशकुन कथम् ॥ २९३ ॥[4]
चेलनावैरसंबन्धं स्मृत्वा पूर्वसमुद्भवम् । शुनां पञ्चशतानीतो मोचयामास तं प्रति ॥ २९४ ॥
एवं ते धन्वनोन्मुक्त सिंहपोता इव द्रुतम् । मुने समीपतां प्राप्ताः क्षीणदन्ता बृहन्मुखा ॥२९५॥
तत्प्रभावेन सभूय समस्ता शान्तचेतस । त्रि परीत्य तमीशान वन्दित्वा ते पुर स्थिता ॥२९६॥
विलोक्य मन्दत्वन् भूपस्तत्पुरो विनयस्थितान् । मुमोच पापसंघातं व्यपीकृत्य मुनिं क्रुधा ॥२९७॥
ततस्ते मार्गपार्श्वस्थ भूत्वा पुष्पसयोऽमला[5] । मुनिपादोपरि सार्धं निपेतुर्गन्धशालिनी[6] ॥२९८॥
राजा तत्समयेनैव सप्तमे नरके द्रुतम् । त्रयस्त्रिंशत्समुद्रोत्थं बबन्धायु कुधीरयम् ॥ २९९ ॥
भूयोऽतिविस्मयमीक्ष्यं विलोक्योपशमं परम् । जगाम विस्मितस्वान्तो भक्तिप्रहततनूरुह[7] ॥ ३०० ॥
मुनिं प्रदक्षिणीकृत्य वन्दित्वा स्वं विनिन्द्य च । श्रेणिकस्तत्पुरस्तस्थौ विनयानतमस्तक ॥३०१॥
स्वयोगमुपसंहृत्य सर्वसत्त्वदयापर । श्रेणिकस्य चकाराय [8]धर्मश्रवणमादरात् ॥ ३०२ ॥
मुनिनाऽस्य तदा धर्म कथितो जिनदेशित । यथाऽयं क्षायसम्यक्त्वो बभूव क्षणमात्रत ॥३०३॥
आयुर्यद्बर्धितं तत्र त्रयस्त्रिंशत्समुद्रकम् । तदनेन हतं सर्वं महामुनिसमागमात् ॥ ३०४ ॥
सीमन्तनरके राजा प्रथमे धर्मसंयमे[9] । सहस्राणां बबन्धायुरशीतिं चतुरुत्तरा ॥ ३०५ ॥
ततो निर्वाणमापन्ने महावीरे जिनेश्वरे । तिस्रस्समाश्चतुर्थस्य कालस्य परिकीर्तिता ॥ ३०६ ॥
तथा मासाष्टकं ज्ञेयं षोडशापि दिनानि च । एतावति गते काले नून दुःखमनामनि ॥ ३०७ ॥
मानवेष्टन्महाभोगान् भुक्त्वा कालं विहाय[10] च । पूर्वोक्त श्रेणिको राजा सीमन्तं नरकं ययौ ॥३०८॥[11]
अथ श्रेणिकपुत्रोऽयं क्षेमको नाम विश्रुत । चकार विपुलं राज्यं मगधाविषये महान् ॥ ३०९ ॥
दुःखमादुःखमाकाले प्रविष्टे श्रेणिको नृप । भुक्त्वायुःप्रमाण[12] सन् सीमन्तान्निर्गमिष्यति ॥३१०॥
अथार्थिसार्थमुख्यस्य भोगिन कुलधारिण । पद्मादिपुत्रकस्यायं भविष्यति सुत पर ॥ ३११ ॥
द्विसप्तत्यब्दसंस्थायु[13] सप्तहस्तशरीरक । सर्वलोकगुरु श्रीमानादितीर्थकरो महान् ॥ ३१२ ॥
इहैव भरतक्षेत्रे मध्यमादिकमण्डले । उत्सर्पिणीतृतीयाख्ये काले जनसुखावहे ॥ ३१३ ॥
नामतोऽयं महापद्मो लोकव्यवस्थितिदेशिक । द्वादशाङ्गगणायुक्तो गुणशीलमहोदधि ॥ ३१४ ॥
चतुस्त्रिंशद्गुणोपेतः प्रातिहार्यसमन्वित । धर्मं विश्वस्य सो स्वामी विहरिष्यति महीतले ॥३१५॥[14]

॥ इति श्रीक्षायिकसम्यक्त्वयुक्ताविरतश्रेणिकतीर्थकरोत्पत्तिकथानकम् ॥ ५५ ॥

*

1 फ शुचि 2 पफज कुम्मम्. 3 ब पापस्पर्शी. 4 पफज कुम्मम्. 5 ब भूपस्त्पुरो 6 फ पुष्पसयोऽमला 7 प धन्वशालिनी 8 [धर्मश्रवण॰]. 9 फज नाम 10 पज संयमे. 11 [विहाय]. 12 पफज विक्रमम्. 13 [भुक्त्वायुःप्रमाण]. 14 प (अन्तुर्थसमुद्रका) 15 [मुक्ते]. 16 प चतु-कुत्कम्, फज चतुष्कम्, 17 फज कुम्मम् विरत.

५६ कर्कण्डमहाराजकथानकम् ।

अथ तेरापुरि श्रीमान् राजाऽऽसीद्यादवान्वये । सूर्यप्रभोऽस्य भार्या च श्रीषेणा श्रीसमप्रभा ॥ १ ॥
अन्यदाऽस्मिन् वसन्ते मलये विषयान्तिके । मलयाख्यगिरिं यातो नृपतिः प्रीतमानसः ॥ २ ॥
मलयाचलमूर्धनि दृष्ट्वेमं रामणीयकम् । तोषपूरितचेतस्को रम्यमिति स विस्मितः ॥ ३ ॥
शिवीकृतनभोभागान् कारयित्वा जिनालयान् । ऋषभादिजिनेन्द्राणामेष्वर्चाः स्थापयाम्यहम् ॥ ४ ॥
कैलासशिखरे रम्ये यथा भरतचक्रिणा । स्थापिताः प्रतिमा अर्च्या जिनायतनपङ्क्तिषु ॥ ५ ॥
तथा सूर्यप्रभेणापि मणिकाञ्चननिर्मिताः । जिनालयेषु दिव्येषु स्थापिता जिनभक्तितः ॥ ६ ॥
विद्याधरजनैः सार्धं विनिर्वर्त्य महामहम् । तत्प्रतिष्ठाविधिं कृत्वा जगामायं यथागतम् ॥ ७ ॥
विजयार्धे नगोत्तुङ्गे चोत्तरश्रेणिसंभवम् । विमानं चामरं चास्ति पुरं गगनवल्लभम् ॥ ८ ॥
तत्र द्वौ भ्रातरौ ख्यातौ सर्वविद्याधराधिपौ । सुवेगामितवेगाख्यौ सम्यग्दर्शनभूषितौ ॥ ९ ॥
कृत्रिमाकृत्रिमार्चानां सर्वपर्वदिने युतौ । मन्दिरादिषु कुर्वाणौ वन्दनां तौ विचेरतुः ॥ १० ॥
उद्धस्तक्षिपसमासे तौ विधाय जिनवन्दनाम् । दक्षिणापथदेशस्थे मलये विषयान्तिके ॥ ११ ॥
भूतिपर्वतमायातौ श्रीखण्डतरुसंकुलम् । भक्तिनिर्भरचेतस्कौ जिनबिम्बानि वन्दितुम् ॥ १२ ॥
तत्र तौ वन्दनां कृत्वा भक्तिनिर्भरमानसौ । पश्यन्तौ प्रतिमां जैने मन्दिरे तस्थतुर्मुदा ॥ १३ ॥
स्थितयोरनयोस्तत्र पार्श्वदेवस्य यातनाम् । विलोक्यामितवेगेन सुरूपां चिन्तितं तदा ॥ १४ ॥
कारयित्वा परां दिव्यां विजयार्धे जिनालये । प्रतिमां पार्श्वदेवस्य स्थापयामीप्सितामहम् ॥ १५ ॥
प्रथममितवेगोऽयं गृहीत्वा प्रतियातनाम् । [illegible]स्य तां भूयो मुमोच लयनान्तरे ॥ १६ ॥
विधाय तां स्तुतिं भक्त्या यावदुत्क्षिपति प्रभुः । तावत्सा प्रतिमाऽत्रैव तस्थौ निश्चलविग्रहा ॥ १७ ॥
ततो मन्त्रपि[illegible]न्तस्तां तदर्थां भूमिसंगताम् । विधायासौ प्रयत्नेन तेराख्यं पुरमाययौ ॥ १८ ॥
सहस्रकूटसंस्थाने समुत्तुङ्गे जिनालये । मुनिर्यमधरस्तत्र तिष्ठति स्थिरमानसः ॥ १९ ॥
ततस्ताभ्यां विनीताभ्यां तत्स्तुतिं प्रविधाय च । पार्श्वनाथस्य वृत्तान्तः सकलोऽस्य निवेदितः ॥ २० ॥
अस्माभिः पार्श्वनाथार्चा आरब्धा भूतपर्वतात् । आनेतुमत्र संलग्ना स्थिता सा वटगोपरि ॥ २१ ॥
किं निमित्तमिदं नाथ न विज्ञातं प्रयोजनम् । अस्माभिस्तत्पुनः क्षिप्रं कथयेश ममाधुना ॥ २२ ॥
निशम्य तद्वचो योगी जगादेमं च तद्गिरौ । भविष्यति मनोहारि दिव्यमायतनं खगाः ॥ २३ ॥
अयं सुवेगखेटोऽपि तदर्चां वीक्ष्य निश्चितम् । अपरत्र भवे साधो जिनधर्मं ग्रहीष्यति ॥ २४ ॥
श्रुत्वाऽन्यभवसंबन्धं सुवेगस्य महामुनेः । [10]दीक्षाममितवेगोऽपि तत्समं सहसाऽग्रहीत् ॥ २५ ॥
अथ मिथ्यात्वमासाद्य सुवेगमुनिरर्दितः । परीषहभटैरार्तध्यानतो मृतिमाप सः ॥ २६ ॥
तत्पर्वतसमीपे च तत्पाषाणके सकः । बभूव भीषणाकारः श्वेतवर्णो महागजः ॥ २७ ॥
विधायामितवेगोऽयं तपो घोरं महामुनिः । बभूव भासुराकारो देवो दिवि महर्द्धिकः ॥ २८ ॥
पूर्वोक्तप्रतिमा सा च निक्षेपविहिताऽत्र या । आनीताऽमितवेगेन तेरायां स्थापिता पुनः ॥ २९ ॥
विलोक्य प्रतिमामेतां कर्कण्डाख्यो[11] नराधिपः । यथोक्तलयनमप्यस्याः चकारायं विशुद्धधीः ॥ ३० ॥
इदं कथान्तरं भव्यं भव्यानां निगदन्त्यमी । जिनराद्धान्तनिष्णाताः सूरयस्तत्त्ववेदिनः ॥ ३१ ॥

---

1 चक भिनिर्मैस च (°भिर्मोन). 2 चज्ञ चमरं. 3 चकज्ञ कुम्भय. 4 ज्ञ यान्याध्वीमम्. 5 कज्ञ देवार्चे. 6 चच तदर्चा. 7 च कुम्भम् चज्ञ कुम्भमिरम्. 8 [चच]. 9 च कुम्भम्, ज्ञ कुम्भीरम्. 10 चज्ञ तदीक्षां. 11 क कर्कण्डाख्यो

अत्रान्तरे सुरः स्वर्गेऽमितवेगचरो महान् । अवधिज्ञानमासाद्य दध्याविति स धीरधीः ॥ ३२ ॥
सुवेगखेचरो दिव्यः कनीयान् मे सहोदरः । पञ्चतां प्राप्य मिथ्यात्वात् क्व चोत्पन्नः सुधीरधीः ॥३३॥
अवधिज्ञानतो दृष्टः पूतिपर्वतमस्तके । सितदन्तो महाहस्ती प्रालेयगिरिसंनिभः ॥ ३४ ॥
अणुव्रतानि पञ्चापि त्रिभिः सह गुणव्रतैः । शिक्षाव्रतैश्चतुर्भिश्च रात्रिभोजनवर्जनम् ॥ ३५ ॥
मधु मद्यं तथा मांसं पञ्चुदुम्बरपरिच्युतिम् । सम्यक्त्वपूर्वकं देवो ग्राहयामास तं गजम् ॥ ३६ ॥[2]
सागारधर्ममादाय मुनिदेवोपदेशतः । दध्यौ हस्तिवरस्तत्र सदालोकनतत्परः ॥ ३७ ॥
पापोऽहं पापकर्माऽहं पापनिर्मितदेहकः । पूर्वजन्मान्तरात्प्राप्तस्तिर्यग्गतिमुपागतः ॥ ३८ ॥
गच्छन् महाटवीमध्ये क्व जिनार्चा क्व योगिनम्[3] । पश्याम्यत्र नगे भीमे पूर्वे मे पुण्यतो द्वयम् ॥३९॥[4]
एवं वैराग्यमापन्नं कुञ्जरं प्रविलोक्य सः । भूयो देवमुनिः प्राह स्नेहनिर्भरमानसः ॥ ४० ॥
प्रदेशेऽस्मिन् गजाधीश पार्श्वदेवप्रयातना । निखातपूर्वा साऽस्माभिस्तिष्ठत्यत्रापि निश्चितम् ॥४१॥
अतः सरोवराद्रम्यात् पद्मान्यादाय भक्तितः । दृष्ट्वाऽम्भोभिर्जिनं पार्श्वं त्रिकालं तत्स्तुतिं कुरु ॥ ४२ ॥
यदा कोऽपि त्विमामर्चामुत्खाय च ग्रहीष्यति । तदा त्वं सर्वमाहारं हित्वा सल्लेखनां कुरु ॥४३॥
अप्रमत्तं सं निवेद्यासामितवेगखगेश्वरः । इत्युक्त्वा गजं शीर्षं मुनिर्देवो ययौ दिवम् ॥ ४४ ॥
गजः करेण पद्मानि गृहीत्वा सरसो जलम् । विस्तीर्णपद्मिनीपत्रे सितमुक्तासमाकृतिं ॥ ४५ ॥
अभिषिच्य जलेनार्चां पद्मैः पूजां विधाय च । त्रिःपरीत्य स्तुतिं कृत्वा वनं याति सुलीलया[8] ॥४६॥
अथेह भरतक्षेत्रे भव्यानां सफलप्रदे । स्थितं तद्दक्षिणे भागे विजयार्धमहीभृतः ॥ ४७ ॥
पुरं च चक्रवालस्य रथनूपुरपूर्वकम् । धनदत्तः पुरस्तत्र करोति विजिगीषुताम् ॥ ४८ ॥[11]
तत्र नील-महानीलौ भवेतां भ्रातरौ परौ । युद्धे पराजितावन्यैर्विद्याधरकुमारकैः ॥ ४९ ॥
महापराक्रमोपेतैः सवीर्यबलशालिभिः । विद्याच्छेदं विधायाशु घाटितौ तौ स्वपत्तनात् ॥ ५० ॥
धाराशिवप्रपाल्यां[12] च दृष्ट्वा निक्षेपयातनाम् । भूयो विद्या भविष्यन्ति धानपाऽवसथा हि वौ ॥५१॥
अभीरास्यमहादेशे तेरास्यनगरं परम् । तदा नीलमहानीलौ प्रयातौ विजिगीषया ॥ ५२ ॥
सर्वत्र विषयेऽमुष्मिन् ये केचन महानृपाः[13] । तान् सर्वान् स्ववशे कृत्वा निर्गतौ तत्पुरात् पुनः ॥५३॥
तेरादक्षिणदिग्भागे गव्यूतित्रयसंगतम् । अध्वानं तावतिक्रम्य प्रविष्टौ भीषणं वनम् ॥ ५४ ॥
तत्र धाराशिवाभिख्यौ महाबलसमन्वितौ । सर्वभिल्लाधिपौ भिल्लौ वसतः स्म बलोत्कटौ ॥ ५५ ॥
ततो नीलमहानीलौ विद्याधरकुमारकौ । आगत्य पूजितौ ताभ्यां विनीताभ्यां धनादिना ॥ ५६ ॥
नीलेन भ्रातृयुक्तेन समाभाष्य स्थितेन तौ । इदं प्रयोजनं पृष्टौ तदानीं पुरतः स्थितौ ॥ ५७ ॥
विचरद्भ्यां वने यस्मौ भवद्भ्यां गुरुभीतिदे । किं क्वापि दृष्टमाश्चर्यं बुधविस्मयकारणम् ॥ ५८ ॥
श्रुत्वा तद्वचनं धारस्तदा शिवसमन्वितः । जगाद दृष्टमाश्चर्यं नीलं भ्रातृसमन्वितम् ॥ ५९ ॥
अभिषिञ्चन् जलैरर्च्यं पूजयन् कमलैस्तथा । महासरोवराभीते करेण त्रिःपरीत्य तं ॥ ६० ॥
गिरीन्द्रसदृशाकारो मन्दमन्दगतिक्रियः । अस्माभिः स भवन् दृष्टो राजन् सितवपुः करी ॥६१॥
ततो नीलमहानीलौ तदानीं तत्पुरस्सरौ । प्राप्य वल्मीकसंस्थाने पश्यन्तौ महागजम् ॥ ६२ ॥

---

1 प पंचुंबरि° 2 प युग्मम्, फज युग्मकमिदम्. 3 फज योगिनाम्. 4 प युग्मम्, फ युग्मम्, ज युग्मकमिदम्. 5 पज °पद्मान्यादाय. 6 प चतुर्युग्मम्, फ चतुष्कमिदम्, ज चतुष्ककमिदम्. 7 फ [illegible]. 8 प सुलीलया. 9 प युग्मम्, फज युग्मकमिदम्. 10 फ भव्यानां° 11 प युग्मम्, फ युग्मम्, ज युग्मकमिदम् 12 ज °प्रपाल्यां 13 प °नृपमहाराजाः 14 [अमीरार्धं].

कुर्वन्तं नीरसंघेन वामलूरस्य सेवनम्[1] । पूजयन्तं तथा पद्मैः करेण बहुभक्तितः ॥ ६३ ॥
त्रिःपरीत्य कृतस्नानं भूमिविन्यस्तमस्तकम् । शुण्डीकृतनमोदेशं वामलूरपुरःस्थितम् ॥ ६४ ॥[2]
षष्ठोपवासमादाय तत्पुरः प्रीतमानसौ । तदा नीलमहानीलौ तस्थिवांसौ विचक्षणौ ॥ ६५ ॥
देव्या तौ समालोक्य वल्मीकपुरतः[3] स्थितौ । स्वरूपं दर्शयामास तद्भक्तिप्रीतमानसा ॥ ६६ ॥
किमर्थं च स्थितौ भद्रौ वल्मीकाग्रे मनस्विनौ । ब्रूतं प्रयोजनं वत्सौ मम शीघ्रं सुखस्थितौ ॥ ६७ ॥
देवतावाक्यमाकर्ण्य प्रोचतुस्तौ तदग्रतः । स्थितावत्र प्रयत्नेन भद्रे स्वपदवाञ्छया ॥ ६८ ॥
देवता तद्वचः श्रुत्वा जगादेति स्फुटाक्षरम् । श्रूयतां मद्वचो भद्रौ सत्यं पथ्यं सुखप्रदम् ॥ ६९ ॥
अत्र पार्श्वजिनेन्द्रस्य निखाताऽर्चाऽवतिष्ठते । मया निवेदितं तस्य अधुना कुरुतं हितम् ॥ ७० ॥
तद्वाक्यतोऽद्भुतस्ताभ्यामुत्खाता प्रतिमा तदा । सहस्रस्तम्भसंयुक्ते भवने स्थापिता पुनः ॥ ७१ ॥
फाल्गुनाष्टाह्निकायां च दिनान्यष्टौ महामहम् । कृत्वा नीलमहानीलौ सचिवौ स्वपुरं गतौ ॥ ७२ ॥
अन्ये तु सूरयोऽन्येषां वदन्ति वचनं पुरः । आचार्याणां क्रमायातं सत्यं तदपि जायते ॥ ७३ ॥
वल्मीकान्तात् समादाय करेणास्येन सुशुण्डया । सहस्रस्तम्भसंपन्ने भवने स्थापिता तदा ॥ ७४ ॥
उद्धृत्याद्यमिमामर्चां कुञ्जरो भक्तितत्परः । सल्लेखनां च कृत्वाऽसौ हस्तिकूटगिरौ तदा ॥ ७५ ॥
नानारत्नकरावते कल्पे माहेन्द्रनामनि । जातो महर्द्धिको देवो हारकुण्डलराजितः ॥ ७६ ॥
अथ नीलमहानीलभ्रातृयुग्मस्य तत्क्षणात् । दृष्ट्वा पार्श्वजिनेन्द्रस्य प्रतिमां परमोत्सवात् ॥ ७७ ॥
छिन्ना या सकला विद्याः संग्रामे खेचरेश्वरैः । महाप्रभावयुक्तास्ताः प्रादुरासन् शुभप्रभाः ॥ ७८ ॥
नीलस्य कुर्वतो राज्यं महानीलसमं तदा । तेरपुरवरे श्रेष्ठी धनमित्रोऽभवद्धनी ॥ ७९ ॥
तद्भार्या रूपसंपन्ना धनोपपदिका मतिः । एकोऽस्य धनदत्ताख्यो गोपालो वनपालकः ॥ ८० ॥
अन्यदा गाः समादाय कल्ये अम्बुजसन्निभम्[4] । नदीसरोवराकीर्णं वनाभागं फलं महत्[5] ॥ ८१ ॥
दृष्ट्वा सरोवरं तत्र जलजातविराजितम् । एकमत्र वरं पद्मं समुद्भूतं मनोहरम् ॥ ८२ ॥
देवतारक्षिते तत्र सरसि सुन्दरम् । प्रवेष्टुं लभते नासौ पतङ्गानपि मागधः ॥ ८३ ॥
तदेकं पुष्पमादाय धनदत्तेन शोभनम् । प्रविश्यान्तर्महापद्मं गन्धामोदितदिङ्मुखम् ॥ ८४ ॥
सपद्मं तत्र संवीक्ष्य कोपक्षोभसमन्विता । पुष्पमावसमायुक्तं स जगौ नागदेवता ॥ ८५ ॥
सर्वलोकप्रधानस्य देवदेवस्य पालक । त्वया शिरसि कृत्वास्य भक्तिनिर्भरचेतसा ॥ ८६ ॥
यद्येवं न करोषि त्वं मद्वचस्तत्सुखावहम् । तदा तव स्वहस्तेन निग्रहं विदधाम्यहम्[9] ॥ ८७ ॥
शतपत्रं तदादाय विपुलं[11] गन्धराजितम् । धनदत्तः पुरं प्राप्य दध्याविति सविस्मितः ॥ ८८ ॥
धनदत्तो मम श्रेष्ठी सकलोकमहत्तरः । सर्वस्वामी पुनः सर्वैः स्तूयते प्रीतमानसैः ॥ ८९ ॥
तेन तस्यान्तिकं प्राप्य पादपूजां करोम्यहम् । इति पद्मकरस्तस्थौ श्रेष्ठिनः पुरतः सकः ॥ ९० ॥[12]
धनदत्तं समालोक्य पद्महस्तं पुरः स्थितम् । धनमित्रो जगादेदं पुत्र किं कर्तुमुद्यतः ॥ ९१ ॥
निशम्य श्रेष्ठिनो वाक्यं धनदत्तो जगाद तम् । सर्वलोकाद्गरीयांसो भवन्तः पूजिताः सताम् ॥ ९२ ॥
युष्माकं तेन कार्येण पद्मेनानेन पादयोः । करोमि पूजनं तात मम प्रेप्सन प्रियः[13] ॥ ९३ ॥
धनदत्तवचः श्रुत्वा धनमित्रो बभाण तम् । अस्माकं सर्वदा स्वामी नीलः पूज्यः सतामपि ॥ ९४ ॥

---

1 [सेवनम्]. 2 पञ्ज स्थितम्. 3 पञ्ज °पुरः स्थितौ. 4 प कल्पे. 5 प युष्मम्, पञ्ज युगम्म. 6 प स्थितान्यतिस्थिता. 7 प भरम् (भवम्) 8 पञ्ज पायसाम्. 9 प मद्वचनानुसारम्. 10 पञ्ज निरवामपह्. 11 [विपुलं]. 12 प विपुलकम्, पञ्ज स्थितम्. 13 प मम प्रिय 14 प युष्मम्, पञ्ज युष्मम्.

तेनाह त्वं च[1] संप्राप्य तत्समीपं त्वरान्वितः । अनेन शतपत्रेण कुर्वे तस्य पदार्चनम् ॥ ९५ ॥[2]
राजाज्य धनदत्तेन भणितो नीलनामकः । सर्वलोकगुरुः श्रीमान् सर्वलोकनमस्कृतः ॥ ९६ ॥
समस्तसाधितारातिः समस्तजनवत्सलः । तेन तेऽनेन पद्मेन पूजयामि पदाम्बुजम् ॥ ९७ ॥[3]
आकर्ण्य धनदत्तस्य वचनं भक्तितत्परम् । तदा नीलो बभाणेदं जिनभक्तिपरायणः ॥ ९८ ॥
सर्वलोकगुरुर्नाहं नाहं पूज्योऽखिलैर्जनैः । पूजयानेन पद्मेन सर्वसत्त्वहितं मुनिम् ॥ ९९ ॥[4]
नीलखेटवचः श्रुत्वा धनदत्तो मुनिं ययौ । पूजयामि भवत्पादौ पद्मेन त्वामुवाच सः ॥ १०० ॥
निशम्य तद्वचो मौग्ध्यं जगादेमं यतीश्वरः । नाहं भवामि सर्वस्य लोकस्य गुरुरर्चितः ॥ १०१ ॥
त्रैलोक्यस्य गुरुः श्रीमान् छत्रत्रयविराजितः । सिंहासनोपविष्टोऽस्ति जिनः पूज्यः सुरासुरैः ॥१०२॥
तेन त्वमस्य धन्यस्य पूज्यस्य विबुधाधिपैः । पूजां कुरु महाभक्त्या कमलेन विकासिना ॥ १०३ ॥
जैनस्य पादपद्मस्य धनदत्तः प्रपूजितम् । एकेन शतपत्रेण चकार बहुभक्तितः ॥ १०४ ॥
पद्मपूजावसाने च जिनं नत्वातिभक्तितः । धनदत्तोऽगमद् गेहं धनमित्रसमं मुदा ॥ १०५ ॥
अत्रास्ति भरतक्षेत्रे श्रावस्ती नगरी परा । धनधान्यसमाकीर्णा [6]धानदी नगरीव सा ॥ १०६ ॥
नागदत्तोऽभवत्तस्यामिभ्यो[7] धनपतिर्महान् । नागदत्ता प्रिया चास्य नागिनीव कलस्वना ॥ १०७ ॥
नागदत्तस्य तस्यैको नित्यभोगी द्विजो गृहे । नागदत्तासमं सोऽपि विषमं कुरुते तराम् ॥ १०८ ॥
तच्चेष्टितं परिज्ञाय नागदत्तो विशुद्धधीः । मुनेः सागरसेनस्य समीपे सोऽग्रहीत् तपः ॥ १०९ ॥
उग्रं तपो विधायासौ सामान्यनरदुष्करम् । नाके मनोहरो देवः[8] संजातस्तपसः फलम् ॥ ११० ॥
ततोऽवतीर्य तस्मात्कान्नागदत्तचरः सुरः । वसुपालस्य चम्पायां वसुमत्याः सुतोऽभवत् ॥ १११ ॥
दन्तिवाहननामाढ्यः रूपराजितविग्रहः । कलाविज्ञानसंपन्नो रूपीव मकरध्वजः ॥ ११२ ॥[9]
तया समं वसंस्तत्र चिरकालं स माहनः । कालेन पञ्चतां नीतः कालो हि बलवानलम् ॥ ११३ ॥
संसारं स परिभ्रम्य कलिङ्गविषये महान् । जातो दन्तिपुराभ्यर्णे नर्मदातिलकः करी ॥ ११४ ॥
कदाचित् केनचित्तत्र स्वस्य गौरवमिच्छता । आनीतः प्राभृतं हस्ती दन्तिवाहनभूभुजः ॥ ११५ ॥
ताम्रलिप्तौ पुरे श्रेष्ठी वसुमित्रो महाधनः । तस्य भार्याऽभवत् तन्वी नागदत्ता प्रियंवदा ॥११६॥
नागदत्ता चिरं भ्रान्त्वा संसारे सारवर्जिते । बभूव चानयोः पुत्री धनोपपदसिद्धमतिः ॥ ११७ ॥
नालन्दनगरे श्रेष्ठी धनदत्तोऽभवद्धनी । उपासकोऽस्य भार्या च धनमित्राऽतिरूपिणी ॥ ११८ ॥
अनयोः प्रेमसंसक्तचेतसोः प्रीतिकारकः । रूपी विनयसंपन्नो धनपालोऽभवत् सुतः ॥ ११९ ॥
पाठाखिलसमानाय धनपालाय धीमते । दत्ता धनवती[10] तस्मै पितृभ्यां प्रीतिकारिणी ॥ १२० ॥
अन्या स्वसा द्वितीया स्याद् धनश्रीः श्रीसमप्रभा । रतिरूपसमाकारा कोकिलेव कलस्वना ॥१२१॥
विषये वत्सकावत्यां कौशाम्बी नगरी श्रुता । नृपोऽस्यां वसुपालोऽभूद् भार्या वसुमती परा ॥१२२॥
वसुदत्तोऽस्य सच्छ्रेष्ठी श्रावको जिनभक्तितः । धनश्रीरस्य सा दत्ता पितृभ्यां भाविकाऽभवत् १२३
एवं सति गते काले वसुदत्तो मृतिं गतः । नागदत्ताऽतिशोकेन कौशाम्बीनगरीमिता ॥ १२४ ॥
विलोक्य मातरं प्राप्तां नागदत्ताभिधां पुरः । प्रोत्थाय स्नेहतो गाढं धनश्रीरालिलिङ्ग ताम् ॥१२५॥
परस्परकृताऽऽरोदं सुखदुःखसमागमम् । माता सुखं तदा तस्थौ स्नेहनिर्भरमानसा ॥ १२६ ॥
अन्येद्युर्नागदत्तां च धनश्रीर्निजमातरम् । निनाय मुनिसामीप्यं लोकम्लानसुखाम्बुजाम् ॥ १२७ ॥

---

1 [त्वं च]. 2 पफज कुम्मम्. 3 पफज कुम्मम्. 4 पफज कुम्मम्. 5 पफज विफलम्. 6 द ([illegible] धनदी). 7 क अभिरसामिभ्यो 8 क omits some words. 9 पफज कुम्मम्. 10 पज धनमती

शर्वरीभोजनं हित्वा नागदत्ता मुनीरणात् । सुता धनमतीपार्श्वे नाऽनन्दनगरं ययौ ॥ १२८ ॥
सुतां धनमती प्राप्य रात्रिभोजनकं तथा । पुत्रीसंसर्गतो नूनं सिषिर्वे नागदत्तया ॥ १२९ ॥
कौशाम्बी नगरीं प्राप्य शुक्र रात्री तया पुनः । एवं वारत्रयं भग्नं रात्रिभोजनकं व्रतम् ॥ १३० ॥
पुनश्चतुर्थवेलायां कौशाम्ब्याख्यपुरीस्थिताम्[1] । कनिष्ठकां सुतां प्राप्य नागदत्ता मृतिं गता ॥१३१॥
शुभाशुभास्रवोपेता[2] वसुपालस्य सत्पुरि । जाता वसुमतीगर्भे सुता कर्मानुभावतः ॥ १३२ ॥
यदा च गर्भसंभूता तस्य वसुमती तदा । श्वासकासादिभी रोगैः पीडिताऽतीव दुःखदैः ॥ १३३ ॥
जातमात्रां निधायाशु मञ्जूषायां प्रयत्नतः । कौशाम्ब्यां वसुपालस्य वसुमत्या[3] सुतामिमाम् ॥१३४॥
मुक्ता[4] क्रमानुभावेन पूर्वोत्थेन बलीयसा । लब्ध्वा वर्धयतां कोऽपि कृपया पुण्यरक्षिताम् ॥१३५॥
इत्यक्षिताङ्गुलीरत्नकम्बलसंवृता । निर्विण्णया महादेव्या निक्षिप्ता यमुनाह्रदे ॥ १३६ ॥[5]
तरीव मञ्जूषा प्रवाहस्यातिवेगतः । नीयमाना प्रयागे[6] सा प्राप गङ्गाप्रवाहकम् ॥ १३७ ॥
अङ्गवङ्गस्थमहादेशे चम्पायां पुरि भूपतिः । दन्तिवाहननामाऽऽसीद् वसुमित्राऽस्य वल्लभा ॥१३८॥
चम्पापुरीसमीपेऽस्ति कुसुमोपपदं पुरम् । कश्चिकः[7] कुन्ददन्तोऽस्य भार्या कुसुददन्तिका ॥१३९॥
तदानीं कुन्ददन्तेन निर्विघ्नेन पुरात्ततः । गङ्गापयःप्रवाहे दृष्टा सा मञ्जूषा दिनानने ॥ १४० ॥
ततोऽसौ तां समादाय मञ्जूषां पालितसुताम् । भावयाम गृहं शीघ्रं स्वकीयं हृष्टमानसः ॥१४१॥
मञ्जूषान्तः[8] समादाय तां बालां सुकुमारिकाम् । भविष्यति सुता तेऽसौ स्वकान्तायै करे ददौ ॥१४२॥
वृद्धिं विधाय वाऽस्याः क्षीरादिविधियोगतः । पद्मावतीति तन्नाम कृतं कुसुददन्तया ॥ १४३ ॥
क्रमेण यौवनं प्राप्य कामिमानसपीडनम् । पीनोन्नतकुचाक्रान्ता रेजे पद्माक्षी तदा ॥ १४४ ॥
तदा विलोक्य तां कन्यां दन्तिवाहनभूपतिः । दध्यौ मनसि कस्यैषा कामबाणसमाहतः ॥१४५॥
मालाकारसुता राजन् कथिता साऽस्य केनचित् । मातापितृभ्यां तां राजोपयेमे विधिना ततः १४६
दन्तिवाहनराजेन्द्रस्याञ्जनमानसः[9] । पद्मावत्यै प्रसन्नात्मा महादेवीपदं ददौ ॥ १४७ ॥
तदानीं कुन्ददन्तेन पृष्टेनानन भूभुजा । मञ्जूषायाः[10] स वृत्तान्तः प्रारब्धोऽस्य प्रभाषितुम् ॥ १४८ ॥
वसुपालस्य कौशाम्ब्यां वसुमत्याः सुता वरा । नामाङ्किताङ्गुलीरत्नकम्बलकोऽप्ययम् ॥१४९॥
एषाऽसि नृप मञ्जूषा समभवत् पुराकृतम् । विलोक्यैव च सर्वेषां संजातः प्रत्ययो महान् ॥१५०॥[11]
भुञ्जानस्य परान् भोगान् पद्मावत्या सहानया । रूपयौवनयुक्तस्य दन्तिवाहनभूभुजः ॥ १५१ ॥
सोऽसौ गोपालकस्तत्र यवन कृत्यपूजनः । दिवं पद्मावतीगर्भे जीवितेन परिच्युतः ॥ १५२ ॥
तस्मिन् गर्भस्थिते तस्य दोहलोऽस्या बभूव च । दुष्टां तत्समात्मेन्य पप्रच्छेमां महीपतिः ॥१५३॥
मन्मनोलोचनानन्दे मनीषितविधायिनि । ब्रूहि किं कारणे देवि शरीरं तव दुर्बलम्[12] ॥१५४॥[13]
भर्तृवाक्यं समाकर्ण्य जगौ पद्मावती तकम् । मदमानस्थित सत्येन दोहलोऽयं ममेदृशः ॥ १५५ ॥
नरवेषं समादाय भवता सह गतम्[14] । अधिरुह्य समुत्तुङ्गं नर्मदान्तिकं[15] गजम् ॥ १५६ ॥
यदि भुवनि सन्तापे मन्दमन्दप्रगर्जितम् । प्रदक्षिणं कराभ्यां तु यदि चम्पापुरे प्रभो ॥ १५७ ॥
निशम्य तद्वचो राजा भगवन्तिकं द्विपम् । नगरे कारयामास सारगर्जितमण्डितम् ॥ १५८ ॥
योग्याभरणवेषेणं कृतकौतुकमङ्गलम् । पद्मावती महादेवी नरवेषा चकार सा ॥ १५९ ॥

1 क तथा 2 क शुभाशुभ ख शुभ मिश्रे 3 ख ग प्रयत्नेन 4 ख मुक्ता 5 क निक्षिप्तामुखोदके [निक्षिप्ता यमुनाह्रदे]. 6 ख ग निश्चयम्. 7 ख ग भे 8 ख क ची... 9 ख °राजमान 10 ख ग मञ्जूषाम्. 11 ख ग दुरैण्म्. 12 ख ग दुर्बल. 13 [...]. 14 ख प्रेक्षणिकं. 15 ख ग निरन्तरम्.

महादेवीं पुरः कृत्वा हस्तिनो मदशालिनः । पश्चात्तत्पृष्ठमारूढो दन्तिवाहनभूपतिः ॥ १६० ॥
एवं प्रदक्षिणां यावद् विदधाति महीपतिः । स्वपुरस्य समायातस्तावत् कश्चिदमामरः ॥ १६१ ॥[1]
गोत्रेण वायुवेगोऽस्य वायुवेगः सुहृत्तमो । रूपातिशयसंपन्नः षोडशाभरणान्वितः ॥ १६२ ॥
अनेन वायुवेगेन विद्यागजवदनो दिवि । विसर्जितेन्द्रचापश्रीविश्रीकृतनभस्तलः ॥ १६३ ॥
एकैकं शीतलं बिन्दु गन्धयुक्तं जलस्य च । किरन्विसर्जितोऽनेन मन्दं मन्दं समीरणः ॥ १६४ ॥
विलोक्य तं घनं वीर्यं सुगन्धं जलविप्रुषः । समीरणं समाघ्राय सुगन्धीभूतदिङ्मुखम् ॥ १६५ ॥[2]
शल्लकीवनविन्ध्यस्य नानातरुविशालिनः । नर्मदातिलकः कुम्भी सस्मार स्वनिषधिपः ॥ १६६ ॥
तदानीं सर्वलोकानां पश्यतां बलिनामपि । महादन्तिपुराभ्याशः सन्मुखो चलितः करी ॥ १६७ ॥
तस्मिन् करिणि वेगेन गच्छति द्रुतलीलया । पद्मावती जगादेशं नीयमानं महाटवीम् ॥ १६८ ॥
मत्कृतेन तवाधीश चोपसर्गो महानयम् । मयक्तिनाशमायातेऽधरा सर्वाऽपि नश्यति ॥ १६९ ॥
तेन त्वं वृक्षशाखाग्रं गृहीत्वाऽऽसन्नगोचरम् । नगराय समुत्तुङ्गाद्गजादवतर द्रुतम् ॥ १७० ॥
अहं दुःखभरक्रान्ता स्वकर्मफलचोदिता । गजेन सह गच्छामि दैवमालम्ब्य भूपते ॥ १७१ ॥[4]
देवीवचनमाकर्ण्य कृत्वा राजा तद्वचनादरम् । वृक्षशाखां समादाय हस्तिनोऽवततार सः ॥ १७२ ॥
देवीगुणान्तरस्योर्वे स्मरन् दुःखितमानसः । मायानिविष्टचेतस्को जगाम स्वगृहं नृपः ॥ १७३ ॥
पद्मावतीं समादाय कलिङ्गविषयानुगाम् । नर्मदातिलको हस्ती प्राप दन्तिपुराटवीम् ॥ १७४ ॥
नानापद्मसमाकीर्णं हंससारसनादितम् । समुद्रमिव तोयाढ्यं प्रविवेश सरोवरम् ॥ १७५ ॥
तत्र पद्मावती देवी नर्मदातिलकोदरम् । उत्तीर्य भूपतेर्जुष्टादुत्ततार जलाद्भुवम् ॥ १७६ ॥
जलदेवीव सा तस्मौ सरोवरतटे तदा । न्यग्रोधपादपाधः सा वीक्षमाणा दिगन्तरम् ॥ १७७ ॥
अत्रैकक्षणमासाद्य ततः पद्मसरोवरात् । उत्तीर्य सहसा दन्ती जगाम स्वमनीषितम् ॥ १७८ ॥
पद्मावती च तत्रस्थमालाकारेण साधुना । तदा दन्तिपुरस्यान्ते दृष्टा श्रवणेन सा ॥ १७९ ॥
वनदेवीमिवालोक्य रूपयौवनसंगताम् । भगिनीप्रेमरागेण निन्ये तां स्वगृहं स्वकः ॥ १८० ॥
तस्मिन् दन्तिपुरे साध्वी तद्गृहे भोजनादिकम् । कुर्वती प्रीतचेतस्का तस्थौ पद्मावती सुखम् ॥१८१॥
यावत्तिष्ठति सा तत्र पुष्पाण्यादाय मालिकः । जगाम तानि विक्रेतुं ग्राममन्यं धनेच्छया ॥१८२॥
विपरीतमनोवृत्त्या तावत्तद्भार्यया गृहात् । निर्धाटिता तया साध्वी प्रसवासन्नदेहिनी द्रुतम् ॥ १८३ ॥
ततो दन्तिपुरासन्नं नानाऽनोकहसंकुलम् । सका महाभयं नाम श्मशानं प्राप भीषणम् ॥१८४॥
सर्वलक्षणसंपूर्णं सर्वावयवसुन्दरम् । प्रसूता दारकं तत्र तदा पद्मावती शुभम् ॥ १८५ ॥
तोपशोकसमायुक्ता बालादित्यसमप्रभम् । पश्यन्ती बालकं तत्र तस्थौ सा प्रसन्नमानसा ॥ १८६ ॥
अत्रान्तरे महाभीमो बालदत्तो विद्याधरः । चिरं मातङ्गरूपेण तां स रक्षन् व्यतिष्ठत ॥ १८७ ॥
दृष्ट्वा तां दूरदेशस्थो विनयानतविग्रहः । पद्मावतीं महादेवीं आह विद्याधरो गिरम् ॥ १८८ ॥
यथा भगवति स्पष्टं मद्वृत्तान्तप्रसूचकम् । आकर्णयैकचित्तेन समासेन ब्रवीमि ते ॥ १८९ ॥
अत्रास्ति भरतक्षेत्रे जम्बूद्वीपोपलक्षिते । सर्वरूप्यमयस्तुङ्गो विजयार्धो महीधरः ॥ १९० ॥
तत्रास्ति दक्षिणश्रेण्यां मणिप्रासादभासितम् । बहुविद्याधराकीर्णं पुरं विद्युत्प्रभं परम् ॥ १९१ ॥
तत्र विद्याधराधीशो राजा विद्युत्प्रभः प्रभुः । अभूत् तन्महादेवी विद्युल्लेखा प्रभोज्ज्वला ॥ १९२ ॥
तत्पुत्रो बालदेवोऽहं हेममाल्य मम प्रिया । दक्षिणार्धां प्रहृष्टात्मा निर्गतस्तस्य देशतः ॥१९३॥

1 प बहुभ्रमम्, फज बहुभ्रमम्, 2 फज बायपी 3 पफ पुष्पम्, ज पुष्पम् 4 प बहु पुष्पम्, फज बहुपुष्पम्, 5 पज तत्र स मार्गं 6 प तं 7 प विदन्तौ 8 प प्रिय

कलिङ्गविषयसान्ध्रविषयस्यापि मुस्थित । सन्धौ रामगिरिर्भाति विच्छिन्न् शिखरैनभ ॥१९४॥
तस्योपरि यतो मेऽरं विद्रुमावलिभासिन । विमानं काममय नाम जगाम स्थिरतामिदम् ॥ १९५॥
ततो मया द्रुतं मध्ये कृत्वा विमवलोकनम् । अधो विलोकितं पश्चात् सम्भ्रमासक्तचेतसा ॥१९६॥
एवं विलोकिते तत्र धीर सत्समतो मुनि । सर्वसत्त्वानुकम्पी च मया दृष्टोऽपवर्जित ॥ १९७ ॥
दृष्ट्वैन योगिन तत्र ध्यानाचलमधिष्ठितम् । धर्मं पापपथोपेत परिध्यातमिदं मया ॥ १९८ ॥
मियाशुध्दस्य मेऽनेन गच्छतो दिवि सत्वरम् । नगे कीलितुकामस्य विमान स्तम्भितं कथम् ॥१९९॥
उपसर्गो मयाऽप्यस्य मद्भविभ्रंशकारिण । कोपाद्विधातुमारब्ध पापाक्तसमचेतसा ॥ २०० ॥
एवं कृतवतो मेऽत्र मुनिना कोपभीरुणा । दुष्टचेतोचितान्याऽस्य दत्त शापोऽयमीदृश ॥२०१॥
यथा पाप दुराचार धर्मवर्जितचेतस । भूयात् ते सर्वविद्यानां छेद कारुण्यवर्जित ॥ २०२ ॥
तच्छ्रवणात् साधुवाक्येन विद्याच्छेदो मम स्फुटम् । जातो भूयो मया साधुर्विज्ञप्तो दीनचेतसा ॥२०३॥
सर्वलोककृतानन्द सवलोकहितापर । मम धर्मविहीनस्य कथं शापो गमिष्यति ॥ २०४ ॥
निशम्य मद्वचो योगी तदानीं कृपयाऽन्वयी । जगाद मामिति स्पष्टं दिव्यज्ञाननिरीक्षण ॥२०५॥
अस्त्यत्रास्यमहादेशे चम्पायां पुरि भूपति । दन्तिवाहननामाऽस्य भार्या पद्मावती प्रिया ॥२०६॥
धर्मिणी तां समादाय नर्मदातिलकः करी । कलिङ्गविषये दिव्ये पुरं दन्तिपुरं गत ॥ २०७ ॥
तत्र राजा प्रजापालो बलवाहननामक । बभूव तत्प्रिया भार्या विनीता बलवाहना ॥ २०८ ॥
पृथिवीमण्डलेऽपेवचतुरङ्गबलान्वित । धनी पुनरयं राजा पुत्रहीनोऽत्र तिष्ठते ॥ २०९ ॥
अत्रैव नगरे सार मालाकारो भयमिष । तद्भार्या मारिदत्ताऽस्या क्रूरनिष्ठुरमानसा ॥ २१ ॥
पूर्वोक्तदन्तिना नीतां तत्रैव दन्तिपुराटवीम् । मालाकारो भटस्तत्र द्रक्ष्यति प्रीतमानसः ॥ २११ ॥
मालाकारेण सा नीता स्वकीयं गृहमादरात् । भूय प्रसवकालेन चाद्भिर्य मारिदत्तया ॥ २१२ ॥
प्राप्य भीष्मं श्मशानं च सर्वलक्षणसंयुतम् । पद्मावती सुतं तत्र प्राप्स्यति स्थिरचेतसा ॥ २१३ ॥
कुमार सुकुमाराङ्ग सर्वलोकमनोहर । पृथिवीमण्डलेऽस्मिन् स भविष्यति भूपति ॥ २१४ ॥
पद्मावती महादेवी प्रसूता दारकं यदा । श्मशाने पश्यसि क्षिप्रं बालादित्यसमप्रभम् ॥ २१५ ॥
पुनस्त्वं बालकं दिव्यं स्फुरन्तं तनुतेजसा । गृहीत्वा सपदि नीत्वा वृद्धिं प्रापय सांप्रतम् ॥ २१६ ॥
ततोऽसौ वर्धितस्तत्र यस्मिन् काले महागुणम् । राज्यं प्राप्स्यति विस्तीर्णे पुरे दन्तिपुरे परे ॥२१७॥
तस्मिन्ननेहसि प्राप्ते भवतो सानुरागत । भविष्यन्ति पुनर्विद्या मुनिना गदितं वच ॥ २१८ ॥
मुनेरादेशतस्त्वन्वि श्मशाने भीषणाकृतिर्म । इमन्त कालमासाद्य रक्षकमिद स्थित ॥ २१९ ॥
पूर्वं निवेदितोऽस्माकमादेशो मुनिना यकः । सत्योऽधुना हि संजातो नान्यथा मुनिभाषितम् ॥२२०॥
तेनेमं दारकं मह्यं सपदि प्राप्य वेगतः । वर्धापयाम्यतो बालं मातर्मा त्वं करिष्यसि ॥२२१॥
विद्याधरवच श्रुत्वा तक पद्मावती जगौ । एवमस्त्विति मे भ्राता पुत्रयत्नं करिष्यसि ॥ २२२ ॥
नत्वा पद्मावतीं भक्त्या गृहीत्वा तत्सुतं पुन । बालदेवो जगामाशु स्वगृहं हृष्टमानस ॥२२३॥
स्त समादरं तस्या स्नेहनिर्भरमानसः । बालकं हेममालाया बालदेवो ददौ करे ॥ २२४ ॥
मन्दिरे बालदेवस्य हेममालाप्रयत्नतः । वृद्धिं प्रयाति सोऽपास् तदानीं बालचन्द्रमा ॥ २२५ ॥
पद्मावती महादेवी हित्वा तत्र श्मशानकम् । तस्मिन् दन्तिपुरे तस्थौ दिनानि कतिचित्तदा ॥२२६॥

---

1 क कलिङ्गवि 2 क पापपथोपेत 3 [कारुण्यवर्जित]. 4 ब मद्भवस्य विभ्रंशकारिण. 5 क सुनीपमे- स्थित 6 क भीषणाकृति 7 क स्थितः 8 क ख मातर्मा [मातर्मा]. 9 क ख हृष्टमानस. 10 [ते सुतं].

समाधिगुप्तिमानस्य मुनिं योगपराङ्मुखी । पद्मावती प्रणम्याथ सुव्रतायाऽन्तिके व्रतम् ॥ २२७ ॥
घृतादिपूरकान् पूरान् मोदकान् लोकवर्तिनी । पद्मावती समादाय बालदेवगृहं ययौ ॥ २२८ ॥
भक्ष्यभोज्यादिकं दत्त्वा तनयाय मनःप्रियम् । विलोक्य स्नेहतः पुत्रं ययौ सा स्वमनीषितम् ॥२२९॥
अन्यदाऽऽगत्य तं स्नेहात्तत्करौ वीक्ष्य सा पुनः । कण्डूकण्डूसमायुक्तौ पादौ चास्य मुहुः स्थिता ॥२३०॥
विधाय नन्दनस्याशु बालदेवपुरःसरम् । करकण्डाख्या गुणोपेता पद्मावत्यार्यिका ययौ ॥ २३१ ॥
कुमारोऽपि क्रमेणायं करकण्डाख्यो महानभूत् । श्मशानं जनकेनासौ रक्षन् सन् स तितिष्ठते ॥२३२॥
क्रमात्तच्छ्मशानस्यात् त्रयो वंशाः समुत्थिताः । एको मुखेन निर्यातो द्वावक्षिभ्यां विनिर्गतौ ॥२३३॥
अथ संघेन संयुक्तौ महताऽऽर्यधमीरुमा । दिव्यादिज्ञानसंपन्नौ गुणशीलमहोदधी ॥ २३४ ॥
विहरन्तौ तकौ कापि तदा दन्तिपुरान्तिके । यशोवीरादिकौ भद्रौ तस्थतुस्तच्छ्मशानके ॥२३५॥
एको युवा यतिस्तत्र दृष्ट्वा वंशत्रयं जगौ । पश्याश्चर्यमिदं नाथ लोकातिशयकारणम् ॥ २३६ ॥
इदं नरशिरो भित्त्वा त्रयो वंशा विनिर्ययुः । यशोभद्रो विलोक्येमान् जगादेदं विशुद्धधीः ॥२३७॥
छत्रध्वजाङ्कुशानां च यस्य दण्डा मनोरमाः । इमे वंशा भविष्यन्ति स राजा सकलावनौ ॥२३८॥
श्रुत्वा मुनेर्वचः सत्यं सुमतिब्राह्मणस्तदा । तिष्ठन्नेकोऽत्र हृष्टात्मा दध्याविति स चेतसि ॥२३९॥
अप्रमाणं न जायेत मुनिवाक्यं महीतले । अवश्यमेव कर्तव्यं मया राज्यमतः स्थिरम् ॥ २४० ॥
अन्यदा चिन्तयित्वेदं छित्त्वा वंशत्रयं ततः । गच्छन् स ब्राह्मणः शीघ्रं करकण्डेन विलोकितः ॥२४१॥
दृष्ट्वा पलायमानं तं सवंशं हृष्टचेतसम् । करकण्डेन त्रयो वंशा गृहीतास्तत्करादरम् ॥ २४२ ॥
ततः स सुमतिर्विप्रः कुमारं वीक्ष्य रूपिणम् । सर्वलक्षणसंपूर्णं दध्यौ विस्मितमानसः ॥ २४३ ॥
यो यथा मुनिनाऽऽदिष्टः समस्तधरणीतले । राजा सोऽयं मया दृष्टो भूपतिर्न भवाम्यहम् ॥२४४॥
करकण्डोऽभाणि विप्रेण मया विस्मयमीयुषा । भो भो कुमार मद्वाक्यं शृणु नामैकचित्ततः ॥२४५॥
वंशत्रयमिदं वीक्ष्य श्मशानस्थितसाधुना । आदेशोऽयं समादिष्टो मत्पुरोऽवितथो महान् ॥२४६॥
यो मेदिनीतले कोऽपि वंशानेतान् गृहीष्यति । स भविष्यति भूपालः साधिताखिलमण्डलः २४७॥
इदानीं सोऽयमादेशः संजातो यो यतीरितः । तेनाखिलमहीमध्ये भूपतिस्त्वं भविष्यसि ॥२४८॥
यतो भावी तवैकोऽत्र सितच्छत्रस्य दण्डकः । अन्योऽङ्कुशस्य शुभ्रस्य ध्वजस्यान्यो यथाक्रमम् ॥२४९॥
तेन वंशत्रयस्यापि त्वया यत्नो विधीयताम् । यद्येकोऽत्र वंशस्य विप्रमेऽपि हि भूपते ॥२५०॥
तव राज्ये हि संजाते मम अभिपदं त्वया । अवश्यमेव दातव्यं धर्मनिश्चितचेतसा ॥ २५१ ॥
एवं निगद्य तं तत्र सुमतिः सुमतिर्द्विजः । जगाम प्रीतचेतस्कस्तदानीं निजमालयम् ॥ २५२ ॥
करकण्डोऽपि तद्रक्षन् वंशानादाय द्विजार्पितान् । श्मशानवृक्षमूले च सुप्तोऽयं श्रमहानये ॥२५३॥
अथ दन्तिपुराधीशो राजाऽयं बलवाहनः । पुत्रहीनो गुणाधारो ममार वसुधाधिपः ॥ २५४ ॥
राज्ययोग्यो न कोऽप्यस्ति तद्वंशे भविता भुवि । तदभावेऽखिलो लोको जगामाकुलतां पराम् २५५
स्थानं विधाय नीरेण कुङ्कुमेन च चन्दनम् । सुगन्धिपुष्पमालाश्च तथा धूपेन धूपनम् ॥ २५६ ॥
तूर्याणि समन्तात्तानि बधिरीभूतखानि च । भद्रपदविनिर्माणा पट्टा रत्नहारिणी ॥ २५७ ॥
यस्येदं सकलं त्वङ्गैर्विहितं राजहस्तिनः । शुभ्रं करकुम्भं तं सुगजं भूपमर्चितम् ॥ २५८ ॥

1 प नरवागर्भं कुमारेण. 2 प कुम्भम्, पत्र कुम्भम्. 3 पत्र [illegible] 4 पत्र यदमीदृग्. 5 प कुम्भम्, पत्र कुम्भम्. 6 पत्र कुम्भम्. 7 [ ]. 8 पत्र [illegible] 9 प [illegible] 10 प भिदीवत. 11 पत्र भिस्कत्री. 12 पपत्र कुम्भम्. 13 प दत्तनेरैके. 14 पपत्र कुम्भम्.

आरामसमायाम सौधं साम्बुरं सरितां तटम् । ताम्यादिकमतिक्रम्य श्मशानं प्राप्य कुञ्जरः ॥ २५९ ॥
विपरीत्य स कर्कण्डुं सुखं तरुतले तदा । करकुम्भजलैः स्नाप्य स्वपृष्ठे कृतवान् करी ॥ २६० ॥
राजहस्ती समादाय कन्दर्पसमविभ्रमम् । करणाद् निनायाशु सूर्यमङ्गलनिस्वनैः ॥ २६१ ॥
आस्थानमण्डपं प्राप्य मणिस्तम्भविनिर्मितम् । सिंहासने सुमोचाय कर्कण्डुं कलकुञ्जरः ॥ २६२ ॥
अथ हेमघटैः स्नाप्य कुङ्कुमेनाभिलिप्य च । पुष्पमालाभिरापूज्य भूषयामास तं करी ॥ २६३ ॥
पट्टबन्धं विधायास्य कर्कण्डस्य नराधिपाः[2] । भक्तिपस्खलद्गात्रा विनेमुः पदपङ्कजम् ॥ २६४ ॥
कनकं रजतं रत्नं तुरङ्गं करिवाहनम् । ददुर्महत्तरा हृष्टा याचकेभ्यो मुहुर्मुहुः ॥ २६५ ॥
श्रीमद्दन्तिपुरे राज्यं कर्कण्डो जितशात्रवम् । चकार धर्मसामर्थ्यात् पाकशासनवद् दिवि ॥ २६६ ॥
एकेन शतपत्रेण विहितं जिनपूजनम् । धनदत्तेन गोपेन भक्तिनिर्भरचेतसा ॥ २६७ ॥
तस्य धर्मस्य सामर्थ्यात् स्वर्गे देवो बभूव सः । नान्दीस्तूपकस्थाने देवदेवीमनोरमे ॥ २६८ ॥
तत्सुखं वैबुधं भुक्त्वा मानसेष्टं च्युतोऽमुतः । दन्तिवाहनभूपस्य पद्मावत्याः सुतोऽभवत् ॥२६९॥
एकपद्मकृतं पुण्यं ज्ञात्वा गोपस्य सज्जनाः । धर्मं कुरुत जैनेन्द्रं येन यातं[3] जिनेशितम् ॥ २७० ॥
एतन्मध्ये विलोक्याशु कर्कण्डस्य महीपतेः । प्रादुरासन् महाविद्या बालदेवस्य तद्दिने ॥ २७१ ॥
आस्थानमण्डपस्थस्य कर्कण्डस्य नरेशिनः । जगाद सकलान् सभ्यान् बालदेवो नभःस्थितः ॥२७२॥
भो भो जनसमूहाश्च[4] मदीयं वचनं परम् । आकर्णयैकचित्तेन प्रविहाय महारवम् ॥ २७३ ॥
एतन्मातङ्गरूपेण श्मशाने रक्षितं मया । कर्कण्डुरस्य कुमारोऽपि तथाऽयं परिपालितः ॥ २७४ ॥
नाहं भवामि मातङ्गो न मातङ्गसुतोऽपि च । कुमारः सुकुमारोऽयं महावंशसमुद्भवः[5] ॥ २७५ ॥
[illegible]नान्तेऽभूच्चम्पायां पुरि भूपतिः । दन्तिवाहननामाऽस्य प्रिया पद्मावती प्रिया ॥२७६॥
तस्याः सुतः कुमारोऽयं रूपराजितविग्रहः । इहानीतः परं वृद्धिं मया मातङ्गवेषिणा ॥ २७७ ॥
पद्मावती महादेवी तपो जैनं विधाय च । अत्रैव नगरे साध्वी स्थिताऽऽर्या शीलशालिनी ॥२७८॥
इदं विद्याधरः सर्वं कुमारस्य शुभेहितम् । कथयित्वा स्वकीयं च लोकस्य सपुरं ययौ ॥ २७९ ॥
कर्कण्डुभूभुजा तेऽत्र भयो यथा कृपान्वया[6] । स्वात्मजस्वजनानां हि कृत्वा दत्ता मनोहराः २८०॥
तत्र शुभतिथिं ज्ञात्वा[7] मण्डपाय विधानतः । कर्कण्डोऽयं महाराजो महाभिषवं ददौ ॥ २८१ ॥
पद्मावत्यार्यिकाऽऽख्यास्य कलिङ्गविषयाधिपम् । कर्कण्डुभूपतिं प्रापत् सुतवात्सल्यतत्परात् ॥ २८२ ॥
दृष्ट्वा स्वमातरं प्राप्तं प्रोत्थाय हरिविष्टरात् । चकार महतीं पूजां कर्कण्डोऽस्या विधानतः ॥२८३[8]॥
अथ सिंहासनस्थस्य कर्कण्डस्य महीपतेः । दन्तिवाहनदूतोऽयं आगम्यार्थं[9] जगादमुम् ॥ २८४ ॥
अङ्गदेशाधिपो राजा दन्तिवाहननामकः । महाराजाधिराजोऽयं भवन्तं वक्ति मन्मुखात् ॥ २८५ ॥
यथा चम्पापुरी पुण्यां कलिङ्गविषयाधिप[10] । सर्वसैन्यसमुदायेन त्वमागच्छ मदन्तिके ॥ २८६ ॥
दन्तिवाहनदूतस्य निशम्य वचनं तदा । जगादेमं महाकोपात् कलिङ्गविषयाधिपः ॥ २८७ ॥
किमङ्गाख्येन देशेन किं चम्पाख्यपुराऽपि वा । तत्सामेन न मे कार्यं दन्तिवाहनभूभुजा ॥२८८॥
किं स्वल्पसाधनो राज्यं किं गजाः किं तुरङ्गमाः । मे रथाः किं च पादाता येनैवं वक्ति स्वल्पति २८९
एवं निगद्य तं दूतं चण्डीकृत्य सहस्रशः । कर्कण्डुभूपतिः भीमं प्राहिणोत् तदन्तिकम् ॥२९ ॥

1 क करकण्डं [करकण्डं]. 2 क नराधिपः 3 [यात]. 4 प वनवनान्तरस्थ 5 कज इत्याद्यनुस्था
6 क °यामीय. 7 कज विगतिथि 8 All the Mss. interchange the places of 283 and 284, but I have followed the marginal suggestion of प looking to the trend of the story 9 क ज्ञ्यमाने 10 प °विषयाधिप

क्रमेण प्राप्य त दूतो दन्तिवाहनभूभुजम् । जगाद विस्मितस्वान्तो वेपिताखिलविग्रहः ॥२९१॥
कलिङ्गाधिपतिर्नाथ नगरागमपि[1] स्फुटम् । भवन्तं नरसिंह स तृणायापि न मन्यते ॥ २९२ ॥
स [2]दूतवाक्यतस्तेन सेनया चतुरङ्गया । दन्तिवाहनभूपेन निर्ययौ नगराद् बहिः ॥ २९३ ॥
अथ सान्नाहिकी[3] भेरी दध्वान करिपृष्ठगा । श्रीकरकण्डसमादेशान्मन्द्रं[4] नरकराहता ॥ २९४ ॥
श्रुत्वा तन्निनदं भूपा मन्त्रिणो भटसेवकाः । नृपद्वारं परिप्रापुः संग्रामकृतबुद्धयः ॥ २९५ ॥
सन्नाहभेरीरावेण करकण्डं सकलं बलम् । सन्नद्धं विहितारावं चातुरङ्गं रणोत्सुकम् ॥ २९६ ॥
विधाय कञ्चुकं दिव्यं घनं कार्दमिकं पुरम् । स्कन्धविन्यस्ततोणीरा द्रुतं चेलुर्धनुर्भृतः ॥ २९७ ॥
आदाय फरकं दिव्यां पूर्णिमाचन्द्रसन्निभाम् । करवालकरा वीरास्सन्नद्धा भयसुनराः ॥ २९८ ॥
धनुर्विद्यासमाधारकुन्तहस्ता भटोत्तमाः । तदनु प्रस्थिता गन्तुं दूरोच्छलनकारिणः ॥ २९९ ॥
चाश्वस्था नगोत्तुङ्गाः स्रवन्तो दानदायिनः । महामात्रसमारूढा जग्मुस्तदनु दन्तिनः ॥ ३०० ॥
कनत्कनकनिर्माणमध्ये माणिक्यराजिताः । सारथिप्रेरिता यान्ति चलद्वाजियुगा रथाः ॥ ३०१ ॥
अश्ववारसमारूढा वातमानप्रयायिनः । वाताश्च सत्वयो यान्ति हेषितव्याप्तदिङ्मुखाः ॥ ३०२ ॥
आत्माश्वमुपारूढश्चलच्चामरवीजितः । समुच्छ्रितसितच्छत्रो वन्दिवृन्दारकस्तुतः ॥ ३०३ ॥
तुरङ्गेषु समारूढैर्मण्डलेषु निषादिभिः । बहुभिः संवृतो याति करकण्डवसुधाधिपः ॥ ३०४ ॥[5]
नदीं सरोवरं घोषं पर्वतं गहनं वनम् । पुण्याश्रमं महातीर्थं देशं जनसमाकुलम् ॥ ३०५ ॥
स्वसैन्यसमुदायेन महासंपत्समीक्षया । अतिक्रम्य क्रमात् प्राप चम्पाऽऽख्यां नगरीं नृपः ॥३०६॥[6]
सैन्यद्वयं महोत्साहं संग्रामरसलम्पटम् । अन्योन्यमण्डनासक्तं बभूव कृतनिस्वनम् ॥ ३०७ ॥
अत्रान्तरे परिप्राप्य दन्तिवाहनभूपतिम् । पद्मावत्यार्जिका शीघ्रं जगादेति विचक्षणा ॥ ३०८ ॥
किं त्वया कर्तुमारब्धं पुत्रेण सह भण्डनम् । संसारकारणं राज्यकीर्तिपरिध्वंसनम् ॥ ३०९ ॥
आकर्ण्य तद्वचो राजा सद्योत्पन्नविस्मयम् । जगाद तामतिस्पष्टं कौतुकव्याप्तमानसः ॥ ३१० ॥
क्व समागताऽसि त्वं किंनामा काऽसि सुन्दरि । कथं वा नन्दनस्त्वार्ये ब्रूहि सत्यं ममाधुना ॥३११॥
नरेन्द्रवचनं श्रुत्वा जगावार्या ततः पुनः । शृण्वेकचित्ततो राजन् यथादृष्टं वदामि ते ॥ ३१२ ॥
त्वं दन्तिवाहनो राजपुत्रीपोऽन्तो मदुक्तितः । अहं पद्मावती नीता त्वत्कृतेन विदेशताम् ॥३१३॥
सरोवरं प्रविष्टस्य गजस्य स्वेच्छया । अहं गर्भस्थितस्यास्य पुण्यैर्नीता चलत्स्थलम् ॥३१४॥
ततो दन्तिपुराभ्यासे श्मशानं प्राप्य भीषणम् । सल्लक्षणसंपूर्णं प्रसूतेमं[7] शिशुं परम् ॥ ३१५ ॥
बालदेवेन खेगेन वृद्धिं नीतोऽयमर्भकः । ततो मया तपो जैनं गृहीतं त्वद्वियोगतः ॥ ३१६ ॥
अपुत्रो मृत्युमापन्नो बलवाहनभूपतिः । जातो दन्तिपुराधीशः स्वपुण्यैरेष नन्दनः ॥ ३१७ ॥
कण्डूकण्डूगृहीतः सन् शिशुत्वे बालको यतः । ततः करकण्डनामास्य यथार्थं विहितं मया ॥३१८॥
निशम्यार्यावचः सर्वं दन्तिवाहनभूपतिः । विहाय वैरसंबन्धं बभूव प्रीतमानसः ॥ ३१९ ॥
निगद्य पुत्रसंबन्धं दन्तिवाहनभूभुजः । पद्मावत्यार्यिका शीघ्रं जगाम स्वसुतान्तिकम् ॥ ३२० ॥
वेगेन प्राप्य वत्साथ करकण्डं निजगाद सा । पिता तव विभातु ते पुत्र युद्धं न युज्यते ॥३२१॥
श्रुत्वा पद्मावतीवाक्यं करकण्डो निजगाद ताम् । कथं मातः पिताऽयं मे ब्रूहि विस्मितचेतसः ॥३२२॥
अथापि नन्दनो भूप पद्मावत्या स्फुटाक्षरम् । स्नेहानुरक्तचित्तस्य पिता पुत्रस्य सन्धितः ॥ ३२३ ॥
पुत्राहं हस्तिना नीता भयघातस्य पश्यतः । सरोमठनिविष्टेन मुक्ताऽङ्गेन सरस्तटे ॥ ३२४ ॥

---

1 प भूद्भवम्, 2 पब सम्याप्यर्वति [समागमपि]. 3 [स्फुटम्]. 4 प सर्वाहिकी 5 पब नरकाहिताः. 6 प स्तुरितम्. 7 पपत्र पुष्पम्. 8 पपत्र पुष्पम्. 9 [प्रसूतेयं].

क्रमेण प्राप्य तं दूतो दन्तिवाहनभूभुजम्[1] । जगाद विस्मितस्वान्तो वेपिताखिलविग्रहः ॥२९१॥
कलिङ्गाधिपतिर्नाथ नगराग्रमपि[2] स्फुटम् । भवन्तं नरसिंह स तृणायापि न मन्यते ॥ २९२ ॥
स [3]दूतवाक्यतस्तेन सेनया चतुरङ्गया । दन्तिवाहनभूपेन निर्ययौ नगराद् बहिः ॥ २९३ ॥
अथ सांग्रामिकीं[4] भेरीं दध्वान करिपृष्ठगा । श्रीकरकण्डसमादेशान्मन्द्रं नरकराहता ॥ २९४ ॥
श्रुत्वा तन्निनदं भूपा मन्त्रिणो भटसेवकाः । नृपद्वारं परिप्रापुः संग्रामकृतोद्यमाः ॥ २९५ ॥
सन्नाहभेरिरावेण करकण्डं सकलं बलम् । सन्नद्धं विहितायासं चातुरङ्गं रणोत्सुकम् ॥ २९६ ॥
विधाय कञ्चुकं दिव्यं घनं कार्दमिकं परम् । स्कन्धविन्यस्ततोणीरा द्रुतं चेलुर्धनुर्भृतः ॥ २९७ ॥
आदाय फलकां दिव्यां पूर्णिमाचन्द्रसंनिभाम् । कलितच्छुरिका धीरास्तदनु प्रचलुर्नराः ॥ २९८ ॥
घनसिंहासमाक्रान्तकुन्तहस्ता भटोत्तमाः । तदनु प्रस्थिता गन्तुं द्रोहोल्लङ्घनकारिणः ॥ २९९ ॥
चारुवंशा नगोत्तुङ्गाः सुदन्ता दानदायिनः । महामात्रसमारूढा अग्रतस्तदनु दन्तिनः ॥ ३०० ॥
कनत्कनकनिर्माणमध्ये माणिक्यराजिताः । सारथिप्रेरिता यान्ति बलवाजियुगा रथाः ॥ ३०१ ॥
अश्ववारसमारूढा वातमानसधाविनः । वात्याश्च सप्तयो यान्ति हेषितव्याप्तदिङ्मुखाः ॥ ३०२ ॥
जातोऽश्वपृष्ठमारूढश्चलचामरवीजितः । [6]समुच्छ्रितसितच्छत्रो बन्दिवृन्दारकस्तुतः ॥ ३०३ ॥
तुरङ्गेषु समारूढैश्चलत्सु निषादिभिः । बहुभिः संवृतो याति करकण्डवसुधाधिपः ॥ ३०४ ॥[7]
नदीं सरोवरं घोषं पर्वतं गहनं वनम् । पुण्याश्रमं महातीर्थं देशं जनसमाकुलम् ॥ ३०५ ॥
ससैन्यसमुदायेन महासद्मीक्षया । अतिक्रम्य क्रमात् प्राप चम्पाऽऽख्यां नगरीं नृपः ॥३०६॥[8]
सैन्यद्वयं महोत्साहं संग्रामरसलम्पटम् । अन्योन्यमण्डनासक्तं बभूव कृतनिस्वनम् ॥ ३०७ ॥
अत्रान्तरे परिप्राप्य दन्तिवाहनभूपतिम् । पद्मावत्यार्यिका शीघ्रं जगादेति विचक्षणा ॥ ३०८ ॥
किं त्वया कर्तुमारब्धं पुत्रेण सह भण्डनम् । संसारकारणं राजन्नकीर्तिपरिवर्धनम् ॥ ३०९ ॥
आकर्ण्य तद्वचो राजा सद्यपोत्पत्तिकारणम् । जगाद तामविस्पष्टं कौतुकव्याप्तमानसः ॥ ३१० ॥
कुतः समागताऽसि त्वं किंनामा काऽसि सुन्दरि । कथं वा नन्दनस्त्वार्ये ब्रूहि सत्यं ममाधुना ॥३११॥
नरेन्द्रवचनं श्रुत्वा जगादार्या ततः पुनः । शृण्वेकचित्ततो राजन् यथावृत्तं वदामि ते ॥ ३१२ ॥
त्वं दन्तिवाहनो राजपुत्रीणोऽतो मदुक्तितः । अहं पद्मावती नीता स्वप्नेन विदेशस्त्वाम् ॥३१३॥
सरोवरं प्रविष्टस्य गजस्य सलिलेच्छया । अहं गर्भस्थितस्यास्य पुण्यैर्नीता बलात् स्थलम् ॥३१४॥
ततो दन्तिपुरासन्नं श्मशानं प्राप्य भीषणम् । सल्लक्षणसम्पूर्णं प्रसूतेऽहं[9] शिशुं परम् ॥ ३१५ ॥
बाल्येषेन खेटेन वृद्धिं नीतोऽयमर्भकः । ततो मया व्रतं जैनं गृहीतं त्वद्वियोगतः ॥ ३१६ ॥
अपुत्रो मृतिमापन्नो बलवाहनभूपतिः । जातो दन्तिपुराधीश स्वपुण्यैस्तव नन्दनः ॥ ३१७ ॥
कण्डूकण्डूगृहीतः सन् शिशुत्वे बालको यतः । ततः करकण्डनामास्य यथार्थं विहितं मया ॥३१८॥
निशम्यार्यावचः सत्यं दन्तिवाहनभूपतिः । विहाय वैरसम्बन्धं बभूव प्रीतमानसः ॥ ३१९ ॥
निगद्य पुत्रसंबन्धं दन्तिवाहनभूभुजः । पद्मावत्यार्यिका शीघ्रं जगाम स्वसुतान्तिकम् ॥ ३२० ॥
वेगेन प्राप्य तत्पार्श्वं करकण्डं निजगाद सा । पित्रा समं विधातुं ते पुत्र युद्धं न युज्यते ॥३२१॥
श्रुत्वा पद्मावतीवाक्यं करकण्डो निजगाद ताम् । कथं माता पिताऽयं मे ब्रूहि विस्मितचेतसः ॥३२२॥
अवाचि नन्दनो भूप पद्मावत्या स्फुटाक्षरम् । द्वेषाकुलितचित्तस्य पिता पुत्रस्य सन्धितः ॥३२३॥
पुत्राहं हस्तिना नीता भवतातस्य पश्यतः । सरोजलनिविष्टेन शुण्डाऽनेन सरस्तटे ॥ ३२४ ॥

1 प भूभुजम्. 2 पज्ञ नगरागमपि [नगरागमम्]. 3 [वाक्य°]. 4 प साग्रामिकी. 5 पज्ञ नरकराहिता. 6 प समुच्छ्रित° 7 पफज्ञ युग्मम्. 8 पफज्ञ युग्मम्. 9 [प्रसवेऽहं].

आरामभापन्नं सौधं साम्रं सरिता तटम् । याम्यादिकमतिक्रम्य श्मशानं प्राप्य कुमारः ॥ २५९ ॥
विपरीत्य स करकण्डुं सुप्तं तरुतले तदा । करकुम्भजलैः स्नाप्य स्वपृष्ठे कृतवान् करी ॥ २६० ॥
राजहस्ती समादाय कन्दर्पसमविभ्रमम् । वरवत्सं निनायाशु सूर्यमङ्गलनिस्वने ॥ २६१ ॥
आस्थानमण्डपं प्राप्य मणिस्तम्भविनिर्मितम् । सिंहासने समोचार्य करकण्डं कुमारकम् ॥ २६२ ॥
अथ हेमघटैः स्नाप्य कुङ्कुमेनाभिलिप्य च । पुष्पमालाभिरापूज्य भूषयामास तं करी ॥ २६३ ॥
पट्टबन्धं विधायास्य करकण्डस्य नराधिपाः । मणिमस्खलवर्गाभं विनेमुः पदपङ्कजम् ॥ २६४ ॥
कनकं रजतं रत्नं सुवर्णं करिवाहनम् । ददुर्महत्तरा हृष्टा याचकेभ्यो मुहुर्मुहुः ॥ २६५ ॥
श्रीमद्दन्तिपुरे राज्यं करकण्डो जितशात्रवम् । चकार धर्मसामर्थ्यात् पाकशासनवद्दिवि ॥ २६६ ॥
एकेन व्रतपद्मेन विहितं जिनपूजनम् । धनदत्तेन गोपेन भक्तिनिर्भरचेतसा ॥ २६७ ॥
अस्य धर्मस्य सामर्थ्यात् स्वर्गे देवो बभूव सः । नान्दीतूर्यकलस्थाने देवदेवीमनोरमे ॥ २६८ ॥
तत्सुखं दैव्यं भुक्त्वा मानसेष्टं च्युतोऽच्युतः । दन्तिवाहनभूपस्य पद्मावत्याः सुतोऽभवत् ॥२६९॥
एकपद्मकृतं पुण्यं ज्ञात्वा गोपस्य सज्जनाः । धर्मं कुरुत जैनेन्द्रं येन सार्वं जिनेशिताम् ॥ २७० ॥
पट्टबन्धं विलोक्याशु करकण्डस्य महीपतेः । प्रादुरासन् महाविद्या बालदेवस्य सन्निधे ॥ २७१ ॥
आस्थानमण्डपस्थस्य करकण्डस्य नरेशिनः । जगाद सकलान् सभ्यान् बालदेवो नमःस्थितः ॥२७२॥
भो भो जनसमूहाश्च मदीयं वचनं परम् । आकर्णयैकचित्तेन प्रविहाय महारवम् ॥ २७३ ॥
एतन्मातङ्गरूपेण श्मशाने रक्षितं मया । करकण्डाख्यः कुमारोऽपि तथाऽयं परिपालितः ॥ २७४ ॥
नाहं भवामि मातङ्गो न मातङ्गसुतोऽपि च । कुमारः सुकुमारोऽयं महावंशसमुद्भवः ॥ २७५ ॥
अङ्गाख्यस्य जनान्तेऽभूच्चम्पायां पुरि भूपतिः । दन्तिवाहननामाऽस्य प्रिया पद्मावती प्रिया ॥२७६॥
तस्याः सुतः कुमारोऽयं रूपराजितविग्रहः । इहानीतः परं वृद्धिं मया मातङ्गवेषिणा ॥ २७७ ॥
पद्मावती महादेवी तपो जैनं विधाय च । अत्रैव नगरे साध्वी स्थिताऽऽर्या शीलशालिनी ॥२७८॥
इदं विद्याधरः सर्वं कुमारस्य सुचेष्टितम् । कथयित्वा स्वकीयं च लोकस्य स पुरं ययौ ॥ २७९ ॥
करकण्डभूभुजा तेऽत्र नयो वंशाः कपालकाः । छत्राद्यध्वजानां हि कृत्वा दत्ता मनोहराः २८०॥
तथा सुमतिसंज्ञाय श्रावकाय विधानतः । करकण्डोऽथ महाराजो महामात्यपदं ददौ ॥ २८१ ॥
पद्मावत्सर्मिकाऽऽभस्य कलिङ्गविषयाधिपम् । करकण्डभूपतिं प्रापत् सुतवात्सल्यकारणात् ॥२८२॥
दृष्ट्वा स्वमातरं प्राप्तं प्रोत्थाय हरिविष्टरात् । चकार महतीं पूजां करकण्डोऽस्या विधानतः ॥२८३॥
अथ सिंहासनस्थस्य करकण्डस्य महीपतेः । दन्तिवाहनदूतोऽथ प्राप्याभ्यासं जगाविदम् ॥ २८४ ॥
अङ्गदेशाधिपो राजा दन्तिवाहननामकः । महाराजाधिराजोऽयं भवन्तं वक्ति मन्मुखात् ॥ २८५ ॥
यथा चम्पापुरीं पुण्यां कलिङ्गविषयाधिप । मत्सैन्यसमुदायेन समागच्छ मदन्तिके ॥ २८६ ॥
दन्तिवाहनदूतस्य निशम्य वचनं तदा । समाचष्ट महाकोपात् कलिङ्गविषयाधिपः ॥ २८७ ॥
किमङ्गाख्येन देशेन किं चम्पाख्यपुराऽपि वा । त्वन्नाथेन न मे कार्यं दन्तिवाहनभूभुजा ॥२८८॥
किं स्वप्रसादतो राज्यं किं गजाः किं तुरङ्गमाः । मे रथाः किं च पादात्यं येनैवं वक्ति सन्नतिः २८९
एवं निगद्य तं दूतं कठीकृत्य सत्वरः । करकण्डभूपतिः शीघ्रं माद्दिपाथं तदन्तिकम् ॥२९०॥

---

1 क वरवत्सं [वरवर्त्मं]. 2 क नराधिपः. 3 [सदा]. 4 ख जनसमूहाश्च 5 ख ज कुमारोऽप्यसौ. 6 क °नामेयम्. 7 ख ज विनष्टिना. 8 All the Mss. interchange the places of 283 and 284, but I have followed the marginal suggestion of ख looking to the trend of the story 9 क जनम्पातं 10 ख °विषयाधिपः

क्रमेण प्राप्य तं दूतो दन्तिवाहनभूभुजम् । जगाद विस्मितस्वान्तो वेपिताखिलविग्रहः ॥२९१॥
कलिङ्गाधिपतिर्नाम नगराग्रमपि[2] स्फुरन् । भवन्तं नरसिंहं स तृणायापि न मन्यते ॥ २९२ ॥
स [3]दूतवाक्यतस्तेन सेनया चतुरङ्गया । दन्तिवाहनभूपेन निर्यये नगराद् बहिः ॥ २९३ ॥
अथ सांग्रामिकी[4] भेरी दध्वान करिपृष्ठगा । श्रीकर्कण्डसमादेशान्मन्द्रं नरकराहता ॥ २९४ ॥
श्रुत्वा तन्निनदं भूपा मन्त्रिणो भटसेवकाः । नृपद्वारं परिप्रापुः संग्रामकृतनिश्चयाः ॥ २९५ ॥
सन्नाहभेरीरावेण क्षणार्धं सकलं बलम् । सन्नद्धं विहितारावं चातुरङ्गं रणोत्सुकम् ॥ २९६ ॥
विधाय कञ्चुकं दिव्यं घनं कार्दमिकं पुरम् । स्कन्धविन्यस्ततूणीरा द्रुतं चेलुर्धनुर्भृतः ॥ २९७ ॥
आदाय फरकां दिव्यां पूर्णिमाचन्द्रसंनिभाम् । कम्पितच्छुरा वीरास्तदनु प्रययुर्नराः ॥ २९८ ॥
अमन्दिवासमाकारकुन्तहस्ता भटोत्तमाः । तदनु प्रस्थिता गन्तुं दूरोल्लङ्घनकारिणः ॥ २९९ ॥
चारुवंशा नगोत्तुङ्गा सुदन्ता दानवर्षिणः । महामात्रसमारूढा जग्मुस्तदनु दन्तिनः ॥ ३०० ॥
कनत्कनकनिर्माणमध्ये माणिक्यराजिताः । सारथिप्रेरिता यान्ति चञ्चलाश्वमुखा रथाः ॥ ३०१ ॥
अश्ववारसमारूढा वातमानसयायिनः । वाताश्च सवयो यान्ति हेषितव्याप्तदिङ्मुखाः ॥ ३०२ ॥
जात्याश्वपृष्ठमारूढश्चलच्चामरवीजितः । [6]समुच्छ्रितसितच्छत्रो वन्दिवृन्दारकस्तुतः ॥ ३०३ ॥
तुरङ्गेषु समारूढैश्चञ्चलेषु निषादिभिः । बहुभिः संवृतो याति कर्कण्डवसुधाधिपः ॥ ३०४ ॥[7]
नदीं सरोवरं घोषं पर्वतं गहनं वनम् । पुण्याश्रमं महातीर्थं देशं जनसमाकुलम् ॥ ३०५ ॥
स्वसैन्यसमुदायेन महासंगरमीप्सया । अतिक्रम्य क्रमात् प्राप चम्पाऽऽख्यां नगरीं नृपः ॥३०६॥[8]
सैन्यद्वयं महोत्साहं संग्रामरसलम्पटम् । अन्योन्यमण्डनासक्तं बभूव कृतनिस्वनम् ॥ ३०७ ॥
अत्रान्तरे परिज्ञाय दन्तिवाहनभूपतिम् । पद्मावत्यार्यिका शीघ्रं जगादेति विचक्षणा ॥ ३०८ ॥
किं त्वया कर्तुमारब्धं पुत्रेण सह भण्डनम् । संसारकारणं राजन् कीर्तिपरिखण्डनम् ॥ ३०९ ॥
आकर्ण्य तद्वचो राजा तस्योत्पत्तिकारणम् । जगाद तामतिस्पष्टं कौतुकव्याप्तमानसः ॥ ३१० ॥
कुतः समागताऽसि त्वं किंनामा काऽसि सुन्दरि । कथं वा नन्दनस्त्वार्ये ब्रूहि सत्यं ममाधुना ॥३११॥
नरेन्द्रवचनं श्रुत्वा जगावार्या तकं पुनः । शृण्वेकचित्ततो राजन् यथातथं वदामि ते ॥ ३१२ ॥
त्वं दन्तिवाहनो राजन्सुवीर्योऽज्ञो मदुक्तितः । अहं पद्मावती नीता स्वकरेण विदेशताम् ॥३१३॥
सरोवरं प्रविष्टस्य गजस्य सलिलाशया । अहं गर्भस्थितस्यास्य पुण्यैर्नीता जलात् स्थलम् ॥३१४॥
ततो दन्तिपुरासन्नं श्मशानं प्राप्य भीषणम् । सर्वलक्षणसंपूर्णं प्रसूतेर्मे[9] शिशुं परम् ॥ ३१५ ॥
बालदेवेन खेटेन बुद्धिनीतोऽयमर्भकः । ततो मया तपो जैनं गृहीतं त्वद्वियोगतः ॥ ३१६ ॥
अपुत्रो मृतिमापन्नो बलवाहनभूपतिः । जातो दन्तिपुराधीशः स्वपुण्यैस्तव नन्दनः ॥ ३१७ ॥
कण्डूकण्डूगृहीतः सन् विख्यातो बालको यतः । ततः कर्कण्डनामास्य यथार्थं विहितं मया ॥३१८॥
निशम्यार्यावचः सत्यं दन्तिवाहनभूपतिः । विहाय वैरसंबन्धं बभूव प्रीतमानसः ॥ ३१९ ॥
निवेद्य पुत्रसंबन्धं दन्तिवाहनभूभुजः । पद्मावत्यार्यिका शीघ्रं जगाम स्वसुतान्तिकम् ॥ ३२० ॥
वेगेन प्राप्य तत्पार्श्वं कर्कण्डं निजगाद सा । पित्रा समं विधातुं ते पुत्र युद्धं न युज्यते ॥३२१॥
श्रुत्वा पद्मावतीवाक्यं कर्कण्डो निजगाद ताम् । कथं मातः पिताऽयं मे ब्रूहि विस्मितचेतसः ॥३२२॥
अथापि नन्दनो भूपः पद्मावत्या स्फुटाक्षरम् । स्नेहानुरक्तचित्तस्य पिता पुत्रस्य सन्धितः ॥३२३॥
पुत्राऽहं हस्तिना नीता भयत्रासस्य पश्यतः । सरोवरनिविष्टेन शुण्डाग्रेण सरस्तटे ॥ ३२४ ॥

1 प भूभुजम्. 2 पज नमनागमपि [नगराग्रमपि]. 3 [दूतं]. 4 प सांग्रामिकी 5 पज भरण्यादिव 6 प समुच्छ्रित 7 पफज शुभम्. 8 पफज शुभम्. 9 [प्रसूतेर्मे].

प्राप्य दन्तिपुरासन्नं श्मशानं भीषणं सुत । उत्पन्नोऽसि यथा तत्र मम पुण्यानुभावतः ॥ ३२५ ॥
वर्धितो मातङ्गेन खगेन स्वपुत्रेच्छया । सुत दीक्षा मया जैनी गृहीताऽभयदायिनी ॥ ३२६ ॥
यस्मादवरसेनेन्द्रे मृतिं प्राप्ते सुतोत्तम । स्थापितोऽयं महाराज्ये त्वं मुदा राजहस्तिना ॥ ३२७ ॥
तस्मादुत्थाय पुत्र त्वं कुरु तावत्क्षमापणम् । तत्सन्मुखं परिप्राप्य भीरोप पत पादयोः ॥ ३२८ ॥
स्वकरीपृष्ठात् समुत्तीर्य तदानीं मातृवाक्यतः । जगाम सन्मुखं हृष्टः करकण्डो जनकस्य सः ॥ ३२९ ॥
दृष्ट्वा तनूजमायान्तं सहसोत्तीर्य वाजिनः । तत्सन्मुखमभीयाय नरेन्द्रो दन्तिवाहनः ॥ ३३० ॥
परस्परं समासाद्य स्नेहनिर्भरमानसौ । नितान्तं जनताऽऽश्चर्यं तदानीमालिलिङ्गतुः ॥ ३३१ ॥
अन्योन्यकुशलं पृष्ट्वा वोपगमप्रभाषिणौ । उपविष्टौ यथास्थानं तस्थौ हृष्टतनूरुहौ ॥ ३३२ ॥
तूर्याणि समवाद्यानि कारयित्वा नराधिपः । राज्यपट्टं परायोग्यं करकण्डस्य बबन्ध सः ॥ ३३३ ॥
सामन्तमन्त्रियोधानां प्रकृतीनां प्रयत्नतः । सुतं समर्पयामास सस्नेहं दन्तिवाहनः ॥ ३३४ ॥
हस्तिनो वाजिनः कोशं स्यन्दनान् पत्तिकानपि । समस्तां मेदिनीं राजा ददौ पुत्राय धीमते ॥ ३३५ ॥
नीतियुक्तः सदा सेव्यः प्रजापालनतत्परः । चिरं कालं निरातङ्कं पाहि भूमण्डलं सुत ॥ ३३६ ॥
एवमुक्त्वा सुतं सर्वं जनं संभाष्य सक्रमम् । राजा वैराग्यसंपन्नो नन्दनाख्यवनं ययौ ॥ ३३७ ॥
तत्र दृष्ट्वा मुनिं धीरं वन्दित्वा बहुभक्तितः । पृष्ट्वा धर्मं श्रुतं ज्ञात्वा स्वहितं च यथाक्रमम् ॥ ३३८ ॥
बाह्यमाभ्यन्तरं संगं हित्वा बहुनरेश्वरैः । दीक्षां श्रीधर्मसेनान्ते दधौ श्रीदन्तिवाहनः ॥ ३३९ ॥
अथ चम्पापुरे श्रीमान् साधितारातिमण्डलः । चकार सरसं राज्यं तदा करकण्डभूपतिः ॥ ३४ ॥
अङ्गवङ्गकलिङ्गादिसामन्ताः पृथुकीर्तयः । मस्तकेन प्रतीच्छन्ति शासनं यस्य भीतितः ॥ ३४१ ॥
द्रविडेषपदे देशे चेरचोलौ सपाण्ड्यकौ । करकण्डस्य नरेन्द्रस्य न वशौ तौ बभूवतुः ॥ ३४२ ॥
चेरचोलादिनृपान् ज्ञात्वा करकण्डो नतिवर्जितान् । दूतं कुलक्रमायातं प्रविसाय तदन्तिकम् ॥ ३४३ ॥
ततः क्रमेण संप्राप्य दूतस्थान् सकलानपि । पुरः स्थितो बभाषेति कृतप्रश्रयपूर्वकम् ॥ ३४४ ॥
युष्मान् वदति करकण्डो मन्मुखेन महाप्रभुः । मत्पादाराधनाद्देवो राज्यं भुञ्जन्तु यथोऽप्यरम् ॥ ३४५ ॥
निशम्य तद्वचस्ते च त्रयोऽपि हरिविक्रमाः । निगदन्ति वचो दूतं वचनैः सस्तावहैः ॥ ३४६ ॥
अर्हन्मुनिपदाम्भोजं संसारोच्छेदकारणम् । विहाय पावनं भूपा कुर्मोऽन्येषां न वन्दनाम् ॥ ३४७ ॥
श्रुत्वा तद्वचनं दूतो नतिहीनं स्मयान्वितम् । प्राप्य चम्पां विनीतात्मा पतिमेवमभाषत ॥ ३४८ ॥
भास्वां स्वदन्तिकं राजन् पदमेकं पदादपि । सैन्यलक्ष्मीमदोन्मत्ता नागच्छन्ति त्रयोऽपि ते ॥ ३४९ ॥
निशम्य भारतीमस्य कोपारुणनिरीक्षणः । प्रस्थितो नगरं गन्तुं सेनया चतुरङ्गया ॥ ३५० ॥
वृतोऽन्यैर्बहुसंरोधैः कुञ्जरैर्मदशालिभिः । रथैः सत्कलनिर्घोषैः पत्तिभिः [illegible] ॥ ३५१ ॥
चम्पापुराधिपो वेगात्सर्वदलनेच्छया । दक्षिणापथदेशोत्थं तेराख्यं नगरं ययौ ॥ ३५२ ॥
ततो दक्षिणदिग्भागे तेरस्य नगरस्य च । स्कन्धावारोऽस्य संतस्थे सन्मार्गभ्रमहानये ॥ ३५३ ॥
ज्ञात्वा करकण्डमायातं शिवो मित्राधिपस्तदा । आययाम तकं द्रष्टुं बहुनाटकसेनया ॥ ३५४ ॥
नृपद्वारं समासाद्य द्वारपालनिवेदितः । सम्मतेन शिवः प्राप करकण्डास्थानमादरात् ॥ ३५५ ॥
दूरादानम्य भूपालं समामध्यस्थितं शिवः । मस्तकेन नराधीशं करकुड्मलयोगिना ॥ ३५६ ॥

1 पक्ष यथातव 2 प (=हस्तिपुरम्). 3 प [illegible] ज [illegible] 4 पफक्ष कुम्भम्. 5 पक [illegible] ख [illegible] 6 पक्ष [illegible] 7 पफक्ष कुम्भम्. 8 पक पुत्रेण [illegible] 9 पफक्ष कुम्भम्. 10 पक्ष करकण्डमायान्तं. 11 पक सैन्या. 12 पक [illegible] ज [illegible]

संभाषणं विधायास्य निविष्टस्य धरातले । ताम्बूलं च प्रदायेमं पप्रच्छेदं महीपतिः ॥ ३५७ ॥
त्वया शिवाट्या भ्रमसि वनमध्ये दिवानिशम् । किं किंचिद्दृष्टमाश्चर्यं तन्निवेदय मेऽधुना ॥ ३५८ ॥
नरेन्द्रवचनं श्रुत्वा जगौ म्लेच्छाधिपोऽपि तम् । दृष्टमेकं मया राजन्नाश्चर्यं परमे वने ॥ ३५९ ॥
धर्माधिपः पुनः प्राह श्रुत्वा तद्भारतीमिमाम् । कीदृक् तद्दृष्टमाश्चर्यं त्वया ब्रूहि ममाधुना ॥३६०॥
इतो दक्षिणदिग्भागे पर्वतोपरि विद्यते । जिनालयः समुत्तुङ्गः सहस्रस्तम्भनिर्मितः ॥ ३६१ ॥
देवासुरनराधीशैरलक्ष्योऽभिविशेष सः । तस्योपरि समुत्तुङ्गशृङ्गामणिरिव स्थितः ॥ ३६२ ॥
सर्वलोककृतत्राणः सर्वलोकमनःप्रियः । देवतारक्षितो नित्यं विद्यते धामलूरकः ॥ ३६३ ॥[1]
अभिषिञ्चन् करेणेमं जलैः पयोरसि स्फुटैः । अर्चयत्यपि मासेन सरोवरसमाहृतैः ॥ ३६४ ॥
कुर्वन् प्रदक्षिणं चास्य भूमिविन्यस्तमस्तकः । दृष्टः स्थितः करी राजन् मया भूधरसंनिभः ॥३६५॥[2]
अस्मिन् वनान्तरे राजन् दृष्टमाश्चर्यमीदृशम्[3] । मया द्रुमलताकीर्णे मनसोऽप्यतिदुर्गमे ॥ ३६६ ॥
कौतुकं यदि तेऽपि स्यात् प्रतीतिर्वा न विद्यते । राजन् पुरस्ततस्तिष्ठ दर्शयामि विसंशयम् ॥३६७॥
शिववाक्यं समाकर्ण्य राजा विस्मितमानसः । जगादेमं पुनः प्रीतो भक्तिप्रह्वतनूरुहः ॥ ३६८ ॥
पुरतस्तिष्ठ मे वत्स यामि तं द्रष्टुमादरात् । आदरो जायते दृष्टे देहिनां चारुवस्तुनि ॥ ३६९ ॥
धर्मानुरागरक्तोऽथ तदा करकण्डभूपतिः । सहस्रस्तम्भसंपन्नं स्नपनं प्राप तत्क्षणम् ॥ ३७० ॥
दृष्ट्वाऽथ स्नपने पुष्पैः पूजयित्वा जिनं नृपः । वन्दित्वा पर्वतस्याग्रमारुरोहातिकौतुकात् ॥ ३७१ ॥
तत्रस्थो नृपतिः पूजां वल्मीकस्य सरोरुहैः । कुर्वाणं करिणं पूज्यमतिशुभ्रं ददर्श सः ॥ ३७२ ॥
धामलूरं विलोक्याशु करिपद्मसमप्रभम् । सोपवासो नृपस्तस्मै पुष्पधूपाक्षतं ददौ ॥ ३७३ ॥
ततः पार्श्वजिनेन्द्रार्चामुत्खातां भूमिनिखने । अधोऽध्यनमध्यस्थां चकार वसुधाधिपः ॥ ३७४ ॥
पुष्पमालाभिरापूज्य हरिविष्टरमभ्यगात् । अर्चां पार्श्वजिनेन्द्रस्य पश्यतीशो मनोहरीम् ॥ ३७५ ॥
सिंहासने समुत्तुङ्गे विचित्रमणिभासुरे[7] । करकण्डादिमहाराजो ददर्श ग्रन्थिमिद्धधीः ॥ ३७६ ॥
जिनसिंहासने ग्रन्थिः शोभते न मनागपि । रूपशालिनिं[6] राजा चिन्तयित्वा जुहाव सः ॥३७७॥
वस्त्रविज्ञानिनं सारमुपाध्यायं पुरःस्थितम् । करकण्डभूपतिः प्राह सोपचारं विशुद्धधीः ॥ ३७८ ॥
कलाविज्ञानसंपन्न प्रतिमालक्षणान्वित । सिंहासनोपरिग्रन्थिमुपाध्याय निराकुरु[10] ॥ ३७९ ॥
निशम्य भूपतेर्वाक्यमुपाध्यायो जगाविमम् । सिंहासनोपरि ग्रन्थौ शिराऽऽस्ते [8]जलवाहिनी ॥३८०॥[11]
पापाग्रन्थिनानेन निरस्तेन नराधिप । विनश्यति तदा सर्वं स्नपनं जलपूरितम् ॥ ३८१ ॥
तद्वचोऽमन्यमानेन मुहुर्वाऽर्यं प्रचोदितः । अवश्यमेव कर्तव्यं ग्रन्थेरस्य त्वयासनम् ॥ ३८२ ॥
यावत् सिंहासनग्रन्थौ मध्ये जलनिवासिनि । ददाति टङ्किकाघातं करकण्डवचनादयम् ॥ ३८३ ॥
तावत्तद्घातनिर्यातजलसंततिधारया । शिरया जलवाहिन्या स्नपनं सकलं भृतम् ॥ ३८४ ॥
ततो स्नपनमालोक्य जलप्लवविनाशितम् । अतीवदुःखितो जातो भूपतिस्तत्क्षणादरम् ॥ ३८५ ॥
तत्र स्नातः शुचीभूय स्थितवानसौ दिनत्रयम् । सोपवासो नृपस्तस्थौ तदानीं दर्भसंस्तरे ॥ ३८६ ॥

1 पफज्ञ धुन्मस्. 2 [एष]. 3 प धुम्मम् फज्ञ धुम्मम्. 4 प दृष्टमाश्चर्यमीदृशम्. 5 Some letters are rubbed away in फ here and there. 6 फ रूपशालिनिं 7 पज्ञ °भासुरः 8 फज्ञ °ग्रन्थि शिरोऽस्ते जलवाहिनी 9 प (and ज as corrected) भूपतिवाक्यमुपाध्यायं. 10 फज्ञ ग्रन्थिमुपाध्याय निराकुरु 11 फज्ञ interchange 380 and 381 and show variants in 380 I have followed the marginal suggestion of

एवं स्थितस्य तस्यात्र विह्वलीभूतचेतसः । तदा नागकुमारोऽसं कार्यवित्तं समाययौ ॥ ३८७ ॥
विधायालापमेतेन कुमारो नागपूर्वकः । स्वयनाधिकचापन्यं प्रारेभेऽस्य प्रभावितुम् ॥ ३८८ ॥
स्याता नील-महानीलौ विन्ध्यार्धनगोत्तमे । भ्रातरौ खेचरपती रूपयौवनशालिनौ ॥ ३८९ ॥
विपाभ्येव विधायाशु दायादैः पुरुविक्रमैः । ततो निर्घाटितौ सन्तौ तेनास्य पुरमागतौ ॥ ३९० ॥
ततो नील-महानीलौ सर्वान् भूगोचरानिमान् । वशीकृत्य पुरेऽत्रैव तस्थतुर्मुदमागतौ ॥ ३९१ ॥
श्रुत्वा पार्श्वजिनेन्द्रस्य महामाहात्म्यसंगतम् । चरितं मुनिसमीपे[2] पवित्रं भव्यपुण्यदम् ॥ ३९२ ॥
स्नपनं पार्श्वदेवस्य सहस्रस्तम्भनिर्मितम् । ताभ्यामिदं गिरावत्र भूप कारापितं परम् ॥ ३९३ ॥
स्नपनाभ्यन्तरे सर्वा रत्नस्वर्णविनिर्मिता । प्रतिमा पार्श्वनाथस्य महातिशयसंगता ॥ ३९४ ॥
राजन् नील-महानीलौ सर्वबान्धवसंगतौ । कालत्रयेऽपि तौ भक्त्या वन्दारू परमोदयौ ॥ ३९५ ॥
महाविभवसंपन्ने नानाजनसमाकुले[3] । राज्यं विदधतौ स्फीतं तस्थतुः खेचरपत्तने ॥ ३९६ ॥
अमितोपपदो वेगो विन्ध्यार्धनगाधरम् । महानीलस्य नीलस्य मित्रं लघ्वा समाययौ ॥ ३९७ ॥
जिनेन्द्रप्रतिमाः सर्वा वन्दित्वाऽत्र स खेचरः । स्वर्णरत्नमयीमेकामचर्चामादाय निर्ययौ ॥ ३९८ ॥
गच्छन् विहायसा सोऽसं स्नपनं वीक्ष्य शोभनम् । गमनाद् भक्तिमापन्नो वेगतो भुवमाप च ॥ ३९९ ॥
ततः पार्श्वजिनेन्द्रस्य तामर्चा वामहस्तके । स्थापयित्वा च खेटोऽसौ स्नपनं भक्तितोऽगमत् ॥ ४०० ॥[4]
वन्दित्वा स्तुतिभिस्तत्र प्रतिमा भक्तितत्परः । भूयः प्राशुकवल्मीकं प्राप खेटोऽतिवेगतः ॥ ४०१ ॥
यावदागत्य तामर्चामुत्क्षिपत्यथमादरात् । तावद् बभूव सा तत्र पर्वतोपरि निश्चला ॥ ४०२ ॥
एवं तां निश्चलां दृष्ट्वा तत्रस्थां प्रतिमावनाम् । भूमौ निधाय खेटोऽगात्तदानीं स्वमनीषितम् ॥ ४०३ ॥
कालेन बहुना भद्र जातोऽयं वामलूरकः । वहमेतं प्रयत्नेन राजन् तिष्ठामि सर्वदा ॥ ४०४ ॥
इदं च स्नपनं दिव्यं मेदिनि जिनभक्तितः । महानीलयुतेनापि कारितं मणिभासुरम् ॥ ४०५ ॥
इदं स्नपनमुत्तुङ्गं जिनं भक्त्यात्मया । रक्षितुं न समर्थोऽहं मौनमादाय संस्थितः ॥ ४०६ ॥
सुवर्णरत्ननिर्माणा स्नपनाभ्यन्तरा स्थिता । अर्चास्तिष्ठन्तु राजेन्द्र जैन्यो रूपसमन्विताः ॥ ४०७ ॥
यस्मिन् दुष्षमाकाले क्षपयन्ते वा न रक्षितुम् । जिनस्य स्नपनं नीरदं[7] दृष्ट्वोदासीनत्वामितः ॥ ४०८ ॥
तेनेदं स्नपनं सारं शिष्टताबलपूरितम् । अस्योपरि परं त्वन्यं त्वं कारापय सांप्रतम् ॥ ४०९ ॥
निशम्य सकलं राजा कुमारो नागपूर्वकः । तमामाद्य सखे तत्र भूपोऽप्यस्मात्समुत्थितः ॥ ४१० ॥
अथ हस्ती परिप्राप्य दृष्ट्वा रम्यं जिनाश्रितम् । गजेन्द्रः पर्वतं तुङ्गमारुरोह त्वरान्वितः ॥ ४११ ॥
सर्वाहारं परित्यज्य समाधिं प्राप्य कुञ्जरः । कालं कृत्वा सहस्रारे बभूव त्रिदशो महान् ॥ ४१२ ॥
अथोत्स्नपनमाश्रित्य शिलाभिः शोभने दिने । राजा सर्वशिल्पकुशलान् श्रीमतामाहूतवानसौ ॥ ४१३ ॥
ततः स्वस्य महादेव्या क्षुल्लकस्य च शोभनम् । स्नपनानां त्रयं श्रीमं कारितं देवैर्महीभुजा ॥ ४१४ ॥
स्नपनानां त्रयस्यापि दुर्गमहठनिस्वने । चकार महतीं पूजां करकण्डो भक्तितत्परः ॥ ४१५ ॥
करकण्डः कृतकर्तव्यः सनया चतुरङ्गया । आशास्यजनतो रथ्ये द्रविडं विषयं ययौ ॥ ४१६ ॥
श्रुत्वा करकण्डमायातं पतिर्वै सैन्यसंपदा । निर्गत्य स्वपुराद्राशु तेऽमुना योद्धुमुद्यताः ॥ ४१७ ॥
चक्रपातप्रमुक्तपरिवत्यासप्रभोत्कटे । अन्योन्यमारणासक्तभटगर्जितभीषणे ॥ ४१८ ॥
दन्तिवाजिरथारावत्रासिताखिलभूतले । धातुष्कमुक्तबाणौघविच्छिन्नपत्तिके ॥ ४१९ ॥
वैतालिककलकलापपरिभूतदिग्मुखे । छत्रचामरसंपातरुद्धादित्यप्रभोत्करे ॥ ४२ ॥

1 ध सर्वेषितं 2 [मुनिसमीपे]. 3 ध जनसमाकुले 4 ध interchanges 400 and 401 5 [मित्रं]. 6 ध मौन. 7 ध क ज दुरुतम् 8 ध ज ज गमनाय 9 क करकण्डमायातं

समराङ्गणे ततोऽन्ये कृतदेवीसमीक्षणे । चेटकादिनृपं राजा श्रीसम्राट् गृहीतवान् ॥ ४२१ ॥[1]
यावत्स्वपादघातेन करकण्डो विनिहन्ति तान् । तत्किरीटे जिनस्यार्चां तदा तावदपश्यत ॥ ४२२ ॥
हा मयाऽनुष्ठितं कर्म हीनं साधुजुगुप्सितम् । यदर्चां वीरनाथस्य पादेन हन्तुमुद्यतः[2] ॥ ४२३ ॥
करकण्डादिमहाराजो महावैराग्यसंगतः । तदा स्वनिन्दनासक्तो बभूव परमार्थवित् ॥ ४२४ ॥
समाहूय निजान् पुत्रान् राज्ययोग्यान् पुरःस्थितान् । राज्यपट्टं च पुत्रे त्रयोऽपि क्रमतोऽनघाः ॥
पट्टचेटौ समं वीरौ पाण्ड्यराज्येन सत्वरम् । वैरं देवगम्यर्दी मध्यौ वीरसेनान्तिके दधुः ॥ ४२६ ॥
प्रत्येकं विषयं सर्वं वशीकृत्य[3] नराधिपः । चम्पापुरीं विवेशाशु सैन्यसागरसंयुतः ॥ ४२७ ॥
दत्त्वा राज्यश्रियं सारं वसुपालाय सूनवे । वसुपालाय वीराय सकलाय धीमते ॥ ४२८ ॥
वर्धमानजिनेन्द्रस्य तीर्थे करकण्डभूपतिः । वीरसेनगुरोरन्ते तपो जैनमशिश्रियत् ॥ ४२९ ॥[4]
अथ करकण्डयोगीशो मध्ये चेतोऽभिनन्दनः । जैनं तपश्चचाराऽऽर स्वर्गमोक्षफलप्रदम् ॥ ४३० ॥

॥ इति महाभक्तिसमन्वितनागदत्तगोपालकपद्मोत्पलसंभूत-
करकण्डमहाराजकथानकम्[5] ॥ ५६ ॥

*

५७ अशोकरोहिणीकथानकम् ।

अथास्ति मगधे देशे[6] पुरं राजगृहं पृथु । श्रेणिकोऽत्र महीपालः सम्यग्दर्शनभूषितः ॥ १ ॥
आसीदस्य महादेवी चेलना नाम विश्रुता । तत्पुत्रो वारिषेणाख्यः[7] श्रावको विदितो भुवि ॥ २ ॥
अन्यदा श्रेणिकः प्राप वर्धमानजिनेश्वरम् । गणेन्द्रादिसमायुक्तं विपुलाख्यगिरौ स्थितम् ॥ ३ ॥
प्रणम्य भक्तितो वीरं देवासुरनरस्तुतम् । निहिताशेषकर्माणं पप्रच्छेदं महीपतिः ॥ ४ ॥
भवत्समा जिना नाथ कियन्तश्चक्रवर्तिनः । बलदेवाः कियन्तो वा वासुदेवा हि तद्द्विषः[8] ॥ ५ ॥

तथा चोक्तम्—

तत्त्वरक्षाः कति नाथ जिनेन्द्राश्चक्रधराः कति केशवरामाः ।
तत्प्रतिपन्थिन एव कियन्तः सर्वमिदं मम नाथ विचक्ष्व ॥ ६ ॥

एतत्सर्वं[9] जिनाधीश पवित्रं त्रिजगद्गुरो । अहं भवत्प्रसादेन ज्ञातुमिच्छामि सांप्रतम् ॥ ७ ॥
मगधेश्वरवचः[10] श्रुत्वा वर्धमानजिनेश्वरः । यथार्थं जगादास्य कौतुकव्याप्तचेतसः ॥ ८ ॥
चतुर्भिरधिका राजन् विंशतिर्गदिता जिनाः । समस्तमेदिनीनाथास्तद्वच्चक्रवर्तिनः ॥ ९ ॥
बलभद्रा नव प्रोक्ता वासुदेवास्ततो नव । क्रूरकर्मसमायुक्तास्तद्द्विषोऽपि नव स्फुटम् ॥ १० ॥
ऋषभादिपुराणानि श्रेणिकस्य जिनोत्तमः । कथयस्तावदायातो यावद्द्वादशमस्य(?)तम् ॥ ११ ॥
अत्र चम्पापुरी रम्या विद्यते जनसंकुला । [11]वसुपूज्यो नृपोऽस्यापि जयानामाऽजनि प्रिया ॥ १२ ॥
अनयो रूपसंपन्नो द्वात्रिंशल्लक्षणान्वितः । वासुपूज्यो जिनो भावी नन्दनो भव्यनन्दनः ॥ १३ ॥
द्वादशस्यास्य तीर्थस्य प्रभुनाथस्य तस्य च । श्रुत्वा पुराणमापूर्ण गुणरत्नार्णवमिदम्[12] ॥ १४ ॥
वासुपूज्यगणेन्द्रस्य प्रथमस्य नराधिपः । अमृतार्णवसंज्ञस्य पुराणं पृष्टवानिदम् ॥ १५ ॥[13]
श्रेणिकस्य नरेन्द्रस्य कौतुकव्याप्तचेतसः । निशम्य वचनं वीरो जगादेमं पुरःस्थितम् ॥ १६ ॥

1 पफज्ञ चतुर्थकम्. 2 फ फलैभादन्युगुण. 3 ज्ञ चटनेद्री 4 [वीरो]. 5 प चटीरन° 6 पफज्ञ चुम्प्य. परज्ञ मं ४११ 8 फज्ञ ममधारेसे. 9 फज्ञ वारिधानास्य 10 प हर्णद्विष. 11 फज्ञ तन्तं 12 प ममथाद 13 प वसुराप्या 14 फज्ञ °गुर्णदिम् 15 पफज्ञ चुम्मम

अत्रैव भरतक्षेत्रे जम्बूद्वीपोपलक्षिते । कुरुजाङ्गलदेशोऽस्ति[1] धनधान्यसमन्वितः ॥ १७ ॥
विद्यते तत्र पौराढ्यं हस्तिनागपुरं परम् । विगतोपद्रवं लोके भूपतिर्जनवल्लभः ॥ १८ ॥
विद्युत्प्रभा महादेवी भूपतेरस्य वल्लभा । तत्पुत्रोऽशोकनामाऽयं लोकवर्णितविग्रहः ॥ १९ ॥
श्रीमदङ्गमहादेशे चम्पाऽऽख्या नगरी परा । मघवा तत्र भूपालः श्रीमती चास्य गेहिनी ॥ २० ॥
तस्या गुणाकराः ख्याताः समस्तधरणीतले । पुत्रा वसुप्रख्ये ते नामान्येतानि बिभ्रति ॥ २१ ॥
श्रीपालः श्रीप्रियो ज्ञेयो गुणपालो गुणप्रियः । वसुपालो वसुस्फीतः प्रजापालः प्रजापतिः ॥ २२ ॥
व्रतपालो व्रताधारः श्रीधरः श्रीधरः परः । तथा गुणधरो[2] ज्ञेयो गुणरञ्जितभूतलः ॥ २३ ॥
यशोधरो यशोधारी यशःशुभ्रीकृताम्बरः । यथार्थनामसंयुक्ताः सर्वे भान्ति भुवस्तले ॥ २४ ॥
रूपयौवनसंपन्ना पीनोन्नतघनस्तनी । तत्सुकन्या कलाधारा रोहिणी नाम विश्रुता ॥ २५ ॥
कार्तिकाष्टाह्निकायां च सोपवाससमन्विता । श्रीखण्डचरुपुष्पाणि गृहीत्वा धूपतण्डुलम् ॥ २६ ॥
चम्पापूर्वदिशो भागे महापूताङ्कनामकम् । जिनायतनमुत्तुङ्गं[3] रोहिणी प्राप भक्तितः ॥ २७ ॥
जिनपूजां विधायोच्चैः पुष्पगन्धाक्षतादिभिः । जिनसाधुनमस्कारं जिनशेषां[4] प्रगृह्य च ॥ २८ ॥
जिनगेहाद्विनिःसृत्य समागम्य निवासिनोः । पित्रोरन्तःपुरस्थायि ददौ शेषां हि रोहिणी ॥ २९ ॥
ततः पिताऽवलोक्येमामङ्कमारोप्य कन्यकाम् । यौवनेनेमितां प्रौढां दृष्ट्वाचिन्ति विचारवान् ॥ ३० ॥
रूपातिशयसंपन्नां संपूर्णनवयौवनाम् । समानगुणरूपाय कस्मै दास्यामि कन्यकाम् ॥ ३१ ॥
एवं विचिन्त्य भूपस्तां कन्यां मुक्त्वा गृहं प्रति । मन्त्रशालां विवेशाशु विचारार्थं वसुधाधिपः ॥ ३२ ॥
सुमतिः सुमतिः सारः सश्रुतः श्रुतसागरः । विमलश्चिमतिर्धीशो विमलो विमलाशयः ॥ ३३ ॥
एतावतो समाहूय मन्त्रिणो मन्त्रकोविदान्[5] । यथासनं परिप्राप्तान् पप्रच्छेदं महीपतिः ॥ ३४ ॥
कुमारी सुकुमाराङ्गी कुमाराय प्रदीयताम् । कस्मै वदत निःशङ्का मन्त्रिणो मन्त्रकोविदाः ॥ ३५ ॥
नरेन्द्रवचनं श्रुत्वा मन्त्रिभिः प्रेरितस्तदा । जगाद सुमतिर्वाक्यं पूर्वं भूपतिसंमतम् ॥ ३६ ॥
कन्यैकस्मै कुमाराय यदि राजन् प्रदीयते । ततोऽन्या प्रेमखेदेन्या जायतेऽत्र न वा यते ॥ ३७ ॥
अथवा दैवयोगेन वरस्यास्य शुभोऽगिनः । अस्यां न जायते प्रीतिः पितरौ कुरुतः स किम् ॥ ३८ ॥
तस्मात् स्वयंवरे कन्या नानानृपसमागमे । गृह्णातु स्वमतं कान्तं संमतोऽयं ममेश्वर ॥ ३९ ॥
स्वयंवरो मतः पूर्वैरादरेण नराधिपैः । कथ्या न जायते पुत्री कुर्वतां पूर्वसेवितम् ॥ ४० ॥
श्रुत्वा नराधिपो वाक्यं सुमतेः सुमतेः परम् । स्वयंवरे मतिं चक्रे महापुरुषसेविते[7] ॥ ४१ ॥
कोटिशो मञ्चकांस्तुङ्गान् मालाभिर्विराजितान् । अचीकरन्नृपः श्रीमान् महारत्नविनिर्मितान् ॥ ४२ ॥[8]
धरातले समस्तेऽस्मिन् स्वनरैः श्रीमयामिभिः । तदानीं स महीपालः स्वयंवरमघोषयत् ॥ ४३ ॥
श्रुत्वा स्वयंवरं दूतैः नृपा विभवसंयुताः । श्रीमच्चम्पापुरं प्राप्य मञ्चकेष्ववतस्थिरे ॥ ४४ ॥
तूर्याणि समताड्यानि नादितावनिसान्तरम् । नेदुर्मधुरगम्भीरं तदानीं तत्स्वयंवरे ॥ ४५ ॥
कोऽपि हारलतां पाणौ स्पृशति प्रीतमानसः । मुकुटं कोऽपि हस्तेन करोति शिरसुन्नतम् ॥ ४६ ॥
कोऽपि केशचयं स्निग्धं निर्मलं शिरसि स्थितम् । चकार पाणिनाऽप्यस्य व्यक्त्वा कन्यासमागमम् ४७
विद्रुमाभविमोष्ठं च करेणाकृष्य पश्यति । कोऽप्येकलोचनेनाशु[9] द्वितीयेन दिशं मुखम् ॥ ४८ ॥
कोऽपि लीलाम्बुजं[10] पाणौ गन्धासक्तमधुव्रतम् । सुरभीकृतसर्वाशं चकार विकसन्मुखम् ॥ ४९ ॥

---

1 कख कुरुजाङ्गल° 2 क गुणधरो. 3 कख उत्तुङ्गम्. 4 क जिनशेषां ख जिनशेषां 5 कख मुख्यम्. 6 क मन्त्रिकोविदान्, 7 क महापुरुषसेविते ख महापुरुषसेविते 8 क महारत्नमयम्, क महारत्नमितम्, ख महारत्नमयम्. 9 कख °लोचना सुचिरीक्षितैः 10 क लीलाम्बुजं

कोऽपि वीणां समादाय गीतं गायति शोभनम् । सप्तस्वरसमायुक्तं विश्वदेकोनमूर्च्छनम् ॥ ५० ॥
नितम्बे कोऽपि बध्नाति स्वर्णधेनुं समुज्ज्वलाम्[1] । कृत्वाङ्गमोटनं चाङ्गं चालयत्सद्विक्रिया घनम् ॥ ५१ ॥
कोऽपि ताम्बूलमादाय करेण प्रीतमानसः[2] । स्वनादपूरिताकाशभूतलः सहसाऽहसत् ॥ ५२ ॥
एवं नृपास्तदा सर्वे कुर्वन्ति विविधक्रियाः । कामाकुलितचेतस्काः कन्यागमनकाङ्क्षिणः ॥ ५३ ॥
अत्रान्तरे महावस्त्रा दिव्याभरणभूषिता । रूपराजितसर्वाङ्गी [3]मदकुञ्जरगामिनी ॥ ५४ ॥ [4]
पञ्चवर्णविनिर्माणपुष्पमालाकरा परा । धात्रीपुरःसरी कन्या विवेशैषा स्वयंवरम् ॥ ५५ ॥[5]
दृष्ट्वा सर्वे नृपाः कन्यां स्वयंवरमितामिमाम् । चिन्तयन्ति भृशं स्मेरं मन्मथाकुलमानसाः ॥५६॥
यक्षिणी किंनरी किं वा किं विद्याधरकन्यका । उर्वशी किं किमिन्द्राणी किं रतिः किं तिलोत्तमा ५७
एवं बहुविधान् संगान् भावयन्तो नराधिपाः । तस्थुर्विस्मितचेतस्कास्तन्मुखाम्भोजवीक्षणाः ॥५८॥
सुमङ्गलाभिधानाऽसौ कलकोकिलनिस्वना । स्वर्णवेत्रकरा धात्री जगौ कन्यां मनस्विनीम् ॥ ५९ ॥
महाकुन्दपुराधीशं[6] कुन्दपुष्पसमद्युतिम् । रूपिणं कुन्दनामानं वृणीष्वैनं[7] कुमारिके ॥ ६० ॥
एष मेघपुरस्वामी हेमाङ्गो हेमनामकः । बहुहेमधनाधारो मानयैनं मनस्विनि ॥ ६१ ॥
अयं रत्नपुराधीशो रत्नसंचयनामकः । रत्नोद्योतितसर्वाङ्गो बालेऽत्र कुरु मानसम् ॥ ६२ ॥
प्रभुस्तिलकसंज्ञस्य पुरस्य तिलकाभिधः । तिलकोऽयं नरेशानां प्रीतिमत्र कुरु प्रिये ॥ ६३ ॥
एष विद्युत्पुरस्वामी नाम्ना विद्युत्प्रभः प्रभुः । अनेन भोगिना सार्धं भोगान् मानय मानिनि ॥६४॥
एवमादिबहून्[10] भूपान् धात्रीदर्शितसत्पथः । अतिक्रम्य जगामाशु बाला तद्वपधारिणी ॥ ६५ ॥[11]
भूयो जगाद तां धात्री त्यक्ताखिलनराधिपाम् । प्रसन्नवचसा साध्वी तच्चित्तेङ्गितकोविदा ॥ ६६ ॥
स्वामिन्येष गुणाधारो वीतशोकसुतो महान् । जयन् रूपेण कन्दर्पमशोकः शोकवर्जितः ॥ ६७ ॥
अनेन देवरूपेण विद्याधरसमेन वा । चिरकालं सुखं पुत्रि त्वं मानय विलासिना ॥ ६८ ॥[12]
धात्रीवचनमाकर्ण्य तत्पुरो हृदयंगमम् । ददर्श स महाकन्या कन्दर्पमिव रूपिणम् ॥ ६९ ॥
दृष्ट्वा तं रूपिणं कन्या मुमोह क्षणमात्रकम् । चेतनां प्राप्य भूयोऽपि दध्यौ विस्मितमानसा ॥७०॥
मन्मथः खलु किं वा किमिन्द्रोऽयं खगेश्वरः । भोगभूमिभवः किं वा कुमारो भाति भासुरः[13] ॥७१॥
स्वचित्तहारिणं पाणौ धृत्वा मानसमालया । मुमोचास्य गले मालामशोकस्य हि रोहिणी ॥ ७२ ॥
वीतशोकसुतं दृष्ट्वा कन्यामाल्यविभूषितम् । ततोऽशोकं नृपाः सर्वे जग्मुः स्वं स्वं निकेतनम् ॥७३॥
कृत्वा महामहं पूतं जिनानां क्षीणकर्मणाम् । केवलज्ञाननेत्राणां पूतानां सर्ववेदिनाम् ॥ ७४ ॥
शोभने दिनयोगादौ मघवाभिर्निवेदिताम् । उवाह रोहिणीं रागादशोको वै विधिपूर्वकम् ॥ ७५ ॥
मनोऽभिवाञ्छितान् भोगान् भुञ्जानोऽशोकभूपतिः । रोहिण्या सह चन्द्रो वा तत्र तस्थौ सुखेप्सितः ॥
बहुष्वपि च लेखेषु जनकप्रेषितेषु सः । रोहिणीस्नेहतोऽशोकः पितुरन्तं न गच्छति ॥ ७७ ॥
अशोकस्य पिता लेखं साभिज्ञानसमन्वितम् । वैतालिककरे शीघ्रं प्रजिघाय समुत्सुकः ॥ ७८ ॥
सतश्चम्पापुरीं प्राप्य वीतशोकसुतस्य च । स्वसुताशोककुमारस्य पुरो लेखं विमुक्तवान् ॥ ७९ ॥
आदाय तं स्वहस्तेन तल्लेखार्थं प्रवाच्य च । अशोकः शोकसंपन्नो बभूव जनकोत्सुकः ॥ ८० ॥
ततः श्वशुरमापृच्छ्य रोहिणीसहितः क्रमात् । अशोकः स्वबलोपेतो जगाम पितुरन्तिकम् ॥ ८१ ॥

---

1 फ समुज्ज्वलम्. 2 पज प्रीतिमानसः. 3 प कुमकम्, अ कुनिकम् फ कुनकमितम्. 4 प मम्° 5 प कुम्मम् फज कुमकम्. 6 प धवम्. 7 ज कुणकम् प कुणकमितम्. 8 प महाकम्° 9 प वृणीष्वैनं 10 प एवमाद्° 11 पज कुमकम् प कुमकमितम्. 12 पज त्रिकम्, प त्रिकमितम्. 13 फज कुमारोऽथमभि भासुरः. 14 पज कुमकम्, फ कुमकमितम्. 15 [illegible]

ततः पितरमानम्य समास्य मातरं च सः । अशोकः शोकसंत्यक्तो बभूव पितृसंगमात् ॥ ८२ ॥
अथ प्रपोषितास्पर्शां ज्वालामालाचितपुष्कराम् । उल्कां ददर्श भूपालः शोकान्तो विगताहिकः ॥८३॥
उल्कापातं विलोक्याथ वैराग्याहितमानसः । सभ्यान् जगाद राजेन्द्रो मस्तकन्यस्तपाणिकान् ॥८४॥
विभवा धनधान्याद्यास्तृणबिन्दुचलाश्चलाः । यौवनं मरुतं पुंसां पुनस्तत्र निवर्तते ॥ ८५ ॥
विद्युच्चञ्चलं सम्पा जीवितं देहिनां भवेत् । व्याध्यर्थं शरीरं च लक्ष्मीः स्वप्नभोजने ॥ ८६ ॥
शुष्कपत्रसमानाश्च निधया भवनादिकाः । सन्ध्यारागसमा प्रीतिर्विलासे रमणीजने ॥ ८७ ॥
बन्धुभिः सह यत्प्रेम स्वप्नराज्योपमं भवेत् । विद्यते तन्न लोकेऽस्मिन् यद्वस्तु स्थिरतां व्रजेत् ॥८८॥
एवं निगद्य तान् सभ्यानापृच्छ्य धनबान्धवान् । अशोकाय श्रियं दत्त्वा निर्ययौ नृपतिर्गृहात् ॥८९॥
अशोकवनमध्यस्थं तदा गुणधरं यतिम् । समाप्य भक्तिसंपन्नो वीतशोको नराधिपः ॥ ९० ॥
प्रणम्य तं महासत्त्वं यतीशं स नराधिपः । दीक्षां जग्राह तत्पार्श्वे बहुभिर्नरकुञ्जरैः ॥ ९१ ॥
अतिघोरं तपः कृत्वा भित्त्वा कर्मकदम्बकम् । वीतशोकमुनिः शीघ्रं ययौ निर्वाणपत्तनम् ॥ ९२ ॥
अपनुद्य महाशोकं पितृदीक्षणसंभवम् । चकार विपुलं राज्यमशोको नवपार्थिवः ॥ ९३ ॥
अशोकेन समं भोगान् भुञ्जानाया मनोरमान् । बभूवुरष्ट सत्पुत्रा रोहिण्याः क्रमतोऽमलाः ॥ ९४ ॥
एवं यौवनसंपन्ना विपुलमङ्गललोचना । अनुक्रमेण संजाताश्चतस्रस्तनयास्तथा ॥ ९५ ॥
विगतोपप्लवः श्रीमो मतशोकः परो मतः । जितशोको विनष्टारिर्शोकोऽपि धनपालकः ॥ ९६ ॥
वसुपालः परो ज्ञेयो गुणपालो गुणाकरः । रोहिणीसुतनामानि विज्ञेयानि मनीषिभिः ॥ ९७ ॥
वसुंधरा मता पूर्व सुरकान्ता तथा परा । लक्ष्मीमती परा ज्ञेया सुप्रभा चेति वत्सुताः ॥ ९८ ॥
समस्तपुत्रपुत्रीणां पश्चिमोऽजनि नन्दनः । लोकपालकुमाराख्यो रोहिण्या रूपराजितः ॥ ९९ ॥
अन्यदाशोकभूपाले रोहिणी पण्डिता परा । वसन्ततिलका धात्री लोकपालाङ्कधारिणी ॥ १०० ॥
प्रासादशिखरस्थाने मत्तवारणके स्थलम् । गोष्ठीसुखोपविष्टा च संतिष्ठन्ते सखीसमा ॥ १०१ ॥
रथ्यायां शोकसंपन्ना मुक्तकेशकदम्बिका । कृतकोलाहलस्थाना मण्डलीभूतविग्रहा ॥ १०२ ॥
कुर्वती रुदनं पाठं क्रन्दन्ती स्वं मुहुर्मुहुः । वक्षः शिरस्तनं बाहू कुट्टन्ती कृतरोदना ॥१०३॥
प्रासादस्था विलोक्यैता योषितो रोहिणी तदा । वसन्ततिलकां धात्रीं पप्रच्छेति कुतूहलात् ॥१०४॥
अम्ब शिक्षितकं मानी कथं रासोऽपि दुम्पिठी । एतान् पश्यामि नृत्यन्ति नाटकं बहुलकोविदाः ॥१०५॥
एतान् पश्यामि सन्तस्य नाटकान् भरतोदितान् । नाटको नीरसमिदं कोऽयं नृत्यते साद्रिकृन्तं ॥१०६॥
सप्तस्वरविहीनं तं भावभूषणवर्जितम् । इमं तु नाटकं ब्रूहि सांप्रतं मम कौतुकात् ॥ १०७ ॥
निशम्य रोहिणीवाक्यं मुग्धभावसमन्वितम् । जगाद धात्रिकेमां च वसन्ततिलकाभिधा ॥१०८॥
पुत्रि शोको महादुःखं क्रियते दुःखिभिर्जनैः । सहासयत पुनः प्राह रोहिणीमां सकौतुकात् ॥१०९॥
अम्ब किं मन्यते शोको दुःखं वा वद किं मम । भूयो जगाद तां धात्री रुष्टा कोपारुणेक्षणा ॥११ ॥
संवादः किं तवोन्मादः पाण्डित्येनापमीदृशम् । किं गर्वो रूपसंभूतः किं सौभाग्यं जनातिगम् ॥१११॥
येन त्वं नाटकं ब्रूषे स्वरभावसमन्वितम् । शोकं दुःखं न जानासि बालाऽप्येवासि सुन्दरि ॥११२॥
वसन्ततिलकावाक्यं श्रुत्वा भूयोऽपि रोहिणी । इमां जगाद मा भद्रे कोपं कुरु ममोपरि ॥ ११३ ॥
गन्धर्वमपि चित्रमथराणि स्वराणि च । विज्ञानानि चतुःषष्टिः कला हास्यविस्तरा ॥ ११४ ॥

---

1 क सर्वं [सर्वं]. 2 प क्षीणं. 3 प बहुपुण्यम्, ज बहुपुण्यम्, क बहुपुण्यमीशम्. 4 प ज धनपोषरो. 5 क यौवनसम्पदम्. 6 क कोपन्ती. 7 प कुट्टन्ती. 8 प ज विश्वम्य, प विश्वम्भिरम्. 9 विश्वम्य, क विश्वम्भिरम्. 10 क भूपे

कल्पगुणो मर्यादस्थो मे न केनापि भाषितः । अदृष्टमश्रुतं तेन पृच्छामि भवतीमिमम्[1] ॥ ११५ ॥[2]
रोहिणीवाक्यमाकर्ण्य धात्रिकैताः जगौ पुनः । न नाटकप्रयोगोऽयं गीतभाषाम्बरो न वा ॥ ११६ ॥
किं तु दुःखेन जन्तूनां रुदतां च सुसंस्तुतः । भयाऽन्तो गदितो वत्से भूयः शोकोऽयमुच्यते ॥ ११७ ॥[3]
भूपस्तद्वाक्यतो देवी रोहिणी निजगाविमाम् । रुदितायमहं भद्रे न जानामि हि कीदृशः ॥ ११८ ॥
अत्रान्तरे महीपालोऽशोकनामा जगाविमाम् । शोकेन रुदितं त्वामयमहं त दर्शयाम्यलम् ॥ ११९ ॥[4]
लोकपालं सुतं बालं राजाऽऽदाय च तत्करात् । प्रासादशिखराग्रात्तु रोहिणीपुरतोऽमुचत् ॥[5] १२० ॥
लोकपालकुमारोऽयमशोकतरुमूर्धनि । अशोकपुष्पशय्यायां रचितायां पपात सः ॥ १२१ ॥
अत्र ज्ञात्वा तकं बालं सर्वा नगरदेवताः । तं प्रदेशं समाजग्मुः कृतकोलाहलस्वनाः ॥ १२२ ॥
शोकस्य कारणं जातं रोहिण्याः कथमीदृशम् । शोकं दुःखं सुसंप्राप्तं यावद्देया न पश्यति ॥ १२३ ॥
अशोकतरुमूर्धस्य दिव्यं सिंहासनं तदा । विकुर्वाणाः कृतं ताभिः पद्मरागसमुज्ज्वलम् ॥ १२४ ॥
अष्टोत्तरशतास्थाने रत्नाढ्यपदनिर्मिते । क्षीरोदनीररसपूर्णैः कलशैर्मुखपङ्कजैः ॥ १२५ ॥
अभिषेकं विधायास्य बालमरणभूषितः । देवीभिः स्नापितो बालो रममाणो विशिष्यते ॥ १२६ ॥
अशोकवृक्षमूर्धस्थं सिंहासनमधिष्ठितम् । अशोको रोहिणीबालं ददर्शापोलिलोकनात् ॥ १२७ ॥
मोक्षमामरणोपेतं पुरदेवीप्रपालितम् । पूजितं पुष्पधूपाद्यैर्गन्धामोदितदिङ्मुखैः ॥ १२८ ॥[6]
अन्यदा देवतासंघकरकुम्भाभिषिक्तकम् । लोकपालं विलोक्यैनं दिव्याभरणभूषितम् ॥ १२९ ॥
सद्दारसिंहस्नाथः सकीर्णोऽपि महामतिः । अशोकोऽपि महाराजो रोहिणी प्रेमकारिणी ॥ १३० ॥
रोहिणीविहिते पूर्वं चतुर्थे तत्फलेन च । पुरोहितादयः सर्वे विस्मयं परमं ययुः ॥ १३१ ॥
ततश्च बालकं दिव्यं सर्वालंकारभूषितम् । आनीत विस्मयोपेताश्च तत्सुस्थके मुदा ॥ १३२ ॥
पुंनागचम्पकाशोकनमेरुबकुलान्विते । आम्राम्रातकसंपन्ने तथाशोकवने सति ॥ १३३ ॥
अतिभक्तिमहाभूतिर्विभूत्यम्बरपूर्वकम् । तिलकान्तं बभूवात्र जिनवेश्मचतुष्टयम् ॥ १३४ ॥[7]
रूपस्वमादिर्व्यं[8] कुम्भौ चारणौ मुनिपुङ्गवौ । विहरन्तौ समायातौ हस्तिनागपुरं परम् ॥ १३५ ॥
तत्र पूर्वदिशाभागसमुद्भूतमहावने । वसन्तुष्टौ महाभूततिलके जिनवेश्मनि ॥ १३६ ॥
ततः समाप्य "[9]वतार्मे वनपालेन वेगतः । मुनिवार्ता च सा सद्यः नृपभुजे विनिवेदिता ॥ १३७ ॥
निशम्य तद्वचो राजा महासंपत्समन्वितः । जगाम मुनिसामीप्यं भक्तिभराद्यनुरूढः ॥ १३८ ॥
ततोऽशोकेन भूपेन वन्दित्वाऽसौ सुभक्तितः । रूप्यकुम्भमुनिः पृष्टो विधिनाऽभिलोचन ॥ १३९ ॥
तथाऽऽदिष्ट मया सम्यग् रोहिण्याऽपि पुरामवे । को धर्मो विहितः पूतः मयसत्त्वदयापरः[10] ॥ १४० ॥
विशोकापत्यपुत्राणां कन्यकानां चतुर्गुणाम् । पूतान्यभवसंबन्धं कथयस्व समासुना ॥ १४१ ॥[11]
अशोकवचनं श्रुत्वा रूप्यकुम्भो यतीश्वरः । अवधिज्ञाननेत्रेण सम्पृष्टार्थं जगाविति ॥ १४२ ॥
आकर्णयैकचित्तेन तस्[12]माशोककारणम् । कथयामि समासेन तव राजेन्द्र सांप्रतम् ॥ १४३ ॥
हस्तिनागपुराद् गत्वा मार्गं द्वादशयोजनम् । अस्ति नीलगिरिस्तुङ्गो नानातरुशिलोच्चयः ॥ १४४ ॥
यशोधरमुनिर्धीरभारणा लोकशान्तिकृत् । सर्वौषधिसमप्राप्तो यमभूषितविग्रहः ॥ १४५ ॥
मासोपवाससंयुक्तः स्थितरोऽस्य महीभृतः । आतापनाख्ययोगेन सतसे स्थिरमानसः ॥ १४६ ॥[13]

---

1 प भवन्तमिमम्. 2 पज त्रिभ्यम् फ त्रिभ्यमिदम्. 3 पज युग्मम्, फ युग्ममिदम्. 4 प मत्सभरण 5 पज कलापम् फ कलापकमिदम्. 6 प युग्मम् ज युग्मम् प युग्ममिदम्. 7 पज त्रिभ्यम् फ त्रिभ्यमिदम् 8 पज युग्मम् प युग्ममिदम्. 9 [[illegible]]. 10 पज दयापरः 11 [दयापर]. 12 पज त्रिभ्यम् प त्रिभ्यमिदम्. 13 पज युग्मम् प युग्ममिदम्.

मृगमारीति विख्यातो मृगयुस्तत्र भीषणः । जगामासौ मृगान् हन्तुं तदानीं नीलपर्वतम् ॥१४७॥
असमर्थो मृगान् हन्तुं मुनिमाहात्म्ययोगतः । मृगयुश्चिन्तयामास निष्फलीभूतचापकः ॥ १४८ ॥
किं कारणमहं पापैरमोघैरिषुभिरपि । असमर्थो मृगान् हन्तुं नितान्तं पुरतःस्थितान् ॥ १४९ ॥
ततो ज्ञातमनेनाशु दृष्ट्वा दूरस्थयोगिनम् । मुनेरस्य प्रभावेन बभूवुर्विफलाः शराः ॥ १५० ॥
पारणार्थमसौ यावन्मुनिर्गच्छति पत्तनम् । मृगयुस्तावदभ्येत्य क्रुधा मुनिशिलातलम् ॥ १५१ ॥
तृणकाष्ठैरिदं दग्ध्वा तज्ज्वालाजालसंचयम्[1] । नीत्वाऽन्यत्र क्रुधा तस्थौ निषादो मृगहिंसया ॥१५२॥
विधाय पारणं साधुर्मन्दमन्दगतिक्रियः । आतापनशिलां प्राप वह्निनाऽनेन तापिताम् ॥ १५३ ॥
ज्ञात्वाऽपि तां शिलां तप्तां मुनिर्भिः सार्वकालिकम्[2] । प्रत्याख्यानं विधायोच्चैरारुरोह विशुद्धधीः ॥१५४॥
अन्तकृत्केवली भूत्वा सुरासुरनमस्कृतः । समस्तकर्मनिर्मुक्तो मुक्तिधामवाप सः ॥ १५५ ॥
उदुम्बरास्यकुष्ठेन[3] कुत्सितश्चिलविग्रहः । मृगमारी ममारासौ तदानीं सप्तमे दिने ॥ १५६ ॥
सप्तमं नरकं प्राप स्वं सन्मुनिद्रोहात् । त्रयस्त्रिंशत्समुद्रायुःस्थितिकः स निषादकः ॥ १५७ ॥
ततो निःसृत्य दुःखेन तैरश्चीं दुःखदायिनीम् । प्राप्य भूयो मनुष्याणां गतिं व्याधकरे प्रभवत् ॥१५८॥
अस्मिन्नेव पुरे रम्ये बहुगोधनभूषितः । गोपालेषपतो दण्डी विप्रो गोपालकोऽभवत् ॥ १५९ ॥
तस्य भार्याऽभवत् तन्वी गन्धारी नाम विश्रुता । मृगमारचरो व्याधो बभूव तनयोऽनयोः ॥ १६० ॥
नाम्ना वृषभसेनोऽसौ रक्षितुं गाः कदाचन । क्रमेण यौवनं प्राप्य तदा नीलगिरिं ययौ ॥१६१॥
तत्र नीलगिरौ तुङ्गे तदा दग्धो दवाग्निना । भस्मीकृतसमस्ताङ्गो बराके मृतिमाप सः ॥ १६२ ॥
धूतानां गोकुले तेन भागतेन विवेकिना । सिंहरथेन तत्शिष्यो पुत्रवार्ता सकृद्रोदिता ॥ १६३ ॥
श्रुत्वा वृषभसेनस्य सुतस्य मरणं तदा । गन्धारी रोदनं चक्रे करुणं मुनिदुःखदम् ॥ १६४ ॥
शोककारणमेतत् ते मदितं नरकुञ्जर । अधुनाऽशोकरोहिण्योः संबन्धं कथयाम्यहम् ॥ १६५ ॥
अस्मिन्नेव नराधीश हस्तिनागपुरे नृपः । वसुपालोऽभवत्तस्य भार्या वसुमती शुभा ॥ १६६ ॥
तत्प्रजा धनमित्रोऽभूद् राजश्रेष्ठी महाधनः । तद्भार्या धनमित्रा च पूतिगन्धा सुताऽनयोः ॥१६७॥
सुतस्[4] कुत्सितरूपस्य धनस्यैव दुःसहः । दुर्गन्धामोदितागस्य समस्ताङ्गस्य याति दूरतः ॥ १६८ ॥
तस्यामपि न धर्मोऽस्ति सातु भवसमोऽपि ना । किमन्यः प्राकृतोऽपुष्टः पूतिगन्धसमाकुले ॥१६९॥
अस्मिन्नेव पुरे श्रेष्ठी वसुमित्रोऽभवद् धनी । भार्या वसुमती चास्य श्रीषेणोऽस्याः सुतोऽपि हि ॥१७०
द्यूतपाने रतिर्यस्य वाण्यस्त्रौ परयोषिति । मृगये जीवहिंसायां तथा निश्चितमानसे ॥ १७१ ॥
तथान्यतो विनीतात्मा जनानां दुःखदायिभिः । एतैः सप्तभिरेवासौ व्यसनैः क्रीडति स्फुटम् ॥१७२॥
तथा चोक्तम्—

द्यूतं मांसं कुत्सितवेश्या परदारं हिंसाऽनृतं सुरापानचौर्यैर्व्यसनिकम्[5] ।
एते दोषाः सप्त[6] नृणामतिपापाः शिवैर्षेयाः[7] दुर्गतिमार्गं प्रवदन्ति ॥ १७३ ॥[8]

ततः श्रीषेणनामायं प्रविष्टो धनिनो गृहम् । गृहीतो यमदण्डेन तस्करेण प्रकोपिना ॥ १७४ ॥
प्राणीकृत्य तर्कं दुष्ट पश्चद्धानिसमुत्थम् । निनाय यमदण्डोऽपि तस्करं नगराद् बहिः ॥ १७५ ॥
नीयमानममुं दृष्ट्वा पूतिगन्धसमावृतम् । धनमित्रो जगादेति दयावन्तनियन्त्रितम् ॥ १७६ ॥
श्रीषेण यदि मे कन्यां परिणेतुं त्वमिच्छसि । ततोऽहं मोचनं तेऽद्य कारयामि विसंशयम् ॥१७७॥[9]

1 पज्ञ तृणकाष्ठैरेवं 2 पज्ञ कुम्मम्, क कुम्भीपम्, 3 प ...म्, क ...म्, 4 प ...ए 5 क वैरदीप्त वः 6 क ...र्क. 7 क ... 8 क ... 9 पज्ञ मांसचर्यैर्व्यसनिकम्, [...]. 10 [...]. 11 ज शिवैर्षेया. 12 See p. 65 above, No. 45, 12. 13 पज्ञ कुम्मम्, क कुम्भीपम्.

श्रुत्वा तद्वचनं सोऽपि धमाणेम सखेपशु । कुरु मन्मोचनं शीघ्रं मातुर्लेखं करोम्यहम् ॥ १७८ ॥
नृपवाक्येन तेनाशु कारयित्वाऽस्य मोचनम् । दत्ताऽस्मै भागिनेयाय पूतिगन्धा विधानतः ॥१७९॥
परिणीता विधानेन पूतिगन्धाऽमुना सका । यस्या कुथितगन्धेन लोकः सर्वः पलायितः ॥१८०॥
मुखं घ्राणं पिधायायमेकरात्रं सहानया । उषित्वा[1] दुःखतो यातो प्रभाते नगरादरम् ॥ १८१ ॥
भीषेपेन परित्यक्ता पूतिगन्धाऽतिदुःखिनी । तस्थौ पितृगृहे दीना निन्दन्ती निजजीवितम् ॥१८२॥
एव हि पूतिगन्धाया काले याति सुदुःखतः । सुव्रताऽऽर्या परिप्राप भिक्षार्थे तत्पितुर्गृहे[2] ॥१८३॥
दृष्ट्वा तामार्यिकां तत्र पूतिगन्धा सुदुःखिता । भिक्षामस्यै प्रदायाशु ययाचुपशमं परम् ॥ १८४ ॥
तस्मिन्नेव पुरे श्रीमान् राजा कीर्तिधरोऽभवत् । भार्या कीर्तिमती तस्य विजिताखिलवैरिणः १८५
अथैकस्मिन् दिने जाते राजा कीर्तिधरो महान् । वनपालेन विज्ञप्तः सभामध्यस्थितस्तदा ॥१८६॥
अस्मदीयवने राजन् भगवान् विहितास्रवः । सहामितास्रवेणास्ताचारणो हि शिलातले ॥ १८७ ॥
वनपालवचः श्रुत्वा तदा कीर्तिधरो नृपः । अगाम तौ मुनी नन्तुं परिवारसमन्वितः ॥ १८८ ॥
वन्दित्वा तौ मुनी भक्त्या श्रुत्वा धर्ममनुत्तरम् । बभूव भूपतिः शीघ्रं सम्यग्दर्शनभूषितः ॥१८९॥
तदानीं पूतिगन्धाऽपि निजलोकसमन्विता । आगत्य तौ मुनी नत्वा श्रुत्वा धर्मं विशुद्धधी ॥१९०
विधाय मस्तके पाणी मुनिद्वन्द्वं कृपाऽन्वितम् । पप्रच्छ स्वमवं पूर्वं पूतिगन्धासमुद्भवम् ॥१९१॥[3]
पूतिगन्धावचः श्रुत्वा महावैराग्यसंभवम् । अमितास्रवयोगीन्द्रो बभाषेतां पुरःस्थिताम् ॥ १९२ ॥
पुत्रि शृण्वेकचित्तेन स्थिरीभूतेव मुग्धिके । गदामि ते समासेन पूतिगन्धस्य कारणम् ॥ १९३ ॥
अत्रैव भरतक्षेत्रे जम्बूद्वीपसमन्विते । पश्चिमार्णवसामीप्ये सौराष्ट्रविषये वरे ॥ १९४ ॥
[4]ऊर्जयन्तगिरेर्दिव्यं पश्चिमाशासमुद्भवम् । नगरं विद्यते नाम्ना नगरं गिरिपूर्वकम् ॥ १९५ ॥[5]
बभूव तत्र भूपालः सम्यग्दृष्टिनराधिपः । स्वरूपाऽस्य महादेवी रूपराजितविग्रहा ॥ १९६ ॥
आसीदस्य नरेन्द्रस्य गङ्गदत्तो वणिक्पतिः । भार्या सिन्धुमती चास्य मिथ्यात्वमददूषिता ॥१९७॥
रूपयौवनगर्वेण विभ्रमेण गरीयसा । एषा रामाजनं रम्यं तृणायापि न मन्यते ॥ १९८ ॥
मासोपवाससंपन्नः साधुरत्र पुरे सुधीः । समाधिगुप्तको गुप्तः पारणार्थं समागमौ ॥ १९९ ॥
गच्छता सह राज्ञा सो वनं भ्रमरपूर्वकम् । गृहाद् गृहान्तरं गच्छन् गङ्गदत्तेन वीक्षितः ॥२००॥
दृष्ट्वा तं स्वगृहाविष्टं मन्दमन्दमतिक्रियम् । गङ्गदत्तः प्रियां प्राह तदा सिन्धुमतीमिति ॥ २०१ ॥
अस्मद्गृहं मुनिर्भद्रे प्रविष्टश्चर्ययाऽनघः । तेन त्वं भोजयित्वेमं पश्चादागच्छ सुन्दरि ॥ २०२ ॥
तद्वाक्यतो निवर्त्याशु रुष्टा सिन्धुमती तदा । गृहीत्वा तं मुनिं दृष्ट्वा निनाय निजमन्दिरे[6] ॥२०३॥
ततो धात्रीनिरुद्धाऽपि कोपारुणनिरीक्षणा । स्पृशिष्ठनिमित्तेन सत्कृतं व्यपादिमि ॥ २०४ ॥
तस्मै मासोपवासाय स्थिताय स्थितिशालिने । तदा सिन्धुमती दुष्टा ददौ कटुकतुम्बकम् ॥२०५॥[7]
प्रत्याख्यानं समादाय स मुनिः सार्वकालिकम्[8] । आराधनां समाराध्य बभूव विबुधो दिवि ॥२०६॥
[9]कलशं मुनिमालोक्य नीयमानं विमानगम् । पप्रच्छान्यतरं तस्मादागच्छन् वनतो नृपः ॥२०७॥
राजेन्द्रवचनं श्रुत्वा जगादेदमयं नृपः । कटुकालाबुदायिन्याः सिन्धुमत्या विचेष्टितम् ॥ २०८ ॥
शिरसो मुण्डनं कृत्वा पञ्चतिलकस्य बन्धनम् । खराधिरोपणं चास्याः कारयित्वा सकुङ्कुमम् ॥२०९॥

---

1 पज मुखं. 2 फ पवित्रा 3 फज तत्पितुर्गृहम्. 4 पज मुग्धम्, फ मुग्धकमिदम्. 5 [स्थिरी भूतेव] 6 फ समागस्था 7 पज मुग्धम् फ मुग्धकमिदम्. 8 फ निजमन्दिरे. 9 ज स्पृशिष्ठ—महिषी 10 पज मुग्धम् फ मुग्धकमिदम्. 11 फ सार्वकालिकम्. 12 फ कलशं

सद्गुरुः पथ्यं दृष्ट्वा नानाजनपुरस्सरम् । एतां तदा दुराचारां पुरादपससार सः ॥ २१० ॥[1]
मृता सप्तदिनान्ते च गृहीतोदुम्बरकुष्ठतः । द्वाविंशतिसमुद्रायुः षष्ठं नरकमवाप[2] सा ॥ २११ ॥
ततः क्रमेण सप्तापि भ्रान्त्वा सा नरकक्षितीः । भुञ्जाना घोरदुःखानि तासु तिष्ठति पापिनी ॥ २१२ ॥
नितान्तं घोरदुःखाभ्यस्ताभ्यो निष्क्रम्य दुःखतः । दुःखपीडितचेतस्का तिर्यग्गतिमवाप सा ॥ २१३ ॥
द्विः शुनी सूकरी चैव शृगाली मूषिका तथा । जलूका खलु मातङ्गी गर्दभी गोधिकाऽभवत् ॥ २१४ ॥
भूयोऽपि दुःखसंभूता क्षुधिताखिलविग्रहा । पूतिगन्धाऽधुना जाता बन्धुलोकातिनिन्दिता ॥ २१५ ॥
श्रुत्वा मौनीश्वर वाक्यं भयसंभ्रममानसा । पूतिगन्धा पुनः प्राह सर्वसत्त्वहितं यतिम् ॥ २१६ ॥
सयचयशुभा येन कृतेन ननु कर्मणा । पूर्वपापं विमुञ्चामि ब्रूहि मे परमेश्वर[3] ॥ २१७ ॥[4]
पूतिगन्धोदितं श्रुत्वा जगादेमां महामुनिः । भक्तिनिर्भरचेतस्कामात्मवजनभीलुकम्[5] ॥ २१८ ॥
यदि त्वमिच्छसि स्पष्टं सर्वपापविमोचनम् । रोगशोकपरित्यक्तां सुरवल्लभतामपि ॥ २१९ ॥
ततो रोहिणीनक्षत्रे चोपवासं कुरु व्रतम् । येन भूयोऽपि दुःखानि न पश्यसि कदाचन ॥ २२० ॥
मुनिवाक्यं समाकर्ण्य पूतिगन्धा जगादमुम् । कथं रोहिणी[6] भो नाथ चोपवासो विधीयते ॥ २२१ ॥
पूतिगन्धावचः श्रुत्वा तदुवाच यतीश्वरः । भक्तिनिर्भरचेतस्कां बाष्पाकुलितलोचनाम् ॥ २२२ ॥
पुत्रि पूर्वदिने नूनं प्रत्याख्यानं चतुर्विधम् । गृह्यते मुनिमार्गेण पवित्रेण मनस्विनि ॥ २२३ ॥
यस्मिन्नेवं दिने चन्द्रो रोहिण्यां व्यवतिष्ठते । तस्मिन्नेव विधातव्यं चतुर्थं जिनभाषितम् ॥ २२४ ॥
उपवासो यथैकः सप्तविंशे दिने सति । भूयो भूयः कृते तस्मिन् फलमानं निरूप्यते ॥ २२५ ॥
नवसाहस्रतीतेषु तथा वर्षेषु पञ्चसु । उपवासाः प्रजायन्ते सप्तषष्टिः परिस्फुटाः ॥ २२६ ॥
अनेन विधिना भद्रे सम्यक्त्वप्रतिपालकः । उपवासविधिं सर्वं समाप्तिं याति वाञ्छितः ॥ २२७ ॥
ततः समाप्तिमासन्ने विधानस्थितवाञ्छिते । रोहिणीपुस्तकस्यार्थे कारापय स्थापनम् ॥ २२८ ॥
पुस्तकैरपरैः सार्धं पञ्चभिर्धर्मकारणैः । आगमानुगतैः सारैर्भव्योपहितकारिभिः ॥ २२९ ॥
सुरासुरनतस्यार्चां सम्यग्ज्ञानविभासिनः । वासुपूज्यजिनेन्द्रस्य कारापय तथाऽनघे ॥ २३० ॥
विमाने केतुभिश्चित्रैर्मनोहारैः कलशैरपि । घण्टाभिः किङ्किणीजालैर्मुकुरैः स्वस्तिकादिभिः ॥ २३१ ॥
भीरम्भैः कुङ्कुमैः पुष्पैर्गन्धाक्षतपदप्रदैः । चरुणा पञ्चवर्णेन दीपधूपफलादिभिः ॥ २३२ ॥
वासुपूज्यजिनेन्द्रस्य रोहिणीपुस्तकस्य च । पूजा विधीयते भक्त्या कर्मक्षयनिमित्ततः ॥ २३३ ॥[10]
चतुराहारदानं च भैषज्यं वसनादिकम् । चतुर्विधस्य संघस्य यथायोग्यं विधीयते ॥ २३४ ॥
एवं करोति यो भक्त्या नरो रामा महीतले । लभते केवलज्ञानं मोक्षं च क्रमतः स्वयम् ॥ २३५ ॥
निशम्य मुनिचन्द्रस्य वचनं हृदयंगमम् । जग्राह पूतिगन्धेयमुपवासविधिं व्रत[11] ॥ २३६ ॥
गृहीत्वेमं विधिं सारं पूतिगन्धा मनःप्रियम् । भूयो जगाद योगीशं भक्तिप्रहृष्टतनूरुहा ॥ २३७ ॥
भगवन् मत्समानेन पूतिगन्धेन केनचित् । गृहीतोऽयं विधिः पूर्वं ब्रूहि त्वं मम सांप्रतम् ॥ २३८ ॥[12]
निशम्य पूतिगन्धाया वचनं मुनिपुङ्गवः । जगाद च पुनः सत्यं जिनोदितविधायिकम्[14] ॥ २३९ ॥
त्वत्समानेन चान्येन पूतिगन्धेन यत्नतः । स्वयमाप्तो विधिः कान्ते सर्वदुःखक्षयावहः ॥ २४० ॥[15]
श्रुत्वा यतिवचोऽदीनं पूतिगन्धा जगादमुम् । कस्मिन् केन कृतोऽयं मे वदानुष्ठानं सांप्रतम् ॥ २४१ ॥

---

1 पज्ञ दुम्मम् फ दुष्कर्मिणम्. 2 [नरकमाप सा]. 3 फज्ञ परमेश्वर 4 पज्ञ दुम्मम्, फ दुष्कर्मिणम्. 5 [मीर्च कम्पमीरुकम्], प °मीचारमीरतां(तां) 6 फ रोहिणि° 7 पज्ञ दुम्मम् फ दुष्कर्मिणम्. 8 फज्ञ रोहिणि [रोहिणीभे चाच]. 9 पज्ञ दुम्मम् फ दुष्कर्मिणम्. 10 पज्ञ दुम्मम्, प दुष्कर्मिणम्. 11 पज्ञ तत् 12 फ मत्पत्समानेन 13 प दुम्मम् ज दुपत्रम् प दुष्कर्मिणम् 14 फ °यिकम्. 15 पज्ञ दुम्मम् फ दुष्कर्मिणम्.

श्रुत्वा तद्वचनं योगी जगादेमां पुरःस्थिताम् । जिनवाक्याह्लितस्वान्तां जिनभक्तिपरायणाम् ॥ २४२ ॥
अथ जम्बूमति द्वीपे क्षेत्रे भरतनामनि । शक्राख्यो नाम देशोऽस्ति पुरं सिंहपुरं परम् ॥ २४३ ॥
सिंहसेनो नृपस्तस्य भार्या च कनकप्रभा । अनयोरनन्दनश्चासीत् पूतिगन्धिः कुमारकः ॥ २४४ ॥
जिनस्य मदनान्तस्य विमलादेर्गरीयसः । केवलज्ञानसम्प्राप्तौ देवागमनशालिनः ॥ २४५ ॥
दृष्ट्वा सुरकुमारं च खे प्रजल्पं प्रभास्वरम् । सोऽपतत् पूतिगन्धस्तु मुमूर्च्छ क्षणमात्रतः ॥ २४६ ॥[1]
चेतनां क्षणतः प्राप सिक्तश्चन्दनवारिणा । जातिस्मरो बभूवाथ पूतिगन्धिकुमारकः[2] ॥ २४७ ॥
सिंहसेननरेन्द्रेण जनकेन समं ययौ । सदा केवलिनः पार्श्वं पूतिगन्धकुमारकः ॥ २४८ ॥
त्रिः परीत्य तमीशानं वन्दित्वा भक्तितः पुनः । धर्मं श्रुत्वा पिता-पुत्रौ तस्थिवांसौ सतः पुरः ॥२४९॥
अथ प्रस्तावमासाद्य सिंहसेनस्तदाऽऽत्मनः । पप्रच्छ तं विभुं भक्त्या स्वमनोगतमादरात् ॥२५०॥
पूतिगन्धः सुतो जातो मदीयः केन हेतुना । हित्वा मूर्च्छामितो नाथ वदेश मम सांप्रतम् ॥२५१॥
नरेन्द्रस्य[3] वचः श्रुत्वा जगौ तोषाद्यतीश्वरम् । राजन्नन्यभवेऽनेन त्वत्पुत्रेण मुनिर्हतः ॥ २५२ ॥
संसारसागरे भ्रान्त्वा नानायोनिसमाकुले । अधुना त्वत्सुतो जातो दुर्गन्धस्तद्वशादयम् ॥ २५३ ॥[4]
दृष्ट्वा सुरकुमारं च गच्छन्तं सुपरिस्फुटम् । स्मृत्वा भवस्य समीतो जातो जातिस्मरः पुनः ॥ २५४ ॥[5]
जिनोऽथापि नरेन्द्रेण भक्तिविन्यस्तचेतसा । कथं मुनिवधोऽनेन कृतो मे वाचि केवलिन्[6] ॥२५५॥
राजेन्द्रवचनं श्रुत्वा केवली निजगावमुम् । त्वत्पुत्रवैरसंबन्धं मुनिहिंसनकारणम् ॥ २५६ ॥
कलिङ्गविषयाभ्यासे विन्ध्यपर्वतसंभवम् । महाशोकवनं दिव्यं विद्यते तरुसङ्कुलम् ॥ २५७ ॥
तत्र स्तम्बकरिस्तुङ्गस्तथा श्वेतकरी परः । इमौ यूथाधिपौ जातौ हस्तिनौ मदशालिनौ ॥ २५८ ॥
ततो महानदीतीरप्रविष्टौ जलकारणात् । परस्परं रणं कृत्वा मृत्युं गतौ तदा ॥ २५९ ॥
मार्जार-मूषकौ[7] जातौ सर्प-बभ्रू[8] भयानकौ । मृतोऽपि तौ समुत्पन्नौ तथा श्येन-चकाहकौ ॥२६०॥
नीलोत्पलसमानाक्षौ[9] गुञ्जाफलसमानकौ । मृगः पापाप्तौ जातौ कलङ्कनकारिणौ ॥ २६१ ॥
[10]कनकावस्यपुरे रम्ये प्रभुः सोमप्रभोऽभवत् । सोमश्री तस्य भार्या च सोमवक्त्रा प्रियंवदा ॥२६२॥
बभूवास्य नरेन्द्रस्य सोमभूतिः पुरोहितः । ब्राह्मणोऽस्य प्रिया भार्या सोमिला नाम विश्रुता ॥२६३॥
अस्यां बभूवतुः पुत्रौ सोमाद्यौ शर्मदत्तकौ । तौ विज्ञानकलायुक्तौ देवस्मृतिविशारदौ ॥ २६४ ॥
सोमशर्मप्रिया भार्या सुकान्ता कान्तविग्रहा । सोमदत्तस्य विख्याता तथा लक्ष्मीमतीरिता ॥२६५॥
अथ पञ्चत्वमापन्ने सोमभूतौ पुरोहिते । तदेदं सोमदत्ताय वितीर्णं भूभुजा पुनः ॥ २६६ ॥
सोमशर्मा पुनर्ज्येष्ठ कनिष्ठप्रियया सह । तिष्ठति प्रीतचेतस्कौ[11] लक्ष्मीमत्यभिधानया ॥ २६७ ॥
सोमशर्मप्रिया मूढा सुकान्ताऽऽख्या पुनः पुनः । सोमदत्तस्य तां वार्तां वदतीयं दिनेदिने ॥२६८॥
भ्रात्रा तेन समं सत्यं सोमदत्त तव प्रिया । लक्ष्मीमती दुराचारा तिष्ठति क्षीणमानसा ॥ २६९ ॥
सुकान्तावेदितां वार्तां सोमदत्तो निशम्य सः । दृष्ट्वाऽनयोर्विधर्मत्वं निस्ससार तदा गृहात् ॥२७०॥
महावैराग्यमासाद्य सोमशर्मविचेष्टितात् । सोमदत्तः प्रव्रज्य धर्मसेनान्तिके मुदा ॥ २७१ ॥
सोमदत्तं परिज्ञाय तदानीं तपसि स्थितम् । पुरोहितपदे राज्ञा[12] सोमशर्मा प्रतिष्ठितः ॥ २७२ ॥
शक्राख्यस्य महादेशे प्रभुः सोमप्रभो नृपः । दूतं प्रवेशयामास वसुपालमहीभुजः ॥ २७३ ॥

---

1 प कुम्भम्, ज कुम्भम्, फ कुम्भमिरम्. 2 पूतिगन्धकुमारक. 3 फज पूतिगन्धसुतो. 4 फ नरेन्द्रवचनं श्रुत्वा. 5 फ जातो जातिस्मरः पुनः. 6 फ त्रिःपरीत्य, फ repeats verses Nos. 253-3 7 पज त्रिवारम्, फ त्रिःप्रदक्षिणम्. 8 प साधिकम्. 9 फ केवली, ज केवलि. 10 प मधुरं, फ मार्जारम्-बभ्रू 11 ज बभ्रु=नकुल. 12 प सरस्वती. 13 फ कनकावस्यपुरे. 14 फ सोमिला. 15 [वेदस्मृति°]. 16 फ पञ्चत्वमापन्नो. 17 प कनिष्ठ. 18 पज प्रीतिचेतस्कौ. 19 फ लक्ष्मीमती. 20 फ राज्ञा.

वसुपालान्तिकं प्राप्य तं प्रणम्योपविश्य च । दूतो जगाद हृष्टात्मा मुखविन्यस्तपाणिकः ॥२७४॥
त्रिलोकसुन्दरस्तुङ्गो राजहस्ती महाबलः । विषये ते महीपाल रणरङ्गरसप्रियः ॥ २७५ ॥
अस्मदीयप्रभुर्वक्ति भवन्तं प्रीतमानसः । क्षिप्रं गजमिमं शुद्धं प्रवेशय मदन्तिकम् ॥ २७६ ॥
दूतवाक्यं समाकर्ण्य जगादेमं पुनः प्रभुः । हस्तिनं न ददामीमं बहुना जल्पितेन किम् ॥२७७॥
ततो निशम्य तद्वाक्यं स्वनाथं प्राप्य वेगतः । तद्वृत्तान्तं समावेद्य सुखं तस्थौ वचोहरः ॥२७८॥[3]
ततः सोमप्रभः कोपात् कनकस्थपुराद् बहिः । स्कन्धावारेण सर्वेण तस्थौ परनृपं प्रति ॥ २७९ ॥
यथाऽऽक्रमनशायी च सोमदत्तमहामुनिः । नक्तं प्रतिमया तस्थौ स्कन्धावारैकदेशके ॥ २८० ॥
सोमदत्तं मुनिं दृष्ट्वा प्रतिमास्थं महीपतिः । सोमशर्मा जगादेमं कोपारुणनिरीक्षणः ॥ २८१ ॥
अस्माकं भवतां शत्रुं विजेतुं चलतामिनम् । भूपापायशकुनो जातो नग्नश्रमणदर्शनात् ॥ २८२ ॥
तस्मान्मुनिमिमं हत्वा क्षिप्रमाश्यं रुधिरं दिशाम् । शान्तिकर्म भवेत् पूर्वं येनास्माकं नराधिप ॥२८३॥
सोमशर्मवचः श्रुत्वा मुनिहिंसनकारणम् । कर्णौ पिधाय हस्ताभ्यां सदा तस्थौ महीपतिः ॥२८४॥
स्थिते नरपतावेवं विमदस्थो द्विजस्तदा । नैमित्तिको विशुद्धात्मा चतुर्वेदषडङ्गवित् ॥ २८५ ॥
नानाशकुनशास्त्रार्थकुशलः साधुसंमतः । जगाद भूपतिं स्पष्टं विपश्चिज्जनताप्रियः ॥ २८६ ॥
सोमशर्मा द्विजो राजन्नजानन् वदतीदृशम् । कार्यसिद्धिं करोत्येष सर्वसत्त्वहितो यतिः ॥ २८७ ॥
समस्तकार्यनिष्पत्तिः समस्तशकुनोपमः । अयं यतीश्वरो दृष्टः सर्वकल्याणकारकः ॥ २८८ ॥

तथा चोक्तम् —

यतिराजवाजिकुञ्जरगोमयघटकुम्भवृषवरा येते ।
ग्राममने निष्क्रमणे सिद्धिकराः सर्वकार्येषु ॥ २८९ ॥

दृष्ट्वा यतीश्वरं मार्गे पुरतः समवस्थितम् । युद्धाय भवताऽनेन विष्णुना महितोऽर्जुनः ॥ २९० ॥
रथस्थो भव निःशङ्को धनुर्धारय भो नरः[8] । जितं परामहं मन्ये श्रमणीनो मुनिः पुरः ॥२९१॥

तथा चोक्तम् —

आरोह[10] रथं पार्थ गाण्डीवं चापि धारय ।
निर्जितां मेदिनीं मन्ये निर्ग्रन्थो यदिरग्रतः ॥ २९२ ॥

तथा शकुनशास्त्रेषु समस्तेषु विचक्षणैः । शुभाषितमिदं प्रोक्तं समस्तजनविश्रुतम् ॥ २९३ ॥

श्रमणस्तुरगो राजा मयूरः कुञ्जरो वृषः ।
प्रस्थाने वा प्रवेशे वा सर्वे सिद्धिकराः स्मृताः ॥ २९४ ॥

ज्योतिःशास्त्रे तथा प्रोक्तं सुभाषितमिदं बुधैः । समस्तभुवनव्यापि यशोव्यापारि समुज्ज्वलैः ॥२९५॥

पद्मिन्यो राजहंसाश्च निर्ग्रन्थाश्च तपोधनाः ।
यद्देशमभिगच्छन्ति तद्देशे शुभमादिशेत् ॥ २९६ ॥

तथा सुभाषितं नृप कोविदैर्भाषितं परम् । धर्मशास्त्रेषु सर्वेषु जनपुण्यविधायिषु ॥ २९७ ॥

यागी च ज्ञानी च तपोधनाश्च शूरश्च राजा च महत्तरश्च[11] ।
ध्यानी च मौनी च तथा व्रतस्थः संदर्शनादेव पुनन्ति पापम् ॥ २९८ ॥

---

1 पत्र ॰ 2 Some letters are rubbed away in क. 3 क omits No 278. 4 पत्र omit No 290 which is added by प on the margin. 5 प निर्जेता ॰ 6 पत्र सोमशर्मद्विजो. 7 पत्र तथोक्तम्. 8 [आ नर]. 9 पत्र रथ. 10 [आरोह]. 11 प महारोह

तेनास्माकं महाराज प्रस्थितानां जयो रिपोः । महामुनिमहामार्गे शकुनोऽयं भविष्यति ॥ २९९ ॥[1]
पुनमनस्य भगवस्त्वयं हतक्षेपादिवैरिणः । दर्शनादस्य नः साधोः कार्यसिद्धिर्भविष्यति ॥ ३०० ॥
अस्य सद्दर्शनात् साधोरस्माकं मगधाधिप । त्रिलोकसुन्दरं नाग प्रभाते चानयिष्यति ॥३०१॥[2]
विप्रदेवद्विजस्येदं निशम्य वचनं नृपः । तदानीं मौनमासाद्य तस्थौ मुदितमानसः ॥ ३०२ ॥
अथान्यदिवसे जाते मगधाधिपतिर्गजम् । [3]त्रिलोकसारमादाय प्राभृतं चाययौ विभुम् ॥ ३०३ ॥
सोमप्रभोऽपि तं भक्त्या पूजयित्वा गजान्वितः । विवेश स्वपुरं सोऽपि ससैन्यो निजसंपदा ॥३०४॥
पूर्ववैरानुबन्धेन सोमशर्माऽपि तं मुनिम् । प्रतिमास्थं निहत्याशु साहसेनाऽगमत् पुरम् ॥३०५॥
ततः प्रभातवेलायां सोमदत्तमहामुनिम् । ज्ञात्वा सोमप्रभो रुष्टो निहतं सोमशर्मणा[4] ॥ ३०६ ॥
सोमशर्मा दुराचारो मुनिर्हिंसाविधायकः । पापिष्ठो मुद्गलाज्ञेन पञ्चदण्डेन दण्डितः ॥ ३०७ ॥
मुनिर्हिंसाप्रभावेन सोमशर्मा सुदुःखी । उदुम्बरस्य कुष्ठेन गृहीतो दिनसप्तके ॥ ३०८ ॥
कुष्ठग्रस्तसमस्ताङ्गः कालमासाद्य दुःखतः । प्रययौ त्रिंशत्समुद्रायुः सप्तमीं क्षितिमाप सः ॥ ३०९ ॥
ततो निःसृत्य दुःखेन [5]स्वयंभूरमणाम्बुधौ । सहस्रयोजनायामो जातो मत्स्यस्तिमिङ्गिलः ॥ ३१० ॥
तत्र पञ्चत्वमासाद्य स्थितो षष्ठ्यामजायत । द्वात्रिंशतिसमुद्रायुः स मीनो दुःखपीडितः ॥ ३११ ॥
तत्र कालं विधायायं[6] कर्मभिर्निर्गतो महान् । सिंहो बभूव दुष्टात्मा वित्रासितमहागजः ॥ ३१२ ॥
कालं विधाय तत्रापि पञ्चम्यां नरकक्षितौ । बभूव भासुराकारो नारको बहुवेदनः ॥ ३१३ ॥
ततो विनिर्गतः क्लेशाद् गुञ्जास्फलनिभेक्षणः । बभूव कृष्णवर्णाङ्गो भीमभोगो भुजंगमः ॥ ३१४ ॥
कालं कृत्वा ततः पापश्चतुर्थीं पृथिवीमितः । ततो विनिर्गतो भूयः पुण्डरीकोऽभवत्ततः ॥ ३१५ ॥
व्याघ्रो स्थितिं परिप्राप्य तृतीयं नरकं गतः । ततो निःसृत्य शल्यकोऽजातो दुष्टविहंगमः ॥ ३१६ ॥
भूयः पञ्चत्वमासाद्य द्वितीयं नरकं ततः । ततोऽतिक्रम्य दुःखेन बको जातः सितप्रभः ॥ ३१७ ॥
बकोऽपि पञ्चतां प्राप्य प्रथमं नरकं ययौ । नानादुःखसमाकीर्णमेकसागरजीवितः ॥ ३१८ ॥
ततो विनिर्गतः क्लेशात् तव राजेन्द्र नन्दनः । पूतिगन्धकुमारोऽयं बभूव कुथिताङ्गकः ॥ ३१९ ॥
श्रुत्वा समवसरणं पूतिगन्धकुमारकः । पप्रच्छेति जिनं भक्त्या तदा विनतमस्तकः ॥ ३२० ॥
अन्यजन्मकृतस्यास्य नितान्तं पापकर्मणः । भविष्यति महाभाग्य कथमेतत्परिक्षयः ॥ ३२१ ॥[7]
निशम्य भारतीमस्य जिनेन्द्रो निजगाविभुम् । उपवासं च[8] रोहिण्यां कुरु त्वं यदि दुःखितः ॥३२२॥
जिनेन्द्रवचनं श्रुत्वा पूतिगन्धो जगौ जिनम् । रोहिण्यां हि कथं नाथ चोपवासो विधीयते ॥३२३॥
जिनस्तद्वाक्यमाकर्ण्य जगादेमं पुरःस्थितम् । अयं विधीयते वत्स रोहिणीस्थे निशाकरे ॥ ३२४ ॥
एवं च क्रियमाणेऽस्मिन् विधौ वर्षैस्त्रिभिः परम् । उपवासाः प्रजायन्ते चत्वारिंशत्परिस्फुटम्[9]॥३२५॥
अथवा पञ्चभिर्वर्षैर्नवभिर्दिवसैः सह । सप्तषष्टिः प्रजायन्ते सूपवासा महापदाः ॥ ३२६ ॥
एवं समाप्तिमायाते चोपवासविधौ पुनः । चतुर्विंशजिनार्चानां कार्यते परमः पटः ॥ ३२७ ॥
तदग्रे कार्यतेऽशोकरोहिणी लोकपावने । अष्टपुत्रसमायुक्ता चतुःपुत्रीसमन्विता ॥ ३२८ ॥
वासुपूज्यजिनेन्द्रस्य विचित्रां प्रतियातनाम् । कारयित्वा विधातव्या सपर्या परमोत्सवा ॥ ३२९ ॥
चतुर्विधस्य संघस्याहारदानं च भेषजम् । वस्त्रादिकं च दातव्यं भक्तितो विधिपूर्वकम् ॥ ३३० ॥
माहात्म्येन विधेरस्य पुरुषो वनिताऽपि वा । देवासुरमनुष्येषु तथा विद्याधरादिषु ॥ ३३१ ॥

---

1 क omits No. 299　2 कज सुखम् च सुखधीरम्,　3 ग त्रिलोक°　4 [सोमशर्मा°]　5 कज सोमशर्मणः.　6 कज विधाय.　7 कज स्वयम्भु°　8 विधायेमं　9 चतुर्विंशति°　10 ग सुखम्, क सुखम्, ज सुखधीरम्　11 क तु.

प्राप्य सम्मार्जनीयोऽसौ वन्दनीयोऽपि सर्वदा । सर्वदुःखक्षयं कृत्वा पश्चात् सिद्धिं प्रयाति वै ॥ ३३२ ॥
सम्यक्त्वं जिनधर्मेण पूतिगन्धादिवाहनः । रोहिण्याख्युपवासं च जग्राह जिनवाक्यतः ॥ ३३३ ॥
अणुव्रतानि पञ्चापि त्रिभिः सह गुणव्रतैः । शिक्षाव्रतानि चत्वारि जग्राहासौ जिनान्तिके ॥ ३३४ ॥
सम्यक्त्वादिकसामर्थ्यात् पूतिगन्धादिवाहनः । सुगन्धिवाहनो जातो धर्मतः किं न जायते ॥ ३३५ ॥
पालयित्वा स जैनेन्द्रं धर्मं मासैकमीप्सितः । राज्यं श्रीविजयाख्याय सुताय प्रददौ निजम् ॥ ३३६ ॥
आराध्याराधनां सारां पूतिगन्धश्चतुर्विधाम् । कालं श्रावकधर्मेण चकार स्थिरमानसः ॥ ३३७ ॥
देवदुन्दुभिनिर्घोषे नाके प्राणतनामनि । जातो महर्द्धिको देवो विंशत्यब्धिसमस्थितिः ॥ ३३८ ॥
तथोत्पन्नः स तस्यां शोभनायामुपस्थितः । हारकुण्डलदीप्ताङ्गो दिव्यानि तिमहाम्बरः ॥ ३३९ ॥

अविचिन्त्यमनानुपं वपुः पुनरालोक्य मुखं समादरे ।
शयनीयतलप्रदत्तहस्तं समपश्यद् वपुरुत्तमं क्षणात् ॥ ३४० ॥
किमिदं क गतोऽस्मि को भवः कुत एतन्मम शं निरञ्जनम् ।
कतमो हि जनोऽयमुन्मुखो रमणीयः कतमोऽयमाश्रयः ॥ ३४१ ॥
प्रतिबुद्ध्य दिवं दिवौकसामुपचारैरुचितानुवर्तनैः ।
मणिभूषणरश्मिसंभवा सुरवन्मस्तुतिरभ्यजायत ॥ ३४२ ॥
अभिषेकमहागृहं ययौ सुरसेनापरिवारितस्ततः ।
अभिषिच्य विधानतः सुरास्तमलंकरणाद् समानयन् ॥ ३४३ ॥
मणिभूषणवस्त्रनिर्मदीप्त्या सुरसंपुषितस्फेन स ।
पुनरप्यभिषेकसेककल्पप्रचलच्चामरसीकरे तदा ॥ ३४४ ॥
उपविष्टवति मृगेन्द्रविष्टरे प्रथमं नः सदहेव दिग्मुखे ।
प्रहतं सुरतूर्यमेकतः सुरनादेन नमःस्थया सह ॥ ३४५ ॥
व्यवसायसमागृहं श्रियं विकसत्प्रकाशविलाससमस्थले ।
उपगम्य सुरः स्यभिषिक्तचिन्तितानि प्रथमं प्रणामतः ॥ ३४६ ॥
प्रथमं जिनराजपूजनं कल्याणमभिषिक्तोचितं ततः ।
कुरु नाट्यमखं तु पश्चात् सुरदेवीललितानि मानय ॥ ३४७ ॥

पूतिगन्धधरो वीक्ष्य देवान् स्वपुरतः स्थितान् । भूयोऽपि चिन्तयामास सुरः स्तुतिविधायिनः ॥ ३४८ ॥
किं वा दत्तं मया पूर्वं किं ध्यातं किं तपः कृतम् । येनाहं कृतपुण्योऽस्मि सुखाप्तो देवमन्दिरे ॥ ३४९ ॥
दृष्ट्वा पूर्वभवं सर्वमवधिज्ञानलोचनात् । अयं स्तौति जिनान् सर्वान् सर्वज्ञान् सर्वदर्शिनः ॥ ३५० ॥
भूयोऽवदद् विमानस्थः कृत्वा शिरसि चाञ्जलिम् । नमोऽस्तु गुरवे तस्मै येनाहं ग्राहितो वृषम् ॥ ३५१ ॥
समस्तवन्दनीयोऽसौ पूजनीयोऽस्तु नित्यशः । यत्प्रसादेन चोत्पन्नो देवलोकेऽहमुत्तमे ॥ ३५२ ॥
मनोऽभिवाञ्छितान् भोगान् देवीभिः सह शोभनान् । पूतिगन्धधरो देवो भुञ्जानो व्यवतिष्ठते ॥ ३५३ ॥
पूतिगन्धधरस्यास्य सुरस्यामिततेजसः । उत्पत्तिस्थानकं वच्मि सांप्रतं साधुसंमतम् ॥ ३५४ ॥
अत्र जम्बूमति द्वीपे विदेहे पूर्वनामनि । विषये पुष्कलावत्यां नगरी पुण्डरीकिणी ॥ ३५५ ॥
नवयोजनविष्कम्भा दैर्घ्यं द्वादशयोजना । समस्तधनसंपन्ना विद्यते प्रथिता भुवि ॥ ३५६ ॥

1 पञ्च दुःखक्षयम्, फ दुःखक्षयम्, 2 फ रत्नवीर्य 3 [महर्द्धिक] 4 क omits No. 345. 5 पञ्च भिक्षिताः, 6 पञ्च दुःखक्षयम्, फ दुःखक्षयम्, 7 पञ्च चतुर्भागम्, फ चतुर्भागम्, 8 [देवाद्य]. 9 प दुःखक्षय, ज दुःखक्षय फ दुःखक्षयम्,

विमलोपपदं कीर्तिं कीर्तिशुभ्रीकृतावनिः । चम्पां चमूष भूपालः श्रीमती तत्प्रिया प्रिया ॥२५७॥
तनयो रूपसंपन्नः सर्वलोकमनोहरः । चकलकीर्तिः सुतो जातः पवित्रगन्धचरः सुरः ॥ २५८ ॥
मेघसेनोऽभवत् तस्य सखा प्राणप्रियस्तराम् । उपाध्यायस्य तौ बालौ श्रुतकीर्तेः समर्पितौ ॥२५९॥
कलाविज्ञानसंपन्नौ शब्दशास्त्रकृतश्रमौ । बभूवतुस्तकौ शीघ्रं श्रुतसागरपारगौ ॥ २६० ॥
उत्तरस्यां पुरि श्रेष्ठी मथुरायां महाधनः । नाम्ना सागरदत्तोऽभूत् सागरं मणिभिर्जयन् ॥ २६१ ॥
भार्या जयमतिस्तस्य रूपराजितविग्रहा । कन्योत्पन्नसुशीला तस्याः पुत्रः सुमन्दिरः ॥ २६२ ॥
दक्षिणस्यां पुरि श्रीमान् मथुरायां[1] जनप्रियः । नन्दिमित्रोऽभवच्छ्रेष्ठी धनदत्ताऽस्य गेहिनी ॥२६३॥
सुशीला-सुमती कन्ये गुणानां मन्दिराय च । पितृभ्यां विधिना तस्मै वितीर्णे[3] परमद्युती ॥२६४॥
मेघसेनोऽर्ककीर्तिश्च विवाहसमये तयोः । विहरन्तौ वयस्यौ तौ दक्षिणां मथुरामितौ ॥ २६५ ॥
अर्ककीर्तिरिमे कन्ये दृष्ट्वा विस्मितमानसः । गृहीते मेघसेनेन सन्मतेन करेण ते ॥ २६६ ॥
आदाय कन्यके यावत् मेघसेनो व्रजत्ययम् । तावत् पौरजनेनेमे गृहीते तत्कराद्वरम् ॥ २६७ ॥
ततस्तैः श्रेष्ठिभिः प्राप्य त्वरितं पुण्डरीकिणीम् । वार्ता विमलकीर्तेः सा भूभुजः कथिताऽखिला ॥२६८॥
निशम्य तद्वचो दीनं भूभुजा रोषमीयुषा । ततस्तौ झगिति क्षिप्रं विषयादपसारितौ ॥ २६९ ॥
ततस्तौ शोकतः किंचिन् म्लानवक्त्रसरोरुहौ । शीतशोकपुरं प्राप्तौ पश्चात्प्रवलितागतिः ॥ २७० ॥
तत्पुरे नीतिसंपन्नो राजा विमलवाहनः । विमलश्रीः प्रिया चास्य सती विमलमानसा ॥ २७१ ॥
अनयो रूपसंपन्नाश्चाष्टौ दुहितरोऽभवन्[5] । विनयाचारसंयुक्ता नामानीमानि बिभ्रति ॥ २७२ ॥
आद्या जयमतिस्तासां सुकान्ता कान्तविग्रहा । कनकोपपदा मालाऽ सुप्रभा सुमतिः परा ॥२७३॥
सुव्रता सुव्रतानन्दा विमला विमलप्रभा । कलाविज्ञानसंपन्ना रतिरूपसमप्रभा ॥ २७४ ॥
नैमित्तिकेन चादिष्टममोघवचनेन हि । जयमत्याः स्वरूपाया जयमत्या महाप्रियः ॥२७५ ॥
यथा चन्द्रकवेधस्य वेधं साधु करिष्यति । तस्मै मता महाराज जयमत्या भविष्यति ॥ २७६[6] ॥
ततो भूपतिना सर्वे तदर्थं राजपुत्रकाः । आहूता स्वपुरं क्षिप्रं समायातास्तदर्थिनः ॥ २७७ ॥
ततश्चन्द्रकवेधस्य वेध नैकोऽपि[7] भूपतिः । कर्तुं शक्नोति तन्मध्ये सत्प्रहृतमानसः ॥ २७८ ॥
अर्ककीर्तिः सहानेन मेघसेनेन चागतः । पश्यतीमं महायत्नो वेधं चन्द्रकपूर्वकम् ॥ २७९ ॥
अभ्यासितागमैः प्राज्ञैर्लोकविख्यातकीर्तिभिः । वदामि[8] चान्द्रकं वेधं कथितो यो महात्मभिः ॥२८०॥
प्रथमं स्थाप्यते स्तम्भस्तदग्रे निश्चि तारकम् । कुलालचक्रवच्चक्रं वेगतो भ्रमदुज्ज्वलम् ॥ २८१ ॥
तस्योपरि नरो भ्राम्यन् वैशाखकरणान्वितः । शरं धनुषि संयोज्य पश्यन्लक्ष्यं विनिक्षिपेत् ॥ २८२ ॥
अतः सप्तपदान्याशु प्रथमस्य युगस्य सः । समाप्य भ्रमणं चक्रे कुलालारितभूपवत् ॥ २८३ ॥[10]
भूयस्त्रीणि पुनस्त्रीणि पदानि प्राप्य वेगतः । युगानि सप्त जायन्ते पदानि[11] कुम्भकैर्नरैः ॥ २८४ ॥
सप्तमस्य युगस्यापि गत्वा त्रीणि पदानि च । जायते चाष्टमस्तम्भो मानदण्ड इव स्थितः ॥२८५॥
लभ्यमानाऽत्र[12] यत्नेन चालभद्रा कर्णिका । तदन्तरे भ्रमच्चक्रं स्थितनेमि च तिष्ठते ॥ २८६ ॥
स ना लघुत्वयोगेन भ्राम्यच्चक्रोपरि स्थितः । तदा सप्तयुगान् गत्वा चक्रवदे चलत्यपि ॥२८७॥
एवं सति शरं मुक्त्वा तद्वाले वेधमागते । इमं चन्द्रकवेधं हि निगदन्ति मनीषिणः ॥ २८८ ॥[13]

---

1 ज मथुरायां 2 ज मथुरायां 3 [वितीर्णे]. 4 प श्रीर. 5 फ °सेतुः. 6 पज कुमारम्, फ कुमारमिदम्. 7 फ वैवर्न कोपि 8 प वदामि. 9 फ कुलालचक्रवत्कुलान् 10 प omits 383 11 फ पदानि some letters lost in फ. 12 पज लभ्यमानो 13 पज कुमारम्, फ कुमारमिदम्.

तथा चोक्तम्—

सित्वा प्राग्वदनुक्रमेण युगपत्सत्क्रमेणादिमं
त्रीणि त्रीणि परान्यतीत्य पुरतोऽप्येकैकमेवं हि पद् ।
तस्मिन्प्रथमर्धरेन्तरशिरोगान्त्यगेतो तर्पणे
मध्ये चेति य एष विध्यति नरः साधन्द्रकास्यो व्ययः ॥ ३८९ ॥[1]

अथ देशिकरूपेण तत्रत्य कृतकौतुकम् । अर्ककीर्तिकुमारं च भाहान्य कश्चिदादरात् ॥ ३९० ॥
विद्यते वेधवाम्यासो धनुर्वेदस्य शोभनः । तदा चन्द्रकवेधस्य कुरु वेधं महामते ॥ ३९१ ॥
तदा तद्वचनात् सद्यो धनुर्मुक्तशरेण सः । विव्याधाशु चन्द्रकं वेधमर्ककीर्तिः कलस्वनः ॥ ३९२ ॥
अर्ककीर्तिं कृतानन्दस्तत्पिता विनिवेदिताः । जयमत्यादिका कन्यास्तदथो परिणीतवान् ॥ ३९३ ॥
ताभिर्देवीसमानाभी रूपकान्तिविभूतिभिः । अर्ककीर्तिः प्रभुञ्जानो भोगांस्तत्र वितिष्ठते ॥ ३९४ ॥
अर्ककीर्तिः समादाय चोपवास जिनार्चनम् । विधायामलप्रासादे सुष्वाप जिनमन्दिरे ॥ ३९५ ॥
चित्रलेखा विलोक्यैनम् सुप्तं विद्याधरी तदा । जहार वेगतः खेन तद्रूपकृतकौतुका ॥ ३९६ ॥
एषा विद्याधरी नीत्वा विजयार्धनगोपरि । मुमोच सुखसुप्तं तं सिद्धकूटजिनालये ॥ ३९७ ॥
ततो निद्राक्षये जाते विबुद्धः सन् समुत्थितः । अर्ककीर्तिस्ततोऽपश्यत् तमसं जिनमन्दिरम् ॥ ३९८ ॥
यावत् तद्धर्ममासाद्य चार्ककीर्तिः प्रतिष्ठते । तावत्प्रकपाटानि स्वयमुद्घाटितान्यरम् ॥ ३९९ ॥
अकृत्रिमामिमामत्र दृष्ट्वाऽसौ प्रतिमां जिनाम् । स्तुत्वा स्तुतिशतैर्भक्त्या निविष्टो मण्डपे पुनः ॥ ४०० ॥
एवं विलोक्य तत्रस्थः खेटो विकटदन्तकः । तत्रस्थपालकः प्राप्य जगादेति ससम्भ्रमम्[2] ॥ ४०१ ॥
यदर्थं त्वं समानीतो विद्याधर्याऽत्र बालकः । आकर्णयैकचित्तेन समस्तं कथयामि ते ॥ ४०२ ॥
विजयार्धनगेऽत्रैव पुरमप्रपुरं प्रभु । खेटः पवनवेगोऽस्य भार्या गगनवल्लभा ॥ ४०३ ॥
नीलोत्पलसमानाक्षी प्रजाताऽस्यतनयाम्बरा । वीतशोका कलाधारा वीतशोका सुताऽन्यतो ॥ ४०४ ॥
नमित्तिकेन पृष्टेन तस्मिन्निदं नरेशिना । आदेशोऽयं महाविद्य समाधानपुरस्सरम् ॥ ४०५ ॥
यस्मिन् समागते स्वामिन् सिद्धकूटजिनालये । स्वयं वज्रकपाटानि यास्यन्त्युद्घाटितान्यरम्[3] ॥ ४०६ ॥
अस्याः कान्तिवदेहाया नितान्तं रूपसंपदः । स भर्ता ते तनूजाया भविष्यति गुणाकरः ॥ ४०७ ॥
नैमित्तिकवचः श्रुत्वा सत्यमूत महामते । अनेन कारणेनात्र स्थापितोऽहं नरेशिना ॥ ४०८ ॥
नैमित्तिकवचः सत्यं सर्वं जातं तु सांप्रतम् । तस्मादुत्तिष्ठ भद्र त्वं सहाहं यामि मत्समम् ॥ ४०९ ॥[4]
तद्वचनतः कुमारोऽपि तोषकम्पितविग्रहकः । समेत तत्समं यातः श्रीमदप्रपुरान्तिकम् ॥ ४१० ॥
उद्याने स्थापयित्वाऽमुं नानाकुसुमवासिते । स्वनाथान्तिकमासाद्य स तद्वार्तां न्यवेदयत् ॥ ४११ ॥
त्वत्सुतावल्लभो नाथ रूपसौभाग्यविभ्रमः । त्वदुद्यानमासाद्य मयाऽऽनीतोऽवतिष्ठते[5] ॥ ४१२ ॥
श्रुत्वा तद्वचनं राजा तोषपूरितमानसः । पूजयामास तं दानैः खेटं विकटदन्तकम् ॥ ४१३ ॥
चातुरङ्गेन सैन्येन जयमङ्गलनिस्वनैः । अर्ककीर्तिर्विवेशेदं महानी व्यासुरं पुरम् ॥ ४१४ ॥
विस्तीर्णो वायवपेन वीतशोका स्वकन्यकाम् । अर्ककीर्तिस्ततो देमा विभूत्या विधिपूर्वकम् ॥ ४१५ ॥
एवमन्यमहाकन्याः परिणीतास्तथा पराः । पश्यपर्यायसाथास्य भुञ्जानः खेटसंपदम् ॥ ४१६ ॥

---

1 Here all the Mss read this verse alike. For the other readings and our suggestion see p. 63 above, No. 43. 7 2 पअ स्वर्णवित्रमिति. 3 प वर्धयता. 4 [मानद]. 5 प मनोरिथ [मनोरिथ]. 6 प भास्त्पुत्राधिनामरम्. 7 पअ इक्षयम्, प इस्तधीरम्. 8 पअ विसिद्धे. 9 [विशीर्णे].

मृगमदस्फुरद्वसोदैः स्मृत्वा निःसृत्य तत्पुरात् । अशनोपपदं प्राप तदाऽथ गिरिपत्तनम् ॥४१७॥
तत्सद्वनान्तिके दृष्ट्वा मनसश्चपलसौ क्षणम् । विमानानि च दिव्यानि तस्थौ मुदितमानसः ॥४१८॥
तत्रैव नगरे राजा महासत्त्वप्रभञ्जनः । आसीत् प्रभञ्जनोऽस्यापि भार्या नीलाञ्जना शुभा ॥ ४१९ ॥
यस्या दुहितरोऽष्टौ च महारूपसमन्विताः । शुभाश्च मदनसंताना बभूवुर्यौवनान्विताः ४२० ॥
प्रथमा मदना प्रोक्ता कनका विपुला परा । तथा वेगवती कन्या मालभारा कनकाविका ॥४२१॥
विद्युत्प्रभा प्रभा ज्ञेया तथा जयमतिः परा । सुकान्ता चेति निर्दिष्टा कान्ताखिलशरीरिका ॥४२२॥
ततो लोकसमूहेन राजोद्यानवनं श्रितः । भूयो निवर्तमानः सन् नगरं गन्तुमुद्यतः ॥ ४२३ ॥
अशनाद्रिगिरिस्तद्वो राजहस्ती मदान्वितः । आलानस्तम्भमामूर्ध्य रोहकं हतवानयम् ॥ ४२४ ॥
अर्ककीर्तिस्ततो दृष्ट्वा ध्वंसयन्तं वनं गजम् । सुवर्णमणिसंकाशाद् विमानादुत्ततार सः ॥ ४२५ ॥
कन्याः स्वपक्षं कृत्वा हस्तिनोऽग्रे व्यवस्थितः । राजा परिजनोपेतः पश्यति स्म तकं नरम् ॥४२६॥
उत्क्षेपक्रमेनाशु दत्त्वा पादौ स दन्तयोः । हत्वा कुम्भौ च हस्ताभ्यां हस्तिनं शान्तवानिमम् ॥४२७॥
धार्मिकस्तत्करणैः शीघ्रं दमयित्वा स कुञ्जरम् । अर्ककीर्तिस्तमारुह्य विवेश नगरं मुदा ॥ ४२८ ॥
अर्ककीर्तिं समालोक्य जगाद स नराधिपः । अष्टौ कन्या वरास्तस्मै नैमित्तिकनिदेशिताः ॥ ४२९ ॥
ततस्ताभिः समं भोगान् भुक्त्वा स्तोकदिनानि च । वीतशोकपुरे रम्ये वीतशोकजनाश्रिते ॥४३०॥
मित्रं च मेघसेनाख्यं गृहीत्वा प्रीतमानसः । अर्ककीर्तिर्विवेशायं तदानीं पुण्डरीकिणीम् ॥४३१॥
तदा तौ द्वावपि क्षिप्रं नमस्कारपरायणौ । क्रमेणाक्षरान् मुक्त्वा तस्थतुर्मौनसंगतान् ॥ ४३२ ॥
कर्पूरं गन्धयुक्तिं च ताम्बूलं कन्दविक्रयम् । अक्षपूतं च रत्नानि चकाराय स तत्पुरे ॥ ४३३ ॥
गणिकावेषमादाय नाटकानर्तनं परम् । पितुरग्रे चकारायं लोकविस्मयकारणम् ॥ ४३४ ॥
एवमादीनि कार्याणि कौतुकानि मनस्विनाम् । तत्पुरे विहितश्चक्रे स्वविज्ञानं प्रकाशयन् ॥४३५॥
चतुरङ्गमहासैन्य विकुर्वणतया तदा । जग्राह गोकुलं शीघ्रं जनकस्य रणाय सः ॥ ४३६ ॥
गृहीतं गोकुलं ज्ञात्वा भूपतिः कोपसंगतः । विधातुं तत्समं युद्धं निर्जगाम पुराद्वरम् ॥ ४३७ ॥
ततोऽन्योऽन्येन संलग्नो गजोऽपि करिणा सह । पत्तिकः पत्तिना सार्धं रथोऽपि रथिना समम् ॥४३८॥
कश्चिद्धतो हतोऽन्येन कश्चिद्धतोऽपरेण च । चूर्णितः स्यन्दनोऽन्येन पत्तिकोऽपि पदातिना ॥४३९॥
एवं महति संग्रामे प्रवृत्ते जनसंक्षये । नष्टं सैन्यं स्थितं वीरैः स्वयं दृष्टं सुरासुरैः ॥ ४४० ॥
अथ चापं समाकृष्य तदासौ जनकान्तिके । अर्ककीर्तिर्मुमोचाशु स्वनामाङ्कितमार्गणम् ॥ ४४१ ॥
अर्ककीर्तिविमुक्तोऽयं शरपातो महानपि । पपात जनकस्याग्रे मन्दमन्दगतिक्रियः ॥ ४४२ ॥
दृष्ट्वा बाणं निजोत्सङ्गे स्वपुत्राक्षरसंगतम् । बभूव भूपतिः क्षिप्रं तोषपूरितमानसः ॥ ४४३ ॥
उत्तीर्य वाहनाच्छीघ्रं सकृत्वा पुत्रसन्मुखे । सम्मुखं प्राप्य तोषेण सर्वाङ्गीणेन सस्वजे ॥ ४४४ ॥
गाढं कण्ठे परिष्वज्य स्नेहनिर्भरमानसौ । पितापुत्रौ कलत्राणौ सुतरामास्थितौ तदा ॥ ४४५ ॥
यथा स्वं कुशलं पृष्ट्वा विधायास्यकथामपि । दत्त्वा यथेप्सितं दानं याचकानां सुखागमे ॥ ४४६ ॥
अर्ककीर्तिसुतायाशु विजयाय महात्मने । ददौ 'निजश्रियं सर्वां भूपतिर्भूपसाक्षिकम् ॥ ४४७ ॥'
चापमाभ्यन्तरं सर्वं हित्वा सर्वं विशुद्धधीः । जग्राह श्रीचारण्यान्ते शुभ्रकीर्तिनृपस्तपः ॥ ४४८ ॥
विमलोपपदः कीर्तिं समवाप्यास्त्रियुक्करम् । निहत्याशेषकर्माणि निर्वाणं गतवानयम् ॥ ४४९ ॥

---

1 क चाप. 2 क °मूर्धोरोहं, ग रोहकं°. 3 पज अर्ककीर्ति° 4 पज शान्तवानिमम्. 5 पज पुण्डम्, क पुण्डरीकम्. 6 ज ताम्बूलविक्रय° 7 क निजश्रियं. 8 पज पुण्डम्, क पुण्डरीकम्.

अर्ककीर्तिः परां प्राप्य चक्रवर्तिश्रियं क्रमात् । चकार विपुलं राज्यं बिडौजास्त्रिदिवे यथा ॥४५०॥
प्रालेयगिरिकूटाभं ¹चित्रकूटविराजितम् । प्रासादशिखरारूढः पश्यति स्म घनं नृपः ॥ ४५१ ॥
यावत्स्थिति स भूपो घनं ²स्वकिया घनम् । विलीनं तावदालोक्य वैराग्यमगमत् प्रभुः ॥ ४५२ ॥
यशोमतीसुतं ज्येष्ठं राज्ययोग्यं महागुणम् । विमलोपपदं कीर्तिं पुत्रमाहूतवानयम् ॥ ४५३ ॥
सामन्तसचिवाध्यक्षं सुतायास्मै यशस्विने । अर्ककीर्तिर्निजं सर्वं महाराज्यपदं ददौ ॥ ४५४ ॥
आपृच्छ्य सकलं लोकं महावैराग्यसंगतः । अर्ककीर्तिः प्रवव्राज शीलगुप्तान्तिके मुदा ॥ ४५५ ॥
उग्रं तपो विधायाशु सामान्यजनदुष्करम् । सल्लेखनां चकारायं मासमेकमपि स्थिते ॥ ४५६ ॥
आराधनां समासाद्य चतुरङ्गां विधानतः । अर्ककीर्तिमुनिः कालं चकार विमलाशयः ॥ ४५७ ॥
सुरदेवीकृतानन्दे नानातूर्यमनोहरे । द्वाविंशतिसमुद्रायुर्जातोऽयममरोऽच्युते ॥ ४५८ ॥
पूर्वोक्तपूतिगन्धाऽपि श्रावकव्रतभूषिता । उपोष्य रोहिणीं भक्त्या चक्रे कालं समाधिना ॥ ४५९ ॥
पल्योपमानि भुञ्जाना सुखं पञ्चदशानि च । अच्युतस्यैव देवस्य महादेवी बभूव च ॥ ४६० ॥
भुक्त्वा तया समं भोगान् मनःसंकल्पकल्पितान् । कालगोचरतां प्राप्य स्वसुखस्थोऽस्ति भूतले ॥४६१॥
अत्रैव ³भरतक्षेत्रे जम्बूद्वीपसमन्विते । कुरुजाङ्गलदेशोऽस्ति हस्तिनागपुरं परम् ॥ ४६२ ॥
वीतशोकनरेन्द्रस्य चैतन्नगरवासिनः । भार्या विद्युत्प्रभा चासीद् विपुलसुखसमप्रभा ॥ ४६३ ॥
अनया रूपसंपन्नः पुत्रजन्माभिलाषिणोः । जातोऽशोकोऽधुना राजन् पुत्रस्त्वं कुलनन्दनः ॥४६४॥
पूर्विग पापरी देवी या तवासीन्मनःप्रिया । सा स्वर्गात्प्रस्थिता भूमिमवतीर्याऽऽशुभे भवे ॥४६५॥
श्रीमदङ्गाख्यदेशस्थचम्पायां पुरि रूपिणी । मघोनस्तनया जाता श्रीमत्यां रोहिणी नृप ॥४६६॥
रोहिणी त्वत्समीपस्था तिष्ठति प्रीतमानसा । भूपोऽपि त्वन्महादेवी जाता प्राणगरीयसी ॥४६७॥
रूप्यकुम्भमुनेरस्य चारणस्य महात्मनः । निशम्य वचनं सत्यमशोको निजगादमुम् ॥ ४६८ ॥
बहूदितेन किं नाथ विज्ञाप्य भवन्तमहम् । पुत्राणां च सुतानां च मे निरूप भवान्तरम् ॥४६९॥
अशोकवचनं श्रुत्वा रूप्यकुम्भो जगाविति । अवधिज्ञाननेत्रेण पुत्रपुत्रीभवान्तरम् ॥ ४७० ॥
अत्र जम्बूमति द्वीपे क्षेत्रे भरतनामनि । शूरसेनजनान्तोऽस्ति विशिष्टजनसंकुलः ॥ ४७१ ॥
उत्तरां मधुरां वास्ति तदानीं श्रीधरो नृपः । विमला तन्महादेवी कमला तत्सुता शुभा ॥४७२॥
अग्रभोगी नृपस्यास्य दरिद्रकुलसंभवः । अग्निशर्माऽभवद् विप्रस्तज्जाया सिलका परा ॥ ४७३ ॥
तयोः सप्त सुता जाता प्रेमसक्तचेतसो । अग्निभूतिर्भवेदाद्यः श्रीभूतिरपरो मतः ॥ ४७४ ॥
वायुभूतिर्विशाखादिभूतिर्ज्ञेयो परोऽपि वा । त्रिषभूतिर्महाभूतिः सुभूतिरपि च क्रमात् ॥ ४७५ ॥
दरिद्रनिरयास्ते च नानाशास्त्रविचक्षणाः । दारिद्र्योपहता पुंसो यथु पाखण्डिपुत्रकम् ॥ ४७६ ॥
शुभनिष्ठो नृपस्तत्र स्वरूपा तत्प्रियाऽभवत् । सिंहध्वनिमहासत्त्वः पुत्रः सिंहरथोऽजयो ॥ ४७७ ॥
विगतोपद्रवो लोकस्तत्पुरे भूपतिः परः । रूपश्रीरस्य भार्या च तत्सुता कमलाऽभवत् ॥ ४७८ ॥
पितृभ्यां कमला धात्री दत्ता सिंहरथाय सा । दृष्ट्वा तयोर्विवाहं तं चिन्तयन्ति द्विजाः पुनः ॥४७९॥
अस्माभिः पापसंयुक्तैर्न कृतः पूर्वजन्मनि । धर्मो दयापरो जैनः सर्वदुःखविनाशनः ॥ ४८० ॥
भवन्ति धर्मयुक्तानां पुण्यानां विभूतयः । महादुःखानि जायन्ते महापापविपाकिनाम् ॥ ४८१ ॥

---

1 क चित्रकूट 2 कख [illegible] 3 क देवम् 4 क नाम 5 कख [illegible] 6 ख [illegible] 7 [illegible] 8 क [illegible] 9 क omits No 4 10 कख [illegible] 11 ख [illegible]

धर्माधर्मफलं ज्ञात्वा वसुभूत्यादिमाहना । यशोधरमुनिं प्राप्य धर्मं पप्रच्छुरादरात् ॥ ४८२ ॥
श्रुत्वा तद्वचनं कान्त यशोधरमुनीश्वरः । धर्मं जगाद चैतेषां सतानामपि शोभनम् ॥ ४८३ ॥
लब्ध्वा मनुष्यतां यो हि धर्मं न कुरुते नरः । स निधिं वीक्ष्य संजातो लोचनाभ्यां विवर्जितः ॥४८४॥
धर्मेण कुलसंपत्तिर्दिव्यरूपं च धर्मतः । धर्मेण धनसंप्राप्तिः कीर्तिर्धर्मेण देहिनाम् ॥ ४८५ ॥
कौ वशीकरणं धर्मो धर्मश्चिन्तामणिः परः । वसुधारा शुभा धर्मो धर्मः कामदुघा च गौः ॥४८६॥
उक्तेन बहुना किं वा सारं यद्यच्च दृश्यते । मनोऽभिवल्लभं यच्च तत्तद् धर्मफलं द्विजाः ॥ ४८७ ॥
इद धर्मफलं श्रुत्वाऽधर्मतो वाऽसुखं नृणाम् । एव मत्वा द्विजाः सर्वे तत्समीपे प्रवव्रजुः ॥४८८॥
तत सर्वे तपः कृत्वा कालं प्राप्य समाधिना । जाता महर्द्धिका देवाः स्वर्गे सौधर्मनामनि ॥४८९॥
द्विसागरं सुखं तत्र भुक्त्वा ते नाकतश्च्युताः । वसुभू रोहिणीपुत्रा वीतशोकादयो नृप ॥ ४९० ॥
एषोऽपि लोकपालस्त्वस्त्वत्सुत परमोदय । पूर्वजन्मनि राजेन्द्र भव्यात्मा क्षुल्लकोऽभवत् ॥४९१॥
श्रावकानां परं धर्मं सम्यक्त्वादिकमादरात् । विहितात्मवसामीप्ये चक्राहार्य विशुद्धधीः ॥ ४९२ ॥
कर्मभूमिषु सर्वासु विद्यया गमनस्पृशा । जिनचैत्यानि सर्वाणि कृत्रिमाकृत्रिमाण्यपि ॥ ४९३ ॥
सुरासुरनुतान्युच्चैर्भक्तिविन्यस्ततनूरुह । कालत्रये विशुद्धात्मा क्षुल्लको नमति स्म सः ॥ ४९४ ॥
काल समाधिना कृत्वा जिनभक्तिपरायण । देवदुन्दुभिनिर्घोषे सौधर्मे नाकमाप सः ॥ ४९५ ॥
तत्र दिव्यं सुखं भुक्त्वा पल्यानां पञ्चविंशति । जातोऽयं रोहिणीपुत्रो लोकपालस्ततश्च्युत ॥४९६॥
कथित पुत्रसंबन्धो भवान्तरसमागत । वदामि तेऽधुना भूप त्वत्पत्नीयां भवान्तरम् ॥ ४९७ ॥
अथ पूर्वविदेहे हि जम्बूद्वीपे मनोहरे । विषयः पुष्कलनामास्ति धनधान्यजनाकुलः ॥ ४९८ ॥
दक्षिणे विजयार्धस्य भागे पाटलखण्डपुरी । राजा गरुडसेनोऽस्यां तत्प्रिया कमलाऽमला ॥४९९॥
तत्सुता रूपसंपन्नास्तस्य कमलानना । अर्धवर्तेश्वरस्वीरामा नामानीमानि बिभ्रति ॥ ५०० ॥
कमलश्रीर्मता पूर्वा तथा कमलगन्धिनी । कमला च तृतीया स्यादन्या विमलगन्धिनी ॥ ५०१ ॥
एता रूपान्विता दिव्याः भवताः प्रीतमानसाः । उद्यानवनमाजग्मुः सर्वसुपुष्पफलान्वितम् ॥ ५०२ ॥
दृष्ट्वाऽत्र सुव्रताचार्यं चारणं मुनिपुंगवम् । नत्वोपवासमाहात्म्यं पृच्छन्तीमाः सकौतुकाः ॥५०३॥
नाथ लोकोपवासोऽयमुच्यते नामको भुवि । लोकोत्तरितधर्मोऽपि चोपवासो निगद्यते ॥ ५०४ ॥
सुव्रतस्तद्वचः श्रुत्वा धर्मोपाख्यानकारणम् । लक्षणं ह्युपवासस्य जगादासां यथाक्रमम् ॥ ५०५ ॥
चतुराहारमिमं प्रोचुर्जिना राद्धान्तवेदिनः । अशनं पानकं खाद्यं स्वाद्यं चेति चतुर्विधम् ॥ ५०६ ॥
अतश्चतुर्विधस्यापि चाहारस्य सतो भुवि । बलकान्तिप्रदस्यालं मन्ये चाक्षयपक्षुन्द्विद ॥ ५०७ ॥
मुनिमार्गेण यत्नेन जिनप्रोक्तेन साधुना । क्रियते यः परित्यागो ह्युपवासः स भण्यते ॥ ५०८ ॥
उपवास पुनर्यस्तु लौकिके समये मतः । सर्वाहारसमादाने जायते स न जातुचित् ॥ ५०९ ॥
सर्वाहारसमादाने "सोपवासो भवेदयम् । तच्चाप्यपाठकाः" नूनं "किमनर्थं वदन्त्यमी ॥५१०॥
फलं मूलं पयो नीरं हविर्मोदनमाधिकम् । गुरुरितोपय चाद्ये धर्मकार्याणि देहिनाम् ॥५११॥

तथा चोक्तम्–

अष्टौ तान्यव्रतघ्नानि आपो मूलं पयः फलम् ।
हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधम् ॥ ५१२ ॥

1 प चैत्यतृषिम्यम्, 2 पज चतुष्कम्, फ चतुष्कमिदम्, 3 प चातुर्थ 4 पज पुष्पम्, फ पुष्पम्, 5 फ चोपवास ततः 6 क तं मुग 7 प पुष्पम् ज पुष्पम्, फ पुष्पमिदम्, 8 फ चव चतु॰ 9 प पुष्पम् ज पुष्पम् फ पुष्पमिदम्, 10 सोपवासे 11 फज पठके. 12 फ किमर्थं

उपवासो न बाधेत सेवितैरप्यभिर्मुनि । तत्फलं जन्तुभिर्नैव प्राप्यते धर्मभिक्षुभिः ॥ ५१३ ॥
मुनिमार्गेण यत्नेन मुनिभिर्धर्मवत्सलैः । सर्वाहारपरित्यागादुपवासः प्रजायते ॥ ५१४ ॥
उपवासस्य माहात्म्यं पुत्र्यः शुद्धेन चेतसा । आकर्णयत भावेन प्रोच्यमानमिदं परम् ॥ ५१५ ॥
यदज्ञानेन जीवेन कृतं पापं सुदारुणम् । उपवासेन तत्सर्वं दहत्यग्निरिवेन्धनम् ॥ ५१६ ॥
रजोमलसमालिप्ताङ्गो यथा तोयेन निर्मलः । तथोपवासतोयेन आत्मा भवति निर्मलः ॥ ५१७ ॥
ध्मायमानं यथा लोहं मलं त्यजति सर्वतः । व्रतोपवासतोयेन तथा पापमलं त्यजेत् ॥ ५१८ ॥
जलदापाये [1]यथा स्वच्छे शरः शोभते रविः । शुद्धेन्द्रियकषाया नूनं नरः पापं विशोधयेत् ॥ ५१९ ॥
सूक्ते सर्वधर्मेषु तपो नानशनात् परम् । पापानां क्षयहेतुत्वादुपवासः परं तपः ॥ ५२० ॥
देवमन्त्र्यर्थवधा वा तिर्यग्घोरमहापसाः । व्रतोपवासयोगेन वशं गच्छन्ति तत्क्षणात् ॥ ५२१ ॥
विद्याभास्वत्प्रयोगाश्च योगाश्च वशकारिणः । सिध्यन्ति ह्युपवासेन ये चान्ये व्यभिचारिणः ॥ ५२२ ॥
इदं संक्षेपतः स्तोकमस्माभिः कृतनिश्चयैः । उपवासविधानं हि भवतीनां निवेदितम् ॥ ५२३ ॥
श्रुत्वा यतिवचः कन्यास्तोषपूरितमानसाः । मुनिं पृच्छन्ति पञ्चम्याश्चोपवासविधिं तदा ॥ ५२४ ॥
कन्यावचनमाकर्ण्य वशी योगी पुनर्जगौ । पञ्चमी द्विविधा प्रोक्ता कृष्णा शुक्ला जिनेश्वरैः[2] ॥ ५२५ ॥
या कृष्णपञ्चमी कृष्णे पक्षे सर्वैः सोच्यते । वर्षाणि पञ्च तायन्तो मासा मुदितमानसैः[3] ॥ ५२६ ॥
एतस्याः कृष्णपञ्चम्या माहात्म्येन सुनिश्चितम् । जीवः समाधिमाप्नोति जिनशासनभावितः ॥ ५२७ ॥
यस्याः फलेन संसारे [4]सम्यग्जीवप्रधानतः । द्वित्रीन् भवान् परिभ्राम्य सिद्धिं याति निरन्तरम् ॥ ५२८ ॥
एकस्मिन् जन्मनि सार्धं यः[5] करोति समाधिना । कालं विशुद्धचेतस्को जिनभक्तिपरायणः ॥ ५२९ ॥
धर्मोपमानसामीप्ये भावात्क्षेमवराङ्गके । स सप्ताष्टान् भवान् हित्वा न भ्राम्यति भवार्णवे ॥ ५३० ॥

तथा चोक्तमागमे[6]—

एकम्मि [7]भगवमाहप्पे समाहिमरणेण कुणइ जो कालं ।
ण हु सो हिंडइ बहुसो सत्तट्ठभवे पमोत्तूण ॥ ५३१ ॥

आद्या श्रीपञ्चमी नाम चोपवासविधिर्भवेत् । एकत्रे शुक्लपञ्चम्यामसौ भव्यजनप्रियैः ॥ ५३२ ॥
वर्षैः पञ्चभिरेवासौ मासैरपि तथाविधैः[8] । उपवासैः कृतैरेभिः पूर्यतेऽयं महाविधिः ॥ ५३३ ॥
पश्चाज्जिनमहं कृत्वा पुष्पधूपाक्षतादिभिः । पश्चाद्वितानलम्बूषैर्जिनगेहं विभूष्यते ॥ ५३४ ॥
पञ्चमीपुस्तकं दिव्यं पञ्चपुस्तकसंयुतम् । साधुभ्यो दीयते भक्त्या येषां च यथोचितम् ॥ ५३५ ॥
आहारदानमात्रेयं भक्तितो भेषजादिकम् । वस्त्राणि चार्यिकादीनां[9] दातव्यानि मुमुक्षुभिः ॥ ५३६ ॥
कल्याणपञ्चकं प्राप्य विधेरस्य विधानतः । प्रयाति भव्यलोकोऽयं निर्वाणपदमव्ययम् ॥ ५३७ ॥
मुनिवाक्यं समाकर्ण्य वन्दित्वा मुनिपुङ्गवम् । तदा जिनमतासक्ता चक्रुः पञ्चमीविधिम् ॥ ५३८ ॥
पञ्चमीविधिमादाय तोषनिर्भरचेतसः । नत्वा मुनिपदाम्भोजं जग्मुर्निजपदं तदा ॥ ५३९ ॥
प्रासादशिखरस्थानां तदा चतसृणामपि । तन्मस्तकोपरि क्षिप्रं पपाताशनिरुल्बणः ॥ ५४० ॥
तत्प्रभावात्पञ्चत्वमासाद्यापि च तद्दिने । सौधर्मे धर्मसामर्थ्याज्जाता देव्यो मनोरमाः ॥ ५४१ ॥
एकोपवासपुण्येन धाम्निर्देवत्वमीप्सितम् । संप्राप्ता त्रिदिवावासे किन्नरीभिरशोभिते ॥ ५४२ ॥

---

1 क जलदापाये यथा वो. 2 क एतस्य. 3 ख ग कृष्णम् क कृष्णमिदम्, 4 [सम्यग्जीव]. 5 ख ग कृष्णम्, क कृष्णमिदम्. 6 क तथा चोक्तं समागमे 7 [एकम्मि भगवमाहप्पे]. 8 ख मनोरमाः. 9 क चार्यिकादीनां

पञ्चपल्योपमं कालं भुक्त्वा तत्र सुखं सुरै[1]। च्युतास्ते कालमासाद्य तवात्मजाः परिस्फुटाः ॥ ५४३ ॥
इदानीं त्वत्सुता राजन् रोहिणीगर्भसंभवाः। अष्टपुत्रादिकाः साक्षात्तिष्ठन्ति प्रभवान्विताः ॥५४४॥[2]
रूप्यकुम्भमुने[3] पार्श्वे श्रुत्वा पूर्वभवान्तरम्। राजा सपुत्रपुत्रीभ्यां रोहिणी सौख्यमाप सा ॥ ५४५ ॥
अन्येऽपि तस्य श्रुत्वा तदानीं स्वभवान्तरम्। सम्यक्त्वं श्रावकत्वं च यतित्वं प्रापुरुत्तमम् ॥५४६॥
अत्रान्तरे प्रणम्येशं कन्या वसुमती मुनिम्। जगादेति वचो हृष्टा[4] विस्मयव्याप्तमानसा[5] ॥ ५४७ ॥
नाथ मौनव्रते ख्यातो तत्फलेऽस्मिन्[6] तथा। कथं विधीयते स्वामिन् कथयैतन्ममाधुना ॥ ५४८ ॥
तद्भारतीं निशम्याथ धर्मवर्धनकारिणीम्। रूप्यकुम्भो जगादेमां लब्धान्यव्रतपालिकाम् ॥ ५४९ ॥
यदा भोजनवेलायां भुङ्क्ते यावच्च भोजनम्। तावन्न जल्पते किंचित् कर्तव्यं मौनमुत्तमम् ॥५५०॥
एवमिच्छानिरोधेन मासवर्षप्रमाणके। कृते मौनव्रते सम्यग् विधिरेष समाप्यते ॥ ५५१ ॥
मौने समाप्तिमापन्ने उद्यापनविधानतः[7]। अधुना ते समासेन तदुद्यापनमुच्यते ॥ ५५२ ॥
वर्धमानजिनेन्द्रस्य पुष्पवृष्ट्यादिसंपदा। सपर्या खलु कर्तव्या महामहविधानतः ॥ ५५३ ॥
ततः समस्तसंघस्य देहिभिर्भक्तितत्परैः[8]। देयं वस्त्रादिदानं च कर्मक्षयनिमित्ततः ॥ ५५४ ॥
ततो जैनगृहे दिव्या घण्टाद्याकारहारिणी[9]। वितानेन सह दातव्या विधिरेष समाप्यते ॥ ५५५ ॥
कालं कृत्वा ततो जन्तुर्मौनव्रतविधानतः। देवः कल्पसन[10] स्वर्गे जायते भोगसंयुतः ॥ ५५६ ॥
ततस्तत्र सुखं भुक्त्वा भुवं प्राप्य विशुद्धधीः। चक्रवर्त्यादिकान् भोगान् भूयो भुङ्क्ते स तत्फलात् ॥५५७॥
भौमान् भोगान् पुनर्भुक्त्वा मनोऽभिलषितांश्चिरम्। दीक्षामादाय जैनेन्द्रीं सिद्धिं याति स नीरजाः ॥
यद्योऽप्यात्तसमस्ताङ्गे मधुमन्थरगामिनि। वदामि तेऽधुना वत्से मौनव्रतफलं शृणु ॥ ५५९ ॥
भवसुखं[11] मनोहारि लोकप्रत्ययकारणम्। प्रमाणमद्भुतमादेयं वचनं मौनतो नृणाम् ॥ ५६० ॥
देवक्षेपाभिधाक्षेपामाज्ञामस्य प्रतीच्छति। मस्तकेन जनो यस्मात् तन्मौनफलमुत्तमम् ॥ ५६१ ॥
यच्च किंचित् कृतं तेन भयरोगविषापहम्। तत् समस्तं भवेल्लोके येन मौनं चिरं कृतम् ॥५६२॥
मधुराक्षरसंयुक्तं मुखपद्मं मनोहरम्। मौनेन जायते पुंसां नानार्थरुचिभाषणम् ॥ ५६३ ॥
अपि दुःसाध्यतां प्राप्ता[12] सर्वलोकफलप्रदा। विद्या सिध्यन्ति सर्वेषां चिरं मौनव्रतं[13] कृतम् ॥५६४॥
यदसाध्यं[14] भवेत् कार्यं मतिसंशयकारणम्। तदस्य वाक्यतः सिद्धिमेति मौनफलाद् भुवि ॥५६५॥
ध्यायन्ति मुनयो ध्यानं येन कर्मविनाशनम्। मौनेन हि सदा तस्मान्मौनं सर्वार्थसाधनम् ॥५६६॥
अणुव्रतधरः कश्चिद् गुणशिक्षाव्रतान्वितः। सिद्धिभक्तो भवेत् सिद्धिं मौनव्रतसमन्वितः ॥५६७॥[13]
एवं मुनिवचः श्रुत्वा नत्वाङ्घ्री शिरसा त्रिधा। मौनव्रतं तदा कन्या जग्राह मुनिसंनिधौ ॥ ५६८ ॥
श्रुत्वा पूर्वभवं धर्मं रूप्यकुम्भान्तिके स्वसुः। नत्वाऽशोकादयो भक्त्या हस्तिनागपुरं ययुः ॥५६९॥
अशोकरोहिणीपुत्राः प्रविश्य स्वं निकेतनम्। भुञ्जाना विपुलान् भोगांस्तस्थुर्मुदितचेतसः ॥५७०॥
समास्थानासने[14] स्थित्वा तदाऽशोकमहीपतिः। उपविष्टो महादेव्या समं भद्रासने मुदा ॥ ५७१ ॥
अथ कालमहल्लाभं कथान्ते स्वपयस्य सा। ददर्श रोहिणी चैकं पलितं तत्समीपगा ॥ ५७२ ॥
पलितं तत् समादाय महादेवी स्वपाणिना। ददौ भर्तृकरे मुग्धा पद्मकोशसमप्रभे ॥ ५७३ ॥
दृष्ट्वा स्वपलितं राजा महादेवीसमर्पितम्। तदा दध्यौ स वैराग्यं निन्दन् भोगशरीरकम् ॥५७४॥

---

1 पञ्च कुर्व, फ इतश्चिरम्. 2 फ सुता 3 फ व्याप्तचित्ता 4 ज धर्मवर्धनकारणम्. 5 फ मौनमुत्तमम्. 6 [घण्टा हाराद्यधारिणी]. 7 फ चिरं. 8 पञ्च कृत्स्नये 9 फ मौनव्रत [मौनव्रत कृते]. 10 फ पति कार्य. 11 पञ्च दिव्यगृहे 12 पफञ कृत्स्नम्. 13 [समवसरणे]. 14 फ पठितं.

अत्रान्तरे महीपाल वनपालो जगौ मुदा । राजन्नुद्यानमायातो वासुपूज्यजिनोऽद्य ते ॥ ५७५ ॥
श्रुत्वा तद्वचनं शीघ्रं प्रोत्थाय हरिविष्टरात् । तत्सन्मुखं परिप्राप्य प्रमोदी पदसप्तकम् ॥ ५७६ ॥
वासुपूज्यं जिनं नत्वा वनपालं प्रपूज्य च । आनन्दभेरिनादेन पौरलोकमघोषयत् ॥ ५७७ ॥
सोऽस्मात्कुमाराय दत्त्वा राज्यश्रियं विभुः । महाविभूतिसंपन्नो जगाम वनमादरात् ॥ ५७८ ॥
वासुपूज्यं जिनं भक्त्या त्रिः परीत्य प्रणम्य च । दीक्षां जग्राह जैनेन्द्रीं सद्गन्धेऽशोकभूपतिः ॥५७९॥
वासुपूज्यजिनेन्द्रस्य पुरत्रनवस्य हि । गणेन्द्रोऽशोकयोगीशो जातोऽयममितप्रभः ॥ ५८० ॥
उग्रं तपो विधायायं कालेन बहुना ततः । क्षीणकर्मा जगामाशु निर्वाणं परमुत्तमम् ॥ ५८१ ॥
रोहिणी च महादेवी हित्वा सर्वं परिग्रहम् । वासुपूज्यं जिनं नत्वा सुमतस्यन्ते तपोऽग्रहीत् ॥५८२॥
नानातपो विधायैषा सामान्यश्रीसुदुष्करम् । सल्लेखनविधिं चक्रे रोहिणी कर्महानये ॥ ५८३ ॥
तत स्त्रीत्वं समाहत्य कृत्वा कालं समाधिना । कल्पेऽच्युते बभूवासौ त्रिंशदुन्नीधर सुरः ॥५८४॥
एकेन चोपवासेन रोहिण्या तद्भवेन च । सामान्यमनुजाभ्यां प्राप्ता सुखपरंपरा ॥ ५८५ ॥

॥ इति श्रीरोहिणीनक्षत्रोपवासैकफलसंभूताशोकरोहिणीकथानकमिदम् ॥५७॥

*

५८ क्षीरकदम्बकथानकम् ।

कुरुजाङ्गलदेशेऽस्ति हस्तिनागपुरं परम् । तत्र पाण्डुर्नराधीशः कीर्तिशुभ्रीकृताम्बरः ॥ १ ॥
कुन्ती-माद्रयौ कलभाषे रूपयौवनसंगते । बभूवतुरुभे भार्ये नरेन्द्रस्यास्य शोभने ॥ २ ॥
युधिष्ठिरस्तथा भीमः किरीटी पृथुकीर्तयः । कुन्त्याः पुत्राः समुत्पन्नास्त्रयो लोकप्रिया क्षितौ ॥३॥
नन्दनो नन्दिताशेषबान्धवो लोकसंमतः । नकुलः सहदेवोऽपि जातौ माद्र्याः कुलध्वजः ॥ ४ ॥
तस्मिन्नेव पुरे चासीद् द्रोणाचार्यो द्विजो मतः । समस्तशास्त्रकुशलात्मा धनुर्वेदविशारदः ॥ ५ ॥
तस्य स्वस्तिमती भार्या बभूव मनसः प्रिया । अश्वत्थामाऽनयोः पुत्रो मनीषी वनवत्तमः ॥ ६ ॥
अर्जुनादिकुमाराणां विनयाचारवेदिनाम् । धनुर्वेदोपदेशं च द्रोणाचार्यो ददात्ययम् ॥ ७ ॥
विपदे तद्गुरोऽन्यात्र मिलत्पल्ली भयानकः । भिल्लः क्षीरकदम्बाख्यः शबरश्चापवत्तमः ॥ ८ ॥
लेप्यस्य प्रतिमां कृत्वा द्रोणाचार्यस्य तां पुनः । नमस्कृत्य महाभक्त्या धनुर्वेदं सुशिक्षितः ॥ ९ ॥
एवं दिनेदिने सोऽस्य कुर्वाणो विनयं भृशम् । धनुर्वेदस्य सर्वस्य पारं यातो महादरात् ॥ १० ॥
अन्यदा पर्यटन्नत्र मृगयायां धनुर्भृतः । सामर्थ्य परीक्षार्थं प्रापुरर्जुनादिकुमारकाः ॥ ११ ॥
तत्र क्षीरकदम्बोऽपि रममाणो वनान्तरे । धावमानामनायुक्तः कुमारान्तिकमाययौ ॥ १२ ॥
कथं तेषां कुमाराणां पापस्थायं प्रदीप्यताम् । मण्डलेन महानादो विहितः श्वानुगः सह ॥ १३ ॥
पुनः स मण्डलस्थेन शबरेण मुखे हतम् । विद्धः क्षीरकदम्बेन शब्दवेधशरेण हि ॥ १४ ॥
असम्भाव्ये स को नाम शब्दवेधं करोति च । स नरो दृश्यते नात्र धनुर्वेदविचक्षणः ॥ १५ ॥
चिन्तयित्वा चिरं तत्र किरीटी विस्मयान्वितः । शरानुसारतः प्राप्य शबरं तं ददर्श सः ॥ १६ ॥
ततोऽर्जुनकुमारोऽपि दृष्ट्वा पुरतः स्थितम् । भवदर्थं भीषणाकारं पप्रच्छेति कुतूहलात् ॥ १७ ॥
सचापं मण्डले विद्धः शब्दविधानशालिना । वद त्वं मम मे भद्र यथार्थं सनिमित्तकम् ॥ १८ ॥
तद्वाक्यं समाकर्ण्य शबरो भक्तिः पुनः । यथा स्वामिन् मया विद्धः श्वा शृणु मुख्य सुखम् ॥ १९ ॥

1 [illegible] 2 [illegible] 3 [illegible] 4 [illegible] 5 [illegible]
6 [illegible] 7 [illegible]

भूयोऽभाणि नरेणायं तदा क्षीरकदम्बकः । कोऽसि त्वं कस्य वा पार्श्वे धनुर्वेदोऽपि शिक्षितः ॥२०॥
तद्वाक्यतोऽवदत् सोऽपि नरं विस्मितचेतसम् । अहं क्षीरकदम्बाख्यो महापल्लीपतिः प्रभो ॥२१॥
धनुर्वेदो मया राजन् शिक्षितो निखिलोऽप्ययम् । द्रोणाचार्यस्य दक्षस्य शस्त्र-शास्त्रकलासु च ॥२२॥
अयं निगदितो नृपः कौतुकेन किरीटिना । धनुर्वेदोपदेशार्थं द्रोणाचार्यं प्रदर्शय ॥ २३ ॥
शक्तित्रय-वसुनन्दे च करवाल्यां च चक्रके । चित्रदण्डे स निष्णातो ज्ञातः पार्थामुखेऽमुना ॥२४॥
स्तम्भनाकर्षणादिकरणेषु विशारदम् । परीक्ष्य तं नरो दध्यौ तदा विस्मितमानसः ॥ २५ ॥
द्रोणाचार्यं तथा मां च शबरोऽयं चिलातकः । अतिशय्य जनं सर्वं विज्ञानेन स्थितो भुवि ॥२६॥
उपदेशो हि यो दत्तो ममैकान्ते प्रयत्नतः । द्रोणाचार्येण सोऽस्यापि दत्तः सातिशयो वने ॥२७॥
अथवा प्रायशो लोके मतिवर्जितचेतसाम् । स्वभावो विपरीतोऽयं दृश्यते महतामपि ॥ २८ ॥
संक्रीडते खले रामा नगे मेघोऽम्बु मुञ्चति । भजेत् तुच्छपरं लक्ष्मीः प्रायशः पण्डितोऽधनी ॥२९॥

तथा चोक्तम्—

अपात्रे रमते नारी गिरौ वर्षति माधवः ।
लुब्धमाश्रयते लक्ष्मीः प्राज्ञः प्रायेण निर्धनः ॥ ३० ॥

एवं विचिन्त्य विस्मित्य नगरं प्राप्य वेगतः । द्रोणाचार्यं समापेति किरीटी विनयान्वितः ॥३१॥
समस्तभुवनव्यापियशसां विदुषामपि । धनुर्वेदोपदेशो ते म्लेच्छहस्तमुपागमत् ॥ ३२ ॥
अर्जुनस्य वचः श्रुत्वा द्रोणाचार्यो जगादमुम् । कथमेवंविधं वाक्यं नर नृपे निरूपितम् ॥ ३३ ॥
उपदेशो ममाद्यैव तिष्ठति स्थिरतामितः । न म्लेच्छहस्तमायाति निश्चितं नर जातुचित् ॥ ३४ ॥
[— —]। उपदेशो गतस्तेऽयं म्लेच्छं क्षीरकदम्बकम् ॥३५॥
द्रोणाचार्यो निशम्याशु वाक्यं गाण्डीवधारिणः । जगाम तस्य पल्लिं नानानोकहसंकुलम् ॥३६॥
दृष्ट्वा म्लेच्छमिमं प्राह द्रोणाचार्यः कुतूहली । कस्य पार्श्वे त्वया ज्ञातो धनुर्वेदोऽयमीदृशः ॥ ३७ ॥
आकर्ण्य तद्वचः सत्यं जगौ म्लेच्छोऽपि तं पुनः । धनुर्वेदो मया ज्ञातो द्रोणाचार्यस्य चान्तिके ॥३८॥
तथापि सूरिणा भूयो म्लेच्छोऽस्य पुरतः स्थितः । द्रोणाचार्यं हि वेत्सि त्वं कीदृशं तं च मे वद ॥३९॥
निशम्य वाचिकं तस्य म्लेच्छोऽपि निजगाद तम् । द्रोणाचार्यमहं चापि दर्शयामि पुरस्तव ॥ ४० ॥
नीत्वाऽसौ लेप्यबिम्बस्य समीपं भाषितः पुनः । अयं स मद्गुरुः साक्षाद् द्रोणाचार्योऽवतिष्ठते ॥४१॥
तद्वाक्यतः पुनः प्रोक्तः शबरो गुरुणा तदा । कथमस्य त्वया पार्श्वे धनुर्वेदः सुशिक्षितः ॥ ४२ ॥
नृपस्त्वद्वाक्यतोऽनेन म्लेच्छेनायं प्रचोदितः । प्रसादो मे गुरोर्येन विधिना तं विधिं शृणु ॥ ४३ ॥
पूर्वमादाय पुष्पाणि कृत्वाऽस्य त्रिप्रदक्षिणम् । अधुनैव भक्तितः पादावर्चितौ विधिवन्मया ॥४४॥
ततश्चापं समादाय भाषितोऽस्य गुरुर्मया । दृष्टिमुष्टिप्रसंधानं करोमि स्थानकं क्रमम् ॥ ४५ ॥
नूनमस्योपदेशेन विनयेन मयेदृशः । शिक्षितोऽयं धनुर्वेदो विनयात् किं न लभ्यते ॥ ४६ ॥
तुष्यन्ति गुरवो भक्त्या देवास्तुष्यन्ति भक्तितः । तुष्यन्ति योगिनो भक्त्या भक्तितः किं न वा भवेत् ॥
श्रुत्वा तद्वचनं सारं तोषपूरितमानसः । गाण्डीवधारिणं प्रोचे द्रोणाचार्यो विशुद्धधीः ॥ ४८ ॥
धनुर्वेदोऽमुना ज्ञातो विनयाद् गुरुभक्तितः । त्वयाऽयं शिक्षितः साधो विनयेनापि भक्तितः ॥ ४९ ॥
एवं निगद्य तस्मात्स द्रोणाचार्येण तत्क्षणात् । तदा क्षीरकदम्बस्य स्वनाम विनिवेदितम् ॥ ५० ॥

---

1 फ ... 2 फ ... 3 ... फ ... 4 [चेतस्]. 5 ... 6 All the Mss. have only one line in this verse. 7 [...]. 8 ... 9 ...

एवं निगदिते तेन म्लेच्छो विनयसंगतः । ननाम चरणावस्य जानुस्पृष्टमहीतलः ॥ ५१ ॥
सत्र क्षीरकदम्बोऽयं धनुर्वेदविशारदः । द्रोणाचार्येण तुष्टेन याचितो गुरुदक्षिणाम् ॥ ५२ ॥
तद्वाक्यतः पुनर्म्लेच्छो गुरुभक्तिपरायणः । छित्वा सव्यकिणाङ्गुष्ठं ददावस्मै सदक्षिणाम् ॥ ५३ ॥
यथा क्षीरकदम्बस्य गुरुभक्तियुतस्य कौ । म्लेच्छस्यापि धनुर्वेदः सिद्धिं जातोऽस्यकल्मषः ॥ ५४ ॥
तथा मुनेरपि क्षिप्रं जिनेन्द्रस्य गुरोरपि । भक्त्या निर्वाणविधेयं सिद्धिं भवति निश्चितम् ॥ ५५ ॥

॥ [1]इति श्रीद्रोणाचार्यसमन्वितक्षीरकदम्बम्लेच्छधनुर्वेदविद्या समागमकथानकमिदम् ॥ ५८ ॥

*

५९ पद्मरथनृपकथानकम् ।

अत्रैव भारते वासे जनान्ते विजये पुरम् । भूम्यादितिलकं नाम बभूव धनसंकुलम् ॥ १ ॥
प्रजापालोऽभवत्तत्र पुरे राजा प्रजाहितः । मनोरमा प्रिया चास्य मनोरमशरीरिका ॥ २ ॥
तस्यैव श्रावकः श्रेष्ठी सुन्दरो भव्यसुन्दरः । प्रियाऽस्य सुन्दरी नाम बभूव शुभसुन्दरी ॥ ३ ॥
अन्योन्यप्रेमसंसक्तचेतसोरनयोः सतोः । क्रमेण सूनवः सप्त संजाता श्रावकात्मजम् ॥ ४ ॥
तन्मध्ये श्रावकोऽत्यन्तं कनिष्ठो धर्मभावितः । धर्मान्तरिः प्रिया चास्य प्रियदत्ताऽभवत् प्रिया ॥ ५ ॥
सखा विज्ञानठस्तस्य श्रावणोऽत्यन्तवत्सलः । सप्तव्यसनसंयुक्तो बभूव चलमानसः ॥ ६ ॥
धर्मान्तरिरपि क्षिप्रं तत्संसर्गेण तत्समः । जातो व्यसनसंपन्नो दुष्टसंगो हि तादृशः ॥ ७ ॥
ततस्तौ भूरिशो वधे कुर्वाणौ चौरिकां पुरे । तथापि प्रभुणा मुक्तौ श्रेष्ठिदाक्षिण्यकारणात् ॥ ८ ॥
धर्मान्तरिः पुनर्जातु गृहीतो दण्डपाशकैः । प्रविष्टश्चौरिकाहेतोर्गृहं कस्यापि दुष्टधीः ॥ ९ ॥
धनुर्वर्षपरित्यक्तो मुक्तः सन् पापधीरसौ । हस्तिनागपुरं प्राप मातृमार्गसुहृत्समम् ॥ १० ॥
यमदण्डतलारस्य समीपे प्राप्य वेश्म तौ । तद्बलेन स्थितौ तत्र चौरिकासक्तमानसौ ॥ ११ ॥
अन्यदा मुनिसामीप्यं प्राप्य धर्मान्तरिः क्वचित् । गृहस्थापमहं चक्रे दिनानि कतिचित् सकः ॥ १२ ॥
न निवृत्तस्त्वहं यावद् भदन्त परसद्मकम् । यावज्जीववधं नूनं न करोमि यतीश्वर ॥ १३ ॥
अत्रान्तरे तदा नक्तं चौरिकार्थं विनिर्गतौ । गता च चौरिकावेला मन्दं नाटकदर्शनात् ॥ १४ ॥
धर्मान्तरिर्गृहं प्राप्य दृष्ट्वा मातरमत्र सः । सुतया सह संसुप्तां जगाम क्रोधपाशितम् ॥ १५ ॥
ईर्ष्यावशेन यावत् खड्गमादाय तद्वधम् । करोत्यरं पुनस्तावत् सस्माराग्रमहस्य सः ॥ १६ ॥
पदानि सप्त यावत्सु पश्चात्कुर्याद्विवर्तनम् । तावत् ददर्श तावदेवार्यं स्वरं मातुः स्वयोषितः ॥ १७ ॥
ततो वैराग्यमासाद्य निर्गतः स्वगृहान्तरम् । गुरुमार्गावधं प्राप्तो व्रतेनाहं सुरक्षितः ॥ १८ ॥
एवं ध्यात्वा परिप्राप्य मुनेः सामीप्यमादरात् । जगाद व्रतसामर्थ्यं धर्मान्तरिरिदं वचः ॥ १९ ॥
धर्मं श्रुत्वा मुनेः पार्श्वे मधुमद्यपलस्य च । जग्राह विधायासौ नरसाऽसु नियमी ततः ॥ २० ॥
अन्यदा व्याघवृन्देन सह चौरिकया गतः । धर्मान्तरिः स्वमित्रेण दुर्विदग्धेन लोभकः ॥ २१ ॥
[6]ततस्ते तस्करा भीमा धनरत्नसमन्वितम् । वनमध्ये महासार्थं जघ्नुः क्रूरमानसाः ॥ २२ ॥
तद्धनं सर्वमादाय रक्षणार्थं समर्पितम् । विज्ञानठस्य चौरार्थैर्धर्मान्तरियुतस्य तैः ॥ २३ ॥
मुक्त्वेमौ धनरक्षार्थं क्षुत्क्षामक्लममानसाः । पानभोजनमानेतुं हस्तिनागपुरं ययुः ॥ २४ ॥

---

1 क omits इति. 2 ग धर्मान्तर. 3 कज मध्य मुनिर्वेक्षी 4 क बन्धर. 5 कज २८० 6 क interchanges 22 and 23

मांसमध्ये विषं क्षिप्त्वा मद्यमध्ये मधुन्यपि । परस्परमजानन्तस्तदन्तं ते समाययुः ॥ २५ ॥
धर्मान्तरिस्तमाहारं तथा विश्वानलोऽपि च । न भुङ्क्ते स्म समानीतं रात्रिभोजनकारणात् ॥ २६ ॥
[1]आत्मानीतं विहायैतौ तदानीं मिश्रितादिकम् । अन्यदन्यसमानीतं सर्वं भुक्तं तु दस्युभिः ॥ २७ ॥
अन्ये च तस्करा भुक्त्वा भोजनं विषमिश्रितम् । भवानन्तोऽर्णवं[2] प्राप्ताः पापविन्ध्यसमुद्भवाः ॥२८॥
ततस्तौ तद्धनं सर्वं समादाय प्रयत्नतः । तोषपूरितचेतस्कौ प्रविष्टौ नगरं तदा ॥ २९ ॥
मातुर्मार्गे धनं सर्वं समर्प्य नगरं व्रजन् । विश्वानलश्च मुक्त्वाऽत्र निर्गतोऽविस्थितः सकः ॥३०॥
ततो धर्मान्तरिः प्राप्य सूरिं गुणधरं परम् । निन्दयित्वा धनं स्वं च ययाचे स तपः सुधीः ॥३१॥
मुनिस्तद्वचनं श्रुत्वा ज्ञात्वा भव्यत्वमस्य च । ददौ दैगम्बरीं दीक्षां संसारार्णवतारिणीम्[3] ॥ ३२ ॥
आचाराङ्गादिकं सर्वं श्रुतं ज्ञात्वा महातपाः[4] । तपश्चकार शुद्धात्मा स मुनिर्धर्ममाश्रितः ॥ ३३ ॥
अन्यदा विहरंश्चार तापसाश्रमगोचरम् । धरणीभूषणं तुङ्गं पर्वतं स यतीश्वरः ॥ ३४ ॥
प्राप्य तं भूधरं रम्यं तदा धर्मान्तरिर्मुनिः । दधावातापनायोगं तच्छिरे स्थिरमानसः ॥ ३५ ॥
अथ विश्वानलः प्राप्य स्वस्था मित्रगुणान्तरम् । आतापनस्थितं साधुं धरणीभूषणे गिरौ ॥ ३६ ॥
दृष्ट्वा मौनमवस्थं तं [5]कायोत्सर्गव्यवस्थितम् । सकः कोपं परिप्राप्य तापसव्रतमाश्रयी ॥ ३७ ॥
कायोत्सर्गं [6]विमुच्यायं विश्वानलतपस्विनम् । आजगाम स योगीन्द्रस्तदा बोधयितुं तकम् ॥३८॥
दृष्ट्वा विश्वानलं योगी जगाद हितकारणात् । जिनधर्मं गृहाण त्वं समस्तसुखकारणम् ॥ ३९ ॥
मुनिवाक्येन तेनापि न किंचिन्मस्थितं तदा । भवान्तरे पुनर्मित्र [7]ज्ञास्यसि त्वं तपःफलम् ॥ ४० ॥
एवमुक्त्वा तकः साधुर्जिनधर्मपराङ्मुखम् । निर्गत्य च ततो देशाज्जगाम स्वमनीषितम् ॥ ४१ ॥
विश्वानलो मृतिं कृत्वा तापसव्रतयोगतः । [8]लोकमालगवानीकः सौधर्मेन्द्रस्य सोऽजनि ॥ ४२ ॥
ततो धर्मान्तरिर्योगी तपः कृत्वा सुदुष्करम् । द्वाविंशतिसमुद्रायुरच्युतेन्द्रो बभूव सः ॥ ४३ ॥
अथ नन्दीश्वरद्वीपे चान्योन्यमवलोक्य तौ । [9]अन्योन्यसंकथामित्रौ चक्रतुः कृतनिश्चयौ ॥ ४४ ॥
ततो धर्मपरीक्षार्थं यमदग्निसमीपकम् । प्राप्य देवौ कृतानन्दौ [10]तस्थतुस्तौ कुतूहलात् ॥ ४५ ॥
पक्षिणो रूपमेकोऽत्र पक्षिण्याश्चापरः पुनः । विधाय कौतुकाद्देवौ तस्थिवांसौ विचक्षणौ ॥ ४६ ॥[11]
पक्षिरूपः सुरः प्राह नारीरूपां नितम्बिनीम् । [12]विपक्षासक्तमोः कान्ते गिरिराजस्य मूर्धनि ॥४७॥
अभिषेकं विधास्यामि पक्षिणः प्रीतमानसा । पट्टबन्धं करिष्यन्ति वयमाळिनिसत्तमैः ॥ ४८ ॥[13]
पद्मपत्रसमानाक्षि विबुद्धकमलानने । शुद्धस्मितम्बिनि क्षिप्रं गमिष्याम्यहमादरात् ॥ ४९ ॥
निशम्य पक्षिरूपस्य देवस्य वचनं तदा । नारीरूपामरस्तत्र जगावेवं पुरःस्थितम् ॥ ५० ॥
स्वामिन् भवद्वियोगेऽहं गर्भालसशरीरिका । एकाकिनी न तिष्ठामि भयविह्वलमानसा ॥ ५१ ॥
पुरुषाणामिदं चित्तं को वै जानाति महीतले । मेरुशृङ्गे महारूपाः पक्षिण्यः सन्ति भूरिशः ॥ ५२ ॥
ताभिः समं सुरूपाभिः पक्षिणीभिर्निरन्तरम् । विहाय मां सुखं तत्र भुञ्जानः स्थास्यसि स्फुटम् ॥५३॥[14]
निशम्य तद्वचः पक्षी तामुवाच ससंभ्रमः । विहाय भवतीं नान्या विद्यते मम वल्लभा ॥ ५४ ॥
दयामुक्तस्य सत्त्वानां जननाशस्य कारिणः । समीपेऽस्य मुनेः कान्ते तिष्ठ त्वं दिनपञ्चकम् ॥५५॥[15]

---

1 पज अस्माभिरेतैर्विधायैते° 2 प अर्णवेऽभ्रमणम्. 3 फज संसारार्णवतारिणीम्. 4 पज महातपाः. 5 फ कायोत्सर्गं 6 फ विमोच्यायं. 7 फ ज्ञास्यसे. 8 प ज्योतिष्कः [ज्योतिष्कदेवे]. 9 पज अन्योन्यं. 10 फ तस्थिवांसौ विचक्षणः 11 फ omits 46. 12 प corrects thus विपत्सर्वत्रमोः [विहगकान्तामुक]. 13 प सुधम्, फज सुधर्मीयम्. 14 प चतु स्थास्यम्, फ चतुष्पथमिरम्, ज चतु(ः)पथमिरम्. 15 प सुधम्, फज सुधर्मीयम्.

साऽस्य वाक्यं समाकर्ण्य जगादेमं कलस्वना । स्वामिन्नहं न ते गन्तुं ददामि पदमप्यतः ॥५६॥
यद्यपि सा पुनस्तेन गां विप्रां हन्मि वल्लभे । नागच्छामि त्वदन्तं चेच्छपथोऽयं ततो मम ॥५७॥
यं यं करोति सोऽत्यर्थं शपथं चतुरस्थितः । तं तं नेच्छति सा देवी प्रतिकूलत्वमागता ॥ ५८ ॥
भूयोऽपि पक्षिणा प्रोक्ता सा देवी लोललोचना । मयाऽवश्यं प्रगन्तव्यं शपथं कं त्वमिच्छसि ॥५९॥
तद्वाक्यतः पुनः प्राह सा देवी पक्षिणी शकम् । हित्वा मां यदि यासि त्वं कुर्विमं शपथं ततः ॥६०॥
यदि नागच्छसि क्षिप्रं मुनेरस्य गतिं ध्रुवम् । अन्यजन्मनि किं यासि ततो यच्छ प्रिय प्रभो ॥६१॥
पक्षिणीवचनं श्रुत्वा पक्षी प्राह पुनः प्रियाम् । भद्रे शपथमीदृक्षं जीवन् सन् न करोम्यहम् ॥६२॥
पक्षिणोर्वचनं श्रुत्वा यमदग्निर्मुनिः पुनः । प्राहैतौ कुपितचेतस्कौ[1] भ्रुकुटीभीषणाक्तिकः ॥ ६३ ॥
किं कारणमिमं कर्तुं शपथं नेच्छसि द्रुतम् । कथयैतन्मम क्षिप्रं कौतुकं प्रतिभासते ॥ ६४ ॥
यमदग्निवचः श्रुत्वा पक्षी वदति तं पुनः । न गतिस्ते तपो नापि नास्ति किंचित्तपःफलम् ॥६५॥
गतिर्न सुतहीनस्य नाकोऽपि न भवेत्ततः । पुत्रस्य वदनं दृष्ट्वा परमं निर्वृतो भवेत् ॥ ६६ ॥
पुत्रेण जायते नूनं लोककीर्त्यनुत्तमम् । तथा कीर्तिविशद् शुभा लोकत्रयविसर्पिणी ॥ ६७ ॥
आश्रमा लोकविख्याताश्चत्वारो[2] विहिता बुधैः । यशोऽम्याश्रमसत्त्वानां समस्तजनवल्लभे ॥ ६८ ॥
आश्रमादाश्रमं याति यदि विप्रो न निश्चितम् । अतिक्रममिदं वाक्यं प्रायश्चित्तं च सोऽर्हति ॥६९॥
कुमारेण [3]त्वया साधो व्रतमाचरता तपम् । अप्रमाणमिदं सर्वं कृतं मूर्खत्वमीयुषा ॥ ७० ॥
मनु-व्यास-वसिष्ठानां वेदस्य वचनं तथा । योऽप्रमाणं वदत्येव ब्रह्मघाती भवेद् भुवि ॥ ७१ ॥
मनुधर्मः[4] [5]पुराणं च साङ्गो वेदविधिः क्रिया । एतानि सिद्धरूपाणि हन्तव्यानि न हेतुभिः ॥७२॥
पक्षिवाक्यं समाकर्ण्य यमदग्निर्विमूढधीः । आत्मानं निन्दितुं चाथ प्रारेभे मोहसत्कृपीः ॥ ७३ ॥
अज्ञानिना मया कष्टं कुमारव्रतचारिणा । इयन्तं कालमासाद्य कथमात्माऽतिवञ्चितः ॥ ७४ ॥
तपसी चिन्तयित्वेदं पक्षिणं निजमाह तम् । यन्मुखं कर्तुमायातो दुर्मतिं मे निवारय ॥ ७५ ॥
पक्षिणं पूजयित्वाऽयमुपदेशप्रदायकम्[6] । जगामेन्द्रपुरं योगी वराग्नी सन्ततीच्छया ॥ ७६ ॥[7]
तत्र राजाऽभवद् भाती यमदग्ने[8] सुमातुलः[10] । भार्या जयमतिस्तस्य रूपराजितविग्रहा ॥ ७७ ॥
तयोर्देवकुमार्याभाः कन्याः सन्ति मनोरमाः । गत्वा तदन्तिकं प्राह भूपतिं विह्वलात्मकः ॥७८॥
मातुलाहमपुत्रोऽस्मि न कश्चित्प्रतिरस्ति मे । तेन कन्यानिमित्तं हि राजन् प्राप्तस्त्वदन्तिकम् ॥७९॥
श्रुत्वा तद्वचनं राजा समाहूय स कन्यकाः । रूपसौभाग्यसंपन्ना जगादेति पुरःस्थिताः ॥ ८० ॥
अनेन मुनिना सार्धं कामभोगं यथेप्सया । भुञ्जानास्तिष्ठत स्वैरं मदुक्तेन कुमारिकाः ॥ ८१ ॥
कन्या जनकवाक्येन दृष्ट्वाऽमुं भयकारिणम्[12] । पिशाचसदृशं वृद्धं जटामुकुटधारिणम् ॥ ८२ ॥
बीभत्सं वचनैः कूर्चैर्हसित्वा जनकान्तिकात् । शीघ्रं पलायनं चक्रुः कन्यकाः भयविह्वलाः ॥८३॥
ततो रुष्टेन तेनासां शापो दत्तस्तपस्विना । कन्यका हि दुराचाराः सर्वाः कुब्जा भवन्त्विमाः ॥८४॥
कुब्जिकाः सकलाः कन्या जाता तद्वचनेन ताः । पुरमिन्द्रपुरं पूर्वं [11]कन्याकुब्जं बभूव तत् ॥८५॥
तन्मध्ये रेणुका कन्या धूलिधूसरिताङ्गिका । रममाणा पठयन्ती तस्यै मुदितमानसा ॥ ८६ ॥

---

1 प कुपिताम्, पञ कुपितमिदम्. 2 [कुलचरास्ते]. 3 प भावारा॰ [illegible] पाती घती वाक्यस्य निश्चय.
4 प मध 5 प वैरम 6 प मधुपदेशुतां. 7 प कुपतम्, पञ कुपतमिदम्. 8 प ॰ममुतेत.
9 प निम्नम्, पञ निम्नमिदम्. 10 प समातुल. 11 प ॰नरमदम्म 1° प कन्याङ्गने

तस्याः प्रदर्श्य धूर्तोऽयं जगौ तां बीजपूरकम् । यदि मामिच्छसि क्षिप्रं ददामीदमहं[1] तव ॥८७॥
उक्तस्तया मुनिर्देहि ममेदमतिशोभनम् । इच्छामि त्वामहं येन सर्वां वृद्धामपि[2] ध्रुवम् ॥ ८८ ॥
तस्करे तत्फलं दत्त्वा तन्मतेन स तापसः । स्कन्धे तां स समारोप्य निर्ययौ तद्गृहादरम् ॥ ८९ ॥
कृत्वा समस्तकन्यास्ताः कुब्जत्वपरिवर्जिताः । [3]शुक्रदानं च दत्त्वाऽथ जगाम निजमालयम् ॥९०॥
नीताऽसौ रेणुकां वृद्धिं परिणीय[4] विधानतः । तस्यां परशुरामस्य चक्र्योत्पत्तिरादरात् ॥९१॥
अच्युतेन्द्रस्ततः प्राह विश्वानलचरं सुरम् । अज्ञानमूढतां पश्य यमदग्नितपस्विनः ॥ ९२ ॥
अनेन मूढचित्तेन परमार्थमपश्यता । नन्विदं न परिज्ञातं शोभनं यमदग्निना ॥ ९३ ॥
परीक्षणं विधातव्यं सर्वग्रन्थेषु कोविदैः[5] । न कुग्रन्थोपदेशेन कर्तव्यं मूढमज्जनम् ॥ ९४ ॥
नानाब्दसहस्राणि कौमारब्रह्मचारिणाम् । स्वर्गं प्राप्य विशुद्धानि विहाय रमणीजनम् ॥ ९५ ॥

तथा चोक्तम्–

परीक्षा सर्वशास्त्रेषु कर्तव्याऽत्र विचक्षणैः ।
न कुशास्त्रप्रणीतेन कर्तव्यं विषमज्जनम् ॥ ९६ ॥
अनेकानि सहस्राणि कौमारब्रह्मचारिणाम् ।
दिवं गतानि शुद्धानि अकृत्वा दारसंग्रहम् ॥ ९७ ॥

एवं निगद्य तौ देवौ यमदग्निं च तापसम् । कौमारव्रतहन्तारं पुरं राजगृहं गतौ ॥ ९८ ॥
श्रावकोऽत्र जिनदासोऽत्र सम्यग्दृष्टिः प्रियंवदः । अयं पर्वदिने प्राप्ते कायोत्सर्गेण संस्थितः ॥ ९९ ॥
अच्युतेन्द्रो विलोक्येमं प्रतिमायोगधारिणम् । विश्वानलचरं देवं जगादेति विशुद्धधीः[6] ॥ १०० ॥
तिष्ठन्तु मुनयस्तावन्नत्वमुं श्रावकं स्थिरम् । यदि त्वं शक्तिसंपन्नः स्वयोगाद् भ्रंशमानय[7] ॥१०१॥
अच्युतेन्द्रस्य वाक्येन गजानीकामरः क्रुधा । जिनदासोपसर्गं स कर्तुं प्रववृते तदा ॥ १०२ ॥
धनधान्यापहारं हि पुत्रगोत्रादिहिंसनम् । नानाविधोपसर्गं च चकारास्य पुरःसरः ॥ १०३ ॥
उपसर्गेऽमुना चारं क्रियमाणेऽप्ययं पुनः । धराधरेन्द्रवत्तस्थौ ध्यानाविचलितमानसः ॥ १०४ ॥
ज्ञात्वा धीरत्वमेतस्य गजानीकामरो मुदा । आकाशगामिनीं विद्यां ददावस्मै स्थिरात्मने ॥१०५॥
विद्यामेतां प्रदायास्मै विश्वानलचरोऽमरः । अच्युतेन्द्रो जगादेति तरां कुतुकमानसः ॥ १०६ ॥
जिनदासो महानार्यः श्रावकोऽयं निरन्तरम् । धर्मभावितचेतस्को नानाशास्त्रविचक्षणः ॥ १०७ ॥
उपसर्गमयं धीरः सहते कोऽत्र विस्मयः । अत्यद्भुतं चान्यं दर्शयेन्ने ममामुना ॥ १०८ ॥
गजानीकवचः श्रुत्वा चारणेन्द्रो जगावमुम् । गुणचित्तो विशुद्धात्मा विद्यते मन्दधार्मिकः ॥१०९॥
जिनधर्मस्य सर्वस्य गृहीतस्य यशस्विना । अमुना सारभूतस्य वर्तते दिनसप्तकम् ॥ ११० ॥
विद्यते यदि ते वाञ्छा तद्धर्मप्रविनाशने । गमागमस्तत्समीपं च कौतुकव्याप्तमानसौ[8] ॥ १११ ॥
वचनादच्युतेन्द्रस्य सोपरोधसमन्वितः । पुरंदरसमः सोऽपि मिथिलां नगरीं ययौ ॥ ११२ ॥
धर्मं श्रुत्वा सुधर्मान्ते दिनैः सप्तभिरर्जितम् । उद्याने तिष्ठति प्रीत्या धीरः पद्मरथो नृपः ॥ ११३ ॥
चम्पापुरवरोद्याने वासुपूज्यजिनेश्वरम् । नन्तुं पद्मरथो राजा सोपवासः समागतः ॥ ११४ ॥
अच्युतेन्द्रः समालोक्य भूपतिं वनमागतम् । विश्वानलसुरं प्राह कौतुकव्याप्तमानसः ॥ ११५ ॥

---

1 फ ददामीदमहं 2 पज्ञ वृद्धिमपि 3 [शुक्रदानं]. 4 [परिणीतो]. 5 पज्ञ तथा हि यतः. 6 फ वचोभिरवमानय 7 फ omits verses Nos. 106-125 i.e., up to the close of this chapter 8 पज्ञ विस्मयमित्यम्. 9 ज ॰व्याप्तचेतसौ.

एष पद्मरथो राजा जैनधर्मा समागतः । धर्मे विध्वंसनं चास्य कुरु त्वं यदि शक्तिमान् ॥ ११६ ॥
दृष्ट्वा नरेश्वरं तत्र कोपाध्मातनिरीक्षणः । उपसर्गं चकारेम गजानीकः सुरो रुषा ॥ ११७ ॥
पुरदाहं पुरस्तस्य चक्षुर्दं महारवम् । उपसर्गं पिशाचादि चकार स सुरस्तदा ॥ ११८ ॥
विधानत्वेपसर्गं तं न विवेद मनागपि । ध्यानाचलं समारूढो न हि ध्यानाच्चचाल सः ॥ ११९ ॥
दृष्ट्वाऽस्य धीरतां देवो मोचनध्वनिनाशिनीम् । ददौ भेरीं कलध्वानां तोषपूरितमानसः ॥ १२० ॥
तथा पद्मरथायाशु धर्मवात्सल्यकारणात् । अच्युतेन्द्रो ददौ हारं सर्वव्याधिहरं मुदा ॥ १२१ ॥
वासुपूज्यं जिनं नत्वा पूजयित्वा नृपं सुरः । भक्त्या पद्मरथो नौति वासुपूज्य जिनं सदा ॥ १२२ ॥
कण्ठे हारं विधायायं भेरीमवाद्य सुस्वरम् । भक्त्या पद्मरथो नौति वासुपूज्यं जिनं तराम् ॥ १२३ ॥
स्थापयित्वा निजं पुत्रं राज्ये पद्मरथो नृपः । वासुपूज्यजिनस्यान्ते प्रवव्राज विशुद्धधीः ॥ १२४ ॥
यमेन्द्रत्वं परिप्राप्य जिनभक्तिपरायणः । क्षीण पद्मरथो योगी निर्वाणमगमत्सुधीः ॥ १२५ ॥

॥ इति श्रीजिनभक्तिपरायणपद्मरथनृपगणधरत्वप्राप्तिनिर्वाण-
गमनकथानकमिदं संपूर्णम् ॥ ५९ ॥

६० सुभगगोपालकथानकम् ।

ततोऽङ्गाख्यमहादेशे वरा चम्पापुरी प्रभुः । भर्ता बभूव नीतिज्ञो दन्तिवाहननामकः ॥ १ ॥
अभयाऽस्य महादेवी भद्रयोऽभवरिद्धधी । अस्या धात्री गुणाधारा पण्डिता नाम विश्रुता ॥ २ ॥
तस्मिन्नेव पुरे श्रेष्ठी बभूव स महाधनी । वृषभोपपदो दासो जिनदासी प्रियाऽस्य सा ॥ ३ ॥
श्रेष्ठिनोऽस्य स्थितो भक्तो महिषीपरिपालकः । नामतः सुभगः ख्यातः सुभगोऽखिलदेहिनाम् ॥ ४ ॥
अन्यदा ताः पुरस्कृत्य महिषीः सुभगो वनम् । ययौ मुदितचेतस्कः शष्पनीरसमन्वितम् ॥ ५ ॥
ततो निवर्तमानः सन् पुरमार्गे दवीयसि । दृष्ट्वा चारणमेकं हि दध्याविति समिस्थितः ॥ ६ ॥
शीतकाले महाशीते मुनिरेष बहिःस्थितः । अप्रावरणो दीर्घां कथं नेष्यति शर्वरीम् ॥ ७ ॥
सुभगः स्वगृहं प्राप्य सुप्तो निशि कुटीरके । मुनिं ध्यायंस्तमेवासौ तद्गुणाकृष्टमानसः ॥ ८ ॥
ततः प्रभातकाले च महिषीः प्राप्य तां दिशम् । दृष्ट्वा तं चारणं तत्र स्तोकव्यारं स तस्थिवान् ॥ ९ ॥
प्राभातिकीं क्रियां कृत्वा रवावभ्युदिते मुनिः । नमोऽर्हते समुच्चार्य वचनं स समुद्ययौ ॥ १० ॥
दृष्ट्वा गोपालकः साधुं व्रजन्तं तं विहायसा । सुभगस्तद्ध्वनिं भक्त्या सनीरजलदोपमाम् ॥ ११ ॥
ज्ञात्वा विद्यामिमां सोऽयं नभस्तलविसर्पिणीम् । नमोऽर्हन्नमस्कारं संसारोदधिशोषकम् ॥ १२ ॥
आकाशगामिनी विद्या मम सिद्धिं प्रयास्यति । अस्या बलेन सततं विचरिष्याम्यगादिषु ॥ १३ ॥
सुभगश्चिन्तयित्वेत्थमुत्तिष्ठन्प्रस्वपन्नपि । नमोऽर्हद्भ्यो वचो भक्त्या न मुञ्चति कदाचन ॥ १४ ॥
अथापि श्रेष्ठिना गोपो ज्ञपितो भार्यकैरपि । महीशे पुत्र नो युक्तं जिननाम यथाशनम् ॥ १५ ॥
श्रेष्ठिवाक्यं समाकर्ण्य गोपको वक्ति तं पुनः । तात मोक्तुं न शक्नोमि जिनगोत्रमिदं क्वचित् ॥ १६ ॥
गोपवाक्यमिदं श्रुत्वा भूयः श्रेष्ठी जगाद तम् । पुनर्मा मोचनं जातु जिननाम्नः करिष्यसि ॥ १७ ॥
इमं जैनेश्वरं नाम पवित्रं [illegible] तव । भविष्यति निगद्यासौ मौनमादाय तस्थिवान् ॥ १८ ॥

अन्यदा महिषीसंघो गङ्गामुत्तीर्य वेगतः । क्षेत्रमध्यं विवेशायं गन्धशालिसमन्वितम् ॥ १९ ॥
मन्दाकिनीसमुत्तीर्णं विलोक्य महिषीगणम् । गोपालकः प्रधाव्याशु तस्थौ सुरसरित्तटे ॥ २० ॥
कृत्वा जिननमस्कारं स्वस्तिकस्थिरमानसः । गङ्गाह्रदे सुभोपाय गोपः स्म झम्पमर्पितः ॥ २१ ॥
वप्रतलगतशूलेन विद्धस्तुन्दे मृतिं गतः । पूर्वोक्तश्रेष्ठिभार्यायास्तत्राऽसौ गर्भमाश्रितः ॥ २२ ॥
तद्गर्भे सुस्थिते तस्मिन् नीतोऽन्यो मासपञ्चके । बभूव दोहलस्तस्याः श्रेष्ठिन्या जिनपूजने ॥ २३ ॥
विलोक्य श्रेष्ठिनी श्रेष्ठी जगादेवं पुरःस्थिताम् । त्वं कृशाऽसि कथं कान्ते ब्रूहि कारणमिदं मम ॥२४॥
श्रेष्ठिवाक्यमुपश्रुत्य श्रेष्ठिनी निजगादमुम् । जिनपूजाविधौ नाथ मदिच्छा वर्ततेऽधुना ॥ २५ ॥
तदाकर्ण्य पुनः श्रेष्ठी जिनानां जितजन्मनाम् । महामहं चकाराशु तूर्यमङ्गलनिःस्वनैः[1] ॥ २६ ॥
ततो नवसु मासेषु व्यतीतेषु प्रमोदकम् । पूर्वाशेव रविं तत्र श्रेष्ठिनी सुषुवे सुतम् ॥ २७ ॥
निजदेहप्रभाभारभासिताशेषपुष्करः । पूर्णिमाचन्द्रवत्कान्ति कुर्वन् बन्धुमुदं शिशुः ॥ २८ ॥
ततो जिनमहं कृत्वा नीत्वाऽमुं जिनमन्दिरम् । ददौ सुदर्शनं नाम मुनिरस्मै शुभावहम् ॥ २९ ॥
क्रमेण वृद्धिमासाद्य कलाः सर्वाः सुशिक्षिताः । सुदर्शनकुमारेण सुकुमारेण वेगतः ॥ ३० ॥
चतुःषष्टिरपि स्पष्टं विज्ञानानि विवेद सः । यौवनं च परिप्राप[2] कन्दर्पसमविभ्रमम् ॥ ३१ ॥
सागरोपपदो दत्तः श्रेष्ठी तन्नगरेऽभवत् । भार्या सागरसेनाऽस्य तत्सुता च मनोरमा ॥ ३२ ॥
सुदर्शनेन सा लब्धा[3] परिणीता विधानतः । सुतोऽनयोः समुत्पन्नः सुकान्तः कान्तदर्शनः ॥३३॥
चलानित्यमिदं '[4]ज्ञात्वा सर्वं सांसारिकं सुखम् । सुदर्शनसुतायाऽसौ श्रेष्ठिपट्टं बबन्ध सः ॥ ३४ ॥
दन्तिवाहनभूपस्य समर्प्य तनयं पुनः । समाधिगुप्तसामीप्ये श्रेष्ठी दीक्षामशिश्रियत् ॥ ३५ ॥
ततः सुदर्शनः श्रेष्ठी भूपतेरभवन्महान् । कलाविज्ञानसंपन्नः समस्तजनपूजितः ॥ ३६ ॥
सखा सुदर्शनस्यैव कपिलो नाम ब्राह्मणः । दन्तिवाहनभूपस्य स बभूव पुरोहितः ॥ ३७ ॥
ब्राह्मणी कपिला चास्य रूपयौवनगर्विता । सुदर्शनगुणान् श्रुत्वा तत्सक्ता मनसाऽभवत् ॥ ३८ ॥
अन्यदा संफली[6] दक्षा मदनोन्मत्तया तया । गूढं किमपि संदिश्य प्रेषिता श्रेष्ठिनो गृहम् ॥३९॥
अविलम्बं जगामैषा व्याकुलितमानसा । सुदर्शनं परिप्राप्य जगादेवं विचक्षणा ॥ ४० ॥
कपिलो वक्ति नाथ त्वां शरीरेणापटुस्तराम् । आगन्तव्यं त्वयाऽवश्यं स्नेहेनाशु मदन्तिकम् ॥४१॥[7]
दूतीवचनमाकर्ण्य स्नेहनिर्भरमानसः । सुदर्शनो गृहं तस्य मित्रस्य सहसाऽगमत् ॥ ४२ ॥
दृष्ट्वा तां ब्राह्मणी प्राह तदानीं स सुदर्शनः । क्व गतः कपिलो भद्रे सा पुनस्तं जगाविति ॥ ४३ ॥
सुखस्थितोऽस्ति ते मित्रं गृहान्ते व्रज त्वं लघु । प्रविष्टोऽपि च तन्मध्ये पश्यतीमं न तत्र सः ॥४४॥
क्व मित्रं वदत क्षिप्रं वक्ति सा पुनरप्यमुम् । न भद्रोऽस्त्यत्र किं चान्यन्मदीयं वचनं शृणु ॥४५॥
इच्छ त्वं भद्र मां शीघ्रं मदनज्वलितां[8] वराम् । त्वत्परोक्षानुरागेण रक्षां विद्धि सुदर्शन ॥४६॥
यदि नेच्छसि मां भूयो मथितोऽपि ततो ध्रुवम् । कारापयामि ते शीघ्रं मारणं निर्दयं नरैः[10] ॥४७॥[11]
निशम्य तद्वचः श्रेष्ठी तामुवाच विचक्षणः । आलिङ्गनादिकं मूढे कुर्वन्तीं निन्दितं शुभे ॥४८॥
शृणु मद्वचनं मुग्धे सत्यभूतं वदामि ते । किं त्वया न परिज्ञातः पौरुषो न भवाम्यहम् ॥ ४९ ॥[12]
आकर्ण्य तद्वचस्तं च विरक्ता कपिला जगौ । यदि त्वं पुरुषो नासि ततो व्रज निजं गृहम् ॥५०॥
मन्यमानः प्रमुक्तं स्म महाव्याघ्रीमुखादरम् । यथोदितो ययौ शीघ्रं स्वकीयभवनं सकः ॥ ५१ ॥

---

1 पज्ञ तूर्येन्ऽहरे. 2 प चलाम. 3 फ लब्धा. 4 फ omits ज्ञात्वा 5 प मदन्म. 6 फ संफली [सम्फली]. 7 प सुम्मम्, फज्ञ सुगमिरम्. 8 पज्ञ मथिपुर्वा. 9 [सुरम्भ]. 10 फ बेध. 11 प सुम्मम्, फज्ञ सुम्मकमिरम्. 12 ज्ञ सुम्मम्, फज्ञ सुम्मकमिरम्.

अन्यदा कपिलेनामा[1] सुदर्शनसमं तथा । महोद्यानवनं रन्तुं प्रययौ दन्तिवाहनः ॥ ५२ ॥
ततोऽभयमहादेवी कपिलाऽपि मनोरमा । एतास्तिस्रोऽपि निर्जग्मुः शिबिकास्था वनं प्रति ॥५३॥
अथाभयमहादेवी पप्रच्छ कपिलां तदा । कस्यैषा वनिता याति पुत्रादिपरिवारिता ॥ ५४ ॥
स्वदेहदीप्तिसंतानैरुद्योतितनभस्तलैः । आकाशे चन्द्रलेखेव द्योतयन्ती दिशां मुखम् ॥ ५५ ॥[2]
कपिला वचः श्रुत्वा वदति स्म हि तां स्फुटम् । सुदर्शनस्य भार्येयं नाम्नाऽपीति[3] मनोरमा ॥५६॥
कपिलाया वचः श्रुत्वा महादेवी जगाविमाम् । सुदर्शनस्य सद्भार्या प्राणानामपि वल्लभा ॥ ५७ ॥
धन्येयं सुन्दरी पाठा पाठपुत्रसमन्विता । विना पुत्रेण किं जीवं वन्ध्यावल्लीव निष्फलम् ॥५८॥
असामि सह सखीभ्या रूपराजितविग्रहा । महोद्यानवनं रन्तुं गच्छतीव कलस्वना ॥ ५९ ॥[4]
ततोऽभयमहादेवी वाक्यमाकर्ण्य मन्थरम् । जगाद कपिला राज्ञी हसित्वा हसनास्मिकाम् ॥६०॥
सुदर्शनप्रिया भद्रे जायन्ते किं पुनः शृणु । जनयन्ति सुताः पुत्रान् कुशलत्वेन योषितः ॥६१॥[5]
कपिलावाक्यमाकर्ण्य हसित्वाऽसौ[6] जगाद ताम् । किं कारणमिदं भूपे कपिले क्रूरमानसे ॥६२॥
एषा पतिव्रता[7] नारी रूपशीलविभूषिता । सुदर्शनपतिं हित्वा नान्यमिच्छति चेतसा ॥ ६३ ॥
जिनशासनसंसक्ता सम्यक्त्वाणुव्रतान्विता । गुणशिक्षाव्रतैर्युक्ता पञ्चुम्बरपरिच्युता ॥ ६४ ॥
निजकान्तं विहायैषा न चान्यं नरमिच्छति । जिनं मुनिगणं हित्वा न चान्यं स्तौति भक्तितः[8] ॥६५॥
निशम्य भारतीमस्याः[9] कपिला[10] तां जगौ पुनः । येनेदं मत्पुरः प्रोक्तं पुरुषो नास्त्ययं स्फुटम् ॥६६॥
तेनाहं वेद्मि तं षण्ढं पुरुषं हि सुदर्शनम् । कुशलत्वेन सम्भवमेतया नन्दनादिकम् ॥ ६७ ॥[11]
अभयादिमहादेवी सहास्येन जगाद ताम् । त्वं वञ्चिताऽसि धूर्तेन कामशास्त्रपराङ्मुखी ॥ ६८ ॥
सुदर्शनो हठे नूनं षण्ढो यः परयोषिताम् । पुरुषोऽयं स्वनारीणां कन्दर्पसमविभ्रमः ॥ ६९ ॥
तद्विदं वारिधिगम्भीरं क्षोभेन परिवर्जितम् । कथं त्वं वेत्सि पुरुषत्वायोषितोऽकुशला हि वै ॥७०॥[12]
ततः प्रोवाच तां देवीं कपिला कथिताऽमुना । ईर्ष्यावशपरिष्वक्ता म्लानवक्त्रसरोरुहा ॥ ७१ ॥
यदि मे स वशीकर्तुं भाषस्या कामचापया । न शक्योऽकुशलत्वेन मन्दराद्रिस्थिरमानसः ॥ ७२ ॥
ततस्त्वं कामशास्त्रज्ञा महादेवीपदाश्रिता । रूपयौवनयुक्ताऽसि वशीकुरु ततो लघु ॥ ७३ ॥[13]
श्रुत्वाऽभयमहादेवी तद्वचस्तामुवाच सा । शृणु त्वं स्ववशीकर्तुं समर्थाऽस्मि सुदर्शनम् ॥ ७४ ॥
एवमुक्त्वा तदा देवी विलक्षीभूतमानसाम्[14] । तत्पुरः सा चकारेमां प्रतिज्ञां रूपगर्विता ॥ ७५ ॥
यदि तद्विषसंयोगं न करोमि नितम्बिनि । तदा पुरुषभोगस्य[15] निवृत्तिं[16] विदधाम्यहम् ॥७६॥
महादेवी विधायेमां प्रतिज्ञां कपिलापुरः । प्रविश्य नगरं शीघ्रं विवेश निजमन्दिरम् ॥ ७७ ॥[17]
अथाहूय महादेवी स्वान्ते पण्डितधात्रिकाम् । सर्वां विदाय हृद्गम्या यथावेति पुरःस्थिताम् ॥७८॥
सुदर्शनमिमं साध्वि मदन्तं शीघ्रमानय[18] । येनामुना समं भोगान् प्रभाव्य निजदीप्त्या ॥ ७९ ॥
यदि त्वमग्रिमं नो यदनं मानयसि द्रुतम् । ततोऽहं निश्चितं भद्रे करिष्ये प्राणमोचनम् ॥ ८० ॥[19]
श्रुत्वा तद्वचनं धात्री जगाद तां कलस्वना । अशोभनमिदं कार्यं त्वयाऽत्र परिचिन्तितम् ॥८१॥

---

1 पञ्च धीरेषु सम 2 प सर्वे 3 प सुमनम् पञ्च सुगन्धितरम्. 4 प मत्ता मोहि॰ 5 पञ्च हुतरं. 6 प सुमनम् अ सुमनम्. 7 प. omits No. 60 8 प सुमनम् प सुगन्धितम् अ सुम॰ 9 प सर्दिच 10 प वीरसे. 11 प बलिने 12 प सुमनम् अ सुमनम् प सुगन्धितम्. 13 प. सूर्य ... 14 प विलम्ब्य पञ्च विलम्बितम्. 15 प विलम्ब्य, पञ्च विलम्बितम्. 16 प ... 17 प करोमि न निम्बिनि 18 प ... 19 प निर्णी 20 पञ्च विलम्ब्य प विलम्बितम्. 21 पञ्च विलम्ब्य प विलम्बितम्.

योऽणुव्रतादिसंयुक्तः सम्यग्दर्शनभावितः । पुण्यपापविचारज्ञो हिताहितविवेकधीः ॥ ८२ ॥
सागरो योऽतिगम्भीरो मेरुर्वा कम्पवर्जितः । क्षमेव क्षान्तिसंपन्नो नभो वाऽमलविग्रहः ॥ ८३ ॥
परदाराकथां लोकैः क्रियमाणामपि स्फुटम् । कर्णाभ्यां नेच्छति श्रोतुं मनोवाक्कायकर्मभिः ॥८४॥
काममोगांस्त्वया सार्धं गुणी भुङ्क्ते विशुद्धधीः[1] । कथ[2]मानीयते सोऽत्र मया तन्वि त्वदन्तिकम् ॥८५॥[3]
धात्रीवचनमाकर्ण्य महादेवी जगावमूम् । कपिलया पुरः प्रोक्ता प्रतिज्ञेयं महासखि ॥ ८६ ॥
यदि नालिङ्ग्यते सोऽयं रम्यते वा मयाऽलि न । ततोऽहं पञ्चतावार्धिं यास्यामि नियतं ध्रुवम् ॥८७॥
ततो धात्री जगादैतां विज्ञातपरमार्थिका । उपायो विद्यते ऽत्रार्ये तदागमनकारणे ॥ ८८ ॥
नक्तं प्रतिमया सोऽयं पर्वणि स्थिरमानसः । तिष्ठत्यानीयते तस्मादुपायो नापरः परम् ॥ ८९ ॥
ततोऽभयमहादेवी धात्रिकां तां जगौ पुनः । यत्ते प्रयोजनं चित्ते स्थितं तत्कोऽपि[4] सुन्दरि ॥९०॥
ततः कौलालमासाद्य भवनं धात्रिका तदा । [5]तत्करात् कारयामास सप्त मृत्पुस्तनरम् ॥ ९१ ॥
वस्त्रेणाच्छादितं कृत्वा समादाय कृतो नरम् । धात्री प्रवृत्ते गन्तुं तदानीं प्रतिपद्दिने ॥ ९२ ॥
महादेवीगृहद्वारं यावत्प्रविशति धात्रिका । प्रथमद्वारपालेन तावद्दृष्टा प्रभाषिता ॥ ९३ ॥
वस्त्राच्छादितमादाय किमिदं विशसि ध्रुवम् । असम्य कोपमायाति भूपतिर्वद मेऽधुना ॥ ९४ ॥
दौवारिकवचः श्रुत्वा धात्रिकाऽमुं जगौ पुनः । यन्मह्यं रोचते किंचिद्गृहीत्वा यामि किं तव ॥९५॥
उत्तरीयं ततस्तस्या द्वारपालेन कोपतः । आकृष्टं तत्करात् तेन तदानीं निजपाणिना ॥ ९६ ॥
गृहीतमात्रया वेगात्स्वविक्रमक्रियावता । मुक्त्वा[10] तया पुनर्भूमौ गता सा शतखण्डताम् ॥ ९७ ॥
द्वारपालोऽनयाऽवाचि कोपकम्पितगात्रया । न शोभनमिदं कार्यं त्वयाऽत्र विहितं सुत[11] ॥९८॥
उपोषिता महादेवी पुस्तव्रतमादरात् । सुवरं पूजयित्वेमं मोक्ष्यं किल करिष्यति ॥ ९९ ॥
आनीतोऽयं मया तेन त्वदर्थं मृत्तिकानरः । सांप्रतं चूर्णितः सोऽपि भवता मन्दबुद्धिना ॥१००॥
मृत्स्नामयो नरोऽद्यैव लभ्यते नेदृशः क्वचित् । वीक्षमाणा च मां देवी तिष्ठति तदुपोषिता ॥१०१॥
कथयित्वा नरेन्द्रस्य वार्तामेतां तव ध्रुवम् । शिरसः कर्तनं ते ऽद्य कारयिष्यामि निश्चितम् ॥१०२॥[12]
धात्रिकावाक्यमाकर्ण्य भयवेपितविग्रहः । दौवारिको जगादैतां त्रपादन्यस्तमस्तकः ॥ १०३ ॥
अम्बिके जननीतुल्ये किंवदन्तीमिमां विभो । कथयिष्यसि मा मुग्धे पादयोः पतितोऽस्मि ते ॥१०४॥
मा त्वां मृत्स्नानरे भद्रे यदि सत्यनरं पुनः । गृहीत्वा यासि देव्यन्त[13] न किंचिद्विवदाम्यहम् ॥१०५॥[14]
द्वारपालवचः श्रुत्वा धात्रिका निजगादमुम् । एवमस्त्विति संतुष्टा दीर्घायुस्त्वं चिरं भव ॥१०६॥
एवमुक्त्वा तकं क्षिप्रं वपित्वाखिलविग्रहम् । जगाम धात्रिका गेहं सोपकण्ठक्रियाश्रिता ॥ १०७ ॥
अन्येद्युर्विधिनाऽनेन सप्तद्वारप्रतिष्ठितान् । द्वारपालान् वशे धात्री चकार विधिकोविदा ॥ १०८ ॥
अथाष्टमीदिने जाते सर्वारम्भपरिच्युतम् । सोपवासं श्मशानस्थं नक्तं प्रतिमया स्थितम् ॥ १०९ ॥
सुदर्शनं समादाय [15]ध्यानारूढं च धात्रिका । अभयादिमहादेवीसमीपं त्वरितं ययौ ॥ ११० ॥[16]
कायोत्सर्गस्थितं नक्तं तदानीं तं सुदर्शनम् । देव्यै समर्पयामास धात्रिका प्रीतमानसा[17] ॥ १११ ॥
कायोत्सर्गस्थितस्यास्य गाढालिङ्गनकादिकम् । कामग्रहगृहीतात्मा महादेवी करोत्यलम् ॥ ११२ ॥
उपसर्गो ममैषो यदि क्षेमेण यास्यति । ततो भविष्यति क्षिप्रं पाणिपात्रेण पारणम् ॥ ११३ ॥

---

1 क शुद्धविग्रहधी. 2 क न कथं आनीयते. 3 पञ्ज चतुष्कम्, ज चतुष्कमिदम्. 4 क मयाप्सितम्. 5 प युग्मम् क युग्ममिदम् ज युग्मम्. 6 प युग्मम् क युग्ममिदम् ज युग्मम्. 7 क तदोर. 8 क सत्यकमारयामास. 9 क omits No. 93 10 [मुक्त्वा]. 11 क सुत. 12 पञ्ज चतुष्कम् क चतुष्कमिदम्. 13 पञ्ज देव्यन्ते. 14 पञ्ज त्रिकम्, क त्रिकमिदम्. 15 क ध्यानस्थं. 16 प युग्मम्, ज युग्मम् क युग्ममिदम्. 17 क प्रीतिमानसा.

सुदर्शनो विधायेमां प्रतिज्ञां मेरुनिश्चलः । श्मशाने निश्चलस्तस्थौ ध्यानेन[1] चिन्तयन् जिनम् ॥११४॥
अभयादिमहादेव्या देवीरूपसमानया । क्षोभं तथाऽपि नो नीतस्तदा श्रेष्ठी सुदर्शनः ॥ ११५ ॥
पातयित्वा नखैरेषा स्वशरीरं निरन्तरम् । विकीर्य केशभारं च कामाकुलितमानसा ॥ ११६ ॥
मुक्त्वाऽहं[2] श्रेष्ठिना नूनमनिच्छन्ती हठादरम् । आमन्त्र्य जनानां तूर्णं महारावं चकार सा ॥११७॥
महादेवीवचः[3] श्रुत्वा राजा रुष्टो जगौ जनान् । एतस्य मस्तकच्छेदं कुरुध्वाशु श्मशानके ॥११८॥
नीता पितृवनं स ते [4]स्तेनान्तकमुपहताः । पुष्पमाला बभूवैषा खड्गयष्टिर्गलेऽस्य सा ॥ ११९ ॥
दृष्ट्वा विस्मयमीयुर्यं नमस्कृत्य सुरासुराः । अहो सौदर्शनं शीलं साधुवादान् प्रचक्रिरे ॥ १२० ॥
एवं निगद्य ते देवा नानावर्णैः समुज्ज्वलैः । पुष्पैः सुगन्धिभिः पूजां चक्रुरस्य प्रमोदिनः ॥ १२१ ॥
प्रातिहार्यं विलोक्यास्य दन्तिवाहनभूपतिः । नानाजनसमूहेन समं प्राप तदन्तिकम् ॥ १२२ ॥
प्रदक्षिणं विधायास्य क्षमयं च मुहुर्मुहुः । सपर्यां कनकैः कर्पूरागरुभिर्महीपतिः ॥ १२३ ॥
अर्धराज्यं गृहाण त्वं मदीयं हि सुदर्शन । भुञ्जानो विपुलान् भोगान् पुरे तिष्ठ यथेप्सया ॥१२४॥
दन्तिवाहनभूपस्य निशम्य वचनं तदा । सुदर्शनो जगादेदं नानाजनसमन्वितम् ॥ १२५ ॥
न ते राज्येन मे कार्यं भोगेनापि नरेश्वर । भोगो राज्यं महादुःखं संसारपरिवर्धनम् ॥ १२६ ॥
मानिनां हतदर्पाणां परान्नमेव किं सुखम् । जीवितं मानहेतुः स्यान्माने नष्टे सुखं च न ॥१२७॥

तथा चोक्तम्—

मानिनो हतदर्पस्य भोगोऽपि न सुखायते ।
जीवितं मानमूलं हि माने म्लाने कुतः सुखम् ॥ १२८ ॥

उपसर्गो हि राजेन्द्र त्वयाऽयं न कृतो मम । कर्मभिः प्राक्तनैरेव विहितोऽशुभकारणैः ॥ १२९ ॥[7]
सुदर्शनो वदत्येवं यावत् सह नरेशिना । तावत् सूरिः समायातो नाम्ना विमलवाहनः ॥ १३० ॥
हित्वा परिग्रहं सर्वं कृत्वा नृपक्षमापणम् । सुदर्शनो जगामाशु समीपं योगिनोऽस्य सः ॥१३१॥
त्रिःपरीत्य यमीशानं वन्दित्वा च पुनः पुनः । सुदर्शनो जगादेमं[8] दीक्षां संसारभीरुकः ॥ १३२ ॥
निशम्य तद्वचः कान्तं ज्ञात्वा निश्चयमीप्सितम् । ददौ दैगम्बरीं दीक्षां तस्मै विमलवाहनः ॥१३३॥
ततोऽभयमहादेवी प्रातिहार्यं सुरेरिता । पूजनं दीक्षणं चास्य विदित्वा जनवाक्यतः ॥ १३४ ॥
भयभीतिसमुत्पन्ना [10]कृत्वोद्बन्धनमात्मनः । मृत्वैवं पाटलीपुत्रे बभूव व्यन्तरी पुनः ॥ १३५ ॥[11]
तदा पण्डितधात्री च नरेन्द्रभयविह्वला । चम्पापुरवराल्लीनं ययौ पाटलिपुत्रकम् ॥ १३६ ॥
समस्तजनविज्ञानां च समस्तपुरयोषिताम् । आत्मदेशपरित्यागं सुदर्शनकथां तथा ॥ १३७ ॥
आत्मनिन्दनसंसक्तं कथयन्ती दिने दिने । गणिका देवदत्ताख्या तद्गृहे साऽवतिष्ठते[12] ॥१३८॥[13]
सोऽन्योऽपि विजितस्वान्तस्त्यक्तार्तोद्विग्नचेतनः । सुदर्शनमुनिं द्रष्टुमिच्छन् ह्युद्यतोऽवतिष्ठते ॥ १३९ ॥
अन्यदा विहरन् सोऽपि सुदर्शनमुनीश्वरः । आजगाम सुधीरात्मा पुरं पाटलिपुत्रकम् ॥ १४० ॥
बहूपवासशोषाङ्गमस्थिचर्मावशेषकम् । भ्रमन्तं राजमार्गेण चर्यार्थं हि सुदर्शनम् ॥ १४१ ॥
दृष्ट्वा पण्डितधात्रीमं देवदत्तां जगाद सा । यमिमं पश्यसि नाथ तं साधुं पश्य सुन्दरि ॥ १४२ ॥
[14]धात्रीवाक्यमाकर्ण्य देवदत्ता जगाविमाम् । न चाभयमहादेवी कुशला कामकोविदा ॥१४३॥
कामशास्त्रविनिर्माणा मन्मानसहारिका । पश्य पश्य मुनेरस्य चित्तक्षोभं करोम्यहम् ॥ १४४ ॥

---

1 क ध्यानैः. 2 प मुक्त्वाहं 3 प मुक्तम्, ज मुक्तम् क मुक्तमिदम्, 4 प स्तेन इत्यु 5 क भोग्यै. 6 प मुक्तम्, ज मुक्तमिदम्, क जमुक्तमिदम्, 7 क adds No 130 once more after No. 131. 8 क जगादेमां 9 ['भीरुक']. 10 प कृत्वोद्बन्धनं क कृत्वोद्बन्धं पज (व्यन्तरि). 11 प मुक्तम्, ज मुक्तम्, क मुक्तमिदम् 12 कज च तिष्ठते. 13 प मुक्तम् ज मुक्तम् क मुक्तमिदम्. 14 क धात्री

इत्युक्त्वा तत्क्षणं शीघ्रं देवदत्ता सचेटिकाम् । प्रविधाय मुनेरन्तं[1] प्राप्येमं वदति स्म सा ॥१४५॥
मद्गृहे भोजनं साधो कुर्वन्तु त्वं यतीश्वर । तद्यान्यतः पुनर्योगी देवदत्तागृहं ययौ ॥ १४६ ॥
कपाटद्वितयं[3] दत्त्वा गृहे तिष्ठस्य योगिनः । देवदत्तोपसर्गं च चकार दिवसत्रयम् ॥ १४७ ॥
तदा काष्ठमयः किं वा लेपकर्ममयोऽपि वा । सुदर्शनो मुनिस्तस्थौ सुसमाहितमानसः ॥ १४८ ॥
तदानीं देवदत्ताया हावभावविलासतः । विभ्रमेण न तस्यासीच्चित्तक्षोभो[5] मनागपि ॥ १४९ ॥
मेरुस्थिरं मुनिं ज्ञात्वा गम्भीरं गुणसागरम् । देवदत्ता भयग्रस्ता निनिन्द स्वदुरीहितम् ॥१५०॥
देवदत्ता मुनिं नीत्वा श्मशानं रजनीमुखे । आजगाम निजं गेहं प्रम्लानमुखपङ्कजा ॥ १५१ ॥
ततः सुदर्शनो योगी श्मशाने दरवासिनि । सर्वाहारं परित्यज्य तस्थौ प्रतिमया निशि ॥ १५२ ॥
तत्राभयमहादेवी व्यन्तरी तं सुदर्शनम् । परिज्ञायोपसर्गं सा चकार दिनसप्तकम् ॥ १५३ ॥
ततः सप्तदिनान्ते च सुदर्शनमहामुनेः । घातिक्षयात् समुत्पन्नं केवलं सर्वभासनम् ॥ १५४ ॥
एवं सति समुत्पन्ने तीर्थेशस्य जिनेशिनः । यथाऽष्टौ प्रातिहार्याणि चतुस्त्रिंशदुमास्तथा ॥ १५५ ॥
सर्वमस्यैव तत्कर्म्यं केवलमल्योगिनः । सुदर्शनमुनीन्द्रस्य सुरासुरनतस्य च ॥ १५६ ॥
छत्रत्रयं समुत्तुङ्गं प्राकारो हरिविष्टरम् । गुणकेवलिनो नास्ति सर्वं समवादिकम् ॥ १५७ ॥
छत्रमेकं मणिस्तम्भमयं भद्रपीठं मनोहरम् । गुणकेवलिनो नूनं रूपमेतत् प्रजायते ॥ १५८ ॥
द्वादशापि गणा ज्ञेया सन्ति सामान्यगोचराः । गुणकेवलिनः सर्वे यथासम्भवतो भवेत् ॥१५९॥
केवले सति संजाते लोकालोकप्रकाशने । सुदर्शनमुनेर्भूतं देवागमनमुत्तमम्[7] ॥ १६० ॥
अत्रान्तरे महाभक्तिर्देवदत्ता सधात्रिका । व्यन्तरी पौरलोकोऽपि ययौ केवलिनोऽन्तिके ॥ १६१ ॥
अथ देवादिलोकानां शिवानां च यथाऽऽसनम् । धर्मं जगाद योगीन्द्रः केवलज्ञानलोचनः ॥१६२॥
धर्मेण रूपसंपत्तिर्धर्मेण कुलसंभवः । धर्मेण धनसंपत्तिर्धर्मेण विमलं यशः ॥ १६३ ॥
चिन्तामणिसमो धर्मो धर्मः कल्पद्रुमोपमः । धर्मः समस्तजन्तूनां वशीकरणमुत्तमम् ॥ १६४ ॥
मनुष्यत्वं परिप्राप्य धर्मं ना न करोति यः । स[8] निधिं वीक्ष्य संजातो लोचनाभ्यां विवर्जितः ॥१६५॥
पापेन नरके[9] जन्म तथा तिर्यग्गतावपि । जायते देहिनां नित्यं भ्रमतां सततं भवे ॥ १६६ ॥
दानेन भोगसंपत्तिस्तपसा स्वर्गसंभवः । ज्ञानेन च भवेन्मोक्षः सर्वकर्मक्षयात्मकः ॥ १६७ ॥
श्रुत्वा केवलिनो वाक्यं व्यन्तरी पूर्ववर्णिता । गणिका देवदत्ता च तथा पण्डितधात्रिका ॥१६८॥
एवमादिजना ह्यत्र धर्मश्रवणकारणात् । जगृहुः श्रावकं धर्मं सम्यक्त्वं च सुभक्तितः ॥ १६९ ॥
केचित् संसारतस्त्रस्ता हित्वा सर्वं परिग्रहम् । स्वपुत्रेभ्यः श्रियं दत्त्वा व्रतं दैगम्बरं दधुः ॥१७०॥
विहृत्य[10] केवलज्ञानविहारेण सुदर्शनः । निहत्याशेषकर्माणि निर्वाणमगमन्मुनिः ॥ १७१ ॥
सुदर्शनमुनीन्द्रेण सुभगत्वं भवान्तरे । लब्धं जिननमस्कारफलेन परमं पदम् ॥ १७२ ॥

तथा चोक्तम्—

सापेनापि[11] नमस्कारं यः करोति जिनेश्वरे[12] ।
स निस्तरति संसारं किं पुनः परमार्थतः ॥ १७३ ॥

॥ इति[13] श्रीजिननमस्कारसमन्वितसुभगगोपालकथानकमिदम्[14] ॥५०॥

*

1 क मनेरन्तं. 2 पक्ष चिक्कणम्, क चिक्कणमिदम्. 3 पक्ष द्वितीयं. 4 क सुदर्शनमुनि॰ 5 पक्ष क्षोभं. 6 पक्ष धर्मं 7 क सुखदम्. 8 क संनिधि. 9 प नरके 10 पक्ष विहृत्य—विहारकर्म कृत्वा. 11 क सर्प्येणापि ख सापेनापि पक्ष ([illegible]) [सर्पेणापि]. 12 प जिनेश्वरम्. 13 पक्ष omit इति. 14 प adds समाप्तम्.

८

६१ यमसुनिकथानकम् ।

यशोध्रविषये[1] चापि पुरं धर्मपुरं नृप । यमस्तत्रास्य भार्यापि धनवत्युपमा मतिः ॥ १ ॥*
सत्पुत्रो गर्दभो नाम तनया कोणिका तथा । यस्या नैमित्तिकेनायमादेशो विहितः स्फुटम् ॥ २ ॥
सुकुमारामिमां कन्यां यो नरः परिणेष्यति । स महीमण्डलं सर्वं निष्कण्टः प्रभोक्ष्यति[3] ॥ ३ ॥
तदादेशमिमं ज्ञात्वा नृपतिः कोणिकामिमाम् । भूमिगेहेऽतिगुप्तायां स्थापयामास केनचित् ॥ ४ ॥
अन्यासामपि पत्नीनां नृपस्यास्य महात्मनाम् । शतानि पञ्च पुत्राणां सन्ति रूपादिशालिनाम् ॥५॥
तस्यैव नृपतेर्मन्त्री दीर्घो नाम विश्रुतः । राजाज्य लौकिकादीनि वेत्ति शास्त्राण्यशेषकम् ॥६॥
राजा [4]ज्ञानमदाविष्टो यमो वा स्वमतिनाशकः । छन्दवेषान्तरां भूत्वा स नरेन्द्रोऽवतिष्ठते ॥ ७ ॥
एवं हि तिष्ठतस्तस्य नरेन्द्रस्य सपत्नके । कृतान्तसमशीलस्य स्थापितारातिसंततेः ॥ ८ ॥
अन्यदा विहरन् प्राप्तः शिष्यपञ्चशतावृतः । धर्मादिपुरसामीप्यं सुधर्मा मुनिरप्ययौ ॥ ९ ॥
ततस्तं योगिनं ज्ञात्वा श्रावकाद्या यथासदा । वितानकमथादाय तत्पूजार्थं समाययुः ॥ १० ॥
तद्वृत्तान्तं परिज्ञाय नृपतिर्गर्वसंयुतः । मुनिनिन्दां प्रकुर्वाणो याति साधुसमीपकम् ॥ ११ ॥
एवं हि गच्छतस्तस्य मुनिनिन्दाविधायिनः । ज्ञानं बुद्ध्या समं नष्टं तदानीं तत्क्षणेन च[6] ॥१२॥
तस्मिन् क्षणे नष्टे गर्वहीनो नराधिपः । मुनिपार्श्वं स संप्राप्य भक्तिप्रह्वतनूरुहः ॥ १३ ॥
विपरीतस्ततः साधुं वन्दित्वा भक्तितत्परः । धर्मं शुश्राव जैनेन्द्रं नृपतिः सन्मनोहरम् ॥ १४ ॥
आहूय गर्दभाभिख्यं पुत्रं प्राज्यं स नृपतिः । राज्यपट्टं बबन्धास्य समस्तनृपसाक्षिकम् ॥ १५ ॥
स्वैः पञ्चभिः शतैर्युक्तः सत्पुत्राणां नृपैः सह । अन्यैः सुधर्मसामीप्ये यमेन्द्रः स तपोऽग्रहीत् ॥१६॥
एवं प्रव्रजिते तस्मिंस्तत्सुता नृपकुमाराः । ग्रन्थार्थपारगाः सर्वे बभूवुः सत्तपस्विनः ॥ १७ ॥
क्रियाणां क्रियमाणानामुत्थानं च निवेशनम् । विधातव्यं न जानाति यमयोगी कदाचन ॥१८॥
ततो वैराग्यमासाद्य ज्ञानाभ्यासविवर्जितः । संघमध्ये च किं कार्यं तिष्ठामि ज्ञानमप्यहम् ॥१९॥
एवं विचिन्त्य संप्राप्य गुरुं पृष्ट्वा पुनःपुनः । पूर्वदेशे यथाकाममेकाकी विहरन् मुनिः ॥ २० ॥
यमयोगी व्रजन् मार्गे गर्दभस्यन्दनं[7] स्थितम् । यवमध्येऽभिगच्छन्तं नरमेकं ददर्श सः ॥ २१ ॥
यवमध्ये यवं खादन् हन्यमानौ नरेण तौ । गच्छन्तौ मार्गतो मन्दमाकर्षन्तौ स्थितौ द्रुतम्[8] ॥ २२ ॥
यमयोगी विलोक्यायं गर्दभौ क्षेत्रमध्यगौ । खण्डश्लोकमिमं दिव्यमेकं पठति विस्मितः ॥ २३ ॥
कड्डमाकर्षणोऽसि त्वं भूयोऽपि प्रतिकर्षणे । लक्षितस्ते[10] मया भावो यवं गर्दभ वाञ्छसे ॥ २४ ॥
स्तौति देवक्रियां कुर्यात् स्वाध्यायादिक्रमेण सः । यमसाधुः परं हृष्टः श्लोकेनानेन सर्वदा ॥२५॥
अन्यदा पथि गच्छन् सन् रममाणान् कुमारकान् । दृष्ट्वा कोणिकया भूप[11] श्लोकखण्डं पठत्यरम् ॥२६॥
यावगच्छ प्रधावन्तः संधावन्तो मत मया । मन्दबुद्धिसमायुक्तश्छिद्रे पश्यत कोणिकाम्[12] ॥२७॥
श्लोकद्वयेन चान्येन भक्तिनिर्भरमानसः । वन्दनादिक्रियाः सर्वाः करोत्येष विशुद्धधीः ॥ २८ ॥
ततो गच्छन् हरिं दृष्ट्वा संध्यायां चान्तमेव सः । यमसाधुः प्रयत्नेन श्लोकार्धं पठति स्फुटम् ॥२९॥

---

1 क यशोऽनतिविषये [यशोध्रविषये]. * Upto verse No 8 below क continues the numbering of the last chapter 3 पञ्च प्रमोक्षत. 4 क महाज्ञानमदाविष्टो. 5 क भोक्ष्यति 6 Second line missing in क 7 क गर्दभ समन्वे 8 क विलोकित 9 क पुनःपु, ख पुनःप, क पुनःपुनरप 10 क भक्ति 11 पञ्च कोणिकया भृश. 12 क सत्वरं श्लोकम्.

विधायनाञ्छीताम्रसंम्भार्या मा व्रज कश्चित् । कुक्कुटाप्रत्ययेतस्कारीर्यास्ते दृश्यते भयम् ॥ ३० ॥[1]
भूयः श्लोकत्रयेणार्थं स्वाध्यायादिक्रिया सदा । करोति भक्तिसंपन्नो यमयोगी दिवानिशम् ॥३१॥
ततो भ्रमन्नसौ भूयो ग्रामस्यान्ते मनोहरे । शिलातलमहावापीसोपानेषु परेषु च ॥ ३२ ॥
निम्नगर्तान् विलोक्यैव योषितं पुरतः स्थिताम् । पयःसमायुक्तां पप्रच्छेति कुतूहली[2] ॥ ३३ ॥
किमर्थं कोमिका गर्ता वर्तुला श्रेणिसंस्थिता । दृश्यन्ते भूत मे शीघ्रं वापीसोपानपङ्क्तिषु ॥३४॥[3]
मुनिवाक्यं समाकर्ण्य वक्रतापरिवर्जितम् । जगाद तं मुनिं मुग्धं कौतुकेन विलासिनी ॥ ३५ ॥
घटपूर्णैः कुटैस्तत्र क्रियमाणैर्यपूतनैः[4] । गर्ताः शिलासु संजाताः कालेन बहुना मुने ॥ ३६ ॥
श्रुत्वा तद्वचनं योगी कौतुकव्याप्तमानसः । पपाठीति परं श्लोकं समतार्थमिमं पुनः ॥ ३७ ॥
तिष्ठता गच्छताऽन्येन मृदुना कठिनोऽपि च । भिन्नो ग्रावाऽपि कालेन नितसेन घटेन सः ॥३८॥
एवमुक्त्वा पुनः साधुर्दध्यौ विस्मितमानसः । शिलाया नूनमेतस्याः किं कर्णौ कठिनौ मम ॥३९॥[5]
येनाहं[6] स्वगुरुं हित्वा बन्धमोक्षप्रकाशकम् । मधुरधर्मतायोग्यां भितमेकविहारिताम् ॥ ४० ॥
चिन्तयित्वा चिरं साधुरागच्छन् गुरुसंनिधिम् । धर्मपत्तनसामीप्ये तस्थौ तरुसमाकुले ॥ ४१ ॥
दृष्ट्वा यममुनिं नक्तं वने दीर्घगर्दभौ । वधुं हन्तुं समायातौ खड्गमादाय भीषणम् ॥ ४२ ॥
यावन्मुनिमिमं हन्तुं खड्गेनायं समुद्यतः । तावन्मुनिवचाद् भीतः खड्गं कोपे मुमोच सः ॥ ४३ ॥
एवं हि गर्दभस्यापि कुर्वाणस्य विचेष्टितम् । स्वाध्यायं मुनिराधाय श्लोकखण्डं पठन्परम् ॥ ४४ ॥
आकर्णन्तौ प्रकम्पन्तौ समस्तं क्रूरमानसौ । भूयोऽपि गर्दभो[7] दीर्घं जगाद पुरतः स्थितम् ॥ ४५ ॥
मुनिनाऽत्र परिज्ञाय चाऽज्ञवां दीर्घ महाम्नते । परस्परं समालोक्य तस्थतुस्तौ विस्मितौ ॥ ४६ ॥
मूकभावं समासाद्य दीर्घगर्दभयोस्तयोः । स्थितयोः साधुरप्येव श्लोकखण्डं पठन्स्तम् ॥ ४७ ॥
धावमन्तौ प्रधावन्तौ किंचिदेतौ समीपगौ । भूयोऽपि गर्दभो दीर्घं प्राहेदं व्यपेक्षितः ॥ ४८ ॥
यत्त्वया यदितो दीर्घं[8] यथार्थं मुनिनामतः । आवयोर्मरणं कृत्वा तव राज्यं प्रदीप्स्यति ॥ ४९ ॥
मदीयराज्यकार्येण दीर्घं नायं समागतः । मत्सुतः कोणिकाया हि शासनार्थं समागमौ ॥ ५० ॥
तूष्णीभावमुपाश्रित्य स्थितस्तत्र यतीश्वरः । श्लोकखण्डं[9] तृतीयं च पपाठ पुनरप्ययम् ॥ ५१ ॥
यथाऽन्यनामभीताम्र गच्छ मा याहि दर्दुरे[10] । श्लोकखण्डमिदं मौनं श्रुत्वा दध्यौ स गर्दभः ॥५२॥
मुनिश्रियमिमं धूर्तं दीर्घनामानमुद्यतम् । सकार्यांकुशलं[11] क्रूरं घातकं वेत्ति सर्वदा ॥ ५३ ॥
उपकारकृतेनापि एषवे न परः कश्चित् । सुगृहीतः सुमान्यो वा न परः पर एव सः ॥ ५४ ॥
अनयाऽन्नसमा साधुः पुत्रस्नेहपरायणः । शिक्षां[12] दातुं समायातः पितुः पुत्रो हि वल्लभः ॥५५॥[13]
चिन्तयित्वा चिरं साधुर्दीर्घेण सह गर्दभः । जगाम मुनिसामीप्यं पितृभक्तिसमन्वितः ॥ ५६ ॥
विधाय वन्दनामस्य भक्तितोऽपि क्षमापणम् । जिनधर्मं समादाय सदीर्घः स्वपुरं ययौ ॥ ५७ ॥
यमयोगी परिप्राप्य गुरुसामीप्यमादरात् । घोरं तपश्चकारेद्ध विविधर्द्धिसमन्वितः ॥ ५८ ॥
[14]पादानुसारिणी बुद्धिः कोष्ठबुद्धिस्तथैव च । संभिन्नश्रोतृतया हि गुरवः परिकीर्तिताः ॥५९॥
उग्रं तपस्तथा दीप्तं तपस्तप्तं महातपः । घोरादीनि विजानन्तु तपांसीमानि कोविदाः[15] ॥ ६० ॥

---

1 क omits portions and gives one verse for Nos. 29–30 2 क कुतूहलम्, 3 पञ मित्रम्, क मित्रमिदम्, 4 [विकार्ये]. 5 प मुग्धम्, ख मुग्धम्, क मुग्धमिदम्. 6 क यो याहं 7 क गर्दभं 8 क दीर्घ. 9 पञ श्लोकखण्डं 10 क दुर्दरः 11 क सकार्यकुशलं. 12 पञ शिक्षा 13 प भातृभक्तमिदम्, क भातृभक्तमिदम्, ञ भातृभक्तमिदम्. 14 [मध्ये]. 15 क कोविदे [कोविदाः].

अणिमा लघिमा प्राप्तिर्वशित्वं कामरूपिता । आगम्यमीशिता[1] वीर्ये लब्धयोऽष्टौ प्रकीर्तिताः ॥६१॥
जङ्घलब्धिर्मता चार्या तथाऽन्या तन्तुचारणा । बीजपुष्पफलश्रेणीधूमेषिलब्धिमता परा ॥ ६२ ॥
'रसरूपफलशाखिविपानकरणक्षमा' । कीर्तिताः कोविदैरेताश्चाष्टौ चारणलब्धयः ॥ ६३ ॥
आमर्षक्ष्वेलविड्जल्लमलसर्वौषधिस्तथा[2] । सर्वौषधिरिमा[3] अष्ट लब्धयः परिकीर्तिताः ॥ ६४ ॥
अमृतक्षीरयोर्लब्धिस्तथा च मधुसर्पिषोः । एताश्चतस्र उदिता[4] कोविदै रसलब्धयः ॥ ६५ ॥
चौदस्स[5] बीजता 'लब्धिरष्टादशीभवलाया । लब्धिद्वयमिदं प्रोक्तमक्षीणादिमहानसम् ॥ ६६ ॥
एताभिर्लब्धिभिर्युक्तः श्रामण्यं परिपाल्य च । धर्माजिनमतासंघे कुमारगिरिमस्तके ॥ ६७ ॥
स्वैः पञ्चभिरमुष्ठ्ये मुनीनां धर्मशालिनाम् । आराधनां समाराध्य यमः साधुर्दिवं ययौ ॥ ६८ ॥

॥ इति[7] श्रीखण्डश्लोकत्रयस्वाध्यायसंसक्तयममुनिस्वर्ग
लोकगमनकथानकमिदम्[8] ॥ ६१ ॥

६२ दृढसूर्यकथानकम् ।

अथावन्तीमहादेशे श्रीमदुज्जयिनी पुरी । यस्यां बभूव भूपालो धनपालः प्रतापवान् ॥ १ ॥
कान्ता धनवती तस्य तन्मनोनयनप्रिया । आसीद्गुणगणोपेता विशालदललोचना ॥ २ ॥
तत्रैव नृपतेः श्रेष्ठी धनदत्तोऽभवद्धनी । धनदत्ताऽस्य सद्भार्या रूपराजितविग्रहा ॥ ३ ॥
तत्रैव नगरे चौरो दृढसूर्योऽभवन्महान् । भार्या वसन्तसेनाऽस्य पण्यस्त्री मनसः प्रिया ॥ ४ ॥
उद्यानवनमायान्त्या[9] धनवत्या मनोहरम् । हारं विलोक्य सा याता दुःखिनी तदलाभतः ॥ ५ ॥
ततो विलोक्य तां भार्यां दृढसूर्यो जगाद स । देवि किं दुःखिता जाता किं वा ध्यायसि दुर्मनाः[10] ॥६॥
दृढसूर्यवचः श्रुत्वा तत्प्रिया निजगादमुम् । हारदर्शनमुत्पन्ना ध्यानवत्कन्दरेक्षणा ॥ ७ ॥
दत्से हारं न मे कान्त धनवत्या यदि प्रभो । ततोऽहमद्य[11] यास्यामि पञ्चतां निश्चितं ध्रुवम् ॥८॥[12]
निशम्य तद्वचः सोऽपि क्लेशिनीं तां जगौ पुनः । याहि मा दुःखिनी भूया हारं ते वितराम्यहम् ॥९॥
एवं निगद्य तां कान्तां नक्तं तत्राऽसमञ्जसम् । दृढसूर्यो विवेशाशु तत्समोपोषिताम्बरम्[13] ॥ १० ॥
मणिहारं समादाय निर्गच्छन्नगरान्तरात्[14] । गृहीतो यमपाशेन[15] तलारेण स तस्करः ॥ ११ ॥
ततः प्रभातकाले च शूलिकायां निवेशितः । यमपाशेन तेनाशु दृढसूर्यो विनिश्चिते ॥ १२ ॥
अन्यदा धनदत्तोऽपि वन्दित्वा जिनपुङ्गवम् । आयच्छन् दृढसूर्येण दृष्टोऽयमिति भाषितः ॥१३॥
श्रावकोऽसि कुलीनोऽसि दयावानसि सज्जन । तेन त्वं मां जलं शीघ्रं धनदत्त प्रपाय मे ॥१४॥
शूलस्थदृढसूर्यस्य तृषाविह्वलचेतसः । निशम्य वचनं श्रेष्ठी जगादेति स तं पुनः ॥ १५ ॥
कुर्वाणेन गुरोः[16] सेवां सर्वसत्त्वानुकम्पिनः । मया द्वादशभिर्वर्षैर्लब्धो मन्त्रो महानयम् ॥ १६ ॥
यावद्यावदानेतुं त्वदर्थं मम शोभन । विस्मृतिं याति मन्त्रोऽयं द्वादशाब्दप्रशिक्षितः[17] ॥ १७ ॥
मदीयं पठसे[17] मन्त्रं कण्ठस्थं यदि मानव । ततोऽहं शीतलं तोयं भवन्तं पाययाम्यहम् ॥१८॥[18]

---

1 [आगम्य°]. 2 प °बौधिर्वि 3 प °सर्वौषधि° 4 क अष्ट° ज अष्टयः. 5 प °एता°. 6 [चौदस्थरीमन्त्रलब्धिरष्टादशीभवत् तथा]. 7 पज omit इति श्री 8 प adds संपूर्णम्. 9 प वनमायात. 10 क इवेष 11 क ततोऽहमथ 12 प ध्रुवम्, ज ध्रुवम्, क ध्रुवमीदृम्. 13 पज तत्रावस्थितोत्तमाम्बरम्. 14 क °रान्तरम्. 15 क यमपाशेन. 16 [द्वादशाब्दानिमिति]. 17 क पठेः. 18 पज °ह्यहम्, क पाययामीयम्.

धनदत्तवचः श्रुत्वा दृढसूर्यो वणिक्सुतम् । यथा त्वं लब्ध मे मन्त्रं देहि प्राणिदयापर ॥ १९ ॥
श्रावकेन ततस्तस्मै दत्तो मन्त्रो मुमूर्षवे । ध्यायंस्तं स नमस्कारं दृढसूर्यो मृतिं ययौ ॥ २० ॥
[1]दिव्यदुन्दुभिनिर्घोषदिव्यदेवीसमन्विते । दृढसूर्यः सुरो जातः सौधर्मे तत्फलान्महान् ॥ २१ ॥
दत्त्वा पञ्चनमस्कारं धनदत्तोऽपि दस्यवे । ययौ जिनालयं तूर्णं नानामुनिसमाकुलम् ॥ २२ ॥
तद्वृत्तान्तं परिज्ञाय धनपालो नराधिपः । निर्धनं कर्तुमारेभे धनदत्तस्य मन्दिरम् ॥ २३ ॥
दृढसूर्यचरो देवः प्रथमस्वर्गसंभवः । अवधिज्ञानमासाद्य विवेद स्वभवान्तरम् ॥ २४ ॥
धनदत्तोपसर्गं च विदित्वाऽवधिना सुरः । धनपालकृतं क्रुद्धः संप्राप्य श्रेष्ठिमन्दिरम् ॥ २५ ॥[2]
धनपालनरान् सर्वान् धनदत्तगृहागतान् । मायया पातयामास दृढसूर्यचरः सुरः ॥ २६ ॥
कर्मभावं समादाय कृत्वा मस्तकमुण्डनम् । धनपालान्तिकं देवो नरः प्रहितवानरम् ॥ २७ ॥
आस्थानमण्डपस्थस्य धनपालस्य भूपतेः । स नरः प्राप्य[3] सामीप्यं भयवेपितविग्रहः ॥ २८ ॥
दृष्ट्वाऽमुं भूपतिः प्राह केनेदं विहितं तव । ब्रूहि मे भद्र तं शीघ्रं प्रापयामि यमालयम् ॥ २९ ॥
धनपालनरेन्द्रस्य निशम्य वचनं भटः । जगाद विह्वलस्वान्तस्तं तदा स्खलिताक्षरम् ॥ ३० ॥
धनदत्तगृहद्वारे मषीवर्णशरीरकः । गुञ्जाफलसमानाक्षो नरः कोऽपि वितिष्ठते ॥ ३१ ॥
त्वदादिष्टनरान् सर्वान् निहत्य लकुटेन च । यमसामीप्यं तेन नीतोऽहं नरकुञ्जर ॥ ३२ ॥[4]
श्रुत्वा तद्वचनं राजा कोपारुणनिरीक्षणः । चतुरङ्गबलं शीघ्रं तदन्तं स विसृष्टवान् ॥ ३३ ॥
आयातमात्रतस्तेन धनपालबलं लघु । दृढसूर्यचरेणेदं देवेन भुवि पातितम् ॥ ३४ ॥
ततो निहतमाकर्ण्य स्वबलं तेन भूपतिः । निजसैन्यसमाजेन संप्रापाशु तदन्तिकम् ॥ ३५ ॥
तत्सर्वं क्षणमात्रेण तद्बलं लकुटाहतम् । दृढसूर्यचरो देवः पातयामास भूतले ॥ ३६ ॥
विलोक्य सकलं सैन्यं हतं विह्वलमानसः । रणात् पलायनं चक्रे धनपालनरेश्वरः ॥ ३७ ॥
वन्दित्वा[5] श्रेष्ठिनं भूपो जिनायतनमागतम् । भयवेपितसर्वाङ्गो धनदत्तान्तिकं ययौ ॥ ३८ ॥
यावद्वसति तत्रार्तो धनदत्तस्य भूपतिः । तावत्तन्मार्गतः प्राप सुरो जिनवरालयम् ॥ ३९ ॥[6]
धनपालनृपं दृष्ट्वा धनदत्ताश्रितं तदा । जगाद श्रेष्ठिनं देवो दृढदन्तच्छदो रुषा ॥ ४० ॥
वणिक्पते द्रुतं मुञ्च भूपतिं त्वत्पुरः स्थितम् । करोमि निर्मदं[8] येन साहसेन यथाभवत् ॥ ४१ ॥[7]
निशम्य तद्वचः श्रेष्ठी जगादेदं पुरः स्थितम् । कोऽसि त्वं केन कार्येण कोपमायासि भूपते ॥ ४२ ॥
श्रेष्ठिवाक्यं समाकर्ण्य जगाद विबुधोऽप्यमुम् । दृढसूर्योऽस्म्यहं चौरः प्रसिद्धो वसुधातले ॥४३॥
गृहमस्य प्रविष्टोऽहं हारमादाय निर्गतः । गृहीतोऽस्मि तलारेण शूलिकायां निवेशितः ॥ ४४ ॥
त्वत्सार्थतो मया श्रेष्ठिन् विह्वलीभूतचेतसा । नूनं जिननमस्कारो गृहीतो मत्स्थमेतः ॥ ४५ ॥
ध्यात्वा पञ्चनमस्कारं पञ्चतां प्राप्य वेगतः । जातो महर्द्धिको देवः सौधर्मे त्वत्समागमात् ॥४६॥
ज्ञात्वा वृत्तान्तमीदृक्षं त्वद्गृहस्य च लुण्टनम् । अनेन प्रभुणा कर्तुं प्रारब्धं कोपमीयुषा ॥ ४७ ॥
अवधिज्ञानतो ज्ञात्वा भवतीदमहं द्रुतम् । आगतस्त्वां निराकर्तुं साहाय्याकृष्टमानसः ॥ ४८ ॥
हत्वाऽस्य सकलं सैन्यं प्राप्तोऽमुं हन्तुमीश्वरम् । करोमि निर्मदं तेन[9] मुञ्च श्रेष्ठिन् विप्रियम् ॥४९॥[10]
श्रुत्वाऽस्य वचः श्रेष्ठी जगादेदं सुविस्मितः । शृणोम[11] मत्पतिं साधो महासत्त्वं कृतं त्वया ॥५०॥

---

1 प °निर्घोषे 2 फ alone has this verse 3 [मम]. 4 फ तत्त्वकी° 5 पज विवि-दुरुकम्, प त्रिकम्. 6 फज विहिता. 7 फ loses the second line of No. 40 and the first line of No 41 8 पज निष्प्रहेन 9 प मुञ्च. 10 पज दुरुकम्, फ दुरुकमिरम्, 11 प शृणु मे

दत्त्वाऽभयं नरेन्द्रस्य यशस्वी श्रेष्ठिनाऽन्वितः । सैन्यमुत्थापितं सर्वं देवेन कृतनिश्चयम् ॥ ५१ ॥
श्रुत्वाऽखिलमयेतस्य महत्तैश्वर्यसंयतः । लक्ष्मीं समर्पयामास धनपालः स्वसूनवे ॥ ५२ ॥
आपृच्छ्य सकलान् बन्धून् धनदत्तं च यक्षिम । जिनसेनान्तिके दीक्षां धनपालोऽग्रहीत् तदा ॥५३॥
दत्तसूर्यचरो देवो धनदत्तस्य पूजनम् । विधाय कनकैः पश्चाज्जगाम त्रिदिवं मुदा ॥ ५४ ॥

॥ इति श्रीदत्तसूर्यचौरशूलिकानिहितपञ्चनमस्कारस्मरणमात्र-
देवत्वप्राप्तिकथानकमिदम्[1] ॥ ६२ ॥

*

६३ अर्हद्दासकथानकम् ।

अथ चेदं समासेन भेदेनान्येन सज्जना । आकर्णयत भावेन कथयामि कथानकम् ॥ १ ॥
शूरसेनजनान्तेऽस्ति चोत्तरा मथुरापुरी[2] । तस्यां[3] नराधिपः श्रीमानुदितोदयनामकः ॥ २ ॥
उदिताऽस्य महादेवी रूपसौभाग्यशालिनी । आसीत् प्रमोदसंपन्नः पुत्रः प्रमुदितोदयः ॥ ३ ॥
बभूवास्य नरेन्द्रस्य प्रतापाक्रान्तवैरिणः । सुबुद्धिर्नामतो मन्त्री महामतिविराजितः ॥ ४ ॥
नृपस्यास्य महाश्रेष्ठी जिनदासोऽभवत् प्रियः । अष्टौ तस्य महाभार्या नामानीमानि बिभ्रति ॥५॥
मित्रश्रीरभवत् पूर्वा चन्दनश्रीरपरा मता । विष्णुश्रीर्विष्णुभार्याभा नागश्रीर्नागिनीव सा ॥ ६ ॥
तथा पद्मलता चान्या कनकादिलता परा । विद्युल्लता परा ज्ञेया मता कुन्दलताऽपि च ॥ ७ ॥
तथा स्वर्णखुरश्चौरस्तत्पुरे विद्यते महान् । महाचौरिकया सोऽयमहन्यहनि जीवति ॥ ८ ॥
अन्यदा तिष्ठतामत्र सर्वेषां च यथाक्रमम् । कौमुदीमहिमा प्राप्तः कामिमानसवल्लभः ॥ ९ ॥
नूनं कार्तिकमासस्य शुक्लपक्षे समागते । पूर्णिमान्त्याऽष्टमीपूर्वा कौमुदीमहिमेरिता ॥ १० ॥
तत्पुरीप्रमदोद्याने [4]समस्तवनिताजनः । रमन्ते पूर्णिमां यावन्नरेन्द्रनररक्षिताः ॥ ११ ॥
तदानीं घोषणा दत्ता नृपेणेयं महादरात् । समस्तभुवनव्यापियशसा नीतिवेदिना ॥ १२ ॥
योषितां रममाणानां मध्ये तिष्ठति यो नरः । स वध्यो मे स्वकीयोऽपि भवेद् यद्यपि नन्दनः ॥१३॥
नगरान्निर्गताः सर्वे घोषपूरितमानसाः । रममाणा महाभूत्या नरास्तिष्ठन्तु केवलाः ॥ १४ ॥
अत्रान्तरे महादेवीविरहे स महीपतिः । जगाद सचिवं कामविह्वलीभूतमानसः ॥ १५ ॥
कौमुदीमहिमायां च रममाणाः[5] सुयोषितः । पश्यामि तत्र गत्वा कौतुकव्याप्तमानसः ॥ १६ ॥
नरेन्द्रवचनं श्रुत्वा सुबुद्धिः सचिवः पुनः । जगादेदं महाबुद्धिर्भोगादर्शनकौतुकम् ॥ १७ ॥
विधाय घोषणामत्र यदि तन्मध्यमेष्यसि । अविश्वासस्ततो राजन् कीर्तिस्ते पतिष्यति ॥ १८ ॥
नूनं कुलक्रमस्य शुभसंतानधारिणः[6] । तव राजप्रधानस्य न गन्तुं तत्र युज्यते ॥ १९ ॥
निशम्य सचिवो वाक्यं जगादेदं नरेश्वरः । अवश्यमेव गन्तव्यं मया तत्र महामते ॥ २० ॥
नृपस्य वचनं श्रुत्वा सुबुद्धिर्निजमानसम्[7] । कथाख्यानं महाराज शृणु त्वं मम सांप्रतम् ॥ २१ ॥
कुरुजाङ्गलदेशेऽस्ति हस्तिनागपुरं वरम् । सुयोधनोऽस्य भूपालो धनदत्ताऽस्य गेहिनी ॥ २२ ॥
तस्य मन्त्री सुमित्रोऽस्ति सोमशर्मा पुरोहितः । तलारो यमपाशोऽपि पुरं पाति स सर्वदा ॥ २३ ॥
अन्यदा भूपतिर्जिष्णुः परदेशात् समाययौ । चौरलोकः समस्तोऽपि नरेन्द्रं द्रष्टुमागतः ॥ २४ ॥

---

1 P adds श्रीदत्त. 2 B चोत्तरामथुरापुरी 3 Bम. 4 P समस्त 5 B सुमन्म, P सुमन्म. B सुमन्मीरत. 6 P B निधिः कुलस्य, P निधनधीरस्य. 7 P निजमानसम्.

सुयोधनो विलोक्येम पौरलोकं पुरःस्थितम् । क्षेमं भवतसमूहस्य[1] सर्वकालं महाजन ॥ २५ ॥
निशम्य भूपतेर्वाक्यं श्रेष्ठिलोको जगाद्यमुम् । आरक्षकप्रसादेन कुशलं सर्वदैव नः ॥ २६ ॥
पौरलोकवचः श्रुत्वा कोपमादाय चेतसि । विस्मयव्याप्तचेतस्कस्तदा दध्यौ महीपतिः ॥ २७ ॥
आरक्षकप्रसादेन श्रेष्ठिनां कुशलं सदा । अस्मत्साद्प्रसादेन नैतेषां तत् कदाचन ॥ २८ ॥
तदानीं चिन्तयित्वेदं मौनमादाय भूपतिः । दिनानि कानिचित्तस्थौ तलारोपरि कोपवान् ॥ २९ ॥
तत्परमत्सरेणाथ राजा मन्त्री पुरोहितः । भाण्डारे तत्परीक्षार्थं निशि खात्रं चखान सः ॥ ३० ॥
आदाय साररत्नानि विधायान्यत्र तानि सः । राजाऽऽहूय तलारं तं तद्वृत्तान्तमभाषत ॥ ३१ ॥
आरक्षिको नृपोक्तेन गत्वा खातमुखं तदा । नखौ[2] यज्ञोपवीतं च विलोक्य मणिपादुके ॥ ३२ ॥
एतानि त्रीण्यपि क्षिप्रं समादाय सविस्मयः । आरक्षिको भयग्रस्तो जगाम निजमन्दिरम् ॥ ३३ ॥
अथारक्षिकमाहूय भूपतिः स्वान्तिके तदा । जगाद कोपरक्ताक्षस्तदा तं पुरतः स्थितम् ॥ ३४ ॥
अन्येषां वेश्मरत्नानि पासि दुष्ट प्रयत्नतः । मद्गृहं मदनं कस्मान्न रक्षसि वदाशु मे ॥ ३५ ॥
रे दुष्टारक्षिक क्षुद्र यदि सप्तदिनान्तरे । चौरं धनं मदन्तं च समानयसि वेत्सि मम् ॥ ३६ ॥
अन्यथा तव पापिष्ठ प्रमादासक्तमानसः[4] । करोमि निग्रहं स्वेन करवालेन चात्मना ॥ ३७ ॥
नरेन्द्रवचनं श्रुत्वा तलारः संभ्रमान्वितः । एवमस्त्विति संभाष्य निर्जगाम तदन्तिकात् ॥ ३८ ॥
वणिग्जनादिसामीप्यं समाप्य पृथुवेपथुः । आरक्षिको[5] जगादैतान् तदा तच्चौरदर्शनम् ॥ ३९ ॥
भवद्भिः स्नेहसंपन्नैः साधुसेवापरायणैः । भवितव्यं ममापत्सु सहायैः करुणापरैः ॥ ४० ॥
मन्त्रिराजमन्त्रिपुत्राणां कुमारश्रेष्ठिमुख्यानाम् । नखयज्ञोपवीतं च विचित्रमणिपादुके ॥ ४१ ॥
दर्शयित्वाऽखिलानेतान् विस्मयव्याप्तचेतसाम् । आरक्षको विशुद्धात्मा जगादेति विचक्षणः ॥ ४२ ॥
स्वगृहे चौरिकां कृत्वा स्वयमेव नराधिपः । कार्यं विनाऽधुना हन्तुं मां समिच्छति कोपतः ॥ ४३ ॥[6]
श्रुत्वा तद्वचनं तेन वदन्तीम पुरःस्थितम् । सहायास्ते भविष्यामो वयं मा याहि भीतिताम् ॥ ४४ ॥
क्षमं यास्यति यद्येव न स्वयं धरणीपतिः । ततोऽस्य निग्रहं सर्वे करिष्यामो विसंशयम् ॥ ४५ ॥[7]
स्थिरान् सर्वान् विधायैव भूपवाक्येन संसदम् । आजगाम विनीतात्मा तलारो विकसन्मुखः ॥ ४६ ॥
आरक्षिकं विलोक्यैव भूपतिः प्राह सुस्थितम् । दृष्टश्चौरस्त्वया मूढ वद त्वं शीघ्रं मेऽधुना ॥ ४७ ॥
नरेन्द्रवचनं श्रुत्वा तलारो वदति प्रभुम् । न दृष्टस्तस्करो राजन् भ्राम्यताऽपि मया क्वचित् ॥ ४८ ॥
किं पुनः पुरुषश्चैकः पठित्वाशु सुभाषितम् । आख्यानं कथयत्येव शृणु चित्तं समाहितः ॥ ४९ ॥
स्थिता मम चिरं कालं पादपे निरुपद्रवे । मूलात् समुत्थिता वल्ली जातं शरणतो भयम्[8] ॥ ५० ॥
पादस्तम्भो वनस्यान्ते पादपः सरलो महान् । सरोवरसमीपे च स्थितो भाति विभिः फलैः ॥ ५१ ॥[10][11]
निबद्धेहप्रभाभारभासिताक्षसभूतलः । वसन्ति पक्षसंघा मन्दस्थाना कलस्वना ॥ ५२ ॥
महात्तपोरपस्य तं सुकुमारं महाप्रभुः । वल्लभकं विलोक्यैकं वृद्धहंसो जगाद्यमून् ॥ ५३ ॥
पतुस्पेन सुखानां वृक्षाणां वचनं परम् । भवद्भिः स्थिरचेतोभिः श्रोतव्यं सकलैरिदम् ॥ ५४ ॥[12]
वल्लभाङ्कुरमिमं यावदुत्थितं कोमलं द्विजाः । तावदभूनखैः क्षीर्मं नयामोऽसारतां वरम्[13] ॥ ५५ ॥

---

1 क भव समूहस 2 क राजाहूय समारभ्य. 3 प नखौ(?)ऽग्रुलिकम्, 4 [°मानस]. 5 प क ज विकसन्मिदम्. 6 क आरक्षको 7 क च तत्पौर. 8 प वाग्भयकम्, क वाग्भयकमिदम् ज वाग्भयकम् 9 प कुमम्, ज कुसुम्, क कुसुममिदम्. 10 क स्थितो भाति विभिः फलैः. 11 क omits No. 51. 12 क interchanges Nos. 58 and 54. 13 प ज [illegible]

वृद्धहंसवचः श्रुत्वा परिणामहितं तदा । पार्श्वस्थयुवानस्ते हसित्वेमं वचः पुनः ॥ ५६ ॥
अहो भयमभीतस्य तव वृद्धस्य सांप्रतम् । बुद्धिर्विनाशमायाता येनैवं भाषसे द्विज[1] ॥ ५७ ॥
अयं वल्ल्यङ्कुरोऽस्माकं सामर्थ्यपरिवर्जितः । बुद्धिपक्षप्रयुक्तानां मृत्युहेतुर्भविष्यति ॥ ५८ ॥[2]
वृद्धहंसः स वाक्यमुपहाससमन्वितम् । श्रुत्वा मौनं समादाय तस्थौ संकुचितात्मकः ॥ ५९ ॥
ततः कालेन सा वृद्धिं प्राप्य वृक्षं समाश्रिता । तया वल्ल्या समारूढो व्याधो वृक्षाग्रमुत्तमम् ॥६०॥
पाशीकृत्य ततो हंसान् व्याधः सर्वानपि द्रुतम् । भूमौ मुमोच हृष्टात्मा भयकम्पितविग्रहान् ॥ ६१ ॥
वृद्धहंसस्य वाक्येन स्थितास्ते निश्चलाङ्गकाः । तावद्यावद् विमुक्तास्ते तेन सर्वेऽपि तत्क्षणम् ॥६२॥
ततः सर्वेऽपि ते हंसा विपदुत्तस्य वेगतः । पलायांचक्रिरे धूर्ता वृद्धहंसोपदेशतः ॥ ६३ ॥
मूलमाख्यानकं राजन् गुम्फबद्धमिदं स्थितः । एवमाख्यापिते तस्य गतं तत् प्रथमं दिनम् ॥ ६४ ॥
अथान्यदिवसे जाते भूपतिं सदसि स्थितम् । जगाद विस्मितस्वान्तः सेवार्थं दण्डपाशिकः ॥६५॥
दृष्ट्वा पुरः स्थितं राजा तलारं प्राह विस्मितः । दृष्टश्चोरस्त्वया भद्र ब्रूहि तं मम सांप्रतम् ॥ ६६ ॥
श्रुत्वा नराधिपं वाक्यं तलारो निजगादमुम् । न दृष्टस्तस्करो राजन् मयाऽन्वेषणकारिणा ॥६७॥
एकमाख्यानकं ख्यातं कुम्भकारेण मे विभो । आकर्णयन्निदं तत्र स्थितोऽहं नरकुञ्जर ॥ ६८ ॥
येनाहं दीनदुःस्थेभ्यो जन्तुभ्यः सततं भुवि । भिक्षां ददामि येनाथ देवेभ्योऽपि तथा बलिम् ॥६९॥
पुष्णामि येन चात्मानं स्वगृहागतमानवान् । स्वजनानपि संप्रीत्या महास्नेहनिवासिनः ॥ ७० ॥
अत्यन्तक्लेशनिर्माप्या समानीताऽतिदुःखतः । तया पृष्टं तु मे मम जातं शरणतो भयम् ॥ ७१ ॥
मित्रेण केनचित् पृष्टः कुम्भकार सुमेधसा । पृष्टं तु केन भयं ते कथयाशु ममाधुना ॥ ७२ ॥
मित्रवाक्यं समाकर्ण्य कुम्भकारो जगाद तम् । जीवामि येन पिण्डेन पृष्ठं तेनेह चूर्णितम् ॥ ७३ ॥
सर्वभूतशरण्येन समस्तजनताप्रिय । अस्माभिः श्रुतमेवेदं कुम्भकारवचो नृप ॥ ७४ ॥
तृतीये दिवसे जाते तलारोऽसौ दण्डपाशिकः । तत्पुरः प्रीतचेतस्को जगादेदं कथानकम् ॥ ७५ ॥
पिता यस्य गलं हन्ति विषं माता ददाति च । नरेन्द्रो लुम्पति क्षिप्रं शरणं कं प्रयातु सः ॥ ७६ ॥
अत्रास्ति भरतक्षेत्रे पुरं धर्मपुरं परम् । वरधर्मोऽत्र भूपालो वरधर्मा प्रियाऽस्य च ॥ ७७ ॥
तन्मन्त्री जयदेवोऽस्ति जयदेवी प्रियाऽस्य सा । तोषपूरितचेतस्कौ तिष्ठतस्तौ यथोचितम् ॥ ७८ ॥
अन्यदा तौ परिप्राप्तौ परदेशे महाशठौ । रिपुं जेतुं महावीर्यं स्कन्धावारेण भूपतिः ॥ ७९ ॥
तं च शत्रुं वशीकृत्य स नृपः स्वल्पवासरैः । आजगाम पुरं शीघ्रं पताकावलिराजितम् ॥ ८० ॥
विशन् स गोपुरद्वारं चित्रचित्रितभित्तिकम् । ददर्श निपतत्तुङ्गं शिरीषाशेषपञ्चकम् ॥ ८१ ॥
निपतद् गोपुरं दृष्ट्वा निवृत्याऽऽशु पुनः सदन् । वरधर्मो नृपस्तस्थौ तत्रैव नगराद् बहिः ॥ ८२ ॥
उत्थापयति तद्भूयो भूपः पतति भूतले । विलोक्य निपतद् भूयो मन्त्रिणं प्राह विस्मितः ॥८३॥
केनोपायेन चाद्यैव स्थिरं भवति गोपुरम् । सांप्रतं सचिव स्पष्टं ब्रूहि मत्पुरतः शुभम् ॥ ८४ ॥
भूपालवचनं श्रुत्वा मन्त्री तं निजगौ पुनः । महाचिन्ताभराक्रान्तविह्वलीभूतविग्रहः ॥ ८५ ॥
निहत्य मानुषं चैकं स्वयं प्राकारगोपुरे । शतजनं बलिं दत्त्वा निश्चलं स्यान्नरेश्वर ॥ ८६ ॥[3]
तन्मन्त्रिवचनं श्रुत्वा वरधर्मनराधिपः । मूकभावं समाधाय तस्थौ तत्क्षणमात्रकम् ॥ ८७ ॥
अत्रान्तरे परिप्राप्य धारात्मजो जगाद तम् । तिष्ठ त्वं मौनमादाय यानीमोऽत्र वयं नृप ॥ ८८ ॥
अस्माकं मानुषं यो हि मार्गार्थं ददात्यरम् । तस्मै दीनारलक्षं च दास्यामो वयमादरात् ॥८९॥

---

1 क. कुहनाले 2 क. °तेन. 3 ख ग ज विप्रधमित्. 4 [अर्थ]. 5 [°तनितम्]. 6 ग ख पुम्पम्, ज पुम्पम्.

इयं च घोषणा दत्ता तदानीं पौरवाक्यतः । पुरमध्ये समस्तोऽपि स्तूयमाना जनवजे ॥ ९० ॥
दारिद्र्यपीडितो दुःखी लब्धटक्कः कठोरवाक् । गोचरोपपदो दत्तो विप्रो वसति तत्पुरे ॥ ९१ ॥
तद्भार्या टक्किनी दत्ता तत्सुताः सप्त सन्त्यमी । सुदत्तः शिवदत्तोऽपि गङ्गदत्तस्तथाऽपरः ॥ ९२ ॥
वसुदत्तस्तथा ज्ञेयः सूर्यदत्तो मतः परः । विष्णुदत्तेन्द्रदत्तौ च क्रमेणैते प्रकीर्तिताः ॥ ९३ ॥
श्रुत्वा तां घोषणां दत्तां[1] तत्पुरे प्रीतमानसा । जगाद स्वपतिं टक्का दारिद्र्योपहतात्मिका ॥ ९४ ॥
पुत्रमेकं प्रदायाशु तरां यद्यपि वल्लभम् । दीनारलक्षमेकं च कान्तेह परिगृह्यते ॥ ९५ ॥[2]
निशम्य ब्राह्मणीवाक्यं ब्राह्मणः प्रीतमानसः । बभाण तां धनासक्तां शोभनं गदितं त्वया ॥ ९६ ॥
अस्माकं टक्ककान्ते हि कार्यं द्रव्येण सुन्दरि । न पुत्रेणेति पुत्राश्च भविष्यन्त्यपरे ध्रुवम् ॥ ९७ ॥
ततः पुत्रं प्रदायैकं धनमानय मे गृहे । दत्ताऽपि घोषणां दत्ते गत्वा तां धववाक्यतः ॥ ९८ ॥
तथाऽहं पुत्रमेकं च भवद्भ्यो वितराम्यरम् । श्रुत्वा वैश्याङ्गनीवाक्यं एवमस्त्विति सोदिता[3] ॥ ९९ ॥
इन्द्रदत्तसुतं दत्त्वा नागरेभ्यः कनिष्ठकम् । वरदत्ताऽपि जग्राह तदा दीनारलक्षकम् ॥ १०० ॥
जनयाऽवस्थया सोऽपि गृहीतो नागरैः पुनः । पित्रा गलेऽस्य हन्तव्यो मात्रा देयं गरं तथा ॥ १०१ ॥
जनन्या जनकेनापि नृपपौरजनेन च । नीयमानो हसन् याति हिंसनार्थमयं बटुः ॥ १०२ ॥
तदान्यपुरुषेणायं पृष्टः किं न भयं तव । त्वमद्य नगरद्वारे हन्तव्यो नागरैः सुत ॥ १०३ ॥
इन्द्रदत्तः समाकर्ण्य तद्वचो जगौ पुनः । बालो मातृभयाद्याति पितरं भयहानये ॥ १०४ ॥
तथा पितृभयाद्भीतो मातरं याति बालकः । द्वाभ्यामपि भयाद्याशु भूपतिं च भयापहम् ॥ १०५ ॥
मातुः पितुस्तथा भूपात् बिभ्योऽपि भयतः स्फुटम् । महापौरसमूहानां शरणं याति बालकः ॥ १०६ ॥
नरनागाऽधुना यत्र निहन्ति जनकौ[4] गलम् । सपौरो मा नृपो हन्ति नूनं तत्र न मे भयम् ॥ १०७ ॥
ऐन्द्रदत्तं वचो धीरं जने राज्ञे निवेदितम् । अमुनाऽयं पुनर्मुक्तो नेदृग्दुन्दुभयो दिवि ॥ १०८ ॥
इन्द्रदत्ते प्रमुक्तेऽस्मिन् मृत्युना तोयमीयुषा । बभूव गोपुरं तत्र तदानीं स्थिरविग्रहम् ॥ १०९ ॥
कथानकमिदं श्रुत्वा दण्डपाशिकभाषितम् । तस्मै नराधिपः स्वस्थो मनाग् विस्मितमानसः ॥ ११० ॥
चतुर्थे दिवसे जाते प्रविष्टे नृपसेवया । तस्करो मृत्युना भूपः सपुरस्सः प्रभाषितः ॥ १११ ॥
त्वया मलिम्लुचो दृष्टो भ्रमता क्वापि पत्तने । निवेदय तकं शीघ्रं दुराचारं ममाधुना ॥ ११२ ॥
नृपालवचनं श्रुत्वा तस्करो निजगावमुम् । महाराज मया क्वापि न दृष्टस्तस्करो विभो ॥ ११३ ॥
महाजनकृतानन्द समस्तजननन्दन[5] । कथानकमिदं भूयो मदीयं शृणु भूपते ॥ ११४ ॥
सर्वं विषं हि पानीयं मरणं क्रूरसंगतम् । स्वतश्चो नृपतिर्यत्र तत्र वासः सतां कुतः ॥ ११५ ॥
कथानकमिदं भव्य सर्वसत्त्वहितावहम् । समस्तलोकविख्यातं बुधकर्णरसायनम् ॥ ११६ ॥
पञ्चमे वासरे जाते कथानकमिदं पुनः । प्रारब्धं गदितुं तेन तस्करेण सभाऽन्तरे ॥ ११७ ॥
समस्तविषमख्याता जनविस्मयकारिणी । गङ्गा हरति राजेन्द्र श्रूयतां मत्सुभाषितम् ॥ ११८ ॥
बीजानि येन जायन्ते सिच्यन्ते येन पादपाः । तन्मध्येऽहं मरिष्यामि जातं शरणतो भयम् ॥ ११९ ॥
पत्तने पाटलीपुत्रे वसुपालो नराधिपः । वसुपूर्वा[6] मतिस्तस्य बभूव वनितोत्तमा ॥ १२० ॥
वसुपालनरेन्द्रस्य शीघ्रकाव्यविधायकः । बभूव मतिसंपन्नो नाम्ना चित्रकविः कविः ॥ १२१ ॥
परिहासं प्रकुर्वद्भिः सभ्यैर्विस्मयमागतैः । मात्सर्येण पुनः शीघ्रं गङ्गायां स निपातितः ॥ १२२ ॥
नीयमानः पुनः सोऽपि गङ्गाप्रवाहेण वेगतः । तत्रत्यो वीर्यसंपन्नः पृष्टोऽभीषि सुभाषितम् ॥ १२३ ॥

1 [च्या]. 2 चफ दुग्धम्, ज दुग्धम्. 3 फ सोदिताम्. 4 चफ जनकै. 5 चफज चतुर्भिः कुलम्. 6 फ °नन्दनम्. 7 फ वसुपूर्वा

श्रुत्वा तद्वचनं तेन यतिना च सुभाषितम् । इदं शुभमनोहारि शब्दार्थपरिपेशलम् ॥ १२४ ॥
येन पीता प्रजायन्ते छिद्यन्ते येन पादपाः । तन्मध्येऽहं भणिष्यामि जातं शरणतो भयम् ॥१२५॥
ततः षष्ठदिने तस्य नरेन्द्रस्य पुरः परम् । कथानकमिदं तेन प्रारब्धं गदितुं तदा ॥ १२६ ॥
आरामरक्षिका जाता मर्कट्यमलचेतसः । सुराया रक्षका शौण्डा सम्प्रयोजनकारिणः ॥ १२७ ॥
भृत्या भवन्त्यसञ्चारा समस्तवसुधातले । प्रनष्टं मूलतः कार्यं नष्टमेव विशुद्धया ॥ १२८ ॥
नगरे पाटलीपुत्रे सुभद्रो नाम भूपतिः । नरेण केनचित् पृष्टः कार्यमेतत् कुतूहलात् ॥ १२९ ॥
यथाऽऽरामः सुरायानां नताशेषमहीपतिः । पृथिव्यां कः प्रकर्तव्यो रक्षपालो नराधिप ॥ १३० ॥
आराममभिरक्षन्ति मर्कट्यो यदि सर्वदा । सुराभाण्डं च कल्पालाः छेदिकाः शूकरास्तथा ॥ १३१ ॥
ततोऽस्माभिः स्फुटं कार्यं समस्तमपि भूतले । विनष्टमथ गन्तव्यं रक्षपालकदम्बकैः ॥ १३२ ॥
सप्तमे च दिने जाते तदानीं दण्डपाशिकः । कथानकमिदं भूयो भूपस्य निजगाद सः ॥ १३३ ॥
विनष्टो भूरुहो पक्षी यस्त्वेष हि तत्तरुः । मातुर्वर्णारिभूते च दृष्ट्वा यम जगौ पटुः ॥ १३४ ॥
अस्ति नित्योत्सवा रम्या श्रीमदुज्जयिनी पुरी । सार्थवाहोऽत्र शुद्धात्मा यशोभद्रो महाधनः ॥१३५॥
स्वजनन्या समं सोऽपि गृहीत्वा निजवल्लभाम् । श्रीमदुज्जयिनीतोऽयं सार्थेन सह निर्ययौ ॥१३६॥
भूयोऽपि स पदं प्राप्तो यशोभद्रो निशामुखे । स्वमातुरुत्तरीयं च वृक्षस्यैकस्य मूलके ॥ १३७ ॥
दृष्ट्वेदं स पुनः प्राह निजकान्तां पुरःस्थिताम् । सेच्छया तिष्ठतात्रैव कोपप्रेरितलोचना ॥१३८॥
आख्यानकमिदं प्रोक्तं तलारविनिवेदितम् । रुष्टो जगाद तं राजा भृकुटीभीषणाननः ॥ १३९ ॥
दिनानि द्वादशार्धानि व्यतिक्रान्तान्यशोभने । कथानकैरिदानीं च वर्तते सप्तमं दिनम् ॥१४०॥
तेन दुष्टतलार त्वं चौरमानय मत्पुरः । अन्यथा निग्रहं तेऽद्य करिष्यामि न संशयः ॥ १४१ ॥
इत्थं तद्वचनं श्रुत्वा सुराजपुरतो हि सः । मन्त्रिसामन्तपुत्राणां मिलितानां समान्तरे ॥ १४२ ॥
श्वशुरः सहसा मुक्त्वा तदानीं रत्नपादुके । नष्टौ यज्ञोपवीतं च ममायेति समानयम् ॥ १४३ ॥
यत्र राजा स्वयं चौरः समन्त्री सपुरोहितः । वनं भजत सर्वेऽपि जातं शरणतो भयम् ॥ १४४ ॥
आरक्षकवचः श्रुत्वा सलज्जो भूपः सभे । सुयोधनो नृपोऽन्यायी धूम्रमन्त्री पुरोहितः ॥ १४५ ॥
ततः समस्तसामन्तैर्युवराजेन वेगतः । अर्धचन्द्रं गले दत्त्वा स्वदेशादपसारितः ॥ १४६ ॥
ततः सचिवसामन्ततद्वर्गादिपूजितः । चकार विपुलं राज्यं युवराजः स तत्पुरे ॥ १४७ ॥
अनेन कारणेनार्य मर्यादालङ्घनं तव । कर्तुं न युज्यते गन्तुं महिलामध्यमध्वरम् ॥ १४८ ॥
श्रुत्वा तद्भारतीं राजा सविषिद्धोऽपि संयमी । भुङ्क्ते न योषितां मध्ये यदि मन्तुं मनागपि ॥१४९॥
किन्तु पत्तनमध्ये च जनमनोनयनप्रियम् । तदहं प्राप्य पश्यामि रूपातिशयधारिणम् ॥ १५० ॥
भूयो मन्त्रिपदं प्राप्य तत्समं निर्ययौ गृहात् । प्राप्तौ पत्तनमध्यं तौ नानातिशयसुन्दरम् ॥१५१॥
ततो रूप्यखुरश्चौरो नाम्ना स्वर्णखुरस्तथा । ताभ्यामग्रेसरो भाति मन्दं मन्दं स्वलीलया ॥१५२॥
कौतुकानि विचित्राणि पश्यन्तौ प्रीतमानसौ । तस्यानुमार्गतस्तौ च गच्छन्तौ विस्मयाकुलौ ॥१५३॥
भक्तिवेश्मपरिर्मुक्तप्राकारान्तस्थितौ वने । सुवर्णखुरनामायं तस्करः स्वस्त्रियां तदा ॥ १५४ ॥
तन्मार्गानुगतौ धीरौ राजा समुदितोदयः । तस्थौ तत्तरुमूले च सुगुप्तोऽपि निश्चलः ॥ १५५ ॥
यथोपचारसंयुक्तः श्रेष्ठी मुदितमानसः । पुरः स्थिता महारूपा जगाद स्वप्रियाः प्रियाः ॥ १५६ ॥
योषितः शिवरात्र्यां कार्तिकस्य पुरोद्भवा । प्रययुः कौमुदीं रन्तुं वने नन्दनसंनिभे ॥ १५७ ॥

---

1 [दृष्टे]. 2 [गुरुत्वा]. 3 पफ-ज विनि- कुक्षम्. 4 पफ गुम्मम्, ज गुम्मम्. 5 पप ज गुम्मम्. 6 पप गुम्मम्, ज गुम्मम्. 7 [पनिसरं].

वयं सहस्रकूटाख्यं जिनायतनमुत्तमम् । भवतीभिः समं याम पुण्योपार्जनकारणात् ॥ १५८ ॥[1]
इत्थं श्रेष्ठिवचः श्रुत्वा भक्तिहृष्टतनूरुहा । तदानीं श्रेष्ठिनः प्रोचुर्विस्मयव्याप्तमानसाः ॥ १५९ ॥
त्वरितं वन्दितुं यामो जिनान् जितभयद्विपः । सर्वपापपरित्यक्ता भवामो येन वल्लभ ॥ १६० ॥[2]
तद्वाक्यतः पुनः श्रेष्ठी भार्याऽष्टकसमन्वितः । तोषपूरितचेतस्को ययौ जिनवरालयम् ॥ १६१ ॥
जिनेश्वरस्तुतिं कृत्वा संसारोच्छेदकारिणीम् । भार्याः पुरःस्थिताः श्रेष्ठी पप्रच्छेति कुतूहली ॥१६२॥
भवतीनां कुतो हेतोः सम्यक्त्वं दृढतां गतम् । निवेदयत मे शीघ्रं जातं सुष्ठु कुतूहलम् ॥१६३॥
श्रेष्ठिवाक्यं समाकर्ण्य प्रोचुस्ता वचनं तदा । दृष्टिस्त्वया कथं प्राप्ता त्वं नाथ प्रथमं वद ॥१६४॥
परिपाट्या पुनः पश्चाद् वयं सर्वाः कुतूहलात् । भवतां कथयिष्यामः सम्यक्त्वस्थिरकारणम् ॥१६५॥
निशम्य वाचिकं तासां शोभनं प्रीतमानसः । श्रेष्ठी चचाल शुद्धात्मा सम्यक्त्वस्थिरकारणम् ॥१६६॥
क्षणं चित्तसमाधानं विधाय परमादृतः । तत्र श्लोकानिमान् भव्यानाकर्णयत सुप्रियाः ॥१६७॥
राजोदितोदयो नाम मथुरायां महाबलः । मन्त्री सुबुद्धिरस्यासीत्सुबुद्धिर्बुधसंमतः ॥ १६८ ॥
सुवर्णखुरनामाथ तस्करः सिद्धविद्यकः । कौमुदीजनसंघात पश्यतीमं तदन्वितः ॥ १६९ ॥
शूलाहते हि वेताले वासीत्स्वमलीमसा । पृथिवीरात्रिमध्ये च फले वास्यैव संमता ॥ १७० ॥
मथुरा नगरी रम्या पुरं राजगृहं परम् । हस्तिनागपुरं चैव कौशाम्बी नगरी तथा ॥ १७१ ॥
वाराणसी पुरी चम्पा श्रीमदुज्जयिनी परा । तथाऽन्या सुपकौशाम्बी धनधान्यजनाढ्या ॥१७२॥
जिनदत्तो वणिग्भार्यो जिनदत्ता च तत्प्रिया । सौम्यः सौम्यशरीराभाः[3] सोमश्रीरस्य गेहिनी ॥ १७३ ॥
तथा मुण्डितपश्रीः पद्मश्रीसमविभ्रमा । प्रियनन्दो महासत्त्वः सोमक्षमा जनप्रियः ॥ १७४ ॥
मित्रश्रीर्मित्रसदेवा खण्डश्रीरपि रूपिणी । विष्णुश्रीः शोभनाकारा नागश्रीनागिनीव सा ॥१७५॥
तथा पद्मलता भार्या कनकलतिका परा । मता विद्युल्लता कान्ता तथा विद्युल्लता परा ॥ १७६ ॥
सप्तश्लोकान् विधायार्यं सद्दृष्टिस्थिरकारणम् । जगौ मुक्तलतास्थानं स्वभार्याणां मनोहरम् ॥१७७॥
शूरसेनजनान्तेऽस्ति चोत्तरामथुरा पुरी । प्रमोदवाहनो राजा भार्या चास्य यशोमती ॥ १७८ ॥
तत्पुत्रोऽपि गुणाधारो बलवानुदितोदयः । महोदया प्रिया चास्य रूपराजितविग्रहा ॥ १७९ ॥
सुबुद्धिरस्य मन्त्री च तद्भार्या सुप्रभा प्रभा । तत्पुत्रोऽपि सुबुद्धिः स्याद् बुद्धिविज्ञानभावकः ॥१८०॥
तथा रूपखुरश्चौरो भार्या रूपखुराख्या सा । सुवर्णादिखुरः पुत्रस्तयोश्चौर्यपरायणः[4] ॥ १८१ ॥
अत्रैव नगरे रम्ये कनकादिसमन्विते । सिद्धाञ्जनादिसद्विद्यः चौरिकातः स जीवति ॥ १८२ ॥
यो हस्तिनगरे श्रेष्ठी जिनदत्तोऽभवद्धनी । तत्प्रिया जिनदत्ता च जिनभक्तिपरायणा ॥ १८३ ॥
अर्हद्दासः[5] सुतः श्रेयानर्नघोर्गुणशालिनो । सांप्रतं हि प्रवर्तेऽहं भवद्भार्याऽष्टकान्वितः ॥ १८४ ॥
तमस्थितमिदं नक्तं त्रयोऽपि तत्समस्थिताः । कौतुकव्याप्तचेतस्काः शृण्वन्ति प्रमुदान्विताः ॥१८५॥
अथ रूपखुरश्चौरो जीर्णचौरिकया पुरे । रन्त्वा[7] पूर्वं पुनर्याति सदा नृपमहानसम् ॥ १८६ ॥
लोचनद्वयमञ्जित्वा कज्जलेन निशं पुनः । नरेन्द्रेण समं सोऽपि भोजनं कुरुते सदा ॥ १८७ ॥
नरेन्द्रेण समं तस्य भुञ्जानस्य दिने दिने । बभूव दुर्बलो राजा स्वस्थिचर्मावशेषतः ॥ १८८ ॥
प्रसन्नदुर्बलं दृष्ट्वा नरेन्द्रं सचिवादयः । मायाविनं परिज्ञाय तदुपायं प्रचक्रिरे ॥ १८९ ॥
भूपभोजनवेलायां त्रिसन्ध्यायां प्रयत्नतः । विकीर्णार्कप्रसूनानि नृपभोजनमण्डपे ॥ १९० ॥
भूयः कटुकधूमेन मण्डकानि बहून्यपि । सञ्जसान् पुरुषान् मन्त्री स्थापयामास दिक्षु सः ॥१९१॥[9]

1 चफ युग्मम्, ज युग्मम्. 2 चफ युग्मम्, ज युग्मम्. 3 च [illegible] 4 फज °र्थपरायम-. 5 चफज कुलकम्. 6 [वेतचारक:]. 7 चफ भ्रान्त्वा. 8 फ पुरा. 9 चफ कुलकम्, ज युग्मम्.

तदार्द्रपुष्पसम्पन्देन विविदुस्त तस्मिन्मुषम् । गच्छन्तं नृपसामीप्यमरं मोचनवाञ्छया ॥ १९२ ॥
तत्राम्बकानि सर्वाणि नरपेकेन वेगतः । उत्पाटितानि धूमोऽपि निस्सरं प्राप्य[1] तद्गृहे ॥ १९३ ॥
धनेश्वनरस्य तेन धूमेन च कदर्थितम् । पतन्निरन्ध्रभूमिः शीघ्रं कण्ठे विलग्य गतम् ॥ १९४ ॥
कण्ठे विलग्ने याते तस्करः प्रकटोऽभवत् । गृहीतोऽयं नैरराष्ट्र तदानीं नृपसंमतैः ॥ १९५ ॥
प्राप्यहूत्य तर्कं कोपाधीता नमस्तो यदि । नरे रूप्यखुरः शीघ्रं शूलिकायां निधापितः ॥१९६॥
एवं कृते तत्र चौरे नराः प्रच्छन्नविग्रहाः । तस्थुर्नरेन्द्रवाक्येन दिक्षु सर्वासु सायुधाः ॥ १९७ ॥
योऽनेन सह संभाषं करिष्यति नरो पली । नूनं गृहीतसर्वस्वः स दण्ड्यो मे भविष्यति ॥१९८॥
अत्रान्तरे जिनं नत्वा मुनीश्च बहुभक्तितः । धर्माख्यानमतः श्रुत्वा जिनदत्तो दिनानने ॥ १९९ ॥
आगच्छन् स्वगृहं दृष्टः शूलस्थेन च दस्युना । दृष्टो रूप्यखुरेणायं विह्वलीभूतचेतसा ॥ २०० ॥[2]
श्रावकस्त्वमसि ख्यातो दयावान् सर्वजन्तुषु । समस्तभुवनव्यापिकीर्तिर्व्याप्तदिगन्तरः[3] ॥ २०१ ॥
जल पायय मां भद्र तृष्णाव्याकुलमानसम् । एवमुक्तोऽमुना श्रेष्ठी तदानीं महतीमिच्छया ॥२ २॥[4]
श्रुत्वा तद्वचनं तस्य तत्क्षणं प्राप्य तं तदा । जगौ कण्ठगतप्राणं जिनदत्तः कृपाऽऽर्द्रधीः ॥२०३॥
मया द्वादशभिर्वर्षैर्मन्त्रो लब्धः प्रयत्नतः । सोऽधुना विस्मृतिं याति त्वत्सम्भाषणतो मम ॥ २०४ ॥
यावत्त्वमहं शीघ्रमानयामि कृते तव । तावन्मन्त्रमिमं वत्स त्वं घोषय भवच्छिदम् ॥ २०५ ॥
श्रुत्वा तद्वचनं चौरो जिनदत्तं जगौ पुनः । दत्त्वा मे क्रमशः मन्त्रं गच्छ त्वं सलिलं प्रति ॥२०६॥
ततः पञ्चनमस्कारो दत्तोऽस्मै श्रेष्ठिना तदा । गृहीतो भक्तितः सोऽपि मस्तकन्यस्तपाणिना ॥२ ७॥
ध्यायन् पञ्चनमस्कारं जिनदत्तसमर्पितम् । समाधिं प्राप्य सौधर्मं प्राप चौरः सुभक्तितः ॥२ ८॥
जिनदत्तोऽपि पानीयं गृहीत्वा याव आगतः । मृतं तं यावदायाति व्यसुं तावदपश्यत ॥ २०९ ॥
न्यस्तं विलोक्य च श्रेष्ठी तत्कटे करकुम्भकम् । नाकं प्राप्तमिमं ज्ञात्वा सोपवासो गृहं ययौ ॥२१०॥
समाधिगुप्तनामाऽभूदाचार्यः तपसंयुतः । शान्तिकादिगुहायां च तदा संस्थितो सुधीः ॥ २११ ॥
अत्रान्तरे नैररस्य जिनदत्तो निवेदितः । वदन् रूप्यखुरेणामा दृष्टोऽस्माभिर्नरेश्वर ॥ २१२ ॥
तदाकर्ण्य समं प्राप्य नृपती रक्तलोचनः । तद्वधने धनादाने चादिदेश नरान्परम् ॥ २१३ ॥
नरेन्द्राज्ञां समादाय देवलेपाभिवशः क्षणात् । नृपान्तिको भय भीमा निर्गमुस्तद्गृहं प्रति ॥ २१४ ॥
उपसर्गं परिज्ञाय जिनदत्तस्य मत्कृते । अवधिज्ञानतः प्राप चौरदेवस्तदान्तिकम् ॥ २१५ ॥
वेतालरूपमादाय भीषिताशेषजन्तुकम् । जिनदत्तगृहद्वारे तस्थौ चोरसुरस्तदा ॥ २१६ ॥
विलोक्य नृपभामान्तं महाभटपुरस्सरम् । तत्सन्मुखमभीयाय सुरो रूप्यखुरः पुरा ॥ २१७ ॥
तथान्तकं पुरो दृष्ट्वा सुरं लकुटपाणिकम् । ननाश नृपतिः शीघ्रं मरणाशङ्किमानसः ॥ २१८ ॥
सन्मार्गतः सुरो भीमः खनानापूरिताम्बरः । ददर्श तरां सन्धे दण्डहस्तः प्रधावति ॥ २१९ ॥
रेरे शठ दुराचार[5] घोर पापिष्ठ कातर । जीवन् यासि दुर्बुद्धे दण्डेन क्षपयामि[6] ते ॥ २२ ॥
भयं तं भीतितो राजा सहसा सन्निरोरुहः । मुनिमण्डितसान्निध्यां शान्तिकादिगुहां ययौ ॥२२१॥
श्रेष्ठिन् मां पाहि पापार्तं निमज्जन् वचनं तिलम् । भयवेपितसर्वाङ्गः स्थितोऽयं तत्समीपके ॥२२२॥
देवोऽपि तदनु प्राप्य महाभटसुरविग्रहः । जिनदत्तं जगादेति कोपलोहितलोचनः ॥ २२३ ॥
इमं दुष्टं दुराचार किं रक्षसि निष्कारणम् । एतस्य निग्रहं स्वेन करोमि कुरु मोचनम् ॥ २२४ ॥[7]
देववाक्यं समाकर्ण्य जिनदत्तो जगाद तम् । भवताऽऽगतमेतस्य क्षन्तव्यं सुरिव सकः ॥ २२५ ॥

1 [प्राप्य]. 2 पफ कुम्भम्, ज कुम्भम्. 3 फ कीर्तिविच° 4 पफ कुम्भम्, ज कुम्भम्. 5 फ दुराचार. 6 [क्षपयामि]. 7 पफ कुम्भम्, ज कुम्भम्.

ततस्तद्वाक्यमाकर्ण्य त्रिः परीत्य प्रणम्य तम् । चौरदेवः पुनः प्राह त्वं गुरुः परमो मम ॥ २२६ ॥
आचार्यं साधुसंघं च प्रणम्य पुनरादरात् । श्रेष्ठिपार्श्वं परिप्राप्य तस्थौ चौरसुरो मुदा ॥ २२७ ॥
दस्युदेवं पुरो वीक्ष्य भूपतिर्मुनिसंसदि । अगाद् विस्मितस्वान्तः प्रमाभासुरविग्रहम् ॥ २२८ ॥
भवतां स्वर्गलोकेऽपि किं विनयो हीदृशो बुध । येन साधुगणं हित्वा श्रावकं वन्दसे तराम् ॥ २२९ ॥[1]
नरेन्द्रवचनं श्रुत्वा चौरदेवो बभाण तम् । कौतुकव्याप्तचेतस्कः गुरुभक्तिपरायणः ॥ २३० ॥
विनयं वेत्सि राजेन्द्र विपश्चिज्जनसंमतम् । पूर्वं विधीयते नूनं जिनसाधुनमस्कृतिः ॥ २३१ ॥
मूलगुणव्रतानां च शिक्षाणुव्रतधारिणाम् । श्रावकाणां पुना राजन्निच्छाकारो विधीयते ॥ २३२ ॥
किं पुनर्जिनदत्तोऽयं श्रेष्ठी मम गुरुः सुहृत् । तेन पूर्वं नमस्कारो मयाऽस्य विहितो मुदा ॥२३३॥[2]
देवस्य वचनं श्रुत्वा जगादैवं नराधिपः । कथं गुरुरयं तेऽत्र कथय त्वं ममाधुना ॥ २३४ ॥
अथापि भूपतिर्भूयो देवेन सुदृशीयुषा । विस्मयव्याप्तचेतस्कः सर्वसत्त्वहितान्तिके ॥ २३५ ॥
अहं रूप्यखुरश्चौरो जिनदत्तो वणिक्पतिः । कुलक्षेप त्वया लब्धः शूलिकायां निवारितः ॥२३६॥
दत्तः पञ्चनमस्कारो मेऽमुना श्रेष्ठिना परः । तस्योपदेशतो राजन् जातो देवोऽहमीदृशः ॥२३७॥
अनेन कारणेनार्य जिनदत्तो गुरुर्मम । हित्वा मुनिगणं भूप मयाऽस्य विहितस्तराम् ॥ २३८ ॥[4]
गीर्वाणवाक्यमाकर्ण्य राजा जातकुतूहलः । बभूव प्रीतचेतस्कः प्रफुल्लवरलोचनः ॥ २३९ ॥
पूजां विधाय भूयोऽपि भक्तिस्तबकसंस्तवैः । जिनदत्तस्य देवोऽयं तस्थौ मुदितमानसः ॥ २४० ॥
दृष्ट्वाऽऽश्चर्यमिदं सारं नृपमन्त्रिपुरोहिताः । स्वपुत्रेभ्यः श्रियं दत्त्वा दीक्षां दैगम्बरीं दधुः ॥२४१॥
केचित् सम्यक्त्वमादाय श्रावकत्वं तथा परे । अन्ये भव्यसतां प्राप्य शर्मेसुर्जिनशासनम् ॥२४२॥
सम्यक्त्वं प्राप्य देवोऽपि मुनिसंघं प्रणम्य च । जिनदत्तं पुनः प्राह विन्यस्य करकुड्मलम् ॥२४३॥
भवत्प्रसादप्रसादेन जैनो धर्मो मया परः । लब्धोऽतः कृतकृत्योऽहं पुण्यवानस्मि साम्प्रतम् ॥२४४॥
भूयो भूयो नतिं कृत्वा जिनदत्तस्य भक्तितः । सौधर्मं प्राप्य देवोऽसौ स्वस्थश्रेष्ठिगुणान्तरः ॥२४५॥[5]
जिनदत्तसुतोऽन्वोचत् स्वकान्ताः पुरतः स्थिताः । आश्चर्यमिदमाकर्ण्य जातोऽहं दृढदर्शनः ॥२४६॥
श्रेष्ठिवाक्यमुपश्रुत्य श्रेष्ठिन्यो निगदन्त्यमूः । लक्ष्मापितमिदं सुष्ठु श्रुतमस्माभिरादरात् ॥ २४७ ॥
भद्दानं रोचनं साधुसर्वनं भत्सय तथा । भवद्वाक्यस्य भो श्रेष्ठिन् वयं कुर्मो दिवानिशम् ॥२४८॥
तवः कुन्दलता प्राह तद्वचो विनिशम्य सा । न सुष्ठु श्रुतमस्माभिर्न सुष्ठु कथितं त्वया ॥२४९॥
न सुष्ठु भाषितं किंचिन्नापि सुष्ठु विलोकितम् । न भवामि किंचिच्च न प्रत्येमि मनागपि ॥२५०॥
कस्यापि रोचनं नापि वस्त्वितस्य करोम्यहम् । स्पृशामि न कश्चिन्मुग्धा मनोवाक्कायकर्मभिः ॥२५१॥[7]
श्रुत्वा कुन्दलतावाक्यं क्षणमूलभितो नृपः । रोषपूरितचेतस्को दध्यौ विस्मितमानसः ॥ २५२ ॥
दृष्टोऽतिविस्मयो ह्येष मयाऽपि जनको मम । राज्यं वितीर्य निर्ग्रन्थो बभूव भ्रमणो महान् ॥२५३॥
एषा कुन्दलता दुष्टा ब्रवीति मदविह्वला । न भवाम्यहं सत्य पूर्वोक्तवचनं मिथा ॥ २५४ ॥
आश्चर्यमिदमीदृक्षं श्रुतदृष्टानुभूतकम् । तथाऽपि दुर्विदग्धेयं न प्रत्येति मनागपि ॥ २५५ ॥
एतस्याः श्रेष्ठिभार्यायाः नितान्तं दुष्टचेतसः । निग्रहं श्वः करिष्यामि स्वयमेव विसंशयम् ॥२५६॥
मन्त्री स्वर्णखुरश्चौरो दध्यौ हृदि समाश्रितः । पश्य कुश्रेष्ठिनी चैषा न प्रत्येति वचः कथम् ॥२५७॥

॥ इति [8]श्रीरूप्यखुरस्वर्णखुरचौरवृत्तान्तर्गतदृष्टान्त
सयुक्तार्हद्दासकथानकमिदम् ॥ ११ ॥

---

1 पप कुम्मम्, ज कुमम्. 2 क पूर्वनमस्कारो. 3 पफज नमुक्कमम्. 4 पफज नमुक्कमम्. 5 पफ स्वात्ममोर्दे. 6 पफज भिभि: कुमम्. 7 पफज भिभि: कुमम्. 8 ज omits श्रीमी.

६४ जिनदत्तमित्रश्रीकथानकम् ।

मित्रश्रीः श्रेष्ठिना[1] पृष्टा प्रथमा दयिता तदा । स्थिरतां तव सम्यक्त्वं संजातं केन हेतुना ॥ १ ॥
ततस्तद्वचनं श्रुत्वा मित्रश्रीः प्राह तं प्रति । कौतुकव्याप्तचेतस्कं श्रेष्ठिनं तन्मनःप्रिया ॥ २ ॥
मगधाख्यमहादेशे पुरे राजगृहे परे । नरशूरोऽभवद् राजा समलेखाऽस्य गेहिनी ॥ ३ ॥
तत्रैव नगरे श्रेष्ठी पार्श्वदासो धनान्वितः । बभूव जिनदत्ताऽस्य सुन्दरी सर्वसुन्दरी ॥ ४ ॥
तावुभौ दम्पती तत्र सुखसागरमध्यगौ । अन्योन्यप्रीतिसंपन्नौ तिष्ठतः स्म मुदाऽन्वितौ ॥ ५ ॥
ततो वन्ध्या सती सा च जिनदत्ता जगौ प्रियम् । अन्यां कन्यां गृहीष्व त्वं पुत्रसंतानकारणात् ॥ ६ ॥
पुत्रजन्म विना कान्त धर्मस्थानं विनश्यति । धर्मस्थाने विनष्टे हि सर्वं नष्टं भवेदिति ॥ ७ ॥
अस्मिन्नेव पुरे श्रेष्ठी जिनदासो धनप्रियः । तद्भार्या जिनदासी सा जिनदत्ता च तत्सुता ॥ ८ ॥
मिथ्यादृष्टिस्वरामस्य प्रिया बन्धुमती परा । कनकश्रीः सुता चासां कनकाभशरीरका[2] ॥ ९ ॥
तव कनिष्ठिका प्रख्या स्तुतिं च जिनदत्तया । कनकश्रीश्रुता यस्मात् सपत्नी भगिनी तदा ॥ १० ॥
क्षपणोपपदो दासस्तत्सुताह विधानतः । गृहे समर्पितं तस्याः सधनं श्रेष्ठिना सुता ॥ ११ ॥[3]
क्षपणोपपदो दासः श्रेष्ठिन्या जिनदत्तया । आस्ते धर्मविनोदेन सर्वदा जिनमन्दिरे ॥ १२ ॥
ततो मध्याह्नवेलायां विधाय वरभोजनम् । स्वगृहे धर्मपुण्यवत्तिष्ठतस्तौ जिनालये ॥ १३ ॥
कनकश्रीगृहं सर्वं कौटिल्यपरिवर्जिता । धनधान्यादिना सार्धं वृद्धिं नयति सर्वदा ॥ १४ ॥
अन्यदा तद्गृहं प्राप्य च बन्धुश्रीः स्नेहकारणात् । इदं संक्षेपतः पुत्रीं पप्रच्छ कनकश्रियम् ॥ १५ ॥
त्वत्पतिः स्नेहसंपन्नस्त्वया सार्धं स्वपित्यरम् । उचितं ते महास्नेहाद् गृहे मे सकलं सुखम् ॥ १६ ॥
जननीवचनमाकर्ण्य कनकश्रीस्तयोदिता । जगाद मातरं कृत्वा बाष्पविप्लुतलोचना ॥ १७ ॥
बुद्धिहीने खले वृद्धे सपत्नीतनयोपरि । मां प्रदाय पुनः प्राप्ते पथमार्गे[5] प्रपृच्छसि ॥ १८ ॥
विवाहदिवसे मुग्धा यथेन सह निश्चितम् । क्षणान्तरेऽपि कीदृशं पतिं जानामि नाम्बिके ॥ १९ ॥
गृहधर्मं विधायेदं दासीव वशवर्तिनी । एकाकिनीव शय्ये च[7] दुःखिनी शीर्णमञ्चके ॥ २० ॥
इमौ तौ दम्पती प्रीत्या स्थित्वा जिनचैत्यालये । गृहे मध्याह्नवेलायां आगत्य कुरुतोऽशनम् ॥ २१ ॥
तस्मिन्नेव गृहे भूयो भवनोन्मत्तमानसौ । तिष्ठतो लीलया तौ च ध्यानकर्मविधानतः ॥ २२ ॥
चाहं दैवसिकं कर्म विधाय सकलं पुनः । तिष्ठाम्येकाकिनी मातर्निन्दन्ती निजजीवितम् ॥ २३ ॥
दिने निशि सुखं भर्तुः पक्षे मासेऽपि मातृके । जानितं न मया जातु त्वत्प्रसादान्मनस्विनि ॥ २४ ॥
कनकश्रीवचः श्रुत्वा बन्धुश्रीर्निर्गताश्रुका । वञ्चिताऽसि सुते पापे दुष्टया जिनदत्तया ॥ २५ ॥
यथेदं मदितं पुत्रि मत्पुरो वचनं पुरा । तत्सुतां यत्कर्मां पश्य करिष्यामि क्षयमहम् ॥ २६ ॥
भर्तृसौख्यं परित्यज्य महाधर्मसमन्विता । आसामि रागनिर्मुक्ता जिनगेहे धनान्विता ॥ २७ ॥
अनेन च विधानेन त्वं दत्ताऽसि मया सुते । जिनदत्तापपायास्मै स्वदादेशविधायिने ॥ २८ ॥
जिनदत्तापतिं यावन्न त्यजामि तनूदरि । दिनानि कतिचिन्मुग्धे तिष्ठ तावत् स्वमन्दिरम् ॥ २९ ॥
तनयाश्वासनं कृत्वा क्रोधारुणनिरीक्षणा । बन्धुश्रीः क्रूरचेतस्का जगाम निजमन्दिरम् ॥ ३० ॥[9]
तत्र निजगृहं प्राप्य महाक्रोधसमन्विता । जिनदत्तावधं सा हि चिन्तयन्त्यवतिष्ठते ॥ ३१ ॥

---

1 पाठ श्रेष्ठिनी (?) 2 पाठ शरीरिका 3 No. 11 is given only in क. 4 अ सम्पादित. 5 पाठ मार्गे [पथे]. 6 पाठ बन्धकार्यं 7 [एकाकिनी ...]. 8 क ... 9 No. 30 is given only in क; ...

अन्यदा यमदूतो वा क्षुधा बन्धुमतीगृहम् । कापालिको भ्रमन् भिक्षां चण्डमारिः समाययौ ॥३२॥
पृथक्कारं ददात्तस्मै घृतपूरादिकं भृशम् । जिनदत्ताऽपकाराय बन्धुश्रीर्बन्धुनिःस्पृहा ॥ ३३ ॥
विदित्वा तदभिप्रायमुपचारकदम्बकैः । जगाद तामसौ धूर्तश्चण्डमारिः कल्मषः ॥ ३४ ॥
विषापहारौषधं योग्यं वशीकरणमुत्तमम् । उच्चाटनं च विद्वेषं स्तम्भनं मोहनाञ्जनम् ॥ ३५ ॥
एवमादीनि वस्तूनि सिद्धानि भुवनत्रये । नूनं जानाम्यहं भद्रे न कश्चिद्वेत्त्यमूनलम् ॥ ३६ ॥
यदि किंचिच्चिरं गूढं कार्यमुत्पद्यते तव । ततो ब्रूहि मम क्षिप्रं सर्वं संपादयाम्यहम् ॥ ३७ ॥[1]
कापालिकं वचः श्रुत्वा तं जगौ विकसन्मुखी । तव ज्ञानेन मे पुत्र न किंचिद्दुर्लभं भुवि ॥३८॥
प्रदत्ता सत्वरं साऽन्यस्मै जिनदत्ता मतेन मे । तद्भिया सुदुःखेन पुत्र तिष्ठति साऽधुना ॥ ३९ ॥
जिनदत्ताधृतिं पुत्र कुरु मारणेन सा । येनानुजा सुखं तेऽत्र तिष्ठति प्रीतमानसा ॥ ४० ॥[2]
श्रुत्वा बन्धुश्रियो वाक्यं जगौ कापालिकोऽपि ताम् । मारणं न कुले युक्तं भूषणं न च दूषणम् ॥४१॥
अहं कृष्णचतुर्दश्यां नक्तं वेतालविद्यकाम् । नूनं साधयितुं यामि पुष्पादीनि त्वमानय ॥ ४२ ॥
तदादिष्टदिने पुष्पधूपदीपादिकं तथा । आदाय तत्पुरः क्षिप्रं च भ्रमताऽतिवेगतः ॥ ४३ ॥
सोपवासः समादाय पुष्पधूपादिकं तदा । कापालिको जगामेदं भीमं पितृवनं निशि ॥ ४४ ॥
मनुष्यशवमादाय तस्करे संनिधाय च । वेतालविद्यकां[4] तत्र तदानीं साधयत्यसौ ॥ ४५ ॥
ततो वेतालविद्या च खड्गमादाय भीषणम् । जगादेवं समादेशं देहि किं करवाणि ते ॥ ४६ ॥
वाक्यं वेतालविद्यायाश्चण्डमारिर्निशम्य ताम् । कापालिकः श्मशानस्थो जगाद पुरतः स्थिताम् ॥४७॥
चैत्यवेश्मस्थितां शीघ्रं जिनदत्तां कृतागसाम् । वेतालरूपमहाविद्ये त्वं मारय मदुक्तितः ॥ ४८ ॥
ततस्तद्वचनात् सा च खड्गहस्ता भयानका । गर्जन्ती भीषणारावं चैत्यवेश्मबहिःस्थिता ॥ ४९ ॥
तस्यां कृष्णचतुर्दश्यां सोपवासा जिनान्तिके । तदाऽभीतचेतस्का कायोत्सर्गेण संस्थिता ॥ ५० ॥
ततो वेतालविद्याऽपि चैत्यान्तर्गन्तुमक्षमा । भूयः कापालिकान्तं च जगाम विगतक्रिया ॥ ५१ ॥
भूयोऽपि साधिता तेन द्वितीयसमये सका । सखड्गा प्रेरिता तस्मात् तदन्तं प्रेषिता पुनः ॥५२॥
तेनैव विधिना भूयो जिनान्तं यातुमक्षमा । निवृत्ता साऽपि वेगेन तदन्तं प्राप्य विह्वला ॥५३॥
भूयोऽपि साधिता तेन तृतीयसमये सका । उत्थिता खड्गमादाय तत्समीपं विसर्जिता ॥ ५४ ॥
जिनेश्वरसमीपं सा प्रयातुमसहा सती । चण्डमारिसमीपं च प्राप शक्तिपरिच्युता ॥ ५५ ॥
चतुर्थसमये तेन साधिताऽतिसमन्विता । कापालिकेन सा विद्या प्रोक्ता स्वपुरतः स्थिता ॥ ५६ ॥
दुराचारां द्वयोर्मध्ये निहत्य सहसा पुनः । आगच्छ मत्समीपं च कृतकृत्यत्वमागता ॥ ५७ ॥
पुनर्वेतालविद्या च सुतां तां कनकश्रियम् । हत्वा जगाम सा क्षिप्रं कापालिकसमीपताम् ॥ ५८ ॥
ततः कापालिको दृष्ट्वा कृपाणं रुधिरारुणम् । कृतकृत्यो जगामाशु स्वकीयस्थानमादरात् ॥ ५९ ॥
ततः प्रभातकाले च बन्धुश्रीस्तोपमागता । जिनदत्ता हताऽनेन जामातुर्गृहमाययौ ॥ ६० ॥
माता दृष्ट्वा सुतां तत्र जीवेन परिवर्जिताम् । बाष्पविप्लुतनेत्राऽसौ जगादेति वचस्तदा ॥ ६१ ॥
मदीया तनया ह्येषा निहता जिनदत्तया । किंवदन्ती नृपस्यैषा तयाऽऽशु विनिवेदिता ॥ ६२ ॥
श्रुत्वा तद्वचनं राजा कोपप्रेरितलोचनः । जगाद मातुराकारो वचसा स्वान् नरानरम् ॥ ६३ ॥
जिनदत्तापतिं बद्ध्वा समस्तधनसंयुतम् । मदभ्याशं पुनः क्षिप्रं समानयत सज्जनाः ॥ ६४ ॥
तदाज्ञां प्राप्य निर्गत्य प्राप्तास्ते श्रेष्ठिमन्दिरम् । चकार स्तम्भनं तेषां तदा शासनदेवता ॥ ६५ ॥

---

1 पफ भाण्डकम्, ज भाण्डकम्, 2 पफज शिक्षम्, 3 पफ वैतालि° 4 [वैताल]. 5 पफ भयानिका. 6 पफ कुसुमम्, ज कुसुमम्.

जिनदत्तापयोऽप्यत्र तदा चैत्यगृहे मुदा । कायोत्सर्गेण संतस्थौ चोपसर्गप्रशान्तये ॥ ६६ ॥
अथ कापालिकं वञ्चु मठस्थं पुरदेवता । भूपालमन्दिरद्वारमानयामास दुर्मदम् ॥ ६७ ॥
पुरमध्यस्थितो दीनं विह्वलीभूतमानस[1] । स्वपन्नसेननामासौ[2] पूत्कारं विदधाति सः ॥ ६८ ॥
अहो महाजन क्षिप्रं निर्दोषस्य वचो मम । तथा निरपराधस्य भूयतामेकचित्तत[3] ॥ ६९ ॥
बन्धुश्रीवाक्यतो नूनं विद्या वैताडिका मया । जिनदत्तावधार्थं च साधिता पुरतःस्थिता ॥ ७० ॥
मया वैताडिकी विद्या जिनदत्तावधाय सा । वारत्रयं समादिश्य प्रेषिता परमोदया ॥ ७१ ॥
जिनदत्तावधाशक्ता समागत्य मदन्तिकम् । भूयो मया प्रयत्नेन भाषितेयं पुनः पुनः ॥ ७२ ॥
दुष्टा या च द्वयोर्मध्ये सत्यपरिवर्जिता । तां निहत्य मदादेशात्त्वागच्छाशु मदन्तिकम् ॥ ७३ ॥
इदमाकर्ण्य मुक्तेयं मया तद्वधकारणात् । भूयो मदन्तिकं प्राप निहत्य कनकश्रियम् ॥ ७४ ॥
एवंविधं वचः सोऽयं तदा देवतया तया । चक्रमीति पुरस्तान्ते भाषमाणः पुनः पुनः ॥ ७५ ॥
तथा बन्धुमती पापा मुद्गरघातसहस्रकैः । हन्यमाना प्रजल्पन्ती चक्रमीति पुरान्तरे ॥ ७६ ॥
भो भो महाजनाः स्पष्टं भूयतां मद्वचोऽधुना । दोषो न जिनदत्ताया मम दोषोऽयमीदृशः ॥७७॥
मया कापालिकः क्षिप्रं प्रेरितो मन्दभाग्यया । विद्याबलेन केनापि जिनदत्तावधं कुरु ॥ ७८ ॥
वेतालविद्यया लोके कापालिकविसृष्टया । मत्सुता निहता नूनं कनकश्री[4] प्रियंवदा ॥ ७९ ॥
प्रभाते स्वसुतां दृष्ट्वा स्वगृहे मृतिमागताम् । दत्तं हि जिनदत्ताया मयाऽभ्याख्यानमीदृशम् ॥८०॥
जिनदत्ता सपुण्येन रक्षिता दोषवर्जिता । वेतालविद्यया तत्र धर्मसारविमुक्तया ॥ ८१ ॥[5]
तयोर्निश्चरितं श्रुत्वा राज्ञा जनचयेन च । नागरैरपि विज्ञाता जिनदत्ताऽतिशोभना ॥ ८२ ॥
ततो नगरदेवीभिर्महाविभवसंपदा । पूजिता जिनदत्ताऽसौ शीलालंकृतविग्रहा ॥ ८३ ॥
तदाश्चर्यमिदं दृष्ट्वा बहवो नरकुञ्जराः । प्रापुर्जैनेश्वरं[6] धर्मं जिनभक्तिपरायणाः ॥ ८४ ॥
नरपालो नृपो मन्त्री पुरोहितनृपात्मजाः । समाधिगुप्तमानम्य दीक्षां दैगम्बरीं दधुः ॥ ८५ ॥
समाधिगुप्तनामस्य जिनदत्ता विशुद्धधीः । जिनमत्यार्यिकापार्श्वे दधौ जैनेश्वरं तपः ॥ ८६ ॥
दृष्ट्वाऽतिविस्मयमीदृशं जिनदत्तासमुद्भवम् । जातं स्थिरं सुसम्यक्त्वं श्रेष्ठिन् मित्रश्रियो मम ॥ ८७ ॥
श्रुत्वा तद्वचनं तत्र सम्यक्त्वप्रमुखा परम् । श्रेष्ठिभार्या वदन्तीमं धर्मचिन्तासमुत्सुकम्[7] ॥ ८८ ॥
सुष्ठु दृष्टं तथा सुष्ठु कथितं परमार्थतः । श्रद्धानं प्रत्ययं कुर्वे रोचनं स्पर्शनं परम् ॥ ८९ ॥
श्रेष्ठिभार्यावचः श्रुत्वा तथा कुन्दलता परा । लघीयसी वराकैषा जिनधर्मपराङ्मुखा ॥ ९० ॥
दृष्टं न सुष्ठु सुष्ठ्वापि न सुष्ठु कथितं त्वयि । श्रद्दधामि न भावेन न प्रत्येमि प्रभाषितम् ॥ ९१ ॥
नाहं करोमि भावेन भवदुक्तस्य रोचनम् । स्पर्शनं च तथा नूनं सतीभूतस्य मुकुले ॥ ९२ ॥
आकर्ण्य तद्वचो राजा दध्यौ कोपारुणेक्षण । अमुष्या निग्रहं स्वेन प्रातः करिष्यामि निश्चितम् ॥९३॥

॥ इति[8] श्रीवेतालविद्यानिर्भयजिनदत्ताविषयश्रीमत्सम्यक्त्व
रोपणद्वितीयकथानकमिदम् ॥ ५४ ॥



1 पफञ मुक्तम्. 2 ञ महाजन 3 पफञ पठितः मुक्तम्. 4 पफ प्रापुर्जैनेश्वरं. 5 फ मत्सुपो पर. 6 ञ तदा. 7 पफ सुष्ठम् ञ सुष्ठम्. 8 ञ omits इति श्री.

६५ खण्डश्रीकथानकम् ।

खण्डश्री श्रेष्ठिनी पृष्टा श्रेष्ठिना केन हेतुना । सम्यक्त्वं ते स्थिरं जातं कथयाशु मम प्रिये ॥ १ ॥
श्रेष्ठिनो वाक्यमाकर्ण्य स्थिरसम्यक्त्वशालिनः । जगाद श्रेष्ठिनी स्वस्य सम्यक्त्वस्थिरकारणम् ॥२॥
कुरुजाङ्गलदेशेऽस्ति हस्तिनागपुरं परम् । महीपालो नृपस्तत्र भार्या चास्य महीधरी ॥ ३ ॥
सोमदत्तो द्विजस्तत्र सोमिल्ला चास्य गेहिनी । सौम्याऽनयोः सुता जाता सौम्यभावा प्रियंवदा ॥४॥
अन्यदा सोमदत्तोऽपि महादारिद्र्यपीडितः । सोमिल्लामायतो जातो महावैराग्यसंयुतः ॥ ५ ॥
सुगुप्ताचार्यमासाद्य सोमदत्तो विशुद्धधीः । बभूव सौम्यया सार्धं श्रावकोऽणुव्रतान्वितः ॥ ६ ॥
अस्मिन्नेव पुरे श्रेष्ठी जिनदासो महाधनः । अनुपमोपपदा दासी तत्प्रिया दयिताऽभवत् ॥ ७ ॥
धर्मवात्सल्यतः सौम्या सोमदत्तोऽपि ब्राह्मणः । आनीतो जिनदासेन स्वगृहे स वितिष्ठते ॥ ८ ॥
अन्यदा सोमदत्तोऽपि ज्ञात्वाऽऽयुःक्षयमात्मनः । सुतां समर्पयामास जिनदासस्य धीमतः ॥ ९ ॥
सौम्यकन्या त्वयाऽवश्यं जिनदास जिनप्रिय । श्रावकाय प्रदातव्या जिनपादाम्बुजालिने ॥ १० ॥
बभूव सोमदत्तोऽयं सस्तरश्रमणो द्विजः । कृत्वा सल्लेखनां मृत्वा जातो नाके सुरोत्तमः ॥ ११ ॥
सौम्या सौम्यमतिस्तत्र जिनदासजिनालये । पूजां विदधती साध्वी तिष्ठति प्रीतमानसा ॥ १२ ॥
रूपं शीलं समालोक्य सौम्याया बहवो द्विजाः । याचन्ते तां स्वपुत्रेभ्यो भूयो भूयो मनस्विनीम् ॥१३॥
जिनदासोऽपि तां तेभ्यो न ददाति मनोहरीम् । मिथ्यादृष्टिकलङ्केन दूषितेभ्यो निरन्तरम् ॥१४॥
सुरूपाय सुशीलाय श्रावकाय सुधीमते । सुकुलीनाय दास्यामि तामहं चोपमाय स ॥ १५ ॥
एकोऽत्र विप्रः पुरे धूर्तः सप्तव्यसनभावितः । द्यूतकारैः समं द्यूतं रममाणो वितिष्ठते ॥ १६ ॥
अन्यदा द्यूतमभ्यासो रुद्रदत्तः स ब्राह्मणः । सौम्यां विलोक्य तां कन्यां द्यूतकारान् जगौ तदा ॥१७॥
रूपयौवनयुक्ताया कन्यायाः शुद्धचेतसः । एतस्याः प्रवरं शीघ्रं विधिना विदधाम्यहम् ॥१८॥
रुद्रदत्तवचः श्रुत्वा द्यूतकारा वदन्त्यमुम् । श्रावकेभ्यो ददात्येता नापरेभ्यो वणिक्पतिः ॥ १९ ॥
यो ददाति न साधुभ्यो ब्राह्मणेभ्यः पुनः पुनः । कन्यकां याचमानेभ्यो जिनदासो जिनप्रियः ॥२०॥
सप्तव्यसनयुक्ताय चौराय कलिकारणे । भवते द्यूतकाराय स किं यच्छति तामयम् ॥ २१ ॥
द्यूतकारवचः श्रुत्वा प्रतिज्ञां तत्पुरोऽकरोत् । अमुष्याः सौम्यकन्यायाः कर्तव्यं प्रवरं मया ॥२२॥
एवमुक्त्वा ततो देशाद्गत्वा कापटिकः पुनः । रुद्रदत्तो जगामाशु देशमन्यं तदाश्रये ॥ २३ ॥
अन्यदेशं परिभ्रम्य मायया श्रेष्ठिनः परम् । कृत्वा हि क्षुल्लकं वेषं चैत्यगेहं विवेश सः ॥ २४ ॥
विलोक्य क्षुल्लकं श्रेष्ठी चैत्यगेहे व्यवस्थितम् । इच्छाकारं विधायास्य पप्रच्छेति स लोपतः ॥२५॥
कुतस्त्वमागतो देशाद्धर्मोल्लंकृतविग्रहः । क्षुल्लक ब्रूहि मे क्षिप्रमिदं संक्षेपतः स्फुटम् ॥ २६ ॥
श्रुत्वा तद्वचनं सोऽपि क्षुल्लको निजगावमुम् । पूर्वदेशात् समायातो महाश्रावक सांप्रतम् ॥२७॥
समस्तसिद्धधामानि सर्वचैत्यानि च क्रमात् । वन्दित्वा सिद्धभावेन भक्तिसंयुक्तमूर्तयः ॥ २८ ॥
शान्तिकुन्थ्वरतीर्थेशान् जन्मनिष्क्रमणानि च । चन्द्रनाथमिहायातस्त्वत्पुरं किं च विलोकितुम् ॥२९॥
श्रुत्वा तद्वचनं श्रेष्ठी तद्गुणाकृष्टमानसः । पूर्वाश्रमं स पप्रच्छ रुद्रदत्तं पुरःस्थितम् ॥ ३० ॥
आकर्ण्य वचनं तस्य श्रेष्ठिनः स जगाद तम् । अस्मिन्नेव पुरे श्रेष्ठिन् सोमशर्मास्त्यमाहनः ॥३१॥
तस्यापि सोमगोत्रस्य सोमशर्माऽस्ति ब्राह्मणी । तत्पुत्रोऽहं विनीतात्मा रुद्रदत्तो विशुद्धधीः ॥३२॥

---

1 क ग्गोपमाय. 2 ग प्रवर्णश्रिचिवाहम्. 3 पफज विदधामिदम्. 4 पफ चर्पिरिच. 5 पफ क्रुणम्, ज कुपम्म. 6 ज चाक्सोभिपम् 7 पफ कुणम्

तदभावे मया श्रेष्ठिन् लोकश्रीर्णानि गच्छता । जिनधर्मः परो लब्धो बन्धुः सर्वशरीरिणाम् ॥ ३३ ॥
जैने धर्मे परे लब्धे किं गोत्रेण धनेन वा । स्वजनैर्जनकेनापि ममैभिर्न प्रयोजनम् ॥ ३४ ॥
ब्रह्मचारी त्वहं भूत्वा व्रतशीलानि पालयन् । तिष्ठामि सर्वदा श्रेष्ठिन् कुर्वन् जिननमस्कृतिम् ॥ ३५ ॥[1]
रुद्रदत्तवचः श्रुत्वा कौतुकव्याप्तमानसः । जिनदासो जगावेवं धर्मे वाऽधनान्वितम्[2] ॥ ३६ ॥
किं त्वया क्षुल्लक स्वामिन् ब्रह्मचर्यमिदं धृतम् । सर्वकालं न वा ब्रूहि सांप्रतं मम निश्चितम् ॥ ३७ ॥[3]
जिनदासवचः श्रुत्वा क्षुल्लको जिनगाद तम् । ब्रह्मचर्यमिदं श्रेष्ठिन् सर्वकालं न मे धृतम् ॥ ३८ ॥
किं तु जैने मया लब्धे धर्मे जनहिते वराम् । मैथुनेन न मे कार्यं संसारार्णवकारिणा ॥ ३९ ॥
तथापि जिनदासेन रुद्रदत्तः कुतूहलात् । गृहीतं सर्वकालं नो ब्रह्मचर्यं यदि त्वया ॥ ४० ॥
विद्यते मद्गृहे कन्या मामकी रूपशालिनी । मिथ्यादर्शनयुक्तेभ्यो न दत्ता सा मया सती ॥ ४१ ॥
सम्यग्दर्शनयुक्तस्य श्रावकस्य ददामि ते । यदीच्छा विद्यते तस्यास्तत् पाणिग्रहं कुरु ॥ ४२ ॥
श्रेष्ठिवाक्यमुपाकर्ण्य[4] क्षुल्लकः प्राह तं पुनः । जिनधर्मं परिप्राप्य कर्मविशेषयोगतः ॥ ४३ ॥
गृहबन्धननिर्मुक्तः पुरुषो धर्मसंयुतः । भवपाशे पुनः को वा क्षिपति स्वं सचेतनः ॥ ४४ ॥
इत्थं निश्चलतस्तस्य वितीर्णा श्रेष्ठिना सुता । परिणीताऽमुना सौम्या रुद्रदत्तेन रूपिणी ॥ ४५ ॥
परिणीतदिने सोऽपि नवकङ्कणपाणिकः । व्रतभारान् परित्याज्य जगादैतान् हसन् मुदा ॥ ४६ ॥
प्रतिज्ञा भवतां मध्ये मया या विहिता तदा । साऽधुना सिद्धिमानीता सद्विवाहविधानतः ॥ ४७ ॥
द्यूतकारैः समं द्यूतं रममाणो दिवानिशम् । तिष्ठति प्रीतचेतस्को रुद्रदत्तः स धूर्तकः ॥ ४८ ॥
विद्यते तत्पुरे वृद्धा सुमित्रा गणिका तदा । तत्सुता रूपसंपन्ना परा कामलताभिधा ॥ ४९ ॥
रुद्रदत्तोऽन्यया सार्धं कामभोगान् मनोरमान् । पूर्ववत्तनया सार्धं भुञ्जानो व्यवतिष्ठते ॥ ५० ॥
परिणीताऽधमेनेन धूर्तेन मधुभाषिणा । व्रतशीलानि रक्षन्ती तस्थौ सौम्या स्वमन्दिरे ॥ ५१ ॥
धनेन पितृदत्तेन बहुना जिनमन्दिरम् । सहस्रकूटसंयुक्तं कारयामास सा तदा ॥ ५२ ॥
तत्प्रतिष्ठां विधायाशु तूर्यमङ्गलनिस्वनैः[5] । धन्यतां सकलं लोकं सा सौम्या समवापयत् ॥ ५३ ॥
रुद्रदत्तं सुमित्रां च तथा कामलतामपि । सौम्यैतेषां समस्तानां श्राध्य चक्रे निमन्त्रणम् ॥ ५४ ॥
पुष्पमालां कुटे[6] कृत्वा घटमेव यथाक्रमम् । जगत्त्रयाद्भुते शुक्ले दधिपूर्णोपवेष्टिता ॥ ५५ ॥
स्नानवस्त्रसंयुक्त रक्तोत्पलसमप्रभे । सुमित्रेयं समादाय ददौ कामलताकरे ॥ ५६ ॥
गृहीतचारुनेपथ्याः[7] पुष्पताम्बूलभोगिनः । रुद्रदत्तादयः[8] सर्वे ययुर्जिनवराश्रमम् ॥ ५७ ॥
सौम्यया सौम्यभावेन जिनभक्तिसमेतया । प्रहितः स कुटस्तत्र तदा कामलताकरम् ॥ ५८ ॥
उद्घाटने विधायास्य पुष्पमालां तदन्ततः । सौम्या करेण जग्राह पवर्गं च स्फुरत्प्रभम् ॥ ५९ ॥
मुक्ताफलसमानाक्षो श्वेतबिन्दोऽसितप्रभः । बभूव पुष्पमालाऽऽशु तत्करस्थः स पन्नगः ॥ ६० ॥
सुगन्धया तया चार्व्या दीर्घया पुष्पमालया । सौम्यया जिनपादाब्जमर्चितं भक्तियुक्तया ॥ ६१ ॥
सौम्याऽपि रुद्रदत्तादीन् प्राप्य या निजमन्दिरम् । भोजयित्वा विधानेन कनकहारेण चारुणा ॥ ६२ ॥
भोजनान्ते च ताम्बूलं दत्त्वा तेभ्यः सपाणिना । पुष्पमालां तकां सौम्या ददौ कामलताकरे ॥ ६३ ॥
यथा सा पुष्पमाला च गृहीता निजपाणिना । कृष्णसर्पो बभूवेयं तदा कामलताऽमुना ॥ ६४ ॥
दृष्ट्वा कामलता तत्र नागदृष्टिं[9] समाकुला । तत्करात् सर्पमादाय घटे चिक्षेप तं पुनः ॥ ६५ ॥

1 पफगब कुम्भम्. 2 ब जपधनामितम्-व्याधिरोगम्. 3 पफ कुम्भम् ब कुम्भम्. 4 पफ कुम्भम् ब कुम्भम्. 5 पफगब विष्कम्भितम्. 6 ब कुम्भके 7 पफ गृहीतचारु. 8 पफ कुम्भम् ब कुम्भम्. 9 पफ नागदर्शं.

विषव्याप्तसमस्ताङ्गी विह्वलीभूतमानसा । पपात निष्क्रिया वेगात् तदा कामलता भुवि ॥ ६६ ॥
ततः कामलतां दृष्ट्वा निश्चेष्टीभूतविग्रहाम् । वसुमित्रा जगौ लोकं बाष्पविप्लुतलोचना ॥ ६७ ॥
मत्सुता सौम्यया लोकाः सर्पभीमसरेण च । मृतिं नीता विना कार्यात् सर्पार्पणविधानतः ॥६८॥
ततस्तत्राक्रन्दत सौम्या दृष्ट्वा कामलतामिमाम् । नागदष्टां तमादाय घटं प्राप्य नृपान्तिकम् ॥६९॥
तद्वृत्तान्तं परिज्ञाय सौम्यां पप्रच्छ भूपतिः । किं कारणमियं प्राप मृतिं कामलता वद ॥ ७० ॥
भूपालवचनं श्रुत्वा जगौ सौम्याऽपि तं विभुम् । नाहं जानामि राजेन्द्र किंतु मद्भारतीं शृणु ॥७१॥
एताभ्यां घटमध्यस्था पुष्पमाला मनोहरा । आनीता भक्तितस्ताभिर्जिनाङ्घ्री पूजितौ मया ॥७२॥
जनन्या सह गच्छन्त्या स्वगृहं जिनमन्दिरात् । मयैका पुष्पमालाऽस्यै देवशेषा समर्पिता ॥७३॥
राजन् कामलतायै हि शेषा दत्ता मया यदि । वसुमित्रा वदत्येषा मत्सुता भक्षिताऽहिना ॥७४॥
दन्दशूकेन दष्टेयं मन्मतेन यदि स्फुटम् । वसुमित्रैव जानाति न किंचिद्वेद्म्यहं प्रभो ॥ ७५ ॥
हितं समस्तबन्धुभ्यो जिनधर्मं प्रजानती । एतस्य कर्मणो राजन् कारिणी न भवाम्यहम् ॥ ७६ ॥[1]
अत्रान्तरे फणी भीमो घटादादाय वेगतः । समास्थितस्य भूपस्य दर्शितो वसुमित्रया ॥ ७७ ॥
सौम्यामतेन भूपाल भीमेनानेन भोगिना । दष्टा मृतिं परिप्राप्ता मत्सुता धववल्लभा ॥ ७८ ॥
एवं निगद्य [2]मुक्तोऽहिर्नरेन्द्रपुरतोऽनया । कर्कशेन[3] हस्तेन गृहीतः सौम्यया लघु ॥ ७९ ॥
सर्पो गृहीतमात्रः सन् पञ्चवर्णसमुज्ज्वला । बभूव पुष्पमालेयं सौम्याहस्ते मनोहरे ॥ ८० ॥
गृहीता पुष्पमालेयं तदानीं वसुमित्रया । भीमो भुजगमो जातो भाषिताशेषबन्धुकः[4] ॥ ८१ ॥
सौम्यया स्वकरास्पृष्टा मन्दा कामलता तदा । विषवेगपरित्यक्ता समुत्तस्थौ समान्तरे ॥ ८२ ॥
दृष्ट्वाऽऽश्चर्यमिदं राजा वसुमित्रां पुरःस्थिताम् । सत्येन भाषितां कृत्वा पप्रच्छेति कुतूहली ॥८३॥
त्वयेदं चेष्टितं भद्रे कृतं वा यदि वाऽकृतम् । यथा स्वरूपतो जातं सत्यं वद यथायथम् ॥८४॥
भूपेन्द्रवचनं श्रुत्वा वसुमित्रा जगौ नृपम् । मया नीतो घटस्थोऽहिः सौम्यावधनिमित्ततः ॥८५॥
न भक्षिताऽमुना सौम्या धर्मेण परिरक्षिता । मत्सुता वल्गनं कृत्वा कोपतो भक्षिताऽहिना ॥८६॥[5]
अथ पत्तनदेवीभिर्दृष्ट्वाऽऽश्चर्यमिदं तदा । परं जय समुद्घुष्टं गगनस्थितमूर्तिभिः ॥ ८७ ॥
अहो शीलमहो सत्यमहो धैर्यमहो गुणः । जिनधर्मे परा भक्तिः सौम्यायाः शुद्धचेतसः ॥ ८८ ॥
इत्थमाभाष्य देवीभिर्नरेशस्य समाऽन्तरे । पातिता पुष्पवृष्टिश्च सौम्याया मस्तकोपरि ॥ ८९ ॥[6]
दृष्ट्वाऽतिशयमीदृक्षं स्वदृशो नरेश्वरः । जिनदासादयः सर्वे जिनधर्मपरायणाः ॥ ९० ॥
जीवितं चपलं ज्ञात्वा धनयौवनसंपदाम् । दीक्षां दैगम्बरीं धीरा धर्मसेनान्तिके दधुः ॥ ९१ ॥[7]
तथा नागरिका नार्यो वसुमित्राऽपि भक्तितः । परां श्रावकतां प्रापा नूनं कामलतादयः[9] ॥ ९२ ॥
खण्डश्रीः श्रेष्ठिनं ब्रूते समार्यापरिवारितम् । महाविस्मयसंपन्ना भक्तिप्रह्वतनूरुहा ॥ ९३ ॥
शीलसंघोषणं श्रुत्वा देवतापूजनं तथा । [8]पुष्पमालाऽमर्त्यधाहेर्भीषणाकृतिधारिणः ॥ ९४ ॥
जिनभक्तिसमेतायाः सौम्यायाः स्थिरचेतसः । दृष्ट्वा सम्यक्त्वमापन्ना स्थिरत्वं मम वल्लभ ॥९५॥[10]

॥ [11]इति श्रीसौम्याब्राह्मणीसमर्थनसहितखण्डश्रीरत्नसम्यक्त्वकारण तृतीयकथानकमिदम्[12] ॥ ९५ ॥

*

---

1 पफज लिखि: पुष्पम्. 2 पज मुक्तो हि भरेन्द्र. 3 [कर्कशेन]. 4 [भाषिताशेष°]. 5 पफ पुष्पम् ज पुष्पम्. 6 पफ पुष्पम् ज पुष्पम्. 7 पफज लिखि: पुष्पम्. 8 पफ पुष्पम् ज पुष्पम्. 9 [ऽमलतादै°]. 10 पफज लिखितमिदम्. 11 ज omits इतिश्री. 12 पफ add संपूर्णम्.

६६ विष्णुश्रीकथानकम् ।

विष्णुश्रीः श्रेष्ठिना प्रोक्ता सम्यक्त्वं केन हेतुना । स्थिरत्वं ते समायातं प्रिये त्वं ब्रूहि मेऽधुना ॥१॥
श्रेष्ठिवाक्यं समाकर्ण्य विष्णुश्रीः श्रीसमप्रभा । जगाद स्थिरसम्यक्त्वं तस्य कान्तस्य कौतुकात् ॥२॥
विषये वत्सकावत्यां नृपोऽस्याममितंजयः । तद्भार्या च महादेवी बभूव प्रीतिकारिणी ॥ ३ ॥
सोमश्रीरस्य चामात्यो विमलश्रीमतिः प्रिया । रूपयौवनसंपन्ना कलाविज्ञानकोविदा ॥ ४ ॥
मिथ्यादृष्टिरमात्यो हि धनधान्यादिसंयुतः । ददाति सुब्रह्मणेभ्यो भोजनाच्छादनादिकम् ॥ ५ ॥
यथाविगुप्तनामायं योगी मासोपवासगः । सोमश्रियो ह्यमात्यस्य पर्यटन् गृहमाययौ ॥ ६ ॥
भिक्षार्थमागतं साधुं स्वगृहे वीक्ष्य दुर्लभम् । सोमश्रिया समुत्थाय धृतो योगी सुभक्तितः ॥ ७ ॥
यथाविगुप्तयुक्तेन तेनामात्येन साधवे । दत्ता भिक्षा सुविधाय धीर्मभक्तेन भक्तितः ॥ ८ ॥
वन्दितोऽनेन भावेन स दानफलमश्नुते । एवं निगद्य शुद्धात्मा निर्ययौ तद्गृहान्तरम् ॥ ९ ॥
तद्गृहाद्विर्गते साधौ तपोऽगारे तपोधने । गृहेऽस्याश्चिन्तया यत्र बभूव शुद्धचेतसः ॥ १० ॥
वसुधारा प्रपातोत्थैः पुष्पवृष्टिस्तथाऽभवत् । त्रिगुप्तोऽपि ययौ वातो दध्वौ दुन्दुभिरम्बरे ॥ ११ ॥
अहो दानमहो दानं देवानां प्रीतचेतसाम् । विचेरुर्गगने वाचो मनःश्रोत्रसुखावहाः ॥ १२ ॥

तथा चोक्तम्—

देवदुन्दुभयो नेदुः सुरभिः पवनो ववौ ।
अपतद् वसुधारा च पूरयन्ती नभस्तलम् ॥ १३ ॥

त्रिपट्टा खलु कोट्यस्तु त्रिंशोऽर्धसहिता स्मृता । तीर्थकृज्जन्मसंप्राप्ता वसुधारेति कीर्तिता ॥१४॥
सिरःकम्पाङ्गुलिस्फोटैर्देवभ्रमणनिस्वनैः । साधु साध्विति देवानां पुष्पवृष्टिं प्रपातिता ॥ १५ ॥
आश्चर्यपञ्चकं दृष्ट्वा स्वगृहे मुनिदानतः । अमात्यो विस्मितस्वान्तः प्रदध्यौ प्रीतमानसः ॥ १६ ॥
वेदवेदाङ्गयुक्तानामग्निहोत्रविधानतः । दत्तं यथेप्सितं दानं ब्राह्मणानां मया कृतम् ॥ १७ ॥
परिग्रहकलत्राणां कलुषकर्मशालिनाम् । यथेह दानमन्येषां दत्तमस्माभिरादरात् ॥ १८ ॥
ईदृशोऽतिशयो लोके न मे जातः कदाचन । सत्त्वानां पुण्ययुक्तानां न किंचिद्दुर्लभं भवेत् ॥१९॥
एवं विचिन्त्य शुद्धात्मा लोकशास्त्रविशारदः । ययौ धर्मं तदाऽमात्यो विवेकी मोक्षमेति हि ॥२०॥
धर्मं प्राप्य ततोऽमात्यो भक्तिनिर्भरमानसः । गत्वा यथाविगुप्तान्तं नत्वा पप्रच्छ तं स्थिरः ॥२१॥
कनकाश्वतिला नागो रथो दासी मही गृहम् । कन्या च कपिला धेनुर्दश दानानि सन्ति वै ॥२२॥
दशाप्येतानि दानानि मया दत्तानि यत्नतः । ब्राह्मणेभ्यस्तपस्विभ्यो न दृष्टोऽतिशयो महान् ॥२३॥
श्रुत्वाऽस्य वचनं मुख्यं जगौ साधुरिति पुनः । साधून्येतानि दानानि न भवन्ति महीतले ॥२४॥
आहाराभयशास्त्राणामौषधस्य प्रदानकम् । चत्वार्येतानि दानानि सम्मतानि मनीषिणाम् ॥ २५ ॥
उक्तमाहारदानस्य माहात्म्यं जुषसम्मतम् । आकर्णयैकचित्तेन कथयामि सविस्तरम् ॥ २६ ॥
नकुलो मन्त्रपाठस्य इदं वचनमब्रवीत् । न साधुसमतुल्यो हि यशो बहुसुवर्णकः ॥ २७ ॥
इदं शुभमनोहारि भद्र साधुकथानकम् । शृणु त्वमेकचित्तेन निगदामि तथाधुना ॥ २८ ॥
दक्षिणापथदेशेऽस्ति विन्ध्यानाम महानदी । तत्तटे लोकविख्यातं विन्ध्यातटपुरं परम् ॥ २९ ॥
सोमप्रभः प्रभुस्तत्र बभूव धनविश्रुतः । सोमप्रभा प्रिया चास्य सुतरां तन्मनःप्रिया ॥ ३० ॥

---

1 पप उक्तवान्. 2 पफ भाग्यकथम्, ज भाग्यकथम्. 3 पफ आहारम्य 4 फ [illegible]

अथायं नृपतिर्भक्त्या तत्पुरस्य समूतले । मठं सुवर्णनामानं चकार प्रीतमानसः ॥ ३१ ॥
क्रियमाणे मठे विप्रेभ्यस्तपस्विभ्यो मुहुर्मुहुः । आदिमध्यावसानेषु ददाति कलकं नृपः ॥ ३२ ॥
अथ तन्मठशालान्ते विष्णुभूतिः प्रियंवदः । तापसो लोकविख्यातो वसति प्रीतमानसः ॥ ३३ ॥
शिशिरे स्तम्भवृत्त्यासौ तापसो जीवति स्फुटम् । ग्रीष्मे कपोतवृत्त्या च चक्रवृत्त्या घनागमे ॥३४॥
सक्तून् कपोतवृत्त्यासौ समानीय जलमर्दितान् । चकार चतुरः पिण्डान् सममागान् स तापसः ॥३५॥
दत्त्वा तत्पिण्डमेकं च विभ्रमाणो स तापसः । प्रतीक्षतेऽतिथीन् भक्त्या समीपस्थितपिण्डकः ॥३६॥
अथ मासोपवासस्थः सिद्धिनामकनामकः । आजगाम क्रमात् आर्यसंघसह यतिनायकः ॥ ३७ ॥
दृष्ट्वा स्वमन्दिरं प्राप्तं साधुं भक्तिपरायणः । नत्वा मुनिं समुत्थाय तिष्ठ त्वं मठके मुने ॥ ३८ ॥
स्थापयित्वा तकं साधुं श्रद्धादिगुणसंयुतः । सक्तुपिण्डं ददात्येकं साधवे तापसस्तदा ॥ ३९ ॥
तस्मिन् भुक्ते पुनस्तेन तस्य पिण्डोऽपि योषितः । पिण्डद्वयं वितीर्णं तत्क्रमेणैतेन साधुना ॥४०॥
भोजनान्ते प्रदायास्य आशीर्वादं मुनीश्वरः । तन्मन्दिराद्विनिर्गत्य मन्दमन्दगतिक्रियः ॥ ४१ ॥
ततो विनिर्गते साधौ संतोषस्थितचेतसि । आश्चर्यपञ्चकं जातं वसुधारादि तद्गृहे ॥ ४२ ॥
दृष्ट्वाऽऽश्चर्यमिदं विप्रा राजाऽपि बहुविस्मयः । सुवर्णमठमाहात्म्याज्जातमाश्चर्यमल्पम् ॥ ४३ ॥
यावद्गृह्णन्ति रत्नानां समूहं नृपमाहनाः । तावदङ्गारसंघातः कृष्णवर्णो बभूव सः ॥ ४४ ॥
प्राप्तान्यङ्गारतां दृष्ट्वा रत्नानि नरनायकः । विष्णुभूतिगृहे प्राप आश्चर्यैरिति विस्मितः ॥ ४५ ॥
सुवर्णपङ्कसामर्थ्योपरि रत्नानि माहनाः । सञ्जातानि ततोऽङ्गारा जाता किं वदतेति मे ॥ ४६ ॥
निशम्य नृपतेर्वाक्यं नकुलः प्राह स पुनः । सुवर्णयागतो नैषा रैपास पतिता प्रभो ॥ ४७ ॥
पतिता वसुधारेयं नरेन्द्र मुनिदानतः । विष्णुभूतिगृहे नूनं पञ्चवर्णसमुज्ज्वला ॥ ४८ ॥
न मुक्तमिदमादातुं विष्णुभूतिधनं तव । भिक्षादानसमुत्पन्नं सत्पुण्यफलसंभवम् ॥ ४९ ॥
श्रुत्वाऽस्य भारतीं राजा तदा विस्मितमानसः । विष्णुभूतिं जगादेमं संभावयनसंचयम् ॥ ५० ॥
अहं बहुसुवर्णस्य पञ्चसार्धं ददामि ते । मुनिभिक्षाफलस्यापि विष्णुभूते हि देहि मे ॥ ५१ ॥
एवं प्रबोधिते तेन भूभुजा लोपकारिणा । नेष्टं मनागपि तस्य तदानीं विष्णुभूतिना ॥ ५२ ॥
तेन कार्येण दानानि स्वर्णादीनि ददापि च । सामान्याहारदानेन न भवन्ति धरातले ॥ ५३ ॥
अभयादिप्रदानस्य माहात्म्यं शृणु सांप्रतम् । कथयामि समासेन तव धर्मं चिकीर्षतः ॥ ५४ ॥
यः सौवर्णं नगाधीशं ददाति सकलां धराम् । जीवितं च तथैकस्य तत्फलेन समं न तत् ॥ ५५ ॥
स्वर्णगोभूमिदानानि यः परस्मै प्रयच्छति । जीवितं च तथैकस्य तत्फलेन समं न तत् ॥ ५६ ॥

तथा चोक्तम्—

यो दद्यात् काञ्चनं मेरुं कृत्स्नां चापि वसुंधराम् ।
एकस्य जीवितं दद्यात् फलेन न समं भवेत् ॥ ५७ ॥

हिरण्यदाने गोदाने भूमिदाने तथैव च । एकस्य जीवितं दद्यात् फलेन न समं भवेत् ॥ ५८ ॥
एतत्तेऽभयदानस्य माहात्म्यं कथितं मया । अधुना शास्त्रदानस्य कथयामि समासतः ॥ ५९ ॥
विप्रेण नीयमानोऽङ्घ्रिः पाण्डुरीको यथाद् यः । यो गुरुं लोपिनां स्यादि न चिरं तस्य जीवितम् ॥६०॥
गुरुरप्यक्षरं चैकं यः शिष्याय प्रयच्छति । धरायां तद्धनं नास्ति यद्दत्त्वा तदृणी भवेत् ॥ ६१ ॥

---

1 [दृष्ट्वा°]. 2 पफ कृष्णो वर्णो 3 [आश्चर्यैरिति विस्मित]. 4 ज सुवर्णयागस्य° 5 पफज भिक्षा: कुलम्म्, 6 [सामान्याहार°]. 7 ज पाण्डुरीके

तथा चोक्तम्—

नीयमानः सुपर्णेन नागः पुण्डरिकोऽब्रवीत् ।
यः स्त्रीणां गुह्यमाख्याति तदन्तं तस्य जीवितम्[1] ॥ ६२ ॥
एकमप्यक्षरं यस्तु गुरुः शिष्ये निवेदयेत् ।
पृथिव्यां नास्ति तद्द्रव्यं यद्दत्त्वाऽनृणी भवेत् ॥ ६३ ॥

अस्माभिः शास्त्रदानस्य माहात्म्यं कथितं तव । अधुनौषधदानस्य तद्वदामि समासतः ॥ ६४ ॥
औषधं यो हि साधुभ्यो रोगार्तेभ्यः प्रयच्छति । स जीवति निरातङ्को जन्मान्तरशतेष्वपि ॥ ६५ ॥
चत्वार्येतानि दानानि प्रशस्तानि भवन्ति वै । नान्यानि गोधनादीनि दुःखकारीणि देहिनाम् ॥ ६६ ॥
स्त्र्यश्वेभहिरण्यानि मौक्तिकादीनि भक्तितः । जिनसूरिभिरदेयानि दुःखहेतूनि देहिनाम् ॥ ६७ ॥
देयादेयफलं श्रुत्वा जिनधर्मं च भक्तितः । इच्छे वसुः सोमश्रीर्लोकधर्मपराङ्मुखा ॥ ६८ ॥
शङ्कादिदोषनिर्मुक्तं सम्यक्त्वं मेरुनिश्चलम् । अणुव्रतानि सर्वाणि गुणशिक्षाव्रतैरमा ॥ ६९ ॥
मधु मांसं सुरां हित्वा तथा पञ्चोदुम्बरादिकम् । समाधिगुप्तसामीप्ये जग्राहेयं विशुद्धधीः ॥ ७० ॥
नत्वा मुनिं पुनः प्राह सोमश्रीर्भक्तितत्परा । यावज्जीवं न स्पृशामि लोहशस्त्रं मुनीश्वर ॥ ७१ ॥
नत्वा मुनिपदद्वन्द्वमसौ प्रीतमानसा । स्वमन्दिरं जगामासौ जिनधर्मविभूषिता ॥ ७२ ॥
छुरिकां काष्ठनिर्माणां खड्गं काष्ठमयं तथा । सकोशान्तं च आदाय नृपं गच्छति सेवया ॥ ७३ ॥
अन्यदा मत्सरोपेतैः पुरोहितमहत्तरैः । काष्ठखड्गादिकं वार्ता भूपस्यास्य निवेदिता ॥ ७४ ॥
अमात्योऽयं महाराज छुरिकां काष्ठनिर्मिताम् । खड्गं च काष्ठनिष्पन्नं कोशमध्यव्यवस्थितम् ॥ ७५ ॥
मायया धारय दुष्टात्मा सद्भावपरिवर्जितः । भवन्तं सेवयाऽऽयाति महासामन्तपूजितम् ॥ ७६ ॥
निशम्य तद्वचो राजा कोपारुणनिरीक्षणः । अन्तर्मन्युर्जगादाशु दुःखेपाये चकम्प सः ॥ ७७ ॥
अन्यामन्यापदेशेन विधाय सदसि स्थितः । पश्यति स्म निजं खड्गमिन्दीवरनिभं पुनः ॥ ७८ ॥
ततः क्रमेण चान्येषां खड्गानि महीभुजाम् । तदा विलोकयामास सम्यक् परबलच्छिदः ॥ ७९ ॥
ततः सोमश्रियं राजा जगाद हृदि कोपवान् । पश्याम्यहं द्रुतं खड्गं त्वं मे समर्पय ॥ ८० ॥
नरेन्द्रस्य वचः श्रुत्वा निश्चलं चित्तकोपिनः । सोमश्रीः श्रावकः कृत्वा हृदि पञ्चनमस्कृतिम् ॥ ८१ ॥
स्वयमभ्यसितस्तस्य महीपालस्य रोषिणः । खड्गं समर्पयामास कोशमध्यस्थितं निजम् ॥ ८२ ॥
आदाय तत्कराच्छीघ्रं कृपाणं भासुरप्रभम् । आचकर्ष नृपः कोशात् सभामध्ये व्यवस्थितः ॥ ८३ ॥
ततो निजप्रभाजालैर्द्योतमानो नभोऽपरम् । मण्डलाग्रो बभूवायं रविर्वा भासुरप्रभः ॥ ८४ ॥
तद्विलोक्य करे राजा तत्कोपागतमानसः । पूर्वोक्तसचिवादीनां व्याकुलोऽभूत् सुखात्ययी ॥ ८५ ॥
ततः सम्यग् जगादासौ नरेन्द्रोऽसिकरस्तदा । तोयदध्वानधीरेण वचसाऽऽश्चर्यमीयुषा ॥ ८६ ॥
केऽभिन्ममोदितं पूर्वमामात्यो महत्तमाधिपः । काष्ठमेतु समादाय खड्गं काष्ठमयं तदा ॥ ८७ ॥
भयात्रपावतो दुष्टः सोमश्रीस्तत्समीपकम् । आगच्छतीह सेवायां पश्यतेममसिं खलाः ॥ ८८ ॥
महीपालवचः श्रुत्वा सोमश्रीर्भूपतिं जगौ । गृहीतं व्रतमेकं हि गुरुपार्श्वे मयेप्सितम् ॥ ८९ ॥
संग्रहो लोहशस्त्रस्यानर्थमूलस्य भूतले । यावज्जीवं न कर्तव्यो मया त्रेधा नराधिप ॥ ९० ॥
यदेभिः कथिता वार्ता तव मन्त्रिपुरोहितैः । साऽपि सत्यसमुद्भूता मद्व्रतपरिभाषिभिः ॥ ९१ ॥

---

1 ज तदन्तस्य जीवितम्. 2 पफ पुष्पम्, ज पुष्पम्. 3 [जग्राहेयम्]. 4 पफज विधि हन्तव्यम्. 5 पफ पुष्पम्, ज पुष्पम्. 6 [आन्तं].

करवास्या कृपाणेन दारुनिर्मापितेन च । नर्तकंदिवमद्य कर्तुं सेवामायामि ते विभो ॥ ९२ ॥[1]
सोमश्रियो वचः श्रुत्वा मन्त्रिणः प्रीतिकारिणः । जिनधर्मे रता जाता पूजितोऽयं नरेशिना ॥९३॥
तथा नगरदेवीभिः संप्राप्य नृपमन्दिरम् । मणिमर्मविनिर्माणे स्थापितः सिंहविष्टरे ॥ ९४ ॥
अष्टापदमयैः कुम्भैस्तथा मणिमयैरपि । स्वच्छनीरसरोपेतैरभिषिक्तः समङ्गलम् ॥ ९५ ॥[3]
ततो नगरलोकेन सर्वेणापि सुभक्तितः । पूजितः सुतरां मन्त्री सोमश्रीः सपसम्पदा[4] ॥ ९६ ॥
दृष्ट्वा तद्धर्ममाहात्म्यं नरा नरवरादयः । जिनसेनगुरोरन्ते मोक्षार्थं ते प्रवव्रजुः ॥ ९७ ॥
अन्येऽपि बहवस्तत्र सम्यक्त्वं प्रतिपद्य ते । नरा विस्मयमासाद्य जिनधर्मं प्रपेदिरे ॥ ९८ ॥
विष्णुश्रीः श्रेष्ठिनं प्राह जिनदासं मम प्रभो । दृष्ट्वाऽतिशयमेतस्य सम्यक्त्वं स्थिरतामितम् ॥ ९९ ॥

॥ इति श्रीमन्त्र्याख्यसोमश्रीदृष्टसम्यक्त्वदर्शनचतुर्हिरण्ययागान्तर्गतकथासहितविष्णुश्रीदृष्टसम्यक्त्वचतुर्थकथानकमिदम् ॥ ६६ ॥

*

६७ नागश्रीकथानकम् ।

नागश्रीः श्रेष्ठिना पृष्टा तुरीया रमणी तदा । सम्यक्त्वं ते कुतो जातं स्थिरं मे वद सांप्रतम् ॥१॥
श्रेष्ठिवाक्यं समाकर्ण्य नागश्रीर्निजगाद्यमुम् । यथा मे स्थिरसम्यक्त्वं जातं शृणु वदामि ते ॥ २॥
काशीजनपदे रम्ये वाराणस्यां पुरि प्रभुः । जितशत्रुरभूत्तस्य स्वर्णचित्रा प्रिया प्रिया ॥ ३ ॥
तत्सुता मुण्डिका नाम कुमारी रूपराजिता । अत्यन्तवल्लभा पित्रोस्तद्रूपहृतचेतसोः ॥ ४ ॥
बाल्यकाले विलोक्यैतां मृत्स्नामक्षणतत्पराम् । श्रमणश्रीर्वराद्यार्या तद्गृहस्यस्य समुपागता ॥ ५ ॥
मृत्तिकाभक्षणे दोषो विद्यते पुत्रि निश्चितम् । पृथिवीकायजीवानां हिंसनं सम्यतामिदम् ॥ ६ ॥
आर्यिकावाक्यमाकर्ण्य मुण्डिका धर्मतत्परा । चकार नियमं तस्या मृत्तिकाया विशुद्धधीः ॥ ७ ॥
मृत्तिकायाः परित्यागे तदा मुण्डिकया कृते । देवकन्यासमं जातं तच्छरीरं मनोहरम् ॥ ८ ॥
तवस्थां तं समालोक्य तद्रूपहृतचेतसः । याचन्ते भूपतिं भूपास्तेभ्यो दातुं स नेच्छति ॥ ९ ॥
अन्यदा भगदत्ताख्यः स्कन्धावारेण भूभुजा । वाराणसीं समेत्यासौ सर्वतो मेदिनीपतिः ॥ १० ॥
देहि मे मुण्डिकामिस्मां जितशत्रो कुमारिकाम् । अर्धराज्यं च भूपाल नान्यथा गतिरस्ति ते ॥११॥
एवं निगद्य स दूतं भगदत्तो नरेश्वरः । जितशत्रुसमीपं च प्रेषयामास सत्वरम् ॥ १२ ॥
दूतः क्रमेण संप्राप्य तद्वृत्तान्तमभाषत । स्वसुतायाचनं श्रुत्वा जितशत्रुः क्रुधं ययौ ॥ १३ ॥
दूतनिर्भर्त्सनं कृत्वा प्रापय्य निजनायकम् । जितशत्रुः पुरान्निर्गत्य निर्ययौ संमुखं प्रति ॥ १४ ॥
दूतवार्ता परिज्ञाय सनद्य सकलं बलम् । तत्सन्मुखमभीयाय भगदत्तनृपोत्तमम् ॥ १५ ॥
अथ युद्धं समभूत्तत्र वीरजातपरायणम् । सैन्यद्वयस्य कन्यार्थे बीजं युद्धस्य योषितः ॥ १६ ॥
पातितो वाजिना वाजी करिणाऽपि करी महान् । रथिकेन रथस्थोऽपि पदगेऽपि पदातिना ॥१७॥
तुरङ्गहेषितैस्तुङ्गैर्नितान्तं गजगर्जितैः । रथाङ्गचक्रचीत्कारैः पदातिगणगर्जितैः ॥ १८ ॥
रणतूर्यनिनादेन धरागगननादिना । कर्णेऽपि पतितं भूपे श्रूयते न परस्परम् ॥ १९ ॥
एवं महति संजाते संग्रामे जनसंक्षये । रणात् पलायनं चक्रे जितशत्रुर्भीतोऽसुना ॥ २० ॥
अन्तःपुरं समस्तं च भयवेपितविग्रहम् । जितशत्रुमतेनाशु शत्रुभीतेः पलायितम् ॥ २१ ॥

---

1 पफ क्षुम्मम् ज क्षुपम्म्. 2 ज प्रीतिकारिण्य. 3 पफ क्षुम्मम्, ज क्षुमम्म् 4 प सपसम्. 5 ज omits इति श्री. 6 पफ रैपिभे 7 पफ भर 8 ज स्वपर्व 9 पफ [illegible] ज [illegible]

पिता पुत्रीं समादाय किल गच्छति वेगतः । गन्तुमिच्छति सा नातो भूयो भूयोऽपि चालिता ॥ २२ ॥
धर्मस्योपार्जितं किंचिच्छुभाशुभफलोदयम् । प्राप्स्यामि तदहं तात गच्छ त्वं भयमत्र ते ॥ २३ ॥
पुत्रीवचनमाकर्ण्य धीरत्वसहितं तदा । जितशत्रुर्जगादैतां बाष्पविप्लुतलोचनः ॥ २४ ॥
एकाकिनी विहायात्र भवतीं मदनप्रियाम् । गन्तुं किं युज्यते पुत्रि प्रस्तावेऽत्र ममापदे ॥ २५ ॥
श्रुत्वा पितृवचः कन्या स्थिरचित्ता जगाद तम् । भवतः पुण्यतो वा मे कोऽपि रक्षां करिष्यति ॥ २६ ॥
महापराक्रमोपेतः प्रतापी बहुसैन्यकः । जयविक्रमसंसक्तो[1] भानुवच्च समत्सरिः ॥ २७ ॥
तस्माद् भयाकुल स्थानात् प्राणसंदेहकारिणः । सुतावचनतो यातो जितशत्रुर्यथेप्सितम् ॥ २८ ॥[2]
स्थित्वा जिननमस्कारं प्रत्याख्यानं च पाक्षिकम् । सविकल्पं स्थिरत्वान्तरूपप्रतिमया स्थिता ॥ २९ ॥
वैरिविध्वंसयात्रा समरदत्तस्य पत्तनः । गजहृदं निषेवार्थं[3] चतुरेणैव सुमित्रया ॥ ३० ॥[4]
गजहृदं विशन्त्या हि तयाऽसौ वीरचेतसा । दृष्टो रूप्यमणिद्वीपे हस्ती गेहं यमस्य सः ॥ ३१ ॥
गजहृदं प्रविष्टेन चलत्कल्लोलभीषणम् । तस्थौ सुखेन निःशल्या भीतिविवर्जितमानसा ॥ ३२ ॥
समरदत्तोऽपि भूपालस्तत्प्रवृत्तिसमानसः । विशन् गजहृदं देव्या स्तम्भितस्तत्तटे स्थितः ॥ ३३ ॥
ततः प्रभातकाले च सर्वलोकेन भूपतिः । निश्चलस्तम्भितो दृष्टो देव्या सुरसमित्के ॥ ३४ ॥
ज्ञात्वा वृत्तान्तमेतस्य विस्मितः सकलो जनः । तदन्तःपुरमप्यागात् तदन्तमतिविह्वलम् ॥ ३५ ॥
अन्तःपुरं शुचाग्रस्तं बाष्पविप्लुतलोचनम् । पतिभिक्षां कृताञ्जल्य ययाचे सुमित्रादरम् ॥ ३६ ॥
हृदयेशान् विनिःशल्य तदान्तःपुरयाचनात् । जगाद सुमित्रा वाक्यं करुणार्द्रमानसा ॥ ३७ ॥
येन देवेन देव्या वा मनुष्येणापि केनचित् । प्रातिहार्यं कृतं मेऽत्र स भूप मुञ्चतु द्रुतम् ॥ ३८ ॥
तदाज्ञयतो नृपो मुक्तो वनदेव्या सुरेण वा । बभूव विस्मितस्वान्तो विशल्यीकृतचेतनः ॥ ३९ ॥
सिंहासनस्थितां कृत्वा सुमित्रां सुरसाः सुराः । क्षीरोदवारिणा तस्याः प्रचक्रुरभिषेचनम् ॥ ४० ॥
अभिषेकावसाने च सुमित्रा पूजिता सुरैः । जिनरक्षिता गुणाधारा सुविवेकमतशालिनी ॥ ४१ ॥
अत्रान्तरे विनीतात्मा समरदत्तो नरेश्वरः । दध्यौ विस्मितचेतस्को मुक्तमानमहीधरः ॥ ४२ ॥
अहो रूपमहो शीलमहो धैर्यमहो गुणः । एतस्या वरकन्याया मान्यासामन्य योषिताम् ॥ ४३ ॥
एवं विचिन्त्य संप्राप्य तत्समीपं नराधिपः । भूयो भूयो नतिं कृत्वा चक्रेऽस्या हि क्षमापणम् ॥ ४४ ॥[5]
ततः सा पूजिता बाढं समरदत्तेन पीडिता । तस्यामन्त्रैरपि सार्धं तत्पादनमनेन च ॥ ४५ ॥
सुतामाहात्म्यमाकर्ण्य जितशत्रुस्त्वरान्वितः । आययावन्तिकं तस्याः समस्तान्तःपुरेण सः ॥ ४६ ॥
समरदत्तो नरेन्द्रोऽपि वैराग्याहितमानसः । तदा क्षमापणं चक्रे भूभुजा जितशत्रुणा ॥ ४७ ॥
प्रदाय सकलं राज्यं स्वसुताय जितेन्द्रियः । जितशत्रुर्जितानङ्गो समरदत्तोऽपि भूपतिः ॥ ४८ ॥
अन्योऽपि भूपसंघातो मोक्षनिस्पृहमानसः । दधौ दैगम्बरीं दीक्षां धर्मसेनान्तिके मुदा ॥ ४९ ॥
केचित् सम्यक्त्वपूर्णाणि व्रतान्यादाय भक्तितः । अणूनि श्रावका जाता जिनधर्मपरायणाः ॥ ५० ॥
सुमित्रापि ततः सद्यो महावैराग्यसंमता । कमलश्रीसमीपे हि बभूवार्यिका परा ॥ ५१ ॥
सुमित्राप्रातिहार्यं च विलोक्य सुरनिर्मितम् । जाताऽस्मि दृढसम्यक्त्वा श्रेष्ठिन् मे कथितं तव ॥ ५२ ॥

॥ इति श्रीजितशत्रुनृपसुमित्राख्यकुमारीसुरभिकाभक्षणनियमकरण
दर्शनागश्रीदृढसम्यक्त्वप्रथमकथानकमिदम् ॥ १७ ॥



1 पफ संसक्ती 2 पफज तिमिः सुमत्रम्, 3 ज निषेवाय. 4 पफज सुमत्रम्, 5 पफ सुमत्रम्, ज सुमत्रम्, 6 ज omits इति श्री

६८ पद्मलताकथानकम् ।

भार्या पद्मलताभिख्या पञ्चमी श्रेष्ठिना पुनः । कौतुकेन हि संपृष्टा स्थिरसम्यक्त्वकारणम् ॥ १ ॥
श्रेष्ठिवाक्यं समाकर्ण्य जगौ पद्मलताऽप्यमुम् । स्थिरतां येन संप्राप्तं सम्यक्त्वं मम तच्छृणु ॥ २ ॥
अङ्गकाख्यजनान्तेऽस्ति चम्पाऽऽख्या नगरी शुभा । अस्यां नराधिपः श्रीमान् दन्तिवाहननामकः[1] ॥ ३ ॥
बभूवास्य नरेन्द्रस्य महादेवी मनःप्रिया । जिनधर्मरसपन्ना शोभनाऽन्वा जिनसादिका ॥ ४ ॥
अस्मिन्नेव पुरे श्रेष्ठी विद्यते धनसंयुतः । ऋषभोपपदो दासस्तस्य पद्मावती प्रिया ॥ ५ ॥
सम्यग्दर्शनसंपन्ना पद्मश्रीसमविभ्रमा । पद्मश्रीरभवत् पुत्री तयोः प्रेमानुरक्तयोः ॥ ६ ॥
बुद्धदासोऽभवत् तत्र श्रेष्ठी बौद्धमुपासकः । बुद्धश्रीरस्य[2] भार्या च तत्प्रिया साऽप्युपासकी ॥ ७ ॥
बुद्धसंघोऽनयोः पुत्रस्तन्मनोनयनप्रियः । [3]बुद्धभक्तिसमायुक्तो रूपराजितविग्रहः ॥ ८ ॥
अन्यदा बुद्धसंघोऽसौ पश्यन् ग्रामवनानि च । अनुक्रमेण संप्राप्य जिनायतनमुत्तमम् ॥ ९ ॥
पद्मश्रियं विलोक्यात्र जिनपूजां प्रकुर्वतीम् । प्रसन्नैर्बुद्धसंघोऽयं कामविह्वलतां ययौ ॥ १० ॥
ततः स्वमन्दिरं प्राप्य स्नानभोजनकादिकम् । हित्वा मौनं समालम्ब्य शयनीयमसौ श्रितः ॥ ११ ॥
दृष्ट्वा मन्मथितं पुत्रं मौनस्थं शुचमागतम् । पप्रच्छेति तदा माता म्लानवक्त्रसरोरुहम् ॥ १२ ॥
भोजनं पुष्पताम्बूलं स्नानं काश्मीरकादिकम् । हित्वा किं कारणं पुत्र स्थितोऽसि शयने शुचा ॥ १३ ॥[4]
जननीवाक्यमाकर्ण्य बुद्धसंघोऽपि तां जगौ । प्रमुञ्चन्नुष्णनिश्वासं कामबाणसमाहतः ॥ १४ ॥
सुतां वृषभदासस्य पद्मश्रीनामसंयुताम् । यदि प्राप्स्यामि तां कान्तां जीविष्यामि ततो ध्रुवम् ॥ १५ ॥
अथवैतां न प्राप्स्यामि मन्मनोनयनप्रियाम् । नियतं श्वो मरिष्यामि प्रतिज्ञेयं ममाम्बिके ॥ १६ ॥
श्रुत्वा तद्वचनं माता तद्दुःखभयवेपिता । तत्पितुः कथयामास वृत्तान्तं निखिलं तदा ॥ १७ ॥
श्रुत्वा स्वपत्नीवाक्यं पिता पुत्रं जगाद तम् । उपासकस्य धर्मं पुत्र पिशिताहारिणस्तव ॥ १८ ॥
पद्मश्रीजनको धर्मं श्रावको विदितो बुधैः । स ददाति कथं पुत्रीमस्माकं जिनदैवतः ॥ १९ ॥
अन्योऽथवा भवोपायो येन पुत्रीं ददाति ते । तद्बुद्धत्वं विहाय त्वं जिनभक्तो भव बालक[5] ॥ २० ॥
एवं संमन्त्र्य तावत्र यशोधरमुनीश्वरम् । प्रापतुः प्रीतचेतस्कावुपविष्टौ यथासनम् ॥ २१ ॥
जैनधर्ममुपश्रुत्य गृहीत्वाऽणुव्रतानि च । कपटाच्छ्रावकौ जातौ विनयानतविग्रहौ ॥ २२ ॥
बौद्धधर्मं विहायैतौ जिनपूजां प्रचक्रतुः । भिक्षादानं च साधुभ्यो ददन्तौ मुहुर्मुहुः ॥ २३ ॥
उपवासं च कुर्वाणौ हृष्टौ तौ पर्ववासरे । धर्मवात्सल्यतः श्रेष्ठी स्नेहं च कुरुते तराम् ॥ २४ ॥
बुद्धः कृतोपवासश्च तद्वेले स्थितवानसौ । श्रेष्ठिना स्वगृहे नीतः पारणार्थं प्रमोदिना ॥ २५ ॥
ततो भोजनवेलायां दत्ता पेयाऽस्य वासिता । बुद्धदासो जगादेतं विनयानतमस्तकः ॥ २६ ॥
पुत्रीं वृषभदास त्वं मत्सुताय यदि स्फुटम् । पद्मश्रियं ददासीमां भोजनं विदधाम्यहम् ॥ २७ ॥
श्रुत्वा तद्वचनं श्रेष्ठी बभाषेऽस्य पुरःस्थितः । अस्माभि[6] स्वसुता देया[7] श्रावकेभ्यो बुधास्थिता ॥ २८ ॥
पुत्री ऋषभदासेन दत्ताऽसौ[8] श्रावकाय सा । भोजनं कुरुतः पश्चात्तौ तदानीं विधानतः ॥ २९ ॥
ततो ऋषभदासोऽपि जिनानां जितविद्विषाम् । चकार महतीं पूजां पुष्पधूपादिसंपदा ॥ ३० ॥
शङ्खतूर्यनिनादेन महाविभवयोगतः । अकारयच्च विधिना पाणिग्रहणमेतयोः ॥ ३१ ॥

---

1 पफ दन्तवाहन° 2 पफ बुद्धिश्री° 3 पफ बुद्धिभक्ति° 4 पफ शुच्या, ज शुच्या. 5 पफज विधि बुध्यम्. 6 पफ बालक:. 7 ज देयं. 8 [दत्ताऽसौ].

परिणीय विधानेन तेन पद्मश्रियं ततो । उपवासं विधायाश्च तस्थिवांसौ कृतक्रियौ ॥ ३२ ॥
ततो भिक्षुर्बुद्धदासा बुद्धधर्मं समेत्य कम् । पद्मश्रीरपि तत्पार्श्वं नेच्छति स्थिरबुद्धिका ॥ ३३ ॥
भूयो वदन्ति ते तां च सर्वजन्तुहितो मतः । समस्तकरुणोपेतो बुद्धधर्मः सुखप्रदः ॥ ३४ ॥
अस्माकं ज्ञानमप्यस्ति कालत्रयविशेषवित् । तत्प्राप्य निश्चितं बौद्धास्तिष्ठन्ति सुखिनो भुवि ॥ ३५ ॥
अहं ज्ञानविशेषेण सत्यरूपेण साधुना । जानामि सकलान् भावान् भव्येन व्यवसितान् ॥ ३६ ॥
यथा तेऽत्र पिता पुत्रि जिनधर्मं विधाय च । अटव्यां भीमरूपायां बभूव हरिणो मृगः ॥ ३७ ॥
श्रुत्वा तद्वचनं तत्र पद्मश्रीर्निजगाद तान् । विज्ञातं भवतां ज्ञानमस्माभिरधुना स्फुटम् ॥ ३८ ॥
भक्षिता येन विज्ञातो भवद्भिर्वीतसंशयैः । सारङ्गो परिभ्रान्तो वने वृक्षसमाकुले ॥ ३९ ॥
पद्मश्रियाऽन्यदा सर्वे भिक्षवो हि निमन्त्रिताः । उपानत्कर्णिकोपेता निविष्टास्ते यथाक्रमम् ॥ ४० ॥
भुक्त्वा प्रापयिता सर्वा गृहक्षेपे प्रयत्नतः । निविष्टास्ते यथास्थानं भिक्षवः भिक्षाशिनः ॥ ४१ ॥
एकैकोपानहं तेषामादाय त्वरितं पुनः । कृत्वा तत्खण्डखण्डानि सूक्ष्मरूपाणि तान्यलम् ॥ ४२ ॥
व्यञ्जनानि सुगन्धीनि नानारससुतानि च । तक्रस्थापार्थमेतानि विहितानि घनान्यपि ॥ ४३ ॥
पद्मश्रिया वितीर्णानि तानि तेभ्यः पुनः पुनः । भक्षितानि तकैस्तुष्टैरश्लिस्फोटकादिभिः ॥ ४४ ॥
भुक्त्वोत्थितैस्तकैस्तस्मात् दृष्टा प्रापयितां निजाम् । एकैका विनिर्दिते पृष्टा पद्मश्रीर्बुद्धमादरात् ॥ ४५ ॥
उपानत्कि गृहे तत्र मुक्ताः प्रापयिता यकाः । पौरैकैका च साऽस्माभिः द्वितीया न कथित्पुनः ॥ ४६ ॥
अन्वेषणं प्रयत्नेन विधाय निजमन्दिरे । समर्पय पुनर्येन गच्छामः स्वपदं मुदा ॥ ४७ ॥
श्रुत्वा तद्भारती तत्र पद्मश्रीर्निजगादमूल् । भवतां विद्यते ज्ञानं सर्ववस्तुप्रकाशकम् ॥ ४८ ॥
भक्षिता येन ज्ञानेन विज्ञातो हरिणो वने । उत्तमक्षेन विज्ञाय पदाम्भोपानहं हुतम् ॥ ४९ ॥
ततस्तद्भक्षणवतो स्पष्टैर्भिक्षुभिः सुगताश्रितैः । बुद्धदासस्य सा वार्ता सकलाऽपि निवेदिता ॥ ५० ॥
अस्मद्विघ्नभयं कृत्वा भवद्भार्याऽतिपापया । उपानद्भक्षणं दत्तमसभ्यं सत्कृतं तदा ॥ ५१ ॥[1]
श्रुत्वा तद्वचनं सोऽपि बुद्धदासोऽतिकोपवान् । तदर्थं भूमिपालस्य ददौ बहुधनं तदा ॥ ५२ ॥
आदाय तद्धनं तेन भूभुजा रोषभीरुणा । निजपत्तनतः क्षिप्तौ वाष्ठिवौ तौ वधूवरौ ॥ ५३ ॥
तेन निर्धाटितौ सन्तौ मिलितौ सार्थवाहयोः । परदेशं गतौ तौ च दुःखपूरितमानसौ ॥ ५४ ॥
भुक्त्वा सविषमाहारं सार्थवाहौ परस्परम् । अज्ञातविषसम्बन्धौ समेतौ तौ मृतौ निशि ॥ ५५ ॥
बुद्धसंघोऽपि भुक्त्वेममाहारं विषसंयुतम् । विषव्याप्तसमस्ताङ्गो मृतकल्पो बभूव सः ॥ ५६ ॥
तदर्थं बुद्धदासोऽपि विज्ञाय सकलमसौ । सल्लोकसंगतः प्राप तं प्रदेशं कृपाऽन्वितः ॥ ५७ ॥
मृतकल्पं सुतं दृष्ट्वा अपारदोषैर्निर्गमनात् । पद्मश्रिया विषं दत्त्वा मत्सुतो निहतो जनाः ॥ ५८ ॥
तया समस्तलोकोऽयं सार्थवाहसमन्वितः । निहतो विषयोगेन कारणेन विनाऽनया ॥ ५९ ॥
अन्याख्यानमिदं तत्र खलेन परिनिर्मितम् । पद्मश्रियो विशुद्धात्मा बुद्धदासश्चकार सः ॥ ६० ॥
निमय्यैवं जनाख्यानं बुद्धदासो निजं सुतम् । करेणादाय विक्षेप पद्मश्रीचरणोपरि ॥ ६१ ॥
एवं कृतेऽमुना तत्र पद्मश्रीर्निजगादिदम् । रात्रिभोजनमाहात्म्यादुत्तिष्ठतु पयो मम ॥ ६२ ॥
एवं प्रोक्तेऽनया तत्र बुद्धदासो विषोज्झितः । तत्क्षणेन समुत्तस्थौ सर्वोऽपि सकलस्तदा ॥ ६३ ॥
अत्रान्तरेऽमरैस्तुष्टैर्गगनस्थितविग्रहैः । पद्मश्रीः पूजिता चारु महाविभवसंपदा ॥ ६४ ॥
पूजयित्वा ततो देवा दिवि विस्मितमानसाः । अव्यक्तविग्रहा [illegible] वदन्तीदं मुहुर्मुहुः ॥ ६५ ॥

---

1 ज भुक्त्वोपि 2 पफ पद्मश्रियं 3 पफ मुग्धम्, ज मुग्धम्, 4 [अज्ञात]. 5 [मिलते] 6 पज्ञ मान्यन.

अहो पद्मश्रियः शीलमहो सत्त्वमनुत्तमम् । अहो जिने परा भक्तिरहो धर्मेऽपि तन्मतिः ॥ ६६ ॥
विलोक्याश्चर्यमीदृक्षं तदा पद्मश्रियः परम् । दन्तिवाहनभूपालमन्त्रिणो विस्मयं ययुः ॥ ६७ ॥
वितीर्य स्वस्य पुत्रेभ्यो [1]राज्यभारमहागुणम् । महावैराग्यसंपन्ना मोक्षविन्यस्तबुद्धयः ॥ ६८ ॥
दन्तिवाहनभूपालमन्त्रिपौरादयस्तदा । हित्वा परिग्रहं सर्वं श्रीधरान्ते प्रवव्रजुः ॥ ६९ ॥[2]
बुद्धदासोऽपि पद्मश्रीर्बुद्धसंघादिवाणिजाः । विहाय लौकिकं धर्मं जिनधर्मं प्रपेदिरे ॥ ७० ॥
ततः पद्मलता प्राह श्रेष्ठिनं श्रेष्ठिनीयुतम् । दृष्टाऽतिशयमेतस्या जाताऽहं दृढदर्शना ॥ ७१ ॥

—शेषं पूर्ववत्—

॥ [3]इति श्रीपद्मश्रीदृढसम्यक्त्वरात्रिभोजनपरित्यागवर्णन पद्मलतादृढसम्यक्त्वपठकथानकमिदम् ॥ ६८ ॥

*

६९ कनकलताकथानकम् ।

कनकादिलता पृष्टा श्रेष्ठिना श्रेष्ठिनी तदा । सम्यक्त्वं स्थिरतां केन संप्राप्तं तव मे वद ॥ १ ॥
अवन्त्याख्यमहादेशे श्रीमदुज्जयिनी पुरी । अस्यां बभूव भूपालो नरपालो गुणप्रियः ॥ २ ॥
बभूवास्य नरेन्द्रस्य महादेवी मनःप्रिया । कनत्कनकगौराभा भाग्यान्ता कनकश्रिका ॥ ३ ॥
अस्मिन्नेव पुरे श्रेष्ठी श्रावको जिनदेवतः । नाम्ना समुद्रदत्तोऽस्य समुद्रो रत्नसंपदाम् ॥ ४ ॥[4]
तद्भार्याऽप्यभवद्वार्वी दयाऽऽन्ता सागरदत्तिका । तत्पुत्रश्चोमको नाम जिनदत्ताऽभिधा सुता ॥ ५ ॥
विषये वत्सकावत्यां कौशाम्ब्यां पुरि धीरधीः । अर्हद्दासोऽभवच्छ्रेष्ठी जिनदासी च तत्प्रिया ॥ ६ ॥
ऋषभोपपदो दासस्तत्पुत्रोऽभवद्विचक्षणी । जिनदत्ताऽस्य सा दत्ता महाविभवयोगतः ॥ ७ ॥
सप्तव्यसनसंयुक्तश्चोमकोऽपि परिभ्रमन् । कुर्वन् स चौरिकां तस्यामुज्जयिन्यां[5] पुनः पुनः ॥ ८ ॥
प्रविष्टः कस्यचिद्गेहे गृहीतो दण्डपाशिकैः । श्रेष्ठिदाक्षिण्यतः सोऽपि विमुक्तस्तस्करो महान् ॥ ९ ॥
प्रविष्टो मन्दिरं भूयः कस्यचिद्धनतृष्णया । गृहीतश्चोमकः कोपात् स्वयमेव महीभुजा ॥ १० ॥
समुद्रदत्तमाहूय जगादेमं महीपतिः । गृहीतश्चौरिकां कुर्वन्नमुकस्त्वत्सुतो मया ॥ ११ ॥
भवद्दाक्षिण्यतो[6] मुक्तो भूयो भूयो मयाऽप्ययम् । निवारयाधुना पुत्रमन्यथा हन्मि निश्चितम् ॥ १२ ॥
भूपालवाक्यतो दुष्टे जनकेन स तत्क्षणे । श्रीमदुज्जयिनीतोऽस्य धाटितः कुलदूषणः ॥ १३ ॥
एवं निर्घाटितः सन्[7] स सार्थवाहसुतैः सह । जिनदत्तान्तिकं गेहाज्जगाम जननिन्दितः ॥ १४ ॥
सार्थवाहसुतानां च भोजनाच्छादनादिकैः । उपचारः कृतस्तेषां तदानीं जिनदत्तया ॥ १५ ॥
स्वस्रा हि पूजितान् दृष्ट्वा सार्थवाहसुतानरम् । धृत्वा चित्तेऽतिमानं स मुनिगुप्तान्तिकं ययौ ॥ १६ ॥
नत्वा मुनिमिमं भक्त्या श्रुत्वा धर्ममनुत्तरम् । तद्गुरुः स चकारेमां प्रतिज्ञां विनयानतः ॥ १७ ॥
फलस्य यस्य जानामि नाहं नाम मुने तदा । तत्फलं जातुचित् कान्तं भक्षयामि न निश्चितम् ॥१८॥
धारयेद्व्रतं सोऽपि भक्तिनिर्भरमानसः । जग्राह शुद्धसम्यक्त्वं तदन्ते विनयानतः ॥ १९ ॥
श्रुत्वा मुनिसमीपस्थं भ्रातरं दर्शनान्वितम् । जिनदत्ता तदा तं च स्वनरं प्राहिणोद्वरम् ॥ २० ॥
तदन्तं प्राप्य वेगेन स नरः प्राह तं पुनः । जिनदत्ता जगाद त्वां मन्मुखेन सगौरवम् ॥ २१ ॥
सम्यक्त्वं यत्त्वया प्राप्तं मुनिपार्श्वे सुनिर्मलम् । निवृत्तिश्च कृता भ्रातस्त्वयाऽज्ञातफलस्य च ॥ २२ ॥
त्वयेदं शोभनं भ्रातः कृतं मत्कुलभूषण । अधुनाऽऽगच्छ सामीप्यं सत्वरं मम निश्चितम् ॥ २३ ॥[8]

1 ब राज्यभारं. 2 पक पुण्यम् ब गुणम्. 3 ब omits इति श्री. 4 Mss. read both धनवती and धनश्रिणी. 5 पक मया 6 पक भवद्दाक्षिण्यतो 7 पक च कन्तार्थं 8 पकब त्रिशि इत्यम्.

जिनदत्तावचः श्रुत्वा तद्वरेण निरूपितम् । मुनिं नत्वा जगामार्या तत्समं ससुरन्तिकम् ॥ २४ ॥
दृष्ट्वा समागतां मार्गे जिनदत्ताऽतिवेगतः । चकार श्रेष्ठिनोऽनेन क्षेमसंभाषणादिकम् ॥ २५ ॥
प्रदाय भोजनं चास्मै नानाप्रकारिकं धनम् । चकार बहुसन्मानं जिनदत्ता जिनप्रिया ॥ २६ ॥
सार्थवाहसुतास्ते च कृत्वा वाणिज्यमुत्तमम् । कौशाम्ब्यास्यपुरीतोऽरं निर्ययुः प्रीतमानसाः ॥ २७ ॥
सुदूरं महापथं हित्वा गोधण्डेन मयूरके । उत्पथेन समं सर्वे महाकक्षमिदं स्थिताः ॥ २८ ॥
ततो मार्गपरिभ्रष्टाः क्षुधापिपासाकदर्थिताः । उत्पथेन समायुक्ताः सार्थवाहसुतास्तदा ॥ २९ ॥
गन्धामोदितसर्वाशं फलितं पक्वसत्फलम् । किंपाकद्रुमगुल्मं ददृशुस्ते वनान्तरे ॥ ३० ॥[1]
तत्फलानि समादाय मनोहारीणि देहिनाम् । भक्षितानि सर्वैर्मूढैस्तु क्षुधाकदर्थितैः ॥ ३१ ॥
उत्पथेन विचित्राणि क्षुधाक्रान्तचेतसा । भक्षितानि न चैतानि वणिक्सुतेन निश्चितम् ॥ ३२ ॥
सार्थवाहसुताः सर्वे मृत्युमुपाययुः । अज्ञानमूढचेतस्काः किंपाकफलभक्षणात् ॥ ३३ ॥
अज्ञातफलदानेन व्रतयोगेन केवलम् । उपकः पवनतापार्थि न मृतः स्थिरमानसः ॥ ३४ ॥
ततो रक्तानिरं तं वृद्धदेवी विलोक्य च । वर्णन्ध तत्सरीचार्यं जन्मतान्तरवेदिनी ॥ ३५ ॥
एतान्यत्र कुरूपाणि फलानि मधुराणि च । नरदेवीसुरादीनां भोक्तुयोग्यानि सर्वदा ॥ ३६ ॥
क्षुत्पिपासापरीतेन वने भोजनवर्जिते । त्वया कुतो न भक्ष्याणि फलानि कथयाशु मे ॥ ३७ ॥[2]
वृद्धदेवीवचः श्रुत्वा जिनदत्ताऽग्रजोऽब्रवीत् । इमां पुरःस्थितां तत्र कौतुकव्याकुलमानसाम् ॥ ३८ ॥
अविज्ञातफलानां हि भक्षणे व्रतमग्रहः । गृहीतो मुनिसामीप्ये खण्डितुं स न युज्यते ॥ ३९ ॥
देवी तद्वचसो दृष्ट्वा बभाषेऽत्र रक्षितम् । वरं वृणीष्व भद्र त्वं मनोऽभिलषितं[3] परम् ॥ ४० ॥
तथापि देवताऽनेन जन्मान्तरवेदिना । सर्वेऽपीमे वयस्या मे समुत्तिष्ठन्तु सत्वरम् ॥ ४१ ॥
देव्या तद्वाक्यतः सर्वे सार्थवाहकुमारकाः । उत्थापिताः प्रयत्नेन विकसन्मुखपङ्कजाः ॥ ४२ ॥
ततो देवी वणिजं प्राह संतोषपूरितमानसा । भवन्तं प्रापयिष्यामि श्रीमदुज्जयिनीमितः ॥ ४३ ॥
देवी भद्रस्य पन्थानमुज्जयिन्यास्तथावती । सार्थवाहकुमाराणां जगाम स्वमनीषितम् ॥ ४४ ॥
तत्क्षणं प्रीतचेतस्काः सार्थवाहकुमारकाः । सर्वेऽपि ते परिप्रापुः श्रीमदुज्जयिनीं पुरीम् ॥ ४५ ॥
समर्थं तं परिप्राप्तं सुकुमारं पुरीमिमाम् । ज्ञात्वा देवी च संप्राप्य तत्सार्थं प्रीतमानसा ॥ ४६ ॥
लोकविस्मयकारिण्या पञ्चाश्चर्यमकारयत् । पूजयामास सा देवी तदानीं नृपसाक्षिकम् ॥ ४७ ॥
धनधर्ममयीनां च सत्कराहृतभासताम् । पातयामास सा देवी तदग्रे परितोषिता ॥ ४८ ॥
अन्येऽप्यनिश्चया जाता पुण्यपापफलयोऽस्य च । दर्शनमोहनीयैर्युक्तमकोऽयं रक्षितः ॥ ४९ ॥
दृष्ट्वाऽतिशयमस्य भूभुजा तज्जनेन च । महाविस्मययोगेन सोमकः पूजितस्तराम् ॥ ५० ॥
दत्त्वा राज्यं स्वपुत्रेभ्यो महापद्मादयो नृपाः । समीपे वरसेनस्य सर्वेऽप्याशु प्रवव्रजुः ॥ ५१ ॥
सोमकादयो दृष्ट्वा नराः सम्यक्त्वपूर्वकम् । जिनधर्मं समादाय बभूवुः श्रावका वरे ॥ ५२ ॥
कनकश्रीरलताभार्या श्रेष्ठिनं प्राह विस्मिता । उमकं पूजितं दृष्ट्वा सम्यक्त्वं मम सुस्थितम् ॥ ५३ ॥

—शेषं पूर्ववत्—

॥ इति [5]श्रीमदज्ञातफलपरित्यागदृढव्रतसम्यक्त्वप्रभावनापूजितोमकदर्शन कनकलतादृढसम्यक्त्वसप्तमकथानकमिदं परिपूर्णम् ॥ ६९ ॥

---

1 ब वर्जिते 2 पद: युक्तम्, ज युक्तम्. 3 पज ब विविधः युक्तम्. 4 मनोऽभिलषितं 5 [टीपेकेक]. 6 ब omits इति श्री.

७० विद्युल्लतादिकथानकम् ।

विद्युल्लताभिधा भार्या सप्तमी श्रेष्ठिनी जगौ । श्रेष्ठी तव कथं कान्ते सम्यक्त्वं स्थिरतां गतम् ॥ १ ॥
निशम्य श्रेष्ठिनो वाक्यं जगौ विद्युल्लताऽपि तम् । विस्मयव्याप्तचेतस्कं तथाविकसितमानसा ॥ २ ॥
मनोरमाऽत्र पूर्वेऽस्मिन् विषये धनसंकुले । नगर्यां सूर्यकौशाम्ब्यां सुकण्ठो नाम भूपतिः ॥ ३ ॥
बभूवास्य महादेवी विजया नाम विश्रुता । एकोऽत्रैव पुरे श्रेष्ठी सुरदेवो वसत्यसौ ॥ ४ ॥
अनेन सुरदेवेन कलिङ्गविषयान्तरम् । वालभोऽत्र समानीतो मनोवातजवो महान् ॥ ५ ॥
दत्तस्तुरङ्गमोऽनेन सुकण्ठस्य महीपतेः । नृपेणास्य धनं दत्त्वा महाधनपतिः कृतः ॥ ६ ॥
सुरदेवोऽपि तत्प्राप्य धनमस्य महीपतेः । महाधनाधिपो भूत्वा तस्थौ मुदितमानसः ॥ ७ ॥
मुनिः श्रीषेणनामाऽत्र गृहपङ्क्त्या परिभ्रमन् । मासोपवाससंयुक्तो विवेश गृहमस्य सः ॥ ८ ॥
दृष्ट्वा स्वगृहमायातं सुरदेवो मुनिं तदा । समुत्थाय तरसाशु[1] जगाद स्थितिभोजिनम् ॥ ९ ॥
प्रतिग्रहं मुनिस्नानं चरणोदकपूजने । नतिमानसवाक्कायाहारशुद्धिः क्रमादिति ॥ १० ॥
एवमादिक्रियाः कृत्वा सुरदेवोऽतिभक्तितः । ददावाहारदानं च योगिने स्थितिभोजिने ॥ ११ ॥
दत्ते चाहारदानेऽस्मिन् सुरदेवस्य मन्दिरे । आश्चर्यपञ्चकं जातं भक्तितः किं न जायते ॥ १२ ॥
अत्रैव नगरे श्रेष्ठी दत्ताख्यः सागरादिकः । पुत्रः समुद्रदत्तोऽस्य श्रीदत्तागर्भसंभवः ॥ १३ ॥
वसुधारादिकं दृष्ट्वा सुरदेवगृहे तदा । दध्यौ समुद्रदत्तोऽयं महादारिद्र्यपीडितः ॥ १४ ॥
अहं तं देशमासाद्य वालभं चानये परम् । विभूतिमीदृशीं येन प्राप्नोमि सुखदायिनीम् ॥ १५ ॥
चिन्तयित्वा चिरं सोऽपि वणिग्भिः सप्तभिः सह । वणिज्यायै गतः शीघ्रं परदेशं धनेच्छया ॥ १६ ॥
तत्रस्थैर्मिलितैः प्रोक्तं सर्वैरपि परस्परम् । लोभपूरितचेतस्कैर्धनसंपादनेच्छुभिः ॥ १७ ॥
पलाशपूर्वके ग्रामे विधाय क्रयविक्रयम् । मिलितव्यं समं सर्वैः कृतसंतोषनिस्वनैः ॥ १८ ॥
एवं निगद्य ते सर्वे धनार्थं कोटिशीकृताः । सहायतां विहायाशु ययुर्मुदितचेतसः ॥ १९ ॥
स्थितः समुद्रदत्तोऽत्र ग्रामे धनसमन्विते । आसीदशोकनामात्र कुटुम्बी बहुगोधनः ॥ २० ॥
अशोकः सर्वसंपन्नो भरताख्यपुरे कुले । श्रुत्वा समुद्रदत्तोऽपि तत्स्वरूपं गतवानिमम् ॥ २१ ॥
दृष्ट्वा समुद्रदत्तं च जगादाशोकनामकः । किमर्थं त्वं समायातो मदन्तं भद्र सत्वरम् ॥ २२ ॥
अशोकवचनं श्रुत्वा जगादेममयं पुनः । त्वद्गवारक्षणं नूनं करोमि धनवाञ्छया ॥ २३ ॥
श्रुत्वा तद्वचनं सोऽपि जगादेतं पुरःस्थितम् । समाद्वये गते भद्र प्रधानाश्वौ ददामि ते ॥ २४ ॥
तदा समुद्रदत्तोऽपि तन्मतेन दिवानिशम् । तदश्वान् पालयंस्तस्थावशोकपवने मुदा ॥ २५ ॥
प्रभातेऽश्वान् समादाय वनं चञ्चत्तृणान्वितम् । प्रयाति प्रीतचेतस्कस्तत्पालनपरायणः ॥ २६ ॥
नानाफलानि पक्वानि सुपुष्पाणि मृदूनि च । वनादेत्य स सन्ध्यायां ददाति कमलश्रियः ॥ २७ ॥
एवं गच्छति सत्काले फलदानप्रवृत्तिभिः । प्रीतिः समुद्रदत्तेन बभूव कमलश्रियः ॥ २८ ॥
दृष्टेयं कन्यका दध्यौ गृहवासो यदि स्फुटम् । भविष्यति ममानेन नान्येन मनुजेन सः ॥ २९ ॥
अन्यदाऽऽभाषि सा तेन खेदनिर्भरमानसा । स्वदेशं यातुमिच्छामि सांप्रतं जननीसमम् ॥ ३० ॥
श्रुत्वाऽस्य वचनं कन्या सा सखेदमिदं जगौ । अहं त्वया समं यामि किंतु मद्वचनं शृणु ॥ ३१ ॥
तातस्यौ तिष्ठतः साश्वौ वालभावश्वकर्दमके । मन्मतेन गृहाणेमौ कुरु कार्यं यथेप्सितम् ॥ ३२ ॥

---

1 [तरसाशु]. 2 प फ कुम्भम् ज कुम्भम्. 3 ज चरत्यसौ 4 ज कमलश्रियः

तदाकर्ण्य ततोऽमुना सर्वे पानीतास्तुरगास्तदा । वाजिमध्येऽत्र कौ सारौ गृहाम्यश्ववरौ वद ॥ ३३ ॥
तदाकर्ण्य ततो जगादैषा लक्ष्मीविस्मितमानसा । सारावश्वाविमौ सारौ वाजिमध्ये मनोजवौ ॥ ३४ ॥
एकः खे याति वेगेन द्वितीयोऽपि जलोपरि । एतौ गृहाण वाजीन्द्रौ बहुमूल्यौ मनोहरौ ॥ ३५ ॥
उक्ता समुद्रदत्तेन सा कन्या कलनिस्वना । जानामि तौ कथं सारौ हरी ब्रूहि मनस्विनि ॥ ३६ ॥
तयाऽवाचि पुनः सोऽपि नितान्तं तरलाक्षया । एकः शुक्ले पक्षक्रमो रक्तोऽन्यः शुक्ललोचनः ॥ ३७ ॥
यः किलर्दुस्तदासीनः स्थिरकर्णो वराङ्गकः । वाद्ये स्थितः सदायानान् स चाश्वः सप्तिनायकः ॥ ३८ ॥
चलत्कर्णश्चपानो यः स रक्तो बल्यामकः । कथितौ ते मया चारू वाजिनौ च गृहाण तौ ॥ ३९ ॥
तदभिज्ञानतो ज्ञात्वा वाजिनौ सुमनोहरौ । कमठश्रियमियं प्राह तदुपाकृष्टमानसः ॥ ४० ॥
ज्ञातौ त्वदुपदेशेन वाजिनौ परमौ मया । अधुना यद्ब्रवीषि त्वं तदेव विदधाम्यहम् ॥ ४१ ॥
ततोऽभिलषितं[2] कृत्वा स्वमतं प्रीतमानसौ । तूष्णीभावमुपाश्रित्य तस्थतुस्तौ यथोचितम् ॥ ४२ ॥
अत्रान्तरे परिभ्रम्य पुरग्रामादिकं बहु । पलाशपूर्वके ग्रामे प्रासादे तत्समागमम् ॥ ४३ ॥
प्रासादेषु तेषु सर्वेषु प्रपूर्णे च समाश्रये । जगौ समुद्रदत्तोऽयमशोकं लोकवर्णितम् ॥ ४४ ॥
गृहं स्वामिन्नहं यामि स्वदेशं मातृवत्सलम् । तत्र देशे क्रियाः सर्वाः करिष्यामि मनोहराः[3] ॥ ४५ ॥
अशोकस्तद्वचः[4] श्रुत्वा जगादेदं ससंभ्रमम् । खेदनिर्भरचेतस्को बाष्पविप्लुतलोचनः ॥ ४६ ॥
सर्वलक्षणसंपूर्णौ [5]त्वन्मनोनयनप्रियौ । अश्वमध्ये गृहाण शावकावत्यन्तशोभनौ ॥ ४७ ॥
निशम्य गिरमेतस्य जगादेदं हरीश्वरम् । एकमश्वं हि मे देहि चेतरत्तुरगद्वये ॥ ४८ ॥
आकर्ण्य तद्वचो दत्तमशोकोऽपि समब्रवीत् । दुष्टावश्वाविमौ भद्र दुरोत्कलनकारिणौ ॥ ४९ ॥
दुष्कुलीनाकुलोपेतौ क्रूरैरशनभीषणौ । देशान्तरमपि प्राप्तौ शोकमुत्पादितौ खलौ ॥ ५० ॥
अथावेतौ विहायान्यौ सप्तिमध्ये मनोहरौ । गृहाण शोभनाकारौ बहुमूल्यौ कलस्वनौ ॥ ५१ ॥[6]
तदाकर्ण्य पुनः प्रोक्तोऽशोकोऽनेन मनीषिणा । अश्वौ पूर्वोदितौ हित्वा नान्यौ गृह्णामि निश्चितम् ॥ ५२ ॥
देशिकोक्तं समाकर्ण्य स्वगृहं प्राप्य वेगतः । पप्रच्छेति धनं सर्वं स्वकीयं सखिनायकः ॥ ५३ ॥
देशिकस्यास्य केनायं सूरीष्ठपरीक्षणे । उपदेशो वितीर्णोऽसौ ब्रूत मे लघु सज्जनाः ॥ ५४ ॥
भूयोभूयः समुक्तेऽपि यदा वक्ति न कोऽपि तत् । तदाऽशोकेन विज्ञातं सुतास्येक्षणतः स्फुटम् ॥ ५५ ॥
उपदेशः प्रदत्तोऽस्मै मत्सुता कमलश्रिया । एवं ज्ञात्वाऽमुना चित्ते स्थितं निश्चितचेतसा ॥ ५६ ॥
समुद्रदत्तमाहूय द्रव्यं[7] रूप्यमार्पयत् । ददावस्मै प्रयत्नेन कन्यां च कमलश्रियम् ॥ ५७ ॥
शोभने दिननक्षत्रे योगे च रजनीपतौ । विधिनेदं तदा वृत्तं पाणिग्रहणमेतयोः ॥ ५८ ॥
ततो बहुधनं दत्त्वा तद्गुरुत्तरदय तदा । अश्ववरौ मुदा क्षिप्रमशोकस्तौ विसृष्टवान् ॥ ५९ ॥
भार्ययाऽश्वद्वयेनापि समस्तैः सह वाणिजैः । तदाऽसौ नावमारूढो नदीनोत्तरणं प्रति ॥ ६० ॥
आलसक्रूरमाक्षेप्य वार्धिमध्ये स नाविकः । जगौ समुद्रदत्तं च पूर्वं कुटिलमानसः ॥ ६१ ॥
यदि त्वं देहि मे क्षिप्रमश्वमेकं मनोहरम् । वार्धितीरे नयामि त्वां नान्यथा मे ममोदितम् ॥ ६२ ॥
नाविकस्य वचः श्रुत्वा जगादेदं स वाणिजः । यदस्त्येतं मया ते च तद्ददामि न चापरम् ॥ ६३ ॥
यथापि नाविकेनायं यदि न देहि मेऽश्वकम्[8] । ततोऽग्रपं मायोऽहं मदीयाया विलंघयम् ॥ ६४ ॥
नाविकोक्तं समाकर्ण्य जगादेदं वणिक्पतिः । अतोऽहमुत्तरिष्यामि नाश्वमेकं ददामि ते ॥ ६५ ॥

1 पश चलि: शुक्लम्, ज चलत्कर्णामिलम्. 2 [ततोऽभिलषितं] 3 पप शुल्कम्, ज शुल्कम्. 4 पक नन्दिचौ 5 पप शुल्कम् ज शुल्कम्. 6 पपज शिशि शुल्कम्. 7 [सत्प च]. 8 [यदि मे देहि मयाश्वम्].

एवमुक्त्वा समुत्तीर्य जल्यानाद्वर वणिक् । एकमश्व समारुह्य तत्समं गगनायनम् ॥ ६६ ॥
द्वितीय रश्मिनाऽऽकृष्य तुरङ्गं जल्यायिनम् । प्रापतु सूर्यकौशाम्बीं तदानीं तौ वधू-वरौ ॥६७॥
जल्पयन् समर्प्यैकं तुरङ्ग कमठश्रियः । आदायाकाशग सोऽपि जगाम नृपमन्दिरम् ॥ ६८ ॥
सूरीश्च समालोक्य हरिल्लक्षणलक्षितम् । आह्लाद ददावस्मै भूषण तोषतो नृप ॥ ६९ ॥
अनर्घ्योपपदां सेनां प्रासाद सप्तभूमिकम् । अर्धराज्य प्रदायास्मै जगादाथ महीपतिः ॥ ७० ॥
सरासूपमसेनस्य श्रावकस्य महात्मन । अश्व पालयितु चाह भूभुजाऽर्ग्य समर्पित ॥ ७१ ॥
आदाय ततुरङ्गं च स्वहस्तेन प्रयत्नत । स्नापयामास स श्रेष्ठी स्वगृहे भूमिगोचरे ॥ ७२ ॥
श्रेष्ठी तमश्वमारुह्य सुन्दर पर्ववासरे । विजयार्धगिरौ चैत्ये वन्दनार्थं जगाम स ॥ ७३ ॥
तत्रत्यसिद्धकूटान्ते तुरङ्गादवतीर्य स । कृत्वा प्रदक्षिणं चाश्य तदन्त स्तौति स जिनम् ॥ ७४ ॥
अश्वोऽपि श्रेष्ठिना सार्धं त्रि परीत्य जिनालयम् । चैत्यालये विनीतात्मा तिष्ठति प्रीतमानस ॥७५॥
जिनस्तुतिं विधायात्र श्रेष्ठी पूर्वविधानत । भूयस्तमश्वमारुह्य सूर्यकौशाम्बिक ययौ ॥ ७६ ॥
ततोऽसौ सूर्यकौशाम्ब्यां मुनिसंघसमन्वितम् । आचार्य जिनदत्ताख्यं शस्तम याति भक्तित ॥७७॥
तत्र श्रेष्ठी समं तेन त्रि परीत्य जिनालयम् । विवेशाभ्यन्तरं तस्य तद्बहिस्तुरगोऽभवत् ॥ ७८ ॥
तत्र चैत्य मुनिं नत्वा भक्तिप्रह्वतनूरुह । श्रेष्ठीमं सप्तिमारुह्य प्रययौ स्वनिकेतनम् ॥ ७९ ॥
अन्यदा भूपतिं प्राह जितशत्रु समागतान् । पल्ली प्रत्यन्तवासी च ढ्लाटन्यस्तपाणिकान् ॥८०॥
नगर्यां सूर्यकौशाम्ब्यां शक्रस्य महीपते । आत्मभो हि नभोयायी श्रेष्ठिगृहे वितिष्ठते ॥ ८१ ॥
यस्तमश्वं मनोवेग नभस्थलविसर्पिणम् । क्षिप्रमानयति सार्धं ददाम्यस्मै महाधनम् ॥ ८२ ॥
जितशत्रुवच श्रुत्वा सहस्रभटसञ्ज्ञक । जगादेमं विनीतात्मा सभामध्ये भटोत्तमः ॥ ८३ ॥
आनयामि तव क्षिप्रमादित्यरथगामिनम् । धरास्थेन तुरङ्गेण न गम्यं मे नरेश्वर ॥ ८४ ॥
एवमुक्त्वा पुरस्तस्य निर्गत्य स तदन्तिकात् । आदाय क्षौल्लकं रूपं सूर्यकौशाम्बिकां ययौ ॥ ८५ ॥[1]
दृष्ट्वा तं क्षुल्लकं तेन धर्मवात्सल्यकारणात् । श्रेष्ठिना संगृहीतोऽसावित्थमकारं प्रकुर्वता ॥ ८६ ॥
अथ लोचनरोगोत्थां मायां कृत्वा सुदुष्टधी । तस्थौ स तद्गृहे तत्र फुल्लवक्त्रसुखानन ॥ ८७ ॥
वने प्रकम्पितं तस्य सत्सभापमवसरे । यथाऽयं क्षुल्लकः श्रेष्ठिन् धर्मध्यानोऽतिधार्मिकः ॥ ८८ ॥
तथाऽपि श्रेष्ठिना तस्य धर्मवात्सल्यमिच्छता । पृष्टेन दर्शित शीघ्रं तुरङ्गो रूपराजित ॥ ८९ ॥
दृष्ट्वाऽस्य तस्कर प्राह श्रेष्ठिन विनयानत । अहमस्य प्रयत्नेन करोमि परिरक्षणम् ॥ ९० ॥
श्रुत्वाऽस्य वचनं श्रेष्ठी धर्माणेम पुरःसरम् । एवमस्त्विति संभाष्य तुरगोऽस्य समर्पितः ॥ ९१ ॥
अथार्धं पालयन् धूर्तो नक्तमादाय स पुन । जगाम सूर्यकौशाम्ब्याः सहस्रभटनामकः ॥ ९२ ॥
अत्रान्तरे प्रमुक्तेन तेनाश्वेन प्रधावता । पतितो विषमस्थाने तस्करो मृतिमाप स ॥ ९३ ॥
विजयार्धनगं प्राप्य त्रि परीत्य तुरङ्गमः । सिद्धकूटे महाकूटे तस्थौ भक्त्या सदक्षये ॥ ९४ ॥
चारणौ ज्ञानसंपन्नौ सिद्धकूटजिनालये । तस्थौ चित्रगतिस्तत्र मनोगतिरपि क्रमात् ॥ ९५ ॥
अथ विद्याधरस्तत्र प्राह चित्रमतिं मुनिम् । दिव्यज्ञानसमायुक्त कौतुकव्याप्तमानस ॥ ९६ ॥
नाथ सप्तिरयं कस्य तिष्ठति प्रीतमानस । उच्यतां सिद्धकूटाग्रे ब्रूहि मे सांप्रतं मुने ॥ ९७ ॥
श्रुत्वा तद्वचनं साधुर्जगादेमं पुर स्थितम् । कौतुकव्याप्तचेतस्कं दिव्यज्ञानविलोचन ॥ ९८ ॥

1 पफ धर्मार्थं, 2 प शिक्ष 3 पफज लिखि मुनयम्, 4 पफ मुग्धम्, ज मुग्धम्, 5 ज दृष्टारं 6 फ अथ सं. 7 पफ मुग्धम्, ज मुग्धम्,

नगर्यां सूर्यकौशाम्ब्यां मायारूपो नभश्चरः । स श्रेष्ठिनो गृहे चाश्वं मुमोच गगनायनम् ॥ ९९ ॥
जितशत्रुनृपप्रोक्तः सहस्रभटनामकः । आरुरोह तुरङ्गं स प्रसादाय प्रधावतः ॥ १०० ॥
अधिरुह्य तुरङ्गं स यावद्गच्छति खाङ्गणे । तावदुत्पत्य यानेन पातितोऽयं मृतिं गतः ॥ १०१ ॥
पूर्वस्मिन् श्रेष्ठिना सार्धं समायातोऽत्र खेचरः । अमुना जिनकूट्याग्रे तिष्ठति स्थिरमानसः ॥ १०२ ॥
सांप्रतं स्कन्धदेशे स्वं करेणास्फाल्य द्रुतम् । धारयत्यं प्रयत्नेन तुरङ्गं व्योमचारिणम् ॥ १०३ ॥
धारणोऽर्कं समाकर्ण्य खेचरः प्रीतमानसः । स्कन्धे धारयत्यं शीघ्रं करेणाहत्य वाजिनम् ॥ १०४ ॥
आरुरोह स तत्पृष्ठे विस्मयव्याप्तमानसः । सूर्यकौशाम्बिकाम्याश तुरङ्गः प्राप वेगतः ॥ १०५ ॥
अथ श्रेष्ठी परिज्ञाय वाजिनं गगनायनम् । मायाप्रपञ्चयुक्तेन हृतं तेन दुरात्मना ॥ १०६ ॥
प्रत्याख्यानं समादाय त्रिविधं जिनसाक्षिकम् । कायोत्सर्गेण संतस्थे चैत्यगेहे वनस्थिते ॥ १०७ ॥
अत्रान्तरे स विज्ञाय नृपोऽयं जैनचिह्नकम् । चुकोप श्रेष्ठिने सद्यः प्रमत्तस्त्वन्यमर्षे ॥ १०८ ॥
कोपतः प्राह भूपाले नरान् निकटवर्तिनः । गम्भीरध्वनिना चाशु दिशः प्रतिनिनादिना ॥ १०९ ॥
रे रे नरा दुराचारं श्रेष्ठिनं तं प्रमादिनम् । निहत्य तद्धनं सर्वं समानयत सत्वरम् ॥ ११० ॥
नृपाज्ञानन्तरं यावच्छ्रेष्ठिपार्श्वं प्रयान्ति ते । तावद्देवतया सर्वे स्तम्भिता जिनवेश्मनि ॥ १११ ॥
भूपोऽपि तावदागत्य त्रिःपरीत्य जिनालयम् । श्रेष्ठिपार्श्वे समं तस्थौ विनयानतमस्तकः ॥ ११२ ॥
अहो धन्यतरः श्रेष्ठी धन्यधर्मा जिनप्रियः । नभस्था दिव्यवाक्यानि वदन्ति सरसाः सुराः ॥ ११३ ॥
अहो जैनस्य धर्मस्य माहात्म्यं भुवनातिगम् । येनोपसर्गभीत्याद्यं शमयन्ति सुरेश्वराः ॥ ११४ ॥
उपसर्गे क्षयं याते देवैः सर्वैः प्रपूजितः । महाविस्मयमापन्नैर्महाविभवयोगतः ॥ ११५ ॥
देवैः प्रपूजितं दृष्ट्वा श्रेष्ठिनं प्रीतमानसाः । नृपपौरादयः सर्वे चक्रिरेऽस्य क्षमापनम् ॥ ११६ ॥
ततो नृपमहाश्रेष्ठीमन्त्रिपौरादयो नृपाः । जिनदत्तान्तिके दीक्षां जगृहुः शुद्धचेतसः ॥ ११७ ॥
दृष्ट्वाऽऽश्चर्यमिदं तस्य श्रेष्ठिनो गुणशालिनः । समुद्रोपपदो दत्तः सहर्यं कमठप्रिया ॥ ११८ ॥
अन्येऽपि भव्यसत्त्वा विस्मयव्याप्तमानसाः । जिनधर्मं च सम्यक्त्वं प्राप्य श्रावकतामिताः ॥ ११९ ॥
ततो विबुद्धया प्राह श्रेष्ठिनं रमणीयुतम् । कौतुकव्याप्तचेतस्कः जिनाङ्घ्रिकमलालिनम् ॥ १२० ॥
प्रातिहार्यमिदं दृष्ट्वा विहितं सुरकुञ्जरैः । एतस्य दृढसम्यक्त्वा जाताऽहं मनसा प्रिय ॥ १२१ ॥
तद्वचः शोभनं श्रुत्वा चार्हदासो जगौ प्रियाः । जिनयोपसिताश्चात्र अन्योऽस्त्वन्वेषणा ॥ १२२ ॥
मया सुष्ठु श्रुतं दृष्टं कथितं सुष्ठु शोभनम् । तथा सुष्ठु श्रुतं नूनमस्माभिः कृतनिश्चये ॥ १२३ ॥
भक्षयामि तरेर्वोपैस्तत् प्रत्येमि दिवानिशम् । रोचनं स्पर्शनं चापि विदधामि मुहुर्मुहुः ॥ १२४ ॥
श्रुत्वा तद्वचनं कान्तं तदा कुन्दलता परा । सत्कार्यां पश्चिमा प्राह तर्कं विस्मितमानसा ॥ १२५ ॥
तच्छ्रेष्ठिप्रातिहार्यं च न दृष्टं सुष्ठु चालिके । न सुष्ठु कथितं किंचित् सुष्ठु श्रुतमेव च ॥ १२६ ॥
तथा न भक्षयामीति न प्रत्येमि कदाचन । रोचनं स्पर्शनं चैव न करोमि मनागपि ॥ १२७ ॥
दृष्ट्वा वृत्तान्तमीदृक्षं श्रेष्ठिनो विहतात्मनः । न जाता दृढसम्यक्त्वा न धर्मस्थिरबुद्धिका ॥ १२८ ॥
श्रेष्ठिभाषामिमां श्रुत्वा राजा मन्त्री च तस्करः । चक्री विस्मितचेतस्को नरके तत्समाश्रितः ॥ १२९ ॥
एतस्याः श्रेष्ठिभार्यायाः प्रभातसमये द्रुतम् । निग्रहं हि करिष्यामि साहसेन कुपोषितः ॥ १३० ॥
अन्यासां श्रेष्ठिपत्नीनां विस्मयाकुलचेतसाम् । महापूजां करिष्यामि महाविभवयोगतः ॥ १३१ ॥

---

1 पफज महाकम्पितस्य. 2 पफ कुन्तम् ज कुन्तम्. 3 पफ कुन्तम्, ज कुन्तम्. 4 [कल्पनां]. 5 पफ कुन्तम् ज कुन्तम्. 6 पफ कपट. 7 पफ कुन्तम्, ज कुन्तम्. 8 पफज विस्मय.

चिन्तयित्वा चिरं तत्र प्रभाते वरुणाख्यतः । उत्तीर्य नृपतिः शीघ्रं विवेश स्वपुरं तदा ॥ १३२ ॥
नृपः श्रेष्ठिगृहं प्राप्य स्थित्वा तेन प्रयत्नतः । पप्रच्छ नक्तमाख्यानमुपवासपरिश्रमम् ॥ १३३ ॥
राजा पुनरपि प्राह श्रेष्ठिनीः श्रेष्ठिपूर्वकम् । भवन्मध्ये तु का वक्ति क्षणदायां महात्मना ॥१३४॥
प्रोच्यमाने धराख्याने भवतीभिः परस्परम् । स्नेहातिशयमुक्ताभिधर्मरञ्जितबुद्धिभिः ॥ १३५ ॥
यथा न सुष्ठु दृष्टं मे न सुष्ठु कथितं तथा । न सुष्ठु श्रुतमेवेदं सर्वं च परिवर्जितम् ॥ १३६ ॥
न भक्षयाम्यहं किंचिन्न प्रत्येमि च किंचन । रोचनं स्पर्शनं नापि विदधामि महीतले ॥ १३७ ॥
इदं किं जानत प्रोक्तं कथाऽप्यज्ञानतोऽपि वा । ननु संक्षेपतः सर्वं कथ्यतां मम सांप्रतम् ॥१३८॥[1]
श्रुत्वाऽस्य वचनं सापि जगादेमं पुरः स्थिता । नक्तं मया महाराज भर्त्राऽऽख्यानं प्रभाषितम् ॥१३९॥
निशम्य भारतीमसौ विस्मयस्मितमानसः । भूयोऽपि ते वदन्तीमां नारीं कुन्दलताभिधाम् ॥१४०॥
यथा कुन्दलताख्यानमस्माभिः कृतनिर्णये । दृष्टं श्रुतानुभूतं च स्वप्रत्यक्षं तनूदरि ॥ १४१ ॥
किं कारणमिदं भूपे दृष्टं सुष्ठु न किंचन । न सुष्ठु कथितं किंचिन्न सुष्ठु श्रुतमेव कौ ॥ १४२ ॥
न भक्षयामि किंचिच्च न प्रत्येमि कदाचन । रोचनं स्पर्शनं चापि न करोमि धरातले ॥१४३॥[2]
एवं पृष्टा च तैरेषा वदन्तीमान् पुरःस्थितान् । कौतुकव्याप्तचेतस्कान् नृपश्च सचिवादिकान् ॥ १४४ ॥
जिनधर्मप्रवीणानि सर्वाण्येतानि भूपते । विस्मयव्याप्तचित्तानि कृतकोलाहलानि च ॥ १४५ ॥
जिनधर्मस्य माहात्म्यं सर्वसौख्यप्रदस्य च । वीतरागपदं न कुर्वन्ति दक्षाः कर्मविनाशने ॥ १४६ ॥
प्रयोजनेन चैतेन मयैव ते प्रवर्तिता । दुर्दृष्टं दुःश्रुतं चैव तथा दुःकथितं भुवि ॥ १४७ ॥
जिनधर्मस्य माहात्म्यं प्रत्यक्षं न मयेक्षितम् । कथ्यमानं श्रुतं चापि हरिदत्तायाः कथानकम् ॥१४८॥
प्रत्यक्षं जिनधर्मस्य माहात्म्यमहमद्य च । प्रत्यक्षं तत्समादाय विदधामि तपोऽमलम् ॥ १४९ ॥[4]
तद्वाक्यतत्समस्तुष्य वदन्तीमां नृपादयः । यथेदं शोभनं भद्रे त्वया निगदितं क्षितौ ॥ १५० ॥
त्वमेव दृढसम्यक्त्वा जिनधर्मपरायणा । धन्या बुद्धिसमुत्तुङ्गा प्रशस्तगुणविस्तरा ॥ १५१ ॥
कुन्दादिकलतान्तायाः सम्यक्त्वं विधुनिर्मलम् । तथा शीलमुदारं च प्रशस्यातीव शोभनम् ॥१५२॥
तदोदितोदयो राजा सुबुद्धिः सचिवोऽपि वा । अर्हद्दासस्तथा श्रेष्ठी सुवर्णखुरतस्करः ॥ १५३ ॥
वितीर्य स्वस्वपुत्रस्य स्वपदं बहवो नृपाः । श्रीधरान्ते दधुर्दीक्षां महावैराग्यसंगताः ॥ १५४ ॥
उदितोदयमहादेव्यो मित्रश्रीप्रमुखास्त्रियः । रूपमार्याश्रियः पार्श्वे जगृहुर्जिनदीक्षणम् ॥ १५५ ॥
अन्येऽपि बहवो लोका विस्मयव्याप्तमानसाः । जिनधर्मं ससम्यक्त्वं जगृहुः शुद्धचेतसा ॥१५६॥

॥ [5]इति श्रीअर्हद्दासश्रेष्ठीमित्रश्रीप्रमुखाष्टभार्या
दृढसम्यक्त्वकथानकमिदम् ॥ ७० ॥

७१ छेलककथानकम् ।

मालिकाख्यपुराख्यस्य पश्चिमस्यां दिशि स्फुटम् । कुडुमोपपदो देशो विद्यते धनसंकुलः ॥ १ ॥
तत्र धान्यधनाकीर्णो बहुलोकसमाकुलः । पलाशपूर्वको ग्रामो महातरुसमन्वितः ॥ २ ॥
सुरदासोऽत्र शुभग्रामे ग्रामकूटो महाधनः । सुरदासी तत्प्रिया भार्या तन्मनोनयनप्रिया ॥ ३ ॥
वसुदासोऽनयोः पुत्रस्तन्मानसमतिस्तुषः । विनयी रूपसंपन्नो बभूव दयितस्तयोः ॥ ४ ॥

1 कप चतुष्कम्, ज चतुष्कम्, 2 पफज चतुष्कम्, 3 पफ वदन्तीमान्, 4 पफज विधि दुष्कम्, 5 पफ दुष्कम् ज दुष्कम्, 6 ज omits क्षितौ and reads वदन्त'

पद्मिनीवनसंछन्नं महाजलसरोवरम् । कारापितं सुदासेन चक्रवाकादिनादितम् ॥ ५ ॥
तत्समीपे समुत्तुङ्गं नानाऽम्भोजसंकुलम्[1] । नन्दनादिवनं तेन कारितं पद्मिनन्दनम् ॥ ६ ॥
तन्मध्ये च समुत्तुङ्गं शिरीकृतनभस्तलम् । अमुना कारितं चारु सागारं ध्वजभूषितम् ॥ ७ ॥
तन्मध्ये विकटाट्टासा भृकुटीभीषणाकृतिः । मारीव जीवसंघानां दुर्गादेवी प्रतिष्ठिता ॥ ८ ॥
सहस्रनिहतैर्जीवैर्महिषाजाविकादिभिः । मासपट्टे जनैः सार्धं दुर्गापूजां करोति सः ॥ ९ ॥
अन्यदा व्याधिसंग्रस्तः सुदासः स्वल्पजीवितः । आजुहाव निजं पुत्रं स्वनरेण त्वरान्वितः ॥ १० ॥
समागतं स्थितः पुत्रं जगादेदं पुरः स्थितम् । तदा कण्ठगतप्राणश्चण्डिकाभक्तितत्परः ॥ ११ ॥
मासपट्टे त्वयाऽवश्यं वर्षं वर्षं प्रति स्फुटम् । नितरां चण्डिकापूजा कर्तव्या महिषादिभिः ॥ १२ ॥
सुदासवचनं श्रुत्वा वसुदासो जगाविदम् । चण्डिकापूजनं तात करिष्याम्यजकादिभिः ॥ १३ ॥
वसुदासवचः श्रुत्वा तन्मतप्रीतमानसः । सुदासः पञ्चतामाशु प्राप्तवान् क्रूरमानसः ॥ १४ ॥
पलाशकोपपदे ग्रामे तस्मिन्नेव सुदासकः । बभूव छेलकः पापात् तदा अजवाटके ॥ १५ ॥
छेलको यौवनं प्राप्ते मासपट्टे वराककः । मण्डितः पिष्टचूर्णेन पुष्पमालाभिरञ्चितः ॥ १६ ॥
देवतापादमूले च जनक्षेमकारिणा । निहतो वसुदासेन छेलको दीनमानसः ॥ १७ ॥
महानसं परिप्राप्य तन्मांसं च सुसंस्कृतम् । भक्षितं वसुदासेन महासंतोषकारिणा ॥ १८ ॥
अनेनैव विधानेन छेलकः सप्तजन्मसु । निहतो वसुदासेन जनकोक्तविधायिना ॥ १९ ॥
वसुदासपिता पूर्वं सुदासः कर्मयोगतः । भूयोऽपि छेलको जातस्तदाऽष्टमभवान्तरे ॥ २० ॥
मण्डितः पीतसिक्थेन पुष्पमालापरिष्कृतः । वसुदासेन नीतोऽसौ वधार्थं देवतान्तिकम् ॥ २१ ॥
तदुद्यानवने तेन छेलकेन सुवेपिना । दृष्टः समाधिगुप्ताख्यो मुनिस्तरुतले सुधीः ॥ २२ ॥
जातिस्मरत्वमासाद्य छेलको मुनिदर्शनात् । यतेः समीपतां प्राप्य दीनं नादं समुच्चरन् ॥ २३ ॥
भगवन् मोचनं मेऽत्र कारापय महामते । येनाहं त्वत्प्रसादेन तिष्ठामि स्वेच्छया भुवि ॥ २४ ॥
छेलकस्य वचः श्रुत्वा जगादेवं यतीश्वरः । अहं त्वन्मोचने भद्र न समर्थो मनागपि ॥ २५ ॥
यत्त्वया विहितं कर्म भुङ्क्ष्व त्वमशुभोदयम् । अतस्त्वन्मोचने भद्र न प्रभुर्वसुधातले ॥ २६ ॥
श्रुत्वा मुनिवचः तत्र वसुदासो जगाविदम् । अनेन छेलकेनामा किं मुने वद मेऽधुना ॥ २७ ॥
अथापि साधुना भूयो वसुदासः पुरः स्थितः । विस्मयव्याप्तचेतस्के बहुलोकसमावृतः ॥ २८ ॥
छेलकोऽयं भवत्तातः सुदासाख्योऽन्यजन्मनि । त्वयाऽयं देवतामूले निहतः सप्तवारकम् ॥ २९ ॥
अधुनाऽष्टमवेलायां जातोऽयं छेलको महान् । भवता नेतुमारब्धो देवतापादमूलकम् ॥ ३० ॥
दृष्ट्वा मां छेलको भद्र भयवेपितविग्रहः । जगाद भयचेतस्कोऽधुना गद्गदनिस्वनः ॥ ३१ ॥
यथा मे मोचनं क्षिप्रं कारापय मुनीश्वर । सर्वसत्त्वदयोपेतः समस्तजनबान्धव ॥ ३२ ॥
परित्रायस्व मां नाथ परित्रायस्व पावन । परित्राणपरित्यक्तं पापिष्ठं पापसंभवम् ॥ ३३ ॥
एवं ब्रुवन्नयं भद्र विह्वलीभूतमानसः । अस्माभिर्विदितो भाव भवान्तरनिवासिभिः ॥ ३४ ॥
त्वया जीववधः पूर्वं विभूतिमणिमीप्सता । विहितो मन्दभाग्येन पापोपार्जनकारिणा ॥ ३५ ॥
सांप्रतं ते परित्राणं विधातुं क्षममप्यहम् । न शक्नोमि स्फुटं वत्स प्रतीहि वचनं मम ॥ ३६ ॥
आकर्ण्य तद्वचः क्रुद्धो जगादैवं यतीश्वरम् । वसुदासो जनाध्यक्षः कोपारक्तनिरीक्षणः ॥ ३७ ॥

1 ज मानाऽम्भ° 2 पफ पुष्पम्, ज पुष्पम 3 पफ पुष्पम् ज पुष्पम्, 4 पफ पुष्पम्, ज पुष्पम्. 5 [येन...पाप्यम]. 6 [illegible]

उद्यानवनमीदृक्षं सारङ्गं च सितप्रभम् । महासरोवरं रम्यं पद्मेन्दीवरराजितम् ॥ ३८ ॥
देवतापूजनं कृत्वा सद्भावैर्विविधैरिमैः । कृतकृत्यो[1] मृतिं प्राप्य मत्पिता सुखमानसः ॥ ३९ ॥
यदि मोक्षं न यातोऽयं सन्देहो दैवयोगतः । नाकं तु निश्चितं साधो गच्छति स्थिरमानसः ॥ ४० ॥
तिर्यग्गतिसमुद्भूतो बहुपापविधायकः । मत्पिता धर्मसंयुक्तः क्षेल्लको जायते कथम् ॥ ४१ ॥[2]
वसुदासोदितं श्रुत्वा जगादेदं मुनीश्वरः । दिव्यज्ञानसमायुक्तो धर्ममूर्तिवपुर्धरः ॥ ४२ ॥
जीवहिंसनयुक्तेन धर्मेणानेन बालक[3] । स्वर्गो न जायते नूनं देहिनां पापकारिणाम् ॥ ४३ ॥[4]
मुनिवाक्यं समाकर्ण्य वसुदासोऽपि तं जगौ । बहुना शुष्कवादेन किं कृतेन शुभकृत्युना ॥ ४४ ॥
काले प्रकुर्वता नाथ मत्पित्रा मोहकारिणा । धनं परागतं तेन स्थापितं मे न भाषितम् ॥ ४५ ॥
मयानस्तद्धनं क्वापि चिरकालं निरूपयन् । अपश्यन् दुःखितो भूत्वा स्थितोऽहं मुनिनायक ॥४६॥
तद्धनं यदि मे सर्वं साधो दर्शयतेऽखिलम् । ततोऽयं मत्पिता नूनं मयेदेव न चान्यथा ॥४७॥[5]
वसुदासवचः श्रुत्वा क्षेल्लकं निजगौ मुनिः । यदि त्वं धनमेतस्य स्फुटं दर्शयसे ध्रुवम् ॥ ४८ ॥
ततस्त्वां मुञ्चति क्षिप्रं वसुदासो भवत्सुतः । नैवं करोषि चेत्तस्मान्मुञ्चत्येष न निश्चितम् ॥ ४९ ॥[6]
निशम्य मुनिचन्द्रस्य वचनं पावनं नृणाम् । क्षेल्लकोऽसौ मुनिं प्राह स्वकीयध्वनिना कलम् ॥५०॥
मुने मुञ्चति चेदेष मां धनं चिरसञ्चितम् । ततोऽहं दर्शयाम्यस्य प्राणेभ्यः किं धनं बहु ॥ ५१ ॥[7]
दिव्यज्ञानेन तद्वार्तां विदित्वा मुनिसत्तमः । वसुदासं जगादायं विस्मयव्याप्तमानसम् ॥ ५२ ॥
यत्प्रदेशे ध्रुवं गत्वा स्वकीयचरणेन च । अयं तिष्ठति तत्रैव धनं तत्रास्ति ते परम् ॥ ५३ ॥[8]
निगद्येनं मुनिः स्पष्टं क्षेल्लकं वक्ति च पुनः । अनेन विधिना सर्वं धनं पुत्रस्य दर्शय ॥ ५४ ॥
क्षेल्लको मुनिवाक्येन बहुलोकसमावृतः । जगाम प्राक्तनं क्षेत्रं महाधनसमन्वितम् ॥ ५५ ॥
खात्वा स्वधनभूमिं च पुरः पादखुरेण सः । तिष्ठति स्म तदा मन्दं क्षेल्लकः प्रीतमानसः ॥ ५६ ॥
अनर्घ्यरत्नसंघातं महारत्नविमिश्रितम् । प्रवालमौक्तिकोपेतं रत्नादिमहाधनम् ॥ ५७ ॥
तत्प्रदेशे विलोक्येदं वसुदासः सबान्धवः । महावैराग्यसम्पन्नो दध्याविति स चेतसि ॥ ५८ ॥
मत्पितुः सकलं ज्ञानं जन्मान्तरमिदं स्फुटम् । दिव्यज्ञानसमेतेन साधुना साधुना कथम् ॥ ५९ ॥
चिन्तयित्वा स्वपुत्राय धनं दत्त्वा विशुद्धधीः । समाधिगुप्तसामीप्ये वसुदासोऽग्रहीत् तपः ॥६०॥
पञ्चाणुव्रतसंयुक्तं चतुःशिक्षाव्रतान्वितम् । गुणव्रतत्रिकसंयुक्तं सम्यक्त्वादिसमन्वितम् ॥ ६१ ॥
मुनेः समाधिगुप्तस्य समीपे क्षेल्लकः शकः । गृहिधर्मं समादाय तस्थौ मुदितमानसः ॥ ६२ ॥[9]
आश्चर्यमिदमालोक्य ग्रामीणः सकलो जनः । छागघातं जगामाय देवता च भयान्विता ॥ ६३ ॥
जीवहिंसां विहायाशु महादुःखविधायिनीम् । जिनधर्मं च जग्राह स्वर्गमोक्षप्रदायकम् ॥ ६४ ॥[10]

॥ इति [11]श्रीपलाशकूटग्रामोत्पन्नवसुदासग्रामकूटदेवताजीव-
हिंसाफलसंजातक्षेल्लककथानकमिदम् ॥ ७१ ॥

*

1 पफ [illegible] 2 पफ चतुष्पदकम्, ज चतुष्पदकम्. 3 [बालक]. 4 पफ युग्मम् ज युग्मम्. 5 पफज चतुष्पदकम्. 6 पफ युग्मम् ज युग्मम्. 7 पफ युग्मम्, ज युग्मम्. 8 पफ युग्मम्, ज युग्मम्. 9 पफ युग्मम्, ज युग्मम्. 10 पफ युग्मम्, ज युग्मम्. 11 ज omits इति श्री.

७२ मृगसेनधीवरकथानकम् ।

अवन्तीसन्महादेशे शिप्राख्यासरितस्तटे । शिंशपाख्योऽभवद् ग्रामो धीवरौघसमन्वितः ॥ १ ॥
बभूव भवदेवाख्यो धीवरः पापकारकः । भवश्रीरस्य भार्या च मृगसेनोऽनयोः सुतः ॥ २ ॥
सोमदासोऽभवत् तत्र धीवरः क्रूरमानसः । सेनाऽस्य गेहिनी नाम घण्टास्या तनयाऽनयोः ॥ ३ ॥
मृगसेनेन सा घण्टा परिणीता विधानतः । तद्गृहे तिष्ठति प्रीता गृहीतपतिमानसा ॥ ४ ॥
तत्र पार्श्वजिनेन्द्रस्य भवनं बहुभूमिकम् । विद्यते शोभनाकारं शुभ्रीकृतनभस्तलम् ॥ ५ ॥
अन्यदा संघयुक्तोऽपि धनान्वी नयपूर्वकः । आचार्यो विहरन्नार पार्श्वनाथजिनालयम् ॥ ६ ॥
मृगसेनो मुनिं प्राप्य धर्मं श्रुत्वा जिनोदितम् । प्रथमं जालगं मीनं मुने मुञ्चामि सर्वदा ॥ ७ ॥
गृहीत्वेदं व्रतं सोऽपि तदाचार्यात् ततः क्षणात् । जगाम निम्नगां शीघ्रं स्कन्धारोपितजालकः ॥ ८ ॥
तस्या ह्रदे च गम्भीरे धीवरः कृतनिस्वनः । जालं चिक्षेप विश्रब्धः प्रसारितकरेण सः ॥ ९ ॥
आकृष्टेऽनेन जालेन घसन्मीनः स जाले महान् । एको वृषः प्रमुक्तोऽयं गृहीतव्रतयोगतः ॥ १० ॥
मुक्त्वाऽमुं तेन संक्षिप्तं जालं तत्सलिले पुनः । गृहीतः प्राक्तनो मत्स्यो मुक्तो भूयोऽप्यनेन सः ॥ ११ ॥
गृहीतो प्राक्तनो मीनो धीवरेण महातनुः । साभिज्ञानं विधायास तेन मुक्तः पुनः सकः ॥ १२ ॥
भूयोऽप्यनेन संक्षिप्तं जालं तन्निम्नगाजले । नूनं चिरत्नो मीनो गृहीतो दैवयोगतः ॥ १३ ॥
मुक्त्वा तं महामीनं निर्विण्णो रिक्तजैवकम् । स्कन्धमारोप्य संध्यायां धीवरः स्वगृहं ययौ ॥ १४ ॥
मृगसेनं प्रियं दृष्ट्वा स्वगृहे रिक्तजैवकम् । जगाद निष्ठुराक्रान्ता घण्टा तं रमणी तदा ॥ १५ ॥
किमर्थं मद्गृहे पाप गृहीत्वा रिक्तजैवकम् । आगतोऽसि दुराचार यथावृत्तं वदाशु मे ॥ १६ ॥
घण्टावचनमाकर्ण्य मृगसेनो जगाद ताम् । इदं व्रतं मया कान्ते गृहीतं साधुसंनिधौ ॥ १७ ॥
क्षिप्ते जाले घटे मत्स्यः प्रथमं यः पतिष्यति । महानपि स मे नूनं मोक्तव्यः संशयं विना ॥ १८ ॥
इदं व्रतं समादाय धीवरैः सह वेगतः । शिप्रां नदीं गतः कान्ते ग्रहीतुं झषकानहम् ॥ १९ ॥
क्षिप्तं जालं मया तस्यां प्रिये वारचतुष्टयम् । मुक्तो मुक्तः पुनर्मीनः स एवात्र पतत्यलम् ॥ २० ॥
मुक्त्वा मत्स्यमहं मुग्धे नूनं वारचतुष्टयम् । आगतः स्वगृहं तेन रिक्तजैवकसंयुतः ॥ २१ ॥
मृगसेनोदितं श्रुत्वा घण्टा वदति तं रुषा । जालैः सहाद्य यास्यामि पश्यतां भोजनं विना ॥ २२ ॥
दुष्ट पापिष्ठ याहि त्वं मदीयान्मन्दिरादरम् । निशम्य तद्वचः सोऽपि निर्जगामाकुलः पुनः ॥ २३ ॥
मृगसेनो निशि प्राप्य शून्यं देवकुलं तदा । सुप्तो रात्रिं परिप्राप्य सर्पदष्टः स तत्क्षणात् ॥ २४ ॥
मृगसेनप्रिया घण्टा बुभुक्षाग्रस्तमानसा । अन्वेषयन्त्यथ प्राप प्रियं प्राणपरिच्युतम् ॥ २५ ॥
दृष्ट्वा पञ्चत्वं स हि तत्रैव मतमस्तु मे । इति ध्यात्वा ससर्पे सा बिले हस्तं समर्पयत् ॥ २६ ॥
तेनैव दन्दशूकेन दष्टाऽसौ क्रूरचेतसा । तत्रैव पञ्चतां प्राप नियतिः केन लङ्घ्यते ॥ २७ ॥
अत्रान्तरे पुरि श्रीमदुज्जयिन्यां प्रतापवान् । राजा वृषभदत्तोऽभून्महासामन्तसेवितः ॥ २८ ॥
रूपयौवनसंयुक्ता पीनोन्नतघनस्तनी । वृषभोपपदा दत्ता बभूवास्य नितम्बिनी ॥ २९ ॥
तस्यैव भूपतेः श्रेष्ठी गुणपालोऽभवद् धनी । गुणश्रीरस्य भार्या च गुणरञ्जितभूतला ॥ ३० ॥
घण्टाऽऽख्या धीवरी या च मृता मन्दकषायतः । साऽनयोर्दुहिता जाता विषाख्याऽतिमनोहरी ॥ ३१ ॥
सार्थवाहोऽभवत् तस्मिन् श्रीदत्तः श्रीसमन्वितः । तद्भार्या श्रीमती नाम श्रीकीर्तिसमविभ्रमा ॥ ३२ ॥
मृगसेनो मृतिं प्राप्य धीवरो जिनभक्तितः । विनयी रूपसंपन्नः सोमदत्तोऽनयोः सुतः ॥ ३३ ॥

1 पव सुप्तम् ज सुप्ताम्, 2 पव चतुष्टयम् ज चतुष्टयम् 3 [धीवर]. 4 पव सर्पदष्ट.

मातृगर्भस्थितस्यास्य पिता मृत्युमुपागतः । जातमात्रेण चानेन जननी परिभक्षिता ॥ ३४ ॥
यथा यथा व्रजन् वृद्धिं बालोऽयं पूर्वपापतः । तथा तथा क्षयं यातं कुलमस्य निर्मूलतः[1] ॥ ३५ ॥
एवं कुलक्षये जाते बुभुक्षाग्रस्तमानसः । गुणपालगृहं प्राप सोमदत्तोऽशनेच्छया ॥ ३६ ॥
तद्भूमिभोजनोच्छिष्टशरावस्थितसिक्थकम् । भुञ्जानस्तिष्ठति प्रीत्या सोमदत्तस्तदाद्यतः ॥ ३७ ॥
एवं हि तिष्ठतस्तस्य समयात्स्थविरो मुनिः । आजगाम तद्गृहेऽथ द्वितीयमुनिसंयुतः ॥ ३८ ॥
दृष्ट्वा तं सुन्दराकारं कनिष्ठो मुनिरब्रवीत् । ज्येष्ठं जनकमातृभ्यां बन्धुभिः परिवर्जितम् ॥ ३९ ॥
भक्षयन् सिक्थमेकैकं शरावस्थितमादरात् । बालोऽयं लक्षणोपेतो धिक् संसारमसारकम् ॥४०॥[2]
मुनेरस्य वचः श्रुत्वा ज्यायान् वदति स यतिः । अवधिज्ञाननेत्रेण विज्ञातपरमार्थकः ॥ ४१ ॥
यथाऽयं दारको भद्र गुणपालस्य धीमतः । स्वामी धनस्य सर्वस्य भविष्यति भविष्यति ॥ ४२ ॥[3]
यथैतस्य मुनेर्वाक्यं गच्छतो विनिशम्य सः । गुणपालो मनस्युच्चैर्दध्यौ विस्मितमानसः ॥ ४३ ॥
धनं मे दैशिकस्यास्य किं भविष्यति पुत्रिणः । अथवाऽमोघसद्वाक्या श्रमणा भवति क्षितौ ॥४४॥
एवं विचिन्त्य भूयस्तां समाहूय नराधमम् । जगाद निष्ठुरस्वान्तस्तकं चाण्डालं प्रति ॥ ४५ ॥
धनं तेऽहं प्रदास्यामि नानाभेदसमन्वितम् । नीत्वाऽमुं बालकं क्वापि कुर्वीतस्य निपातनम् ॥४६॥[4]
तद्वाक्यतो हि मातङ्गः स्कन्धमारोप्य बालकम् । निनाय गहनं शीघ्रं नानानोकुहसंकुलम् ॥ ४७ ॥
मुक्त्वा तं बालकं तत्र नदीतीरे वनान्तिके । श्रेष्ठिनं प्राप्य मातङ्गो कृतमस्य जगाद सः ॥ ४८ ॥
स्नात्वा नद्यां जलं पीत्वा कृत्वा च फलभक्षणम् । सुष्वाप वटवृक्षस्य मूले बालः सुखेप्सितः ॥४९॥
अत्रान्तरे समागत्य गोविन्दो बल्लवो धनी । ददर्श बालकं सुप्तं वटमूले सुलक्षणम् ॥ ५० ॥
आदाय तं कुमारं च गोविन्दः प्राप्तसम्मदः । धनमित्रा स्वभार्यायाः ददौ पुत्रमुदीरयन् ॥ ५१ ॥
तयाऽपि पुत्रभावेन वर्धितो दुग्धघृतादिना । वृद्धिं तरामसौ नीतः कन्दर्पसमविभ्रमः ॥ ५२ ॥
बालं युवत्वमापन्नं गोविन्दगृहसंगतम् । गुणपालोऽत्र संप्राप्य ददर्शेमं ससंभ्रमम् ॥ ५३ ॥
गुणपालः परिज्ञाय प्राक्तनं दारकं तदा । जगाद बल्लवं श्रेष्ठी विस्मयाकुलमानसः ॥ ५४ ॥
कुमारः कस्य पुत्रोऽयं विनयी रूपराजितः । सौम्यो नवीनगाम्भीर्यो मन्मथो वा सविग्रहः ॥५५॥[5]
गोपालं वचः श्रुत्वा गोविन्दोऽपि तकं जगौ । मत्पुत्रोऽयं गुणाधानः श्रेष्ठिन् मे कुलनन्दनः ॥५६॥
तथापि श्रेष्ठिना भूयो बल्लवः प्रीतमानसः । सोमदत्तं भवत्पुत्रं त्वं प्रेषय मद्गृहम् ॥ ५७ ॥
श्रेष्ठिवाक्येन संपृष्टो गोविन्देन शरीरजः । षोडशाभरणोपेतो महावस्त्रविभूषितः ॥ ५८ ॥
ततो लेखं प्रदायास्मै सोमदत्तो विसर्जितः । गुणपालेन भार्यायाः सन्मुखं स्वहितैषिणा ॥ ५९ ॥
त्वया गुणप्रिया नूनं मद्गेहिन्या प्रवीणया । असै विषं प्रदातव्यं लेखवाहाय निश्चितम् ॥ ६० ॥
अथ लेखं समादाय सोमदत्तस्तदन्वितः । तदुद्यानवनं प्राप्य तरुमूले स सुप्तवान् ॥ ६१ ॥
वसन्ततिलका नाम गणिकाऽक्षरकोविदा । तस्य सुप्तस्य कण्ठस्थं लेखं पश्यति रूपिणः ॥ ६२ ॥
तत्कण्ठाल्लेखमादाय प्रमुच्य स्वकरेण सा । सर्वं वाचयति स्पष्टं तत्प्रवृत्तप्रेक्षणा ॥ ६३ ॥
अहं गृहं न यावच्च समायामि नितम्बिनि । तावद्विषं प्रदातव्यं लेखवाहाय सत्वरम् ॥ ६४ ॥
विज्ञाय लेखसंबन्धं वसन्ततिलका तदा । युवा रूपी नरो धीरः कथं यास्यति पञ्चताम् ॥ ६५ ॥
अहं गृहं न यावच्च समायामि नितम्बिनि । तावद्विषा प्रदातव्या लेखवाहाय मत्सुता ॥ ६६ ॥

1 [सन्मूलम्]. 2 पफ कुम्मम्, ज कुमकम्. 3 पफ कुम्मम्, ज कुमकम्. 4 पफज अनुपमकम्.
5 पफ कुम्मम्, ज कुमकम्.

प्रार्थंकृत्य मठे लेखं सोमदत्तस्य रूपिणः । वसन्ततिलका क्षीणं ययौ धाम मनीषितम् ॥ ६७ ॥
सोमदत्तः समुत्थाय तदानीं तत्समुत्सुकः । मोहयन् कामिनीलोकं गुणपालगृहं ययौ ॥ ६८ ॥
यथोपविश्य तद्गेहे सोमदत्तो यथाक्रमम् । महाबलपुरो लेखं मुमोच प्रीतमानसः ॥ ६९ ॥
दारासमेतं सहस्तेन लेखं वाचयति स्फुटम् । महाबलो बलोपेतो धननीबन्धुसाक्षिकम् ॥ ७० ॥
महाजनसमूहेन विषा देया त्वया सुता । धननीबन्धुमुखेन महासंतोषकारिणा ॥ ७१ ॥
विवाहो मत्समीपे च तूर्यमङ्गलनिस्वनैः । विषातम्यो महाप्रज्ञा सानुरागो महाबल ॥ ७२ ॥
धन्न्या बन्धुलोकस्य लेखार्थं सकलं तदा । महाबलोऽगदच्छ्रीमं तोषकम्पितविग्रहः ॥ ७३ ॥
तुरङ्गकरिरत्नानि वस्त्रभरणानि च । नानावीणादिवाद्यानि महान्यासौ समग्रकम् ॥ ७४ ॥
शोभने दिननक्षत्रे योगे च रजनीपते । तोषतो विधिना तूर्णं पाणिग्रहणमेतयोः ॥ ७५ ॥
यावच्च वेदिमध्ये तिष्ठतस्तौ वधूवरौ । तावत् स वणिक् प्राप्तो मन्दिरं स्वं विभुप्रभम् ॥ ७६ ॥
दृष्ट्वा वधूवरौ श्रेष्ठी कोपलोहितलोचनः । वृत्तिपूसरदेहोऽपि तस्थिवान् शयनेऽसुरः ॥ ७७ ॥
विलोक्य पितरं तत्र शयनीये व्यवस्थितम् । महाबलो जगादैतं मुक्ताफलनिभेक्षणम् ॥ ७८ ॥
विवाहो विधिना वृत्तस्त्वन्मतेन महामते । किमर्थं मौनमादाय स्थितोऽस्यवाप्तानिव ॥ ७९ ॥
महाबलवचः श्रुत्वा गुणपालो जगाद तम् । प्रसूनपुष्पनिश्वासं म्लानवक्त्रसरोरुहः ॥ ८० ॥
नागच्छामि न यावच्च सुताहं गृहमात्मनः । तावत्त्वया विधात्या हि विवाहो विधिवत् ध्रुवम् ॥ ८१ ॥
निशम्य वचनं सोऽपि जगौ तातं महाबलः । त्वत्प्रसादीयलेखेन विवाहो विहितो मया ॥ ८२ ॥
दत्त्वा बहुधनं दत्त्वा महासामन्तसाक्षिकम् । पूर्वा मनोरथाकारा नितान्तं विहिता मया ॥ ८३ ॥
पुत्रवाक्यमहाघूर्णनिरुद्धीभूतमानसः । तस्थौ शय्यातले श्रेष्ठी गुणपालोऽतिविस्मितः ॥ ८४ ॥
गुणश्रीः श्रेष्ठिनी प्राप्य गुणपालं सुदुःखितम् । जगाद विस्मितस्वान्ता वद मे शोककारणम् ॥ ८५ ॥
गुणश्रीरमणीवाक्यं गुणपालो निशम्य च । जगौ स पूर्ववृत्तान्तं समस्तं स समोपितः ॥ ८६ ॥
धूपपुष्पादिकं दत्त्वा संध्याकाले त्वं वैश्यकः । प्रेषितो गुणपालेन जामाता नागमन्दिरम् ॥ ८७ ॥
धूपादिकं समादाय संध्यायां तिमिरान्तरे । महाबलेन जामाता व्रजन् दृष्टोऽसहायकः ॥ ८८ ॥
तत्कार्यद् वणिक्पुत्रस्य हस्ते तं च निधाय सः । महाबलो विनीतात्मा ययौ नागनिकेतनम् ॥ ८९ ॥
तत्र च श्रेष्ठिना पूर्वं घातकः स्थापितो यथा । संध्यायां च समायाति स हन्तव्यस्त्वया ध्रुवम् ॥ ९० ॥
यावन्नागगृहस्यान्तर्विशति प्रीतमानसः । तावत् स निहतोऽनेन मातङ्गेन सितासिना ॥ ९१ ॥
श्रेष्ठी जामातरं दृष्ट्वा जीवन्तं सपुरः स्थितम् । सुतं च निहतं तत्र मौनी दुःखी स तस्थिवान् ॥ ९२ ॥
अथान्तरे प्रियां प्राह गुणपालो विषादवान् । कान्ते जामातरं चाद्य निहन्मीमं न कारणम् ॥ ९३ ॥
अथवा केनचिद्युक्त्या पापोपायेन विनाशनम् । शत्रुभूतस्य जामातुः कुरु शीघ्रं मयोदितम् ॥ ९४ ॥
तत्सद्वचनाच्छ्रीमं मोदकान् विषगर्भितान् । गुणश्रिया कृता दिव्या धन्यामोदितदिग्मुखाः ॥ ९५ ॥
ततः सुतां प्रियां प्राह गुणश्रीर्निष्ठुराशया । जामाय मोदकानेतान् देहि स्वप्रीतिकारिणे ॥ ९६ ॥
माऽन्यस्मै मधुमोदकानेतान् प्रदास्यसि मनस्विनि । एवमुक्त्वा सुतामेषा निर्ययौ स्वगृहादरम् ॥ ९७ ॥
एतस्मिन्नन्तरे श्रेष्ठी गुणपालो प्रियां तदा । सुमुखामरुक्षचेतस्को निजगाद सुतामिमाम् ॥ ९८ ॥
अहं राज्ञा समाहूतः कार्येण महता सुते । मद् गृहे भोजनं किंचिद् विद्यते देहि तन्मम ॥ ९९ ॥

1 पफ पत्नी: गुम्फम्, ब परगुम्फम्, 2 पफ गुम्फम्, ब गुम्फम्, 3 [विस्मयाद् परवानिव].
4 पफ गुम्फम्, ब गुम्फम्, 5 पफ गुम्फम् ब गुम्फम्, 6 पफ गुम्फम् ब गुम्फम्, 7 [विहते].
8 पफ गुम्फम्, ब गुम्फम्, 9 पफ गुम्फम्, ब गुम्फम्.

ततस्तद्याचयत शीघ्रं मोदकान् विषगर्भितान् । वितीर्णा गुणपालस्य विपदा हितकारणात् ॥ १०० ॥
ततस्तान्मोदकान् भुक्त्वा विषाढ्यान् हिताशया । गुणपालो ममाराशु तदानीं विषयोगतः ॥ १०१ ॥
श्रेष्ठिनी च मृतं दृष्ट्वा भर्तारं शोकविह्वला । गुणश्रीः पञ्चतां प्राप भुक्त्वा सा विषमोदकम् ॥ १०२ ॥
मृतयोरनयोस्तत्र सोमदत्तं नरेश्वरः । आहूयात्मसामीप्यं तोषपूरितमानसः ॥ १०३ ॥
सपुत्रीमर्धराज्यं च गुणपालधनं नृपः । वितीर्य सोमदत्ताय राजश्रेष्ठिपदं ददौ ॥ १०४ ॥
एवं कृतेऽमुना राज्ञा राजश्रेष्ठी स्वपत्तने । मानसेष्टान्महाभोगान् बुभुजे प्रीतमानसः ॥ १०५ ॥
सुकेतुसूरिसंज्ञाय[1] दत्त्वाऽऽहारविधिं तथा । पञ्चातिशयसंप्राप्तिं दुःप्राप्यां प्राप्य शोभनाम् ॥ १०६ ॥
श्रुत्वा पूर्वभवं तस्मात् तथा लक्ष्मीसमागमम् । तपो विधाय जैनेन्द्रं संक्लिष्टपरिवर्जितम् ॥ १०७ ॥
आराधनां समाराध्य विधिना हि चतुर्विधाम् । प्राप सर्वार्थसिद्धिं च सोमदत्तो मुनीश्वरः ॥ १०८ ॥[2]
एकमीनदयां भक्त्या चतुर्वारसमुद्भवाम् । चकार मृगसेनाख्यो धीवरो मृदुमानसः ॥ १०९ ॥
सोमदत्तभवे प्राप्य तद्दयां स चतुर्विधाम् । नरविपत्समासाद्य देवः सर्वार्थसिद्धिजः ॥ ११० ॥

॥ इति श्रीमृगसेनधीवरमीनैकदयाकरसोमदत्तसंभव
सदयारक्षणकथानकम् ॥ ७२ ॥

*

७३ यशोधरचन्द्रमतीकथानकम् ।

अस्त्यवन्तीमहादेशे श्रीमदुज्जयिनी पुरी । कीर्त्यौघोऽस्यां नृपोऽस्यापि भार्या चन्द्रमती शुभा ॥ १ ॥
यशोधरोऽनयोः पुत्रः पुत्रजन्माभिलाषिणोः । बभूव रूपसंपन्नो विनयी न पराजितः ॥ २ ॥
रूपराजितसर्वाङ्गी नीलोत्पलदलेक्षणा । अमृतादिमहादेवी बभूवास्य मनःप्रिया ॥ ३ ॥
यशोमतिकुमाराख्यस्तनयोऽजनि विक्रमी । विनयाचारसंपन्नस्तनयोः कुलनन्दनः ॥ ४ ॥
अन्यदा दर्पणे दृष्ट्वा निर्मले पलिताङ्कुरम् । कीर्त्यौघः सद्विरक्तो वैराग्यं स समाश्रितः ॥ ५ ॥
यशोधरकुमाराय दत्त्वा राज्यश्रियं नृपः । अभिनन्दनसामीप्ये दीक्षां दैगम्बरीं दधौ ॥ ६ ॥
नमत्समस्तसामन्तमस्तकोपात्तशासनः । चकार विपुलं राज्यमुभयविन्ध्यां यशोधरः ॥ ७ ॥
अमृतादिमहादेव्या कामभोगं यथेप्सया । यशोधरस्तदा हर्म्ये भुञ्जानो व्यवतिष्ठते ॥ ८ ॥
अन्यदा कुब्जकेनामा भुञ्जाना सुरतं निशि । दृष्ट्वा यशोधरः कान्तां महावैराग्यमीयिवान् ॥ ९ ॥
समागम्य स्थितो नूनं प्रणम्याकरमाश्रयम् । अलीकस्वप्नसंबन्धं मातुः कथयाम्यहम् ॥ १० ॥
आकर्णयाम्बिके स्वप्नम् रात्रौ मयेक्षितः । स्वप्नो विलोकितः क्षिप्रं पश्चिमप्रहरे किल ॥ ११ ॥
अहं यावत्ततस्तस्मात् प्रासादात् सप्तभूमिकात् । पतितोऽस्मि धरापृष्ठे पाषाणशकलाचिते ॥ १२ ॥
प्रासादस्थैर्नरैः शीघ्रमसत्यस्तुतिकारिभिः । मायाप्रपञ्चसंयुक्तैः संस्तुतोऽस्मि समुत्थितः ॥ १३ ॥
यशोमतिकुमारस्य राज्यपदं नियुज्य च । महावैराग्यसंपन्नस्तपो जैनेश्वरं श्रितः ॥ १४ ॥
यशोधरोदितं श्रुत्वा जगौ चन्द्रमती वचः । न शोभनस्त्वया स्वप्नो दृष्टो वत्सक सांप्रतम् ॥ १५ ॥
सहस्रनिहतैर्जीवैः प्रपूज्य कुलदेवताम् । शान्तिकर्म विधातव्यं त्वया निश्चितचेतसा ॥ १६ ॥
कृत्वेदं सकलं पुत्र शान्तिकर्मविधायकम् । भविष्यति पुनः क्षिप्रं तथापि स्वस्थदीक्षणम् ॥ १७ ॥
स मातृवचनं श्रुत्वा यशोधरनृपेण तत् । प्रतिपन्नं तदा सर्वं तन्मतं हितमिच्छता ॥ १८ ॥

---

1 अ योरिय. 2 क चकुं. 3 चकार विधिः कुक्कुटम्. 4 अ omits इति श्री and adds इदम् at the end. 5 [प्रासादात् सप्तभूमिकात्]. 6 ...

चन्द्रमत्या सहानेन यशोधरनृपेण च । निहतो देवतामूले पिष्टनिर्मितकुक्कुटः ॥ १९ ॥
तेन पापविपाकेन महादेव्या समं ततौ । निहतौ विषयोगेन मोदकस्थेन तत्क्षणात् ॥ २० ॥
हिमवद्दक्षिणाशायां नानातरुविराजितः । एकोऽस्ति पर्वतस्तुङ्गः सिंहव्याघ्रविभीषणः ॥ २१ ॥
मयूरीगर्भतो जातः शिखी तत्र यशोधरः । धूर्तेकेन मनुष्येण तन्माता निहता तदा ॥ २२ ॥
ततः स केनचित्तस्मादादाय परिपालितः । यशोमतिकुमारस्य आनीतो प्राभृतेच्छया ॥ २३ ॥
यशोमतिकुमारेण दृष्ट्वासौ तोषकारणात् । गृहीतो रममाणोऽसौ नृपसौधे वितिष्ठते ॥ २४ ॥
या तु चन्द्रमती नाम तन्माता पूर्वजन्मनि । करहाटेऽभवत्सोऽपि मण्डले मषिताङ्गकः ॥ २५ ॥
ततोऽसौ केनचित्तस्मादानीतः प्राभृतेच्छया । यशोमतिकुमारस्य श्रीमदुज्जयिनीं पुरीम् ॥ २६ ॥
दृष्ट्वा तं तोषमासाद्य गृहीतो मण्डलोऽमुना । समर्पितः प्रयत्नेन स्वपतेः पुरुषस्य च ॥ २७ ॥
एवं च तौ कुमारस्य वल्लभौ सुतरां भुवि । मयूरमण्डलौ ख्यातौ पूर्वजन्मसमागमात् ॥ २८ ॥
प्रासादशिखरस्थेन मयूरेण विलोकितः । गवाक्षस्थेन तन्मध्ये रत्नदीपप्रभोत्कटे ॥ २९ ॥
यावदन्तरे जार विरचितसवलोकनम् । तावद्व्यातिस्मरः शीघ्रं चञ्चूसार्य शिखावलः ॥ ३० ॥
ततः स्वान्तःपुरं तत्र पश्यता शिखिना तदा । पूर्वोक्तकुब्जकासक्ता महादेवी विलोकिता ॥ ३१ ॥
दृष्ट्वा रतिं प्रकुर्वाणौ तौ तदानीं च कोपतः । सपादनखपातेन निहतौ शिखिना हृदि ॥ ३२ ॥
ततो रतिसुखिताभ्यां समस्तिमुपपीडितः । ताभ्यां गतोऽसुतः सोपानान्मयूरो भवविहङ्गः ॥ ३३ ॥
रममाणं तदा पूर्वं यशोमतिनरेश्वरः । प्रासादशिखरात्तस्मात् प्राप्तवान् स शिखी सरन् ॥ ३४ ॥
दृष्ट्वा मयूरमायान्तं भेरिकाष्ठिकनिग्रहम् । मण्डलः प्राप्य तं वेगाच्चकार गतजीवितम् ॥ ३५ ॥
सोऽपि मा मृगया धूपकल्केन समाहतः । मस्तके पतितां प्राप्य पपात भुवि निष्क्रियः ॥ ३६ ॥
ततस्तौ पतितौ प्राप्तौ विलोक्य प्रजाधिपः । चकार विह्वलस्ताभ्यां विलापं सुनिदुःखतरम् ॥ ३७ ॥
कृत्वा शोकं चिरं तौ च दग्धौ श्रीचन्दनादिभिः । मन्दाकिन्यां तदस्थीनि प्रापयामास भूपतिः ॥ ३८ ॥
सुवर्णरत्नरूप्याणि गोधनादीनि भूरिशः । सर्वसौख्यस्थितीभूतौ तदुद्दिश्य नृपो ददौ ॥ ३९ ॥
ततो दक्षिणदिग्भागे सुवेलाख्यो महीभृतः । आसीत् सिंहविसर्पौघद्रुमपेशलवनम् ॥ ४० ॥
क्वचिकायां पत्न्यां हि कुष्टेन पशुकेन च । जनितो जाहको भीमो स मयूरचरो महान् ॥ ४१ ॥
सुदुष्करवनवन्यासा कुष्ठनामकचेतसः । समाद्दुर्गमपश्यस्तं क्षेमे स च मनागपि ॥ ४२ ॥
महीविवरवासस्य जाहकस्य क्षुधार्तिनः । क्षीरं भुक्तिमायातं भुञ्जानस्य सरीसृपान् ॥ ४३ ॥
या तु चन्द्रमती भूप मण्डलेन मृतिं गता । तस्मिन्नेव महीधरे स कृष्णसर्पो बभूव सा ॥ ४४ ॥
प्रहृष्टः खादितुं पाषकर्दुरान् स भुजङ्गमः । तावत् पुच्छप्रदेशेऽयं गृहीतो जाहकेन च ॥ ४५ ॥
ततस्तेन भुजङ्गेन पश्चात् कृत्वाऽवसर्पणम् । गृहीतो वदने कोपाज्जाहको दशनैररिः ॥ ४६ ॥
अन्योन्यभक्षणं पापकलुषौ क्रुधाऽन्वितौ । तावत् स जाहको वेगात्तरक्षेण निपातितः ॥ ४७ ॥
तदानीं कृष्णसर्पोऽपि तस्यामेव विदारितः । इत्याय मरणं वैरं पुण्येन हि शाम्यते ॥ ४८ ॥
योऽसौ हि जाहकस्तत्र तरक्षेण निपातितः । बभूव रोहितो मीनः सिप्रायाः सरितो ह्रदे ॥ ४९ ॥
कृष्णसर्पोऽपि तत्रैव कालं कृत्वा भयानकः । शिंशुमारोऽभवद्दीर्घः कालपाशसमाकृतिः ॥ ५० ॥
मीनोऽपि विहरन् क्वापि सन् ह्रदे सलिलेऽमले । पुच्छदेशे गृहीतोऽयं भीमदंष्ट्रेण वेगतः ॥ ५१ ॥
अत्रान्तरे नरेन्द्रस्य कुब्जवामनकादिकम् । पेटकं स्नातुमायातं प्रविष्टं तज्जलेऽमले ॥ ५२ ॥

---

1 क ज श्रीमदुज्जयनी 2 [चक्रमाल].

एका वामनिका तत्र क्रीडन्ती तस्य सन्मठे । मीनोपरि पपाताशु तन्महत्त्वरिका वरा ॥ ५३ ॥
हते हारेण तेनाशु मुक्त्वा मीनं प्रकम्पितः । गृहीता चरणे कोपात् तदा वामनिकाऽमुना ॥ ५४ ॥
गृहीतमात्रया वेगात् तया हि रटितं तया । मया सीमन्तिनीपिष्टं क्रीडां हित्वा पलायितम् ॥५५॥
कुब्जवामनिकासंघैर्भयवेपितविग्रहैः । किलवदन्ती च सा सर्वा नरेन्द्रस्य निवेदिता ॥ ५६ ॥
सिप्रानदीह्रदे राजन् तव वल्लभिका सताम् । नक्रेण मीनरूपेण ग्रस्ता वामनिकाऽधुना ॥ ५७ ॥[1]
श्रुत्वा तद्वचनं राजा कोपप्रज्वलितलोचनः । समस्तधीवरान् प्राह स्वनादापूरिताम्बरः ॥ ५८ ॥
भो भो धीवरकाः शीघ्रं बध्नन्तो मीनराशयः । यावन्तः सीमपर्यन्त्या मत्क्रियायोऽभ्योगतः ॥ ५९ ॥
ततस्तद्वचनान्ते च जालमन्यादाय वेगतः । सिप्रानदीह्रदं शीघ्रं जग्मुर्मुदितचेतसः ॥ ६० ॥
मीनोऽपि शिशुमारेण[2] विमुक्ते ह्रदतः क्षणात् । भीतः पलायनं चक्रे याति सर्वं हि जीवितम् ॥ ६१ ॥
ततस्ते युगपत् सर्वे ह्रदस्यान्तश्चरास्तथा । सिप्रानदीह्रदान्ते च घनजालानि चिक्षिपुः ॥ ६२ ॥
जालैस्ते हारमादाय धीवराः प्रीतचेतसः । यशोमतिकुमारस्य समगुः पुरतः क्षणात् ॥ ६३ ॥
भूयो हारं पुरो धृत्वा धीवरान् निजगौ तदा । जयदेनं पुराचारमिन्द्रस्थानं निवारितम् ॥ ६४ ॥
स्वकन्धनसंबन्धो[3] जीवत्यपि स दुःखवी । प्रियतामेष तत्रस्थो नूनं कुमरणातुरः ॥ ६५ ॥[4]
क्षापयत पुच्छनीतिं संसमार स धीवरैः । यष्ट्योऽमीभिर्धृत्य तत्र कुर्वतो मृत्युमीयिवान् ॥ ६६ ॥
अन्यदा धीवरैर्जालं निक्षिप्तं प्राप्य तं ह्रदम् । आनीतो रोहितो मत्स्यो जलस्थो भुवस्तलम् ॥ ६७ ॥
ततोऽसौ रोहितो मीनो जीवन्नपि च धीवरैः । यशोमतिनरेन्द्रस्य नीतोऽत्र प्राभृतेच्छया ॥ ६८ ॥
दृष्ट्वा तं रोहितं मत्स्यं स्वपुरस्योपनीयुषा । अमृतादिमहादेव्याः स मातुः प्रेषितोऽन्तिकम् ॥ ६९ ॥
तस्य रोहितमीनस्य पक्वेन सरसेन च । द्विजानां भोजनं देव जनकादिकृते शुभम् ॥ ७० ॥
श्रुत्वा तद्वचनं मीनो भूत्वा जातिस्मरः क्षणात् । अमृतादिमहादेवी पश्यन् यावद्विचिन्तयते[5] ॥ ७१ ॥
यावत्तत्कुम्भसम्बन्धं च महादेवीमवेन हि । नीतं महानसं क्षिप्रं जनकादिकृते तदा ॥ ७२ ॥
अन्यद्दुरितं यच्च मातस्त्वत्समक्षं[6] निशि । भविष्यति तव सद्य ममापि प्रीतिकारणम् ॥ ७३ ॥
भूतलपञ्चारे च तत्स्वरूपं निहितं तया । मीनो मृतिं परिप्राप्य स्वकर्मवशतः क्षणे ॥ ७४ ॥
शिशुमारो मृतिं प्राप्य जाताऽजा पापपाटके । मीनस्तद्गर्भमासाद्य बभूव छेलको महान् ॥ ७५ ॥
ततो यौवनमासाद्य सोऽपि रूढः स्वमातरि । शुक्रनिर्गमकाले च स्वमेनान्येन मारितः ॥ ७६ ॥
विधाय गर्भसंभूतिं स्वमातुर्दुःखमानसः । मिषं स्वमेन स जीवो मृतिं[7] सज्जाप्रसारितः ॥ ७७ ॥
अत्रान्तरे हि पापर्द्धौ निर्जगाम नराधिपः । दृष्ट्वा गर्भसंयुक्तां छेलिकां स्वपुरस्थिताम् ॥ ७८ ॥
यशोमतिकुमारेण छेलिका बाणघाततः । वराकी निहताऽनेन पतिता सा भुवस्तले[8] ॥ ७९ ॥
प्रपाट्योदरमेतस्यास्तत्क्षणेन नराधमैः । छेलकः शोभनाकारस्तत्कुक्षेः पातितो भुवि ॥ ८० ॥
दृष्ट्वा तदर्भकं राजा कृपाकम्पिताशयः । तदा समर्पयामास छेलिकापालकस्य तम् ॥ ८१ ॥
क्रमेण यौवनं प्राप्य भागिनेयीसुतादिभिः । अजाभिः सह कुर्वाणो मैथुनं स वितिष्ठते ॥ ८२ ॥
अन्यदा भूमिनाथेन पापर्द्धिरमिच्छता । कुलदेव्याः समुद्दिश्य चरन्ता विंशतिः परम् ॥ ८३ ॥
अक्षताक्षेपयोगेन पापर्द्धिक्रूरचेतसः । बभूव सफला तस्य पापोपार्जनकारिणः ॥ ८४ ॥
कुलदेव्या वितीर्णास्ते कात्यायिन्याः प्रमोदिना । चरन्ताः पूर्णकामेन भूभुजा भक्तिमीयुषा ॥८५॥

---

1 पप्र कुम्भम्, ज कुम्भम्. 2 [शिशुमारेण]. 3 [धीवरो]. 4 पप्र कुम्भम्, ज कुम्भकम्. 5 पप्र वायवीचीरः. 6 द मातस्त्वत्समक्षं. 7 पप्र पर्व. 8 [भुवस्तले].

तन्मांसमक्षिकापूर्णं शाल्मलीपुष्पसंनिभम् । महानसगतं भूरिपुत्तपुत्रैर्विसिष्ठते ॥ ८६ ॥
तथापि भूपतिस्तत्र सूपकारेण सत्वरम् । मदेवस् पिशितं किंचिदुच्छिष्ट कमकम्पकैः ॥ ८७ ॥
शम्भेलुकेन चाभातं पूत भवति भूपते । कार्येऽत्र त्वं महाराज प्रमाणं मापरो भुवि ॥ ८८ ॥
सूपकारवचः श्रुत्वा यशोधरो नरेश्वरः । कौतुकव्याप्तचेतस्कस्तन्मतप्रीतमानसः ॥ ८९ ॥
भक्षितं कुर्वता साधो शोभनं भवितं त्वया । करोमि त्वद्वचः क्षिप्रं देवमाहनपूजितम् ॥ ९० ॥
तन्मतेन समानीतस्त्वेककाले मृगुणा हृतम् । तस्मौ जातिस्मरो भूत्वा पिष्टिताने महानसे ॥ ९१ ॥
तदाऽऽज्ञप्तमहादेवी सूपकारं जगाद सा । महिषाणां न मे मांसं रोचतेऽद्य मनागपि ॥ ९२ ॥
अन्येषां जीवराशीनां किंचिन्मांसं समानय । येनेमा जायते प्रीतिर्मम चित्तस्य सांप्रतम् ॥ ९३ ॥
जननीवाक्यमाकर्ण्य यशोमतिनरेश्वरः । सूपकारं जगादैव मातृस्नेहपरायणः ॥ ९४ ॥
अधुना मेण्डकस्यास्य मांसं सत्कृत्य चानय । येन मे जननी वत्स तिष्ठति प्रीतमानसा ॥ ९५ ॥
भूपालवचनात् तेन सूपकारेण वेगतः । छित्वाऽस्य पश्चिमं पादं मेण्डकस्यातिपापिना ॥ ९६ ॥
सत्कृत्य तत्क्षणं क्षिप्रं नानाभेदसमन्वितम् । समर्पितं महादेव्याः सूपकारेण वेगतः ॥ ९७ ॥
जनकस्याभिलाषायाश्च नामतस्तस्य दीयताम् । यथेदं सूपकण्ठेभ्यो गलितं मृगुणा पुनः ॥ ९८ ॥
तदा तन्माहनेभ्योऽपि तदानीं भूपवाक्यतः । तत्सार्थस्य मे नूनं न प्राप्नोति मनागपि ॥ ९९ ॥
क्षुधातृष्णापरिभ्रान्तस्छिन्नपश्चिमभागकः । तिष्ठामि वेदनाक्रान्तो अत्यपेक्षितविग्रहः ॥ १०० ॥
या तु चन्द्रमती नाम छेलिका भृगुणा हता । सा कलिङ्गास्यदेशेऽभून्महिषो भीमविग्रहः ॥ १०१ ॥
सोऽपि मान्धभृतस्तस्मान्महाजमहिषमध्यगः । श्रीमदुज्जयिनीं प्राप पञ्चाग्रवल्लिपिवाह् ॥ १०२ ॥
ततो गुरुभरः सोऽपि दाहदग्धशरीरकः । सिप्रानदीजलान्तस्थस्तिष्ठति श्रमहानये ॥ १०३ ॥
ततोऽनेन वरन्तेन जलमध्यस्थितेन हि । राजाश्वः मज्जपातेन गतमोऽयं निपातितः ॥ १०४ ॥
ततो नृपोऽपि तं वार्तां श्रुत्वा परिजनादरम् । महिषं कोपतः श्रीमन्मानिन्यय स्वमन्दिरम् ॥ १०५ ॥
बरन्तं निश्चलं बद्ध्वा चतुष्पादेषु कीलकैः । चतुर्दिक्षु च पार्श्वेषु वह्निं प्रज्वाल्य भासुरम् ॥ १०६ ॥
कृत्वाई तत्पुरः कृत्वा लवणपानीयसंभृतम् । हिङ्गुवे चवसंयुक्तं पिप्पल्याद्यन्यकैरपि ॥ १०७ ॥
तस्मिन्नीरे प्रतप्ते च तृष्णाभिभूतः सकः । कथारं मुञ्चति क्षिप्रं पश्चिमद्वारतोऽखिलम् ॥ १०८ ॥
पूर्वोत्थितस्वरं सोऽपि पृष्ठपश्चिमभागकः । व्याधमास्वादितसर्वाङ्गो महिषान्ते निपातितः ॥ १०९ ॥
तयोरपि पुनः क्षिप्रमशिना भक्ष्यमानयोः । जीवेन दुःखदुःखेन गतं क्वापि क्षणादिव ॥ ११० ॥
श्रीमदुज्जयिनीपार्श्वस्थो मातङ्गपाटकः । तिष्ठतेऽस्मिन् कचारेण भक्षितो मण्डलादिभिः ॥ १११ ॥
तत्रैव कुर्कुटीगर्भे मातापुत्रयुगं तदा । बभूव कुर्कुटद्वन्द्वं पापनिर्मितमूर्तिकम् ॥ ११२ ॥
विलोक्य कुर्कुटद्वन्द्वं गृहीतं चण्डकर्मणा । नीतं च प्राभृतं तेन यशोमतिनृपस्य तत् ॥ ११३ ॥
दृष्ट्वैतत् कुर्कुटद्वन्द्वं यशोमतिनराधिपः । तुतोष पितरं पश्यन् को न तुष्यति बालकः ॥ ११४ ॥
राजा समर्पितं तत्र तदानीं कुर्कुटद्वयम् । चण्डकर्मतलारस्य तेन नीतं स्वमन्दिरम् ॥ ११५ ॥
चयोपवनवनं रन्तुं अन्तःपुरसमन्वितः । यशोमतिनृपोऽयं जगाम प्रमदाकुलः ॥ ११६ ॥
चण्डकर्मा समादाय कुर्कुटयुग्मं तदा । लोहपञ्जरमध्यस्थं जगामोपवनं परम् ॥ ११७ ॥
चीरपट्टसमं तत्र नानावर्णसमुज्ज्वलम् । प्रासादं पश्यति स्वोर्धं चण्डकर्मा मनोहरम् ॥ ११८ ॥
पूर्वद्वारे च सोपस्य स्थिते मणिसमुज्ज्वले । शरत्प्रभसमाकारे विचित्रे दृष्यमण्डपे ॥ ११९ ॥

1 चफ कुक्कुट, ज कुक्कुटम्, 2 कुक्कुट, ज कुक्कुटम्, 3 चफ कुक्कुट कुक्कुटं, 4 चफ कुक्कुट, ज कुक्कुटम्. 5 क कुक्कुटपुर 6 फज श्रीमद्गुणवती. 7 चफ कुक्कुट ज कुक्कुटम् 8 [चम].

अन्योऽन्यप्रेमसंयुक्तं मन्दस्नानसमप्रभम् । चण्डकर्मा शुभोपायं ताम्रचूडयुगं कलम् ॥ १२० ॥[1]
प्रलम्बितभुजद्वन्द्वं नासाग्रनिहितेक्षणम् । सानुकम्पं तपोऽगारं धर्मध्यानपरान्वितम् ॥ १२१ ॥
अशोकवृक्षमूलस्थं निर्जिताक्षकदम्बकम् । मुनिं वृक्षसमीपस्थं चण्डकर्मा ददर्श सः ॥ १२२ ॥
दृष्ट्वा तं योगिनं तत्र विधायासत्यवन्दनाम् । दध्यौ कठोरचेतस्कश्चण्डकर्मा विशुद्धधीः ॥ १२३ ॥
अनेन मुनिना दृष्ट्वा नृपस्य वसतिः कथम् । सर्पेणेवातिचण्डेन जनभीतिविधायिना ॥ १२४ ॥
एवं चिन्तयतस्तस्य तदानीं दुष्टचेतसः । योगं समाप्तिमायातो मुनेरस्य सुधीमतः ॥ १२५ ॥
चण्डकर्मा विलोक्येमं समाप्तनियमं मुनिम् । नष्टकन्दर्पसंपर्कं जगौ निष्ठुरमानसः ॥ १२६ ॥
भवद्भिर्लोकविख्यातैर्मनतासमतैरपि । किं मुने ध्यानमारब्धं वद त्वं मम सांप्रतम् ॥ १२७ ॥
श्रुत्वाऽस्य वचनं योगी जगादेमं विशुद्धधीः । आकर्णयैकचित्तेन कथयामि तवाधुना ॥ १२८ ॥
संसारे सारवाहीने वरं संसरतो मम । अनन्तानि शरीराणि प्राप्तो मुक्तवोऽपि च ॥ १२९ ॥
यत्सुखसंभवे दुःखं नानायोनिसमुद्भवम् । तत्क्षयं हि क्षयामीति ध्यानं ध्यातं महानघम् ॥ १३० ॥
मुनिवाक्यं समाकर्ण्य चण्डकर्मा जगावमुम् । अन्यो जीवोऽस्ति किं साधो किं चान्यच्च शरीरकम् ॥
मुनिः प्रोवाच तं सत्समयविज्ञानलोचनः । एकादशाङ्गधारी च नष्टसंदेहकारणः ॥ १३२ ॥
भो भो देवप्रिय स्पष्टं संदेहोऽत्र न युज्यते । तव कर्तुं प्रतीहि त्वं जीवोऽन्योऽन्यच्छरीरकम् ॥ १३३ ॥
निशम्य वचनं साधोश्चण्डकर्मापि तं जगौ । अन्यो न विद्यते जीवो न चान्यच्च शरीरकम् ॥ १३४ ॥
किंतु संसारकान्तारे नानायोनिसमाकुले । भ्राम्यतां देहिनां नित्यं सजीवस्थच्छरीरकम् ॥ १३५ ॥
एको हि तस्करः कोऽपि कोष्ठिकायां निपातितः । जतुना खचिता सा च छिद्रहीना मया कृता ॥ १३६ ॥
असावेवमठं क्षिप्तः पञ्चतामगमत् प्रभो । जीवस्य निर्गमो नात्र दृष्टोऽस्माभिः कदाचन ॥ १३७ ॥
तेन जानाम्यहं नाथ सत्यं कर्मेममिदं मुने । जीवः स एव सजातस्तदेव च शरीरकम् ॥ १३८ ॥
निशम्य तद्वचो योगी तदा तं पुनरब्रवीत् । पूर्वोक्तकोष्ठिकायां च सजडो ना निपातितः ॥ १३९ ॥
धमस्तः स नरः शङ्खं धमति प्रीतमानसः । तद्ध्वनिः श्रूयते लोके निर्गमो न विलोक्यते ॥ १४० ॥
यथा हि शङ्खशब्दस्य कोष्ठिकाया न निर्गमः । दृश्यते लोकसंघातैर्जीवस्यापि निरूप्यताम् ॥ १४१ ॥
अनेन कारणेन त्वं प्रतीहि वचनं मम । अन्यो जीवो भवेदेव तथाऽन्यच्च शरीरकम् ॥ १४२ ॥
मुनिवाक्यं समाकर्ण्य चण्डकर्मा जगाद तम् । त्वद्वचो सत्यतां प्राप्त वक्ष्यमाणनिदर्शनात् ॥ १४३ ॥
मयैकस्तस्करः साधो तुलया तोलितः स्फुटम् । सजीवो जीवहीनोऽपि तत्प्रमाणो भवेदयम् ॥ १४४ ॥
अनेन हेतुना सत्यं प्रतीहि मम भाषितम् । यथाहं सदजीवोऽस्ति तदेव च शरीरकम् ॥ १४५ ॥
उवाच चण्डकर्माणं मुनिस्तद्वचनादरम् । इदं मदीयदृष्टान्तमाकर्णय मनोरमम् ॥ १४६ ॥
चोपाख्येन चैकेन निपन्नो वातपूरितः । तोलितस्तुलया नूनं न्यूनाधिकविहीनया ॥ १४७ ॥
वातहीनः पुनः सोऽपि तोलितस्तुलयाऽन्यया । संजातो वातहीनस्तु निपन्नस्तत्प्रमाणकः ॥ १४८ ॥
तत्प्रमाणो यथा भस्त्रा सर्वतो वातपूरितः । तुल्या तोलितस्तद्वच्चरोऽजीवः सजीवकः ॥ १४९ ॥
एतेन हेतुना भद्र मतिं मद्वचने कुरु । जीवोऽन्योऽन्यच्छरीरं च कथितं तव मेऽधुना ॥ १५० ॥
मुनिचन्द्रवचः श्रुत्वा चण्डकर्माऽवदत् तकम् । मया चौरस्य चैकस्य कुर्वता कर्तनं तनोः ॥ १५१ ॥
भूयोऽपि खण्डखण्डानि कुर्वता तच्छरीरके । बाह्याभ्यन्तरतो दृष्टो न जीवः क्वचिदेव सः ॥ १५२ ॥

---

1 पफ कुक्कुम्, ज कुपक्षम्. 2 पफ समाधि. 3 पफ कुक्कुम्, ज कुपक्षम्. 4 पफज भिक्षुकम्. 5 पफ चण्डकर्मणम्. 6 पफज चतुर्भिः कुलकम्. 7 पफज चतुर्भिः कुलकम्. 8 [जन्यजीवोऽस्ति तदेवं च]. 9 पफज चतुर्भिः कुलकम्.

यथा शरीरसम्बन्धे हि जीवस्तत्त्वं न जीवितम् । तथा स एव जीवोऽस्ति तदेव च शरीरकम् ॥१५३॥
तथापि साधुना भूपश्चण्डकर्मा पुरःस्थितः । निदर्शनमिदं सम्यगाकर्णय मदीरितम् ॥ १५४ ॥
एकेन चारणीरन्ध्रे कुर्वतोत्कीर्तनं मुहुः । निर्लोकितो नरेणाग्निर्मध्ये दृष्टो न नं क्वचित् ॥ १५५ ॥
भूयोऽपि स्वच्छरन्ध्राणि कुर्वतोत्कीर्तनं तदा । नरेण चारणीरन्ध्रे न दृष्टोऽग्निः सुपश्यता ॥१५६॥
विद्यमानेऽग्नौ रन्ध्रे भाव्यमानो नरेण सः । निश्छिद्रिताग्निकुम्भेन न दृष्टोऽग्निर्यथा भुवि ॥१५७॥
एवं शरीररन्ध्रेऽस्मिन् विद्यमाने समाऽप्यलम् । प्रत्यक्षाभावतो लोकैर्जीवस्तत्त्वं न दृश्यते ॥ १५८ ॥
एतेन कारणेनार्य सत्यं मन्यस्व भव । जीवोऽन्योऽपि यथा भद्र तथान्यच्च शरीरकम् ॥ १५९ ॥
श्रुत्वा योगीश्वरं वाक्यं चण्डकर्मा जगौ मुनिम् । जातो निरुत्तरो देव किं करोमि प्रसीद नः ॥१६०॥
श्रुत्वा तद्वचनं साधुर्बभाषेमं कृपार्द्रधीः । धर्मं कुरु महासत्त्व चारु सर्वशरीरिणाम् ॥ १६१ ॥
भूयो विज्ञापितः साधुस्तदासौ चण्डकर्मणा । धर्माधर्मफलं साधो कथयेश ममाधुना ॥ १६२ ॥
सौभाग्यं धनसम्पत्तिर्विद्यायुर्यशोऽमलम् । वशीकरणमारोग्यं धर्मतो जायते नृणाम् ॥ १६३ ॥
दारिद्र्यं च कुरूपत्वं दौर्भाग्यं बन्धुहीनता । अकालमरणं मौर्ख्यं जायतेऽधर्मतो नृणाम् ॥ १६४ ॥
इति संक्षेपतः श्रुत्वा धर्माधर्मफलं पुनः । चण्डकर्मा जगौ साधुं भक्तिप्रह्वतनूरुहः ॥ १६५ ॥
प्रसादेन मया स्वामिन् यथार्थं प्रविधीयते । तथाऽभिधेहि संक्षेपात् संसाराम्भोधितारकम् ॥१६६॥
निशम्य तद्वचो ज्ञानी प्राह तं कल्याणार्थिनम् । सम्यक्त्वपूर्वकं वत्स कुर्वणुव्रतपालनम् ॥ १६७ ॥
स्वर्गापवर्गहेतूनि सुखसम्पत्तिदानि च । अणुव्रतानि नाम त्वं शृणु संक्षेपतो हि नः ॥ १६८ ॥
अणुव्रतानि पञ्चापि गुणशिक्षाव्रतानि च । मधुपञ्चोदुम्बरत्यागं रात्रिभोजनवर्जनम् ॥ १६९ ॥
तथा पञ्चनमस्कारं सम्यक्त्वं गुरुपूजनम् । आचचक्षे यतिः सर्वं तदानीं चण्डकर्मणे ॥ १७० ॥
श्रुत्वा योगीश्वरं वाक्यं चण्डकर्मा जगावमुम् । नाथ सम्यक्त्वपूर्वाणि गृहीतानि व्रतानि मे ॥१७१॥
जीवघातमयं चैकं न त्यजामि मुनीश्वर । अस्मत्कुलेप्सितो धर्मो जीवघातसमुद्भवः ॥ १७२ ॥
चण्डकर्मवचः श्रुत्वा ससम्भ्रमं महीतले । जगौ मुनिस्तकं धीर भक्तिप्रह्वतनूरुहम् ॥ १७३ ॥
अस्मत्कुलेप्सितं धर्मं जीवघातसमुद्भवम् । न मुञ्चसि यदि क्षिप्रं पापोपार्जनकारणम् ॥ १७४ ॥
यद्येवं कुरुषेऽत्यन्तं कुलधर्मकम् । अनन्तदुःखसम्पूर्णां प्राप्तं मृत्युपरम्पराम् ॥ १७५ ॥
पापिद्धानसमा भद्र कुलधर्मं भजन्नपि । प्राप्नोषि दुःखसम्पन्नां भवमृत्युपरम्पराम् ॥ १७६ ॥
श्रुत्वा यतिवचः सत्यं विस्मयव्याकुलमानसः । चण्डकर्मा पुनः साधुं पप्रच्छेति कृतादरः ॥ १७७ ॥
एताभ्यां कुर्कुटाभ्यां किं पूर्वभवान्तरे । कुलधर्ममनुष्ठाभ्यां प्राप्ता मृत्युपरम्परा ॥ १७८ ॥
श्रुत्वा तज्जल्पितं भूयो मुनीन्द्रोऽपि जगाद तम् । आकर्णयैकचित्तेन तद्रूपं निगदामि ते ॥१७९॥
एष कुर्कुटिको भद्र यशोधरनरेश्वरः । यशोमतिकुमारस्य जनकः पूर्वजन्मनि ॥ १८० ॥
एषा कुर्कुटिका चासीत् यशोधरनृपस्य वै । माता चन्द्रमती यस्य यस्याः पूर्वजन्मनि ॥ १८१ ॥
कुलधर्मप्रभावाभ्यां देवताऽर्चनके हतः । एताभ्यां यक्षिमुखाभ्यां पिष्टनिर्मितकुर्कुटः ॥ १८२ ॥
तेन पापविपाकेन कुर्कुटत्वमुपागतम् । बभूव भ्रान्तचेतस्कं धर्ममपश्यत्सरम् ॥ १८३ ॥
खिद्यमानौ पुनः संसारे मीनदारकौ । जाताविह तौ रजन्यामौ कुर्कुटौ पक्षिणाविमौ ॥१८४॥
यतिनाथस्य समाकर्ण्य चण्डकर्मा मुनीश्वरम् । जगाद जातसंवेगो भयवेपितविग्रहः ॥ १८५ ॥

---

1 चफ निश्चयम्, ज निश्चलीयम्. 2 [च छ omit]. 3 चफ यष्टिः [illegible], ज [illegible]. 4 चफ दुःखद, ज दुःखम्. 5 चफ °मदुष्कर्मा 6 चफ दुःखम्, ज दुःखम्. 7 ज कुर्कुटं 8 चफज [illegible].

कुलधर्मो मया साधो मनोवाक्कायकर्मभिः । परित्यक्तो गृहीतोऽयं जैनो धर्मोऽधुना परः ॥ १८६ ॥
अणुव्रतानि चादाय सम्यक्त्वादीनि भक्तितः । जातोऽस्मि सांप्रतं नाम श्रावको जिनदेवत ॥१८७॥[1]
अथ साधुमुखाम्भोजनिर्गतं धर्ममुत्तमम् । श्रुत्वा भवान्तरं स्वस्य नानादुःखयुतस्य च ॥ १८८ ॥
जिनधर्मं परिप्राप्य जिनदेवं च भक्तितः । कूजितं तोषयुक्ताभ्यां कुर्कुटाभ्यां कलस्वनम् ॥ १८९ ॥[2]
अथ तत्कलमाकर्ण्य दूष्यमन्दिरमध्यगः । यशोमतिकुमारोऽयं जगाद कुसुमावलीम् ॥ १९० ॥
पश्य पश्य प्रिये सन्ति मद्धनुर्वेदकौशलम् । कुक्कुटाकुर्कुटं शीघ्रं निहन्मि शरघाततः ॥ १९१ ॥
एवमुक्त्वा तदा कान्तां शरमादाय भास्वतः । धनुर्गुणे समासज्य चकार स नराधिपः ॥ १९२ ॥
आकर्णाकृष्टमुक्तेन मार्गणेन यशोमतिः । तदानीं कुर्कुटद्वन्द्वं चकार गतजीवितम् ॥ १९३ ॥
कालं कृत्वा समाधानात् तदा कुर्कुटयुग्मकम् । जातं पुष्पावतीगर्भे जिनभक्तिपरायणम् ॥ १९४ ॥
ततः पुष्पावतीगर्भाद्विनिष्क्रान्तौ तौ कुमारकौ । अनुक्रमेण संप्राप्तौ कलागुणकलापताम् ॥ १९५ ॥
अन्यदा विहरन् क्वापि संघेन महता युतः । सुदत्ताख्यो मुनिः प्राप श्रीमदुद्यानकाननम् ॥ १९६ ॥
अत्रान्तरे महीपालः श्रीमदुज्जयिनीपुरात् । निर्जगाम श्ववृन्देन पापर्द्धिगतमानसः ॥ १९७ ॥
विलोक्य तत्कुलस्थं सुदत्तमुनिनायकम् । मण्डलं युगपन्मुक्तं सहचार्यं[3] नरेशिना ॥ १९८ ॥
मण्डलानां कदम्बान्याशु पश्यापि मुनिनायकम् । प्रदक्षिणीकृत्य तमीशानं तस्थुस्तत्पुरतो मुदा ॥ १९९ ॥
एवं दृष्ट्वा तकान् सर्वान् कोपारुणनिरीक्षणः । स्वकरेणासिमादाय घातमानस्तकं मुनिम् ॥२००॥
ततः कल्याणमित्रेण सार्थवाहेन भूपतिः । मुनेः समीपतां नीतः सम्यग्दर्शनशालिना ॥ २०१ ॥
दृष्ट्वा मुनिं पुनर्दध्यौ नरेन्द्रो प्रीतमानसः । मया मुनिवधः कर्तुं कथं पापेन चिन्तितः ॥ २०२ ॥
प्रायश्चित्तस्य चैतस्य मुनिहिंसनकारिणः । कुर्वे स्वं शिरश्छित्त्वा दत्वाम्यस्मै विशुद्धये ॥ २०३ ॥
एवं विचिन्त्य शुद्धात्मा यशोमतिनराधिपः । जगाम मुनिसामीप्यं मित्रेण सहसा सह ॥ २०४ ॥
ततो मुनिवरेणायं नरेन्द्रो विनिवारितः । इदं न वर्तते कर्तुं भूपाल तव चेष्टितुम् ॥ २०५ ॥
ज्ञातया चिन्तया तस्य मुनिना बोधमीयुषा । विस्मितो लज्जया राजा चकारास्य क्षमानतिम् ॥२०६॥
एवमुक्तं नरेन्द्रेण वैराग्याहितचेतसा । क्षम्यतां मन्दभागस्य[6] मम दुश्चरितं मुने ॥ २०७ ॥
तदाकर्ण्य पुनः प्राह मुनीन्द्रो वसुधाधिपम् । उत्तिष्ठोत्तिष्ठ भूपाल देवानां प्रिय शोभन ॥२०८॥
क्षमामि सर्वलोकेभ्यः सोढव्यं च मुमुक्षुभिः । भवतां तु विशेषेण बहुना जल्पितेन किम् ॥२०९॥[7]
मुनीन्द्रवचनं श्रुत्वा पप्रच्छेदं महीपतिः । भगवन् किं मया स्पष्टं चिन्तितं वद मेऽधुना ॥२१०॥
तदाकर्ण्य ततो मुनिः प्राह स तदाऽवधिलोचनः । शृणु स्वचेतसि चिन्तितं निगदामि तव स्फुटम् ॥२११॥
नूनं मुनिवधस्येदं प्रायश्चित्तं भवेत् शुचि । शिरश्छित्त्वा[8] निजं चास्य करोमि पदपूजनम् ॥२१२॥
यशोमनमलं मद्य त्वयेदं परिचिन्तितम् । संसारकारणं पुंसां स्वबधो हि मतो बुधैः ॥ २१३ ॥[9]
अत्रान्तरे धराधीशं शोकव्याप्तसमन्वितम् । कल्याणोपपदो मित्रो जगादेदं विशुद्धधीः ॥ २१४ ॥
एकया चिन्तया धीर ज्ञातया मुनिनाऽधुना । किं विस्मितोऽसि राजेन्द्र नताशेषनराधिप ॥२१५॥
अतीतानागतं योगी वर्तमानं च चेष्टितम् । यदि ते संशयः कोऽपि पृच्छ किंचित्तपोधनम् ॥२१६॥[10]
श्रुत्वा कल्याणमित्रस्य वचनं मुनिवन्दनाम् । विधाय भूपतिर्भक्त्या पप्रच्छेमं यतीश्वरम् ॥ २१७ ॥

1 पफज सिद्धमेरम्. 2 पफ कुम्भम् ज कुम्भम्. 3 प युगपन्मुक्त्वा. 4 ज शुचि. 5 [चैष्टितम्]. 6 ज मन्दभागस्य. 7 पफ कुम्भम् ज कुम्भम्. 8 ज शिरं छित्त्वा 9 पफज सिद्धमेरम्. 10 पफज सिद्धमेरम्.

पितामहोऽर्मिका माता पिता मे क गतो मृतः । कां गतिं सांप्रतं याता किं भुञ्जानाः सुखासुखम् ॥२१८॥
एतत्सर्वं समासेन यथादृष्टं मुनीश्वर । सांप्रतं ब्रूहि मे नाथ दयां कृत्वा ममोपरि ॥ २१९ ॥
नरेन्द्रवचनं श्रुत्वा जगादेवं यतीश्वरः । कौतुकव्याप्तचेतस्कमवधिज्ञानलोचनः ॥ २२० ॥
भवत्पितामहो राजन् दृष्ट्वैकं पलिताङ्कुरम् । समस्तके हि कीर्त्यौघो दीक्षां दैगम्बरीं दधौ ॥२२१॥
पञ्चरात्रं तपः कृत्वा यमलं कृत्वा समाधिना । मयोपरे सुखं दिव्यं भुञ्जानः स वितिष्ठते ॥ २२२ ॥
यशस्यामिमहादेवी या माता तव पालक । विषेण सपतिं हत्वा षष्ठं सा नरकं ययौ ॥ २२३ ॥
असह्यवेदनान्यत्र घोरदुःखानि मातृका । भुञ्जाना तिष्ठति क्रूरा निन्दन्ती निजजीवितम् ॥ २२४ ॥
यः पुनस्त्वत्पिता भद्र यशोधरनरेश्वरः । त्वदर्थिका च सन्माता चन्द्रोपपदिका मतिः ॥ २२५ ॥
भवतः पशुबन्धं च पिष्टनिर्मितकुक्कुटम् । देवतायाः पुरस्तान्यां कात्यायन्या हतं स्वतः ॥ २२६ ॥
तेन पापकबन्धेन कृत्वाऽन्योन्यविनाशनम् । तिर्यग्गतिषु षट्सु जन्म प्रापतिमौ पुनः ॥ २२७ ॥
कुक्कुटत्वस्थितौ पञ्चनमस्कारपरायणौ । कुक्कुटत्वं परिप्राप्तौ हतौ तौ भवता पुनः ॥ २२८ ॥
जातौ पुष्पावलीगर्भे कल्मषंकृतविग्रहौ । तिष्ठतस्त्वद्गृहे भूप कुमारत्वमुपागतौ ॥ २२९ ॥
अभयादिरुचिः पुत्रस्त्वभयादिमतिः सुता । तिष्ठतस्त्वद्गृहे राजन् अधुना तौ कुमारकौ ॥ २३० ॥
ततो यशोमती राजा श्रुत्वा तद्वचसंततिम् । विस्मयं परमं प्राप्य वैराग्यमगमत् प्रभुः ॥ २३१ ॥
तत्सवाक्यं समाकर्ण्य मुनेरस्य समीपके । यशोमतिः प्रवव्राज मिथ्यात्वपुरसंगतः ॥ २३२ ॥
श्रुत्वा भवान्तरं सर्वं स्वकीयं तौ कुमारकौ । जातिस्मरत्वमापन्नौ वैराग्याद्विग्नमानसौ ॥ २३३ ॥
तपस्थौ भक्तिसंपन्नौ दीक्षानिश्चितमानसौ । सुदत्तमुनिसामीप्यं जग्मतुः शान्तचेतसौ ॥ २३४ ॥
त्रिः परीत्य तमीशानं नत्वाऽसु भक्तितत्परौ । देहि दीक्षां मुने जैनीमावाभ्यामूचतुस्तथौ ॥२३५॥
श्रुत्वाऽनयोर्वचः साधुर्भक्तिनिर्भरचेतसोः । जगाद तौ मुनिश्रेष्ठस्तदैश्वर्यक्षमानसः ॥ २३६ ॥
युवां सुकुमाराप्राप्तवयस्यातिपरीषहौ । शक्तौ न भवतो जैने ग्रहीतुं मुग्धचेतसौ ॥ २३७ ॥
विधातुमधुना युक्तं धर्मं क्षुल्लकचेष्टितम् । परमं युवयोर्दास्ये धर्मं वैराग्यदं परम् ॥ २३८ ॥
अभयादिरुचिर्भक्त्या तदानीं मुनिवाक्यतः । जग्राह क्षौल्लकं धर्मं जिनभक्तिपरायणः ॥ २३९ ॥
एकवस्त्रावृतारिम्याः क्षान्तिकायाः समीपके । अभयादिमतिर्भक्त्या जग्राह क्षौल्लकं व्रतम् ॥२४०॥
अथ यौधेयदेशोऽस्ति पुरं राजपुरं परम् । मारिदत्तो नृपस्तस्य देवताभक्तितत्परः ॥ २४१ ॥
पुरदक्षिणदिग्भागे कुलदेवी भयंकरी । चण्डमारिरिति ख्याता वसति क्रूरमानसा ॥ २४२ ॥
मारिदत्तादयो लोकाः सहस्रद्वन्द्वजीवकैः । तस्याः कुर्वन्ति सत्पूजां भक्तिनिर्भरचेतसः ॥ २४३ ॥
यदा न कुर्वते ते च तत्पूजां भक्तितत्पराः । तदा तान्युगपत् सर्वान् कुलदेवी निहन्ति सा ॥२४४॥
नानाजनपदोपेताः सर्वान्तःपुरसंगताः । मारिदत्तः परिप्राप्य देवतायतने तदा ॥ २४५ ॥
अथ संघेन संयुक्तः सुदत्तमुनिनायकः । तत्पुरोद्यानसामीप्ये श्मशाने प्राप्तवानसौ ॥ २४६ ॥
मयूरकुक्कुटादीनि जीवयुग्मान्यनेकधा । उपनीतानि तल्लोकैर्देवतापादमूलके ॥ २४७ ॥
सर्वलक्षणसंपूर्णं मानुष्ययुगलं परम् । आनीयते महीपाल नृपोऽज्ञापि महत्तरैः ॥ २४८ ॥
तदाज्ञप्तो नरेन्द्रेण स्वाज्ञाता किंकरास्तदा । मानुषं युग्मकं शीघ्रं समानयत शोभनम् ॥ २४९ ॥
तदाज्ञां प्राप्य ते वेगादेवरोपामिताध्वा । मन्यमानास्तदर्थं च जग्मुर्मुदितचेतसः ॥ २५० ॥
ततो गत्वा मुनिं भक्त्या तदा क्षुल्लकयुग्मकम् । नगराभ्यन्तरे गन्तुं भक्ष्याटनेच्छया ॥ २५१ ॥

---

1 पप कुलम. ज कुलम्. 2 जपफ कुलम्. 3 ज परीत्य.

तन्मागतोऽद्भुतम हि क्षौल्लक युगलं परम् । गच्छन् मन्थरगामिन्या गत्या दृष्ट नरैरिदम् ॥२५२॥
दृष्ट्वा तत्क्षौल्लकं युग्म ते वदन्ति परस्परम् । मन्ये योग्यमिदं हन्तु देवतायै नरेशिन ॥ २५३ ॥
श्रुत्वा तद्वचन घोरं क्षौल्लक युगल तदा । परस्पर स्थिरीकारं कृत्वा तस्थौ भयोज्झितम् ॥ २५४ ॥
एवं निगद्य तैरेतद् गृहीत क्षुल्लकद्वयम् । मारिदत्तान्तिकं नीतं रूपराजितविग्रहम् ॥ २५५ ॥
तेन क्षुल्लकयुग्मेन देवताचरणान्तिके । भीमखड्गकरो दृष्टो मारिदत्तो नरेश्वर ॥ २५६ ॥
दूराद् विलोक्य राजेन्द्रं युगपद्भीमविग्रहम् । जयशब्द कृतस्ताभ्या क्षुल्लकाभ्यां नरेशिन ॥२५७॥
दिग्मातङ्गगत भूप कलङ्कम मलच्युत । चिरकाल जयाजस्रं कौन्द्यामयशसोज्ज्वल ॥ २५८ ॥
घनस्तनितगम्भीरं जयशब्द निशम्य तम् । नरलक्षणोपेत दृष्ट्वैतच्चरेश्विना ॥ २५९ ॥
दृष्ट्वा पुर स्थित राज्ञा दृष्ट क्षुल्लकयुग्मकम् । क्वे रूपातिशयेनाथ कुल्मैटो विभूषित ॥ २६० ॥
केन वा कारणेनेय प्रव्रज्या दुर्धरा धृता । एतत् सर्व मम स्पष्ट वदतामतिशोभनौ ॥ २६१ ॥[1]
मारिदत्तवच श्रुत्वा स्नेहातिशयसंगतम् । बालवृद्धयुवा शेषसमामध्ये जनाकुले ॥ २६२ ॥
क्षुल्लकेनाभयरुच्याख्येन लोकविस्मयम् । यशोधरादिकं सर्वमतिक्रान्त सविस्तरम् ॥ २६३ ॥
तथा प्रभाषित तेन यथा राजजनोऽखिलः । चण्डमारीसम जीववध मुक्त्वा क्षमं ययौ ॥ २६४ ॥
ततो देवतया श्रुत्वा तत्कथां सकलामिमाम् । भीमरूप निज हित्वा गृहीतवररूपया ॥ २६५ ॥
त्रि परीत्य च भावेन प्रणम्याथ प्रयत्नत । पाद्याघमध्या चार्द भृङ्गारकरयाऽन्यया ॥ २६६ ॥
सद्भक्तियुक्त्या स्पष्ट स्नेहनिर्भरचेतसा । क्षुल्लकोऽभय जनाभ्यर्च्य गदितस्तत्क्षेपया ॥ २६७ ॥
प्रसाद क्षुल्लक स्वामिन् विधाय परमा दयाम् । प्रव्रज्यां देहि मे क्षिप्र संसारापत्खण्डिनीम् ॥२६८॥
देवीवचनमाकर्ण्य क्षुल्लको निजगादमुम् । भक्तिनिर्भरचेतस्कां लब्धदन्यस्वरूपाभिकाम् ॥ २६९ ॥
उचितोऽचित भद्रे त्व देवानां भवप्रायिनाम् । विरमां न भवेद्दीक्षा मनुष्याणामिव मता ॥२७०॥
देवी तदाभ्यत प्राह क्षुल्लक विनयानता । मम त्व मन्दभाग्याया अनुरूप वृषं दिश ॥ २७१ ॥
यथापि क्षुल्लकेनेयं देवता पुरत स्थिता । सम्यक्त्व जिनपूजा च देवानां धर्म्य वृष ॥ २७२ ॥
नारकाणां न धर्मोऽस्ति जिनपूजा च सुन्दरि । त्रैलोक्यश्रेयसीभूतं सम्यक्त्व विद्यते परम् ॥२७३॥
तिर्यग्वाल्लिमनुष्याणां सम्यक्त्व विद्यते नृणाम् । कृतोऽनुकारितो धर्मो मोक्षित सन्मतो बुधै ॥२७४॥
क्षौल्लक वचन श्रुत्वा चण्डमारि सुभक्तित । सम्यक्त्व जिनपूजां च जग्राह विधिकोविदा ॥२७५॥
जिनधर्म समादाय सम्यक्त्वं जिनपूजनम् । मारिदत्तं जगादैषा देवीवचनपरं तदा ॥ २७६ ॥
इत प्रभृति राजेन्द्र मा वास्तु प्राणिहिंसनम् । करोतु मत्कृते शान्तो भयतामखिलो जन ॥२७७॥
अथवा सनिषिद्धोऽपि हिंसात करिष्यति । ततोऽहं त समस्त हि हनिष्याम्यखिलं जनम् ॥ २७८ ॥
इदमाभाष्य सा देवी मारिदत्तं जन तथा । क्षुल्लक च प्रणम्याशु जगाम स्वमनीप्सितम् ॥२७९॥[9]
तदाश्चर्यमिद श्रुत्वा त्रिदशै खतलस्थितै । मन्द्रं दुन्दुभयो नेदु क्षुल्लकोपरि ताडिता ॥ २८० ॥
साधुवादास्तथा दयाभक्तिमुदितचेतस । कृतकोलाहलास्तुष्टा मुमुचु पुष्पमालिका ॥ २८१ ॥
मारिदत्तो नृप श्रुत्वा धर्म जिनभाषितम् । सर्वमन्तर्हितं पथ्यं क्षुल्लकेन निवेदितम् ॥ २८२ ॥
ताम्रचूडभवोद्भूत दुःख श्रुत्वाऽतिदारुणम् । देवताप्रातिहार्य च दृष्ट्वाऽचारीत् तर्कं नृप ॥२८३॥

1 ज भवन्तं मति 2 पफ युग्मम्, ज युगलम्. 3 पफज विक्रमीयम्. 4 ज भैरवमिवीम्. 5 पफ चतुष्पथकम् ज चतुष्पथकम्. 6 पफ युग्मम्, ज युगलम्. 7 पफज विक्रमीयम्. 8 पफज विक्रमीयम्. 9 पफ युग्मम् ज युगलम्

देहि मे क्षुल्लक स्वामिन् प्रव्रज्यां भवनाशिनीम् । येनाहं त्वत्प्रसादेन करोमि हितमात्मनः ॥२८४॥[1]
मारिदत्तोदितं श्रुत्वा क्षुल्लकोऽपि जगाद तम् । दातुं ते न समर्थोऽहं दीक्षामुचितां नृपते ॥२८५॥
अस्माकं गुरवः सन्ति कीर्तिव्याप्तदिगन्तराः । ते समर्थास्तपो दातुं भवतो ज्ञानिनोऽमलाः ॥२८६॥[2]
निशम्य क्षौल्लकं वाक्यं कौतुकव्याप्तमानसः । मारिदत्तो विशुद्धात्मा इत्थमित्ति स चेतसि ॥२८७॥
पुष्पदन्तौ[3] जनः सर्वो मत्पादाम्भोजमागतः । अहं पञ्चसमग्रोऽपि देवतापादमाश्रितः ॥ २८८ ॥
देवताऽपि पदद्वन्द्वं क्षुल्लकस्य समाश्रिता । अस्य चैवंविधस्यापि विद्यतेऽन्यो गुरुर्महान् ॥ २८९ ॥
अहो मुनिगणस्येदं माहात्म्यं तपसः परम् । येन देवासुराणां हि पूजनीयास्तपोधनाः ॥ २९० ॥
जिनधर्मसमासंगपवित्रीकृतचेतसा । क्षुल्लकाभिमुखे तस्थौ मारिदत्तो विशुद्धधीः ॥ २९१ ॥
अत्रान्तरे विदित्वाऽऽशु दिव्यज्ञानबलेन सः । महोपसर्गमीदृक्षं धीरक्षुल्लकयोरिदम् ॥ २९२ ॥
देवताप्रातिहार्यं च धर्मस्य ग्रहणं तथा । प्रव्रज्याव्यवसायं च मारिदत्तस्य धीमतः ॥ २९३ ॥
धर्मवात्सल्यसंपेतो धर्मो वाऽध्ययनान्वितः । सुदत्ताख्यमुनिर्धीरस्तत्समीपं समाययौ ॥ २९४ ॥
एवंविधमुनेः पार्श्वे संप्राप्य विनयानतः । कल्याणपुरसामन्तमन्त्र्यमात्यसुसंगतः ॥ २९५ ॥
प्रणम्य चरणौ भक्त्या पूजितौ सुरकुञ्जरैः । मारिदत्तो ययाचेऽसौ प्रव्रज्यां यतिनायकम् ॥२९६॥[4]
राज्यपट्टं स्वपुत्राय वितीर्य विनयाय सः । प्रकृतीनां समस्तानां समर्प्य तनयं मुहुः ॥ २९७ ॥
पुरोहितमहामात्यसामन्तान्तःपुरान्वितः । मारिदत्तः प्रवव्राज सुदत्तान्ते विशुद्धधीः ॥ २९८ ॥[5]
क्षुल्लकौ[6] क्षौल्लकं व्रतं हित्वा वैराग्यसंगतौ । तदा निजगुरोः पार्श्वे मुनिदीक्षामुपागतौ ॥ २९९ ॥
पादोपगमनं कृत्वा यावज्जीवं चतुर्विधम् । हित्वाऽऽहारं समस्तं च धर्मध्यानमुपाश्रितौ ॥ ३०० ॥
पक्षमात्रेण कालेन कालं कृत्वा समाधिना । सप्तप्रभविमाने तौ संजातौ क्षुल्लकौ सुरौ ॥ ३०१ ॥
दृष्ट्वाऽस्तिव्रतमीदृक्षं केचिज्जाता मुनीश्वराः । केचिच्छ्रावकतां प्राप्ताः केचिन्मध्यस्थतां गताः ॥३०२॥
आराध्याराधनां सारां विधिना स चतुर्विधाम् । सुरलोकं परं प्राप सुदत्तमुनिनायकः ॥ ३०३ ॥
आराध्याराधनां तेऽपि मारिदत्तादयोऽखिलाः । सम्यग्दर्शनसंशुद्धा भास्वद्भोग्यं पदं ययुः ॥३०४॥
एकजीवदयां यो हि विदधाति क्षमाव्रती । सोऽनेकभवसंपन्नां संसृतिं भ्रमति क्षितौ ॥ ३०५ ॥

॥ [7]इति श्रीपिष्टमयकुक्कुटकात्यायनीदेवतायै निहतसप्तभवान्तरभ्रमणसहितयशोधरचन्द्रमतीकथानकम्[8] ॥ ७३ ॥

७४ यमपाशकथानकम् ।

काशीजनपदे रम्ये वाराणस्यां पुरि प्रभुः । आसीत् प्रतापसंयुक्तः पाकशासननामकः ॥ १ ॥
पौलोमी तस्य भार्याऽऽसीत् पौलोमीसमविभ्रमा । रूपयौवनसंपन्ना कामिनीव मनोभुवः ॥ २ ॥
आरक्षकोऽभवत् तस्य यमदण्डो यमोपमः । यमदण्डा च तद्भार्या लक्ष्मी लोललोचना ॥ ३ ॥
आसीद् गोत्रसमायातो दस्युहिंसनकारकः । यमपाशोऽस्य भार्या च धर्दिनामेति विश्रुता ॥ ४ ॥
तत्रैव नगरे कृत्स्ने लोकस्य सकलस्य च । उपसर्गं कृतं कोपान्मार्या मारिस्वरूपया ॥ ५ ॥
दुष्टोपसर्गमीदृक्षं जनानां प्राणहारिणम् । भूपेन घोषिताऽमारिघोषणाऽत्र दिनाष्टके ॥ ६ ॥

---

1 पफज निरूपितम्, पफ कुम्मम्, ज कुम्मम्. 3 [भगवन्तौ]. 4 पफज यतिनां पुङ्गवम्. 5 पफज निरूपितम्. 6 पफ कुम्मम ज कुम्मम. 7 पफ कुम्मम्, ज कुम्मम 8 पफ क्षुल्लकौ. 9 पफ कुम्मम ज कुम्मम. 10 ज omits इति श्री. 11 ज कथानकमिदम्.

यो हि जीववधं कोऽपि करिष्यति दिनाष्टके । कालेऽत्र कृतकार्यस्य स मे वध्यो भविष्यति ॥ ७ ॥
एवं घोषणया तत्र दत्तयैकोऽस्ति वणिजः । धर्मनाम्ना स नाम्नैव पिशिताशकमानसः ॥ ८ ॥
तेनैकस्य वराकस्य नूनमूरणिकस्य च । मिण्ढको निहतो दीनः पिशिताशकचेतसा ॥ ९ ॥
निहतो मिण्ढकोऽनेन मांसभक्षणकारिणा । भूपस्योरणिकेनाशु तद्वार्ता कथिता तदा ॥ १० ॥
तेनापि भूभुजा शीघ्रं दुष्टो निगडसंयुतः । गुप्तौ निधापितः पापो दुःस्थितः सोऽवतिष्ठते ॥ ११ ॥[1]
यावद् भवन्ति ते नूनं घोषणावासराः खलु । अत्र तिष्ठति धर्मोऽयं मारयिष्याम्यमुं पुनः ॥ १२ ॥
अतिमुक्तकसंज्ञाके श्मशाने तिष्ठति स्फुटम् । अमृताभयनामाथ सर्वौषधिसमन्वितः ॥ १३ ॥
यमपाशः पुनस्तत्र निश्चलैकसमन्वितः । उपसर्गविनाशाय श्मशाने तस्थिवानसौ ॥ १४ ॥
अमुं मुनिं परिप्राप्य धर्मं श्रुत्वा जगद्धितम् । सोऽहिंसाव्रतमादाय पूर्णिमायां गृहं ययौ ॥ १५ ॥
तत्र भार्यां निजां प्राह यमपाशः पुरः स्थिताम् । आरक्षकस्य मां ब्रूहि भद्रे ग्रामान्तरं गतम् ॥१६॥[2]
एवमुक्त्वा स च कान्तां प्रविश्य स्वगृहान्तरं । स्वं वस्त्रेण समाच्छाद्य शिश्ये तद्गृहमं सुखम् ॥१७॥
सुप्तमात्रस्य तस्यापि यमदण्डस्तलारकः । आगत्य तद्गृहे प्राह धर्मिकां तन्मनःप्रियाम् ॥ १८ ॥
धर्मिके त्वत्पतिर्भद्रे क्व गतो निगदाशु मे । साऽपि तद्वचनात् प्राह यमदण्डं यमोपमम् ॥ १९ ॥
यथा भवान् मम स्वामिन् भागिनेयविवाहके । पल्यङ्कोपपदं ग्रामं जगामाय निमन्त्रितः ॥ २० ॥[3]
आरक्षकः पुनः प्राह तदा तद्वचनादरम् । अथ यस्तत्करं कोऽपि मरणं प्रापयिष्यति ॥ २१ ॥[4]
नानारूप्याणि दिव्यानि बहुमूल्यानि तस्य च । दीयन्ते तानि सर्वाणि ग्रहीष्यत्यपरोऽन्त्यजः ॥२२॥[5]
श्रुत्वा तद्वचनं सा च तं जगादाशु तत्प्रिया । वामहस्तेन तत्कर्णौ कुर्वती भीतमानसा ॥ २३ ॥
उत्क्षिप्य दक्षिणं हस्तं भूयोऽपीमं जगाद सा । स्वामिन्नयमेव मे कान्तो गतो ग्रामं निमन्त्रितः ॥२४॥
यमदण्डेन तद्वाक्याद् विलोक्यैवं स भाषितः । रे रे पाप दुराचार निर्गच्छ निजमन्दिरात् ॥ २५ ॥
यमपाशोऽपि निर्गत्य तदानीं स्वनिकेतनात् । भयवेपितसर्वाङ्गो जगादेदं[6] कृताञ्जलिः ॥ २६ ॥
स्वामिन् मयाऽद्य साध्वन्तेऽहिंसाव्रतमखण्डितम् । दिनमेकं गृहीतं च विनाशं कर्तुमिच्छता ॥२७॥
भवत्पादप्रसादेन यमदण्ड यमोपम । तदहिंसाव्रतं चैकं रक्षितुं नान्यतः प्रभुः ॥ २८ ॥
तद्भारतीं निशम्याशु यमदण्डो जगाद तम् । नृपाज्ञया समायातो न त्वां[7] मुञ्चामि सर्वथा ॥२९॥
ततस्तौ द्वावपि क्षिप्रं सभामध्यस्थितं नृपम् । जग्मतुः श्रीवर्षैतस्कौ विनयानतविग्रहौ ॥ ३० ॥
यमपाशो नृपं नत्वा सभामध्ये व्यवस्थितम् । ललाटपट्टविन्यस्तकरकुड्मलराजितः ॥ ३१ ॥
महाराज मयाऽद्यैव मुनिं नत्वा तपोधनम् । अहिंसाव्रतमेकं च गृहीतं दिनमेककम् ॥ ३२ ॥
भवत्पादप्रसादेन भवत्वेतदहीनकम्[8] । पालयामि विना हिंसान्मुञ्च मामधुना नृप ॥ ३३ ॥
श्रुत्वा तद्वचनं राजा यमपाशं जगावमुम् । क्रोधलोहितरक्ताक्षो[9] भ्रुकुटीभीषणाकृतिः ॥ ३४ ॥
विप्रभिक्षुपरिभ्रागां मत्साधिततपस्विनाम् । त्वं व्रतं यदि गृह्णासि त्वां मुञ्चामि तदा ध्रुवम् ॥३५॥
मम भवनसामीप्यं परिप्राप्य त्वया शठ । गृहीतं व्रतमेवेदं त्वां न मुञ्चाम्यतः स्फुटम् ॥ ३६ ॥
भवत्स्वं निधापय घनं दत्त्वा तवैकशः । नग्नो भविष्यसि क्षिप्रं प्रभाते तन्मतेन च ॥ ३७ ॥
यमपाशं निगडैर्बद्धं यमदण्डं जगौ नृपः । इमं मिण्ढकहन्तारं गृहीत्वा द्वावपि द्रुतम् ॥ ३८ ॥
एकं धर्मकसत्कं द्वितीयं मिण्ढकशसनम् । नीत्वाऽमुं सुमवेगेन शिंशुमारकुले ह्रदे ॥ ३९ ॥

---

1 क 'वेतसो. 2 पग पुण्यम्, ज पुण्यम्. 3 पग पुण्यम्, ज पुण्यम्. 4 ज जगादेदं. 5 पगज विप्रभिक्षुभिः. 6 ज म टं 7 पग 'द्वितीयम्. 8 पगज भिक्षुभिस्तु. 9 पग रगस्तो.

नृपवाक्यं समाकर्ण्य यमचौरो भयार्दितः । यमपाशं जगादेति मरणाशङ्कितमानसः ॥ ४० ॥
मारणं कार्यते नूनं ममान्येनापि केनचित् । हत्वा मां त्वं न हस्तेन रक्षात्मानं प्रयत्नतः ॥ ४१ ॥
म्रियेऽपि यद्यहं नूनं जीवाम्यथ तथाऽपि नो । जीवघातं करोम्यत्र व्रतखण्डनकारणात् ॥ ४२ ॥
यमदण्डं पुरस्कृत्य तौ तदा धावपि स्फुटम् । पुरमध्ये नयत्येष बहुलोकसमावृतः ॥ ४३ ॥
नमभमपपार्श्वे हि यो गृह्णाति व्रतं मनः । एवंविधं फलं सोऽपि लभते नात्र संशयः ॥ ४४ ॥
मारयध्वे यदस्येनं समन्तात् स्वजनावृतः । गङ्गाह्रदं स समाप्य शुंशुमारसमन्वितम् ॥ ४५ ॥
मारयत्कः स्वहस्तेन चौरं चिक्षेप तत्र च । क्षिप्यमाणोऽप्यसौ शीघ्रं शुंशुमारैस्तु भक्षितः ॥ ४६ ॥
प्राणकृत्य ततः पापं चिक्षेपार्थं पुनीह्रदे । तस्य प्रविष्टमात्रस्य बभूव पुलिनं हि सः ॥ ४७ ॥
गङ्गापुलिनमध्यस्य विधाय मणिनिर्मितम् । सिंहासनं मनोहारि मेरुकूटमिवोन्नतम् ॥ ४८ ॥
स्थापयित्वाऽत्र तं देवाः पापं भासुरविग्रहम् । जाम्बूनदमयैः पद्मैः सरसैः पूजयन्त्यलम् ॥ ४९ ॥[1]
अहो शीलमहो धैर्यमहो सौर्यं व्रतोऽस्य च । देवा नभोगता ह्यत्र घोषयन्ति शुभान्तरम्[2] ॥ ५० ॥
अत्रान्तरे श्रुतीनाम्[3] पाकशासनभूपतिः । हन्यमानमपेयास्मि पुरमध्ये निशाचरैः ॥ ५१ ॥
भो भो जनपदाः स्पष्टं मद्वचो हि निशम्यताम् । मुनिरञ्जवतानां च यो मर्म निदधात्परम् ॥ ५२ ॥
इह लोके परत्रापि परिमूर्तिं स दुःसहाम् । पाकशासनसन्मंत्रं देही प्राप्नोति वेदनीम् ॥ ५३ ॥
एवं निगद्य दैवैर्विस्मयव्याकुलमानसैः । प्राणीकृत्य ततो नीतः शुंशुमारह्रदं नृपः ॥ ५४ ॥
शुंशुमारह्रदे देवैस्तदा निक्षिप्यमाणकः । यमपाशं जगादेदं पाकशासनभूपतिः ॥ ५५ ॥
पाहि पाहि व्रताधार मां परित्राणवर्जितम् । यमपाश समागच्छ ममाभ्यासं त्वरान्वितः ॥ ५६ ॥
एवं निगदतेऽनेन भूयो भूतपिशाचकाः । यमपाशं वदन्तीति कोपारुणनिरीक्षणाः ॥ ५७ ॥
यावदेवं दुराचारं धर्मविध्वंसकं खलम् । तावद् ब्रवीषि मा किंचिद्विक्षिपामो ह्रदे वयम् ॥ ५८ ॥
नरेन्द्रवचनं श्रुत्वा यमपाशो जगौ सुरान् । मत्कृते न च हन्तव्यो भवद्भिः पाकशासनः ॥ ५९ ॥
तथापि भूपतिर्भूतैर्भयवेपितविग्रहः । यमपाशोऽस्ति ते मित्रं भीमरूपैर्विभाषितः ॥ ६० ॥
पाकशासन यद्येवं कृत्वा मोक्ष्यं समानय । यशोमतिसुतामस्मै चार्धराज्यं प्रयच्छसि ॥ ६१ ॥
पश्यतां सर्वलोकानां च मोक्षोऽस्ति ते परम् । अन्यथा नेति जानीहि संशयोऽस्माकमीदृशः ॥ ६२ ॥[4]
भूपालो भूतवाक्येन पूजयित्वा पुरान्तरे । अर्धराज्यं सुतां चास्मै यमपाशाय संददे ॥ ६३ ॥
पाकशासनतः पूज्यो भूत्वा राजा हि तत्पुरे । महाविभवसंपन्नो यमपाशो बभूव सः ॥ ६४ ॥
इदमाश्चर्यमालोक्य बहवो नरकुञ्जराः । जिनधर्मं समाश्रित्य बभूवुर्मुनिपुङ्गवाः ॥ ६५ ॥
केचिच्छ्रावकतां प्राप्ताः केचिन्मध्यस्थतां[6] पराम् । जिनधर्मं प्रशंसन्तः केचिदस्थुः समन्दिरे ॥ ६६ ॥

॥ इति श्रीएकदिवससमरणार्थाहिंसाव्रतफलसहितशुंशुमारह्रदनिक्षिप्तदेवप्राति-
हार्यपाकशासनपूजाकरणयमपाशायाताहिंसाव्रतकथानकमिदम्[7] ॥ ७४ ॥

*

७५ मातङ्गकथानकम् ।

दक्षिणापथदेशेऽस्ति विषयो मलयाभिधः । तद्दक्षिणदिशोभागे पाण्ड्यादिविषयो[8] महान् ॥ १ ॥
तदुत्तरदिशाभागे नानागोकुलसंकुले । नदीनगसमाकीर्णे जलनिर्झरसान्विते ॥ २ ॥

---

1 चक पुष्पम् ज पुष्पम्. 2 [शुभाश्रयम्]. 3 चकज निरूपितम्. 4 चक पुष्पम् ज पुष्पम्. 5 चकज निरूपितम्. 6 चक मध्यस्थितां 7 ज omits इति श्री. upto the end of the Ms. and adds इदम्. 8 क पाण्ड्यादि [पाण्ड्यादि°]. 9 चक पुष्पम् ज पुष्पम्

द्वयोरपि तयोः सखा मातङ्गो नाम पर्वतः । सभायास्तत्र मातङ्गा वसन्ति प्रीतमानसाः ॥ ३ ॥
तत्रोपरि महादेशः शबराणां निवासकः । नानातरुसमाकीर्णो गव्यूतिद्वयात्मकः ॥ ४ ॥
शबराणां पुनस्तत्र व्यवस्थाऽभवदीदृशी । विवाहसमयात् पूर्वं वर्षैकाचारकारिणाम् ॥ ५ ॥
षण्मासान् वर्षमेकं वा ब्रह्मचर्येण संगतौ । विद्यां साधयतस्तत्र सदा म्लेच्छवधूवरौ ॥ ६ ॥
भूयोऽपि तौ कुमारौ च विद्यामादाय भक्तितः । अन्वीदृग्वद् व्यग्रे तत्र साधयतस्तराम् ॥ ७ ॥
सत्येन शुक्लयोस्तत्र ब्रह्मचर्येण च स्फुटम् । अनयोः सिद्धिमायाति विद्यानिश्चितचेतसोः ॥ ८ ॥
ब्रह्मचर्ये गते नाशं तथा सत्यव्रतेऽपि च । विद्या विनाशमायाति तयोर्विह्वलचेतसोः ॥ ९ ॥

॥ इति श्रीसत्यव्रतयुक्तमातङ्गकथानकम् ॥ ७५ ॥

*

७६ नारदपर्वतकथानकम् ।

विनीतविषये चासीदयोध्या नगरी परा । अस्यां ययातिराजेन्द्रः सुरकान्ताप्रियापतिः ॥ १ ॥
अनयो रूपसंपन्नः सत्यवादी प्रियंवदः । विनयाचारसंपन्नो वसुनामा सुतोऽभवत् ॥ २ ॥
तस्यां क्षीरकदम्बाख्यश्चतुर्वेदोऽभवद् द्विजः । उपाध्यायोऽस्य भार्या च चार्वी स्वस्तिमती प्रिया ॥३॥
अन्योन्यप्रेमसंपन्नबद्धमानसयोस्तयोः । बभूव तनयो मूर्खः प्रियः पर्वतकाभिधः ॥ ४ ॥
शिष्याः क्षीरकदम्बस्य त्रयो गुणगरीयसः । बभूवुः पठनोद्युक्ता वसु-पर्वत-नारदाः ॥ ५ ॥
बह्वीभिरपि संख्याभिः पृच्छति पदादिकम् । पर्वतः पर्वतप्रायसमानो मतिवर्जितः ॥ ६ ॥
दृष्ट्वा स्वस्तिमती पुत्रं मन्दबुद्धिं पतिं जगौ । स्वपुत्रं पर्वतं हित्वा विद्यन् पाठयसि स्फुटम् ॥ ७ ॥
उपाध्यायीवचः श्रुत्वा चोपाध्यायो जगाद ताम् । आगमं दातुमेतस्मै न समर्थोऽस्मि सांप्रतम् ॥८॥
बुद्धिर्नरविशेषेण जायते दयिते नृणाम् । बुद्धिरत्नविहीनानां तच्छरीरं न शोभते ॥ ९ ॥
परीक्षितुं मतिं तस्य पश्यन्तु दर्शयत्यसौ । स्वप्रियायाः स्वुपाध्यायस्तदानीं मुग्धचेतसः ॥ १० ॥
चणकानपि हस्ते च दत्त्वा तेषां कपर्दकान् । जगौ क्षीरकदम्बस्तान् स्वस्तिमत्या समन्वितान् ॥११॥
दत्त्वा कपर्दकान् युष्मास्समोऽपि वणिजां पुनः । क्रीत्वा तेभ्यश्चणकान् भुक्त्वा भक्षयित्वा तकानपि ॥१२॥
भूयः कपर्दकान् सर्वान् सर्वेऽपि वरबुद्धयः । समर्पयत मे क्षिप्रं क्रयविक्रयकोविदाः ॥ १३ ॥
तानादाय ततः सर्वास्ते तदानीं कपर्दकान् । वीथीमार्गं ययुस्तुष्टाः कौतुकव्याप्तमानसाः ॥ १४ ॥
तन्मध्ये पर्वतो दृप्तो मूर्खो भञ्जनको भुवि । यो वक्ति वणिजां दत्त्वा चणकार्थं कपर्दकान् ॥१५॥
आदाय चणकान् भक्त्वा भक्षयित्वा तकानपि । भूयः कपर्दकान् सर्वान् समानयत सत्वरम् ॥ १६ ॥
दत्त्वा कपर्दकानेषां गृहीत्वा चणकानथ । भक्षयित्वा तकान् व्यस्तः स्वगृहं पुनराययौ ॥ १७ ॥
इत्थं द्वावपि स्पष्टं कुशलौ वसुनारदौ । दत्त्वा कपर्दकानेभ्यो गृहीत्वा चणकानरम् ॥ १८ ॥
अत्यल्पान् चणकान् भुक्त्वा शोभनान्निमकानलम् । अर्पयित्वा पुनस्तेभ्यः समादाय कपर्दकान् ॥१९॥
सदुत्तरं प्रार्थयमानं गृहीत्वा स्वकपर्दकान् । स्वगृहं प्राप्य तौ तस्यै ददतुस्तान् कपर्दकान् ॥२०॥
स्वस्तिमत्याः पुनः स्पष्टं कौतुकव्याप्तमानसाः । पप्रच्छ पर्वतं तत्र सदा क्षीरकदम्बकः ॥ २१ ॥
मयार्पिता हि ये पुत्र क्व गतास्ते कपर्दकाः । ममार्पय तकान् भद्र सांप्रतं मे प्रयोजनम् ॥ २२ ॥
पितृवाक्यं समाकर्ण्य जगौ पर्वतकोऽपि तम् । आदाय चणकानर्धं भुक्त्वा तानहमागतः ॥ २३ ॥

---

1 ब भवति चकेभौ 2 ब भिन्नम् 3 पफज भिक्षणम् 4 पफ कर्दमभेदं 5 पफज भिक्षमिदम्. 6 पफज भिक्षमिदम्. 7 [सुरं]. 8 [°मिषकः].

घृतेऽमुना वसु पयसा नारदोऽपि यथाक्रमम् । तावन्यतो यथाप्येम विकसन्मुखपङ्कजौ ॥ २४ ॥
मया कपर्दकान् दत्त्वा क्रयविक्रयकान् पुनः । आदाय भक्षितास्ते च भूयोभूयो यथारुचि ॥२५॥
स्वकीयाम्बकम्बा श्रेष्ठिन् शोभना न भवन्त्यमी । मया कम्बमिमं कृत्वा गृहीताः सकपर्दकाः ॥२६॥
मयानिमान् समादाय समस्तान् भवदन्तिकम् । संप्राप्ते वसुना सार्धं किं करोम्यधुना वद ॥२७॥
गुरुशिष्यान्तरमीदृक्षं स्वशिष्याणां विलोक्य सः । प्रसाद यज्ञमानस्य परम श्रेष्ठिमेतयोः ॥ २८ ॥
दृष्ट्वा स्वपुत्रविज्ञानं वसुनारदयोरपि । सगोपा विस्मिता चित्ते तस्यौ स्वस्तिमती तदा ॥ २९
ततोऽन्यस्मिन् दिने याते जगौ स्वस्तिमती पतिम् । मत्पुत्र गौरवेण त्वं न पश्यसि मनागपि ॥३०
स्वपन्त्यावचनं श्रुत्वा तद्वचोऽपि जगाद ताम् । भूयो मतिविकल्पं च प्रयायां पश्य सुन्दरि ॥३१
मयं कल्पमेकैकं प्रयाणां सकपर्दकम् । गुरु प्रदाय सर्वेष्टं विधायेमं समानय ॥ ३२ ॥
गुरोराज्ञां समादाय प्राप्य तौ विशिखान्तरम् । ऊचतुर्याविव दृष्टौ तदानीं वसुनारदौ ॥ ३३ ॥
घृतावगुम्फितं कुम्भं मदीयं कुरु वाणिज । मूल्येन तावता क्षीप्रं येन यावः समन्दिरम् ॥ ३४ ॥
तावन्यतः पुनस्तेन निक्षिप्तः स्वगृहे कुटः । आदाय तं सहस्तेन विक्रयास्य पुरस्ततः ॥ ३५ ॥
तन्मूल्यमस्तनं कृत्वा विक्रीय तं निजात्मतः । गुरुसार्थं गतौ तौ च स्निग्धकुम्भाङ्गसंयुतौ ॥३६॥
विधाय विनतिं ताभ्यां भूयो भूयो गुरोरयम् । घृतावगुम्फितः कुम्भः कपर्दकयुतोऽर्पितः ॥ ३७ ॥
घृतावगुम्फितं कुम्भं कारयित्वा कपर्दकैः । पर्वतोऽपि गुरोः पार्श्वं चिक्षेपेमं स्वपाणिना ॥ ३८ ॥
विलोक्य पर्वतस्यैषां वसुनारदयोरपि । मतिभेदं च संवत्से ध्यानवस्त्रपटेऽस्य ॥ ३९ ॥
अथ स्वस्तिमती रुष्टा प्राप्य कोपं सुमर्वरि । कल्पं तत्सुतोऽर्थं प्रयाणामपि संददे ॥ ४० ॥
घृतेन कल्पं पूर्वं भारयित्वा वणिक्पथे । नामप्यस्त यथास्यास्ते कपर्दकयुताः सुताः ॥ ४१ ॥
उपाध्यायीवचः श्रुत्वा प्रयोऽपि प्रीतमानसाः । यमुपपन्नमन्यं ते नानाजनसमाकुलम् ॥ ४२ ॥
घृतपूर्णं कुटं कृत्वा वणिग्भीतो कपर्दकैः । गृहीत्वा पर्वतः शीघ्रं स्वगुरूणां पुरोऽक्षिपत् ॥ ४३ ॥
कपर्दकैर्विना कुम्भं घृतपूर्णं वणिक्पथे । आदाय स्वगुरोरन्तं प्रापतुर्वसुनारदौ ॥ ४४ ॥
ततोऽन्यस्मिन् दिने तेषां प्रयाणामपि सत्वरम् । एकैकं छेलकं दत्त्वा चोपाध्यायो जगाद तान् ॥४५॥
प्रदेशे यत्र नो कश्चित् प्रपश्यति जनः क्षितौ । निहत्य छेलकं तस्मिन्नायध्वं मदन्तिकम् ॥४६॥
स्वसच्छेलकसंयुक्तौ वसुनारदपर्वताः । तावन्यतः सुसंतुष्टा निर्ययुः कलनिस्वनाः ॥ ४७ ॥
पुरं भ्रम वनं भ्रान्त्वा बहुलोकसमाकुलम् । उपाध्यायसमीपं तौ प्रापतुर्वसुनारदौ ॥ ४८ ॥
स्वसच्छेलकसंयुक्तौ विलोक्य वसुनारदौ । उवाच जनकः क्षिप्रं कोपरक्तेक्षणलोचनः ॥ ४९ ॥
निहत्य छेलकं यस्मिन् प्रदेशे जनवर्जिते । स्वकर्म न भवितं कस्माद् गतौ मम यथाक्रमम् ॥ ५० ॥
निशम्य तद्वचस्तौ च निहस्य गुरुमूचतुः । यथाद्युके प्रकुर्वाणौ पश्यतस्त्वां जनः परः ॥ ५१ ॥
हन्यमानावयं खे च चन्द्रादित्यमहाग्रहाः । भूतमात्रं प्रपश्यन्ति चोदितास्त्रसमसुरः ॥ ५२ ॥
इतस्ततामधुं यान्तौ वनेऽन्योन्यर्क्षसंकुले । प्रयतमपि कुर्वाणौ पश्यन्ति वनदेवताः ॥ ५३ ॥
छेलकस्य वधं यान्तौ कुर्वाणौ चेष्टुदोदरे । वसतस्थोऽन्तिपाणीव प्रपश्यन्ति मुहुर्मुहुः ॥ ५४ ॥
एवं हि सति संजाते कारणे सकले विभो । वस्तामिभिविन्तितं भूयो भुवि जातकुतूहले ॥ ५५ ॥
चावयोः पुरतो नूनमुपाध्यायेन जल्पितम् । यथा यस्मिन् प्रदेशे हि कोऽपि पश्यति नो जनः ॥५६॥
हत्वा तस्मिन् प्रदेशे च छेलकं भूपतेऽसौ । तत्क्षणं प्रकर्तव्यं यथाविधिवर्तिसंश्रयैः ॥ ५७ ॥

---

1 पफ घृतकुम्भम्, ब घृतपूर्णमपि(?), 2 ज मनस्व‍ं 3 पफ कुम्भम्, ब कुम्भम्, 4 फ चतुर्भोरन्ते.

स प्रदेशो न कोऽप्यस्ति यस्मिन् कोऽपि न पश्यति। इति श्रुत्वा समायातावार्यौ च भवदन्तिकम्॥५८॥[1]
पर्वतो विजने देशे हत्वा तं छेलकं तदा। तत्क्षणं विधायाथ गत्वाध्याय्यान्तिकं पुनः॥ ५९॥
इदं बुद्धिविशेषं स स्वस्तिमत्या जगौ पुनः। ज्ञात्वाऽसु सम्यक्ततस्तौ तस्थौ ओपशमन्विता॥ ६०॥
अन्यदा त्रिभिरायुक्तः शिष्यैः क्षीरकदम्बकः। महाटवीं विवेशाथ कृतक्षेत्रविशुद्धिकः॥ ६१॥
एकान्ते निर्मलस्थाने चत्वारोऽपि महाजनाः। पठन्त्यारण्यकं ग्रन्थं पञ्चशासनसंस्थिताः॥ ६२॥
एवं हि तिष्ठतामत्र चतुर्णामपि तद्वने। चारणो वीरभद्राख्यः शिवभद्रः समागतः॥ ६३॥
दृष्ट्वा क्षीरकदम्बादीन् चतुरोऽपि महावने। शिवभद्रो जगादेति वीरभद्रं महामुनिम्॥ ६४॥
भगवन् पश्य पश्येदं यथा क्षेत्राग्निशोधनम्। विधाय पठ्यतेऽस्माभी शान्तो विनयान्वितैः॥६५॥
एतेऽपि च तथा विप्रा विनयाचारवर्तिनः। पठन्ति स्वागमं कक्षे पञ्चशासनयोगवः॥ ६६॥
शिवभद्रवचः श्रुत्वा वीरभद्रोऽपि तं जगौ। दिव्यज्ञानसमासंगज्ञाताखिलपदार्थकः॥ ६७॥
अज्ञानिनो भवन्त्येते दिव्यज्ञानपरिच्युताः। कुशास्त्राहितसद्भावाः परिग्रहपरायणाः॥ ६८॥
पठतामेव तेषां च सप्तमं नरकं नरः। एको यास्यति पापिष्ठो नानादुःखसमन्वितम्॥ ६९॥
एवं निगद्य तौ साधू चारणौ गमनादरम्। अवतीर्य सदन्तं च तस्य तु ज्ञानतत्परौ॥ ७०॥
साधूदितं समाकर्ण्य तदा क्षीरकदम्बकः। संसारत्रस्तचेतस्को दध्यौ विस्मितमानसः॥ ७१॥
गुरुषभावास्त्रयोऽप्येते भवपर्वसमन्विताः। न यान्ति नरकं नूनं स्वयावार्द्रवचेतसः॥ ७२॥
सर्वथा नरकं घोरं गन्तव्यं केनचिन्मया। अतः करोमि तत्किंचिद् येन यामि न दुर्गतिम्॥ ७३॥
ततः क्षीरकदम्बेन वसुपुत्रादिसंयुताः। प्रेषिताः स्वगृहं तेऽशुवसुनारदपर्वताः॥ ७४॥
तदेत्यविक्रमे जाते तदा स्वस्तिमती सुतम्। प्रभाष्य पर्वतामित्यं किं नायाति पिता तव॥ ७५॥
मातृवाक्यं समाकर्ण्य जगौ पर्वतकोऽपि ताम्। अस्मान् विसर्ज्य स त्वपि गतोऽहं वेद्मि नाम्बिके॥७६॥
स्वस्तिमत्या तदुक्तेन पर्वतेन सहानया। एको विप्रो वनान्तेऽप्यप्रेषितस्तद्गवेषणात्॥ ७७॥
उपाध्यायोऽपि तत्रार्थे दृष्टस्ताभ्यां वनान्तरे। शिलातलोपविष्टः सन्निग्रन्थमतमूर्तिवः॥ ७८॥
उपाध्यायोऽपि ताभ्यां स दृष्टो मुनिसमीपके। वने यतित्वमापन्नो महावैराग्यकारणात्॥ ७९॥
दूराद् विलोक्य तौ तत्र कक्षं यज्ञोपवीतकम्। पवित्रिकां समादाय सम्प्राप्तौ निजमन्दिरम्॥ ८०॥
दृष्ट्वा स्वस्तिमती सद्यो वस्त्रादीनि स्वमन्दिरे। तदानीं तानि सर्वाणि रुरोद करुणास्वरम्॥ ८१॥
प्रशंसन्ती कदाचित्तं निन्दन्ती च कदापि च। तस्थौ स्वस्तिमती गेहे तदानीं शोकमाश्रिता॥८२॥
उपाध्यायत्वमासाद्य तदा पर्वतकोऽपि सः। व्याख्यानं चापि सच्छात्रान् कुर्वाणो व्यवतिष्ठते॥८३॥
अत्रान्तरे ययातिश्च राजा वैराग्यसंगतः। राज्यपट्टं च न्यासौ वसुनाम्न सुतस्य सः॥ ८४॥
द्वितीय सकलं कोशं स्तोकमयं ददौ ततः। गुणसेनगुरोः पार्श्वे स दीक्षामग्रहीत् परम्॥ ८५॥
गलवादी नभस्थायी महासामन्तसेवितः। चकार विपुलं राज्यं वसुर्वसुसमो भुवि॥ ८६॥
उपाध्यायी समाहूय तदा स्वस्तिमती वसुः। जगादेमां विनीतात्मा वरं गृहाण मनस्विनि॥ ८७॥
वसुवाणीमुपाकर्ण्य स्वचित्तानन्ददायिनीम्। उपाध्यायी जगादेमं समागम्य स्वस्थितम्॥ ८८॥
यस्मिन् काले सुतानेन मम कार्यं भविष्यति। तस्मिन्निमं ग्रहीष्यामि निश्चयं त्वदन्तिके॥८९॥
अथास्ति नगरासन्ना भीषणा गहनाटवी। पुलिन्दस्तत्र पापर्द्धौ गतस्तां शबरेश्वरः॥ ९०॥
मृगं दृष्ट्वा निषादोऽपि मार्गणं धनुषोऽमुचत्। सोऽपि पापानमासाद्य पराहतः क्षणेन च॥९१॥

1 पवतः प्रत्यय. 2 [शेषक].

शरे पराङ्मुखीभूते खगस्य प्रीतमानसः । मुखं व्यवसितस्तत्र पश्चात्[1] वणमर्पितः ॥ ९२ ॥
तस्यमीर्षं परिप्राप्य[1] विस्मयव्याप्तमानसः । व्याधोऽपि तां मुखं यावद् भूयो भूयः प्रपश्यति ॥ ९३ ॥
तावदाकाशसंकाशां स्फटिकस्वच्छमणिप्रभाम्[2] । शिलां ददर्श तन्मलां स व्याधो विपुलनिर्मलाम् ॥ ९४ ॥
विलोक्य तां पुलिन्द्रोऽपि विस्मयं प्राप्य वेगतः । राज्ञो निवेदयामास शिलां व्याधः सकौतुकः ॥ ९५ ॥
श्रुत्वा तद्वचनं राजा व्याधेनेरितं सविस्मयः । कृत्वा प्रच्छन्नमूर्तिं तामानयस्व महन्तिकम् ॥ ९६ ॥
तदुक्तेन समागत्य पुलिन्द्रेण तदन्तिकम् । आनीता सा शिला शीघ्रं महासुरेयं विलोकिता ॥ ९७ ॥
दृष्ट्वा तां विस्मयं प्राप्य दत्त्वाऽस्मै पारितोषिकम् । आस्थानमण्डपे राजा स्थापयामास तां शिलाम् ॥ ९८ ॥
तस्मिन्नुपरि संस्थाप्य दिव्यं सिंहासनं वसुः । आस्ते तद्विष्टरारूढः सभामध्ये सभान्वितम् ॥ ९९ ॥
लोकमध्ये प्रसिद्धिः स्यादीदृशी वसुपार्थिवे । समस्तभुवनव्यापियशसो वसुभूपतेः ॥ १०० ॥
यथार्थं भूपतिः खे वा सिंहासनमधिष्ठितः । आस्थानमण्डपे सत्त्वात् तिष्ठति प्रीतमानसः ॥ १०१ ॥
अत्रान्तरे श्रुतापारो नारदः कलहप्रियः । शिष्यपञ्चशतीयुक्तः प्राप्य पर्वतकं सदः ॥ १०२ ॥
व्याख्यानमत्र कुर्वाणः शिष्याणां पर्वतः पुरः । जगाद नारदं प्रीतो वेदवाक्यमिदं शृणु ॥ १०३ ॥
यज्ञोऽयमस्य समस्तार्थैर्धर्मसम्पन्नमिच्छुभिः । अजैरजैः प्रयत्नेन स्वर्गारोहणकर्मिभिः ॥ १०४ ॥
अस्य वाक्यस्य सत्यार्थो नारदेन मतीयताम् । कथा हि च्छागरूपा प्रोक्ता यष्टव्या तैर्नरैरमले ॥ १०५ ॥
पर्वतस्य वचः श्रुत्वा नारदो निजगाद तम् । भवता स्वमार्गे मदुक्तं हि शोभनं नोदितं त्वया ॥ १०६ ॥
सर्वोत्तिष्ठयसंपन्नं रूपादिविषयसंयुतम् । सजीवं वा चतुष्पदे कृत्वा पिष्टमयं पशुम् ॥ १०७ ॥
अजा हि नाम त प्रोक्ता व्रीहयो येऽप्ररोहकाः । त्रैवार्षिका न जायन्ते यष्टव्यं तत्सुरासुरैः ॥ १०८ ॥

तथा चोक्तं मनुना–

कृत्वा घृतपशुं सङ्गे कुर्यात् पिष्टमयं तथा ।
न त्वेव तु वृथा हन्तुं पशुं प्राप्ति द्विजोत्तमाः ॥ १०९ ॥

कृतः परं कृतयुगे त्रेतायां ज्ञानमुच्यते । द्वापरे यज्ञमेवाहुर्दानमेव कलौ युगे ॥ ११० ॥
यस्य त्रैवार्षिकं भक्तं कुर्यात् तद्भृत्यवर्गयोः । अधिकं चापि येषेन समस्तान्पातुमर्हति ॥ १११ ॥
अत ऊर्ध्वमितो द्रव्ये च सोमं पिबति द्विजः । अपीतसोमपूर्वोऽपि न तत्प्राप्नोति तत्फलम् ॥ ११२ ॥
एतेन पद्यवाक्येन विद्धि मद्वचनं शुभम् । वर्षत्रयसमुद्भूता व्रीहयोऽजा भवन्त्यतः ॥ ११३ ॥
एभिरजैः प्रयष्टव्यं पुरुषैः पुण्यकाङ्क्षिभिः । महानुभावतोपेतैर्निर्तान्तं धर्ममिच्छुभिः ॥ ११४ ॥
इत्येवं समाख्यातं व्याख्यातं परमोदयम् । मम क्षीरकदम्बेन सदाऽपि श्रुतशालिना ॥ ११५ ॥
नारदोक्तं समाकर्ण्य पर्वतो निजगादमुम् । सर्वैर्मह्यमाख्यातं गुरुणा कथितं मम ॥ ११६ ॥
यथार्थैर्ह्यजैर्नूनं यष्टव्यं स्वर्गकामिभिः । जिनपाचारसंपन्नैर्नरैर्धर्मपरायणैः ॥ ११७ ॥
एवं विवादमन्योन्यं कृत्वा पर्वत-नारदौ । पर्वतेन प्रतिज्ञेयं विहिता धनसाक्षिकम् ॥ ११८ ॥
भवसम्मेन मध्यन्ते छेदनाय नारद स्फुटम् । अतो नैः प्रयष्टव्यं छेदकैर्जिनवान्वितैः ॥ ११९ ॥
अयमर्थः समुद्दिष्टोपाध्यायेन नो यदि । मम जिह्वासमुच्छेदो निग्रहो वा भविष्यति ॥ १२० ॥
श्रुत्वा पर्वतकं वाक्यं नारदोऽपि जगाद तम् । वयजा व्रीहयो न स्युर्जिह्वाच्छेदो ममास्तु भो ॥ १२१ ॥
कृत्वाऽन्योन्यं प्रतिज्ञां तावुपसृत्य विवदन्तम् । आवाभ्यां हि विवादस्य वादः श्रावसुसाक्षिकम् ॥ १२२ ॥
स्वमानसे वसुं कृत्वा प्रमाणं कृतनिश्चयौ । अन्यत्र सत्यं दृष्टे सदा पर्वत-नारदौ ॥ १२३ ॥

1 पप कीसर. 2 पप स्फटिक° 3 स नत्वेवतु. (नत्वेव तु 1) [नन्त तु]. 4 [तच]. 5 पप महानुभावो°

सगृहागतमालोक्य पर्वतं म्लानवक्त्रकम् । शोकस्य कारणं माता पप्रच्छ पुरतः स्थितम् ॥ १२४ ॥
अतो मोचनवेलायाः कुतो यातो व्यतिक्रमः । तत्र पुत्र यथा वृत्तं ब्रूहि मे सकलं लघु ॥ १२५ ॥
आत्ममातृवचः श्रुत्वा तामवोचत पर्वतः । मयाऽद्यनाऽम्बिके वादो नारदेन समं कृतः ॥ १२६ ॥
यथावेदस्थलैश्छागो मयोक्तो गुरुवाक्यतः । नीवारैरजशब्दैर्न्यैर्नारदेनोदितः पुनः ॥ १२७ ॥
कृत्वा विस्मयं छेदं तत्पुरः प्रीतमानसैः । ब्राह्मणैर्भवसंकाशैरमीभिः क्रियते मखः ॥ १२८ ॥
इदं गुरूदितं न स्यात् सत्यं यदि ततो मम । जिह्वाच्छेदः प्रकर्तव्यः प्रतिज्ञेयं कृताऽमुना ॥१२९॥
श्रुत्वा सुतोदितं वाक्यं जगौ स्वस्तिमती तकम् । भयवेपितसर्वाङ्गी वाष्पविप्लुतलोचना ॥१३०॥
प्रतिज्ञा शोभना पुत्र गर्वेण विहिता त्वया । व्याख्यानमीदृशं कुर्वन् श्रुतस्ते जनको मया ॥१३१॥
यवाऽत्रा व्रीहयो बीजाः प्रादुर्भावविवर्जिताः । यष्टव्यं तैर्जिनैर्नूनं कृत्वाऽज्यं पिष्टनिर्मितम् ॥१३२॥[1]
तथापि जननी तेन पर्वतेन मयाऽम्बिके । जानताऽपि पितुर्वाक्यं गर्वेणेदं प्रमापितम् ॥ १३३ ॥
तद्वाक्यतो भयग्रस्ता नष्टं स्वस्तिमती तदा । जगाम वसुसामीप्यमुपविष्टा यथासनम् ॥ १३४ ॥
यथाक्रमं च सस्नेहं कुशलप्रश्नपूर्वकम् । इद वचोपत सत्स जगौ स्वस्तिमती वसुम् ॥ १३५ ॥
सांप्रतं देहि मे पुत्र प्राक्तनीं गुरुदक्षिणाम् । उक्तेऽयं वसुना मातः कीदृशी गुरुदक्षिणा ॥ १३६ ॥
ममास्ति स्वस्तिमत्याऽस्य वसुस्तद्वाक्यतः पुनः । नारदेन समं जातौ वादः पर्वतकस्य च ॥ १३७ ॥
अजैर्यष्टव्यमित्यस्य वाक्यस्यार्थोऽयमीदृशः । अजैश्छागैः प्रकर्तव्यो यागः पर्वतभाषितम् ॥ १३८ ॥
नारदेन पुनः प्रोक्ता व्रीहयो येऽप्ररोहकाः । अजास्ते साधु यष्टव्यममीभिर्द्विजकुञ्जरैः ॥ १३९ ॥
जानताऽपि त्वया वत्स वाक्यस्यार्थमिमं पुनः । यथा स्वमा प्रकर्तव्या समानस्ये मदुक्तितः ॥१४०॥[2]
ज्ञात्वा वसुनाऽनेन गुरुशापसमागमम् । स्वस्तिमत्युपरोधेन प्रतिपन्नं तथाऽखिलम् ॥ १४१ ॥
पातयित्वा वसु सा च स्वमते प्रीतमानसा । प्रदायाशिषमेतस्य ययौ स्वस्तिमती गृहम् ॥ १४२ ॥
अथ वादार्थिनौ प्रातौ तदा पर्वत-नारदौ । जग्मतुर्वसुसामीप्यं बहुलोकसमावृतौ ॥ १४३ ॥
प्राप्य सभावरेण्येतौ सभामध्यस्थितं वसुम् । जगाद नारदस्तत्र नितान्तं सत्यवादिनम् ॥ १४४ ॥
वसो सत्यगुणाधान केन यज्ञो विधीयते । तद्वाक्यतो वसुः प्राह नारदं छेलकैरयम् ॥ १४५ ॥
एवं पूर्वोदिते वाक्ये सिंहासनसमं वसुः । नभोमार्गादसत्येन प्रापयद् वसुधातलम् ॥ १४६ ॥
भूयोऽपि नारदेनोक्तः सत्यं ब्रूहि वसो द्रुतम् । छागैर्मखो विधातव्यो नारद स्वर्गकामिभिः ॥१४७॥
एवं निगदिते नूनं वसुः सिंहासनान्वितः । पतितो धरणीमध्ये सुधामापन्नवत्सरः ॥ १४८ ॥
भूयोऽपि नारदः प्राह वसुं धरणिसंगतम् । उपाध्यायोदितं वार्थं सत्यं ब्रूहि यथायथम् ॥ १४९ ॥
नारदोक्तं समाकर्ण्य भाषितं वसुना पुनः । छलकैरध्वरः कार्यो विप्रैः स्वर्गकाङ्क्षिभिः ॥ १५० ॥
एवमुक्ते ततः शीघ्रं कण्ठं कृत्वा समापिना । असत्याद् वसुभूपालः सप्तमं नरकं ययौ ॥ १५१ ॥
नारदोऽपि ततो देवैः पुष्पैरत्यन्तशोभनैः । गन्धामोदितसर्वाशैर्मनुष्यैरपि पूजितः ॥ १५२ ॥
अहो शीलमहो धैर्यमहो सत्यव्रतं दृढम् । नारदस्य मुदा दृष्ट्वा घोषयन्ति नमः स्थिताः ॥ १५३ ॥
पर्वतोऽपि ततः प्राप्य निन्दां जनसमूहतः । मृदुमा गर्दभारूढः स्वदेशादपसारितः ॥ १५४ ॥
अन्यदेशं परिप्राप्य पर्वतः शोकपीडितः । अथो म्यमोपगूह्यस्य तस्थौ नृपतिमानितः ॥ १५५ ॥
अत्रान्तरे परं वृत्तं धर्मविन्यस्तचेतसाम् । भव्यानां निगदामीति समाधानविधायिनाम् ॥ १५६ ॥

---

1 पफ पिष्टजम्. 2 पफ नाना 3 पफ चतुर्भिः कुमकम्, ज चतुर्भिः कुमकैरपि, 4 पफ निपक्वे.

विनीताख्यमहादेशे साकेता नगरी परा । तस्यां बभूव भूपालः सगरो गुणसागरः ॥ १५७ ॥
बभूवास्य नरेन्द्रस्य महादेवी मनःप्रिया । पद्मश्रीरिति विख्याता पद्माक्षी पद्मपाणिका ॥ १५८ ॥
सुबुद्धिरभवत् तस्य मन्त्री मन्त्रविदां वरः । सद्बुद्धिश्चतुराचार्यो नीतिशास्त्रविशारदः ॥ १५९ ॥
सुयोधननृपश्चात्र सामन्तः सगरस्य च । तस्यातिथिः प्रिया चासीत् तत्सुतोऽप्यतिमुक्तकः ॥१६०॥
रूपातिशयसंपन्ना कन्दोत्पललोचना । पीनोन्नतकुचद्वन्द्वा तत्सुता सुलसाऽभवत् ॥ १६१ ॥
पोदनाख्ये पुरे राजा श्रेष्ठो रूपी सुपिङ्गलः । मनोहरी प्रिया चास्य नितान्तं तन्मनोहरी ॥ १६२ ॥
रूपयौवनसंपन्नस्तत्सुतो मधुपिङ्गलः । सुयोधननृपस्यायं भागिनेयः प्रतापवान् ॥ १६३ ॥
सुलसाऽस्मै प्रयत्नेन मधुपिङ्गलरूपिणे । दातुमिच्छति तत्तातस्तूर्यमङ्गलनिस्वनैः ॥ १६४ ॥
अन्यदा नागरेऽमुष्मिन् पताकाध्वजशोभिते । शङ्खतूर्यनिनादेन बधिरीकृतदिङ्मुखे ॥ १६५ ॥
नानाऽनोकहसंकीर्णं फलपुष्पसमन्वितम् । नन्दनाम वनं दिव्यं प्राप्तं चारणयुग्मकम् ॥ १६६ ॥
चारणान्तं परिप्राप्य धर्मं श्रुत्वाऽतिमुक्तकः । तदन्ते च प्रवव्राज महावैराग्यसंयुतः ॥ १६७ ॥
पुरा निर्गच्छताऽनेन सगरेण नरेशिना । सुलसा रूपसंपन्ना प्रासादस्था विलोकिता ॥ १६८ ॥
तदासौ तां समालोक्य तदा सगरभूपतिः । बभूव विस्मितस्वान्तो मन्मथाकुलमानसः ॥ १६९ ॥
ततोऽसौ भवनं प्राप्य मन्दिरं मदविह्वलः । सगरोऽसौ ययाचे तां सुलसां रूपशालिनीम् ॥१७०॥
सोऽपि तां सुलसामस्मै प्रदातुं नेच्छति स्फुटम् । देया मे भागिनेयाय मधुपिङ्गलिने स्फुटम् ॥१७१॥
मधुपिङ्गलमेव च रूपान्वितमपि चित्ते । साऽपि नेच्छति तं कन्या सुलसा रूपगर्विता ॥ १७२ ॥
सगरोऽपि महादुःखव्याकुलीभूतमानसः । सुलसाहृतचेतस्को ध्यायतीति स चेतसि ॥ १७३ ॥
मविरलकुसुमाली तां मत्तमातङ्गगामिनीम् । केनोपायेन तां कन्यां लभेऽहं कलनादिनीम् ॥१७४॥
ज्ञात्वा तं परिज्ञाय सगरं तत्पुरोहितः । बभाण दुःखितस्वान्तं वचसामृतवर्षिणा ॥ १७५ ॥
मध्वादिपिङ्गलस्यैतां तस्मिता चेन्न दास्यति । ततो भविष्यति क्षिप्रं सुलसा तव सुन्दरी ॥ १७६ ॥
पुरोहितवचः श्रुत्वा सगरो दीनमानसः । जगाम तु विनीताख्यां चित्ते सोत्कण्ठतां वहन् ॥१७७॥
उपायं कुरु तं भद्र येन सा सुलसा ध्रुवम् । मधुपिङ्गलनिर्विण्णा जायते बुद्धिसागर ॥ १७८ ॥
सगरस्य वचः श्रुत्वा जगाद सोऽपि तं पुनः । एवं करोमि राजेन्द्र विश्रब्धो भव सांप्रतम् ॥१७९॥
विश्रब्धीकृत्य भूपालं शास्त्रं सामुद्रनामकम् । आशु सामुद्रशास्त्रं चकार स पुरोहितः ॥ १८० ॥
पर्यालोच्य प्रविश्यासौ हि सचिवेन भवतः । तदानीं विष्णुदत्ताया सामुद्रं शास्त्रमर्पितम् ॥ १८१ ॥
सुयोधनगृहं प्राप्य पुस्तकं वाचयत्यसौ । कन्यानिवहमध्यस्था तस्थौ मुदितमानसा ॥ १८२ ॥
प्रशस्तनरशास्त्रार्थं व्याख्याय कलभाषिणी । अप्रशस्तनरस्थानं कृत्वा श्लोकं पठत्यसौ ॥ १८३ ॥
पद्भिः स्वप्ने सर्वं दुष्टं वामने दोषसंततिः । मधुपिङ्गलके नूनं दोषाः सन्ति सहस्रशः ॥ १८४ ॥
मधुपिङ्गलनेत्रेण परिणीताऽपि कन्यका । तत्क्षणाद् विधवा वा स्यात् कदाचित् दुःखान्विता ॥१८५॥
श्रुत्वा तत्पुस्तकस्यार्थं सुलसा मधुपिङ्गले । विरक्ता साऽभवच्छीघ्रं द्वेषास्थानं विषं भवेत् ॥१८६॥
तद्विरक्तां परिज्ञाय सुलसां प्रीतमानसा । विष्णुदत्ता यथावेत्तां स्वयंवरकसदुत्सवाम् ॥ १८७ ॥
वास्तवार्थं परिप्राप्य सा वरेभ्यं मनस्विनि । यथा स्वयंवरं क्षिप्रं भवद्यं चोदयावदत् ॥ १८८ ॥
कृते स्वयंवरे हित्वा समस्तान् नरपुङ्गवान् । वृणीष्व सगरं चोक्त्वा विष्णुदत्ताऽगमद् गृहम् ॥१८९॥

1 क हस्तमात्पर्यं 2 क ... 3 पक कुसुमम्, ज कुसुमीरम्. 4 [...]. 5 ज हस्त. 6 पक कुसुमम्, ज कुसुमीरम्. 7 पक निषम्, ज निषम्मीरम्. 8 पक निषम्म ज निषम्मीरम्.

ततस्तद्वाक्यतः शीघ्रं तत्पिता प्रीतमानसः । पृथिवीमण्डले भूमिः स्वयंवरमघोषयत् ॥ १९० ॥
श्रुत्वा स्वयंवरं सर्वे मिलिता नरकुञ्जराः । यथाक्रमं सुखं तस्थुर्मणिमञ्चेषु सादरम् ॥ १९१ ॥
शङ्खतूर्यनिनादेन बधिरीकृतदिङ्मुखम् । स्वयंवरं विवेशाशु सुलसा सा सखीयुता ॥ १९२ ॥
मधुपिङ्गलमुखांस्त्यक्त्वा नरवृन्दारकानपि । मुमोच सुलसा मालां सगरस्य गले तदा ॥ १९३ ॥
विलोक्य सगरासक्तां सुलसां मधुपिङ्गलः । महावैराग्यमासाद्य निर्ययौ तत्सभालयात् ॥ १९४ ॥[1]
तदा भव्यजनानन्दं मल्लितीर्थे प्रवर्तते । पूर्वोक्तचारणाभ्याशे प्रवव्राज स पिङ्गलः ॥ १९५ ॥
तस्मिन् प्रव्रजिते चार्ये सगरः सुलसासमम् । कामभोगान् प्रभुञ्जानस्तत्पुरे व्यवतिष्ठते ॥ १९६ ॥
मधुपिङ्गलयोगीन्द्रो विहरन् नगरादिकान् । विनीतां नगरीमेव विवेशाशनवाञ्छया ॥ १९७ ॥
गृहं सागरदत्तस्य प्रविष्टः क्रमतो मुनिः । धृतोऽस्य भार्यया भक्त्या श्रद्धादिगुणयुक्तया ॥ १९८ ॥
तस्मिन्नेव गृहे विप्रः सोमशर्माख्यशोभनः । गृहपुस्तकभारेण युक्तस्तद्वेश्मनि स्थितः ॥ १९९ ॥
मधुपिङ्गलकाये च दृष्ट्वा लक्षणानि सः । जगाद श्रेष्ठिनीं विप्रः कौतुकव्याप्तमानसः ॥ २०० ॥
अम्ब मेऽर्धं द्रुतं देहि कार्यमेतेन साम्प्रतम् । किं करिष्यसि चानेन विप्रोऽयं गदितोऽनया ॥ २०१ ॥
सोमशर्मा पुनः प्राह श्रेष्ठिनीं पुरतः स्थिताम् । सामुद्रं पुस्तकं भद्रे वदामीति विसंशयम् ॥ २०२ ॥
ब्राह्मणोक्तं समाकर्ण्य श्रेष्ठिनी निजगाद तम् । पुस्तकस्य हि को दोषो वद विप्र ममाधुना ॥ २०३ ॥
श्रेष्ठिनीभाषितं श्रुत्वा ब्राह्मणोऽपि जगाद ताम् । यथार्थः पुस्तकोऽस्त्यस्य सुतरां श्रेष्ठिनि स्थितौ ॥ २०४ ॥
लक्षणानि च तान्यस्य नन्द्यावर्तादिकान्यलम् । एतस्मिन् मुनिकायेऽपि तादृशैर्लक्षणैः शुभे ॥ २०५ ॥
अनेन मुनिना नूनं शोभनाङ्गेन देहिनाम् । पृथिवीमण्डलं सर्वं भोक्तव्यं विमतो विना ॥ २०६ ॥
सर्वग्रन्थपरित्यागं कृत्वा देहेऽपि निःस्पृहः । निर्ग्रन्थो नग्नतां प्राप्तो भिक्षां भ्रमति सर्वदा ॥ २०७ ॥
अनेन कारणेनार्ये पुस्तकं सत्यवर्जितम् । ततो वदाम्यहं मुग्धे देहि चाद्य मम द्रुतम् ॥ २०८ ॥
श्रुत्वा तद्वचनं भूयो विज्ञातपरमार्थिका । श्रेष्ठिनी निजगादेदं ब्राह्मणं कृतनिश्चयम् ॥ २०९ ॥
सुलसाया निमित्तेन सगरेण कुमन्त्रिणा । विधाय कुस्थितं मम स्वयंवरनिभेन च ॥ २१० ॥
महानुभावतोपेतो मधुपिङ्गलनामकः । वञ्चितोऽयं मुनिस्ताभ्यां विमठो विमलेक्षणः ॥ २११ ॥
एतेन कारणेनायं महावैराग्यसंगतः । आत्मवञ्चनतो भीतो निर्विण्णो मुनितामितः ॥ २१२ ॥
आकर्ण्य तद्वचो योगी कोपमासाद्य वेगतः । सगरस्य वधायायं भावयन्नन्यजन्मनि ॥ २१३ ॥
कृत्वा निदानमीदृशं तदानीं मधुपिङ्गलः । सद्यः पञ्चत्वमासाद्य जातो देवोऽसुरो महान् ॥ २१४ ॥
ततः सगरराजस्य मारणोपायचिन्तकः । ब्रह्मसूत्रजटाधारी ब्रह्मरूपश्चचार सः ॥ २१५ ॥
क्रमादभ्यस्थितस्यास्य पर्वतस्य समीपकम् । समाप्येमं जगादार्यं वचसाऽम्बरनादिना ॥ २१६ ॥
उत्तिष्ठ पर्वत क्षिप्रं भर्ताऽहं जगतः स्फुटम् । ज्येष्ठः सकललोकस्य ततो लोकपितामहः ॥ २१७ ॥
शम्भुर्हिरण्यगर्भोऽहं ब्रह्मा विश्वस्य पूजितः । सर्वे वेदा विनिर्याता मन्मुखाम्भोजतो ध्रुवम् ॥ २१८ ॥
भवन्तं दुःखितं दृष्ट्वा जनजल्पनतत्परम् । साक्षाद्ब्रह्मा ततस्त्वत्तो ब्रह्मलोकात् समागतः ॥ २१९ ॥
अजैर्यष्टव्यमित्यस्य वाक्यस्यार्थो न तत्त्वतः । गुरुः क्षीरकदम्बेन कोविदेन विपश्चिता ॥ २२० ॥
अजाः समा हि विज्ञेया मध्यं तैर्मखे द्विजैः । इममर्थमहं वेद्मि वाक्यस्यार्थं न चापरम् ॥ २२१ ॥
उत्तिष्ठ तेन गच्छावो यागधर्मं स्ववैरिणे । सोऽप्येवं परिप्राप्य कुर्वो द्वावपि संगतौ ॥ २२२ ॥[8]

1 ('सुखिस्सा!) [सुखिन्य]. 2 ज मयोव. 3 ज मध्यार्थिनी. 4 पफ मधुरूयकम्, ज मधुकुलमिरम्. 5 पफ मधुरूपम्, ज मधुरूपमिरम्. 6 पफ मयोपवी. 7 ज विपश्चित्. 8 पफज कुरुमिरम्.

आकर्ण्य तद्वचस्तत्र पर्वतः प्रीतमानसः । तन्मातृनसमं तूर्णमयोध्यां नगरीं ययौ ॥ २२३ ॥
केनापि सगरस्येयं किंवदन्ती निवेदिता । यथाऽभवत् पुरे राजन् महा मयपुरस्थित ॥ २२४ ॥
निशम्य वचनं तस्य सगरो हृष्टमानसः । द्रष्टुं स्वयंभुवं प्राप महार्णं परमोदयम् ॥ २२५ ॥
प्रणम्य सगरो भक्त्या महार्णं कलनिस्वनः । तदानीं तत्पुरस्तस्थौ भक्तिप्रह्वतनूरुहः ॥ २२६ ॥
दृष्ट्वा विविधं तत्र सगरं पुरतः स्थितम् । यथाऽऽज्ञ नृपते क्षिप्रमश्वमेधं मखं कुरु ॥ २२७ ॥
क्रियमाणेऽश्वमेधेऽस्मिन् विमानानि तदाऽसुरः । मणिचित्राणि दिव्यानि दर्शयामास तत्पुरः ॥२२८॥
यथैतानि विमानानि मखमाहात्म्यकारणात् । आकाशात् समागतानीह पश्य त्वं नरकुञ्जर ॥२२९॥
एवमुक्त्वा विमानेषु जनानारोप्य तेषु सः । आरुरोहासुरो व्योम सनादापूरिताम्बरः ॥ २३० ॥
निवेश पार्वतं वैरं स्मृत्वा हन्ति तत्पुनः । कांश्चित् पादप्रहारेण कांश्चित् करतलेन वा ॥ २३१ ॥
तदा विमानमारोप्य सगरं दीनचेतसं । क्षिप्त्वा मस्तके हस्तेतसमारयदसु क्रुधा ॥ २३२ ॥
आदाय सुलसां पश्चादरण्यान्तेऽतिकोपतः । हन्ता खड्गिभिस्तोरयन्यायान्मुनिरिहाययौ ॥२३३॥
निवेश पूर्वसंबन्धमतिसुलसयाधुना । असुरोऽयो यमं नीतः समासोऽयं महात्मनः ॥ २३४ ॥
सापराधाऽपि नेह मी हन्तव्या सुलसाविमि । विशुद्धापापिकल्पस्तु गार्हितं जीवघो यतः ॥ २३५ ॥
साधुवाक्येन तां भूयो मुमोचायं कृपार्द्रधीः । योषितं यद्यपि क्रुद्धा न निमन्तीह वैरिणः ॥२३६॥
तथाऽयोध्यापुरीजातपुरोहितमहत्पदान् । सगरस्य निहत्यायं विनीतावियं ययौ ॥ २३७ ॥
तत्रापि मखयोगेन जीवहिंसनकारिणा । जघान सकलं लोकमसुरो मायमिस्तदा ॥ २३८ ॥
एवं समस्तजीवानां दुष्टे कलियुगे सति । जातं मखनिधानं हि पापोपार्जनकारणम् ॥ २३९ ॥
वैरनिर्यातनं कृत्वा हत्वा सगरभूपतिम् । असुरः प्रीतचेतस्को जगाम स्वमनीषितम् ॥ २४० ॥
महिवीर्ये मखे विप्रैर्हिंसाधर्मः प्रवर्तितः । पूर्वं न विद्यते क्वापि यज्ञे जीववधो भुवि ॥ २४१ ॥

॥ इति श्रीनारदपर्वतमतिज्ञाकरणकथानकमिदम् ॥ ७६ ॥

७७ सागरदत्तकथानकम् ।

पारियात्रवनान्तेऽस्ति[1] चित्रकूटं[2] पुरोत्तमम् । नागदासो नृपस्तत्र नागदासी प्रियाऽस्य च ॥ १ ॥
समुद्रोपपदो दत्तः श्रेष्ठी तत्र महाधनः । भार्या समुद्रदत्ताऽस्य गृहीतसितमानसा ॥ २ ॥
अपराधस्तवेनायं मञ्जुषा रोपभीरुणा । समस्तधनमादाय निर्धनो विहितः पुनः ॥ ३ ॥
ततो गहिलतां भूत्वा भूरपितः स वाणिजः । भद्रलं सकलं नष्टं वदन्नमोऽभ्रमत् पुरे ॥ ४ ॥
एवं हि भ्राम्यतस्तस्य वत्सरैर्बहुभिः कृते । धन्मुमिर्यततो चार्वे मोपशाम्यति स ग्रहः ॥ ५ ॥
वैद्येन धान्यवास्तस्य गदिता बुद्धिशालिना । पुरोऽस्य धनमन्येषां कुरुध्व ग्रहहानये ॥ ६ ॥
निशम्य वचनं तस्य परकीयं धनं बहु । विवधु तत्पुरः क्षिप्र पा यथा खेदतत्पराः ॥ ७ ॥
दृष्ट्वा सागरदत्तोऽपि तद्धनं तोपसंगतः । आलिङ्गति शयानोऽपि करोति स्वपरोऽन्तिके ॥ ८ ॥
निघ्नन् हस्ते समादाय तिष्ठति प्रीतमानसः । पुनः पुनः प्रकुर्वाणः स विभ्रम्योऽभवत् क्षणात् ॥ ९ ॥
परकीयं धनं यत्र समानीतं तदर्थकम् । धनिनां बन्धुभिस्तुष्टैस्तस्य समस्तं समर्पितम् ॥ १० ॥

॥ इति श्रीधनापहरणग्रहणधनसमर्पणविभ्रमीकरण सागरदत्तकथानकमिदम् ॥ ७७ ॥

1 धप. कुम्भ, अ कुमतमित्त. 2 धप. चरीजात

७८ श्रीभूतिपुरोहितकथानकम् ।

अपरविदेहेऽस्ति विषयो गन्धमालिनी । वीतशोका पुरी तत्र वीतशोकजनाश्रिता ॥ १ ॥
वैजयन्तोऽभवत्तत्र नृपतिर्जनवत्सलः । सर्वश्रीस्तन्महादेवी सर्वश्रीः शीलशालिनी ॥ २ ॥
तनयो रूपसंपन्नो विद्यावल्युतोऽजनि । संजयन्तो जयन्तोऽपि नन्दनः कुलनन्दनः ॥ ३ ॥
वीतशोकां पुरीं श्रीमान् स्वयंभूस्तीर्थकृत् तदा । आजगाम पुराधीशैः[1] सेव्यमानो महर्द्धिभिः ॥ ४ ॥
स्वयंभुवो जिनस्याथ समीपे भक्तितत्पराः । धर्मं श्रुत्वा जिनप्रोक्तं वैजयन्तो नराधिपः ॥ ५ ॥
संजयन्तो जयन्तश्च जिनभक्तिपरायणः । भोगनिस्पृहचेतस्कः कीर्तिव्याप्तदिगन्तरः ॥ ६ ॥
स्वनन्दने श्रियं न्यस्य निजगोत्रक्रमागताम् । कीर्तिव्याप्तसमस्ताशे प्रतापाक्रान्तशात्रवे ॥ ७ ॥
आभ्यां समं विनीताभ्यां वैजयन्तो नरेश्वरः । पिहितास्रवसामीप्ये[2] दीक्षां दैगम्बरीं दधौ ॥ ८ ॥
पिहितास्रवसंयुक्ता वैजयन्तादिसाधवः । तपोनिहितचेतस्का विहरन्ति पुरादिकम् ॥ ९ ॥
एवं विहरतां तेषां वैजयन्तस्य योगिनः । केवलं[3] ज्ञानमुत्पन्नं लोकालोकावलोकनम् ॥ १० ॥
तदा चतुर्विधा देवा भक्तिहृष्टतनूरुहाः । प्रापुः केवलिपूजार्थं विकसन्मुखपङ्कजाः ॥ ११ ॥
धरणेन्द्रं विलोक्यात्र जयन्तो मूढमानसः । तन्निदानफलेनाशु धरणेन्द्रत्वमाप सः ॥ १२ ॥
मनोहरीं पुरीं प्राप्य संजयन्तः श्मशानके । दिनानि सप्त संतस्थे कायोत्सर्गेण निश्चलः ॥ १३ ॥
कायोत्सर्गस्थितं दृष्ट्वा संजयन्तं मुनीश्वरम् । पूर्ववैरी क्रुधोपात्तो विद्युद्दंष्ट्रः खगेश्वरः ॥ १४ ॥
ततस्तं कोपतः क्षिप्त्वा जम्बूद्वीपार्धभारते । दक्षिणे विजयार्धस्य भागे जनमनोहरे ॥ १५ ॥
हर्यादिकवती दिव्या कुसुमादिवती तथा । सुवर्णादिवती चान्या चण्डवेगा वेगावती ॥ १६ ॥
तासां पूर्वोदितानां हि नदीनां पञ्चसंगमे । प्रदेशे स्थापयित्वाऽमुं स्वपुरं गतवानसौ ॥ १७ ॥
सुत्वा नक्तं परिप्राप्य पुरे गगनवल्लभे । सर्वेषां च कुलेशानां जगादेति स्वचेष्टितम् ॥ १८ ॥
यथावृत्तं मया रात्रौ दुष्टसत्त्वो विलोकितः । उपसर्गो मुनेः कर्तुं प्रारब्धः खेटसाक्षिकः ॥ १९ ॥
नूनं शीतलतीर्थान्ते संजयन्तो मुनीश्वरः । कर्मक्षये विधायाशु सिद्धिं प्राप्तो निरञ्जनम् ॥ २० ॥
तच्छरीरसुपूजार्थं देवागमनमुत्तमम् । बभूव धूपपुष्पादिगन्धामोदितदिङ्मुखम् ॥ २१ ॥
धरणेन्द्रः परिप्राप्य दृष्ट्वा विद्युद्दंष्ट्रं पुरः । क्रुद्धः कोपारुणास्योऽयं भृकुटीभीषणालिकः ॥ २२ ॥
नागपाशैरयं बद्ध्वा खगं विद्युद्दंष्ट्रं खलम् । दुराचारमिमं क्रूरं क्षिपामि वडवामुखे ॥ २३ ॥
गृहीतं तं विलोक्याथादित्याभः कृपादरः । लान्तवेन्द्रः परिप्राप्य धरणं वत्सलतरम् ॥ २४ ॥
मुञ्च मुञ्च त्वमुं साधो धरणेन्द्र कृतागसम् । मैवंविधं कुरु स्वच्छं पापं महद्वचनं शृणु ॥ २५ ॥
त्वमहं चैव खचरोऽपि संजयन्तस्तपोधनः । संसारगहने भ्रान्ताश्चत्वारो वैरकारणात् ॥ २६ ॥
आदित्याभः पुनः प्राह लान्तवेन्द्रः पुरः स्थितम् । धरणेन्द्रं प्रगर्जन्तं खेटमन्तः कृपान्वितम् ॥ २७ ॥
इहैव भरतक्षेत्रे जम्बूद्वीपोपलक्षिते । बभूव शोभनाकारो विषयः शकट्यादिकः ॥ २८ ॥
तत्र सिंहपुरं नाम विद्यते पुरमुत्तमम् । सिंहसेनो नृपः शूरो रामदत्ताऽस्य गेहिनी ॥ २९ ॥
विद्यते रामदत्ताया धात्रिका निपुणाऽभिधा । सर्वमायासु कुशला सर्वशास्त्रार्थकोविदा ॥ ३० ॥
तस्यैव भूपतेर्विप्रः सत्यवादी पुरोहितः । परद्रव्यनिराकाङ्क्षः श्रीभूतिरभवद् भुवि ॥ ३१ ॥
श्रीदत्ता सप्रिया भार्या रूपयौवनराजिता । नीलोत्पलदलश्यामा चन्द्रोद्दललोचना ॥ ३२ ॥
पुरोहितेनानेनाशु तत्पुरस्य समन्ततः । भाण्डशाला विशाला हि कारिता धनसंगता ॥ ३३ ॥

---

1 पक स्वभौ 2 पक चतुष्पथम् ज चतुष्पथमिरम, 3 ज केवलज्ञं

विश्वासं तत्र पौराणां विधाय सरसं सकः । भक्ष्यपदादिकोशस्य संग्रहं कुरुते तराम् ॥ ३४ ॥
एवं प्रयाति तत्काले पद्मखण्डे पुरोत्तमे । बभूव धनसंयुक्तः सुमित्रो नाम वाणिजः ॥ ३५ ॥
सुमित्रोपपदा दत्ता तत्प्रिया रूपशालिनी । पुत्रः सुमित्रदत्तः स्यात् तत्प्रिया सुमताभिधा ॥ ३६ ॥
तत्रस्थे प्रीतचेतस्काः सर्वेऽपि धनकाङ्क्षया । वाणिज्यार्थे कृतानन्दाः प्रापुः सिंहपुरं परम् ॥ ३७ ॥
श्रुत्वा जनमुखात् तत्र श्रीभूतिं सत्यवादिनम् । कृतभाण्डमहाशालं वैदेशिकहितावहम् ॥ ३८ ॥
मणिरत्नानि दिव्यानि बहुमूल्यानि तत्करे । तके समर्पयामासुस्ते सुभाकृष्टमानसाः ॥ ३९ ॥
स्नानवस्त्रादिकं तत्र कृत्वापि वणिजो गृहे । स्थापयित्वा पुनः सर्वे पद्मखण्डपुरं ययुः ॥ ४० ॥
दिनानि कतिचित्तत्र स्थित्वा मुदितमानसः । सुमित्रो मित्रदत्तोऽपि बहुमित्रसमावृतः ॥ ४१ ॥
भाण्डं सत्वरं दिव्यं बोहित्थे प्रथमार्पितम् । कृतमङ्गलसत्कार्यो रत्नद्वीपं ययौ मुदा ॥ ४२ ॥
* गच्छन्तो जलमार्गेण महावातेन वेगिना । भुग्नपतितबोहित्था मम्रुः सर्वेऽपि वाणिजाः ॥ ४३ ॥
सुमित्रोपपदो दत्तो न परं दृतिमाश्रितः । मिश्रबोहित्थमारुह्य समुत्तीर्णो नदीपतिम् ॥ ४४ ॥
कर्णधारैकयोगेन समुत्तीर्य महाम्बुधिम् । सुमित्रोपपदो दत्तः सिंहादिपुरमाययौ ॥ ४५ ॥
विलोक्य मातरं तत्र भार्यां च पुरतः स्थिताम् । पितुर्वार्तां समाचख्यौ लोकान्तरमितस्य सः ॥ ४६ ॥
पितुश्चर्यं विधायात्र जलदानादिकं ततः । गतः श्रीभूतिविप्रस्य समीपं प्राञ्जलिस्तदा ॥ ४७ ॥
* लोकव्यक्तं समासाद्य तत्पुरो रत्नसंचयम् । ययाचेऽत्यं च सर्वोऽहं मूल्येन परिवर्जितम् ॥ ४८ ॥
श्रीभूतिस्तद्वचः श्रुत्वा जगादेदं ससंभ्रमम् । समारतीविक्षेपेण कुर्वन् वाचाटमम्बरम् ॥ ४९ ॥
नाहं रत्नानि जानामि[1] त्वदीयानि मनागपि । पिशाचेन गृहीतः किं येन मां तानि याचसे ॥ ५० ॥
ततः सुमित्रदत्तेन पौरभूपविरोधिनाम् । महाजनानां समस्तानां प्रत्येकं कथितं हि तत् ॥ ५१ ॥
ततः श्रीभूतिपक्षेण[2] राज्ञा पौरजनेन च । निराकृतो वणिक् तत्र माहनैः सकलैरपि ॥ ५२ ॥
* ततो निराश्रयो भूत्वा दुःखपूरितमानसः । पुरमध्ये परिभ्राम्यन् अत्यतीव स वाणिजः ॥ ५३ ॥
रामदत्तागृहासन्नं चिञ्चिणीवृक्षमाश्रयन् । चटित्वा निशान्तेऽसौ अत्यतीव वणिक् तदा ॥ ५४ ॥
भो नरेन्द्र षाण्मासास्त्वत्पुरे वर्तितेऽधुना । श्रीभूतिना गृहीतानि पञ्च रत्नानि मे ध्रुवम् ॥ ५५ ॥
दिव्यान्यनर्घ्यरत्नानि श्रीभूतिर्लोभसंभवः । तानि नार्पयति स्वार्थं मयुक्तोऽपि पुनः पुनः ॥ ५६ ॥
एवं निगद्य तद्वृक्षस्थारेण वचसा पुनः । प्रयाति स्वगृहं दुःखी सत्यवाहकमस्तकः ॥ ५७ ॥[3]
* अन्यदा रामदत्ता सा श्रुत्वा स्वपतिना सह । निशम्य तद्ध्वनिं प्राह भूपतिं कृपयार्द्रधीः ॥ ५८ ॥
श्रुतं वचनमेतस्य मया षण्मासमात्रकम् । पञ्चरत्नोक्तं राजन् न किंचिदपरं कथितम् ॥ ५९ ॥
श्रुतं मे वाक्यमेतस्य रत्नहृतचेतसः । नूनं कस्याप्युपायेन सत्येनेदं परीक्ष्यताम् ॥ ६० ॥[4]
रामदत्तावचः श्रुत्वा भूपोऽपि निजमानसम् । उन्मत्ततया हि वक्ति वाणिजो वाक्यमीदृशम् ॥ ६१ ॥
निशम्य भारतीमस्य रामदत्ताप्यनीदृशम् । ब्रवीति पञ्च रत्नानि षट् सप्त न कदाचन ॥ ६२ ॥
* अतः सत्यं ब्रवीत्येष दुःखभावेन सर्वथा । राजन्नस्य मया शुद्धिः[5] क्रियते स्थिरमानसः ॥ ६३ ॥[6]
भार्यावचनतो राजा समाहूय निजान्तिके[7] । एकान्ते भीतचेतस्कं श्रीभूतिं निजमन्त्रिणम् ॥ ६४ ॥
भवतैतानि रत्नानि वाणिजस्य हतात्मना । गृहीतानि न वा तानि सांप्रतं ब्रूहि मे ध्रुवम् ॥ ६५ ॥
नरेन्द्रवचनं श्रुत्वा श्रीभूतिः प्राह तं नृपम् । न जानामि न भूपाल रत्नान्येतस्य निश्चितम् ॥ ६६ ॥

1 क ब्रवीति. 2 पज श्रीपति° (but corrected thus in प) फ श्रीभूति° 3 पफ प- पुञ्जकम्, ज पुञ्जकमीदृशम्. 4 पफ निश्चयम्, ज निश्चयमीदृशम्. 5 ज मद्बुद्धिर्भवतादृशि. 6 पफ ध्रुवम्, ज ध्रुवम्. 7 पफ निजान्तिके. 8 पफ ध्रुवम्, ज ध्रुवमीदृशम्.

ततोऽन्यदिवसे जाते रामदत्तोदितेन च । पुरोहितसमं द्यूतं रमते नरकुञ्जरः ॥ ६७ ॥
अनयोर्दीव्यतोर्मध्ये रामदत्ताऽतिविस्मिता । तस्थौ मुदितचेतस्का तदानीं तत्समीपगा ॥ ६८ ॥
अत्रान्तरे महाबुद्धी रामदत्ता पुरोहितम् । पप्रच्छ प्रथमं साऽपि साभिज्ञानं स्फुटाक्षरम् ॥ ६९ ॥
रामदत्तावचः श्रुत्वा श्रीभूतिर्भूतिगर्वितः । साभिज्ञानमिदं प्राह रामदत्तापुरःसरम् ॥ ७० ॥
मयाऽद्य वेश्मनि स्पष्टं पायसं घृतसंयुतम् । सशर्करं मनोहारि परिमिष्टं सुभोजिता ॥ ७१ ॥
पूर्वाशाभिमुखस्थेन पुत्रपौत्रयुतेन च । मया भुक्तमिदं साधु सानुरागं समीक्षितम् ॥ ७२ ॥
साऽभिज्ञानेन चानेन सद्य बुद्धिमती द्रुतम् । प्राप्य तद्ब्राह्मणीं नूनं पञ्चरत्नानि याचते ॥ ७३ ॥
रामदत्ताऽवलवाक्यं श्रुत्वा तां साऽब्रवीदिति । यथाऽहं तानि रत्नानि न वेद्मि वनिते ध्रुवम् ॥ ७४ ॥
प्रथमद्यूतं जित द्यूते समादाय त्वरावती । प्राप्य द्वितीयवेलायां तकां बुद्धिमती जगौ ॥ ७५ ॥
साभिज्ञानेन चान्येन देहि रत्नानि मेऽधुना । सा वक्तीमानि नष्टानि क्व गतानि न वेद्म्यहम् ॥ ७६ ॥
ततस्तृतीयवेलायां यज्ञोपवीतसमुद्रिकम् । समादाय तकां प्राप्य जगौ बुद्धिमती स्थिरम् ॥ ७७ ॥
यथा श्रीभूतिना प्रोक्तं यज्ञोपवीतसमुद्रिकम् । दृष्ट्वा वाणिजरत्नानि दातव्यानि करे मम ॥ ७८ ॥[1]
ततस्तां मुद्रिकां दृष्ट्वा भर्तरि क्रुद्धमानसा । साऽऽदाय पञ्चरत्नानि ददौ बुद्धिमतीकरे ॥ ७९ ॥
ततो बुद्धिमती शीघ्रं रत्नान्यादाय पञ्च वै । रामदत्ताकरे तानि ददौ पूर्णमनोरथा ॥ ८० ॥
रामदत्ता समादाय पञ्च रत्नानि सत्वरम् । जगाद नृपतिं तुष्टा पश्य द्यूतं विमुच्यताम् ॥ ८१ ॥
रामदत्तावचः श्रुत्वा नृपतिर्द्यूतमण्डलात् । उत्तस्थौ सर्वं शीघ्रं समुत्तस्थौ प्रमोदवान् ॥ ८२ ॥
ततो गतेषु सर्वेषु द्यूतकारेषु भूभुजे । रामदत्ता ददौ तानि पञ्च रत्नानि सत्वरम् ॥ ८३ ॥
नररत्नसमूहानां मध्ये तानि निधाय च । भूपः सुमित्रदत्तस्य दर्शितानि महीभुजा ॥ ८४ ॥
ततः सुमित्रदत्तेन रत्नमध्ये विलोक्य च । गृहीतानि समस्तानि निजरत्नानि सादरम् ॥ ८५ ॥
समुद्रदत्तमालोक्य निजरत्नसमन्वितम् । महादेवी नरेन्द्रोऽपि तुतोष बहुविस्मयः ॥ ८६ ॥
खरारोहणं तत्र पञ्चमित्यविधिवच्चनम् । सर्वस्वहरणं चापि कारयित्वाऽस्य यत्नतः ॥ ८७ ॥
अनेन विधिना शीघ्रं श्रीभूतिर्धनहारकः । भूभुजा रोषतः पापः स्वदेशात्प्रसारितः ॥ ८८ ॥[2]
ततो निकारमासाद्य नृपतेः साधुनिन्दितम् । विदीर्णहृदयः पापः श्रीभूतिः पञ्चतामितः ॥ ८९ ॥
आर्तध्यानान्मृतिं प्राप्य सिंहसेनस्य भूपतेः । भाण्डागारेऽजनि क्षिप्रं गन्धनः [illegible] भुजंगमः ॥ ९० ॥
श्रीभूतिस्थानके राज्ञा धम्मिल्लो नाम ब्राह्मणः । चतुर्वेदसमायुक्तः कृतोऽनेन पुरोहितः ॥ ९१ ॥
तदा समुद्रदत्तोऽपि सत्यवादित्वमाप्य च । पद्मखण्डपुरं गत्वा ददौ दानं स सादरम् ॥ ९२ ॥
दत्त्वा दत्त्वा सुपात्रेभ्यो भक्तीदं वचनं पुनः । सुतोऽहं रामदत्ताया भविष्यामि भवान्तरे ॥ ९३ ॥
गिरिं विमलकान्तारं प्राप्य धर्मप्रिया सकः । वरधर्ममुने पार्श्वे श्रावकाणां व्रतं दधौ ॥ ९४ ॥
जिनधर्मसमादानाद् निरोधं प्राप्य तत्क्षणम् । मृत्वा तत्सर्वे जाता भीमव्याघ्री तदन्विता ॥ ९५ ॥
तत्र सुमित्रदत्तोऽयं गतवान् वन्दितुं मुनिम् । विलोक्य तं मुदं व्याघ्री भयासाऽस्य भक्षणा ॥ ९६ ॥
ततोऽयं भक्षितो व्याघ्र्या कालं प्राप्य निदानतः । सिंहसेनसुतो जातो रामदत्तोदरीरयः ॥ ९७ ॥
माता च सिंहचन्द्रोऽयं नन्दनः कुलनन्दनः । तद्भ्राता पूर्णचन्द्राख्यः पूर्णचन्द्रसमाननः ॥ ९८ ॥
अथैकस्मिन् दिने जाते भाण्डागारे निजाश्रमी । सिंहसेनो विशेषाद्यु द्रविणस्य दिदृक्षया ॥ ९९ ॥
सिंहसेनं विलोक्यात्र प्रविष्टं पूर्ववैरतः । ददंश[4] पन्नगः क्रुद्धस्तदा गन्धननामकः ॥ १०० ॥

---

1 पफ omit the second line of 77 and the first line of 78. [2] पफ भुम्य, ज भुम्न्मीरम्. 3 ब विवलको नर्द. 4 ज ददर्श

विभावर्यं तत्र पौराणां विधाय सरसं सकः । भयपदारिकोशस्य संग्रहं कुरुते तत [illegible] ॥ १०१ ॥
एवं प्रयाति तत्काले पद्मखण्डे पुरोत्तमे । बभूव धनसंयुक्तः सुमित्रो नाम [illegible] ॥१०२॥
सुमित्रोपपदा दृष्टा तत्प्रिया रूपशालिनी । पुत्रः सुमित्रदत्त स्यात् [illegible] स केवलम् ॥१०३॥
ततस्ते प्रीतचेतस्काः सर्वेऽपि धनवाञ्छया । वाणिज्यार्थे [illegible] विसंज्ञयम् ॥१०४॥
श्रुत्वा धनमुखात् तत्र श्रीमूर्तिं सत्यवादिनम् । [illegible] स्थिता सर्वे धम्मुर्धमागतम् ॥ १ ५ ॥
मणिरत्नानि दिव्यानि बहुमूल्यानि तत्करे । ते[illegible] पुरावारं गृहावेरं विप हुतम् ॥ १०६ ॥
स्वसद्रव्यादिकं तत्र कस्यापि वणिजो [illegible] हुतमसिकुम्भ हृत विश्व ॥ १०७ ॥
दिनानि कतिचिद्यत्र स्थित्वा [illegible] स्मृत्वा चिरंतनं वैरं दध्यौ विस्मितमानसः ॥१ ८॥
आरुह्य सत्वरं दिव्यं बोधि[illegible] । यत्नतोऽपि प्रतिपत्त्यादिर्मिमार कृतनिश्चयः ॥१०९॥
गच्छन्तो कठमार्येण [illegible] । श्रीमूर्तिपूर्वकः सर्पो बभूव चमरी चत्र ॥ ११० ॥
सुमित्रोपपदो दत्तो [illegible] तत्क्षणे । बभूव सल्लकीविन्ध्ये तदा मदकलः करी ॥ १११ ॥
कर्मविरैनयोर्मे [illegible] पुरोहित । तत्रैव मर्कटो जातो दाडिमीपुष्पवल्कलः ॥ ११२ ॥
विलोक्य म[illegible] सिंहपुरेश्वरः । बभूव साधितारातिर्गुणराजितभूतलः ॥ ११३ ॥
पितृका[illegible] नरेश्वरः । बभूवास महादेवी हिरण्योपपदामती ॥ ११४ ॥
सो[illegible] सर्वं श्रुत्वाऽग्रनीश्वरात् । भद्रबाहुगुरोः पार्श्वे संजातः श्रमणो महान् ॥११५॥
[illegible] महावैराग्यसंभवा । दत्तकान्त्यार्यिकापार्श्वे हिरण्यमतिरार्यिका ॥११६॥
[illegible] सार्धं हिरण्यमतिरार्यिका । पूर्णचन्द्रमुनिं नत्वा जगाम कृतनिश्चया ॥ ११७ ॥
[illegible] हिरण्यमतिरार्यिका । रामदत्ता कथं माय तिष्ठति ब्रूहि मेऽधुना ॥ ११८ ॥
[illegible] पूर्णचन्द्रमुनिः श्रुत्वा तद्वाक्यं स्थिरमानसः । दिव्यज्ञानेन तां ज्ञात्वा जगादेति विचक्षणः ॥११९॥
[illegible] दृष्टो छद्म पत्तनमागतः । त्वत्सुता रामदत्ता च संजाता विधवा तदा ॥१२ ॥
पूर्णचन्द्रवचः श्रुत्वा नत्वाऽसौ भक्तितत्परा । हिरण्यमतिका सार्धं दत्तकान्तिकयाऽगमत् ॥१२१॥
रामदत्ता समालोक्य मातरं दीक्षितामिमाम् । प्रणम्यासनगा भक्त्या चक्रे स्वान्तिकया सह ॥१२२॥
जिनधर्मसुधासिक्ता रामदत्ता तदन्तिके । प्रवव्राज विनीतात्मा जिनभक्तिपरायणा ॥ १२३ ॥
विलोक्य सिंहचन्द्रोऽपि मातरं तपसि स्थिताम् । पूर्णचन्द्रे श्रियं न्यस्य हरिहस्तिधनादिकम् ॥१२४॥
महावैराग्यसंपन्नो निर्जितप्रबलमन्मथः । भद्रबाहुमुनेः पार्श्वे धीरधीः स तपोऽग्रहीत् ॥१२५॥
महावैराग्यसंपन्नो जिनभक्तिपरायणः । चारणर्द्धिसमायुक्तो दिव्यज्ञानी महातपाः ॥ १२६ ॥
पूर्णचन्द्रोऽपि राज्यस्थो मिथ्यात्वमददूषितः । बभूव निष्ठुरस्वान्तो जिनवाक्यपराङ्मुखः ॥१२७॥
अन्यदा रामदत्ताऽपि सिंहचन्द्रं मुनीश्वरम् । पप्रच्छ चारणं भक्त्या तदानीं स्वमवान्तरम् ॥१२८॥
श्रुत्वा तद्वचनं साधुर्मगादेतां पुरः स्थिताम् । जिनपादारविन्दाम्भो भक्तिप्रस्तनूरुहाम् ॥ १२९ ॥
अत्रैव भरतक्षेत्रे विषये कोशलाभिधे । विश्रुते धर्मनिग्रामे ब्राह्मणोऽत्र मृगायणः ॥ १३० ॥
तत्प्रिया मधुरा नाम्ना तत्सुता वरुणाऽभवत् । मृगायणे मृतिं प्राप्ते साकेतनगरे परं ॥ १३१ ॥
विमतेऽतिपठो राजा भार्याऽस्य श्रीमती मता । अनयो रूपसंपन्ना हिरण्यमतिका सुता ॥१३२॥
पोदनाख्यपुरेशस्य पूर्णचन्द्रस्य दीप्यता । सा वितीर्णा कलस्थानां विधिना दशिताभवत् ॥ १३३ ॥
मधुरया पुत्र धार्मी कांडं कृत्वा विधानतः । प्राप्य तद्धर्मसंभूतिं रामदत्ताऽधुनाऽभवः ॥ १३४ ॥
या पुत्र वरुणा मत्रे मृता कर्मानुभावतः । स्वादर्भ प्राप्य संभूतः पूर्णचन्द्रः स नन्दनः ॥ १३५ ॥

1 [दत्तकी°]. 2 ब धर्मिकामना: 3 पक दत्तकान्ता° 4 ब कर्तुं 5 पप कुम्भम् ब कुम्भमिव०

मैत्रोपपदो देवः पद्मखण्डे पुरे पुरा । यः प्राप्य त्वन्मतेनाशु श्रीभूते रत्नपञ्चकम् ॥ १३६ ॥
नुरागतः कृत्वा निदानं कालसंगतः । सांप्रतं सिंहचन्द्राख्यो जातस्त्वत्सुनन्दनः स्फुटम् ॥१३७॥[1]
सिंहसेनोऽपि कालं कृत्वा यकः पुनः । गहने हस्तितां प्राप्तो प्राहितः स नृपं मया ॥१३८॥
तुङ्गः सितदन्तविराजितः । यूथकेसरिनियन्ते कुञ्जरः स निरिष्यते ॥ १३९ ॥
नं प्राप्य सहने दरदायिनि । कुर्कुट्योपपदः सर्पो बभूव सोऽतिभीतिदः ॥ १४० ॥
दृष्टोऽसौ कलकुञ्जरः । काल चकार गुद्धात्मा जिनं चित्ते विचिन्तयन् ॥१४१॥
सौ सहस्रारे सुरोत्तमः । बभूव श्रीधरो नाम्ना स्फारकुण्डलराजितः ॥ १४२ ॥
तापितो भूभुजा सदा । धम्मिल्लाख्यो मृतिं कृत्वा संजातो मर्त्ये महान् ॥१४३॥
प्राप्य स दुःखितः । वालुकादिप्रभा जातो नानादुःखसमाकुलाम् ॥१४४॥
नाम शृगालकः । प्राप्तः करिवरोदेशं कौतुकव्याप्तमानसः ॥ १४५ ॥
अनपि गजेश्वरात् । वाणिजाय स्वमित्राय तदानीं शबरो ददौ ॥ १४६ ॥
ते पुत्रस्य समर्पिताः । तेनापि भूभुजा दन्तैः कारितं स्वस्य विष्टरम् ॥ १४७ ॥
न्दारः कारितस्तेन शोभनः । कृत्वा हारं गले कुर्वन् राज्यं सिंहासने स्थितः ॥ १४८ ॥
मुनेर्वचः श्रुत्वा तदानीं रामदत्तया । पूर्णचन्द्रोऽपि सद्वाक्यैर्बोधितः परमोदयैः ॥ १४९ ॥
आकर्ण्य श्रावकं धर्मं कालं कृत्वा समाधिना । सहस्रारेऽभवद्देवः स वैडूर्यविमानके ॥ १५० ॥
रामदत्तापि तत्रैव कल्पे कालं विधाय च । स्वयंप्रभविमानेऽभूद् देवः स्वयंप्रभो महान् ॥१५१॥
विधाय सिंहचन्द्रोऽपि परां सल्लेखनामसौ । प्राप्य ग्रैवेयकं चोर्ध्वं जातो देवो महर्द्धिकः ॥ १५२ ॥
सूर्यप्रभः स्फुटस्तस्मात् स्वर्गाद् भोगमनोरमात् । यत्र स्थाने समुत्पन्नस्तद्वदाम्यधुना हितः ॥१५३॥
अत्रैव भरतक्षेत्रे जम्बूद्वीपोपलक्षिते । दक्षिणे विजयार्धस्य भागे च परमोदये ॥ १५४ ॥
धनधान्यसमाकीर्णे धरणीतिलके पुरे । विद्यतेऽतिबलो भूपः सर्वविद्याधराधिपः ॥ १५५ ॥
सुशीला तन्महादेवी चारुरूपा सुलक्षणा । तत्सुता च कलाधारा श्रीधरा श्रीधरा सदा ॥ १५६ ॥
स अलकापुरे रम्ये खेचरोऽस्ति सुदर्शनः । वितीर्णाऽस्मै महाभूत्या पितृभ्यां सुखभोगिने ॥१५७॥
वैडूर्यविमानात्प्रच्युत्य देवो मनोरमः । यशोधराभिधा कन्या जाता साऽस्य मनोहरी ॥ १५८ ॥
परमस्त्रोधरश्रेण्यां विजयार्धमहीभृतः । प्रभाकरनगरं रम्यं विद्यते परमोत्सवम् ॥ १५९ ॥
सूर्यप्रभो नृपस्तत्र नाम विद्याधराधिपः । जनकेन च सा दत्ता तस्मै सचन्द्रमिच्छता ॥ १६० ॥
तस्माद्ग्रैवेयकात्प्रच्युत्य तदानीं धारणामरः । रश्मिवेगोऽभवत् पुत्रस्तस्या जनमनोहरः ॥ १६१ ॥
दत्त्वा राज्यं सुतायास्मै सूर्यदत्तो नरेश्वरः । मुनिचन्द्रसकाशेऽस्मिन् दीक्षां दैगम्बरीं श्रितः ॥१६२॥
श्रीधरा च मुनिं नत्वा जिनमत्या यशोधरा । गुणमत्यार्यिकापार्श्वे दधौ जैनेश्वरं तपः ॥ १६३ ॥
सिद्धकूटजिनं नन्तुं जिनशासनवत्सरः । रश्मिवेगो जगामाशु भक्तिभारस्वनूद्धः ॥ १६४ ॥
भक्तिवशात् परीत्येदं जिनं नत्वा सुरार्चितम् । समस्तसाधुसर्पं च स तस्थौ मुनिसंनिधौ ॥ १६५ ॥
जिनधर्मं समाकर्ण्य भव्यलोकसुखप्रदम् । हरिचन्द्रमुने पार्श्वे रश्मिवेगो दधौ तपः ॥ १६६ ॥
अथ काञ्चनसञ्ज्ञायां गुहायां स तदा पठन् । त्रिलोकोपपदां नूनं प्रज्ञप्तिं तस्थिवान् मुदा ॥ १६७ ॥
ततः श्रीधरया साकमार्यिका सुयशोधरा । वन्दित्वा तं मुनिं भक्त्या तदन्ते तस्थुषी पुनः ॥ १६८ ॥
तृतीयभ्रमसंजातो नारकः कलुषाशयः । तस्मादुत्तीर्य दुःखेन संजातोऽजगरो महान् ॥ १६९ ॥

1 पफ पुम्मम्, ज पुण्यमिदम्. 2 ज वृष्टो 3 [वत्स:]

सुप्तं तथाप्यमालोक्य निशायां क्षमुकस्थित । रश्मिवेगार्यिकं कोपाज्जघास स्मृतवैरकः ॥ १७० ॥
रश्मिवेगो मुनिस्तत्र नाके कापिष्ठनामनि । अर्कप्रभः सुरो रूपी हारधारी बभूव सः ॥ १७१ ॥
अमुमेव च कापिष्ठे रुचकाख्यविमानके । आर्यिकाद्वयमप्यार मृत्वा तद्देवतामितौ ॥ १७२ ॥
भक्षयित्वा अमुखानि कालं कृत्वा समाधिना । चतुर्थनरकं प्राप पापाद्दुःखसमन्वितम् ॥ १७३ ॥
चारणाख्यो मुनिर्योऽसौ सिंहचन्द्रोऽहमिन्द्रकः । प्रीतिंकरः सुरो जातो देवप्रीतिविधायकः ॥१७४॥
तस्मादुत्तीर्य दुःखेन सुखवार्धिसमन्वितात् । अवतार चकारैष नाकसौख्यविरक्तधीः ॥ १७५ ॥
अत्र चक्रपुरे रम्ये राजाऽऽसीदपराजितः । भार्याऽस्य सुन्दरी नाम रूपयौवनसुन्दरी ॥ १७६ ॥
तनयो रूपसंपन्नः सुतश्चक्रायुधोऽभवत् । चित्रमालास्य प्रिया चास्य कन्दोत्पललोचना ॥ १७७ ॥
अर्कप्रभोऽवतीर्यासौ कापिष्ठाच्च्युतः सुरः । वज्रायुधोऽभवत् तस्या नन्दनः कुलनन्दनः ॥ १७८ ॥
एष पूर्वभवे राजा सिंहसेनो महाबलः । अवतार भवीम्यस्य सांप्रतं मधुवादरात् ॥ १७९ ॥
अतिवेगोऽभवद् राजा पृथिवीतिलके पुरे । प्रियंकरा प्रिया चास्य रत्नमाला सुताऽऽस्तुत ॥१८०॥
एषा पूर्वभवे चास्य रामदत्ता मनःप्रिया । श्रीधराऽपि तथाऽन्यस्मिन् श्रीधरा तनुयोगतः ॥ १८१ ॥
पूर्वप्रीतिनिबन्धेन दत्ता वज्रायुधाय सा । पितृभ्यां स्नेहयुक्ताभ्यां महामोहविधायिने ॥ १८२ ॥
तस्या यशोधरापूर्वश्च्युतो नाकात्स्यादरम् । रत्नायुधस्ततो जातो गुणरत्नमहोदधिः ॥ १८३ ॥
एष पूर्वभवे नूनं पूर्णचन्द्रो महाद्युतिः । वज्रायुधतनूजाय ददौ चक्रायुधः श्रियम् ॥ १८४ ॥
पिहितास्रवसामीप्ये दीक्षामादाय शुद्धधीः । निहत्याशेषकर्माणि मोक्षं चक्रायुधो ययौ ॥ १८५ ॥
वज्रायुधो निजं राज्यं दत्त्वा रत्नायुधाय सः । दीक्षां जग्राह जैनेन्द्रीं स्वर्गमोक्षसुखप्रदाम् ॥ १८६ ॥
ततो रत्नायुधो राज्यं कुर्वाणः पितृशासनात् । मिथ्यात्वं प्राप्य मूढात्मा क्रूरचित्तो बभूव सः ॥१८७॥
तस्य मेघनिनादोऽभूद् राजहस्ती मदोत्कटः । नदीं गतो जलं पातुं स स्नातो निजलीलया ॥१८८॥
तत्र साधुं समालोक्य जातो जातिस्मरः करी । तृष्णाक्रान्तशरीरोऽपि जलं पातुं स नेच्छति ॥१८९॥
राजा तं हस्तिनं दृष्ट्वा दुःखपीडितमानसः । वज्रदन्तमुनिं प्राप्य तन्निमित्तं स पृच्छति ॥ १९० ॥
भूपालस्य वचः श्रुत्वा दुःखपीडितचेतसः । जगादेमं मुनिः सर्वं ज्ञानादापूरितान्तरः ॥ १९१ ॥
चित्रकारे पुरे रम्ये प्रीतिमित्रो नरेश्वरः । बभूव तन्महादेवी सुन्दरी नाम विश्रुता ॥ १९२ ॥
प्रीतिंकरः सुतस्तस्याः सर्वप्रीतिविधायकः । तन्मन्त्री चित्रबुद्धिश्च तद्भार्या कमला मता ॥ १९३ ॥
विचित्रमतिनामाऽयं सुतोऽस्य मतिराजितः । बभूव भासुराकारो जिनधर्मपरायणः ॥ १९४ ॥
प्रीतिमित्रनृपसूनुर्विचित्रमतिरुन्नतः । मन्त्रिपुत्रोऽपि सद्बुद्धिर्जिनागमसुभावितः ॥ १९५ ॥
तावेतौ यौवनं प्राप्य श्रुतसागरयोगिनम् । महावैराग्यसंपन्नावभूतां हि तपोधनौ ॥ १९६ ॥
विहरन्तौ ततः क्वापि गोचरार्थं तपोनिधी । अयोध्यां नगरीं प्राप्तौ पताकाध्वजराजिताम् ॥ १९७ ॥
गणिकां बुद्धिसेनाख्यां विलोक्यायातिरूपिणीम् । मन्त्रिपुत्रः क्षणाद् यातो विचित्रमतिरुत्सुकः ॥१९८॥
मांसं प्रसाधयन् कान्तं नानाभेदसमन्वितम् । गन्धमित्रस्य भूपस्य सूपकारोऽभवत् सकः ॥१९९॥
एवं प्रकुर्वतस्तस्य सूपकारस्य भूभुजा । तुष्टेन गणिका दत्ता बुद्धिसेनाऽतिरूपिणी ॥ २०० ॥
तथा समं महाभोगान् भुञ्जानो मनसः प्रियान् । तदा कालं विधायासौ सप्तमं नरकं ययौ ॥ २०१ ॥
संसृतिं स चिरं भ्रान्त्वा संजातोऽयं[2] गजेश्वरः । अस्मान् विलोक्य राजेन्द्र जातो जातिस्मरोऽधुना २०२
हित्वा जिनोदितं धर्मं यथाऽहं संसृतिं गतः । तथाऽयं कुञ्जरो राजन् प्राग्विचित्रमतिः स्फुटम् ॥२०३॥
जिनधर्मं समादाय दुःखाक्रान्तमानसः । बभूव श्रावको राजन् नितान्तं कलकुञ्जरः ॥ २०४ ॥

1 पफ पूर्वभवैः 2 पफ संजातो [संजातोऽयं]. 3 पफ कुम्भम्, ज कुम्भम्.

श्रुत्वा मुनिवचः सत्यं तदा रश्मायुधः पुनः । स्थिरं सम्यक्त्वमादाय बभूव श्रावको महान् ॥२०५॥
वज्रायुधमुनिं दृष्ट्वा प्रियङ्गुवनमभ्यगम् । पङ्कप्रभामतिक्रम्य भिल्लो भूत्वा वनं ययौ ॥ २०६ ॥
समपार्श्वे वनं यातः कायोत्सर्गीययोगतः । शरपातेन तं साधुं चकार गतजीवितम् ॥ २०७ ॥
फलं कृत्वा मुनिस्तत्र शुभध्यानपरायणः । प्राप्य सर्वार्थसिद्धिं स कृतसर्वार्थसाधनः ॥ २०८ ॥
साधुं निहत्य भिल्लोऽपि मृत्युमासाद्य वेगतः । सप्तमं नरकं प्राप घोरवेदनया युतम् ॥ २०९ ॥
रश्मायुधस्तथा रत्नमाला मातृसुतद्वयम् । फलं कृत्वा समाधानात्प्राप्तौ तावच्युतेऽमरौ ॥ २१० ॥
अनयोरच्युतयोस्तस्मात् तदा देवायुषः क्षये । अवतारं यथाभ्यां तु सांप्रतं शृणुतादरात् ॥ २११ ॥
अथास्ति धातकीखण्डे पूर्वमेरोः प्रभासतः । अपरस्मिन्विदेहे हि विषयो गन्धिलो महान् ॥ २१२ ॥
कासपुष्पसमानाभैः प्रासादनिकरैः परैः । अयोध्या नगरी तत्र विद्यते लोकसङ्कुला ॥ २१३ ॥
असौ नरेश्वरः श्रीमानर्हद्दासो इलाधिपः । कान्त्या जयन् विधुं विद्वान् दीप्त्या च रविमस्ति सः ॥२१४॥
बभूवास्य नरेन्द्रस्य महादेवी मनोहरी । सुव्रता जिनदत्ता च विशालदललोचना ॥ २१५ ॥
आद्यो वीतभयः पुत्रो द्वितीयोऽपि विभीषणः । तृतीयो बलदेवोऽपि वासुदेवश्चतुर्थकः ॥ २१६ ॥
अनयो रूपसम्पन्ना विनीताक्षरधारिणः । बभूवुर्नन्दना 'चित्तामत्सारोऽन्वयो यथा ॥ २१७ ॥
फलं विधाय कालेन श्वभ्रं यातो विभीषणः । अनिवृत्तगुरोरन्ते बलदेवोऽग्रहीत् तपः ॥ २१८ ॥
बलदेवो मुनिस्तूर्णं कालं कृत्वा समाधिना । कृत्वार्ककीर्तिनामायं लान्तवेन्द्रो बभूव सः ॥ २१९ ॥
बोधितो लान्तवेन्द्रेण श्वभ्रं प्राप्य विभीषणः । गाढं सहोदरप्रीत्या स्नेहतः किं न जायते ॥२२०॥
भुक्त्वा परं सुखं स्वर्गे दुःखं च नरके तथा । उत्पत्तिमनयोर्वक्ष्ये स्वर्गश्वभ्रनिवासिनोः ॥ २२१ ॥
अथ जम्बूमति द्वीपे वास्ये भरतनामनि । विषये गन्धमालिन्यां विजयार्धे पुरोत्तमम् ॥ २२२ ॥
बभूवात्र पुरे राजा श्रीधर्माख्यो महामतिः । श्रीदत्ताऽस्य प्रिया चार्वी श्रीदामस्तनयोऽनयोः ॥२२३॥
सोऽन्यदा मन्दरं स्वर्णं विद्यां साधयितुं गतः । बोधितो लान्तवेन्द्रेण श्रावकत्वमुपागतः ॥२२४॥
अनन्तमतियोगीन्द्रं प्राप्य दीक्षां विधाय च । ब्रह्मलोके सुरो जातश्चन्द्राभाख्ये विमानके ॥२२५॥
निर्गत्य सप्तमाच्छ्वभ्रात् सर्पो भूत्वाऽतिदारुणः । भूयोऽपि प्रथमं श्वभ्रं प्राप्तोऽप पापयोगतः ॥२२६॥
ततो निःसृत्य पापिष्ठो भ्रान्त्वा तिर्यग्गतावपि । नानादुःखानि भुञ्जानस्तिष्ठति श्रीभवाङ्कितः ॥२२७॥
अत्रैव भरतक्षेत्रे जम्बूद्वीपसमन्विते । भूतरमणाटवीमध्ये विद्यतैरावती नदी ॥ २२८ ॥
तत्तटे तापसो नाम्ना खण्डकेशी वसत्यसौ । तद्भार्या सर्पकेशी च मृगशृङ्गः सुतोऽनयोः ॥२२९॥
ततः पञ्चाग्निमध्यस्थः कन्दमूलादिभक्षणम् । कुर्वाणो मृगशृङ्गोऽसौ तिष्ठति प्रीतमानसः ॥२३०॥
चन्द्राभखेटमालोक्य देवादिपुरनायकः । कृत्वा निदानकं तत्र तूर्णं कालं चकार सः ॥ २३१ ॥
इहैव भरतक्षेत्रे जम्बूद्वीपोपलक्षिते । विजयार्धोत्तरश्रेण्यां पुरं गगनवल्लभम् ॥ २३२ ॥
विद्युद्रथोऽभवत् तत्र पुरे विद्याधराधिपः । भार्या विद्युत्प्रभा चास्य विद्युद्दंष्ट्रः सुतोऽनयोः ॥२३३॥
मन्दरात्मन गत्वा प्रियया सह सादरः । ततो निवर्तमानः सन् मुनिं दृष्ट्वा चुकोप सः ॥ २३४ ॥
स्वभार्यां स्वपुरं प्राप्य प्रदोषसमये सति । बाहुभ्यां तं समुत्क्षिप्य कायोत्सर्गस्थितं मुनिम् ॥२३५॥
इहैव भारते मार्गे विजयार्धस्य दक्षिणे । मुक्त्वा पञ्चनदीसङ्गे गर्ते स स्वपुरं ययौ ॥ २३६ ॥
लोकमध्ये सुखं सुप्त्वा प्रबोधं प्राप्य पुनः सकः । विद्याधरान् समाहूय जगाविति पुरःस्थितान् ॥२३७॥

---

1 पक धर्मिते 2 ज विद्याऽन्वयसमताः 3 पफ सुप्तम्, ज सुप्तम् 4 [प्रथमापृथ्वीम्] 5 ['मध्येऽपि'] 6 पफ सुप्तम्, ज सुप्तमित्य.

एवमाख्य रजनीमध्ये देवता मां जगादिदम् । गत्वा चम्पनदीसंगे पद्मचापस्थयोगवित् ॥ २३८ ॥
मासे नभस्तरूपेण सप्तनोद्वेगकारकः । भविष्यति खेटयोपानसीति दिवसत्रये ॥ २३९ ॥[1]
ततः सर्वेऽपि संप्राप्य ते विद्यार्थं ससंभ्रमाः । अमितवर्णखण्डकामिर्भित्त्वा जैतिमिरादरात् ॥२४०॥
इतेऽस्मिन् विद्याचामे भूतनमस्तमीपगे । विद्याधरसमूहस्य शान्तिरत्र भविष्यति ॥ २४१ ॥
श्रुत्वा तद्वचनं प्राप्य सर्वविद्याधरैर्मुनेः । कायो भिन्नोऽमितवर्णाभिखण्डकामिरादरात् ॥ २४२ ॥
एवं कृते मुनेरस्य सर्वविद्याधरैर्द्रुतम् । केवलज्ञानमुत्पन्नं लोकालोकावलोकनम् ॥ २४३ ॥
श्रीभूतिपूर्वको विप्रो विद्युद्दंष्ट्रोऽन्यजन्मनि । उपसर्गं चकारासौ मुनेरस्यामुना खलः ॥ २४४ ॥
सोऽसौ भ्रमायुषो देवश्च्युतः सर्वार्थसिद्धितः । तस्मादत्तरणं वच्मि भवद्भिः श्रूयतामिति ॥ २४५ ॥
नगर्यां वीतशोकायां संजयन्तोऽभवत् पुनः । सिंहसेनो नृपः पूर्वं श्रमित्वा मधुना सह ॥२४६॥
संजयन्तस्य यो भ्राता जयन्तोऽभवद्युतः पुनः । जयन्तस्त्वं स संजातो धरणेन्द्रोऽधुना सुरः ॥२४७॥
त्वमनन्तजन्मनि स्नेहात् सर्पदष्टोऽसि निश्चितम् । जातोऽहं आदित्यदेवस्तु ध्यानसंपन्नयोगकः ॥२४८॥
भवत्पूर्वभवे माता संजाता श्रीमतिधारिणी । रामदत्तेति विख्याता सकले वसुधातले ॥ २४९ ॥
कारणेनामुना वत्स धरणेन्द्र ससंभ्रम । वैरं हित्वा भव क्षिप्रं त्वमकर्मवैरीरितः ॥ २५० ॥
आदित्यदेववचः श्रुत्वा धरणेन्द्रो महामतिमान् । खेचरानुग्रहार्थाय भक्तियुक्तमनूजः ॥ २५१ ॥
नाममात्रं सकलं खेचरमस्यकन्यकापायम । भनयाऽनयाऽनेन स्थापिता धरणेन वै ॥ २५२ ॥
श्रीमन्तं पर्वतं प्राप्य संजयन्तस्य योगिनः । पद्मचापप्रतोऽस्येषां कारयध्वं प्रयातनाम् ॥ २५३ ॥
संजयन्तप्रसादाद्वे सर्वा विद्या मनोरमाः । भास्वन्ति भवतां सिद्धिं साध्यमाना न चान्यथा ॥२५४॥
एवमुक्त्वा खगान् सर्वान् धरणेन्द्रस्त्वरान्वितः । तत्रादित्याभदेवस्य जगाम निजमाश्रयम् ॥२५५॥
मथुरायामभूद् राजाऽनन्तवीर्यो महाबलः । मेरुमाला महादेवी प्रथमाऽस्य प्रकीर्तिता ॥ २५६ ॥
आदित्येन्द्रसुतश्च्युत्वा पुत्रो जातोऽनयोः परः । सर्वलक्षणसंपूर्णो बन्धुलोकमनोहरः ॥ २५७ ॥
अमितप्रभसंज्ञाया द्वितीयाया तयोः सुतः । धरणेन्द्रोऽभवत् कान्तो मेरुनामा नयो सुखः ॥२५८॥
तस्थौ प्रावर्तौ तत्र भुक्त्वा भोगान् मनोरमान् । ततो भगवत्तुर्येन श्रेयस्तीर्थंकरान्तिके ॥ २५९ ॥
तत्र मेरुकुमारोऽयं केवली मन्दरः पुनः । श्रेयसो देवदेवस्य संजातो गणनायकः ॥ २६० ॥

॥ इति श्रीश्रीभूतिपुरोहितकथानकमिदम् ॥ ७८ ॥

*

७९ इन्द्रादिमुनिदत्ताधिकृतिकथानकम् ।

ऋषभस्य[2] जिनेन्द्रस्य सरणे समवादिके । सौधर्मेन्द्रो जगादेदं कौतुकव्याप्तमानसः ॥ १ ॥
भरतं श्रावकाश्चात्र एकान्ति स्वतः कश्चित् । दन्तशोधनमात्रं वा मुक्तिमार्गमुमुक्षवः ॥ २ ॥
अन्यैरपि न चादत्तं गृह्णन्ति यतीश्वराः । एकान्तो वा परे दत्तं मन्यन्ते न मनागपि ॥ ३ ॥
त्रिशुद्धं एकत्वं तेषामदत्तं हि तपस्विनाम् । न जायतीति साधूनां तृतीयं तु महाव्रतम् ॥ ४ ॥
सौधर्मेन्द्रवचः श्रुत्वा भरतश्चक्रवर्तिनः । जगादेदं त्रिशुद्धात्मा तदा संसत्सुरस्मरम् ॥ ५ ॥
साधूनां एकत्वं तेषामदत्तसंयमकारणम् । न यतो जायते नूनं तृतीयस्य व्रतस्य तः ॥ ६ ॥
भरतस्य वचः श्रुत्वा भक्तिनिर्भरचेतसः । इदमेवोदितं सर्वं जायतेऽपि स्फुटम् ॥ ७ ॥

---

1 पक्ष वेवीपात. 2 पक ऋषभस्, ज ऋषभसीस्य. 3 पक रिपमस. 4 पक यद्भुत्वना. 5 पकज पठ्ठरी इत्यम्. 6 पक तुषम्, ज तुषम्.

शेषतीर्थकराणां च स्वस्वतीर्थप्रवर्तिनाम् । चक्रवर्त्यादिसामन्तैर्दत्तं विकृतिकारणम् ॥ ८ ॥
विपुलाद्रिगिरेः शृङ्गे सरणे समवादिके । स्थितस्य वीरनाथस्य सौधर्मेन्द्रो जगाविमम् ॥ ९ ॥
विकृत्यादिकमेतेषामस्मत्संयमकारणम् । वितीर्णं हि मया भक्त्या मुनीनां शुद्धचेतसाम् ॥ १० ॥
तथा श्रेणिकराजोऽपि तद्वचोऽपि निशम्य च । बभाषेमं विनीतात्मा पुरन्दरपुरस्सरम् ॥ ११ ॥
मया धरणिनाथेन विकृत्यादिकमादरात् । वितीर्णं यदि संघेभ्यः संयमसाधनं ध्रुवम् ॥ १२ ॥
तथाऽन्यैरपि सामन्तैर्भक्तिप्रहृष्टतनूरुहैः । विकृत्यादिकमेतेषां वितीर्णं यमसाधनम् ॥ १३ ॥
इन्द्रादिभिर्यतिभ्यो हि विविनाऽन्यप्रदादिना । वितीर्णं शुद्धचेतस्कैर्विकृत्यादिकमादरात् ॥ १४ ॥
इत्थंप्रकारं विधायो[1]ऽस्मुनिभिर्विधिपूर्वकम् । विकृत्यादिकमाचर्यं कालेऽमुष्मिन्नपि स्फुटम् ॥ १५ ॥

॥ इति श्रीइन्द्रादिमुनिदत्ताविकृतिकथानकम् ॥ ७९ ॥

*

८० शिववर्मविप्रकथानकम् ।

[2]कुरुजाङ्गलदेशेऽस्ति धनधान्यधनाढ्ये । आखण्डलपुरश्रीकमहिच्छत्रपुरं परम् ॥ १ ॥
आसीद् तत्पुरे विप्रः श्रोत्रियो वेदपारगः । शिवभूतिः प्रिया चास्य वसुशर्मा मनःप्रिया ॥ २ ॥
सोमशर्माऽभवत् तस्याः शिवशर्मा च नन्दनः । सोमकान्तिसमो ज्येष्ठः कनीयान् सुखलम्पटः ॥३॥
शिवशर्मा पठन् वेदमशुद्धं सोमशर्मणा । हतो वारत्रयं रोषात् कनिष्ठो पायसा[3] तरम् ॥ ४ ॥
अनेन कारणेनास्य नाम वारत्रिकमित्यम् । लोके प्रसिद्धमायातं द्वितीयं शिवशर्मणः ॥ ५ ॥
सर्वशास्त्रार्थनिष्णातः श्रोत्रियोऽसौ वारत्रिकः । षट्कर्मभिरतस्त्वसौ तत्पुरे प्रीतमानसः ॥ ६ ॥
एवं तिष्ठन् पुरे तत्र वारत्रास्य स्वनामकम् । शृण्वन् जनसमूहेभ्यो वैराग्यं गतवानसौ ॥ ७ ॥
भद्रुतो नामतः प्राप्य वैराग्यं स गृहान्तरम् । निर्गत्य प्राप तां सारां श्रावस्तिं[4] नगरीमसौ ॥ ८ ॥
जिनधर्मं समाकर्ण्य तदा दमवरान्तिके । शिवशर्मा सवैराग्यो वशी जैनेश्वरं तपः ॥ ९ ॥
अन्यदा कूपपानीयमध्ये निजतनुं मुनिः । पश्यन् विलोकितो जातु नितरां निजसूरिणा ॥ १० ॥
दृष्ट्वा तं योगिनं तत्र जगादेव गुरुस्तदा । महिलार्थं निजं बिम्बं पश्यसि त्वं जलान्तरे ॥ ११ ॥
श्रुत्वा गुरूदितं वाक्यं नवधर्मा विलक्षकः । महाटवीं विवेशाय श्रीपाल्यपद्मसर्ज्जितम् ॥ १२ ॥
भुक्त्वा मासोपवासं च पारणार्थं वनान्तरे । भ्राम्यति स्म गुणाधारः प्रलम्बितभुजद्वयः ॥ १३ ॥
वृक्षोपरि स्थिताऽऽख्यत् देवता भक्तितत्परा । अथ भिक्षास्तस्मै भिक्षां ददति चापरम् ॥ १४ ॥
ग्रहीतुं सोऽपि तां भिक्षां तदा नेच्छति स्फुटम् । पान्थसार्थं जगामासौ मन्दं मन्दगतिक्रियः ॥ १५ ॥
तद्दत्तां च महाभिक्षां समादाय मुनीश्वरः । जगामाशु ततो देशात् तपोमार्गविचक्षणः ॥ १६ ॥
अपि साधुं प्रवेश्य[5] तं सार्थवाहो महाधनः । सागरोपपदो दत्तः प्राप सार्थसमन्वितः ॥ १७ ॥
पुनस्तेनैव सार्थेन अहेरके गजदेवकः । लक्षितोऽस्य[6] प्रिया नाम्ना मन्मदना समागता ॥ १८ ॥
मदनोपपदा वेश्या तत्सुता चारुलोचना । सर्वलक्षणसंपूर्णा सर्वशास्त्रकलान्विता ॥ १९ ॥
एवंविधा च सा कन्या नानाभरणभूषिता । तदा मध्याह्नवेलायां नानाजनपदान्विता ॥ २० ॥
नानातूर्यकलध्वानबधिरीकृतदिङ्मुखम् । वरत्रायां समारुह्य नृत्यति स्म मदालसम् ॥ २१ ॥
भिक्षार्थं[7]व्यसनिष्ठेन वारत्रास्येन साधुना । कुर्वती नर्तनं दृष्टा दुर्गादेवीपुरस्तदा ॥ २२ ॥

---

1 क यत्नो मुनिभिस्त्वम् 2 क कुरुजंगल' 3 [ज्यायसा]. 4 [श्रावस्ती]. 5 पत्र पाण्डु ['पाथं']. 6 क लक्षमेरो 7 क भिक्षचो.

दृष्ट्वेमां लंखिकां तत्र कामविह्वलमानसः । तपो विहाय जैनेन्द्रं लंखिकाम्याश्रमास सः ॥ २३ ॥
तथाऽन्योन्यमुखाम्भोजे प्रीतिविस्फारितेक्षणौ । परस्परसुखासंगसक्तचित्तौ बभूवतुः ॥ २४ ॥
चरमारोपितस्कन्धमहिच्छत्रपुरं गतम् । दृष्ट्वाऽमुं मागधाः सर्वे नागराश्च वदन्त्यलम् ॥ २५ ॥
यदर्थं कर्म नो योग्यमिदमागच्छ सत्वरम् । आचार्यान्ते परिप्राप्य प्रायश्चित्तं कुरु स्फुटम् ॥२६॥
पूर्वभावनया विप्र स्वगृहे निजलीलया । निजं कर्म प्रकुर्वाणैर्लभ्यते न हि जन्तुभिः ॥ २७ ॥
श्रुत्वा तद्वचनं सोऽपि जगादेतान् पुरः स्थितान् । शोभनाचरया विप्राः स्थितोऽहं किंतु सत्सदः ॥२८॥
ऋग्वेदचतुष्कं च मीमांसान्यायविस्तरम् । धर्मशास्त्रपुराणं च विद्यास्थानान्यमूनि च ॥ २९ ॥
विद्यास्थानेषु सर्वेषु शास्त्रेष्वन्येषु च श्रुतम् । यदि कोऽपि कृताभ्यासः समायातु ममान्तिकम् ॥३०॥
युष्माकं येन सर्वेऽहं निराकृत्य प्रभाम्यहम् । दूरं न भाति यावच्च लंखिका मन्मनोहरी ॥ ३१ ॥
अपकर्ण्य वचस्तेषां निजविद्याबलेन सः । जगाम लंखिकाम्याशं तद्रूपाकृष्टमानसः ॥ ३२ ॥
ततो द्वादशवर्षाणि निरूप्य तदनिक्रमम् । लंखिकाया प्रविज्ञान विद्यांशके स शोभनम् ॥ ३३ ॥
अन्यदा लंखिकायुक्तो विहरन् गतियोगतः । साधुलोकसमाकीर्णं सक्तो राजगृहं ययौ ॥ ३४ ॥
कन्यासमन्वितस्तस्य श्रेणिकस्य पुरस्तदा । खड्गचापोपरि स्पष्टं चक्रे नृत्यं स शोभनम् ॥ ३५ ॥
विद्याधरं युगं दृष्ट्वा गगने शोभनाकृतिः । जातिस्मरो बभूवायं नर्तकः प्रीतमानसः ॥ ३६ ॥
दृष्ट्वेदं शोभनाकारं वार्त्तिका वरवर्त्मनि । दध्यौ विस्मितचेतस्कः श्रेणिकस्य सभान्तरे ॥ ३७ ॥
अत्रैव भरतक्षेत्रे विजयार्धस्य भूभृतः । दक्षिणस्यां दिशो भागे प्रियंकरपुरे वरे ॥ ३८ ॥
प्रियंकरो नृपोऽत्रैव नगरे परमोदयः । महामती महादेवी भूपतेरस्य शोभना ॥ ३९ ॥
सोऽहं तन्नन्दनः पूर्वभवे प्रीतिकरोऽभवम् । नानाविद्यासमासंगविख्यातजनभावनः ॥ ४० ॥
अन्यदा गगने गच्छन् वापी भाव्यम्बुगामिनाम् । ददर्श कच्छसत्कं वालुकाकर्णसंवृताम् ॥ ४१ ॥
तत्समीपे मया दृष्टा लंखिकेयं पुराभवे । विद्याधरी महाविद्यां साधयन्ती मनोरमाम् ॥ ४२ ॥
वापीजलान्तरस्थाया मुखमालोक्य संस्थितम् । एतस्या भ्रमरो भूत्वा पद्मे लीनोऽहमुत्सुकः ॥ ४३ ॥
तत्समीपं परिप्राप्य तन्मुखाम्भोजमाप्य सः । स्वरूपं दर्शयामास कृतलोककुतूहलम् ॥ ४४ ॥
लब्धप्रपटविन्यस्तकरकुड्मलशोभिता । जगौ विद्याधरं सा च प्रणम्येति कुतूहलात् ॥ ४५ ॥
मा तावच्छीघ्रगामिन्या विद्यया विघ्नकारकः । भव त्वं साध्यमानाया विद्याधरमहेश्वर ॥ ४६ ॥
नूनं साधितविद्यस्य लोकत्रयविलासिनः । तव भार्या भविष्यामि प्रतिज्ञेयं महेश्वर ॥ ४७ ॥
श्रुत्वा तद्वचनं खेचरस्तन्मतं प्रतिपद्य च । सोऽपपूरितचेतस्को ययौ निजपुरं पुनः ॥ ४८ ॥
स्वं साधितविद्येन तेन खेटेन सत्वरम् । परिणीता सका खेटी जयमङ्गलनिस्वनैः ॥ ४९ ॥
अनया सह भुञ्जानो भोगान् भोगीन्द्रसन्निभान् । तिष्ठति प्रीतचेतस्कः खेचरो निजपत्तने ॥५०॥
अन्यदा सौधमूर्धस्थो विमानाभं समुन्नतम् । विलीनं घनमालोक्य वैराग्यं गतवानसौ ॥ ५१ ॥
श्रुत्वा जैनेश्वरं धर्मं महावैराग्यसंगतः । गुरोः संयमसेनस्य समीपे सोऽग्रहीत् तपः ॥ ५२ ॥
तपो जैनं विधायाशु काले चापि समाधिना । सौधर्मे धर्मसंबन्धाद् बभूवासौ सुरोत्तमः ॥ ५३ ॥
विद्याधरी तपः कृत्वा जैनं मृत्वा समाधिना । सौधर्मं प्राप सञ्जाता कनकोज्ज्वलविभ्रमा ॥ ५४ ॥
अहिच्छत्रपुरे विप्रः शिवभूतिर्बभूव च । मेदिनी वसुमित्राऽस्य भर्तृप्रीतिविवर्धना ॥ ५५ ॥

---

1 पचाज्ञ शिकि कुसम्म. 2 [चार्वा°]. 3 चप समाचम्. 4 [आग्रह]. 5 पचाज्ञ प्रभुर्धि कुसम्म. 6 चप वार्त्तिक 7 [वल्मिनम्]. 8 पचाज्ञ कुसम्म.

अन्योन्यप्रेमसंयुक्तवाञ्छितमनसोस्तराम्। सौधर्मदेवेऽस्य संजातः[1] शिवशर्माङ्गनयोः सुतः ॥ ५६ ॥
भवमस्य परिप्राप्य देवानामपि दुर्लभम्। हित्वा तपोऽपि जैनेन्द्रं सम्प्राप्तोऽहं गृहस्थताम् ॥ ५७ ॥
अन्यजन्मनि या जाया खेचरी मम वल्लभा। सौधर्मादेत्य संजाता ठिल्लिका[2] सेह सांप्रतम् ॥५८॥
अनया सह भुञ्जानः काममोगान् मनोरमान्। पर्यटन् विविधान् देशान् सम्प्राप्तोऽहं पुरोत्तमम् ॥५९॥
विद्याधरामरैर्भोगैर्यो न तृप्तिमुपागतः। स कथं ठिल्लिकाभोगैस्तृप्तिं यास्यामि सांप्रतम् ॥ ६० ॥
एवं विचिन्त्य शुद्धात्मा नृत्यारम्भं विहाय च। वेणोर्मस्तकतः क्षिप्रं समुत्तीर्णो भुवस्तलम् ॥ ६१ ॥
साऽपि विद्येश्वरी भूत्वा स्ववंशशिरसो द्रुतम्। उत्तीर्णा तोषसंपूर्णा मन्दमन्दगतिक्रिया[3] ॥ ६२ ॥
एवं कृते सति स्पष्टं पूर्वजन्मनि संचिताः। विद्याः समागताः सर्वाः किंकर्तव्यसमाकुलाः ॥ ६३ ॥
अथ श्रेणिकराजोऽपि दृष्ट्वा विद्याधरान्तिके। पप्रच्छेमं यथावृत्तं कौतुकव्याप्तमानसः ॥ ६४ ॥
श्रेणिकस्य वचः श्रुत्वा वारत्रेण कुतूहलात्। विद्याधरादिकं सर्वं यथाक्रममुदाहृतम् ॥ ६५ ॥
श्रुत्वाऽतिशयमीदृक्षं तदानीं बहवो नराः। भोगाद् विरममासाद्य बभूवुः श्रमणोत्तमाः ॥ ६६ ॥
केचिच्छ्रावकतां प्राप्ताः केचिन्मध्यस्थतां पराम्। केचिज्जिनस्य धर्मस्य प्रशंसां चक्रिरे तराम् ॥६७॥
वारत्रोऽपि विद्याप्राप्य प्रायश्चित्तं विशुद्धधीः। गुरोः समवसरणान्ते दधौ दैगम्बरं व्रतम् ॥ ६८ ॥
श्रेणिकोऽपि महाराजस्तत्पश्चात् दिने दिने। चक्रे महोत्सवं भक्त्या जनविस्मयकारणम् ॥ ६९ ॥
वराटविषये रम्ये दिग्भागे च पश्चिमे। वैराकरस्य सारस्य जनानन्दविधायिनः ॥ ७० ॥
विन्ध्यानदीसमीपस्य प्राकारपरिराजितम्। विहरन् स मुनिः क्वापि प्राप विन्ध्यातटं पुरम् ॥ ७१ ॥
नानातपः प्रकुर्वाणो राद्धान्तकृतभावनः। तत्र कर्मक्षयं कृत्वा निर्वाणं गतवानसौ ॥ ७२ ॥[4]
जिनधर्मं ससम्यक्त्वं गृहीत्वा ठिल्लिकाऽपि च। बभूव श्राविकात्यन्तं तज्जनोऽपि तथाविधः ॥७३॥

॥ इति श्रीशिवशर्मविप्रवारत्राभिधानकथानकमिदम् ॥ ८० ॥

*

८१ द्वीपायनकथानकम्।

कुणालास्यजनान्ते च श्रावस्ती नगरी परा। अस्यां द्वीपायनो[6] राजा तत्प्रिया च मनोरमा ॥ १ ॥
वसन्तसमये जाते वनं नन्दनसंनिभम्। रन्तुं गोचरवीथीको ययावन्तःपुरान्वितः ॥ २ ॥
चूतवृक्षं विलोक्यात्र मञ्जरीभिः समन्वितम्। तन्मञ्जरीं समादाय चकार श्रवणे नृपः ॥ ३ ॥
दृष्ट्वा तन्मञ्जरीमेकां भूभुजः शिरसि स्थिताम्। स्कन्धावारेण सर्वेण लुण्टितोऽस्य क्षयं ययौ ॥ ४ ॥
दृष्ट्वा क्षयं गतं चूतं नभाचार्येण केनचित्। तन्मूलमेकमादाय स्वशिखायां निवेशितम् ॥ ५ ॥
प्रार्थ्यकृत्य शिखायां सद्गुरो धावति भूपते। उत्तरन् सुगुप्तानस्य कृतकोठरकत्वनि ॥ ६ ॥
नभाचार्यशिखायां च पत्रं तं वीक्ष्य सांप्रतम्। ततो विस्मयमापन्नः पप्रच्छैवं स भूपतिः ॥ ७ ॥
चूतवृक्षो मया दृष्टो मञ्जरीपरिशोभितः। नभाचार्यः कुतो नाम दृश्यते सोऽधुना वद ॥ ८ ॥
श्रुत्वा तद्वचनं वृद्धो जगादेति कुतूहली। एतस्यास्य निमित्तं श्रीनृप शृणु वदाम्यहम् ॥ ९ ॥
गच्छताऽत्र त्वया नाथ चूतस्य नवमञ्जरी। गृहीत्वा मस्तके न्यस्ता कौतुकव्याप्तचेतसा ॥ १० ॥
त्वत्सैन्येन समस्तेन चूतस्यैवं विलोक्य च। पत्रमूलादिकं सर्वं कृतं कर्म पवित्रतः ॥ ११ ॥
पश्चात् समागतेनेदं चूतमूलं मया नृप। यत्नेन महता रम्यं शिखायां विनिवेशितम् ॥ १२ ॥

---

1 पफ संजातः 2 [भविष्य]. 3 ज मन्दं मन्द° 4 पफ ठिल्लिका ज ठिल्लिकामिह
5 पफ read श्रीशिवशर्मविप्र° 6 पफ द्वीपायिनो

अधुना भूतपूर्वोऽयं फलपुष्पादिसंपदा । नूनं विनाशमायातो कथितोऽस्य मया नृप ॥ १३ ॥[1]
पूर्वं विनश्यमालोक्य मूर्छितो नरकुञ्जरः । महावैराग्यमापन्नो दध्यौ मनसि धीरधीः ॥ १४ ॥
धनं यौवनमायुश्च रूपं सौभाग्यमेव च । अनित्यं सर्वमेवेदं शक्रचापमिव स्थितौ ॥ १५ ॥
एवं विचिन्त्य शुद्धात्मा महावैराग्यसंगतः । समाहूय सुतं ज्येष्ठसुदीर्घफलवाहनम् ॥ १६ ॥
प्रदाय सकलं राज्यं सुतायासौ नरेश्वरः । प्रणम्योत्तरसूर्याख्यं गुरुं दीक्षामशिश्रियत् ॥ १७ ॥[2]
द्वीपायनमुनिस्तूर्णं पठित्वाऽऽगममञ्जसा । गुरुणा सर्वसंघेन संप्राप्तोऽवयनीं पुरीम् ॥ १८ ॥
द्वीपायनमुनिस्तत्र मुनिसागरपर्वतम् । प्राप्य वैराग्यसंपन्नो वसति प्रीतमानसः ॥ १९ ॥
नरवृन्दारकः श्रुत्वा मुनिवार्तां घनोद्यतः । वन्दनार्थमायातस्तदुद्यानवनं परम् ॥ २० ॥
तत्र दृष्ट्वा मुनीन् सर्वान् वन्दित्वा भक्तितो नृपः । द्वीपायनमुनिं नैकं पश्यति प्रीतिकारणम् ॥ २१ ॥
ततो नरेश्वरः प्राप्य मुनिसागरपर्वतम् । दृष्ट्वामुं तत्र भावेन ववन्दे तत्क्रमद्वयम् ॥ २२ ॥
अन्यदा कोकिलासन्नं पूर्णिमायां निशम्य सः । बभाण संयमाभ्यस्तो योगी योगिकदम्बकम् ॥ २३ ॥
संयमस्थेऽत्र यो योगी भिक्षार्थं कोऽपि यास्यति । पुरीमुज्जयनीं तस्य व्रतभङ्गो भविष्यति ॥ २४ ॥
निशम्य तद्वचोऽमोघं तदा केऽपि दिगम्बराः । उपवासं विधायात्र तस्थुर्विस्मितचेतसः ॥ २५ ॥
उपवासपरिश्रान्ताः पारणार्थं कृतोद्यमाः । ग्राममन्यं परे जग्मुर्बालवृद्धतपोधनाः ॥ २६ ॥
द्वीपायनमुनिस्तत्र तद्वचोऽसत्यतां विदन् । पारणार्थं परिप्राप श्रीमदुज्जयिनीं पुरीम् ॥ २७ ॥
विधत्तेऽस्यां नराधीशो जितशत्रुर्विराजितः । भार्या कनकमालाऽस्य कनकोज्ज्वलविग्रहा ॥ २८ ॥
काञ्चीपत्तनके रम्ये वाराणस्यां नराधिपः । श्रीमान् श्रीधर्मनामासीच्छ्रीमती तत्प्रिया प्रिया ॥ २९ ॥
रूपयौवनसंयुक्ता श्रीकान्ता तनयाऽनयोः । समकलितचन्द्रास्या तत्सखी कामसुन्दरी ॥ ३० ॥
देवकन्येव सा तन्वी रूपयौवनगर्विता । जितशत्रोर्नरेन्द्रस्य जाता साऽत्यन्तवल्लभा ॥ ३१ ॥
स्वरूपजितपौलोमी पीनोन्नतकुचद्वया । श्रीकान्ता दुर्भगा जाता जितशत्रोर्विधेर्वशात् ॥ ३२ ॥
एवं गतवति स्पष्टं श्रीकान्तायास्तनेहसि । ततः प्राप्य तं वक्ति जनकं जनितादरम् ॥ ३३ ॥
पट्टकान्ता महादेवी सञ्जाता कामसुन्दरी । जितशत्रोरहं देव्या तिष्ठामि च तदन्तिके ॥ ३४ ॥
निशम्य स्वसुतावाक्यं चलितः प्रीतचेतसा । श्रीकान्ता कामसुन्दर्या तेनानीता स्वपत्तनम् ॥ ३५ ॥
क्रियमाणेऽन्यदा जातु तत्पुरे नखकर्मणि । श्रीकान्तायाः सुकान्तायाः नापितेन विलासिना ॥ ३६ ॥
नापितः कामसुन्दर्या यावत्कर्षति तन्नखान् । छिन्नं हि वामपादस्याङ्गुष्ठं तावत्समच्छिनत् ॥ ३७ ॥
विषप्रयोगयोगेन नृपमेव मरोष सत् । तदा भ्रष्टसतां नीतं बहुधाऽलिम्पदाशुचिम् ॥ ३८ ॥
अन्यदोज्जयनीं प्राप्य श्रीकान्ता भर्तुरन्तिकम् । संप्राप्य कामसुन्दर्या कान्तवल्लभया तया ॥ ३९ ॥
जितशत्रुर्विलोक्येमां वल्लभां कामसुन्दरीम् । कुष्ठशीर्णकराङ्गुष्ठां तद्विरक्तोऽभवद् भृशम् ॥ ४० ॥
सुवर्णमयमङ्गुष्ठं वामपादे विधाय च । पण्यस्त्रीव्यवहारेण तस्थौ हि कामसुन्दरी ॥ ४१ ॥
अन्यदा मघतो भूपसुदीर्घफलवाहनात् । प्रदाय घोषणां शीघ्रं शान्तिकार्यं प्रयत्नतः ॥ ४२ ॥
श्रीमदुज्जयनीलोकं बालवृद्धपुरस्सरम् । आहूतवान् तदा स्पष्टं जितशत्रुः ससंभ्रमः ॥ ४३ ॥
द्वीपायनमुनिस्तत्र पदसंख्या भ्रमन् क्रमात् । समाययौ तत्पुरेऽत्र बहुलोकसमावृतम् ॥ ४४ ॥
दृष्ट्वा मुनिं समायातं तत्रत्या बहवो नराः । इदमूचुस्तदा भूपा कृतकोलाहलस्वनाः ॥ ४५ ॥

1 पफ. मधुपुष्पाद्यम् ज. मधुपुष्पसमितम् 2 पफ. शिवम्भम् ज. शिवमशीषय. 3 [संप्राप्तोज्जयिनीं]. 4 ज. °मुनिनैके. 5 पफ. श्रीमदुज्जयनी 6 पफ. कुष्ठम् ज. कुष्ठम्.

आदेशेन नरेन्द्रस्य जना खनन्ति खातिकाम् । अतो मुने[1] सहायत्वमस्माकं भव सांप्रतम् ॥४६॥[2]
श्रुत्वा तद्वचनं योगी जगादैतान् पुरःस्थितान् । पुरे भिक्षां विधायाशु खनिष्ये खातिकामतः ॥ ४७ ॥
तन्मुक्ते नगरस्यान्तः प्रविष्टः स दिगम्बरः । घ्योऽस्य कामसुन्दर्याः स्वगृहाजिरमागतः ॥ ४८ ॥
कामसुन्दरिकां दृष्ट्वा कामाकुलितमानसः । ततो निषूद्यमानः सन् नागरैर्गदितो मुनिः ॥ ४९ ॥
वाक्यं तद्वचः साधुर्धर्मगेयान् रूप गतः । खातिकायां च कुद्दालं समर्पयत मेऽधुना ॥ ५० ॥
तदाक्यतोऽर्पितो विप्रैः कुद्दालमभिमन्त्रयन् । यावच्चल खनत्येष चचाल धरणीभरम् ॥ ५१ ॥
ज्ञात्वा तत्र गुर्वं तेन मुक्त्वाऽसु सहसा मुनिः । जगाम क्षुत्परिश्रान्तो मुनिसागरपर्वतम् ॥ ५२ ॥
गत्वा स पर्वते साधुर्नानातरुसमाकुलम् । रूपं हि कामसुन्दर्या चिन्तयन् व्यवतिष्ठते ॥ ५३ ॥
तस्यातिकामप्रहारेऽत्र दत्ते सति तपस्विना । प्रभूतं तद्वल भग्नं वापाभ्यन्तरतः पुरः ॥ ५४ ॥
ततो नृपगृहं प्रासं वावेनाभ्यन्तरेण च । खातिकामल्पवृन्देण महाव्रतविधायिना ॥ ५५ ॥
तदर्थं सकलं ज्ञात्वा तदा जनसमूहतः । समाकुलो बभूवायं जितशत्रुर्नरेश्वरः ॥ ५६ ॥
सामन्तसचिवानां हि तत्स्वर्गपुरोधसाम् । समस्तप्रकृतीनां च योषितोऽगुरुतदन्तिकम् ॥ ५७ ॥
असमर्था वशीकर्तुं द्वीपायनमुनिं पुनः । बभूवुस्तय श्रीघ्र नियगेहं विचेतसः ॥ ५८ ॥
ततो मतप्रमा रामा मुनिना विहितास्तथा । स्वयमेव जगामाशु तदन्तं कामसुन्दरी ॥ ५९ ॥
हत्वाऽसु पादघातेन वशीकृत्य स्वरूपतः । द्वीपायनमुनिं निन्ये स्वगेहं कामसुन्दरी ॥ ६० ॥
मानं[3] महाव्रतं हित्वा तदा द्वीपायनो मुनिः । कामभोगाशया सार्धं भुञ्जानो व्यवतिष्ठते ॥ ६१ ॥
यशोऽम्बोऽजनीयोऽन्यैर्गम्भीरो गुणसागरः । रामासमिन सविन्यो बभूवासौ धरातले ॥ ६२ ॥
सुवर्णाभसमुत्तुङ्गो धरणीसमविभ्रमः । तृणसारो बभूवाय योषासंगेन तत्क्षणात् ॥ ६३ ॥
साधुमन्दरगोऽपुङ्गो मन्दमन्दपविक्रियः । स्त्रीक्लेशसमासक्तो वारिपन्थं गतः क्रमम् ॥ ६४ ॥
ज्ञानदर्शनचारित्रतपोभरसमन्वितः । सद्ध्याननष्टचेतस्को जातोऽसौ स्त्रीप्रसङ्गतः ॥ ६५ ॥
एवं द्वादशवर्षाणि भुञ्जानस्यास्य तत्पराम् । तदानीं कामसुन्दर्या गतो मोहो हि तत्पुरे ॥ ६६ ॥
अन्यदागत्य वेगेन श्रीमदुज्जयनीं पुरीम् । वेष्टयित्वा स्वसैन्येन रुद्धा तेन समन्ततः ॥ ६७ ॥
कल्लोलोऽकम्पाननादित्यक्षेपपुष्करः । तस्थौ जनाहितो वीरसुदीर्णबलवाहनः ॥ ६८ ॥[5]
तत्तस्य सुतत्मास्य लेख द्वीपायनस्तदा[7] । कुकुम्भस्थित कृत्वा प्रेषयामास सत्वरम् ॥ ६९ ॥
अहं द्वीपायनः[8] पुत्र त्वत्पिता प्रततम्भनम् । विधायावस्थितोऽत्रैव नगरे स्वकृपाकुले ॥ ७० ॥
लेख्यार्थं सुकृतुण्डसमवधार्य सुभूपतिः । महावैराग्यसंपन्नो बभूव क्षणमात्रतः ॥ ७१ ॥
श्रीमदुज्जयनीकोष्ठं विहाय जनकोक्षितः । श्रावस्तिं प्रययौ तूर्णमुदीर्णबलवाहनः[9] ॥ ७२ ॥
स्वसुताय निजं राज्यं दत्त्वा वैराग्यसंगतः । यशोधरगुरोः पार्श्वे स दीक्षामग्रहीत् तदा ॥ ७३ ॥
जितशत्रुः परित्याज्य गत परकं पुरात् । द्वीपायनमवेमास पूर्णा पोके धनादिकम् ॥ ७४ ॥
द्वीपायनाय[10] सोपेय सर्वाङ्गिणि सत्वरम् । जितशत्रुर्जनाभ्यर्थ्य महामभिपद ददौ ॥ ७५ ॥
यस्तुनः प्राभृतं पूर्वं बहुमूल्यं दिने दिने । जितशत्रुर्ददात्यस्मै महाक्षोपसमन्वितः ॥ ७६ ॥
पूजयित्वा धनैर्वाढं द्वीपायनमनेकधा । जितशत्रुर्यमाघेरं वचसा कामसुन्दरीम् ॥ ७७ ॥

1 [मुने सहायत्वं]. 2 पफ कुम्भम् अ कुम्भम्. 3 [योर्ने]. 4 अ मन्दं मन्द° 5 पफ वीरसुदीर्ण° 6 पफ कुम्भम् अ कुम्भम्. 7 पफ द्वीपायनिम 8 पफ द्वीपायनिम 9 पफ तूर्णमुदीर्ण° 10 पफ द्वीपायनेन

यत्ने कुरु समेतस्य महता गौरवेण हि । यदन्यत्र प्रयातोऽपि हन्म्यहं त्वां ततः क्रुधा ॥ ७८ ॥
जितशत्रुवचः श्रुत्वा ययौ सैं कामसुन्दरी । यथाऽऽज्ञापयसि स्वामिंस्तथैव विदधाम्यहम् ॥७९॥
ताम्बूलभोजनेनास्य पुष्पगन्धानुलेपनैः । उपकारं चकारैषा स्नानवस्त्रप्रियोदितैः ॥ ८० ॥
यमोत्तरपथादेशादागते रत्नपादुके । प्राभृतार्थं नरेन्द्रस्य बहुमूल्यसमन्विते ॥ ८१ ॥
द्वीपायनाय ते दत्ते मञ्जुषा जितशत्रुणा । सोऽपि क्षीरं समादाय ययौ निजगृहं मुदा ॥ ८२ ॥
गम्यपादं समादाय स्थितः स्थापयितुं तके । तदार्यं कामसुन्दर्या शोभने रत्नपादुके ॥ ८३ ॥
न दृष्टे सापि ते क्षिप्ते विधातुं निजपादके । निरस्ता तेन तत्पादात् तदावस्त्राटिकं सुतम् ॥८४॥
कुम्भशीर्षं तदाऽद्राक्षीद् विलोक्य सहसागतः । दध्यौ द्वीपायनश्चित्ते तद्विरक्तमनाश्चिरम् ॥ ८५ ॥
अनया कामसुन्दर्या कुष्ठवृश्चिकेहया । कामभोगान् प्रभुञ्जानो निर्हीनोऽहं कथं स्थितः ॥ ८६ ॥
ततो निर्वेदमासाद्य मुनिसागरपर्वते । विमलोपपदं चन्द्रं सम्मुखं जगाम सः ॥ ८७ ॥
प्रणम्येमं गुरुं मत्त्वा महावैराग्यसंमतः । द्वीपायनो दधौ दीक्षां तदन्ते जिनसेविताम् ॥ ८८ ॥
प्रतिक्रमणवेलायां स्वाध्यायानेहसि स्फुटम् । जिनस्तुतिं विधायासौ दध्यौ तामेव सुन्दरीम् ॥८९॥
क्वाहं भार्या क्व सत्र मया सा चित्तहारिणी । कुम्भशीर्षवदप्युग्रदोषेणैवैकेन निर्मितम् ॥ ९० ॥
ज्ञात्वा तन्मठ चित्तं यतीशो विषयोन्मुखम् । तद्धर्मं कथयामास महाज्ञानसमन्वितः ॥ ९१ ॥
रमणीभिः समं मैत्री संध्यारागसमन्विता । किंपाकफलसाधर्म्यं तत्सुखं क्षणभङ्गुरम् ॥ ९२ ॥
यथा यथाऽर्थं हर्षां नितान्तं मन्यते नरः । तथा तथा परां मूर्तिं करोत्येषाऽस्य सर्वदा ॥ ९३ ॥
यथा यथा प्रियं दुस्तरं समयते नरः । तथा तथाऽस्य संसारं करोत्येषा चिरान्तरम् ॥ ९४ ॥
श्रुत्वा तद्वचनं सोऽपि महावैराग्यसंमतः । बभूव क्वचित् स्वस्य तद्विरक्तमनाः क्रियः ॥ ९५ ॥
तद्दिने निधने साऽपि यनिका नृपमीक्षितः । उद्गम्य सा समायाता तदानी कामसुन्दरी ॥ ९६ ॥
अन्ये वदन्ति तत्कला पूर्वप्रेमानुरागतः । मातङ्गेन सती नीता सद्य नृपतिवासनात् ॥ ९७ ॥
यातायां शर्वरीमध्ये तदानीं कामसुन्दरीम् । मातङ्गोऽपि मुमोचैतां स्मशाने जीववर्जिताम् ॥ ९८ ॥
विकल्पसिद्धिरावास्त्रुविताखिलविभवा । संतिष्ठते स्मशाने सा मध्यरात्रिसमन्विते ॥ ९९ ॥
द्वीपायनमुनिस्तत्र स्वाध्यायार्थक्रियाविधौ । एकाग्रमानसो भूत्वा ध्यायतीमां मुहुर्मुहुः ॥ १०० ॥
पादाङ्गुष्ठे यदि स्पर्शं विनष्टः कुष्ठतोऽमुतः । मुक्ताभिभूषणादीनां विलासः शोभनः पुनः ॥१०१॥
रामारत्नं विहायेदं सर्वस्त्रीतिलकं वराम् । बहुकुत्सदोषेण मया मुक्तं हि तत्क्षणम् ॥ १०२ ॥
भास्वाऽभिप्रायमेतस्य स्मृतभार्यागुणस्य सः । तद्गुरुः प्राह तं तत्र ज्ञातास्थिलस्वार्थकः ॥ १ ३ ॥
द्वीपायनं पुरस्कृत्य तदन्तं प्राप्य तद्गुरुः । मृत्वाऽजैव जगामाशु स्वोकान्तरमसौ सुधीः ॥१०४॥
मुहूर्तमेकमास्थाय तदन्ते च मुनिस्तदा । मार्गं विधाय हस्तेन तस्थौ विस्मितमानसः ॥ १०५ ॥
यथाचार्यो प्रकटस्तत्रमागतः क्षणमात्रतः । ततो दुर्गन्धमेतस्या निहन्त्यौषधयोगतः ॥ १ ६ ॥
एवं चिन्तयतस्तस्य द्वीपायनमुनेस्तदा । आचार्योऽपि तदन्ते च संप्राप्तस्तदनन्तरम् ॥ १ ७ ॥
दृष्ट्वा द्वीपायनं तत्र तदाकुञ्चितमानसम् । जगादेति वचः सत्यं तद्गुरुस्तद्धितेच्छया ॥ १०८ ॥
त्वया राज्यमिदं हित्वा प्रणताशेषपार्थिवम् । धनधान्यसमाकीर्णं यशोव्याप्तदिगन्तरम् ॥ १०९ ॥
अन्तःपुरं समस्तं च सुरदेवीसमप्रभम् । हावभावविलासेन विभ्रमेण समन्वितम् ॥ ११० ॥
तपो जैनेश्वरं सारं गृहीतं शक्रवाञ्छितम् । समस्तजनेश्वरीभूतमनर्घ्यमणिवद्भुवि ॥ १११ ॥

---

1 पक. दं 2 ज वरिष=पवीस. 3 पपडज पाणि: कुष्ठम्

मृतामिमां श्मशानस्थां कुथितां कामसुन्दरीम् । ध्यायन् कथितोऽसि त्वं स्वमतेभ्योऽधुना मुने ॥ ११२ ॥[1]
श्रुत्वा गुरूदितं वाक्यमवसानहितं तराम् । चकाराऽलोचनां सर्वां स्वगुरोरन्तिके सकः ॥ ११३ ॥
प्रायश्चित्तमिदं कृत्वा तदानीं गुरुसाक्षिकम् । द्वैपायनस्तपश्चक्रे स्वर्गमोक्षप्रसाधकम् ॥ ११४ ॥

॥ इति श्रीगोधरसंगीप्यांकथानकमिदम् ॥ ८१ ॥

*

८२ कडारपिङ्गकथानकम् ।

काम्पिल्यनगरे श्रीमान्नरसिंहो नरेश्वरः । तद्भार्या कमला नाम बभूव कमलानना ॥ १ ॥
तन्मन्त्री सुमतिर्नाम धनश्रीरस्य कामिनी । पुत्रः कडारपिङ्गोऽभूत्तयोः प्रेमरक्तयोः ॥ २ ॥
सप्तव्यसनसंयुक्तो नितरां राजवल्लभः । निषेवते हठात् सोऽयं स्वेच्छया पुरयोषितः ॥ ३ ॥
लोकोऽपि तस्य चापल्यं निवेदयितुमक्षमः । वल्लभस्य नरेन्द्रस्य द्वेषी चित्तेन तिष्ठति ॥ ४ ॥
तत्रैव नगरे श्रेष्ठी विद्यते नृपवल्लभः । कुबेरोपपदो दत्तो महाधनसमन्वितः ॥ ५ ॥
प्रियङ्गुसुन्दरी तस्य रमणी रूपसुन्दरी । महासौभाग्यसंपन्ना बभूव जनविश्रुता ॥ ६ ॥
दृष्ट्वैतां रूपसंपन्नां रतिं वा सतनुं तदा । जातः कडारपिङ्गोऽसौ मदनाकुलमानसः ॥ ७ ॥
सरसां पद्मिनीखण्डे नन्दने चारुचन्दने । धृतिं कडारपिङ्गोऽयं न लेभे तद्विरीक्षणात् ॥ ८ ॥
पुत्रं कडारपिङ्गाख्यं कामविह्वलमानसम् । जगाद सुमतिर्मन्त्री शोकवान् किं वदाशु मे ॥ ९ ॥
पितुर्वचनमाकर्ण्य मुञ्चन्निःश्वाससंततिम् । उष्णां जगाद तं तत्र वेपमानशरीरकः ॥ १० ॥
कान्तां कुबेरदत्तस्य यदि प्राप्नोमि निश्चितम् । प्रियङ्गुसुन्दरीं तात ततो जीवामि नान्यथा ॥ ११ ॥
श्रुत्वा पुत्रोदितं वाक्यं सुमतिः सुमतिस्तदा । सुतमाश्वासमानोऽसौ जगाम नृपसन्निधिम् ॥ १२ ॥
विधाय प्रणतिं मन्त्री नरेन्द्रस्य प्रयत्नतः । यथोचितासने स्थित्वा जगादेति विचक्षणः ॥ १३ ॥
श्रेष्ठी कुबेरदत्तोऽयं त्वयास्तुषिमभ्यगम् । किञ्जल्कपक्षिणं भर्तुं स्वर्णद्वीपं प्रयात्वरम् ॥ १४ ॥
पक्षिणोऽस्य सामर्थ्याद् दुर्भिक्षारिविनाशनम् । जायते राज्यवृद्धिश्च भवदारोग्यकारणम् ॥ १५ ॥
मन्त्रिवाक्यं समाकर्ण्य नरसिंहो भुवः पतिः । कुबेरोपपदं दत्तमाजुहाव स्वमन्तिकम् ॥ १६ ॥
आगतश्च प्रणम्यायं यथास्थानं निविश्य च । जगाद भूपतिं श्रेष्ठी नाथ किं क्रियतां वद ॥ १७ ॥
वाक्यं कुबेरदत्तस्य निशम्य धरणीपतिः । वचसाऽतिप्रयत्नेन जगादेमं पुरःस्थितम् ॥ १८ ॥
त्वयाऽवश्यं प्रयातव्यं स्वर्णद्वीपं समुद्रगम् । किञ्जल्कपक्षिणं श्रीमानेतु हि मदन्तिकम् ॥ १९ ॥[4]
नरेश्वरोदितं श्रुत्वा प्रतिपद्य तदागतः । प्राप्य भार्यान्तिकं श्रेष्ठी जगादेतां पुरःस्थिताम् ॥ २० ॥
अहं नरेश्विना कान्ते स्वर्णद्वीपान्तरं द्रुतम् । किञ्जल्कं समानेतुं सहसैव विसर्जितः ॥ २१ ॥[5]
तद्वाक्यविक्षेपक्षा भर्तृभक्तिपरायणा । प्रियङ्गुसुन्दरी प्राह तदुक्त्या निजवल्लभम् ॥ २२ ॥
कृतं कडारपिङ्गेन मतं सर्वमिदं ध्रुवम् । मच्छीलखण्डनार्थं च विद्धि मद्वचनं हितम् ॥ २३ ॥[6]
यथार्थं वचः सत्यं स्वप्रियाया वणिक्पतिः । आपृच्छ्य भूपतिं प्राप्य निर्जगाम सदालयात् ॥ २४ ॥
योधिसेन समं गत्वा स्वर्णद्वीपं प्रति स्फुटम् । निभृत्यागमितो लोकैः तस्थौ स निजमन्दिरम् ॥ २५ ॥
अथ कामग्रहासंगविह्वलीभूतमानसः । तदा कडारपिङ्गोऽयं श्रेष्ठिमन्दिरमाययौ ॥ २६ ॥
वसन्तः सागतो धन्यः शिशिरेण सह पुण्यकः । प्रियङ्गुसुन्दरीभूत्या पचाल्पेते प्रियंवदा ॥ २७ ॥

---

1 पफ पनुभुक्तम्, ज पनुभुक्तमिरम्. 2 [गोधरसंगीप्याख्यानम्]. 3 [कडारपिङ्गो]. 4 पफ पुष्पम्, ज पुष्पम्. 5 पफ पुष्पम्, ज पुष्पम्. 6 पफ पुष्पम्, ज पुष्पम्.

नलीभिः पञ्चभिर्युक्ता तदा स्वाध्यायमागतम्। दृष्ट्वा कडारपिङ्गं च निक्षिप्तोऽत्र पथे पुनः ॥ २८ ॥
षण्मासावधिपर्यन्ते सर्वद्वीपान्तराश्रयम्। कुबेरदत्तो वोहित्थः समापत् स्वपुरं पुनः ॥ २९ ॥
तदा कडारपिङ्गोऽपि चर्मपक्षादिभूषितः। तत्सखिरूपसंपन्नो नीतो भूपान्तिकं नरैः ॥ ३० ॥
दृष्ट्वा पुरःस्थितं राजा पक्षिणं पूर्ववर्जितम्। जगाद कस्य कस्येति किंचिद्विस्मितमानसः ॥ ३१ ॥
आकर्ण्य नरसिंहस्य वाक्यं विस्मितचेतसः। सामन्तमन्त्रिसेवकस्य जगादेदं स तत्पुरः ॥ ३२ ॥
पृच्छितीयाच्छनादक्ष नरेन्द्र कृतशासन। भूपाहं किं प्रवक्ष्यामि न किं वक्ष्यामि दुःखितः ॥३३॥
निशम्य तद्वचो राजा विस्मयव्याप्तमानसः। कृपयाभ्युदयन् सत्यान्[1] चचालेति कुतूहलात् ॥३४॥
एतत्[2] कडारपिङ्गोऽयं मन्त्रिपुत्रस्त्वनन्दनः। मया ह्यन्येन विज्ञातश्चर्मपक्षादिसंयुतः ॥ ३५ ॥[3]
ततो नरेन्द्रवाक्येन विज्ञातः सकलैर्जनैः। नूनं कडारपिङ्गोऽयं न चान्यो नरकुञ्जर ॥ ३६ ॥
ततः कुबेरदत्तोऽपि सत्याख्यं महीपतिम्। कडारपिङ्गवृत्तान्तं समस्तं निजगाद सः ॥ ३७ ॥
वचः कुबेरदत्तस्य निशम्य वसुधाधिपः। बभूव भासुराकारः सर्पिषेव तनूनपात् ॥ ३८ ॥
सर्वस्वहरणं कृत्वा मन्त्रिणः सुमतेस्तदा। राजा कडारपिङ्गं च जगाद क्रोधभीषणः ॥ ३९ ॥
दाराभिरोहणं तूर्णं चनिस्त्वविडम्बनम्। तदा कडारपिङ्गस्य कारयामास भूपतिः ॥ ४० ॥
धनपिङ्गरमासाद्य सांशुलेश्यादिगुप्सितम्। नरसिंहमहीपालात् पत्तनाद्दुस्सारणम् ॥ ४१ ॥
कालेन पञ्चतां प्राप्य दुःखाकुलितमानसः। तदा कडारपिङ्गोऽयं नरकं प्राप भीषणम् ॥ ४२ ॥
॥ इति श्रीकडारपिङ्गकथानकमिदम् ॥ ८२ ॥

*

८३ पाण्डवकौरवकथानकम्।

कुरुजाङ्गलदेशेऽस्ति पुरं नागपुरं परम्। कुरुवंशसमुद्भूतः शान्तनोऽत्र नरेश्वरः ॥ १ ॥
लावण्यरससंपूर्णा शोभना जनविश्रुता। बभूव तन्महादेवी महा गङ्गेव वारिधेः ॥ २ ॥
अनयोः स्नेहसंसक्तचेतसोर्भूमि विश्रुतः। भीष्मनामाऽभवत् पुत्रः पितृस्नेहपरायणः ॥ ३ ॥
कालेन पञ्चतां नीता यदा शान्तनवल्लभा। तदभावे सुखं कृत्वा बभूवासौ विशोककः ॥ ४ ॥
तत्रैव नगरे दिव्ये गङ्गाख्यो धीवरोऽभवत्। रमणी रमणीयाङ्गी यस्याऽस्य मनसः प्रिया ॥ ५ ॥
सुता यौवनवन्याऽस्याः रूपयौवनराजिता। नीलोत्पलदलश्यामा चन्द्रोत्पलविलोचना ॥ ६ ॥
अन्यदा तद्गृहं प्राप्य भीष्मो योजनगन्धिकाम्। पितुरर्थे यदनाख्यान ययाचे धीवरं तदा ॥ ७ ॥
भीष्मवाक्यं समाकर्ण्य कैवर्तोऽपि जगाद तम्। ममकुलं महद् धीमञ्जगदीर्थे जुगुप्सितम् ॥ ८ ॥
ददामि चेत्सुतां राजन् मत्वाशय निश्चितम्। सुतोऽस्या यदि जायेत न राज्यं तस्य जायते ॥ ९ ॥
धीवरस्य वचः श्रुत्वा जगौ भीष्मोऽपि स पुनः। निवृत्तिर्मम राज्यस्य यावज्जीवं हि वाक्रुः[4] ॥ १० ॥
निशम्य भारतीमस्य पुनरोऽपि निजगाद तम्। त्वमिच्छसि न राज्यं चेत् मत्सुतः करिष्यति ॥ ११ ॥
कैवर्तवचनं श्रुत्वा भीष्मः प्रोवाच तं तदा। कौमारब्रह्मचर्यं मे गृहीतं सार्वकालिकम् ॥ १२ ॥
जगादार्थं च तेनाशु कैवर्तेन शिलोपरि। भीष्मोऽपि चारितस्तत्र स्वप्रयोजनहेतुतः ॥ १३ ॥
उपविष्टस्य तस्यापि शिलोपरि शनैः शनैः। शुक्रबिन्दुः पपाताशु तदानीं दैवयोगतः ॥ १४ ॥
तद्बिन्दुमा समुत्पन्नस्त्वयायेन शिलोपरि। महामत्स्यान्यस्तुजाः सितदन्तविराजितः ॥ १५ ॥

1 पञ्च पुच्छम्, अ पुच्छम्. 2 [वच्यामह]. 3 अ तत्र [तत्र]. 4 पञ्च पुच्छम्, अ पुच्छम्.
5 [पातु].

गङ्गासुतेन तेनापि पश्चिमोत्तरपूर्वतः । आगच्छन् प्रतिपक्षोऽसौ प्रेषितो दक्षिणाशया ॥ १६ ॥
नानानोकुहसच्छन्ने नानानगविराजिते । प्रविष्टस्तत्र मातङ्ग कानने प्रीतमानसः ॥ १७ ॥
धीवरेण ततस्तेन सुता योजनगन्धिका । शान्तनाय नरेन्द्राय वितीर्णा विधिना तदा ॥ १८ ॥
मतङ्गेन तनया जातास्तेन[1] तस्यास्त्रयोऽङ्गजाः । चित्रो विचित्रनामा च चित्राङ्गस्ते यथाक्रमम् ॥१९॥
चित्रसाम्बाऽभवद् भार्या विचित्रसाम्बिका तथा । चित्राङ्गदस्य चान्तस[2] विविधा चाम्बिकाम्बिका २०
कालगोचरतां प्राप्ते शान्तने धरणीपतौ । बबन्ध वसुधापट्टं भीष्मोऽप्येषां यथाक्रमम् ॥ २१ ॥
सकर्मं संप्रदायैषां राज्यं विगतकण्टकम् । भीष्मोऽपि तान् जगादेति विनयानतमस्तकान् ॥२२॥
मातुर्विरक्षिपाश्वायां स्थितं भीमं महावनम् । मा गच्छत यमान् धर्तुं भ्रातरः शिक्षयापयन् ॥२३॥[3]
स्तोककालं विहायैतां दिशं दक्षिणगोचराम्[4] । भूयोऽपि वारिता सन्तो यन्मुखे कुचरार्थिनः ॥ २४ ॥
यमेन भीष्मपुत्रेण तत्रत्येन गरीयसा । त्रयोऽपि ते हतास्तत्र युगपद् भ्रातरः क्रुधा ॥ २५ ॥
मृतेषु तेषु सर्वेषु भीष्मपुङ्गवादृते । बभूव राज्यविच्छेदः पुत्रसंतानहानितः ॥ २६ ॥
तदा योजनगन्धाया व्यासो नाम महामुनिः । स्मृतिं गतः समानीतो जटाकूटभीषणः ॥ २७ ॥
विधाय लोचने स्वस्य चीरचीरिकया तदा । अम्बायास्तस्य सामीप्यं गताया सत्वतीक्ष्णया ॥२८॥
उत्पादितः सुतोऽनेन व्यासेनापि तपस्विना । धृतराष्ट्राख्यया युक्तो लोचनाभ्यां परिच्युतः ॥२९॥[6]
अम्बिकया द्वितीयाया विधायापाण्डुतां तनुम् । गताया व्याससामीप्यं पुत्रसंततिकारणात् ॥ ३० ॥
व्यासेन नन्दनो जातो नन्दिताशेषबान्धवः । पाण्डुनामा महासत्त्वो रूपराजितविग्रहः ॥ ३१ ॥
विधाय वस्त्रसंस्कारं सुरविद्याधरोपमम् । जगाम चाटिकाऽभ्यासं तदा व्यासमहामुनेः[7] ॥ ३२ ॥
विधाय सुरतं ह्यनया सह सादरम् । सुतमुत्पादयामास व्यासोऽपि विदुराभिधम् ॥ ३३ ॥
एवमेकैकमुत्पाद्य तनयं तिसृणामपि । व्यासो योजनगन्धायाः स्तुतिं कृत्वा जगाम सः ॥ ३४ ॥
तस्मिन् व्यासमुनौ याते[8] स्वमनोयकमादरात् । बभूव भूपतिः पाण्डुस्तदानीं पार्थपत्तने ॥ ३५ ॥
तस्य भार्या मनःकान्ता कुन्ती मद्री च भूपतेः । अभवद् रूपसंपन्ना पतिस्नेहपरायणा ॥ ३६ ॥
पाण्डुना मृगमध्यस्थो मृगचारी मुनिर्वने । चापमुक्तेन बाणेन निशितेन निपातितः ॥ ३७ ॥
अविरक्तेन तेनापि मैथुनार्थं स्वयोषिति । म्रियमाणेन संदत्तोऽभिशापोऽस्य महीपतेः ॥ ३८ ॥
अविरक्तः स्वभार्यायां दुराचार भवानपि । विदीर्णहृदयः पाप मरिष्यसि विसंशयम् ॥ ३९ ॥
दत्त्वा शापं नृपस्यास्य स मुनिः पञ्चतामितः । भयवैरं समाराध्य तस्थौ पाण्डुश्च दुःखितः ॥ ४० ॥
कुन्ती च विद्ययाहूय व्यासेन वरदत्तया । पुत्रार्थं रतिवेलायां धर्मं वायुं पुरन्दरम् ॥ ४१ ॥
एभिः सार्धं समासङ्गं कृत्वा किल मनोषिता । पुत्रं युधिष्ठिरं भीमं तथाऽर्जुनमजीजनत् ॥ ४२ ॥
मद्री चाश्विनिदेवाभ्यां सह कृत्वा समागमम् । नकुलं सहदेवेन समं पुत्रमजीजनत् ॥ ४३ ॥
कृतं पाण्डुमतेनेदं कुन्त्या मद्र्या च कान्तया । सुगुप्तितमपि[10] क्षिप्रं मुनिशापमपाकृति ॥ ४४ ॥
उक्तमत्र यदस्माभिर्विरुद्धमपि भूतले । तन्मिथ्यार्थप्रवादात् तत्कथानकसंभवात् ॥ ४५ ॥
एतद्विपर्ययं हि वचनं बुधसंसदि । घटमघटते नात्र महापुरुषदोषतः ॥ ४६ ॥
एका न विद्यते जातु कामिनी कामिनामपि । महासत्त्ववतां तेषां कुलजानां कथं भवेत् ॥ ४७ ॥

1 पफ मतातेन 2 [चाम्बालस]. 3 पफ कुम्मम्, ज कुम्भम् 4 पफ °गोचरम्. 5 पफ दुश्चोपनाम्ना 6 पफ कुम्मम्, ज कुम्भम्. 7 ज °महामुनिः. 8 पफ याते. 9 पफ कुम्मम्, ज कुम्भम्. 10 [सुगुप्तितमपि].

धर्म्याख्यानमिदं नीता पाण्डवा कविभिः खलैः । कुमतिभ्रान्तचेतस्कैः सुतरामास्मवैरिभिः ॥४८॥
असत्सतामिदं प्रायं वस्तु फल्गुतामपि । युक्त्या विचार्यमाणं हि सवथा क्षीयते यत ॥ ४९ ॥
पाण्डवाः पाण्डुना जाताः कुन्त्यां मद्यां च पञ्च ते । कुर्वन्त्सर्वपराराज्यमिन्द्रप्रस्थे मुदाऽन्विताः ॥५०॥
गान्धारिण्याः शतं पुत्राः धृतराष्ट्रस्य भूभुजः । रूपशौर्यादिसंपन्ना जाता दुर्योधनादयः ॥ ५१ ॥
एतेऽप्यथपरराज्यं कुर्वन्ति कृतसंमदाः । दुर्योधनादयः सर्वे हस्तिनागपुरे स्थिताः ॥ ५२ ॥
ततो युधिष्ठिरो राजा कृत्वा दिग्विजयं भुवि । मखं प्रवर्तयामास राजसूयाभिधानकम् ॥ ५३ ॥
क्रियमाणे मखे तत्र सोऽन्तःपुरसमन्वितः । निमन्त्रितः समायातो दुर्योधननरेश्वरः ॥ ५४ ॥
प्रविशन्तं मखक्षोणीं तथा दुर्योधनं नृपम् । भीमसेनो जगादाशु वचसा कुटिलस्य च ॥ ५५ ॥
प्रदेशेऽत्र कश्चिदप्यो जलक्रीडोऽस्यकुत्रः । कारास्थितावविद्धन्ते केनचित् पथपाथिवाः ॥ ५६ ॥
अन्यत्र शोभनाकारा सुकुमारमठविग्रहा । जलकान्तशिलाभूमिस्तिष्ठति प्रीतिकारिणी ॥ ५७ ॥
नभःस्फटिकसंकाशा सितीकृतनभस्तला । अन्यत्र स्तिमितस्तत्र स्थितानां मितच कृता ॥५८॥
अन्यत्र सुन्दराकारमिन्द्रनीलविनिर्मितम् । श्यामलीकृतभूतात्र विहितं चारुशिल्पिभिः ॥ ५९ ॥
जलकान्तिशिलामध्ये परिधान्सुरस च । भीमोदितेन संविष्टस्तत्र दुर्योधनोऽज्ञकः ॥ ६० ॥
जलपाने पुनस्तत्र प्रविशन् सरसं सकः । नीरमध्येऽस्थलच्छाये निमज्जति शनैः शनैः ॥ ६१ ॥
भवतीय नभःस्थानं स्फटिकस्य शिलामयो । मन्यमानो विशत्याशु दुर्योधनमहीपतिः ॥ ६२ ॥
स्फटिकस्तम्भशिलास्थाने चरणाभ्यां समुत्थितः । दुर्योधनः प्रयात्येष मन्दं मन्दपराक्रमः ॥ ६३ ॥
एवं प्रविशतस्तस्य दुर्योधनमहीभुजः । शिरः संचूर्णितं तेन वध्यिकमाख्यवरम् ॥ ६४ ॥
एवं सोऽपि प्रकुर्वाणः समीपस्थनरेश्वरः । हसितो रोषमासाद्य हस्तिनागपुरं ययौ ॥ ६५ ॥
प्रविष्टः सगृहं राजा प्रोक्तः शकुनिना पुनः । भीमोऽयं अनुमतो नः सर्वकाल विविष्टे ॥ ६६ ॥
द्यूतव्याजेन निर्विद्य वसुधार्थं वृकोदरम् । निर्वास्य भ्रातृसंयुक्तं विक्रमोऽत्र यत्र पुनः ॥ ६७ ॥
वदास्यतो निमन्त्र्याशु पाण्डवान् सकलानपि । बाहुरातान्तिकं स्वस्य तदा दुर्योधनो नृपः ॥६८॥
वधनिर्घाटनध्येयेन स्वदेशात् तेन मानिना । कृतो द्यूतप्रयोगो हि तदा दुर्योधनेन सः ॥ ६९ ॥
ततो युधिष्ठिरो रन्तुमभ्युद्यतं समुद्यतः । जिनमस्यैकपर्याय सम दुर्योधनेन सः ॥ ७० ॥
शकुन्यन्तस्थितवसास्य नूनं दुर्योधनस्य च । चिन्तितानन्तरं द्यूते निपतन्ति दुरोदराः ॥ ७१ ॥
तथा भीमसमेतस्य धर्मपुत्रस्य च स्फुटम् । हुंकारानन्तरं द्यूते निपतन्ति दुरोदराः ॥ ७२ ॥
एवं सति प्रवृत्तेऽस्मिन् महाद्यूतेऽन्यपोञ्छदा । भीमसेनं जगादेति शकुनिः पुरतः स्थितम् ॥ ७३ ॥
ज्येष्ठानां पुरतो भीम जल्पं कर्तुं न युज्यते । तव चापल्ययुक्तस्य कठोरवदनस्य च ॥ ७४ ॥
निशम्य तद्वचो भीमो भीमसेनो निमानकम् । समभावाय तत्रार्य तस्थौ विनतमस्तकः ॥ ७५ ॥
ततो युधिष्ठिरः सर्वं धनं धरणिमण्डलम् । हस्तिनः पत्तयोऽश्वांस्तुरगान् चात्र्यंदश ॥ ७६ ॥
समस्तुनं ममं द्रव्य तथा द्रौपदिकामपि । दुर्योधनजितं द्यूते मूनं हारितवानसौ ॥ ७७ ॥
हारितेषु समस्तेषु धर्मपुत्रेण भूभुजा । सभामध्ये समस्तानां भूपतीनां विलासिनाम् ॥ ७८ ॥
दुःशासनोऽस्पृक्ष गृहे द्रौपद्या नृपसंनिधौ । अपरं शीलयुक्तायां पुण्यतः किं न जायते ॥ ७९ ॥
वस्त्रेनुप्तानि सन्ति वस्त्राकृष्टानि येनत । उत्पन्नानि वस्त्राण्यानि पर्यन्त किं न लभ्यते ॥ ८० ॥
परिधान समाकृष्टं तस्या दुःशासनेन च । एतावत् तत् समुत्पन्नं पुण्यात् सर्वं हि जायते ॥ ८१ ॥

---

1 [अपरीय निविडम्ये]. 2 पप पुण्यम् अ पुण्यम्. 3 पप पुण्यर अ पुण्यम्. 4 वर्ष देवादेय.

ततो द्रौपदिकां तेन कचेष्वाकृष्य पाणिना । सभामध्ये परामूर्ति आर्त्तां[1] तां पश्यतां सताम् ॥८२॥
एवं विदधतं क्रूरं तदा दुःशासनं खलम् । निवार्यावादशत्रुं च जगौ दुर्योधनो नृपः ॥ ८३ ॥
[2]'दण्डकोपपदेऽरण्ये भवद्भिः सकलैरपि । नूनं द्वादशवर्षाणि स्थातव्यं मम शासनात् ॥ ८४ ॥
वर्षमेकं तथा लोकेऽज्ञातरूपतया पुनः । स्थातव्यं साधुताधारैर्युष्माभिरखिलैरपि ॥ ८५ ॥
भवतो यदि जानामि तत्कथां दैवयोगतः । भवद्भिर्द्वादशान्यानि स्थातव्यान्यधिकानि च ॥ ८६ ॥
श्रुत्वा दौर्योधनं वाक्यं सत्यवादी युधिष्ठिरः । विदुरस्य गृहे कुन्तीं स्थापयामास सात्त्विकः ॥८७॥
द्रौपद्या सह पञ्चापि पाण्डवा द्वादशाब्दकाम्[3] । प्रतिज्ञां ते विधायाशु दण्डकाख्यं वनं ययौ ॥८८॥
नन्दिघोषं रथं दिव्यमारोप्यार्जुनमादरात् । महाप्रतापसंपन्नं धनुर्वेदपरायणम् ॥ ८९ ॥
निनाय मातलिः स्वर्गे शोभनाममरावतीम् । नन्दितूर्यकलस्वानां पुरन्दरपुरीमसौ ॥ ९० ॥[4]
तत्रासुरान् निहत्याशु हस्ते तालुनि मर्मणि । सभाप्राप्ति नरः प्राप्य धर्मपुत्रं समं ययौ ॥ ९१ ॥
एकवर्षं प्रयत्नेन तदा पञ्चापि पाण्डवाः । अज्ञातवर्तितैर्नेते विराटस्य गृहे स्थिताः ॥ ९२ ॥
विप्रवेषं समादाय चाग्रभोजी युधिष्ठिरः । तत्र तस्थौ विनीतात्मा विराटभवने शुचिः ॥ ९३ ॥
भीमोऽपि सूपकारोऽस्य भक्ष्यसूपादिकोविदः । बभूव विनयोपेतः स्वामिभक्तिपरायणः ॥ ९४ ॥
अर्जुनो नर्तकाचार्यो बृहन्नलकरूपभाक् । नर्तयन् सुतरां कन्यां विराटस्य गृहेऽवसत् ॥ ९५ ॥
नकुलोऽपि विशुद्धात्मा तत्तीनां परिपालकः । सहदेवो धयोष्ठीनां विराटस्य पयोमुचम्[7] ॥ ९६ ॥
द्रौपदी च महादेव्या विराटस्य विनष्टधर्मम् । गन्धान् सैरन्ध्रिरूपेण सुरभीकृतदिङ्मुखान् ॥९७॥
अनेन विधियोगेन काले याति शनैः शनैः । विराटभवने तेषां पाण्डवानां महात्मनाम् ॥ ९८ ॥
अथ कौरवसैन्येन तदा दक्षिणगोग्रहे । गृहीताः सकला गावो महानादविधायिना ॥ ९९ ॥
विराटेनानुधाव्यैवा गावो वेगेन पृष्ठतः । निहत्य तद्बलं किंचित् समानीताः कृपाणिना ॥ १०० ॥
ततो दुर्योधनः सार्धं द्रोणाचार्यादिनायकैः । उत्तरे गोग्रहे सर्वा गा जग्राह कुधारया ॥ १०१ ॥
गावो बृहन्नलेनैवाश्मोत्तरेण समं पुनः । आनीतास्त्वस्तुरः सवाः सिंहविक्रमशालिना ॥ १०२ ॥
जित्वा तान् सकलान्[8] धार्तराष्ट्रान् समरे द्रुतम् । प्राणाधिकाल्यान् सर्वान् वेपिताखिलविग्रहान् ॥
विराटपाण्डवानां च प्रीतिविज्ञानपूर्वकः । जातः समागमस्तत्र महानन्दविधायकः ॥ १०४ ॥
अत्रान्तरे परिप्राप्तो विष्णुर्द्वारावतीं[9] पुनः । स्नेहनिर्भरचेतस्कः पाण्डवाभ्यागमादरात् ॥ १०५ ॥
देहादिकुशलं पृष्ट्वा क्षेमं दत्त्वा परस्परम् । पाण्डवा हरिणा सार्धं तस्थुर्मुदितचेतसः ॥ १०६ ॥
अन्येद्युः पाण्डवैरुक्तो हस्तिनागपुरं हरिः । दुर्योधनान्तिकं प्राप तत्सधाननिमित्ततः ॥ १०७ ॥
विष्णुः क्रमेण संप्राप्य तदा दौर्योधनीं सभाम् । आसनस्थो जगादैतां कुशलप्रश्नपूर्वकम् ॥१०८॥
पाण्डवेभ्यः प्रदायार्धं दुर्योधन भुवः स्फुटम् । ततो विधीयते सन्धिः सत्तम सुखहेतवे ॥ १०९ ॥[10]
श्रुत्वा वचनमेतस्य जगौ दुर्योधनोऽप्यमुम् । कम्पमूलकरं वाक्यं कोपाक्षमनिरीक्षणः ॥ ११० ॥
मार्द्धं वसुधरायां हि नारायण महामते । ग्रामार्धमपि भो तेभ्यो ददामि मम सङ्गरः ॥ १११ ॥
दुर्योधनवचः श्रुत्वा तदा सविनयान्मुखम् । विराटनगरं प्राप वासुदेवस्त्वरान्वितः ॥ ११२ ॥
आगतस्य हरेः सद्यः सखापोदितिषधनुगः । स्कन्धावारो बभूवैषां पाण्डवानां महात्मनाम् ॥११३॥

---

1 [मात्र] 2 वक दण्डकोपपदे. 3 [द्वादशाब्दकम्]. 4 धव युग्मम्, ज युग्मम्. 5 धव दमनि 6 क भवस्थीरं 7 [पयोमुचम्]. 8 वक सकलेचारं 9 ज विष्णुद्वारवती 10 धव युग्मम् ज युग्मम्.

सैन्यस्यैकादश प्रोक्ता अक्षौहिण्यः सुतेजसाम् । कुरूणां चतुरङ्गस्य महाडम्बरचेतसाम् ॥ ११४ ॥
स्वसैन्यसमुदायेन पूरिताशेन नाकिना । कुरुक्षेत्रे भुवि प्रापुः पाण्डवाः कौरवास्तथा ॥ ११५ ॥
कुरूणां पाण्डवैः सार्धं तत्र राज्यनिमित्तकम् । बभूव भारतं युद्धं बहुसत्त्वक्षयावहम् ॥ ११६ ॥

॥ इति श्रीकीर्तिनिमित्तयुद्धाख्यं पाण्डवकौरवकथानकमिदं संपूर्णम् ॥ ८३ ॥

*

८४ रामायणकथानकम् ।

विनीताविषये रम्ये साकेता नगरी परा । तस्यां नराधिपः ख्यातो नाम्ना दशरथोऽभवत् ॥ १ ॥
चतस्रस्तन्महादेव्यो रूपलावण्यसंयुताः । आद्या सुकोशला नाम सुमित्राऽन्या मता प्रभा ॥ २ ॥
तृतीया केकया प्रोक्ता चतुर्थी सुप्रभा परा । एताश्चतस्रः ख्याताः कलागुणविशारदाः ॥ ३ ॥
कौशल्यायाः सुतो जातो रामदेवो महाभुजः । लक्ष्मीविराजितोरस्कः सुमित्रायाश्च लक्ष्मणः ॥ ४ ॥
भरतः केकयायाश्च शत्रुघ्नः सुप्रभात्मजः । समस्तभुवनस्याद्याश्चत्वारः सागरा यथा ॥ ५ ॥
जनकेन सुता दत्ता रामदेवाय शोभना । सीताख्या कन्योपमा सीमा सौभाग्यसंपदः ॥ ६ ॥
अन्यदा रूपसंपन्नान् रामादितनयानिमान् । विलोक्य पुरतः श्रीमान् दध्यौ दशरथो हृदि ॥ ७ ॥
वितीर्य सकलं राज्यं रामाय [illegible] । वनवासं च यास्यामि तपोऽर्थं कृतनिश्चयः ॥ ८ ॥
चिन्तयित्वा चिरं राजा राममाहूय सत्वरम् । यावद्दाति राज्यस्य पट्टं सामन्तसंनिधौ ॥ ९ ॥
महोत्सवेन हर्षेण महावाद्योपनिस्वने । श्रुत्वाऽपि वार्तां श्रुत्वा च तावच्च भरताम्बिका ॥ १० ॥
दापयामि महीं त्वत्से पुत्रायेति सचेतसि । कृत्वाकूतं प्रवव्रजेत्तत्तदानीं नृपतिं प्रति ॥ ११ ॥
आगत्य केकयी[1] तत्र प्राहेदं नृपसंसदि । संस्थितो वरो यो मे तव पार्श्वे नरेश्वर ॥ १२ ॥
तमद्य देहि तं मह्यं सत्यपालनतत्पर । सत्यसन्धा हि राजानः पालयन्ति प्रतिश्रुतम् ॥ १३ ॥
मत्सुताय प्रदायैव भरताख्याय स्वं पदम् । लक्ष्मणेन समं राम वनं प्राप्य सांप्रतम् ॥ १४ ॥
केकयावाक्यतस्तत्र तदा दशरथो नृपः । राज्यपट्टं बबन्धाशु भरतस्य सुतस्य सः ॥ १५ ॥
सीतालक्ष्मणसंयुक्तो रामो हित्वा परिग्रहम् । जगाम दण्डकारण्यं दक्षिणाशाव्यवस्थितम् ॥ १६ ॥
अत्रान्तरे महाराजो लङ्कायां रावणोऽभवत् । मन्दोदरी महादेवी तस्य मानसहारिणी ॥ १७ ॥
इन्द्रजिन्मेघनादाख्यौ[3] स्यातां पुत्रौ मनोरमौ । जिनपादारविन्दैकनमनौ प्रेमरञ्जितौ ॥ १८ ॥
स्वसा शूर्पणखा नाम्ना रावणस्य कनीयसी । खरादिदूषणान्ताय वितीर्णाऽनेन रूपिणी ॥ १९ ॥
[4]दण्डकारण्यमध्यस्थं विचरन्ती कदाचन । रामदेवं परिप्राप्य जगादेवं सका मुदा ॥ २० ॥
स्वामिन्नहं समायाता कुमारी स्वयंवरा । प्रतीच्छ तेन मां नाथ गुणश्रेष्ठोऽसि त्वं भुवि ॥ २१ ॥
निशम्य तद्वचो रामो जगादेवं पुरःस्थिताम् । याहि त्वं लक्ष्मणाभ्याशं मत्प्रियाऽऽस्ते मनस्विनि ॥ २२ ॥
लक्ष्मणान्तं परिप्राप्य सका रामनिदेशतः । जगादेवं पुरःस्थित्वा तव भार्या भवाम्यहम् ॥ २३ ॥
लक्ष्मणेन कृपा तस्या नासाकर्णौ निकृत्य च । निपातिताऽद्भुता स्थानात् खरान्तं प्राप सा पुनः ॥ २४ ॥
तदवस्थां निरीक्ष्यैतां खरः प्राह रुषान्वितः । वनसामीप्यगा केन नाशिता मेऽनुजे वद ॥ २५ ॥
वचोऽदितं निशम्यैष जगाम रुधिरेक्षणः । वनसामीप्यगी नाथ नाशिता लक्ष्मणेन हि ॥ २६ ॥
सद्यस्ततः खरः क्रुद्धो दूषणत्रिशिरस्त्रयाः[5] । त्रयोऽपि भ्रातरः प्रापुर्लक्ष्मणसमीपं समन्विताः ॥ २७ ॥

1 एक केकयी 2 पत्र [illegible] 3 [विराजाख्यौ]. 4 [दण्डकारण्य]. 5 [त्रिशिर]

सहस्रैर्दशभिः सार्धं चतुर्भिरपि राक्षसान् । त्रयोऽपि भ्रातरो युद्धे रामदेवेन मारिताः ॥ २८ ॥
हतेषु तेषु सर्वेषु तदा शूर्पणखा परम्[1] । आत्मानं दर्शयामास रावणस्य सभासदः ॥ २९ ॥
कर्णनासापरित्यक्तां स्वसारं वीक्ष्य रावणः । तदानीं कोपमासाद्य रामदेवान्तिकं ययौ ॥ ३० ॥
तत्र सीतां समालोक्य देवतामिव रूपतः । बभूव रावणः सद्यः कामविह्वलमानसः ॥ ३१ ॥
सारङ्गवेषमादाय स्वर्णनिर्मितमूर्तिकम् । तूर्णं जगाम मारीचः सीताभ्यार्णं मनोहरम् ॥ ३२ ॥
चञ्चत्पदमयं दृष्ट्वा रममाणं मृगं पुरः । रामदेवं जगादेति जानकी कौतुकेन तम् ॥ ३३ ॥
पश्य पश्य प्रभो क्षिप्रं हरिणं लोललोचनम् । महारत्नविनिर्माणं रममाणं यदृच्छया ॥ ३४ ॥
स्तोकमन्तरमतिक्रम्य जानकीवचनादरम् । जघान चापमुक्तेन रामो बाणेन तं मृगम् ॥ ३५ ॥
प्रहारविह्वलेनात्र सिंहनादः कृतोऽमुना । हा भ्रातर्लक्ष्मण क्षीणो मृतोऽहं संशयं विना ॥ ३६ ॥
श्रुत्वा तद्विनदं सीता लक्ष्मणं निजगाद च । रामदेवो दशां नीतः केनचिद् ब्रज सांप्रतम् ॥ ३७ ॥
सीतोदितेन तेनोक्ता रामोक्तोऽहं मनस्विनि । सीतामेकाकिनीं मुक्त्वा मा गमिष्यसि बालक ॥ ३८ ॥
जानकी तद्वचः श्रुत्वा चमत्कारमयं गता । यदि लक्ष्मण नो यासि त्वं किं मां मोक्तुमिच्छसि ॥ ३९ ॥
तदिदं वचः श्रुत्वा लक्ष्मणः प्रविहाय ताम् । रामदेवान्तिकं यातस्तदा विह्वलमानसः ॥ ४० ॥
यावद्गतोऽमुतः सौमित्रिस्तावद्दशमुखोऽपि च । विधाय तापसीं रूपे भिक्षार्थं प्राप जानकीम् ॥ ४१ ॥
भिक्षां देहीति मे मुग्धे निगद्यैवं यथा पुनः । आदाय जानकीं शीघ्रं ययौ लङ्कां मुदान्वितः ॥ ४२ ॥
दशानने गते लङ्कां रामदेवेन लक्ष्मणः । उक्तः किमेकिकां सीतां हित्वा वत्स समागतः ॥ ४३ ॥
आकर्ण्य तद्वचस्तत्र लक्ष्मणो निजगाद तम् । नूनं सम्प्रेषितो नाथ सीतयाऽहं त्वदन्तिकम् ॥ ४४ ॥
लक्ष्मणवचनं श्रुत्वा रामदेवो बभाष तम् । नष्टं कार्यमिदं वत्स त्वदागमनकारणात् ॥ ४५ ॥
यत्र देशे स्थिता सीता तं प्रदेशं समागतः । लक्ष्मणेन समं रामो जानकीपरिवर्जितम् ॥ ४६ ॥
अदृष्ट्वा तत्र तां कान्तां रामदेवस्तदुत्सुकः । विलापं नितरां चक्रे मुनिमानसदुःखदम् ॥ ४७ ॥
हा मुग्धे हा गुणाधाने हा मनस्विनि हा शुभे । हा कलाकुशले कान्ते हा विज्ञानविचक्षणे ॥ ४८ ॥
हा चन्द्रमुखि हा तन्वि हा विशालाक्षलोचने । हा चम्पकप्रसूनाङ्गि हा घनस्तनि हा प्रिये ॥ ४९ ॥
हा कोकिलकलालापे हा गुणग्रामसंभृते । हा चक्रोदरि हा शान्ते हा सज्जनमनःप्रिये ॥ ५० ॥
देहि मे वचनं कान्ते कर्णामृतरसायनम् । येनाहं तोषमाप्नोमि सदा हीनं वरानने ॥ ५१ ॥
एवं कृत्वा महाशोकं लक्ष्मणेन प्रबोधितः । किंचिद्बभूव शान्तात्मा मन्मथव्याधिपीडितः ॥ ५२ ॥[7]
अत्रान्तरे बलं प्राप्तः सुग्रीवादिसमन्वितः । हनूमानङ्गनीलाद्या वानरा बहवो नराः ॥ ५३ ॥
सेतुबन्धं समुद्रस्य कारयित्वाशु वानरैः । रामो नवीनसुग्रीवं प्राप लङ्कां बलान्वितः ॥ ५४ ॥
ततो महति संग्रामे हत्वा रामोऽथ रावणम् । बभूव भूपतिर्भूपमस्तकोपाश्रशासनः ॥ ५५ ॥
रामरावणसंबन्धं बहुसत्त्वक्षयावहम् । स्त्रीनिमित्तमिदं ख्यातं लोके रामायणं पुनः ॥ ५६ ॥
अन्यान्यपि च जातानि घोरयुद्धानि भूतले । नराणां स्त्रीकृते कष्टं मूलं युद्धस्य योषितः ॥ ५७ ॥

॥ इति श्रीसीताहरणनिमित्तरावणवधसंबद्धरामायणकथानकमिदम् ॥ ८४ ॥

*

1 पफ परा. 2 [प्रार्थ्यमान]. 3 ब त्वं मां कि. 4 पप निवर्ते. 5 पप °दुत्सुकः. 6 ब °मुखोभि° 7 पफ पश्चि° ... ब पद्मागमिदम 8 पफ °रावणसंभव°

८५ देवरतिनृपकथानकम् ।

विनीताविषये धन्या साकेता नगरी शुभा । तत्र देवरती राजा बभूव इक्ष्वाकुजः ॥ १ ॥
बभूवास महादेवी रक्ताऽस्या नाम चापरम् । रूपयौवनमत्ता या मित्रवत्समिधानका ॥ २ ॥
अपि रूपान्विता रामा हित्वा सर्वा विभूतीः । रक्तामामनुरक्तोऽभूद् राजकार्यपराङ्मुखः ॥ ३ ॥
अपकर्ण्य महीपालो मन्त्रिणो मन्त्रकोविदान् । परमप्रेमाभिभूतोऽपि रक्तया सह तिष्ठति ॥ ४ ॥
ज्ञात्वा नृपं तदासक्तं राजकार्यपराङ्मुखम् । सामन्ता मन्त्रिणो मुख्या भृत्यवर्गाः पुरोधसः ॥ ५ ॥
जयसेनकुमारस्य तत्पुत्रस्य मनीषिणः । राज्यपट्टं बबन्धुस्ते समस्तवसुधां प्रति ॥ ६ ॥
रक्तयाऽपि महादेव्या मन्त्रिभिर्नरकुञ्जरः । स्वपुरान्निर्घाटितः शीघ्रं तदा देवरतिर्नृपः ॥ ७ ॥
रक्ता देवी वनप्रस्था विभ्रन्ती तत्समं वनम् । बभूव म्लानसर्वाङ्गा क्षुधापिपासाकदर्थिता ॥ ८ ॥
स्वोरुमांसं समादाय पक्वं कृत्वा क्षमाधिपः । बाहुरक्तं च पानीयं विधायौषधयोगतः ॥ ९ ॥
स्वमांसभक्षणं तत्र रक्तपाने च भूपतिः । ततो रक्तामहादेव्यास्तद्रूपाकृष्टमानसः ॥ १० ॥
तत्पानभक्षणं कृत्वा प्रीणिताखिलविग्रहा । तदा रक्ता महादेवी बभूव प्रीतिमानसा ॥ ११ ॥
ततो वनाद्विनिष्क्रम्य यमुनाख्यनदीतटे । स्थितं तयोः परिश्रान्तौ मधुरं प्रापतुः क्रमात् ॥ १२ ॥
वसुदत्तेन श्रेष्ठेन दृष्टौ तौ परमोदयौ । दत्त्वा भोगोपभोगौ च स्थापितौ शोभने गृहे ॥ १३ ॥
तत्र सन्ध्यागृहे चैकः किन्नरविरति कण्ठः । पङ्गुलो गीतनृत्यज्ञः[1] कुब्जो वसति सुन्दरम् ॥ १४ ॥
अनेन सहसा रक्ता बभूव प्रीतमानसा । तिष्ठत्यासक्तचेतस्का शर्वरीदिनयोरपि ॥ १५ ॥
ततोऽन्येद्युस्तया सत्यं पङ्गुलस्य निवेदितम् । यथाऽयं भूपतिं हत्वा भ्रमिष्यावोऽत्र भूतले ॥ १६ ॥
विचार्य पङ्गुलोऽप्येष पश्चात्तापस्य नेच्छति । महापुरुषाश्रितस्य स्वस्वसुखमहेतुतः[2] ॥ १७ ॥
भूयोऽपि रक्तया प्रोक्तः पङ्गुलोऽनेन हेतुना । करोमि वधमेतस्य तिष्ठ त्वं मौनमाप्य च ॥ १८ ॥
अन्येद्युर्दिवसे रक्ता रोदनं कुर्वती तराम् । पृष्टा भूपतिना देवि किं रोदिषि वदाशु मे ॥ १९ ॥
नरेन्द्रवचनं श्रुत्वा रक्ताऽपि निजपापगुप् । त्वद्वर्धापनको नाम दिवसोऽयं समागतः ॥ २ ॥
मम पुत्रविहीनायाः कारणे राज्यतो नृप । बालत्वादपि भावाद् अद्य भोगसौख्यपरिच्युतः ॥ २१ ॥
यदि स्वपत्तने भूप स्थितः स्यात् परमोदयः । ततो हेममयैः कुम्भैरभिषेकं नरेश्वरैः ॥ २२ ॥
महाभिषेकिनी राजन् विभवेन परिप्लुता । तज्जन्मवासरे जाते किं करोमि वराङ्गना ॥ २३ ॥
अनेन कारणेनाद्य रोदनं विहितं मया । स्वनाथे राज्यतो भ्रष्टे कुतः[3] सौख्यं हि योषिताम् ॥ २४ ॥
रक्तावचनमाकर्ण्य तत्पतिः प्राह तां पुनः । किं देवि दुःखिता जाता सुधीराऽपि यथैवदा ॥ २५ ॥
अस्माकं धनहीनानां परदेशानुगामिनाम् । जन्मवासरपूजायां हि कृतया किं प्रयोजनम् ॥ २६ ॥
तथापि यद्यसौ भूयः कान्तया मङ्गलं प्रति । राज्यवृद्ध्यै यथास्थानं कर्तुमिच्छामि ते नृप ॥ २७ ॥
भार्यावचनमाकर्ण्य पुनरूचे नृपोऽपि ताम् । किं कर्तव्यं मया देवि खेदयुक्तः कृतस्त्वया ॥ २८ ॥
स्वाम्यतः समादाय यमुनाख्यां नदीं पुनः । रक्ता समाययौ हृष्टा पुष्पमालासमन्विता ॥ २९ ॥
तत्र मण्डलकं कृत्वा पुष्पधूपाक्षतान्वितम् । गायन्ती मङ्गलं[4] रक्ता स्नापयामास तं नृपम् ॥ ३० ॥
राज्यवृद्ध्याभिषेकं सा कृत्वा चलत्कटाक्षदा । गुणनालमयीं तस्य पुष्पमालां च शोभनाम् ॥ ३१ ॥
मस्तकप्रवरं पादयोः क्षिप्त्वा तथा पुनः । यमुनान्तःकूलसन्निभे तस्य पार्श्वं विधाय सा ॥ ३२ ॥

---

1 पफ कुब्जम्, ब कुब्जम्. 2 पफ बहुगुणमयम्, ब बहुगुणमयीयस. 3 पफ कुब्जम्, ब कुब्जम्.
4 ब गायन्ती मङ्गलं.

पादयोरिममादाय गम्भीरयमुनाह्रदे । रक्ता चिक्षेप भूपालं सवानी निष्ठुराशया ॥ ३३ ॥[1]
पूर्वोक्तनिम्नगातीरे निक्षिप्य दयितं चिटी । पङ्गुलेन समं भोगान् भुञ्जाना सा वितिष्ठते ॥ ३४ ॥
राजाऽपि च तया क्षिप्तो धुन्यां तत्स्रोतसानुगः । नीयमानः पुनः प्राप मङ्गलाद्रिपुरं परम् ॥ ३५ ॥
तत्रत्तनसमीपस्थमहाशाखाशाखोरधः । पूर्वोक्तभूपतिः श्रान्तो देवरतिः सोऽवतिष्ठते ॥ ३६ ॥
श्रीवर्धननृपोऽप्यत्र तत्पुरे धनसंकुले । तस्मिन्नेव दिने श्रीमान् कालगोचरतां ययौ ॥ ३७ ॥
तस्मिन् मृते परिम्लाने पुत्रहीने महीपतौ । बभूवाकुलतां सर्वं मङ्गलोपपदं पुरम् ॥ ३८ ॥
अभ्यर्चिताऽस्मेनोच्चैः पुष्पधूप प्रदाय च । भूपा महत्तराः सर्वे मुमुचू राजहस्तिकम् ॥ ३९ ॥
भ्रान्त्वाऽखिलं पुरं कुम्भी तस्याद्रि समिपिंत पुनः । नृपं देवरतिं तत्र सत्वो मर्मकुलेन[2] सः ॥ ४० ॥
करेणादाय तं भूप स्वपृष्ठमधिरोप्य च । महासिंहासने दिव्ये स्थापयामास कुञ्जरः ॥ ४१ ॥
अथ सामन्तसंघाताः पुरोहितमहत्तराः । अभिषेकं कुर्वतः कृत्वा राज्यमस्मै ददुः पुनः ॥ ४२ ॥
पङ्गुअनं महादान ददेऽपश्यन् स योषितः । चक्रे देवरती राजा राज्यं कण्टकवर्जितम् ॥ ४३ ॥
पङ्गुलेन समं भोगान् भुञ्जाना सा यथेप्सया । एकेन देशिकेनोक्ता सा च तद्गतचेतसा ॥ ४४ ॥
यथा पतिव्रते देवि जयसेनो नरेश्वरः । मङ्गलाख्यपुरस्वामी कीर्तिव्याप्तदिगन्तरः ॥ ४५ ॥
पङ्गुजनां महादानं चिन्तिताधिकमादरात् । पतिव्रताजनानां च ददाति स दिवानिशम् ॥ ४६ ॥
तेन पङ्गुलमादाय गच्छ त्वं तत्समीपकम् । लभसे येन सन्मानं धनं च बहुलं सति ॥ ४७ ॥[4]
निशम्य तद्वचो रक्ता सवीर्यं पङ्गुलं तदा । स्कन्धेऽधिरोप्य तं भक्त्या मङ्गलाद्रिपुरं ययौ ॥ ४८ ॥
पृथ्य सा तत्पुराभ्यासे लोकैः कौतुकसंगतैः । स्कन्धस्थोऽयं प्रियो देवि कथं भवेत् ते तनूदरि ॥४९॥
तदाप्यतो बभाषेषा जनान् संगतकौतुकान् । दैवैर्विहितरूप भर्ता दत्तो मे प्रीतमानसैः ॥ ५० ॥
अहं पतिव्रता भूत्वा कुर्वन्ती विनयं परम् । अहमेतस्य भावेन तिष्ठामि सरसं भुवि ॥ ५१ ॥
यत्समाया इम श्लोकं तारेण ध्वनिना सदा । निगद्य याचते भिक्षां लोके वेश्मनि वेश्मनि ॥५२॥
स्थापयन्ती पतिं स्कन्धे मस्तके च भ्रमं विना । भिक्षां यतिं च मे देहि साऽहं मित्रमती[5] जन ॥५३॥
श्रुत्वा मित्रमतीवाक्यं गन्धपुष्पाक्षतादिभिः । त्रि परीत्यार्चयित्वा तां भोजनं प्रददौ जनः ॥ ५४ ॥
चरवाम्बूलसौधे पूर्वमिता तकां तदा । लोकः श्लोकं पपाठेमं तोषपूरितमानसः ॥ ५५ ॥
यदि सान्मङ्गलं तेऽत्र धन्याऽसि त्वं पतिव्रते । पुत्रभार्यादियुक्तानामस्माकमपि मङ्गलम् ॥ ५६ ॥
अनेन विधिना रक्ता तस्मिन् भ्रमते मुदा । मङ्गलाद्रिपुरं प्राप्य द्वारि भूपस्य तस्थुषी ॥ ५७ ॥
दौवारिकेण[6] तौ तत्र भूपालस्य निवेदितौ । सम्मतेन पुनः शीघ्रं जग्मतुर्नृपसंनिधिम् ॥ ५८ ॥
अपश्यन् भूपती रामामभिरामामपि स्फुटम् । दत्त्वा काण्डपटं तत्र तस्थौ विस्मितमानसः ॥ ५९ ॥
एवं स्थितस्य भूपस्य सभामध्यनिवासिनः । आशीर्वादमिमं देवी ददाति प्रीतमानसा ॥ ६० ॥
आज्ञैश्वर्यबलेनामा चिरं जीवारिमर्दन । धर्मं वस्त्राणि मे देहि साऽहं मित्रवती सती ॥ ६१ ॥
मित्रमत्युदितं श्रुत्वा धनासक्तिपरायणम् । विस्मयव्याप्तचेतस्को जगादेदं महीपतिः ॥ ६२ ॥
उरूपाद्युपलं चर्मं मदीयं पूतने त्वया । तया कीलाज्जालं च निपीतं कुत्र्टे स्थले ॥ ६३ ॥
निक्षिप्तोऽहं त्वया नूनं यमुनाख्यनदीह्रदे । अहो मित्रमति भूरे सतीत्वं पत्व्ये तव ॥ ६४ ॥
ततः काण्डपटं राजा निराकार्य भरेण सः । तयोर्महाधनं भूरि ददौ कृपया युतः ॥ ६५ ॥

---

1 पफ विघ्नम्, ज विघ्नमित्यम्. 2 ज परमतः देव° [भल्ले]. 3 ज मल्लाङ्गेन. 4 पफ विघ्नम्, ज विघ्नमित्यम्. 5 ज मित्रवती 6 [दौवारिकेण]. 7 पफ विघ्नम्, ज विघ्नमित्यम्.

जयसेनकुमाराय राज्यं दत्त्वा सुताय सः । महावैराग्यसंपन्नो ययौ दमवरान्तिकम् ॥ ९६ ॥
नत्वाऽऽचार्यमिमं भक्त्या बहुसामन्तसंयुतः । दधौ देवरती राजा दीक्षां दैगम्बरीमसौ ॥ ९७ ॥
नानाविधं तपो येन नानादुःखविनाशकम् । कुर्वन् देवरतिः साधुस्तिष्ठति प्रीतमानसः ॥ ९८ ॥

॥ इति श्रीरक्तापङ्गुलनिमित्तपद्मामावतीनिर्वासितदेवरतिनृपकथानकम्[1] ॥ ८५ ॥

*

८६ सिंहबलनृपकथानकम् ।

अथास्ति नृपतिः श्रीमान् गोविन्दः[2] पृथिवीपुरे । रूपिणी तन्महादेवी कृपोपचरितमतिः ॥ १ ॥
तस्यैव नृपतेरस्ति मंत्रिणो नाम विश्रुतः । द्वितीयं गुणनामास्य [3]सहस्रभटसंज्ञकम् ॥ २ ॥
श्रीकान्ता तस्य भार्याऽऽसीत् तत्सुता गोमतिः[4] परा । नीलोत्पलदलश्यामा विशालधवललोचना ॥ ३ ॥
सा च सिंहबलायोच्चैस्तुष्टेन किल भूभुजा । दत्ता नृपाय शूराय पलाशग्रामवासिने ॥ ४ ॥
सा च सिंहबलेनामा प्रीतिं न कुरुते क्वचित् । ऐश्वर्यकुलविज्ञानमानरूपेण गर्विता ॥ ५ ॥
दुःखं कलत्रमायासं तत्समं प्राप्य वेगतः[5] । अन्तर्वत्नी विहायासौ पद्मिनीखेटमाययौ ॥ ६ ॥
सिंहसेनोऽभवत् तत्र ग्रामकूटो महाधनः[6] । सिंहसेना प्रिया चास्य सुभद्रा कन्यकाऽऽत्मजा ॥ ७ ॥
वितीर्णा विधिनाऽनेन सुभद्रा तनया निजा । मातुलेन महाप्रीत्या गुर्वी सिंहबलाय सा ॥ ८ ॥
ग्राम्यभोगसुखं तत्र तया सार्धं मनोरमम् । सिंहपूर्वो बलान्तोऽसौ भुञ्जानो व्यवतिष्ठते ॥ ९ ॥
श्रुत्वा सिंहबलस्येमं वृत्तान्तं गोमतिः[7] क्रुधा । जगाम पद्मिनीखेटं नगरं शर्वरीमुखे ॥ १० ॥
गत्वा केनाप्युपायेन ग्रामकूटगृहं द्रुतम् । सुभद्रायाः शिरश्छित्त्वा गोमतिर्निर्गता निशि ॥ ११ ॥
तन्मस्तकं समादाय वने व्याघ्रभयानके । प्रसूता दारकं दिव्यं गोमतिर्निर्जुगुप्सया ॥ १२ ॥
स्वयं व्याघ्रभयाद् बालं गृहीत्वा कटके सका । वटवृक्षं समारूढा महाशाखासमन्वितम् ॥ १३ ॥
अथ तद्वटमूले च वंटयन्तो हृतं धनम् । दस्यवो विहितारावा तिष्ठन्ति भयवर्जिताः ॥ १४ ॥
गोमतिर्विटपोर्ध्वस्था सुभद्रामस्तकं निशि । तेषामुपरि निःशङ्का मुमोच व्याकुलात्मनाम् ॥ १५ ॥
दृष्ट्वा ते स्वपुरश्छिन्नं मस्तकं पतितं तदा । भयवेपितसर्वाङ्गा धनं हित्वा पलायिताः ॥ १६ ॥
ततः प्रभातकाले च गोमतिर्व्यालभीतितः । तन्मस्तकं धनं बालं गृहीत्वा स्वग्राममाययौ ॥ १७ ॥
तन्मस्तककपालं साऽपि संस्कृत्य लवणादिभिः । तस्थौ निजगृहे कृत्वा स्वकीयसमयं प्रति ॥ १८ ॥
अथ सिंहबलः स्थित्वा ग्रामकूटनिकेतने । दिनानि कतिचित् प्राप तदानीं निजमन्दिरम् ॥ १९ ॥
गोमतिं भोजनं सोऽपि ययाचे गृहमागतः । तदाप्यतः प्रिया साऽस्य शाकप्रकारं ददौ ॥ २० ॥
भक्ष्यमित्यादरेणोच्चैः संनिवेश्य वरासने । क्रमेण तच्छिरोमांसं ददौ पात्रेऽस्य वल्लभा ॥ २१ ॥
सोऽपि हृष्टस्ततो भुङ्क्ते तत्स्वादं वर्णयन् भृशम् । यथेऽनया कुतो जातं सुष्ठु मांसं वरोरु मे ॥ २२ ॥
भार्यावचनमाकर्ण्य तत्सखित्वा जगौ पुनः । अतीव शोभनं मांसं जातं नो वेद्मि वल्लभे ॥ २३ ॥
एवं निर्बन्धिते तेन मात्सर्यवशवर्तिनी । तन्मस्तकं विधायास्य भाजने सा जगाविदम् ॥ २४ ॥
भवत्प्रियाशिरोमांसं जातं सुष्ठु तव प्रभो । ततो नृपोऽपि श्रुत्वा स्वमिदं तत्प्रेमकारणात् ॥ २५ ॥
यदि येव करोषि त्वं यथा स्वाकृतमाचिरः । छिन्ने मया तथा तेऽपि छिनद्मीदं द्रुतं शठ ॥ २६ ॥

---

1 ज निमित्त. 2 ज 'गोविन्द' 3 ज [illegible] 4 पफ [illegible] 5 ज ([illegible]). 6 पफ [illegible]. 7 पफ एवं निर्बन्ध ते.

एवमुक्तस्तया सोऽपि यदा मोक्तुं न वाञ्छति । तदा प्रासेन सो[1] हत्वा चक्रे च गतजीवितम् ॥२७॥
चतुर्गतिकसंसारे नानादुःखभयानके । राजा सिंहरथो दीनश्चकार परिहिण्डनम् ॥ २८ ॥

॥ इति श्रीस्थिरकगोमतिभार्यानिहतसिंहरथलम्पटकथानकम्[2] ॥ ८६ ॥

*

८७ वीरवतीकथानकम् ।

मगधाख्यमहादेशे पुरं राजगृहं परम् । साधुलोकसमाकीर्णं विद्यते धनसंकुलम् ॥ १ ॥
तत्पुरे धनमित्रोऽभूदिभ्यश्रेष्ठी जनप्रियः । सुविचित्रयशोव्याप्तसमस्तवसुधातलः ॥ २ ॥
यस्येन्द्रनीलवैडूर्यपद्मरागमणिव्रजः[3] । तस्करोपोज्झिताकाशो मूल्येन परिवर्जितः ॥ ३ ॥
हस्तिनिकरसंरुद्धच्छत्राणामुपरि स्थितः । दृश्यते लोकचारेण कौतुकव्याप्तचेतसा ॥ ४ ॥
भाण्डपञ्चशतस्तुल्ये रत्नान्तपरिवेष्टिभिः । केवलमलब्धैः स इभ्यो गदितो जिनैः ॥ ५ ॥[4]
यस्य पूर्वार्जितो राशी रत्नानाममलत्विषाम् । नृपस्य नरसंरुद्धच्छत्राणामधिको भवेत् ॥ ६ ॥
समस्तभुवनव्यापियशोऽमलवितानकैः । निःशेषभुवनाख्यातैः स नृपेभ्यो मतो बुधैः ॥ ७ ॥[5]
यस्य माणिक्यसङ्घातो मूल्यहीनः पुरोहितः । एकस्य नृपसंरुद्धच्छत्राणामधिको भवेत् ॥ ८ ॥
समस्तसाधुताधारैर्लोकविख्यातकीर्तिभिः । पटकेभ्यो मतः सोऽत्र निखिलागमविस्तरैः ॥ ९ ॥
तद्भार्या धरणी नाम बभूव गुणधारिणी । दत्तनामाऽनयोः पुत्रः कलाविज्ञानकोविदः ॥ १० ॥
बभूव तत्पुराभ्याशे ग्रामो भूमिगृहो महान् । तत्रानन्दकुटुम्बी च धनधान्यसमन्वितः ॥ ११ ॥
भार्या मित्रवती तस्य मित्रसंतोषकारिणी । अनयोः रूपसंपन्ना सुता वीरवती मता ॥ १२ ॥
सेयं वीरवती दत्ता दत्ताय जनकेन हि । परिणीताऽमुना चार्वी जयमङ्गलनिस्वनैः ॥ १३ ॥
तस्मिन् भूमिगृहे ग्रामे दुष्टभावो मलिम्लुचः । चौरिकाजीवनो नित्यं दुष्टभावो वसत्परम् ॥ १४ ॥
एतेन दुष्टभावेन तस्करेण समं खला । तिष्ठति प्रीतचेतस्का भृशं वीरवती सदा ॥ १५ ॥
तस्करोऽप्यनया सार्धमनुरक्तो वितिष्ठते । एतयोः प्रेमरागेण याति कालः परस्परम् ॥ १६ ॥
साऽपि वीरवती दत्तं नेच्छति द्वेषमागता । दत्तोऽपि तां स्वचित्तस्थां मोक्तुं नेच्छति सर्वदा ॥ १७ ॥
दुष्टभावः कदाचिच्च चौरिकां विदधत् पुरे । लब्धो नेत्रेशिना जीवन् शूलिकायां निवासितः ॥१८॥
दत्तोऽपि शूरसेनेन मित्रेण सह तद्दिने । स्मरन् वीरवतीं यातो ग्रामं भूमिगृहाभिधम् ॥ १९ ॥
तत्र श्वशुरगेहे च वीरवत्या समं वरः । दत्तः सुप्तोऽप्यनिच्छन्त्या शयनीये मनोहरे ॥ २० ॥
यथाक्रमं प्रसुप्तानां मध्यरात्रमपि स्थिते । दुष्टभावो हि शूलस्थो वीरवत्याः स्थितो हृदि ॥ २१ ॥
दत्तेन सह संसुप्ता सोपरार्धं मुहूर्तकम् । शयनीयात् समुत्तस्थौ दुःखिनी वीरवत्यरम् ॥ २२ ॥
पुष्पकश्मीरताम्बूलं समादाय सधूपकम् । शूलस्थचौरसामीप्यं जगामासौ निशि द्रुतम् ॥ २३ ॥
श्मशानपत्रसपादव्योपभन्नपगच्छतः । पापया न्यासमेनस्य कृपाणेन कराङ्गुली ॥ २४ ॥
छिन्ना शब्दं तु तस्योच्चैः श्रुत्वा मुद्रिकभूषणा । वीरवत्याऽन्ति तत्र यत्रास्तेऽसौ मलिम्लुचः ॥ २५ ॥
शूरसेनस्तया सार्धं प्राप्य स्तोकान्तरं पुनः । तदानीं चौरसामीप्यं तस्थौ प्रच्छन्नविग्रहः ॥ २६ ॥
प्राप्य चौरान्तिकं साऽपि कृत्वा समापणं मुहुः । कुङ्कुमालेपनं चास्मै दत्त्वा पुष्पादिकं स्थिता ॥२७॥
दुष्टभावोऽपि तां प्राह गाढालिङ्गनपूर्वकम् । एकवारं मुखनाद्य ताम्बूलं देहि मे प्रिये ॥ २८ ॥

1 [ना]. 2 ज कथानकमिदम्. 3 [वैडूर्य]. 4 पक्ष मिभ्यम्, ज मिभ्यमिदम्. 5 पक्ष दुष्यम्, ज दुष्यमिदम् 6 पक्ष चौरिके 7 [तुष्टे].

ताम्बूलं दातुमिच्छन्ती स्वमुखेनास्य सादरम् । दृष्टवानां पयं चक्रे शूलिकाग्रस्थचौरकः ॥ २९ ॥
शूलस्थपुरुषमारुह्य चौरं च परिरभ्य सा । ताम्बूलं स्वमुखेनास्मै ददौ वीरवती निशि ॥ ३० ॥
दत्ते रदच्छदः छिन्नं[1] तस्करेण मुमूर्षुणा । वीरवत्याः स तद्वक्त्रे तस्थौ कीलकसंभृते ॥ ३१ ॥
तस्मिन् दिनेऽथ सा प्राप्य स्वगेहं भर्तुरन्तिकम् । स्तोकवेलं च सुष्वाप तदा वीरवती खला ॥ ३२ ॥
शयनीयात् समुत्थाय रोदं[2] कृत्वा जगाविदम् । सत्या निरपराधाया छिन्नो दत्तेन मेऽधरः ॥ ३३ ॥
श्रुत्वा तन्निनदं दीनं प्रभाते सकले जने । प्राप्य तद्वचनं बद्ध्वा दत्तं निन्ये नृपान्तिकम् ॥ ३४ ॥
किंवदन्ती ततः सर्वा भूभुजे विनिवेदिता । तदन्वये[3] समाकर्ण्य तं नृपो रुषमाययौ ॥ ३५ ॥
एतस्यास्य कुशीलस्य हन्तुं नरपतिस्तदा । किंकराणां ददावाज्ञां कोपलोहितलोचनः ॥ ३६ ॥
नरेन्द्रवचनं श्रुत्वा शूरसेनो जगाविदम् । राजन् शूलस्थचौरेण छिन्नोऽस्या दशनच्छदः ॥ ३७ ॥
ममेमां करशाखां[4] च छिन्नां पश्य समुद्धृताम् । स्वैरिण्या निशि गच्छन्त्याऽनुयाते पथि मूढया ॥ ३८ ॥
तस्मिन्निरपराधस्य वणिक्पुत्रस्य भूपते । प्रजानुपालनासक्त मा कारय हिंसनम् ॥ ३९ ॥
चेत्प्रतीतिर्न भवतो विद्यते भुवनेश्वर[5] । तच्चौरान्तिकं याहि यत्स्यं दर्शयाम्यहम् ॥ ४० ॥
शूरसेनवचः श्रुत्वा पौरलोकसमन्वितः । चौरान्तिकं जगामाशु भूपतिस्तत्क्षणं मुदा ॥ ४१ ॥
दुष्टचौरमुखे दृष्ट्वा तदोष्ठं नरकुञ्जरः । दत्तं मुमोच तुष्टात्मा पूजयित्वा धनादिना ॥ ४२ ॥
पूजितः शूरसेनोऽपि नरनाथेन भूरिशः । सन्मानदानयोगेन सत्यवचनकारणात् ॥ ४३ ॥
अथ दत्तो वणिक् तत्र भार्यावैराग्यहेतुतः । अभिनन्दनसामीप्ये प्रवव्राज प्रशान्तधीः ॥ ४४ ॥
चेष्टितं वीरवत्या हि विलोक्य नरकुञ्जराः । केचित् प्रवव्रजुर्धीराः केचिज्जैनमणुव्रतम् ॥ ४५ ॥

॥ इति श्रीदुष्टचौरासक्तकान्तावृत्ताख्यान
वीरवतीकथानकमिदम् ॥ ८७ ॥

*

८८ रोहिणीकथानकम् ।

शूरसेनजनान्तेऽस्ति सौरी नाम पुरी परा । वसुदेवोऽत्र राजेन्द्रो रोहिणी तन्मनःप्रिया ॥ १ ॥
तत्सुतो नवमः शूरो बलदेवो महाबलः । समातृविनयं नित्यं कुर्वाणः स विचेष्टते ॥ २ ॥
जननीपुत्रभावेन स्थितावपि विलोक्य तौ । जनोऽत्र वक्ति निःशङ्को रोहिणी बलदेवगा ॥ ३ ॥
समस्तजनसंवादं सन्निन्द्याप्रतिपादकम् । न परं रोहिणी वेत्ति राजवेश्मान्तरस्थिता ॥ ४ ॥
अन्यदा सह पुत्रेण रोहिणी तिष्ठति स्फुटम् । लोकवार्तां च शुश्राव वाक्कृतपुरस्सरम् ॥ ५ ॥
एवं विज्ञाय तां वार्तां सत्येन परिवर्जिताम् । रोहिणी सानुतापेता वज्रेणेव समाहता ॥ ६ ॥
गोकुलाद् दधिदुग्धादि गृहीत्वा कुपनप्रभा । ग्रामं व्रजन्त्या विशन्त्या च गोप्या तत्पुरतः कृतम् ॥ ७ ॥
इयमाकर्ण्य तां वार्तां जनश्रुतेऽन्तमयुक्तात् । दृढेऽस्मन्सततेऽन्यायो वर्तते साधुनिन्दितः ॥ ८ ॥
विज्ञातास्थितभावेन कोविदेन मनीषिणा । पुत्रेण बलदेवेन सह तिष्ठति रोहिणी ॥ ९ ॥
इदं वचनमाकर्ण्य दुःखपूरितमानसा । ययौ गृहं निजं साऽपि शोकक्लान्तमुखाम्बुजा ॥ १० ॥[6]
प्रष्टा गोपी महादेव्या रोहिण्या संभ्रमेण सा । गोपि किं कारणं दुःखाद् रोदनं कुरुषे वद ॥ ११ ॥
रोहिणीवाक्यमाकर्ण्य गोपिका निजगावमुम् । यथा त्वं देवि पुत्रेण सह तिष्ठसि सर्वदा ॥ १२ ॥

---

1 [रदच्छदोष्ठो]. 2 क रुदर्ली 3 [रोदं]. 4 पफ करशाखां 5 [भुवनेश्वर]. 6 पफ मिलम्, ब मिलकमीहस, 7 ज ब ब 8 पफ चामीः कृतम् ब चामुकृतमीहस.

निशम्य जनतो वाक्यं निर्गतं यदनादिदम् । अमुना कारणेनार्ये स्रवन्ती स्वां समागता ॥ १३ ॥
रोहिणी तद्वचः श्रुत्वा पुरमन्विष्य सर्वतः । सत्यं जनोऽपि वक्तीदं आतेय भीतसंज्ञया ॥ १४ ॥
वसुदेवोऽपि विज्ञाय तं वृत्तान्तमशेषतः । आहूय रोहिणीमसौ शपथं प्रददाविमम् ॥ १५ ॥
यमुनाख्यनदीमध्ये महाप्रवसमन्विते । कायोत्सर्गेण तिष्ठ त्वं प्राप्येमां सरितं द्रुतम् ॥ १६ ॥
निशम्य पतिसद्वाक्यं रोहिणी प्रीतमानसा । यमुनाख्यनदीवाहे सम्यौ प्रतिमया तदा ॥ १७ ॥
प्रतिमायोगमासाद्य तत्प्रवाहे महार्णवे । स्थितायामत्र राहिण्यां यमुनैषा स्थिरा नदी ॥ १८ ॥
स्वम्भिते तद्वत जाते पुरे वक्ति जनोऽखिलः । शुद्धासि सांप्रतं देवि पाहीदं नगरं सति ॥ १९ ॥
लोकवाक्यं समाकर्ण्य गदिता यमुनाऽनया । पूरयन्त्या दिशां चक्रं जिनदेवं नमोऽपि गाम् ॥ २० ॥
यद्यहं शुद्धिमायाता दक्षिणस्यां दिशि दूरः । ततो मज्ञोत्तरामार्गा यमुने मम वाक्यतः ॥ २१ ॥
सत्यधैर्यसमेतायाः रोहिण्याः स्थिरचेतसः । कल्याभिज्ञानयुक्तायाः शुश्राव वचनं मुनी ॥ २२ ॥
वेष्टयित्वा पुरं सर्वं उत्तरस्यां दिशि स्थिता । अद्यापि रोहिणीवाक्याद्यमुना वहति स्फुटम् ॥२३॥
प्रातिहार्यमिदं दृष्ट्वा रोहिण्या बहवो नराः । नार्योऽपि शुद्धचेतस्काः जिनधर्मं प्रपेदिरे ॥ २४ ॥

॥ इति श्रीवसुदेवरमणीरोहिणीकथानकमिदम् ॥ ८८ ॥

८९ सीताकथानकम् ।

विनीताविषये कान्ते साकेता नगरी शुभा । रामदेवो नृपस्तस्यां सीताऽऽसीदस्य गेहिनी ॥ १ ॥
रावणेन समं तस्या जाते संजल्पने तदा । रामदेवेन शुद्ध्यर्थं अग्निकुण्डं कृतं महत् ॥ २ ॥
तन्मध्येऽमरुद्दीप्तैः श्रीखण्डैरपि पूरिते । रामदेवसमादिष्टैर्नरैः प्रज्वालितः शिखी ॥ ३ ॥
रामदेवं विहायान्यनरं मे यदि वाञ्छितम् । मनसापि जना वह्ने ततो मां दह माऽन्यथा ॥४॥
एवं निगद्य सा सीता रामदेवप्रबोधिता । अग्निकुण्डं विवेशाशु ज्वालेयोत्तितपुष्करम् ॥ ५ ॥
सीतयाऽऽविष्टया सर्वं वह्निज्वालसमन्वितम् । अग्निकुण्डं तदा जातं महापद्मसरोवरम् ॥ ६ ॥
प्रातिहार्यमिदं प्राप्य वरं देवैः प्रकल्पितम् । सीता संयमसन्नान्ते दधौ दीक्षां जिनाश्रिताम् ॥ ७ ॥
आश्चर्यमिदमालोक्य तदानीं बहवो नराः । महावैराग्यसंपन्ना योषितोऽपि प्रवव्रजुः ॥ ८ ॥
श्रावकत्वं परिप्राप्य तथाऽन्ये भक्तितत्पराः । कश्चिन्मध्यस्थतां भव्याः सीतास्तुतिविधायिनः ॥९॥

॥ इति श्रीरामदेवपत्नीसीताशुद्धिकथानकम् ॥ ८९ ॥

९० जिनदासीकथानकम् ।

अथ [1]चम्पापुरे श्रीमान् जिनदत्तोऽभवत् प्रभुः । श्रावकोऽस्य प्रिया भार्या जिनदासी कलत्रजा ॥१॥
अन्यदा जिनदत्तोऽयं जिनदास्या सहादरात् । प्रस्थितो मिथिलां गन्तुं भ्रातृस्नेहवशात्मनात् ॥ २ ॥
जिनदत्तो व्रजन् कक्षे नानाजनौघसंकुलं । अम्याख्यानं ददौ किंचिज्जिनदास्याः स्वयोषितः ॥ ३ ॥
साऽपि तद्वचनं श्रुत्वा श्रुतपूर्वं मनस्विनी । स्वचारित्रविशुद्ध्यर्थं सिंहान्ते प्रतिमां दधौ ॥ ४ ॥
सिंहोऽपि विपरीतैतां कायोत्सर्गमिव स्थिताम् । जिनदासी प्रणम्याशु ययौ धाम स्ववाञ्छितम् ॥५॥

1 पप चुम्मम्, ज चुम्पनीरम्. 2 पप चुम्मम्, ज चुम्पनीरम्. 3 प भ्रातृवैर:. 4 [तत्]. 5 ज कायत्यमीरम्. 6 [चम्पापुरे]. 7 पप 'सिंहविन्यम [कायोत्सर्गमवस्थितम्].

अनेन विधिना तत्र क्षेपयित्वा क्षमापरात् । गुरुं सुमतिमानम्य जिनदासी तपोऽग्रहीत् ॥ ६ ॥
दृष्ट्वाऽतिशयमीदृक्षं जिनदासाः सुचेतसः । सार्धमन्ये नरा धीरा जिनधर्मं प्रपेदिरे ॥ ७ ॥

॥ इति श्रीजिनदत्तभार्याजिनदासीश्वश्रूशुद्धिकरणकथानकमिदम् ॥ ९० ॥

*

९१ महादेवीकथानकम् ।

विनीताख्यमहादेशे विषये परमा पुरी । अयोध्या धनसंकीर्णा सुरदत्तोऽस्ति महीपतिः ॥ १ ॥
शतानि पञ्च भार्याणां विद्यन्तेऽस्य महीपतेः । रूपयौवनयुक्तानां विपुलसुखसमन्विताम् ॥ २ ॥
तन्मध्येऽस्य महादेवी रूपयौवनगर्विता । चन्द्रलेखेव सत्कान्तिः सती नामाभवत् प्रिया ॥ ३ ॥
तदासक्तो राजकार्याणि हित्वा सर्वाण्यपि स्फुटम् । सर्वकालं स भूपालस्तिष्ठति प्रीतमानसः ॥ ४ ॥
अन्यदा मुनिसामीप्ये श्रुत्वा धर्ममनुत्तरम् । प्रतीहारं जगादेति भूपतिः पुरतः स्थितम् ॥ ५ ॥
आयाते राजकार्येण तथा साधुसमागमे । मम विज्ञापनं कुर्या नान्यथा यातु किंचिद् ध्रुवम् ॥ ६ ॥
एवं निगद्य तं राजा महादेव्या तया समम् । मानसेप्सन् महाभोगान् भुञ्जानो व्यवतिष्ठते ॥ ७ ॥
अन्यदा दमदत्तोऽपि तथा धर्मरुचिर्मुनिः । गत्वा मन्दरमामिन्या विवेश नृपमन्दिरम् ॥ ८ ॥
दृष्ट्वा साधुयुगं विष्टं भिक्षार्थं नृपमन्दिरम् । प्रतीहारो जगामाशु तदानीं नृपसंनिधिम् ॥ ९ ॥
तत्र सतीमहादेव्या विधाय मुखमण्डनम् । कुर्वन् कपाटपट्टे च रोचनातिलकं नृपः ॥ १० ॥
पूर्वादिष्टेन तेनापि प्रतीहारेण साधुना । भूयोभूयः प्रयत्नेन तदा विज्ञापितोऽधिकम् ॥ ११ ॥
प्रतिहारोदितं श्रुत्वा तूष्णीमास्ते महीपतिः । महादेवीभयेनापि मौनमादाय तस्थिवान् ॥ १२ ॥
मुहूर्तमेकमास्थाय प्राहेदं वसुधाधिपः । रे प्रतीहार वाचाट साधवः किं समागताः ॥ १३ ॥
यत्र विज्ञपितो मूढ नितान्तं मम सांप्रतम् । मण्डनं कुर्वतः सत्या महादेव्या प्रयत्नतः ॥ १४ ॥
भूपस्य वचनं श्रुत्वा प्रतीहारो जगाद ताम् । महाराजाय भिक्षार्थे त्वदर्थं प्राप्तौ मुनी ॥ १५ ॥
तपोधनावनागारौ धर्मचिन्ताव्यग्रमानसौ । समस्तरेण राजेन्द्र विज्ञप्तस्त्वं मया धृतौ ॥ १६ ॥
प्रतीहारवचः श्रुत्वा समुत्थाय नरेश्वरः । जगौ सतीं महादेवीं मण्डनासक्तमानसाम् ॥ १७ ॥
उत्कण्ठितां परां भद्रे मा गमिष्यसि वल्लभे । यावता शोभयामि रोचनातिलकं तव ॥ १८ ॥
तावदूनमहं मुग्धे भिक्षादानं प्रदाय च । साधुभ्यस्तूर्णमायामि तवाभ्यर्थं विवेकिनि ॥ १९ ॥
एवमुक्त्वा प्रियां राजा भक्तिहृष्टतनूरुहः । जगाम साधुसामीप्यं तदानोदयमानसः ॥ २० ॥
प्रतिग्रहः शुचिस्थानं चरणोदकपूजनम् । नतिर्मानसवाक्कायाहारशुद्धिः क्रमादिति ॥ २१ ॥
इमां दानविधिं कृत्वा साधुभ्यो भक्तितत्परः । ददत्याहारदानं स धर्मचिन्ताव्यग्रमानसः ॥ २२ ॥
दत्त्वा दानं सुसाधुभ्यो यावज्जज्ञे सादरः । सामीप्यं स महादेव्यास्तावत्प्राप्नोति वेगवान् ॥ २३ ॥
तावत्सतीमहादेव्या कुर्वती साधुनिन्दनम् । सद्यो विनाशमायातं शरीरं कुष्ठतोऽस्युतः ॥ २४ ॥
महादेवीतनुं दृष्ट्वा कुष्ठव्याप्तामनित्यताम् । रूपयौवनलक्ष्मीणां सांसारिकसुखस्य च ॥ २५ ॥
महावैराग्यमापाद्य सामन्तैर्बहुभिः सह । दीक्षां जग्राह भूपालः वीरसेनान्तिके मुदा ॥ २६ ॥
तत्र सती महादेवी कुष्ठव्याप्तशरीरिका । बभूव दीर्घसंसारा मुनिनिन्दाविधानतः ॥ २७ ॥

॥ इति श्रीसुरदत्तभूपतिभर्तृमहादेवीकथानकमिदम् ॥ ९१ ॥

*

1 अ °जिनदासीश्वश्रूविज्ञानकमिदम्, [illegible] पाक विप्यम् अ विद्यन्तमिदम्. 3 [अधिक]. 4 पाक कुष्ठम्, अ कुष्ठर्थमिदम्. 5 पाक कुष्ठम् अ कुष्ठर्थमिदम्. 6 पाक कुष्ठम् अ कुष्ठर्थमिदम्. 7 पाक [illegible], अ [illegible]मिदम्. 8 पाक कुष्ठम् अ कुष्ठर्थमिदम् 9 [°रैवा° कुरीत]. 10 पाक कुष्ठम अ कुष्ठम्

९२ त्रिविक्रमकथानकम् ।

तस्मिन्नेव पुरे विप्रो बभूवात्र त्रिविक्रमः । गच्छन् महावने भीमे व्याघ्रेणासौ विलोकितः ॥ १ ॥
धावन् व्याघ्रभयात् कक्षे वेपमानशरीरकः । पपात जीर्णकूपेऽसौ रज्जुहीनस्त्रिविक्रमः ॥ २ ॥
पतताऽनेन कूपेऽस्मिन् वेगिना पुण्डरीकवत् । गृहीतः पाणिना क्षिप्रं शरस्तम्बस्तटस्थितः ॥ ३ ॥
हस्तद्वयेन तं गाढं गृहीत्वा कूपमध्यगः । स नरो वेपमानोऽत्र लम्बमानोऽवतिष्ठते ॥ ४ ॥
व्याघ्रमात्रोऽपि संप्राप्तस्तटस्थो रसन् खरम् । तमलं च नरं तस्थौ स्पृशन् पादनखाङ्कुरैः ॥ ५ ॥
क्षमोऽस्ति तं नरं नायं ग्रहीतुं वल्गमानसि । तदानीं स शरस्तम्बश्चचाल पदयोगतः ॥ ६ ॥
तमस्तं मधुजालं च चलितं तत्तटाहतम् । तस्मिन् प्रचलिते तूर्णं चलितं सकलं मधु ॥ ७ ॥
चमूरं पश्यतस्तत्र तदूरसोर्ध्वचक्रकम् । मुखे पतति तद्बिन्दुरेकैको मधुरस्तदा ॥ ८ ॥
मधुबिन्दुं [1]पतन्तमास्वादयति वक्त्रगम् । सन्मक्षिकागणैस्तत्र खाद्यमानो वितिष्ठते ॥ ९ ॥
तन्मूलेऽपि सिता नूनं क्रियमाणेऽत्र मूषकैः । दिक्षु सर्वासु रक्तपाः सन्ति सर्पा भयानकाः ॥१०॥
पतितेऽपि पतद्रन्ते क्षुधिता स नरस्तदा । मधुबिन्दुसुखं दिव्यं मन्यमानो वितिष्ठते ॥ ११ ॥
एवं जीवनरो लोके मृत्युव्याघ्रेण भीषितः । भवार्णवकूपेऽस्मिन् पतितः स वितिष्ठते ॥ १२ ॥
स जीवितशरस्तम्बे लम्बमानः स भक्षितः । दुःखं माक्षिकसंख्यमाक्षिकध्वनिकैरसि ॥ १३ ॥
क्रोधमानाग्निमायादिविद्याभिर्वेष्टितात्मकः । गृहीतमरणे चार्तं नरकाजगरेण तु ॥ १४ ॥
पक्षिमाक्षिकसंसारं मन्यमानो नराधमः । परलोकसुखे दिव्ये निरपेक्षः प्रतिष्ठते ॥ १५ ॥[4]

॥ इति श्रीसंसारात्पसुखमधुमन्यमानत्रिविक्रमाख्यानकथानकमिदम्[5] ॥९२॥

*

९३ चारुदत्तकथानकम् ।

अङ्गकस्य जनान्तेऽस्ति चम्पाऽऽख्या नगरी परा । शूरसेनो नृपस्तस्यां सुषेणाऽस्य कामिनी ॥१॥
विद्यते तत्पुरश्रेष्ठी भानुनाम महाधनः । सुभद्रा कामिनी चास्य सुरदेवीसमप्रभा ॥ २ ॥
सा पुनः पुत्रहीना हि दुःखपीडितमानसा । सर्वदा पुत्रमिच्छन्ती[6] सुभद्राऽस्या वितिष्ठति ॥ ३ ॥
अन्यदा मन्दिरे जैने प्रोत्तुङ्गे स्थितया तया । एको विलोकितो योगी चारणस्तपसां निधिः ॥४॥
मुनिमत्र प्रणम्यैषा भक्तितः पुरतः स्थिता । जन्मन्यत्र सुतो नाथ विद्यते मे न वा वद ॥ ५ ॥
निशम्य वचनं तस्या जगादैतां यतीश्वरः । स्तोकैर्दिनैः प्रधानोऽयं नन्दनस्ते भविष्यति ॥ ६ ॥
कृत्वाऽऽदेशमिमं तस्या चित्तं मत्वाऽतिभक्तितः । जगाम स्वमतं साधुश्चारणः सुरवर्त्मना ॥ ७ ॥
ततो भानुसुभद्राभ्यां कालेन कियताऽपि च । सुतो मनोरमो जातश्चारुदत्ताभिधानकः ॥ ८ ॥
हरिसिंहस्तथा चान्यो मरुभूतिर्वराहकः । गोमुखः सन्ति चत्वारो वयस्यास्तस्य शोभनाः ॥ ९ ॥
रम्यैरेभिः समं क्वापि चारुदत्तो विनिर्गतः । पुलिने रत्नमाल्या हि पदमेकं ददर्श सः ॥ १० ॥
विलोक्येदं पदं तत्र जगादैतान् सुहृत्स्थितान् । पदमेतन्न सापत्नं विद्याधरपदं स्थिरम् ॥ ११ ॥
विज्ञाय तत्पदं सोऽपि सकलत्रोऽत्र खेचरः । विद्यते तत्समभ्यासे जगाम त्वरयाऽन्वितः ॥ १२ ॥
कदलीगृहसद्धामे कीलितं लोहकीलकैः । चारुदत्तो ददर्शैकं खेटं निश्चललोचनम् ॥ १३ ॥

1 पफ पतन्तमस्तद° 2 [पतन्तं तस्य°]. 3 क ब स्थिता. 4 पफ क्रमम् ज क्रममिदम्. 5 ज त्रिविक्रमाख्यानकमिदम्. 6 पफ सुखमिच्छन्ति.

दृष्ट्वा विषादपरं तत्र चारुदत्तो जगाविदम् । कुतो दुःखमिदं मित्र प्राप्तोऽसि साधु मे वद ॥ १४ ॥
श्रुत्वा तद्वचनं खेटो जगादेमं ससंभ्रमम् । लोहकीलानिमान् क्षिप्रमुत्पाट्य भद्रक ॥ १५ ॥
ततोऽत्र फलखण्डे च तिस्रो वीर्यसमन्विताः । ओषधीः पेषयस्वैता देहि मे व्रणगह्वरे ॥ १६ ॥
ततोऽपनीय तान् कीलान् चारुदत्तः कृपार्द्रधीः । पेषयित्वौषधीरेतास्तद्व्रणे प्रददौ तदा ॥ १७ ॥
एवं कृते समुत्थाय खेचरो मत्सरेन्धनः । स्फरं खड्गमादाय जगामाशु रिपोरन्तिकम् ॥ १८ ॥
निःशेषयन् समादाय सभार्यो परमादरे । चारुदत्तान्तिकं प्राप्य जगादेति स खेचरः ॥ १९ ॥
विजयार्धमहीध्रस्य दक्षिणस्यां दिशि स्थितम् । नभसः पत्तनं कान्तं विद्यते शिवमन्दिरम् ॥ २० ॥
विद्यते तत्र भूपालः कौशिको नाम विश्रुतः । अमितादिगतिस्तस्याहं मित्र नन्दनः ॥ २१ ॥
गौरमुण्डो मतः पूर्वो धूमसिंहसमाः परः । वयस्यौ द्वाविमौ स्यातां मम स्नेहपरायणौ ॥ २२ ॥
ताभ्यां सह विनीताभ्यां रममाणो निजेच्छया । नानातरुसमाकीर्णं हिमवन्तं पर्वतं गतः ॥ २३ ॥
हिरण्यरोमनामाऽस्ति तापसस्तत्र शोभनः । हिरण्यतापसी तस्य तत्सुता सुकुमारिका ॥ २४ ॥
दृष्ट्वा तां शोभनाकारां तनयां रतिविभ्रमाम् । मन्मथस्य शरैर्विद्धो मित्राहं गृहमागतः ॥ २५ ॥
मद्वयस्यैः पुनः सा च किंवदन्ती निवेदिता । मद्दुःखकारणोक्त्या भवनेभ्यो विषादिभिः ॥ २६ ॥
भवनैर्नृपतेर्वार्ता कथिता सा परिस्फुट्य । मह्यमित्थं वरा कन्या याचिता भूभुजा तदा ॥ २७ ॥
हिरण्यरोमकन्या सा नामतः सुकुमारिका । परिणीता मया मित्र तूर्यमङ्गलनिस्वनैः ॥ २८ ॥
रममाणोऽनया सार्धं विहर्तुं रम्यके भुवि । इमं प्रदेशमायातो रमणीयमनोज्ञके ॥ २९ ॥
समयन् धूमसिंहोऽपि मन्मित्रं हि दिवानिशम् । विप्रलीप्सन्मन्मथार्तो मत्प्रियां सुकुमारिकाम् ॥ ३० ॥
उद्यानेऽत्र मनःकान्ते क्रीडन्तं मां विलोक्य सः । अनया भार्यया सार्धं धूमसिंहो स्म ययौ ॥ ३१ ॥
कीलकैः कीलयित्वा मां कृपाणे पूर्ववैरिकः । धूमसिंहः समादाय मत्प्रियां स्वमतं ययौ ॥ ३२ ॥
इदानीं मोचितो मित्र त्वयाऽहं बन्धनादरम् । कोपेन तं परिप्राप्य प्रियामादाय चागतः ॥ ३३ ॥
सांप्रतं त्वं परं मित्र ततोऽहं तव सज्जन । आज्ञां देहि मे सारां ब्रूहि किं करवाणि ते ॥ ३४ ॥
विद्याधरवचः श्रुत्वा चारुदत्तो जगावमुम् । त्वद्दर्शनं हि मे दानं मित्र गृह्णामि नापरम् ॥ ३५ ॥
निशम्य तद्वचो दीनं खेचरः प्रीतमानसः । ययौ निजपुरं दक्षश्चारुदत्तविसर्जितः ॥ ३६ ॥
नानाशास्त्रकृताभ्यासो जिनधर्मपरायणः । चारुदत्तोऽपि संप्राप क्रमेण नवयौवनम् ॥ ३७ ॥
अथ सर्वार्थनामाऽभूच्चम्पायां पुरि वाणिजः । धनधान्यसमायुक्तः सुभद्राया सहोदरः ॥ ३८ ॥
बभूवास्य सुमित्राख्या रमणी लोललोचना । अनयो रूपसंपन्ना सुता मित्रवती परा ॥ ३९ ॥
मित्रवती सकन्येयं चारुदत्तेन सुन्दरी । परिणीता विधानेन तूर्यमङ्गलनिस्वनैः ॥ ४० ॥
ततोऽनया समं भोगान् भोक्तुं कामं च रूपया । महावैराग्यसंपन्नश्चारुदत्तो न वाञ्छति ॥ ४१ ॥
धर्मार्थकामरीतिज्ञः कलाविज्ञानकोविदः । शुभाशुभविचारैकमानसोऽयं विनिश्चयम् ॥ ४२ ॥
तस्यामेव धनाढ्यायां चम्पायां पुरि कुट्टिनी । आसीत् कलिङ्गसेनाख्या गणिका सार्ववत्सरा ॥ ४३ ॥
रूपयौवनसंपन्ना विशालायतलोचना । सुता वसन्तसेनाख्या बभूवास्याः कलस्वना ॥ ४४ ॥
द्यूतेन मद्यपानेन पुष्पताम्बूलयोगतः । विटगोष्ठीप्रसंगेन विविधाशनकेन च ॥ ४५ ॥
अनया सह सख्येन चित्तचोरणदक्षया । हावभावविलासिन्या विभ्रमान्वितयाऽपि च ॥ ४६ ॥
नूनं धारासमैर्वीर्यैश्चारुदत्तेन तत्पुरे । निष्काः षोडशकोट्योऽपि कनकस्य विनाशिताः ॥ ४७ ॥

1 [ओषधीः]. 2 ज धूमशिखम्, 3 पफ रुक्मम्, ज रुक्मगिरम्, 4 पफ निष्कम्, ज निष्कमितम्.

तथा समस्तवस्तूनि मित्रवत्या स्वयोपितः । आनीतानि नरैरस्याश्चारुदत्तनिदेशतः[1] ॥ ४८ ॥
मित्रवत्याः स्ववस्तूनि समस्तानि विलोक्य सा । जगौ कलिङ्गसेनेयं स्वसुतां पुरतः स्थिताम् ॥४९॥
निष्प्राप्तमयं पुत्रि चारुदत्तो धनोज्झितः । अधुना सधनः कोऽपि गृह्यतामत्र पत्तने ॥ ५० ॥
एवमुक्त्वा तया सा च वसन्ता धनगृद्धया । तत्प्रेमरागतः पुत्री चारुदत्तं न मुञ्चति ॥ ५१ ॥
भूयोऽपि सा सुतां प्राह चारुदत्तपरायणाम् । असत्कुलसमायाता शुभाङ्गि वचनं मम ॥ ५२ ॥[2]
त्वं पात्र विदग्धाऽसि मुग्धमाना तनूदरि । धनलोभपरित्यक्ता चासम्भ्रमपराङ्मुखी ॥ ५३ ॥
स नरो मतमोऽस्माकं दाता बहुधनस्तराम् । निर्धनस्तु परित्याज्यः कुलजोऽपि सुरूपवान् ॥ ५४ ॥
किं न दृष्टं त्वया भद्रे यथा गणिकागणिक्या । गृहीतरससर्वस्वा मुच्यते निस्त्विक्षुयन्त्रे ॥ ५५ ॥
एवमुक्ताऽपि सा पुत्री यदा मुञ्चति नादरम् । एकस्यां निशि तं गीतिरमाणकस्थापकैः ॥ ५६ ॥
कथामिश्र विविधाभिः प्रहेलिभिः समन्ततः । कृत्वा निश्चलं तत्र शय्यायां स्वपितं मुदा ॥ ५७ ॥
सुप्तैर्दासीभिः प्रयत्नेन मोचयामास चत्वरे । निद्रान्तेऽथ तया वीक्ष्य यातायातं जनं घनम् ॥ ५८ ॥
कृतस्य कर्मणः केऽप्यनुशयं च तदा बहु । मा स्म मृषा जनः कोऽपि मादृशो गतचेतनः ॥ ५९ ॥
वैनो मृत्वा च ईर्ष्यमाचारं कुरुते तराम् । दर्शयामीह लोकस्य कथमेतद् गतक्रियः ॥ ६० ॥
वक्र्मागृह पथेन जगाम स्वगृहं ततः । चारुदत्तो तदा माता पूर्वा पर्यङ्कस्य सादरम् ॥ ६१ ॥
विनष्टगृहविस्तारो मरणेन पितुस्तराम् । मातुः शोकेन मृतात्मा छुप्ताविष्टशरीरकः ॥ ६२ ॥
सार्थोऽपारसघातं सुवर्णमणिनिर्मितम् । समातुलः समादाय निर्गत्य निजमन्दिरात् ॥ ६३ ॥
उत्कलस्यमहादेशे गिरावर्तं पुरं महत् । चारुदत्तो वणिज्यार्थे जगाम धनसंकुलम् ॥ ६४ ॥[3]
गृहीत्वा तत्र कर्पासं बहुं बहुधनेन सः । सार्थेन सह सार्थेन स ययौ ताम्रलिप्तिकाम् ॥ ६५ ॥
अन्तरग्रामस्थितान्ते चारुदत्तस्य तस्य सम् । कर्पासः सकलो दग्धस्तदा वनदवाग्निना ॥ ६६ ॥
मातुलं तत्र हित्वाऽसावपमानात्स सत्वरम् । एकाकी प्रस्थितो गन्तुं तदा पौरन्दरीं दिशम् ॥ ६७ ॥
ततोऽपि गच्छंस्तत्रास कुहिम्ब्यां स तुरङ्गमः । प्रयातः पञ्चतां हित्वा तं हरिं स पदातिकः ॥ ६८ ॥
पारिवेस्वसामीप्ये विश्रम्य श्रमहानये । प्रियङ्गुनगरं प्राप चारुदत्तो मनोहरम् ॥ ६९ ॥
एकः सुरेन्द्रदत्तेन पितृमित्रेण तत्र च । नीतः स्वमन्दिरं सोऽपि सम्भ्रमान्वितचेतसा ॥ ७० ॥
दिनानि कतिचित् तत्र भुञ्जानो भोगसम्पदम् । ततो दुःखपरित्यक्तश्चारुदत्तः स्थितस्तदा ॥ ७१ ॥
ततः सुरेन्द्रदत्तेन प्रियमाणो धनाश्रमा । आरूढश्च सहानेन बोधिस्थे यमरायिते ॥ ७२ ॥
यवनाख्यं महाद्वीपं मनोनयनसुन्दरम् । भाजनसस्तुसमाकीर्णं चारुदत्तो ययावसुम् ॥ ७३ ॥[4]
द्वीपाद् द्वीपान्तरं गच्छन् पत्तनात् पत्तनान्तरम् । पर्यटन् विनौबोधिस्थ्यश्चारुदत्तो धनं च सः ॥७४॥
एकः सप्तवेलायामद्ये भग्नस्य बोधिकः । प्राप्य बोधिसमारोप्य समगो वारिधौ पुनः ॥ ७५ ॥
ततोऽसावायुषः शेषे बोधिस्थफलकं तदा । प्राप्य तस्मिन् समारुह्य सिन्धुसागरमध्यगो ॥ ७६ ॥
तत्र समुद्रमुत्तीर्य विपर्यं सिन्धुपूरकम् । अतिक्रम्य भ्रमन् प्राप पुरं राजपुरं स कः ॥ ७७ ॥
परिव्राड् विषदतेऽत्रैकस्तेन नीतो निजं गृहम् । स्थितवांश्चारुदत्तोऽपि तद्गृहे दिनपञ्चकम् ॥ ७८ ॥
अन्यदा तं परिव्राजो नीत्वैकान्ते जगाविदम् । रसकूपः पुरस्याग्रे विद्यतेऽतिरसान्वितः ॥ ७९ ॥
अतो रसं समादाय ते ददामि महामते । येन दारिद्र्यतो मुक्तः सुखं जीवसि बालकः[6] ॥ ८० ॥

1 पफ मित्रपित. 2 ब शुभाषितमिदं शृणु. 3 ब ततो. 4 पफ भिचरम्, ब निश्चमितम्. 5 पफ दुम्मम्, ब दुपक्षितम्. 6 [बालक].

अस्माकं तेन यो धर्मं सिद्धेनापि तपस्विनाम् । भवता पक्षपातेन यथेदं परिभाषितम् ॥ ८१ ॥[1]
परिव्राड्वचः श्रुत्वा धनलुब्धोऽभिनन्द्य तम् । जगाद निश्चितस्वान्तश्चारुदत्तः कुतूहली ॥ ८२ ॥
एवं कुरुष्व मे तात पितृकल्प गुणाकर । येनाहं त्वत्प्रसादेन जीवामि सकुटुम्बकः ॥ ८३ ॥
अन्यदा तं समादाय सद्वृत्तेन यथागतम् । भीमाटवीं विवेशाशु स परिव्राट् प्रपञ्चकः ॥ ८४ ॥
तस्यां न गमितुं येषां धातुवादरसान्वितम्[2] । महाविटपमार्गं च नानाश्वापदसङ्करम् ॥ ८५ ॥
कूपयन्त्रं सुधाकारं प्रमाणं चास्य भासुरम् । अधःपीडस्थसन्मार्गे धनविस्मयकारणम् ॥ ८६ ॥
इदं प्राप्य परिव्राट् तं समारोपितवाञ्छकः । एतद्रसस्थितं पुत्र कोटिवेधार्थसिद्धिकम् ॥ ८७ ॥
विद्यते स रसो यत्र सम्पन्नोत्साहसम्मतः । दारिद्र्यकन्दनिर्नाशो नराणां करमागतः ॥ ८८ ॥
अतः पुत्र विश क्षिप्रं निर्भयः प्रीतमानसः । चारुदत्तः प्रविश्येदं तीरमार्गं विविक्षते ॥ ८९ ॥
यावद्रसं स गृह्णाति तावत्तं स प्रतिपद्यति[3] । तावन्मनुष्यनादेन निषिद्धोऽयं रसं प्रति ॥ ९० ॥
श्रुत्वा तद्वचनं तत्र चारुदत्तो जगाद तम् । एनं त्वं मां रसं याचा कुतो वारयसि द्रुतम् ॥ ९१ ॥
महानुभावो यमायेदं मनुष्योऽत्र प्रवेशितः । कोऽसि त्वं वद मे भद्र रसमध्येऽमिमं स्थितः ॥ ९२ ॥
मनुष्य चारुदत्तोऽहं चम्पापुरवणिक्पतिः । रसार्थमत्र संविष्टः परिव्राजकशासनात् ॥ ९३ ॥
चारुदत्तवचः श्रुत्वा स नरो निजगाद तम् । यथा न जीवनं भद्र विहितं भवता भृशम् ॥ ९४ ॥
यत्परिव्राजकेनैव प्रविष्टोऽत्र रसाख्ये । एष धूर्तः शठः पापो महादुःखप्रदायकः ॥ ९५ ॥
अहं मायां समाश्रित्य श्रीमदुज्जयनीपुरः । यतोऽहं सिंहलद्वीपं वणिजो धनतृष्णया ॥ ९६ ॥
ततो निवर्तमानः सन् भिन्नपोतोऽभिवाहकः पुनः । क्रमेण पर्यटन् देशं प्राप्तो रत्नपुरं पुरम् ॥ ९७ ॥
पुत्र वा पालयित्वा मां दिनानि कतिचित्पुनः । भवाब्धौ दर्शयित्वा च विप्लुतस्तपस्विना ॥ ९८ ॥
रज्वा च शिक्यकं बद्ध्वा दत्त्वा हस्ते स तुम्बकम् । शिक्यके मां समारोप्य क्षिप्तोऽयं रसकूपके ॥ ९९ ॥
रसेन तुम्बकं भृत्वा मया चास्य समर्पितम् । रसमध्ये हि मां हित्वा गृहीत्वा तद्गृहं गतः ॥ १०० ॥
निक्षिप्तोऽहं यथान्येन रसमध्ये दुरात्मना । तथा नरसहस्राणि निक्षिप्तानि स्थानि च ॥ १०१ ॥
तेषां पवनराणां च रसकूपो भृतोऽस्थिभिः । सांप्रतं तव संप्राप्ता परिपाटी नरोत्तम ॥ १०२ ॥
रसतृष्णां निहायाशु सच्चतीर्थं रसप्लवे[4] । सुखेन जीवनं यातो कुर्वन्नत्र कतिचित्पुनः ॥ १०३ ॥
परिव्राट् ते रसं प्राप्य अवन्त्यामपि निश्चितम् । दुष्टचित्तो दुराचारो रसकूपे प्रमोक्ष्यति ॥ १०४ ॥
रसमध्येऽधुना क्षिप्तो नष्टोऽभितस्तकैतव । मरणं यास्यसि क्षिप्रं तस्मात् कुरु पथ्यभजनम् ॥ १०५ ॥[5]
निशम्य तद्वचः सत्यं परिणामहितं तराम् । चारुदत्तो यथावेदं मयवेक्षितविग्रहः ॥ १०६ ॥
इमं तपस्विनं दुष्टं नरमायधशोधनम् । प्राप्नोमि नियं येन सोपसर्गं करिष्यति ॥ १०७ ॥[6]
तेनेदं तुम्बकं भद्र रसपूर्णं प्रदेहि मे । येनोपायं विधास्यामि नूनमस्य पलायने ॥ १०८ ॥
तेन तद्वचनात्पूर्णं तुम्बकं रससंयुतम् । दत्तं कृपायता तस्मै सद्यः सचितमिच्छया ॥ १०९ ॥
तेनापि चारुदत्तेन सा वरत्राशु चालिता । रसतुम्बं समादाय स तपस्वी गृहं ययौ ॥ ११० ॥
प्रत्याख्यानं समादाय सावष्टम्भं स धीरधीः । स्मरन् हृदि तदा मत्वा शरणोपममङ्गलम् ॥ १११ ॥
कृत्वाञ्जलिपुटं के च समाधिमरणोद्यतः । चारुदत्तः सुखं तत्र तस्थौ सुस्थितमानसः ॥ ११२ ॥
यथोक्तश्चारुदत्तेन रसमध्यस्थितो नरः । यथा मम त्वया दत्तं पतितस्यात्र जीवनम् ॥ ११३ ॥

---

1 पफ निपमम्, ब निपमनिरम्. 2 पफ °रसान्वितः. 3 [प्रयोऽभिनिमि]. 4 [रसप्लवे].
5 पफ जम्बम्, ब जम्बमितम्. 6 पफ तुम्बम्, ब तुम्बमितम्. 7 पफ तुम्बम्, ब तुम्बम्.

तथाऽहमपि ते साधो पतितस्य महावटे । ददाम्युत्तरणोपायं धर्महस्तावलम्बनम् ॥ ११४ ॥
एवं निगद्य तं धीरो धर्मश्रवणमादरात् । चारुदत्तश्चकारास्य तद्गुणाकृष्टमानसः ॥ ११५ ॥
मित्र जीवोऽस्ति संसारे दुःखितः शरणोज्झितः । पापकर्मभराक्रान्तो धर्मबन्धुविवर्जितः ॥११६॥
नारकान्योन्यसंरम्भकृतदुःखेषु पापतः । नरकेषु प्रचण्डेषु जायते मित्र देहवान् ॥ ११७ ॥
अनुभूय चिरं कालं नानादुःखानि भूरिशः । नरकेभ्यस्तु निर्गत्य जीवस्तिर्यक्त्वमेति सः ॥ ११८ ॥
छेदनाद्भेदनात् तत्र भक्षणाद्वधतोऽपि च । दुःखमासादयन् देही मनुष्यत्वं प्रपद्यते ॥ ११९ ॥
दारिद्र्यशोकरोगेभ्यो धनापहरणात् तथा । इष्टवियोगतोऽनिष्टसंयोगाद्दुःखमाप्नुयात् ॥ १२० ॥
कथंचित् पुण्ययोगेन सुखं वा प्राप्य तत्र च । कषायाभावतो जीवो देवत्वं प्रतिपद्यते ॥ १२१ ॥
देवान्महर्द्धिकान् दृष्ट्वा तत्रापि स्वस्य हीनताम् । शोकं करोति देवोऽयं मित्र संसारवर्धनम् ॥१२२॥
चतुर्गतिकसंसारे नानादुःखसमाकुले । जीवो दुःखमवाप्नोति जिनधर्मं गृहाण भो ॥ १२३ ॥
जिनधर्मं विना मित्र स्वर्गमोक्षप्रदायकम् । चातुर्गतिकदुःखानि प्राप्स्यसि त्वं विमूढधीः ॥१२४॥
चारुदत्तोदितं श्रुत्वा रसमध्यस्थितो नरः । बभाषेदं प्रहृष्टात्मा रोमकण्टकिताङ्गकः ॥ १२५ ॥
स्वामिन्निहागतोऽसि त्वं पुण्येन मम चारुणा । उपदेशं प्रियं दिव्यं त्वं मम देहि साम्प्रतम् ॥१२६॥
निशम्य तद्वचः सारं चारुदत्तः कृपार्द्रधीः । सम्यक्त्वपूर्वकं दिव्यं जिनधर्मं सुखावहम् ॥ १२७ ॥
पञ्चाणुव्रतसंयुक्तं चतुःशिक्षाव्रतान्वितम् । गुणव्रतत्रिकायुक्तं मधुमांसादिवर्जनम् ॥ १२८ ॥
चतुर्विधाशनस्यैव शरीरादेः परिग्रहात् । यावज्जीवं ददौ तस्मै प्रत्याख्यानं नमस्कृतिम् ॥१२९॥
निशम्य चारुदत्तस्य वचनं प्रीतिवर्धनम् । बभाषेदं पुनस्तुष्टो रसमध्यस्थितो नरः ॥ १३० ॥
कल्याणमित्रतां प्राप्तो मम त्वं रसवासिनः । यत्त्वयोक्तमिदं स्वामिन् गृहीतं तन्मयाऽखिलम् ॥१३१॥
चारुदत्तः पुनः प्राह भूयोऽपीदं ससंभ्रमम् । मम भद्रास्मात् कूपान्निस्सरो जायते न वा ॥१३२॥
आकर्ण्य तद्वचो हृष्टं स नरो वदति स्म तम् । अस्ति निःसरणोपायो भवतोऽत्र परिस्फुटः ॥१३३॥
अस्त्यत्र हि गुहाद्वारे सुरङ्गमक्षुरप्रभा । गोधाऽन्यया समागत्य रसं पिबति सर्वदा ॥ १३४ ॥
आयात्यया रसं पातुं तस्याः कूलेऽत्र शोभने । करेण पुच्छमादाय निर्गमस्ते भविष्यति ॥ १३५ ॥
प्रपायाथ रसं गोधा सेव्यन्त्या कृतविभ्रमा । जगाम प्रीतचेतस्का मन्दं मन्दं निजालयम् ॥१३६॥
रसमध्यस्थितस्यास्य नरस्यासुखकारिणः । चारुदत्तः प्रकुर्वाणस्तस्थौ धर्मोपदेशनम् ॥ १३७ ॥
अन्येद्युश्चारुदत्तोऽस्मै दत्त्वा पञ्चनमस्कृतिम् । गोधायाः पुच्छमादाय निर्गतोऽत्र सुरङ्गया ॥१३८॥
यावद्विश्रम्य तद्गुल्मे चारुदत्तो भुवस्तले । तावन्मूर्छां परिप्राप्य चिरात् स प्राप चेतनाम् ॥१३९॥
दृष्ट्वाऽसौ भीषणाकारो चरन्तं वनसम्भवम् । मारणार्थं समायातस्तीक्ष्णशृङ्गोऽद्रिसंनिभः ॥ १४० ॥
दृष्ट्वा महिषमायातं भयवेपितविग्रहः । चारुदत्तः समारूढः समुत्तुङ्गं शिलातलम् ॥ १४१ ॥
यावच्छिलातलं सोऽपि विषाणाग्रेण दारुणः । भिनत्ति तावदागत्य गृहीतः शयुनाऽप्ययम् ॥१४२॥
यावत् प्रवर्तते युद्धमनयोः क्रूरचेतसोः । तावच्छिलातलादाशु निःसृतोऽत्र वनान्तरात् ॥ १४३ ॥
अथ मातुलमित्रेण रुद्रदत्तेन सादरम् । भयवेपितसर्वाङ्गश्चारुदत्तो विलोकितः ॥ १४४ ॥
रुद्रदत्तः समादाय चारुदत्तं प्रयत्नतः । स्तोकं मार्गं समुत्तीर्णः काण्डवेगां महानदीम् ॥ १४५ ॥
गिरिं टङ्कणनामानं तथा वेत्रवनं महत् । विषयं टङ्कणाभिख्यं प्रापतुस्तौ मुदाऽन्वितौ ॥ १४६ ॥

1 पफ पुष्पम्, ज पुच्छम्. 2 पफ कुरुम्, ज कुरुमीदम्. 3 पफ भिस्थम्, ज त्रिपक्षमीदम्. 4 पफ कूपनिस्सरो. 5 ज धुरा 6 पफ चतुष्कम्, ज चतुष्कमीदम्. 7 [चरन्तो वनसंभवः]. 8 ज महिषमायान्तं.

तत्रागतौ द्वौ समादाय धनेनारुह्य तौ तकम् । पर्वताग्रे समारूढौ तदा विस्मितमानसौ ॥ १४७ ॥
रुद्रदत्तस्ततोऽवोचच्चारुदत्तं ममोपरि । भद्रेमं छेलकं शीघ्रं निपातय ममाग्रतः ॥ १४८ ॥
श्रुत्वा तद्वचनं दध्यौ चारुदत्तः कृपार्द्रधीः । ममोपकारिणो नूनं न करोमि निपातनम् ॥१४९॥
मयाऽहिंसाव्रतं सारं गृहीतं गुरुसाक्षिकम् । ततो न हन्म्यहं छेलं मौनमादाय तस्थिवान् ॥१५०॥
रुद्रदत्तस्ततो यावत् छगार्थं निपातधीः । ममविहासमाकारां गृह्णाति करवालिकाम् ॥ १५१ ॥
तावद्धि चारुदत्तोऽपि सम्यक्त्वादिकमस्य च । समर्थं श्रावकं धर्मं ददौ पञ्चनमस्कृतिम् ॥१५२॥
अत्रान्तरे विनीतेन मन्त्रपेण्या पराक्रमः । रौद्रेण रुद्रदत्तेन छेलकोऽयं निपातितः ॥ १५३ ॥
सोऽप्यस्मै म्रियमाणाय छेलकाय मुहुर्मुहुः । कर्णजापं ददौ तत्र चारुदत्तो विशुद्धधीः ॥ १५४ ॥
छेलकः कालमासाद्य समाधिमरणेन सः । सौधर्मे धर्मसंपन्नो जातो देवो महर्द्धिकः ॥ १५५ ॥
अनेनैव विधानेन द्वितीयोऽपि समाधिना । छेलकः कालमासाद्य जातोऽयं विबुधो दिवि ॥१५६॥
रुद्रदत्तेन पापेन तयोरादाय चर्मणी । तन्मध्ये रुद्रदत्ते च प्रविष्टौ तौ धनाशया ॥ १५७ ॥
ततस्तौ मांसलोभेन तथा भेरुण्डपक्षिणः । आदाय पक्षविक्षेपै रत्नद्वीपं ययु जवात् ॥ १५८ ॥
भेरुण्डपक्षिणां तेषां गच्छतां कुर्वतां रणम् । चारुदत्तस्य या भस्त्रा पतिता सा शुभस्थले ॥१५९॥
निकृत्य चारुदत्तोऽपि करवाल्या समन्ततः । ततो निःसृत्य वेगेन पर्वताग्रमशिश्रियत् ॥१६०॥
आतापनस्थितं साधुं दृष्ट्वाऽसौ साधुचेष्टितम् । तस्यास्य समीपं जगामाशु भक्तिभरानतः ॥१६१॥
साधुनाऽपि ततः स्पष्टं भाषितोऽयं महात्मना । चारुदत्त यथाऽत्र ते कुशलं सार्वकालिकम् ॥१६२॥
श्रुत्वा मुनिवचः तस्मै चारुदत्तो जगाविदम् । नाथ दृष्टस्त्वया साधो सर्वं ब्रूहि मम स्फुटम् ॥१६३॥
निशम्य चारुदत्तोक्तमवादीत् स यतीश्वरः । चम्पोद्यानवने पूर्वं त्वयाऽहं प्रविलोकितः ॥ १६४ ॥
वृक्षाग्रे कीलितः कीलैर्दुष्टविद्याधरेण यः । त्वया प्रमोचितः सोऽहममितगतिः स्फुटम् ॥१६५॥
त्वन्मोचितः समुत्पत्य क्षणं पृष्ठेऽस्य वैरिणः । यावद्गच्छामि सोऽपि न गच्छति ममाग्रतः ॥१६६॥
दृष्ट्वा मां दूरतो वैरी विहाय मम सुन्दरीम् । कैलासाभिमुखं यातो वेपमानशरीरकः ॥ १६७ ॥
गृहीत्वा पत्नीं तस्मात् पद्मपत्रस्थितामिव । शिवमाससमासाद्य प्रयातो निजपत्तनम् ॥१६८॥
संवत्सरैर्विनिर्वेदे गीर्वाणस्यानुगामिना । स्वराज्ये स्थापितः पिता ततो येन प्रकुर्वता ॥ १६९ ॥
सुवर्णकुम्भसामीप्ये महावैराग्यसंगतः । प्रस्थितो गुरुमेतस्य बभूव श्रमणो महान् ॥ १७० ॥
समानकुलशीलाढ्ये रूपयौवनभूषिते । अभूतां मे महादेव्यौ कन्ये कमललोचने ॥ १७१ ॥
तन्मध्ये प्रथमा जाता सेनान्ता विजयादिका । तस्या गन्धर्वसेनाख्या तनयाऽभवदिष्टधीः ॥१७२॥
मनोरमा कनिष्ठा च मत्प्रिया श्रीमनोरमा । तस्याः प्रथमपुत्रोऽभूद् रूपी सिंहयशोऽभिधः ॥१७३॥
द्वितीयो मन्दनस्तस्याः सर्वलोकाभिनन्दनः । वराहोपपदो ग्रीवो बभूव गुणसागरः ॥ १७४ ॥
यावत्र धर्मसेनाख्या तनया पूर्ववर्णिता । विला लोके समस्ते सा गान्धर्वेण व्यवस्थिता ॥१७५॥
पुत्राय ज्यायसे राज्यं सिंहादियशसे निजम् । तथा वराहकण्ठाय युवराज्यं प्रदाय च ॥ १७६ ॥
हिरण्यकुम्भगुरोस्य गुणशीलतपोऽम्बुधेः । अन्ते सुवर्णकुम्भस्य तपो जैनमशिश्रियम् ॥ १७७ ॥
द्वीपः कुम्भकटो नाम विद्धि सर्वाश्रयं परः । लवणाम्भोधिमध्यस्थो भाति रत्नादिभूषितः ॥१७८॥
तस्य द्वीपस्य मध्यस्थः सुप्रसिद्धो गिरीन्द्रकः । राजतेऽयं सुगुप्ताख्यः कर्कोटकस्तो महीधरः ॥ १७९ ॥
यस्मिन्नहं समुत्तुङ्गे मनोहारिणि भूधरे । आतापनादियोगेन स्थितः कर्मविहानये ॥ १८० ॥

---

1 चफ कुम्भस्य, ज कुम्भस्य. 2 ज आतापनां 3 [रत्नद्वीपं].

देवचारणखेटौघान् विहायात्र मनःप्रिये । नान्येषां जातुचित् पुंसां मनसाऽपि समागमः ॥१८१॥
स पर्वतमिमं भद्र दुष्प्रापं कथमागतः । व्याघ्रसिंहेभशार्दूलचमूरादिभयानकम् ॥ १८२ ॥[1]
चारणोक्तं समाकर्ण्य चारुदत्तः स्वचेष्टितम् । [2]महाव्यसनसंयुक्तं जगादास्मै समस्तकम् ॥ १८३ ॥
अत्रान्तरे ससैन्येन विद्याधरकुमारकः । वन्दनार्थं मुनेः प्राप्तो भक्तिनिर्भरमानसः ॥ १८४ ॥
ततो विलोक्य तं तत्र खेटः सिंहयशा नरम् । बभाण विस्मितस्वान्तस्तोषविस्फारितेक्षणः ॥१८५॥
भ्रातस्त्वं चारुदत्तोऽसि नितान्तं चारुचेष्टितः । मत्पितुर्जीवितं दत्तं येन रम्भाग्रहान्तिके ॥१८६॥[3]
खेचरस्य वचः श्रुत्वा जगादेन सकौतुकम् । भणामि चारुदत्तोऽहं विद्याधरकुमारक ॥ १८७ ॥
अयोरस्य महास्नेहात् तदा तौ द्वावपि द्रुतम् । इच्छाकारं विधायात्र ददतुः क्षेममादरात् ॥१८८॥
निविश्य तौ पुनर्भूमौ तोषविस्फारितेक्षणौ । तस्थतुः सकथासंगसुखसंसक्तमानसौ ॥ १८९ ॥
अत्रान्तरे च छागोऽपि विमानस्थः सुरोत्तमः । आखण्डल इवायातस्तं प्रदेशं विस्फुरच्छवी ॥ १९० ॥
तन्मध्ये चारुदत्तं स त्रिःपरीत्य सुभक्तितः । ननाम चरणावस्य गीर्वाणः प्रीतमानसः ॥ १९१ ॥
पश्चान्मुनिं प्रणम्यायं कृताञ्जलिपुटः सुरः । सन्मुखं चारुदत्तस्य चोपविष्टः ससंभ्रमम् ॥ १९२ ॥
दृष्ट्वा सुरं पुरस्तस्य तदा सिंहयशाः पुनः । मनसा दुःखितो भूत्वा जगाद विबुधं सकः ॥ १९३ ॥
उत्तमान्वयजातानां हारकुण्डलधारिणाम् । किं देवानां क्रमो भद्र जायते ईदृशो दिवि ॥ १९४ ॥
जिनेन्द्रभवनं साधुं विहाय प्रथमं सुरः[4] । प्रणामं क्रियते साधो श्रावकस्य ततो मुनेः ॥ १९५ ॥[5]
श्रुत्वा वैद्याधरं वाक्यं जगाद विबुधोऽपि तम् । आकर्ण्यैकचित्तेन कारणं चात्र खेचर ॥१९६॥
सर्वज्ञानर्हतो मुक्त्वा वीतरागान् दिगम्बरान् । अस्माकं विद्यते नान्यो देवः खेचरपुङ्गव[6] ॥१९७॥
अन्येषां देवसंघानां मनोवाक्कायकर्मभिः । प्रणामं न वयं कुर्मो विज्ञातपरमार्थकाः ॥ १९८ ॥
किंत्वहं भोत्रिके विप्र सचेतो मत्स्यवत्स्थितः । संसारदुःखसंतप्तश्चारुदत्तं समाश्रितः ॥ १९९ ॥
जिनवाक्यामृताधारकर्णजापः सुखप्रदः । दत्तो मे चारुदत्तेन म्रियमाणाय साधुना ॥ २०० ॥
तेन तत्कर्णजापेन समाराधनदायिना[7] । मृत्वा समाधिना खेन्द्रदेवो[8] जातो महर्द्धिकः ॥ २०१ ॥
जिनधर्मो मया खेट प्राप्तोऽयं चारुदत्ततः । विज्ञातो मुनिसंघोऽपि श्रुतं जिनवरोदितम् ॥ २०२ ॥
धर्माचार्यमिमं पूर्वं चारुदत्तं हितप्रदम् । वन्दित्वा चरमं तेन मया साधुः प्रवन्दितः ॥ २०३ ॥[9]
देवं वचनमाकर्ण्य विस्मयव्याप्तमानसः । पप्रच्छेदं सुरं हृष्टः खेचरो रूपराजितम् ॥ २०४ ॥
अकृत्रिमस्य वेदस्य विधिना वधितः कथम् । कथं वा चारुदत्तोऽयं धर्माचार्योऽभवत्तव ॥२०५॥
तिरश्चत्वमिमं देव संदेहं मेऽधुना वद । येनाहं वीतसंदेहो भवामि त्वत्प्रसादतः ॥ २०६ ॥[10]
निशम्य खेचरं वाक्यं गीर्वाणः प्रीतमानसः । यत्पूर्ववृत्तमाख्यानं जगादास्मै मनोरमम् ॥ २०७ ॥
काशीजनपदे रम्ये वाराणस्यां पुरि स्फुटम् । सोमशर्माऽभवद् भट्टः सोमिल्या[11] चास्य गेहिनी ॥२०८॥
अनयो रूपसंपन्ने द्वे सुते भवतः परे । ज्येष्ठा भद्रा कनिष्ठा च सुलसा नाम विश्रुता ॥ २०९ ॥
साङ्गोपाङ्गसमायुक्तवेदराद्धान्तपारगे । परिव्राजकतां प्राप्ते कुमार्यौ चारुचेष्टिते ॥ २१० ॥
पाण्डित्यमदसंपन्ना ताभ्यां सर्वेऽपि वादिनः । निरुत्तराः कृता धीम व्यजनमत्सरोत्कटा ॥२११॥
अथ वादनिमित्तेन वाणारस्यां प्रयुयत्स । ततस्ते द्वे परिव्राजे याज्ञवल्क्यसमीप्यताम् ॥ २१२ ॥[12]

1 पफ दुष्करम्, ज दुष्करमिदम्. 2 ज महाव्यसनं 3 पफ सुगमम्, ज सुगमम्. 4 [सुर]. 5 पफ निश्चयम्, ज निश्चयमिदम्. 6 पफ 'पुङ्गव 7 प has a correction 'दायिना. 8 पज देवः. 9 पफ दुष्करम् ज दुष्करमिदम्. 10 पफ निश्चयम्, ज निश्चयमिदम्. 11 पफ सोमिला. 12 पफ चकारः

ततः सुलसया तत्र प्रतिज्ञेयं कृता तदा । यो मां जेष्यति वादेन तस्याहं रमणी भवे ॥ २१३ ॥
महाप्रचण्डवादेन बधिरीकुर्वता नभः । धरणीमपि निःशेषां दत्तेयं घोषणा तथा ॥ २१४ ॥
ततः सा सुलसा तेन याज्ञवल्क्येन सत्वरं । वादेन निर्जिता नूनं पण्डितामर्त्यकारिणा ॥ २१५ ॥
नवयौवनसंपन्ना दिव्यरूपधरी सका । शुश्रूषाकारिणी भार्या विहिता तेन तत्क्षणात् ॥ २१६ ॥
वाणारसीपुराभ्याशे नानावृक्षविराजिते । रम्यारामो भूप्रदेशः समभूमिव्यवस्थितः ॥ २१७ ॥
परस्परसुखासंगतोपनिर्मीलितेक्षणौ । तदा तौ दम्पती तत्र तस्थतुः स्थिरमानसौ ॥ २१८ ॥
कालेन बहुना तत्र भुञ्जाना तत्समं सुखम् । अजीजनत् सुतं दिव्यं सुलसा भयमोहिता ॥ २१९ ॥
जातमात्रं सुतं बालं पिप्पलाधो विहाय तम् । जगाम सुलसा क्वापि विषादसममानसा ॥ २२० ॥
श्रुत्वा वृत्तान्तमीदृक्षं भद्रा जनमुखादिदम् । आजगाम तमुद्देशं बालाभ्यासितमादरात् ॥ २२१ ॥
पिप्पलाधः स्थितं बालं बालं तत्फलभोजिनम् । भद्रा ददर्श सा तत्र भद्रभावा प्रियंवदा ॥ २२२ ॥
पैप्पलादं विधायास्य नाम बालस्य तं पुनः । संप्राप्य स्वपुरं भद्रा वर्धयन्ती स्थिता गृहे ॥ २२३ ॥
क्रमेण यौवनं प्राप्य सर्वलोकमनोरमम् । वेदवेदाङ्गशास्त्रज्ञः पिप्पलादो बभूव सः ॥ २२४ ॥
सर्वज्ञप्रियविप्राणां परमात्मेव भूतले । पूजनीयः कलाधारो वन्दनीयस्तरां सकः ॥ २२५ ॥
अथैकदिवसे भद्रां पिप्पलादः प्रपृच्छति । अम्ब माता पिता कासौ वर्तेते मेऽधुना क्व ॥ २२६ ॥
निशम्य तद्वचो भद्रा ब्रवीति स्म तमादरात् । याज्ञवल्क्यः पिता भद्र सुलसा जननी तव ॥ २२७ ॥
जातमात्रस्तया पुत्र पिप्पलाधो निपातितः । तस्मान्मया समानीतस्त्वं वृद्धिं प्रापितः पुनः ॥ २२८ ॥[1]
भद्रावचनमाकर्ण्य मातृपितृसमुद्भवम् । पिप्पलादो वरं प्राप्य वाराणसीं स्थिरं ययौ ॥ २२९ ॥
याज्ञवल्क्यः पिताऽनेन तदानीं बुधसंसदि[2] । वादेन साधुवादेन पिप्पलादेन निर्जितः ॥ २३० ॥
कृतेऽप्यस्य समं प्रीतिर्याज्ञवल्क्येन भद्रया । पिप्पलादः तथाऽप्याभ्यां चित्ते वैरं न मुञ्चति ॥ २३१ ॥
कियत्यपि गते काले स्वपार्श्वे स्थाप्यान्वितः । पितृमेधं मखं चक्रे मातृमेधं च तत्सुतः ॥ २३२ ॥
ध्यानेन तन्मखे हत्वा पितरं याज्ञवल्क्यकम् । मातरं सुलसां चापि पिप्पलादः सुखं स्थितः ॥ २३३ ॥
शिष्योऽहं पिप्पलादस्य वाग्बलिनाम खेचर । पूजितः सर्वलोकेन वन्दितश्च सुभक्तितः ॥ २३४ ॥
षडङ्गवेदवेदाङ्गसमस्तसमये बुधः । कलाविज्ञानसंपन्नः संजातः परमोदयः ॥ २३५ ॥
ततो देवप्रिय सार्धं सिंहकीर्ते गुणाकर । महानुभावतोऽसेवि[3] सर्वलोकमनोरम ॥ २३६ ॥
जातोऽस्मि पूर्वं सार्धं मन्दभाग्यस्य मे पुनः । इयं बुद्धिः समुत्पन्ना खेट कर्मानुयायकः ॥ २३७ ॥
पशुयागविशेषे हि स्वर्गकामो नरोत्तमः । वेदवाक्यमिदं शुद्धं कर्तृत्वपरिवर्जितम् ॥ २३८ ॥
निर्मलं भासितालोकं चूडामणिरिव क्षितौ । समस्तमतशास्त्राणामुपरीव व्यवस्थितम् ॥ २३९ ॥
इदं शुद्धं न चान्यं हि विद्यते भुवनेऽखिले । फलाफलविसंवादि मन्यमानो ततोऽस्मरम् ॥ २४० ॥
भूतग्रामवधः पूर्वं सर्वजन्तुहितः कृतः । अस्माभिर्लोकविख्यातैर्जनविस्मयकारिभिः ॥ २४१ ॥
अग्निहोत्रं विधायाशु पश्चात्तं च स मां प्रति । कृतः कारापितो यज्ञो मया यश्चानुमोदितः ॥ २४२ ॥
नानापशुवधं कृत्वा महामतिपरायणः । ततोऽहं खेट संप्राप्तो नरकं घोरवेदनम् ॥ २४३ ॥
तत्र नानाविधां पीडां अनुभूय कथंचन । ततो निर्गत्य संजातस्तेजःकायोऽसुपर्ययैः ॥ २४४ ॥
ततो शुभत्वमासाद्य सद्योऽल्पपुण्यान्वितः । विप्राणां यायजोऽन्योऽहं संजातः खेचरेश्वर ॥ २४५ ॥
ततोऽहं पुण्यवत्सीरसूचितः सोमशर्मणा । नीतो महासिद्धिं खेट नानाजीवसमाकुलम् ॥ २४६ ॥

1 पफ कुसुमम् ख कुसुमितम्, 2 पफ कन्युवंशी 3 ख मानवीयैं

मखे निहन्यमानेन मया वेपनकारिणा । सोमशर्मा धनाढ्यश्चेदं प्रोक्तः सभाषया ॥ २४७ ॥

नाहं स्वर्गफलोपभोगतृषितो नाभ्यर्थितस्त्वं मया
संतुष्टस्तृणभक्षणेन सततं साधो न युक्तं तव ।
स्वर्गं गन्तुमभीप्सिता यदि भवेद् वेदे च सत्या श्रुतिः
यूपे किं न करोषि मातृपितृभिर्दारान् सुतान् बान्धवान् ॥ २४८ ॥

यूपादानीतमेकं सरसकिसलयग्रासमात्रोपभोग्यं
मुग्धं यूपेन बद्धं भयचकितदृशं कम्पमानं वराकम् ।
मे मेति व्याहरन्तं पशुमितिनिमर्संनिभतां याज्ञिकानां
मन्ये वज्रातिरेकं न दलति हृदयं तत्क्षणादेव तेषाम् ॥ २४९ ॥

निशम्य तद्वचो विप्रो विस्मयव्याप्तमानसः । क्षणं पठति वेदोक्तं स्तम्भमुद्दिश्य भक्तितः ॥२५०॥
सम माता समं भ्राता सम पिता समं सुतैः । समं बन्धुसमूहेन त्वं नाकं यास्यसि स्फुटम् ॥२५१॥
आप्यायतां मनस्तेऽङ्गं वक्त्रमाप्यायतां तव । स्पर्शमाप्यायतां तेऽत्र जिह्वामाप्यायतां तव ॥२५२॥
चक्षुराप्यायतां तेऽत्र श्रोत्रमाप्यायतां तव । यत्ते क्रोडं स्थितं साधु मृते चाप्यायतां पशो ॥२५३॥
एवं क्षणं समुद्घुष्य हतोऽहं सोमशर्मणा । अहं मृतोऽस्मि संजातश्छेलकः खेटनायक ॥२५४॥
एवं मृतोऽपि संजातस्ततो वारचतुष्टयम् । निहतोऽनेन विप्रेण मखे ब्राह्मणपूजिते ॥ २५५ ॥
मृतः सन्नस्मिन्नेवार्या विषये टङ्कणाभिधे । जातोऽहं छेलकः खेट स्वकर्मवशचोदितः ॥ २५६ ॥
मृतोऽहं रुद्रदत्तेन चारुदत्तनिमित्तकम् । मारणार्थं समानीतो द्वीपान्तरगमं प्रति ॥ २५७ ॥
सर्वजीवदयायुक्तो भावितोऽयं मयाऽखिलः । जिनधर्मः सम्यक्त्वं चारुदत्तेन भाषितः ॥ २५८ ॥
रुद्रदत्तान्मृतिं प्राप्य तेन धर्मेण खेचर । जातो महर्द्धिको देवो कल्पे सौधर्मनामनि ॥ २५९ ॥
ततोऽवधिं समासाद्य चारुदत्तान्तिकं क्षणात् । विद्याधर समायातः स्वगुरुं वन्दितुं विभुम् ॥२६०॥
यस्मिन्दिवस हि वेदेन कारणेनामुना मम । धर्माचार्यो महाख्यातश्चारुदत्तः सुहृत्परम् ॥ २६१ ॥
प्रथमं तेन वन्दित्वा धर्माचार्यमिमं पुनः । नमस्कारः कृतोऽस्माभिर्मुनेरस्य सुरेश्वर ॥ २६२ ॥
देववाक्यं समाकर्ण्य तोषकम्पितविग्रहः । यथार्थेति सुरं खेटः सर्वविद्याधराधिपः ॥ २६३ ॥
न केवलमसौ ख्यातो धर्माचार्यस्तव प्रभो । चारुदत्तोऽमुना दत्तं जीवितं भवितुस्त्वया ॥ २६४ ॥
अत्रान्तरे सुरः प्राह चारुदत्तं मुदाऽन्वितः । भवन्तं पूजयित्वेह प्रापयामि निजं पुरम् ॥२६५॥
गीर्वाणवचनं श्रुत्वा महाप्रेमविधायकम् । चारुदत्तो जगादेदं विनयात् पुरतः स्थितम् ॥ २६६ ॥
चारुत्वं तावदयं भद्र यतो हि भवदन्तिके । यदेदं याचयिष्ये त्वां तदा देयो मम त्वया ॥२६७॥
निशम्य तद्वचः साधुं चारुदत्तं च भक्तितः । अनुक्रमेण वन्दित्वा ययौ देवो निजालयम् ॥२६८॥
खेचरश्चारुदत्तेन सह गत्वा यतीश्वरम् । विद्याधरपुरं प्राप पताकावलिराजितम् ॥ २६९ ॥
कियत्स्वपि गते काले तत्पुरे सुखतोऽनयोः । अन्योन्यप्रेमसंसक्तस्थिरमानसयोस्तयोः ॥ २७० ॥
सुरूपं समाहूय सम ग धर्मसेनया । माता गन्धर्वसेनायाश्चारुदत्तं जगादिदम् ॥ २७१ ॥
भर्तृविचारणं साधुं प्रष्टवान् ज्ञानसंगतम् । पतिर्गन्धर्वसेनाया भविष्यति मुनीन्द्र कः ॥ २७२ ॥
श्रुत्वा तदीयसद्वाक्यं चतुर्ज्ञानसमन्वितः । चारणोऽपि जगादेदं गिराऽमृतमुचा स्फुटम् ॥२७३॥

---

1 [°मृषिमिर्दं]. 2 चक याशर्मा 3 चक सुकेचर. 4 चक सुकम्प ज सुकम्पितद. 5 चक सुमय, ज सुवत्म. 6 [वरं]. 7 चक सुमय, ज सुयम.

अर्धचक्रिपिता दिव्यो यो भविष्यति धीरधीः । महाप्रतापसंपन्नो यादवाम्बरचन्द्रमाः ॥ २७४ ॥
सुतां गान्धर्वसेनाख्यां चारुदत्तगृहस्थिताम् । वाद्यमन्यर्थयोगेन मधुरेण विजेष्यते ॥ २७५ ॥
चारणोक्तमिदं वाक्यं मया ते विनिवेदितम् । यत्तुभ्यं रोचते पुत्र तदेव कुरु सांप्रतम् ॥२७६॥[1]
श्रुत्वा स्वजननीवाक्यं सुतः सिंहयशोऽभिधः[2] । महाविद्याधराधीशो बभूव प्रीतमानसः ॥ २७७ ॥
कनत्कनककर्पूर[3] स्फटिकद्रविणोत्करम् । धारानिकरसत्कान्तिमुक्तादामविराजितम् ॥ २७८ ॥
चन्द्रकान्तविनिर्माणं पद्मरागविशोभितम् । शुद्धादर्शसंपन्नं वैजयन्तीविचित्रितम् ॥ २७९ ॥
एवंविधमहामानं विमानं हंससंयुतम् । विद्याधरैस्समानीतं तदा सिंहयशोऽन्तिके ॥ २८० ॥
पञ्चवर्णानि रत्नानि बहुमूल्यानि काञ्चनम् । मुक्ताप्रवालरूप्याणि विद्रुमेणाधिकेनकम्[3] ॥ २८१ ॥
एकीकृत्य तथा सर्वसारवस्तुसमुच्चयम् । देवाभ्यां रत्ननिधिभिः[4] पूरितं सरसारव[5] ॥ २८२ ॥[6]
चारुदत्तं समारोप्य समं गान्धर्वसेनया । तस्मिन् विमाने महामाने सानुरागं समङ्गलम् ॥ २८३ ॥
महातूर्यनिनादेन बधिरीकृतदिङ्मुखम् । बन्दिवृन्दारकौघेन कलनादविभाविना ॥ २८४ ॥
चतुरङ्गेन सैन्येन तदा चम्पापुरीमसौ । प्रापयामास युगपद् विद्याधरकुलोत्सवम् ॥ २८५ ॥[6]
मणीचनिचिते स्थाप्य चारुदत्तं स्वमन्दिरे । गान्धर्वसेनया सार्धं शौर्यमङ्गलनिस्वने[7] ॥ २८६ ॥
समस्तभूपपौरादिस्वजनवनसाक्षिकम् । सिंहासनस्थितं तत्र पूजयामास खेचरः ॥ २८७ ॥
धन बहु प्रदायोच्चैश्चारुदत्ताय सादरम् । ददौ गान्धर्वसेनायै तथा मानसवाञ्छितम् ॥ २८८ ॥
कृत्वा संमाषणं स्निग्धं प्रश्नस्य च कुशलोचितम् । भक्तिपूर्वं समापृच्छ्य मान्याङ्गनामसैवयो[8] ॥२८९॥
विमानं दिव्यमारुह्य समं खेचरसेनया । तदा सिंहयशाः खेटः स ययौ निजपत्तने ॥ २९० ॥
चारुदत्तं समालोक्य विद्याधरसुपूजितम् । नृपाद्यखिलवाः सर्वस्तुतोष बहुविस्मयः ॥ २९१ ॥
चारुदत्तनिभुक्तम् कुर्वन् बन्धुकुलप्रतताम् । मुदं परं सुखं तस्थौ सुनासीरो यथा दिवि ॥ २९२ ॥
यथाज्ञातपरमेतास्या कुर्वन् सुखं यथाय वात् । स्वाम्यानिभुक्त्या पर्वलक्ष्म्या सरसि चारिव ॥२९३॥

—अग्रे पृष्ठे[9] लिखितमस्ति[10] —

क्षिप्यतेन प्रधानोऽस्य सुग्रीवाख्यस्य मन्दिरे । दिनानि कानिचित्तस्थौ वसुदेवो मुदान्वित ॥२९४॥
अन्येद्युश्चारुदत्तस्य महाविभवशालिनः । जगाम मन्दिरं तुष्टो वसुदेव सलीलया ॥ २९५ ॥
सुघोषवीणया तत्र कुर्वन् गान्धर्वमुत्तमम् । जित्वा गान्धर्वसेनां च वसुदेवोऽत्यशिक्षत ॥ २९६ ॥
चारुदत्तस्ततः कन्यां वसुदेवाय धीमते । ददौ गान्धर्वसेनाख्यां चारणादेशतक्रमात् ॥ २९७ ॥
ततो विवाहकाले च गोत्रं कुलमजानता । विप्रेण वसुदेवोऽयं पृष्टः सदिक्षकारिणा ॥ २९८ ॥
भवा भो कस्य वर्णस्य होतव्यो विधिना शिखी । भवत्सुचीर्यं सेतुस्य पश्यति स जिनालयम् ॥२९९॥
वासुपूज्यजिनं नत्वा कृत्वा सामायिकं ततः । प्रातरापृच्छ्यदेवं च विप्र पूजार्थमागतम् ॥ ३० ॥
केयं पुरी कुतो धीर्या[8] दृश्यते सकलो जन । सद्यान्यतोऽखिलं ज्ञात्वा प्रबन्धं कन्यकेप्सया ॥३०१॥
चम्पान्व प्राविशत् सद्य उपाध्यायस्य वेश्मनि । चमिताय निवेद्यैव गान्धर्व्यां दिनव्रतम् ॥३ २॥
वीणामपरस्पर्धिन्यां सम्पर्णसद्गुणया[8] । देवोऽज्ञोऽयं पुरी चम्पा स्यात्तेषा क्षितिमण्डले ॥३०३॥

1 चफ मद्गुरुकम्, ज मद्गुरुकमीरम्. 2 ज °भिधीर्ध. 3 चफ कुसुमम्, ज कुसुमभिरम्. 4 चफ कुसुमम्, ज कुसुमभिरम्. 5 चफ कुसुमम् ज कुसुमभिरम् 6 चफ विरचम् ज विरचमभिरम्. 7 [शौ]. 8 All the three Mss. add this phrase. Some portion is irregularly misplaced here. After No. 293 the lines may be better arranged thus: 299b–300a, & 300b–301a, 303b–304a 304b–305a, 305b–306a & 306b–307a, 301b–302a, 302b–303a. The remaining lines get adjusted. 9 [पृष्ठे]. 10 [अग्रे लिखितम्].

वेत्सि भद्र न किं नूनं पातितोऽसि[1] नभस्तलात् । विप्र यक्षकुमारीभ्यां रूपलोभाद्गतो दिवि ॥२०४॥
परस्परं च कलहो विप्रोऽसि सरसि द्रुतम् । हसन् प्राह विप्रोऽस्यां चारुदत्तो महाधनः ॥२०५॥
अस्ति श्रेष्ठी गृहे तस्य कन्या गन्धर्वसेनका । वीणावाद्यविदग्धस्य वरस्य कृतसंगरा ॥ २०६ ॥
तस्यै मिलितो लोकः कृताभ्यासः कुतूहली । सांप्रतं वद येनाशु विवाहः क्रियते तव ॥ २०७ ॥[2]
ब्राह्मणोक्तं समाकर्ण्य वसुदेवो नराधिपः । सुकण्ठं जगादेमं मन्दरस्थिरमानसः ॥ २०८ ॥
येनेच्छसि विधानेन ब्राह्मणस्य महामते । तेनैव विधिना नूनमग्निहोत्रं द्रुतं[3] कुरु ॥ २०९ ॥[4]
वसुदेवोदितेनालं विधायास कुलादिकम् । अग्निहोत्रं चकाराय तदा वठविधानतः ॥ २१० ॥
एवं कृतेऽमुना तत्र तूर्यमङ्गलनिस्वने । कन्यां गान्धर्वसेनाख्यामुवाहाय नराधिपः ॥ २११ ॥
विवाहं प्रवरं साधु समं गान्धर्वसेनया । वसुदेवः प्रभुञ्जानो भोगांस्तिष्ठति शोभनम् ॥ २१२ ॥
अत्रान्तरे सुवृत्तान्तं चारुदत्तोऽखिलं परम्[5] । तथा गान्धर्वसेनाया जगादास्य महीपतेः ॥ २१३ ॥
चारुदत्तोदितेनात्र ज्ञात्वा खेचरकन्यकाम् । भूयो गान्धर्वसेनां स तस्थौ मुदितमानसः ॥ २१४ ॥
चारुदत्तश्चिरं भुक्त्वा भोगान् भोगीन्द्रसंनिभान् । दीक्षामादाय जैनेन्द्रीं जगाम त्रिदशालयम् ॥२१५॥

॥ इति श्रीचारुदत्तकथानकमिदम् ॥ ९३ ॥

*

९४ शकटमुनिकथानकम् ।

विषये वत्सकावत्यां कौशाम्बी नगरी वरा । अस्यां दन्तपरित्यक्तः शकटाख्योऽभवन् मुनिः ॥१॥
भिक्षार्थं स मुनिर्विष्टश्चर्यामार्गेण तत्पुरे । अनुक्रमविधानेन गृहपंक्त्या परिभ्रमन् ॥ २ ॥
दृष्ट्वा शून्यकुटीकोष्ठं मार्गखिन्नशरीरकः । प्रविश्य तद्गृहं साधुरुपविष्टः स कोष्ठके ॥ ३ ॥
उपविष्टं परिश्रान्तं मुनिं स्वगृहकोष्ठके । अन्यवेश्म समायाता परोपकारिणी[6] ॥ ४ ॥
दन्तहीना वरं वृद्धा जयनीनाम विप्रती । अतर्पयत् करक्षेन शकटाख्यमिमं तदा ॥ ५ ॥[7]
विधाय भोजनं साधुरुपविष्टः स कोष्ठके । पूर्वोक्तवृद्धया पृष्टस्तदन्ते स्थितया तया ॥ ६ ॥
भगवन् केन कार्येण प्रव्रजितोऽसि शोभन[8] । दुर्धरामीदृशीं चर्यां साधो वद ममाधुना ॥ ७ ॥
श्रुत्वा तद्वचनं योगी बभाषेवां पुरःस्थिताम् । दीक्षाकारणं भद्रे शृणु त्वं सुसमाहिता ॥ ८ ॥
अस्यामेव च कौशाम्ब्यां सोमशर्मा द्विजोऽभवत् । वेदवेदाङ्गसंयुक्तः काश्यपी तत्प्रिया वरा ॥ ९ ॥
तत्सुतः सागराख्योऽहं चतुर्वेदकृतश्रमः । नानाशास्त्रकृताभ्यासो मनीषी गणवत्तमः ॥ १० ॥
मन्मातुलसुतया सार्धं सापि वीवाहमङ्गले[10] । क्रियमाणेऽपि सल्लोकैः समता न मया सह ॥ ११ ॥
मातुलस्य सुताऽन्यैव रोहिणी नाम विश्रुता । मम वृत्तं तया सार्धं पाणिग्रहणमङ्गलम् ॥ १२ ॥
कियत्यपि गते काले मत्कान्ता सा मृतिं गता । ततो वैराग्यमासाद्य दीक्षितोऽहं मनस्विनि ॥ १३ ॥
ग्रामं वृत्तिवृतिं नूनं निगदन्ति मनीषिणः । शालगोपुरसंपन्नं नगरं पौरसंकुलम् ॥ १४ ॥
नद्यद्रिवेष्टितं खेटं वृत्तं कर्वटमद्रिणा । शतैः पञ्चभिराकीर्णं ग्रामाणां च मडम्बकम् ॥ १५ ॥
पत्तनं रत्नसंभूतिः सिन्धुवेलासमावृतम् । द्रोणाख्यमभिसरस्तं सन्निविष्टं नगोपरि ॥ १६ ॥

1 अ पतितोऽसि 2 पफ युग्मम्, अ युग्मभिरम्. 3 अ द्रुत द्रुतम्. 4 पफ युग्मम्, अ युग्मभिरम्. 5 अ भिक्षे चरम्. 6 पफ परोपकार° 7 पफ युग्मम्, अ युग्मभिरम्. 8 पफ शोभनः. 9 पफ युग्मम्, अ युग्मभिरम्. 10 पफ विवाह° 11 [?].

यथा चोक्तम्—

ग्रामो वृत्त्या वृतः स्यान्नगरमुरुचतुर्गोपुरोद्भासिशालं,
खेटं नद्यद्रिवेष्टं परिवृतमभितः कर्वटं पर्वतेन ।
युक्तं ग्रामैर्मडम्बं दलितदशशतैः पत्तनं रत्नयोनि-
र्द्रोणाख्यं सिन्धुवेलावलयितमभितो वाहनं चाद्रिरूढम् ॥ १७ ॥

साधुर्लोकक्रमाद्वीर्यवैराग्याभ्यामपुरं भ्रमन् । अमुना विहरन् धारं स्वकुटीकोष्ठकं क्रमात् ॥ १८ ॥
कथयित्वा स्ववृत्तान्तं स मुनिर्निजमानसम् । जीवनेनात्र केन त्वं वृद्धे तिष्ठसि मे वद ॥ १९ ॥
निशम्य तद्वचो वृद्धा वचनेनेन पुरःस्थितम् । अस्मिन्नेव पुरे साधो सोमशर्मा द्विजोऽभवत् ॥ २० ॥
सोमिल्ला भामिनी तस्य तत्सुताहं कुलोद्गता । यवनीनामविख्याता रूपयौवनगर्विता ॥ २१ ॥
ततोऽहं पितृना दत्ता यज्ञदाय द्विजन्मने । पितृभ्यां स्नेहयुक्ताभ्यां कन्योद्वाहक्षणे तदा ॥ २२ ॥
मातापित्रोस्तयोरत्र स्नेहसंबन्धचेतसोः । मुने मातृकस्य स्वामी गतः कालेन पञ्चताम् ॥ २३ ॥
समस्तबन्धुलोकोऽपि मृत्युगोचरतां गतः । वृत्तिकर्म प्रकुर्वन्ती तिष्ठाम्यत्र मठोष्ठके ॥ २४ ॥
कथितं पूर्वसंबन्धं यवनीयो मुनिपुंगव । मया ते पृच्छया सर्वो नापरं वेद्मि किंचन ॥ २५ ॥
आकर्ण्य तद्वचः साधुः श्रमणजीविकारणम् । जगाद निहतस्वान्तस्तां वृद्धामग्रतः स्थिताम् ॥ २६ ॥
यवनासि त्वं किं न स्मरसे पठितं मत्परया समम् । एकस्यां लेखशालायां मया प्रेमानुरागतः ॥ २७ ॥
निशम्य तद्वचस्तत्र यवनी वदतीत्थम् । सर्वं स्मराम्यहं साधो पूर्वमाचरितं स्फुटम् ॥ २८ ॥
अन्योन्यप्रेमरागेण त्वां पृच्छाम्यपि सुव्रत । संसर्गदोषतो यातौ तत्र पाटलिपुत्रकम् ॥ २९ ॥
तत्र यज्ञानदीतीरे वहन्ती यवनी तदा । दारिद्र्यकर्म कुर्वाणा संस्थिते परवेश्मनि ॥ ३० ॥
कस्मात् काष्ठानि चादाय तदा वै विधियोगतः । विधाय विक्रयं तेषां रूपकैकेन संयुते ॥ ३१ ॥
रतिकर्म तया सार्धं कुर्वन् रत्नविहीनया । मध्ये रत्नविलीनो हि तिष्ठति प्रीतमानसः ॥ ३२ ॥

॥ इति श्रीजयमीसंसर्गभग्नचारुमुनिकथानकमिदम् ॥ ९४ ॥

९५ कूपकारमुनिकथानकम् ।

अथास्ति पाटलीपुत्रे नगरे मेरिकान्वये । अशोको नाम भूपालो अशोका तस्य भामिनी ॥ १ ॥
अनयोर्नन्दनो धीरः कूपकारः प्रतापवान् । यस्माद्भयेन राजानो न गच्छन्ति पराभवम् ॥ २ ॥
अन्यदा वरधर्माख्यो मुनीन्द्रो महतान्वितः । संघेन विहरन्प्राप तत्पुरोपान्तमादरात् ॥ ३ ॥
श्रुत्वोद्यानवनं साधुं वरधर्मं समागतम् । कूपकारः समं पौरैस्तद्वन्दं प्राप विस्मितः ॥ ४ ॥
कूपकारो वृषं श्रुत्वा क्रूरोऽपि जिनदेशितम् । दधौ दैगम्बरीं दीक्षां वैराग्याहितमानसः ॥ ५ ॥
अन्यदा जनमध्ये हि स्वशरीरमनारतम् । कूपकारे प्रशंसन्तं ददर्श स गणाधिपः ॥ ६ ॥
तद्वचस्तं समालोक्य वरधर्मो मुनीश्वरः । जगाद तद्विशासगे नितान्तोद्धतमानसः ॥ ७ ॥
त्वं भद्र यास्यसि क्षिप्रं विनाशमनुबन्धके । श्रुत्वा मौनीश्वरं वाक्यं जगाद स मुनिर्गुरुम् ॥ ८ ॥
यदि रामाकृते प्राप नाशं यास्याम्यहं गुरुम् । ततः स्त्रीवर्जिते देशे करोमि विविधं तपः ॥ ९ ॥

---

1 [धमन]. 2 [विहरचार]. 3 पफ दृष्टकम् ज पुरुषमीरम्. 4 ज मुनिपुंगव. 5 पफज पुरुषमीरम्. 6 पफज पुरुषमीरम्. 7 पफ विनिर्मं 8 पफ पुरुषम् ज पुरुषमीरम्.

एवमुक्त्वा विनिःसृत्य तदा गुरुसमीपतः । आरूढः कूपकारोऽयमग्रमन्दिरपर्वतम् ॥ १० ॥
मानातपः प्रकुर्वाणो दक्षः कर्मविनाशने । कूपकारमुनिस्त्वसौ केशाक्षेपय मूर्द्धनि ॥ ११ ॥
तदवस्थं समालोक्य भूपाः प्रत्यन्तवासिनः । ग्रहीतुं पाटलीपुत्रं सर्वतस्तेऽन्वसिस्रिरे ॥ १२ ॥
एवं स्थितवतां तत्र राज्ञां प्रत्यन्तवासिनाम् । पौरलोकः समस्तोऽपि तदानीं क्षोभमागतः ॥ १३ ॥
तथाशोको महाराजो दुःखपीडितमानसः । सभ्यान् जगाद मित्रस्थान् मस्तकन्यस्तपाणिकान् ॥१४॥
कूपकारकुमारेण विना सभ्या ममेदृशी । अवस्था वर्तते कष्टा मनःसंदेहकारिणी ॥ १५ ॥
अशोकवचनं श्रुत्वा महाशोकसमन्वितम् । जगौ वीरवती भूप गणिका रूपराजिता ॥ १६ ॥
दीनं ब्रवीषि किं राजन् वैरिजं भयमुत्सृज । कूपकारकुमारं तमानयामि त्वदन्तिकम् ॥ १७ ॥
एवमुक्त्वा सहान्याभिः पण्यस्त्रीभिर्नृपान्तिकात् । आरुरोह सका शीघ्रमग्रमन्दिरपर्वतम् ॥ १८ ॥
श्राविकारूपमादाय मायाभेदसमन्वितम् । गणिकैका स्थिताऽधोऽस्य पर्वतस्य सुरूपिणी ॥ १९ ॥
शेषाः पर्वतमारुह्य कूपकारस्य योगिनः । चक्रुर्नमस्कृतिं प्राह मुनिं वीरवती तदा ॥ २० ॥
वृद्धैकश्राविकाऽऽयाता भवन्तं वन्दितुं विभो । अधिरोढुं नगं नालं विह्वलस्य गिरेरधः ॥ २१ ॥
दयामस्या विधायार्य तथा वात्सल्यकारणात् । गमनं कुरु येन त्वां वन्दित्वाऽस्तु मलम्भुता ॥२२॥
निशम्य तद्वचः साधुः पर्वतादवतीर्य च । जगाम तत्समीपत्वं धर्मवात्सल्ययोगतः ॥ २३ ॥
तया तथा कृतः सोऽयं निजयुक्त्या विदग्धया । यथा चारित्रतो भ्रष्टो मदनातुरमानसः ॥ २४ ॥
कूपकारं पुरः कृत्वा मुक्तचारित्रमादरात् । वीरमत्यादयः सर्वा ययुः पाटलिपुत्रकम् ॥ २५ ॥
दृष्ट्वाऽशोकमहीपालः कूपकारं सुतं पुरः । सद्यो बभूव तत्सख्योपपूरितमानसः ॥ २६ ॥
पुत्र त्वया विना सर्वं नगरं बहुभिः खलैः । शत्रुभिः शस्त्रसंपातद्योतिताकाशभूतलैः ॥ २७ ॥
निशम्य जनकं वाक्यं समयं भीमविग्रहम् । जगाद स्थिर सोऽपि किमेभिः क्रियते मम ॥ २८ ॥
एवमुक्त्वा प्रणम्यास जनकस्य पदद्वयम् । कूपकारो जगामाशु तदा रिपुबलं प्रति ॥ २९ ॥
कांश्चित्खड्गप्रहारेण कांश्चिन्मुद्गरचूर्णने । कांश्चिद्बाणनिपातेन चक्रेऽरीनसौ मृतान् ॥ ३० ॥
परचक्रमयं सर्वे तद्भयाकुलमानसाः । अन्ये पलायनं चक्रुः कूपकारशराहताः ॥ ३१ ॥
आत्मात्मविषयं सर्वे समवेक्षितविग्रहाः । स्वपराजयदुःखार्ता ययुरन्येऽरिराजयः ॥ ३२ ॥
तेषु सर्वेषु नष्टेषु परं पाटलिपुत्रकम् । तदा बभूव विश्रब्धं कूपकारसमाश्रयात् ॥ ३३ ॥

॥ इति श्रीवीरवतीगणिकासंसर्गभग्नकूपकारमुनिकथानकमिदम् ॥ ९५ ॥

९६ पाराशरकथानकम् ।

कुरुजाङ्गलदेशेऽस्ति हस्तिनागपुरं परम् । नरेन्द्रः संवरस्तत्र क्षत्रशास्त्रविशारदः ॥ १ ॥
जयन्त्याख्यपुरे श्रीमान् विश्वसेनो नराधिपः । बभूव तन्महादेवी विश्वसेना मनोरमा ॥ २ ॥
अनयो रूपसंपन्ना तपोधी नाम विश्रुता । अनयाऽऽत्मजया दत्ता धनन्या संवराय सा ॥ ३ ॥
ऋतुकाले यथाऽस्माकं सुतायाः संवर प्रभो । त्वयाऽन्यत्र न गन्तव्यं कदाचिदपि निश्चितम् ॥ ४ ॥
अथवा दैवयोगेन चान्यत्र गमनं भवेत् । तथाऽपि शीघ्रमेवात्र त्वयाऽऽगन्तव्यमादरात् ॥ ५ ॥

---

1 पफ विष्वम्, ज विष्वमिदम्. 2 [कैलोदाचयनपूर्भनि]. 3 पफ पुष्पम्, ज पुष्पमिदम्. 4 पफ विष्वम्, ज विष्वमिदम्. 5 पफ चतुष्पथम्, ज चतुष्पथमिदम्. 6 पफ वर्णं. 7 ज चचाराणु.

प्रतिपद्य वचस्तस्यास्तत्सुता संवरेण सा । परिणीता महाभूत्या वयस्यकण्ठनिस्वनैः ॥ ६ ॥
ऋतुकालमिमं तस्याः संवरः प्रीतमानसः । अनन्यमतिकस्तत्र यत्नवान् संप्रतीक्षते ॥ ७ ॥
एवं हि तिष्ठतस्तस्य कालो याति महात्मनः । आसन्नकालसमासन्ने बभूवार्य समागमः ॥ ८ ॥
तथाविष्ण्वादिदेवानां त्रयस्त्रिंशच्च कोटयः । अष्टकोट्यो नाके भूतानामपि सत्तराः ॥ ९ ॥
एकत्रस्य तथा सख्या मासन्तो द्वादशापि च । त्रिदिवे मिलिताः क्षिप्रं सप्रीतां माधमासस्य ॥ १० ॥
मासमध्येऽपीमिदं प्राह संवरोऽपि तपोधियाम् । ऋतुकालो न यावत्ते तावदेमि त्वदन्तिकम् ॥ ११ ॥
एवं निगद्य तां कान्तां विनयानतविग्रहाम् । संवरः प्रीतचेतस्कस्तन्मुक्त्वाथ दिवं ययौ ॥ १२ ॥
अथ पुष्पवती जाता प्रथमं तत्प्रिया सती । तपोधीस्तत्र सुस्नाता निजकान्तं प्रतीक्षते ॥ १३ ॥
स्थितवत्यां तथा चैव यदा नागच्छति प्रियः । तदा संप्रेषितो दूतो यथान्ते इन्द्रसंसदि ॥ १४ ॥
संवरस्तत्पतिं प्राह पुरन्दरसभास्थितम् । इदं ब्रवीति ते कान्ता वचनं शृणु सांप्रतम् ॥ १५ ॥
यदि पूर्वा कृताऽवस्था मानसे तव तिष्ठति । ततो भवन्तमागच्छ स्नाता तिष्ठामि सांप्रतम् ॥ १६ ॥
भार्यावृत्तवचः श्रुत्वा संवरोऽपि जगाविदम् । हस्तिनागपुरं गत्वा चर भद्रकर्मा वद ॥ १७ ॥
अत्रान्तरे प्रिये कोपं मा करिष्यसि वल्लभे । ममोपरि समुत्पन्नं देवकार्यमिदं महत् ॥ १८ ॥
अहल्यार्थं गतः शक्रः काममोहितमानसः । कृत्याविवेतस्कः परदारनिषेवया ॥ १९ ॥
गौतमेन च संदत्तः शापः शक्रस्य दुःसहः । योनिं भगसहस्रं हि स्याच्छरीरे तव द्रुतम् ॥ २० ॥
दत्ते शापेऽमुना दृष्ट्वा जाते भगसहस्रके । स्वर्गात् पलायनं चक्रे विलक्षः स पुरन्दरः ॥ २१ ॥
तदन्वेषणतः सर्वे गीर्वाणाः समनुव्यग्राः । वसवोऽपि च संभूय ययुरिन्द्रं प्रति स्फुटम् ॥ २२ ॥
कार्येणानेन मे कान्ते नूनमागमनं न च । एवं दूतं स सन्दिश्य प्रजिघाय प्रियान्तिकम् ॥ २३ ॥
यथादिष्टं वचस्तस्याः स्वरूपेण सविस्तरम् । तदन्तं प्राप्य वेगेन तथा सर्वं निवेदितम् ॥ २४ ॥
प्रियवार्तां परिज्ञाय स दूतेन निवेदितम् । शुककण्ठे समासज्य लेखं सा विससर्ज तम् ॥ २५ ॥
शुकः क्रमेण संप्राप्य तत्कान्तान्तिकमादरात् । पूर्वं मुखेन लेखार्थं जगादिति तदग्रतः ॥ २६ ॥
ऋतुकालं परिप्राप्य तावत्तत्रैव च प्रभो । तिष्ठामि मनसोत्कण्ठा भवद्दीक्षाभिकाङ्क्षया ॥ २७ ॥
संपद्यते न ते नाथ यद्यागमनकारणम् । स्वबीजं प्रापय क्षिप्रं निःसंदेहं मदन्तिकम् ॥ २८ ॥
एवं निगद्य तद्वार्तां लेखान्तर्गतसंभवम् । कीरो मुमोच तल्लेखं तत्पुरः प्रीतमानसः ॥ २९ ॥
तल्लेखार्थं विदित्वाऽऽशु शुकपूर्वनिवेदितम् । तदानीं संवरो दध्यौ क्षणमेकं दिवि स्थितः ॥ ३० ॥
संवरः पुटिकायां तु शुक्रं कृत्वा शुकस्य च । प्राग्र्यकृत्य गले शीघ्रं साभिज्ञानपुरस्सरम् ॥ ३१ ॥
महादेवी समीपे च खेदनिर्भरमानसः । शुकं प्रेषयामास हस्तिनागपुरं प्रति ॥ ३२ ॥
ततः शुकः समुत्पत्य यातं हस्तिपुरान्तिके । गङ्गातटोपरि श्येनो जग्राहैनं स तत्क्षणात् ॥ ३३ ॥
ततः सा शुक्रसंपूर्णा पुटिका शुककण्ठतः । मन्दाकिनीजलेऽगाधे पपात क्षणमात्रतः ॥ ३४ ॥
ततस्तत्पुटिकाशुक्रं कर्मकालनियोगतः । पपात शफरीवक्त्रे गिलितं चानया पुनः ॥ ३५ ॥
तया गिलितमात्रेऽस्मिंस्तन्मत्सीजठरे पुनः । दिव्यरूपधरी कन्या संभूता दैवयोगतः ॥ ३६ ॥
अत्रान्तरे परिप्राप्तो धीवरो जालसंयुतः । गङ्गानद्यां समारब्धुं मीनसंघातमादरात् ॥ ३७ ॥
तस्य गङ्गाभटो नाम गङ्गदत्ताऽस्य गेहिनी । पतीव वल्लभा जाता प्राणेभ्योऽपि कलावती ॥ ३८ ॥

1 अ महीभृत्या 2 अ यौवन. 3 पफ कुमय अ कुमव. 4 पफ मयैवजनतः 5 अ एए. 6 पफ ऋतुकुजनम् अ ऋतुमुखमीरम्. 7 पफ ऋतुजुम्भम्, अ ऋतुमुखमीरम्. 8 पफ कुमन अ कुमनमिरम

तस्मिन्नेव हृदे जाल क्षिप्तं गङ्गाभटेन च । पक्त्वा तां शफरीं तेन सन्तुष्टो गृहमागतः ॥ ३९ ॥
यावच्छिनत्ति तां मत्सीं कत्यात्या स धीवरः । तावद्ददर्श तत्रस्थां योषितं रूपशालिनीम् ॥ ४० ॥
मत्सीतुन्दात् समादाय तां च कन्यां स धीवरः । सत्यवत्याख्यमेतस्या ददौ नाम गुणान्वितम् ॥४१॥
अन्यदा तां समादाय बालां सत्यवतीं पराम् । रूपराजितसर्वाङ्गीं विशालदललोचनाम् ॥ ४२ ॥
स्वनामाङ्कितसद्रूपां गङ्गारोधसि सादरः । गङ्गामध्ये निधायाशु जगाम स्वगृहं पुनः ॥ ४३ ॥
अथ पराशरो योगी चर्मकूर्चकहस्तकः । जटीछत्रीकृतीयुक्तो गणेत्रीकुण्डिकान्वितः ॥ ४४ ॥
यज्ञोपवीतसंयुक्तः पादुकायुतसत्पदः । दीर्घमार्गसमाक्रान्तो गङ्गातीरे व्यवस्थितः ॥ ४५ ॥[1]
दृष्ट्वा सत्यवतीं तत्र जगौ पराशरोऽपि ताम् । अहं मार्गपरिश्रान्तः पुत्रि प्राप्तो नदीतटम् ॥ ४६ ॥
महाश्रमपरिश्रान्तं नावा छिद्रविहीनया । तेन मन्दाकिनीं मुग्धे मा समुत्तारय द्रुतम् ॥ ४७ ॥
तद्वाक्यतस्तया शीघ्रं गङ्गापश्चिमतीरतः । धूसरेण समानीता द्रोणिः प्लवनकारिणी ॥ ४८ ॥
परस्परं[2] समारोप्य गमश्रान्तं तपस्विनम् । पश्चात् स्वयं समारूढा तदा सत्यवती तकम्[3] ॥ ४९ ॥
अधिरूढौ ततो द्रोणीं प्रयातौ द्वावपि द्रुतम् । परस्परं च जल्पन्तौ किंचिच्चकितमानसौ ॥ ५० ॥
मुखं स्तनौ नितम्बं च जघने दशनच्छदम् । सत्यवत्याः समालोक्य पाणिपादं मनोहरम् ॥ ५१ ॥
स्वचित्तक्षोभमासाद्य विह्वलीभूतमानसः । जगाद बालिकामेतां पाराशरमहामुनिः[4] ॥ ५२ ॥
भद्रे हि ब्रह्मचर्येणासमोऽहं चिरकालतः । विलोक्य भवतीं नाद्य स्थातुं क्षममस्मि क्षितौ ॥ ५३ ॥[5]
पूर्णिमाचन्द्रसदृक्त्रां पीनोन्नतघनस्तनीम् । मुक्ताभदशनां भद्रे सांप्रतं त्वां भजाम्यहम् ॥ ५४ ॥
श्रुत्वा पाराशरं वाक्यं मन्मथानलदीपितम् । जगौ सत्यवती तत्र विह्वलनमनोगतम् ॥ ५५ ॥
तात नीचा विरूपाऽहं कैवर्तकशरीरजा । निन्दिता सर्वलोकेन दुर्गन्धा मतिवर्जिता ॥ ५६ ॥
दुर्भगा दुःस्वरा दीना सत्कारपरिवर्जिता । तिष्ठाम्यहं धुनीतीरे च भूमिः परिवर्जिता ॥ ५७ ॥
त्वं पुनर्लोकविख्यातः सर्वलोकोत्तमो महान् । पूज्यः स्तुतोऽपि सर्वेषां सतामपि महामुनिः ॥५८॥
शापानुग्रहयुक्तस्य सर्वलोकप्रियस्य भो । तेन नूनं न संबन्धो घटते मत्समं तव ॥ ५९ ॥[6]
श्रुत्वा सत्यवतीवाक्यं जगौ पराशरोऽपि ताम् । भेदं वद न शक्नोमि स्थातुं मुग्धे त्वया विना ॥६०॥
तद्वाक्यतः पुनः प्राह तं मुनिं साऽम्बुजलोचना । नाहं दुष्टदुर्गन्धा कुचेला मतिदुर्विधा ॥ ६१ ॥
भूयो जगाद तद्वाक्यात् पाराशरमुनिस्तराम् । मन्मथानलसंतप्तो म्लानवक्त्रसरोरुहः ॥ ६२ ॥
सुरूपा मतिसंपन्ना दिव्याभरणभूषिता । दिव्या योजनसद्गन्धा मत्प्रसादाद् भविष्यसि ॥ ६३ ॥
एवमुक्ताऽमुना सा च वस्त्रालंकारराजिता । भूत्वा योजनसद्गन्धा जगादेदं ससंभ्रमम् ॥ ६४ ॥
भार्यां पश्यति लोकोऽयं दिने रविसमुज्ज्वले । तद्वाक्यतः पुनस्तेन धूमरी विहिता घना ॥ ६५ ॥
धूमया कृतयाऽनेन घनाञ्जनसमानया । भूयोऽपि निजगौ भीता तदा सत्यवती तकम् ॥ ६६ ॥
मम सौख्यं न किंचिच्च जलमध्ये प्रजायते । महामुने परं नूनं गङ्गातीरनिमज्जनम् ॥ ६७ ॥[7]
नानाद्रुमलतापुष्पफलपल्लवराजितम् । चक्रे गङ्गानदीमध्ये द्वीपं तद्वाक्यतो मुनिः ॥ ६८ ॥
परिणीय विवाहेन गान्धर्वोपपदेन ताम् । पाराशरोऽनया सार्धं भुञ्जानः संनितिष्ठते ॥ ६९ ॥
छत्रिकः कुण्डिसंयुक्तो कूर्चयज्ञोपवीतकः । गणेत्रीपादुकायुक्तो जटाभस्मविराजितः ॥ ७० ॥
रूपराजितसर्वाङ्गो व्यासो नाम महामुनिः । क्रमात् सत्यवतीगर्भाब्धिभूतो दिव्यविग्रहः ॥ ७१ ॥

---

1 पफ युग्मम्, ज युग्मकमिदम्. 2 [पराशरं]. 3 [तकम्]. 4 ज पाराशरमहामुनिः 5 पफ चतुष्कम्, ज चतुष्कमिदम्. 6 पफ चतुष्कम्, ज चतुष्कमिदम्. 7 पफ युग्मम्, ज युग्मकमिदम्.

तत्प्रिया शीलसंपन्ना नामतः सान्मनोहरी । रुद्रमालीति विख्यातस्तत्सुतोऽजनि धनस्वनि ॥ १८ ॥
समर्थं स्वस्वसंबन्धं कथयित्वा परस्परम् । चक्रतुः प्रीतचेतस्कौ तत्कौ निजगृहं तदा ॥ १९ ॥
स्वस्वभवान्तरं मिथो संतोषस्थितचेतसो । ऊचतुस्तौ मुदं प्राप्य तोषविस्फारितेक्षणौ ॥ २० ॥
निशायसवचः श्रुत्वा सानुराग परस्परम् । चक्रतुः पितरौ प्रीत्या तयोर्विवाहमङ्गलम् ॥ २१ ॥
कृते विवाहसंपन्ने दम्पती प्रीतमानसौ । भुञ्जानौ परमान् भोगान् तस्थतुस्तौ सुखान्वितौ ॥ २२ ॥
अन्यदा साधयित्वैतौ विद्यां प्रज्ञप्तिमूर्जितौ । पूर्वां प्रज्ञप्तिविद्यायाश्चक्रतुः कुसुमादिभिः ॥ २३ ॥
चैत्यपूजां विधायात्र महापुण्यादिसंपदा । स्तुतिभिस्तौ जिनं स्तुत्वा तस्थतुस्तत्प्रदक्षिणम् ॥ २४ ॥
अत्रान्तरे समायातौ चार्यमैथुनिकौ रुषा । तं प्रदेशं विलोक्यैमौ दम्पती खेचरेश्वरौ ॥ २५ ॥
प्राप्यैकस्य घने तत्र तौ महाचालविद्यया । स्वपुरं तोषसंपूर्णाचाप्तु परमोदयौ ॥ २६ ॥
चेतनां प्राप्य तद्विद्यां स्थित्वा प्रज्ञप्तिविद्यया । रुद्रमाली समादाय स्वकान्तां स्वपुरं ययौ ॥ २७ ॥
तन्निमित्तं परिप्राप्य निर्वेदं भोगसंपदम् । कोशादिकं स्वपुत्राय ददौ राज्यं सुधीरधीः ॥ २८ ॥
बाह्याभ्यन्तरं संगं विहाय स्थिरमानसः । दीक्षां समाधिगुप्तान्ते रुद्रमाली समाददे ॥ २९ ॥
तस्मिन् प्रव्रजिते कान्ते महावैराग्यभीयुपे । सद्विषमाल्लिनी जैन सुव्रतान्तेऽग्रहीत् तपः ॥ ३० ॥
अन्योन्यस्नेहरागेण सनिदानं तपस्तकौ । कृत्वा काल च सौधर्मे देवीदेवौ बभूवतुः ॥ ३१ ॥
अथोत्सर्पणे देशे गन्धकारस्यजनान्तिके । माहिष्मत्यां पुरि श्रीमानभूत् चलवनो नृपः ॥ ३२ ॥
अभवत् तन्महादेवी रूपलावण्यभूषिता । नीलोत्पलदलश्यामा फुल्लोत्पललोचना ॥ ३३ ॥
रुद्रमालिचरो देवश्च्युत्वा सौधर्मनाकतः । सत्यकिर्नाम सजातः सुरूपी नन्दनोऽनयोः ॥ ३४ ॥
अत्रैव भरतक्षेत्रे च वैशाली नगरी परा । अस्यां बभूव भूपालश्चेटकाख्यो नाम विश्रुतः ॥ ३५ ॥
बभूवास नरेन्द्रस्य जनतानन्ददायिनि । सुभद्राख्या महादेवी मद्रभाषा प्रियंवदा ॥ ३६ ॥
अनयो रूपसंपन्ना नीलोत्पलदलेक्षणाः । आसन् सप्त सुता यास्तु नामानीमानि बिभ्रति ॥ ३७ ॥
तन्मध्ये पद्मपत्राक्षी प्रथमा प्रियकारिणी । द्वितीया सुप्रभा प्रोक्ता तृतीया च प्रभावती ॥ ३८ ॥
शिवादेवी चतुर्थी स्यात् सुज्येष्ठा पञ्चमी मता । षष्ठी च चेलना नाम सप्तमी चन्दना मता ॥ ३९ ॥
पार्श्वर्षिमालिचरी देवी च्युत्वा सौधर्मनाकतः । सुज्येष्ठा सा समुत्पन्ना तत्सुता पञ्चमी मता ॥ ४० ॥
चेटकेन समुद्दिष्टा सुज्येष्ठा सत्यकेः सुता । वीवाहमङ्गलं तस्या न तावद्विहितं किल ॥ ४१ ॥
अन्यदा चेलना कन्या नीयमाना सुरूपका । अभयादिकुमारेण पुरं राजगृहं परम् ॥ ४२ ॥
ईर्ष्याधर्मेण सा ज्येष्ठा महता रूपशालिनी । प्रेषिता हारमानेतुं तदा चेलनया गृहम् ॥ ४३ ॥
अभयादिकुमारेण चेलनाऽपि निशि द्रुतम् । जगाम प्रीतचेतस्का पुरं राजगृहाभिधम् ॥ ४४ ॥
सुज्येष्ठा हारमादाय यावत् संकेतभूतलम् । आगच्छत्तत्र तावच्च पश्यतीयं न चेलनाम् ॥ ४५ ॥
चेलनान्वेषणं तस्याः कुर्वन्त्या सा निशा ययौ । जगाम जनकादिभ्यो गतत्रपा नितरां भयम् ॥ ४६ ॥
विरोचनोदये जाते लज्जाभयसमन्विता । पितृगेहं न सा याता जगामार्यानिकेतनम् ॥ ४७ ॥
प्रविश्य तत्र चेटकस्य यशोमत्याः स्वसुस्तदा । सुज्येष्ठा प्राप्य तामार्यां तपो जैनमशिश्रियत् ॥ ४८ ॥
श्रुत्वा प्रव्रजनं तस्या महावैराग्यसंगतः । समाधिगुप्तमानम्य सत्यकिर्मुनितां ययौ ॥ ४९ ॥
अथोत्तरदिग्भागस्थितगोकर्णपर्वते । सत्यकिः सत्संपन्नश्चकार विविधं तपः ॥ ५० ॥
ततो राजगृहासन्ने पर्वते सात्यकिर्यतिः । तस्थावातापनायोगे स्थानेन रविसन्मुखः ॥ ५१ ॥
अत्रान्तरेऽर्यिकावृन्दं प्रसन्नवरकृत्तिकम् । आतापनस्थितं साधुं सात्यकिं प्राप भक्तितः ॥ ५२ ॥

---

1 घन विप्यम्, ब विप्यमितम्. 2 प चर्षिमती 3 ब सुरंपय. 4 घक गम्य.
ग भे ।

गर्भाद्विनिःक्रान्तमात्रोऽपि जनन्या प्रीतचेतसः । व्यासो गन्तुं प्रवृत्तोऽसौ जनकेन समं पुनः ॥७२॥
गच्छन्तं तनयं दृष्ट्वा तातेन सह सत्वरम् । जगौ सत्यवती तं च पुत्रस्नेहपरायणा ॥ ७३ ॥
लालिता यदि मां हित्वा प्रयाति गतिमोहतः । अधुना त्वं कुतो यासि मुक्त्वा द्वीपेऽत्र मीपमे ॥७४॥
मातृवाक्यं समाकर्ण्य व्यासोऽपि निजगाद ताम् । त्वदन्तमागमिष्यामि मोत्सुका भव मातृके ॥७५॥
एवमुक्त्वाऽम्बिकां व्यासो विहायेमां ससंभ्रमः । जनकेन समं शीघ्रं हस्तिनागपुरं ययौ ॥ ७६ ॥
पराशरवरेणाशु जाता साऽक्षतयोनिका । पितृमन्दिरमासाद्य कुलधर्मेण तिष्ठति ॥ ७७ ॥
अथ सत्यवती तत्र तिष्ठन्ती पितृमन्दिरे । भीष्मेण याचिता सा च शान्तनार्थं प्रयत्नतः ॥ ७८ ॥
शान्तनाय स्वका कन्या दत्ता पित्रा विधानतः । परिणीताऽमुना क्षिप्रं तूर्यमङ्गलनिस्वनैः ॥ ७९ ॥
जाताः पुत्रास्त्रयोऽनेन सत्यवत्यां महौजसः । चित्रो विचित्रनामा च तथा चित्राङ्गदः क्रमात् ॥८०॥
अमीषां च महादेव्यो बभूवू रूपराजिताः । अम्बाऽम्बिका तथा चान्या नूनमम्बालिकाभिधा ॥८१॥
प्रयातां राजपुत्राणां गतानां दक्षिणां दिशम् । महापापविशेषेण कुमारात् पञ्चताऽभवत् ॥ ८२ ॥
महास्नेहसमायोगाम्याम्लानसया तथा । तत्पुत्रार्थं स्मृतो व्यासस्तया योजनगन्धया ॥ ८३ ॥
अम्बायां पाण्डुरत्नो धृतराष्ट्रोऽम्बिकाभवः । अम्बालिकाभवस्तस्तो विदुरोऽपि क्रमादिमे ॥८४॥
अमीषां व्यासपुत्राणां त्रयाणामपि सत्क्रमम् । पाण्डवाः कौरवा जाताः कीर्तिव्याप्तदिगन्तराः ॥८५॥

॥ इति श्रीसत्यवतीसंसर्गभवपराशरकथानकम् ॥ ९६ ॥

९७ नीलल्लोहितकथानकम् ।

अत्रैव भरतक्षेत्रे जम्बूद्वीपोपलक्षिते । नानाजनपदाकीर्णे नानाधनसमन्विते ॥ १ ॥
विजयार्धनगस्यासीद्दक्षिणस्यां दिशि स्थितम् । किंनरोपपदं गीतं पुरं सुरपुरोपमम् ॥ २ ॥
मणिचूलोऽभवत्तत्र नाम्ना विद्याधराधिपः । मनोहरी महादेवी चास्य लोकमनोहरी ॥ ३ ॥
तनयो रूपसंपन्नो बहुविद्याधिपो गुणी । रुक्ममाली समुत्पन्नो नन्दनो बहुनन्दनः ॥ ४ ॥
अन्यदा विहरन् भूमिं रुक्ममाली निजेच्छया । अर्च्यार्चिमालिनी कन्या ददर्शासौ मनोरमाम् ॥५॥
विद्याः संसाधयन्त्या हि कामविह्वलमानसः । तत्सुखे भ्रमरो भूत्वा मासषट्कं स तस्थिवान् ॥ ६ ॥
नितम्बस्तननीवीषु मासषट्कं स्थिताय सः । स्वकीयं रूपमालीयं ददर्शासौ मनोरमम् ॥ ७ ॥
एवं कृतेऽमुनाऽप्यासीद् विद्याभ्रष्टः स खेचरः । विद्याराधनविघ्नं च मा कुरु त्वं प्रभो मम ॥ ८ ॥
श्रुत्वा विद्याधरीवाक्यं रुक्ममाली वनान्तरम् । मौनमाधाय संतस्थे विस्मयाकुलमानसः ॥ ९ ॥
मौनस्थं तं समालोक्य जगौ विद्याधरी पुनः । नूनं साधितविद्याऽहं भविष्यामि तव प्रिया ॥१०॥
श्रुत्वा तद्वचनं खेटः प्राहेमां प्रीतमानसः । भद्रे त्वं तनया कस्य ब्रूहि सर्वं यथायुतम् ॥ ११ ॥
निशम्य भारतीं तस्य जगौ विद्याधरी तकम् । विजयार्धोत्तरश्रेण्यामस्ति गन्धर्वपत्तनम् ॥ १२ ॥
महाबलोऽभवत्तत्र विद्याधरमहेश्वरः । प्रभाकरी महादेवी चास्य चित्तमलिम्लुचा ॥ १३ ॥
तत्सुताऽहं विनीतात्मा विद्याधरमनोरमा । कन्यार्चिमालिनी नाम विद्यासाधनतत्परा ॥ १४ ॥
नामादिकं निवेद्यास्य स्वकीयं खेचरी पुनः । पप्रच्छैषा प्रयत्नेन खेचरं प्रीतमानसम् ॥ १५ ॥
ततः पृष्टः पुनः सर्वं स्वनामादिकमादरात् । खेचरोऽसौ प्रहृष्टात्मा यथाक्रममुदाहरत् ॥ १६ ॥
अत्रैव विजयार्धस्य दक्षिणाशासमाश्रयम् । पुरं किंनरगीतं स्यान्मणिचूलोऽत्र भूपतिः ॥ १७ ॥

1 कुमार, ब कुमारा. 2 पफ कुमारा, ब कुमार.

नानाशिलातलोपेतं नानावृक्षसमाकुलम् । आरुरोह सशुश्रूषः कैलासं स मुनिस्तदा ॥ ८७ ॥
मार्तण्डकरसंतप्ते कैलासस्य शिलातले । तस्थौ [1]प्रतिमया धीरस्तदानीं स मुनिः शुचौ ॥ ८८ ॥
अथ विद्याधरावासविजयार्धगिरीन्द्रतः । अष्टापदसमाक्षेपसौधपंक्तिविलासिनः ॥ ८९ ॥
दक्षिणाशासमुत्पन्नं पुरं मेघनिबन्धनम् । मेघादिनिचयं सारं तथा मेघनिनादकम् ॥ ९० ॥
पुरत्रयस्य चैतस्य राजाऽऽसीत् कनकप्रभः । मनोवेगाऽस्य सत्पत्नी मनोनयनवल्लभा ॥ ९१ ॥
अभूतां नन्दनावस्य नन्दिताशेषबान्धवौ । देवदारुस्तयोर्ज्येष्ठो विद्युच्चिह्नः कनिष्ठकः ॥ ९२ ॥
देवदारुसुतायास्मै ददौ राज्यं महात्मने । प्रज्ञप्तिं युवराज्यं च विद्युच्चिह्नाय सक्रमम् ॥ ९३ ॥
हित्वा परिग्रहं सर्वं भूपतिः कनकप्रभः । तदा गुणधराभ्याशे तपो जैनमशिश्रियत् ॥ ९४ ॥[2]
अथ प्रज्ञप्तिसामर्थ्याद् विद्युच्चिह्नेन लोभिना । निर्धाटितोऽमुना शीघ्रं देवदारुः स्वमण्डलात् ॥९५॥
ततो मेघनिबद्धस्य मेघादिनिचयं पुरम् । तथा मेघनिनादं च महाजनधनान्वितम् ॥ ९६ ॥
पुरत्रयमिदं सारं समादाय त्वरान्वितः । कैलासपर्वतं प्राप्य देवदारुः स तस्थिवान् ॥ ९७ ॥
रूपयौवनसंपन्नमष्टापदतनुप्रभम् । भार्याचतुष्टयं तस्य देवदारोरिदं परम् ॥ ९८ ॥
आद्या योजनगन्धा स्याद् द्वितीया कनकप्रभा । अन्या तरङ्गवेगा च तरङ्गभङ्गिनी परा ॥ ९९ ॥
अथ योजनगन्धाया द्वे सुते भवतः परे । प्रथमा गन्धिला प्रोक्ता द्वितीया गन्धमालिनी ॥ १०० ॥
कनकाया सुताद्वन्द्वं रूपराजितविग्रहम् । आद्या कनकचित्रा स्याद् द्वितीया स्वर्णमालिनी ॥ १०१ ॥
ततस्तरङ्गवेगाया सद्रूपं तनयाद्वयम् । तरङ्गमतिरेकाऽन्या सेनान्तादितरङ्गका ॥ १०२ ॥
तथा तरङ्गभङ्गिन्या यमलेष्ट सुताद्वयम् । प्रभावती मता पूर्वा द्वितीया सुप्रभावती ॥ १०३ ॥
अष्टौ ता रूपसंपन्ना विद्याधरकुमारिकाः । गताः कुमुकिनीं[3] रन्तुं वापीजलमनुत्सुकाः ॥ १०४ ॥
तत्र वापीजलाभ्याशे शिलातलसमन्विते । स्तोकोऽस्यातापनायोगं चचार प्रीतमानसः ॥ १०५ ॥
आतापनस्थितो दृष्ट्वा कन्यास्ता रूपशालिनीः । सद्यो बभूव स्तोकोऽपि कामाकुलितमानसः ॥१०६॥[4]
वस्त्राणि विचित्राणि रूप्याणि विविधानि च । निधायाऽऽश्रमसमीपेऽसौ स्थापयामास तान्यरम् १०७
स्नानं विधाय ता वाप्यां स्वेच्छया प्रीतचेतसः । वेगाच्च समुत्तीर्य तत्तटीरे स्थिताः पुनः ॥१०८॥
तत्प्रदेशे न पश्यन्ति वस्त्राण्याभरणानि च । आगाढा स्तम्भसामीप्यं जग्मुः खेचरकन्यकाः ॥१०९॥
दृष्ट्वाऽग्रे तं मुनिं प्रोचुर्विद्याधरकुमारिकाः । मदीयवस्त्ररूप्याणि त्वया ज्ञातानि किं क्वचित् ॥११०॥
श्रुत्वा तद्वचनं स्तोको जगादैताः पुरः स्थिताः । यदि भार्या मे भवथ ततो दास्यामि तानि च ॥१११॥
तदीयं वाक्यमाकर्ण्य वदन्तीम पुनस्तकाः । स्वच्छन्दा न भवामो हि विद्याधरसुता यते ॥ ११२ ॥
अस्माकं च स्वतन्त्राणां मुने तत्क्षणमात्रतः । विद्या विनाशमायान्ति वाञ्छन्तीनां परंपराम् ॥ ११३ ॥
अस्मान् ददाति ते नूनं यदि तातो महामुने । ततो भार्या भवामोऽत्र भुवने भवतोऽखिलाः ॥११४॥[5]
तद्वाक्यतोऽमुना तासां वस्त्राण्याभरणानि च । समर्पितानि सर्वाणि प्रोक्ताश्चेदं वचस्तकाः ॥११५॥
स्वमातापितरौ पृष्ट्वा या यावान् सकलानपि । आगन्तव्यं मदाभ्याशं बालिका द्रुतमादरात् ॥११६॥
आकर्ण्य तद्वचः कन्या संप्राप्य जनकान्तिकम् । तद्वार्ता सकला ताभिः स्वताताय निवेदिता ॥११७॥
यथैकस्तात निर्ग्रन्थो मुनिरस्माभिरादरात् । सहसा सह संबन्धं स्तोकः कर्तुमिच्छति ॥ ११८ ॥
स्वपुत्रीवाक्यमाकर्ण्य देवदारुर्जगाविमाः । यदस्मत्त्रिपुरे कान्ते प्रवेशयति सोऽधुना ॥ ११९ ॥

---

1 पफ. °प्रतिमया 2 पफ पुस्तकम् ज पुस्तकमिदम्. 3 [इति कुमुदिनी]. 4 पफ. omit 106. 5 पफ त्रिभुवन, ज त्रिभुवनमिदम्.

विधाय वन्दनां तस्य मुनेर्भक्तिपरायणाम् । उत्ततार गिरेस्तस्मादार्यिकावृन्दमादरात् ॥ ५३ ॥
अकालवर्षणीतोयपातविह्वलमानसा । ज्येष्ठार्यिका गुहामध्यं विवेश मठमाश्रिता ॥ ५४ ॥
विसृज्यातापनायोगं सात्यकिर्भयविह्वलः । विवेश तद्गुहामध्यं वेगतो भयभीतिवत् ॥ ५५ ॥
गुहामध्यस्थितां ज्येष्ठां विलोक्य सहसा यतिः । क्षुब्धो बभूव भूयस्या कामविह्वलमानसः ॥ ५६ ॥
ज्येष्ठाऽपि तं समालोक्य मन्मथाकुलमानसा । अजस्र तस्य किंचित् कन्दर्पोद्रेकसंभ्रमम् ॥ ५७ ॥
परस्परं समासंगं विधाय मदनोत्कटम् । जगाम गुरुसामीप्यं सात्यकिर्व्रतवाञ्छया ॥ ५८ ॥
गुरुपार्श्वे स संप्राप्य कृतालोचननिन्दनः । कृत्वा गुरूदितं सर्वं प्रायश्चित्तं बभौ मुनिः ॥ ५९ ॥
ज्येष्ठाऽपि गणिनीं प्राप्य स्वकीयां तां यशोमतिम् । तन्निवेदितवृत्तान्ता संतस्थे दुःखमानसा ॥ ६० ॥
सुज्येष्ठां तां समादाय क्षान्तिका सा यशोमतिः । मुमोच चेलनागेहे तद्वृत्तान्तनिवेदिनी ॥ ६१ ॥
नवमासेष्वतीतेषु सुज्येष्ठा तद्गृहस्थिता । प्रसूता दारकं दिव्यं बालादित्यसमप्रभम् ॥ ६२ ॥
ततोऽभयकुमारेण जातमात्रोऽपि बालकः । गुहायां कालपूर्वायां स्थापितः परमोदयः ॥ ६३ ॥
ततोऽसौ चेलना यस्यौ[1] सह कालगुहामतः । आख्यात् सर्वं स्वकान्तस्य श्रेणिकस्य महात्मनः ॥ ६४ ॥
तत्समस्तवचः श्रुत्वा सहसा स महीपतिः । महासाधनसंयुक्तस्तदा कालगुहां ययौ ॥ ६५ ॥
दृष्ट्वा कालगुहान्तस्थं सुतं सैन्यसमन्वितः । विस्मयं परमं प्राप्य श्रेणिकः प्रीतमानसः ॥ ६६ ॥
ततः सुतं समादाय श्रेणिकश्चेलनाकरे । महाप्रमोदसंपन्नो ददौ तद्बालसंपदम् ॥ ६७ ॥
चेलना धारिणेन सह संवर्धने शिशोः । तैलमज्जनादियोगेन चक्रे प्रीतिसमुत्कटम् ॥ ६८ ॥
अभयस्य कुमारेण चेलना धर्मभाविता । ज्येष्ठोपगूहनं चक्रे स्थिरसम्यक्त्वभावना ॥ ६९ ॥
ज्येष्ठाऽपि स्वगुरुं प्राप्य कृत्वा निन्दनगर्हणम् । सन्निवेदितवृत्तान्ता दीक्षां जग्राह सूत्रतः ॥ ७० ॥
ज्येष्ठाया नन्दनस्तत्र रौद्रभावसमन्वितः । करयष्टिप्रघाताभ्यां चेटकांस्ताडयत्परम् ॥ ७१ ॥
ज्येष्ठातनयमालोक्य कुर्वन्तं शिशुतापनम् । चेलना रुद्रनामास्य चकार क्रोधसंगता ॥ ७२ ॥
अन्यदा चेलना प्राह तं रुष्टा चेष्टितादनात् । आरभ्यात्र खल क्षिप्रं निर्लज्ज व्रज मे गृहात् ॥ ७३ ॥
श्रुत्वा साहीलनं वाक्यं रुद्रोऽसौ चेलनां जगौ । किमिदं भाषितं मातः सत्यं वद यथायथम् ॥ ७४ ॥
कुमारवचनं श्रुत्वा चेलना सत्यतोऽखिलम् । यथावृत्तं जगादास्य तिरस्कारविचेष्टितम् ॥ ७५ ॥
तदाकर्ण्य विनिःसृत्य तद्गृहात् स कुमारकः । दीक्षां जग्राह जैनेन्द्रीं तदानीं पितुरन्तिके ॥ ७६ ॥
क्रमेणैकादशाङ्गानि स्तोकेन पठितान्यरम् । तथा दश च पूर्वाणि निश्चयात् किं न सिध्यति ॥ ७७ ॥
शतानि पञ्च विद्यानां रोहिणीप्रभृतीनि च । तथा सप्तापि भव्यानां सिद्धान्यस्यातिपुण्यतः ॥ ७८ ॥
गोकर्णपर्वतस्थस्य सात्यकेरस्य योगिनः । आतापनाविधानेन हानयेऽखिलकर्मणाम् ॥ ७९ ॥
अथामुं वन्दनां कर्तुं महाभक्तिपरायणाः । आर्यिकाः श्रावकाः प्रापुः श्राविकाश्च समं मुदा ॥ ८० ॥
आर्यिकादिभये भीमे सिंहरूपं विधाय सः । विकुर्वणाकृतं[3] रुद्रस्तस्थावन्यत्र भूतले ॥ ८१ ॥
साधुमार्गे विलोक्यार्थं हरिरूपं भयानकम् । आर्यिकादियतश्चात्र चक्रुराशु पलायनम् ॥ ८२ ॥
तदेवंविधमिदं वीक्ष्य सात्यकिः प्राह तं पुनः । त्वं नाशयसि धर्मात्मा शीघ्रं[4] निपते मुने ॥ ८३ ॥
गुरुवाक्यं समाकर्ण्य स्वपापविनिवाशनम् । रुद्रसाधुर्विलक्ष्यः सन् दध्याविति स्वचेतसि ॥ ८४ ॥
तपः करोम्यहं देशे श्रीपाण्डुपशुवर्जिते । येन पापानि कर्माणि निहन्म्याशु विशुद्धधीः ॥ ८५ ॥
एवं विचिन्त्य शुद्धात्मा रुद्रयोगी विचक्षणः । निर्जगामाशु सर्वेशान्मन्दमन्दगतिक्रियः ॥ ८६ ॥

---

1 पच. ययौ. 2 पच. कुमार अ कुमारेण. 3 पच. विकुर्वणाकृतं. 4 पच. शीर्षे.

नानाशिलातलोपेतं नानावृक्षसमाकुलम् । आरुरोह समुत्तुङ्गं कैलासं स मुनिस्तदा ॥ ८७ ॥
मार्तण्डकरसंतप्ते कैलासस्य शिलातले । तस्थौ प्रतिमया धीरस्तदानीं स मुनिः शुची ॥ ८८ ॥
अथ विद्याधरावासविजयार्धगिरीशितुः । अष्टापदसमाश्लेषसौधपङ्क्तिविलासिनः ॥ ८९ ॥
दक्षिणाशासमुद्भूतं पुरं मेघनिबन्धनम् । मेघाद्रिनिचयं सारं तथा मेघनिनादकम् ॥ ९० ॥
पुरत्रयस्य चैतस्य राजाऽऽसीत् कनकप्रभः । मनोवेगाऽस्य सत्पत्नी मनोनयनवल्लभा ॥ ९१ ॥
अभूतां नन्दनावस्य नन्दिताशेषबान्धवौ । देवदारुस्तयोर्ज्येष्ठो विद्युच्चिह्नः कनिष्ठकः ॥ ९२ ॥
देवदारुसुतायास्मै ददौ राज्यं महात्मने । प्रज्ञप्तिं युवराज्यं च विद्युच्चिह्नाय सक्रमम् ॥ ९३ ॥
हित्वा परिग्रहं सर्वं नृपतिः कनकप्रभः । तदा गुणधराभ्याशे तपो जैनमशिश्रियत् ॥ ९४ ॥[1]
अथ प्रज्ञप्तिसामर्थ्याद् विद्युच्चिह्नेन कोपिना । निर्घाटितोऽमुना शीघ्रं देवदारुः समभ्यव्रजत् ॥ ९५ ॥
ततो मेघनिबन्धाख्यं मेघाद्रिनिचयं पुरम् । तथा मेघनिनादं च महावनघनान्वितम् ॥ ९६ ॥
पुरत्रयमिदं सारं समादाय त्वरान्वितः । कैलासपर्वतं प्राप्य देवदारुः स तस्थिवान् ॥ ९७ ॥
रूपयौवनसंपन्नमष्टापदतनुप्रभम् । भार्याचतुष्टयं तस्य देवदारोरिदं परम् ॥ ९८ ॥
आद्या योजनगन्धा स्याद्द्वितीया कनकप्रभा । अन्या तरङ्गवेगा च तरङ्गमालिनी परा ॥ ९९ ॥
अथ योजनगन्धाया द्वे सुते भवतः परे । प्रथमा गन्धिता प्रोक्ता द्वितीया गन्धमालिनी ॥ १०० ॥
कनकायाः सुताद्वन्द्वं रूपराजितविग्रहम् । आद्या कनकचित्रा स्याद्द्वितीया स्वर्णमालिनी ॥ १०१ ॥[2]
ततस्तरङ्गवेगायाः सद्रूपं तनयाद्वयम् । तरङ्गमतिरेकाऽन्या सेनान्ताश्रितरङ्गका ॥ १०२ ॥
तथा तरङ्गमालिन्या बभूवेष्टं सुताद्वयम् । प्रभावती मता पूर्वा द्वितीया सुप्रभावती ॥ १०३ ॥
अथैता रूपसंपन्ना विद्याधरकुमारिकाः । धृत्वा कुङ्कुमिनीं[3] रन्तुं वापीजलमगुस्त्वरा ॥ १०४ ॥
तत्र वापीतटाभ्याशे शिलातलसमन्विते । रुद्रोऽप्यातापनयोगं चचार प्रीतमानसः ॥ १०५ ॥
आतापनस्थितो दृष्ट्वा कन्यास्ता रूपशालिनीः । सद्यो बभूव रुद्रोऽपि कामाकुलितमानसः ॥ १०६ ॥[4]
वस्त्राणि विचित्राणि रम्याणि विविधानि च । विद्ययाऽऽश्रमसमीपेऽसौ स्थापयामास तान्यरम् १०७
स्नानं विधाय ता वाप्यां स्वेच्छया प्रीतचेतसः । वेगात्ततः समुत्तीर्य तत्तटीरे स्थिताः पुनः ॥ १०८ ॥
तत्प्रदेशे न पश्यन्ति वस्त्राण्याभरणानि च । आयाता रुद्रसामीप्यं जगुः खेचरकन्यकाः ॥ १०९ ॥
दृष्ट्वाऽथ तं मुनिं प्रोचुर्विद्याधरकुमारिकाः । मदीयवस्त्ररत्नानि त्वया ज्ञातानि किं क्वचित् ॥ ११० ॥
श्रुत्वा तद्वचनं रुद्रो बभाषे ताः पुरः स्थिताः । यदि भार्या मे भवथ ततो दास्यामि तानि वः ॥ १११ ॥
तदीयं वाक्यमाकर्ण्य वदन्तीदं पुनस्तकाः । स्वच्छन्दा न भवामो हि विद्याधरसुता यते ॥ ११२ ॥
अस्माकं च स्वतभार्या मुने तत्क्षणमात्रतः । विद्या विनाशमायान्ति वाञ्छन्तीनां परंपराम् ॥ ११३ ॥
अस्मान् ददाति ते नूनं यदि तातो महामुने । ततो भार्या भवामोऽत्र भुवने भवतोऽखिलाः ॥ ११४ ॥[5]
तद्वाक्यतोऽमुना तासां वस्त्राण्याभरणानि च । समर्पितानि सर्वाणि प्रोक्तमेवं वचस्तकाः ॥ ११५ ॥
समातापितरौ पृष्ट्वा बान्धवान् सकलानपि । आगच्छत मदाभ्याशं बालिका द्रुतमादरात् ॥ ११६ ॥
आकर्ण्य तद्वचः कन्या संप्राप्य जनकान्तिकम् । तद्वार्ता सकला तासां स्वतातस्य निवेदिता ॥ ११७ ॥
यथैकस्मात् निर्ग्रन्थो मुनिरस्माभिरादरात् । सहसा सह सम्बन्धं कथमुक्तः कर्तुमिच्छति ॥ ११८ ॥
स्वपुत्रीवाक्यमाकर्ण्य देवदारुखगाधिपः । यथसांस्थिपुरे कान्ते प्रवेशयति सोऽधुना ॥ ११९ ॥

---

1 पप मैथिल्या 2 पप युग्मम् अ युग्ममित्यम्. 3 [धृत्वा कुङ्कुमिनीं]. 4 पप omit 106 5 पप त्रिकम्, अ त्रिकमित्यम्.

ततो महाप्रमोदेन सूर्यमण्डलनादिना । ददामि भवतीस्तस्मै नान्यथा निश्चितं सुता ॥ १२० ॥
एवं निगद्य तां क्रोडऽपि कञ्चुकी प्रेषितोऽमुना । तत्समीपं परिप्राप्य निजगादेति तं पुनः ॥१२१॥
यथाऽस्मत्पुत्रिकासक्ति भवन्तं मन्मुखादरम् । सर्वकार्यसमाधानकारणोद्यतमानसम् ॥ १२२ ॥
प्रवेशं यदि मे तत्र करोषि त्रिपुरे चिरात् । ततः कन्यां प्रयच्छामि भवतो नान्यथा क्वचित् ॥१२३॥
श्रुत्वा कञ्चुकिनो वाक्यं स्कन्दोऽपि निजगादमुम् । प्रवेशं त्रिपुरे वृद्ध करोम्येवास्य सांप्रतम् ॥१२४॥
निशम्य तद्वचो वृद्धः संप्राप्य खपतिं क्रमात् । जगादेदं पुनः प्रीतो विस्मयाकुलमानसः ॥१२५॥
राजन् मुनिर्वदत्येवं यदि कन्यां प्रयच्छसि । मह्यं तत्र प्रवेशं ते करोमि त्रिपुरे ध्रुवम् ॥१२६॥
वृद्धकञ्चुकिनास्येन देवदारुः स खेचरः । समेत्य स्कन्दमानीय यथायेम ससंभ्रमम् ॥ १२७ ॥
पूर्ववृत्तसवृत्तान्तं विजयार्धसमुद्भवम् । देवदारुर्जगादास्मै स्कन्दाय सकलं तदा ॥ १२८ ॥
विद्याधरेरितं श्रुत्वा स्कन्दोऽपि निजगादमुम् । अधुनाऽपि त्रिशूलेन सर्वं संपादयामि ते ॥ १२९ ॥
ततः स्कन्दं समारोप्य देवदारुः ससैन्यकः । विजयार्धस्य मूर्धानं क्षणादविदितं ययौ ॥ १३० ॥
विद्युन्निभं निहत्याशु स्कन्दोऽपि समरे तदा । त्रिपुरे स्थापयामास देवदारुं सविक्रमम् ॥ १३१ ॥
ततोऽष्टौ ता महाकन्यास्तदानीं देवदारुणा । स्कन्दाय विधिना दत्ताः परिणीता यथाक्रमम् ॥१३२॥
परिणीय तत कन्या रूपसंपत्समन्विताः । कृतकृत्यो बभूवायं तोषपूरितमानसः ॥ १३३ ॥
स्कन्दो यया यया सार्धं रात्रिं वसति तद्दिने । तां तां निपातयत्याशु शुक्रसंतापकारणात् ॥ १३४ ॥
याश्चाष्टौ महाकन्या निहता रतिविभ्रमात् । महाशोकभराक्रान्तस्ततः स्कन्दो विषादवान् ॥१३५॥
एवं स्थितस्य स्कन्दस्य तदा कैलासमूर्धनि । यत्र तिष्ठन्ति चैत्यानां रत्नपात्रा दिवानिशम् ॥१३६॥
देवदारुस्वसॄणामेतेषां प्रीतिकारणम् । नामानीमानि सर्वेषां भवतां कथयाम्यहम् ॥ १३७ ॥
तन्मध्ये प्रथमश्चन्द्रो यमोऽन्यो वरुणोऽपरः । सोमः कुबेरनामा तथान्योऽपि महीधरः ॥ १३८ ॥
वरसेनो महासत्त्वो हरिषेणस्तथापरः । अधुनाऽहं परेषैषां पुराणि कथयामि च ॥ १३९ ॥
पूर्वं नागपुरं तेषां तथैन्द्रपुरमुत्तमम् । अन्यच्चैवपुरं प्रोक्तं जयन्तीपुरमेव च ॥ १४० ॥
चम्पकपुरं धान्यदत्तोपपदं पुरम् । तथापरं च विज्ञेयं विजयोपपदं पुरम् ॥ १४१ ॥
मध्येविराजमि क्षेत्रैः स्वकीयं रूपराजितम् । कन्यासत्त्वं च स्कन्दाय वितीर्णं विविधरूपकम् ॥ १४२ ॥
विद्युन्मालाह्वयेनाशु येनैव धुनाऽमुना । हतं कन्याष्टकं यत्र स्कन्देन रतिमिच्छता ॥ १४३ ॥
कन्याष्टकं निहत्यायं वृद्धस्नेहप्रयोगतः । तस्थौ विषण्णचित्तोऽसौ तदा कैलासमूर्धनि ॥ १४४ ॥
अथान्तरेऽर्यिका काचिद्देशान्तरसमागता । एकेन मीनबन्धेन निम्नगां तारिता सका ॥ १४५ ॥
तच्छरीरपरामर्शात् कामभोगवशं गता । सा निदानं चकारेदं कामाकुलितमानसा ॥ १४६ ॥
भवितव्यमयसास्य मायाऽन्यस्मिन् भवे सति । संदेहमन्तरेणाहं भविष्यामि सुवल्लभे ॥ १४७ ॥
धीवरोऽपि चिरं भ्रान्त्वा संसारे सारवर्जिते । ज्येष्ठासमुद्भवो स्कन्दः सत्यकेस्तनयोऽभवत् ॥१४८॥
आर्यिकाऽपि निदानस्था कालं कृत्वा यथायुषः । सौधर्मे धर्मसंयोगाज्जाता देवी विडौजसः ॥१४९॥
मालवाख्यो नराधीशः आवन्तीनगरीपतिः । बभूवास्य महादेवी साधु मित्रवती परा ॥ १५० ॥
अनयोरभवत् तन्वी विद्युद्धारिमती सती । शिवकरपतेर्दत्ता विद्युदंष्ट्रस्य चानया ॥ १५१ ॥
सौधर्मनाकतश्च्युत्वा देवी पूर्वनिवेदिता । अनयो रूपसंपन्ना संजाता तनया परा ॥ १५२ ॥

1 पल पुष्पक, ज पुष्पकेणम्. 2 ज कन्या [कन्याः]. 3 पफ त्रिपक्षम्, ज त्रिपक्षीरम्. 4 पफ पुष्पक, ज पुष्पकेणम्. 5 पफ पुष्पक, ज पुष्पकेणम्. 6 पफ श्मशाने. 7 पफ विद्युन्निभवत्. 8 ज चार्थं. 9 ज यत्रैव. 10 ज आर्यिका.

पालयन्त्याऽपि सा पुत्री नवमे मासि दुःखतः । निर्विण्णया महादेव्या परित्यक्ता गृहान्तरे ॥१५३॥
अत्रैव नगरे कान्ते सोमशर्माऽभवद् द्विजः । भार्याऽस्य सोमिला नाम प्राणेभ्योऽपि गरीयसी ॥१५४॥
बभूवुरनयोरस्याश्चतस्रस्तनयाः पराः । भद्रा सुनन्दा तथा सौम्या वैरिणी नाम विश्रुता ॥ १५५ ॥
अन्यदैताश्चतस्रोऽपि देवतार्चनकारणात् । जग्मुः पुष्पाणि चादातुमुद्यानवनमादरात् ॥ १५६ ॥
गृहद्वारे च मोमेति नाद विदधती तदा । विलोक्य बालकां कान्तां चतस्रो विस्मयं ययुः ॥१५७॥[1]
अस्या विधाय नामेदमुमास्य भुवि विश्रुतम् । आदायेमां चतस्रोऽपि ययुर्जिनगृहं तकाः ॥१५८॥
ततस्तामिन्दुना बाला बालादित्यसमप्रभा । बालकस्य महादेव्या मित्रवत्या समर्पिता ॥ १५९ ॥
संवर्धननिमित्तेन कृपाद्रितचेतसा । मित्रवत्या च सा बाला धात्रिकाया समर्पिता ॥ १६० ॥
अन्यदेन्द्रपुराधीशश्चन्द्रसेनो महीपतिः । गिरिकर्णिकया सार्धं रूपवत्या स्वकान्तया ॥ १६१ ॥
तदा नराभिहारेण विहरन् विस्मयाकुलः । श्रावस्तीं नगरीं प्राप पताकावलिराजिताम् ॥ १६२ ॥[2]
विलोक्य तामुमामत्र मित्रवत्याः समर्पिताम् । गिरिकर्णाभिधा खेटी जग्राह बहुविस्मया ॥१६३॥
आदाय तामुमां साऽपि रूपराजितविग्रहा । पुत्रीं पुत्रविहीनायास्तनूजाया ददौ पुनः ॥ १६४ ॥
तया सुतानुरागेण स्वपुरं प्राप्य बालिका । वृद्धिं नीता प्रयत्नेन जाता विद्यासमन्विता ॥ १६५ ॥
देवकूटपुरेशाय वज्रवेगाय बालिका । खेचराय वितीर्णा सा यौवनस्थाऽन्यदा परा ॥ १६६ ॥
सद्योऽसौ दृष्टमात्रायामुमायां दयितो स्वकः । स्वच्छन्दा सा मदोन्मत्ता देवदारुस्थलं ययौ ॥१६७॥[3]
इत्थं दिने दिने श्रुत्वा कन्यामेकैकमसौ । तयाऽपि देवदत्ताख्यामीश्वराय ददौ तदा ॥ १६८ ॥
सदोऽपि च तया सार्धमुमया प्रीतचेतसः । विजयार्धगिरौ तस्थौ भुञ्जानः सुखमुत्तमम् ॥ १६९ ॥
वज्रकूटपतीशो भूतिभूरिविराजकः । कृत्वा तपश्च लोकस्य सर्वमद्भुतमुत्तमम् ॥ १७० ॥
एवंविधस्तयाधीशो मन्यमानः स्वमादरात् । अवतारं चकारासौ दक्षिणे भरते भुवि ॥ १७१ ॥[4]
तत्र लोकस्य विख्यातः शैवधर्मं प्रकाशयेत् । शैवाचार्यैः समं सर्वबहुभिः परिवारितः ॥ १७२ ॥ *
उमया सह कुर्वाणः स्वेष्टदेशेषु मैथुनम् । चकार संयतः प्रीतो विहारं द्वादशाब्दकम् ॥ १७३ ॥[5]
एतेषु द्वादशाब्देषु सर्वे विद्याधरा द्रुतम् । भयात् क्षोभं परिप्राप्य जजल्पुस्ते परस्परम् ॥ १७४ ॥
विद्यानां पारम्पर्यं समस्तानां प्रचण्डधीः । अस्मान् निपात्य वेगेन विजयार्धं ग्रहीष्यति ॥१७५॥
उमयैवमिमाः खेटास्त्रसाकुलमानसाः । कदाऽस्य मारणं कुर्मश्चिन्तयन्तः सदाऽभवन् ॥१७६॥
कृत्वा परस्परं पृच्छां खेचरा भयविह्वलाः । उमेदं मायया पृष्टा तदा योजनमन्यथा ॥ १७७ ॥ *
भुवि भर्तुस्तवैतस्य कस्मिन् काले निरम्बरे । विद्या विनाशमायान्ति कथयेदं ममाधुना ॥ १७८ ॥
निशम्य वचनं चित्रं जगौ क्षिप्रं भवस्य सा । यस्मिन् काले मया सार्धं भुञ्जानस्याथ मन्मथम् ॥१७९॥
तस्मिन् कालेऽखिला विद्या वशीकृतमहीतला । भविष्यन्त्यस्य नो वश्याः कथितं मे तेन स्फुटम् १८०
आकर्ण्येत परिप्राप्य कथोपायमभीप्सितम् । तोषपूरितचेतस्का बभूवुः खेचरा भृशम् ॥ १८१ ॥
गन्धारास्यमहादेशे कुरण्डनगरे परे । यदि सुखं समालोक्य चोमया सह शंकरम् ॥ १८२ ॥ *
आदाय खेचरैस्तत्र तस्मिन् प्रीतमानसे । निहत्य दंपती वेगात् यमलं मारिताविमौ ॥१८३॥
दृष्टेऽमुष्मिन् यथा सद्यो गन्धारविषयोऽखिलः । उपसर्गं विधायोग्रं विद्याभिनाशितो द्रुतम् ॥१८४॥
तस्मिन्नुपद्रुते तत्र नन्दिषेणो मुनीश्वरः । कुरण्डनगरं प्राप्य गन्धारविषयोत्तमम् ॥ १८५ ॥

---

1 [चतुर्भिस्तरं]. 2 पफ युग्मम्, ज युग्मम्. 3 पफ युग्मम्, ज युग्मम्. 4 पफ युग्मम्, ज युग्मम्. 5 पफ युग्मम्, ज युग्मम्. 6 पफ युग्मम्, ज युग्मम्. 7 [अत्र].

श्रुत्वा तद्वचनोपान्ते नन्दिषेणयतीश्वरम् । विश्वसेनो नृपः प्राप पुरञ्जनगराधिपः ॥ १८६ ॥
प्रणम्य तं मुनिं भक्त्या जैनं धर्मं निशम्य च । पप्रच्छेदं विनीतात्मा विश्वसेनो नराधिपः ॥१८७॥
नाथ कस्माच्छुभास्येन गन्धारविषये मम । उपसर्गो महान् जातो ब्रूहीमं विरचेतरम् ॥ १८८ ॥
विश्वसेनवचः श्रुत्वा जगादेति महामुनिः । 'मध्यमापितविद्योऽसौ खेचरैर्निहतो सुतः ॥ १८९ ॥
गन्धारविषये राजन् भवदीयेऽप्यमापिता । उपसर्गं प्रकुर्वन्ति ता विद्याः समागताः ॥ १९० ॥
श्रुत्वा मौनीश्वर वाक्यं विश्वसेनो जगाविमम् । केनोपायेन भद्रेशो भगवतीविधिवर्जितः ॥ १९१ ॥
तथापि विश्वसेनोऽपि नन्दिषेणेन सूरिणा । कृत्वेष्टकचितां दिव्यां महाविस्तीर्णपीठिकाम् ॥ १९२ ॥
कृत्वा जपार्धोपसर्गं च कृत्वा तत्पीठिकोपरि । प्रतिमायात्र तन्मध्ये प्रयत्नेन जिनेन्द्रियम् ॥ १९३ ॥
ततो बलिविधानेन तद्विधि परिवसते । अनेन विधिना राजन् सन्ति विद्या क्षमास्थिता ॥ १९४ ॥
एवं कृते सति क्षिप्रं गन्धारविषयस्तव । उपसर्गविहीनोऽसौ जायते धरणीपते ॥ १९५ ॥
श्रुत्वा मौनीश्वरं वाक्यं भक्तिनिर्भरमानसः । चकार विश्वसेनोऽत्र सर्वं मुनिनिवेदितम् ॥ १९६ ॥
तन्मेदूकूपनाम्नीय गन्धारविषयोऽखिलः । बभूवेतिपरित्यक्तो नन्दिताक्षेपजन्तुकः ॥ १९७ ॥
ततः प्रभृति सर्वत्र विजयार्धस्य दक्षिणे । भरते सर्वठिकस्य स्थापना विहिता जनैः ॥ १९८ ॥

॥ इति श्रीमीठलोहितकथानकमिदम् ॥ ९७ ॥

•

९८ राजमुनिकथानकम् ।

विदेहास्यजनान्तेऽस्ति मिथिला नगरी परा । भरतोऽस्यां नराधीशो धनसेनाऽस्य गेहिनी ॥ १ ॥
अनयोरभवन् पुत्राः शूराः पचरथो नमिः । विनयाचारसंपन्ना नीतिशास्त्रविशारदाः ॥ २ ॥
अन्यदा भरतो राजा नमिनामाऽमलाशयः । दत्त्वा दमधराख्येऽसौ दीक्षां दैगम्बरीं परम् ॥ ३ ॥
दृष्ट्वा पानीयमध्ये च पश्यन्तो स्वतनुं क्वचित् । नमिं दमधराचार्यश्चकारादेशमस्य सः ॥ ४ ॥
मुने त्वं नीरमध्यस्थं स्वशरीरबिम्बं प्रपश्यसि । स्त्रीनिमित्तं ततो नूनं तपसो भ्रंशमेष्यसि ॥ ५ ॥
गुरुवाक्यं समाकर्ण्य रागवैराग्यमागतः । निर्गत्य स मुनिः क्षिप्रं ययौ भीमां महाटवीम् ॥ ६ ॥
ततः सागरदत्ताख्यः सार्थवाहो महाधनः । सार्थेन महता युक्तस्तत्रावासमन्त सः ॥ ७ ॥
तत्र नानान्नपानादो भोगिनो नटपेटकः । तत्प्रिया कामवद् भद्रा भद्रमाता प्रियंवदा ॥ ८ ॥
सुता तयोः कलापत्रा रूपयौवनराजिता । कमनोपपदा माला कमनामशरीरिका ॥ ९ ॥
एतस्या रूपमालोक्य कामाकुलितमानसः । सद्यो बभूव मूढात्मा स मुनिस्त्यक्तताशयः ॥ १० ॥
नृत्यं चैटरूपसंपन्नां नृत्यन्तीं तत्र सादरम् । स मुनिर्दूषयामास नृत्यगीतविचक्षणः ॥ ११ ॥
श्रुत्वा तद्वचनं तत्र भृकुण्डी प्रीतमानसे । दत्ता कमनमालाऽसौ गुणसंपातसिद्धये ॥ १२ ॥
निहाय चरणं दीनस्तया कनकमालया । भुञ्जानः सुतरां भोगान् मधुरान् स विशिष्यते ॥ १३ ॥
अथ कमनमालया कृते गर्तेऽमुना सति । जगाद तनयां माता यद्विक्षेपचकारिणी ॥ १४ ॥
मद्योगर्नं प्रभुज्ञानन्त्वत्तनिः साश्रयः मुने । संतिष्ठते विनीतात्मा धनोपार्जनवर्जितः ॥ १५ ॥
ततः कमनमाला च नमिं भर्तारमादरात् । जगादैव मिथो रुष्टा धननीवपनादरम् ॥ १६ ॥

---

1 प writes verse No. 187 twice. 2 प. भगवापिता. 3 पच. पुष्पय अ पुष्पवीतय. 4 पच. भगुरानय अ भगुपुष्पवीतय. 5 पच पुष्पय अ पुष्पवीतय

मयात्रोपार्जितं मूढ भोजनं हि दिने दिने । निरुत्साहो निरामर्षो भुञ्जानः किं न लज्जसे ॥ १७ ॥[1]
मायावचनमाकर्ण्य विलक्षीभूतमानसः । तदानीं च विलक्षात्मा क्षणमेकं स तस्थिवान् ॥ १८ ॥
पूर्वपार्थिवदीरस्थं नानाजनघनान्वितम् । ययौ सचित्रसाणूर् शुण्डीरस्थामिपत्तनम् ॥ १९ ॥
तत्र प्रेक्षां स संप्राप्य रसावसानमने गते । नर्तकं नृत्यं प्रकुर्वाणो मुमोच कुसुमाञ्जलिम् ॥ २० ॥
नानाजनसमाकीर्णे सभामध्ये नमिस्तदा । दिव्यं श्लोकं पपाठेमं घनाघनकलस्वनः ॥ २१ ॥
चिन्तनीयं स्वतो दीर्घं कर्तव्यं नात्मकं सुखम् । उत्पथेन न यातव्यं न भेतव्यं स्वचोदितम् ॥ २२ ॥[2]
अथ राजसुता तन्वी कुमारी यौवनान्विता । परं नरं समादाय संभ्याऽन्येद्यसि रूपिणी ॥ २३ ॥
पट्टभेदानि रूप्यानि रत्नं रजतकाञ्चनम् । बद्ध्वा यथामठे सारनानावस्तूनि सादरम् ॥ २४ ॥
श्लोकश्लेशं समासाद्य यासाय स्वपुरादरम् । नटं द्रष्टुं समायाता सुन्दरं विटसंगता ॥ २५ ॥
चिन्तनीयं स्वतो दीर्घं श्लोकप्रथमपादकम् । श्रुत्वा सा तद्धनं दत्त्वा नटाय स्वगृहं ययौ ॥ २६ ॥
क्वचित् तपस्विनी चैका ब्रह्मचर्यकदर्थिता । परं पुरुषमादाय गन्तुकामा मदातुरा ॥ २७ ॥
पद्मरागमहानीलकनकादिकदम्बकम् । प्राभृतं च यथान्ते नटं द्रष्टुं समाययौ ॥ २८ ॥
कर्तव्यं नात्मकं सौख्यं द्वितीयश्लोकपादकम् । सा परिव्राजिकाऽऽकर्ण्य तोषकण्टकिताङ्गका ॥२९॥
वितीर्य तं मणिग्रन्थिं शैलूषाय स्वरावती । जगाम मन्दिरं मुग्धा तदा सा पाञ्चिका निजम् ॥३०॥[3]
तत्रैकः सार्थवाहोऽपि शुल्कं मत्त्वा विहाय तम् । मार्गं गच्छति वेगेन प्राप्य रत्नकदम्बकम् ॥३१॥
नटं द्रष्टुं समायातो हावभावसमन्वितम् । विलासविभ्रमोपेतं नवनाट्यरसान्वितम् ॥ ३२ ॥
उन्मार्गेण न यातव्यं श्लोकपादस्तृतीयकम् । आकर्ण्य सार्थवाहोऽयं शैलूषेण निवेदितम् ॥ ३३ ॥
रत्नग्रन्थिं प्रदायास्मै शुल्कं स नृपसंभवम् । सार्थमादाय मार्गेण ययौ धाम स्ववाञ्छितम् ॥३४॥[4]
तत्रैको राजपुत्रोऽपि निहत्य पितरं ध्रुवम् । राज्यं गृहीतुकामोऽत्र नटं द्रष्टुं ययौ धनी ॥ ३५ ॥
न भेतव्यं स्वकर्मोक्तं श्लोकपादचतुर्थकम् । निशम्य राजपुत्रोऽयं संतोषस्मितमानसः ॥ ३६ ॥
मणिग्रन्थिं प्रदायास्मै राजपुत्रो नटाय सः । युवराज्यपदे तस्मौ हित्वा सर्वां कुवासनाम् ॥ ३७ ॥[5]
रत्नग्रन्थीः समादाय चतुरोऽपि नमिः पुनः । प्रदाय हृष्टचेतस्के जगाद कनकध्वजम् ॥ ३८ ॥
धर्मेऽमुष्मिन् प्रिये तेऽयं भविष्यति सुतः शुभः । अमुं गुरुममभ्यस्य चितायां[6] मोक्तुमर्हसि ॥ ३९ ॥[7]
तदाभ्यस्तस्त्वया बाले जातमात्रोऽपि तत्क्षणात् । कृतो गुरुसमभ्यस्तः श्मशाने निघृणाशया ॥ ४० ॥
तत्काले तत्पुरे श्रीमान् विश्वसेनो महीपतिः । जगाम पञ्चतामार्ति शरीरेण[8] विवर्जितः ॥ ४१ ॥
अत्रान्तरे समालम्भ्य कुङ्कुमेन प्रसूनकैः । अर्चयित्वा प्रदायापि भूपमादाय वेश्मकम् ॥ ४२ ॥
तूर्याणि समतालानि कृत्वा तत्पुरतो नृपाः । भक्षिणः करकुम्भं हि मुमुचू राजहस्तिनम् ॥ ४३ ॥
आपणं गृहमारामं साणूरं निम्नगे तटम् । सरोवरं पुरं सर्वं बभ्राम स करी क्रमात् ॥ ४४ ॥
दृष्ट्वा पितृवने बालं गुरुवान्तरवर्तिनम् । करस्थस्वर्णकुम्भेन स्नापयामास वारणः ॥ ४५ ॥
करेण तं समादाय पृष्ठमारोप्य वेगतः । राजहस्ती जगामार्य दरबर्ल समुत्तमम् ॥ ४६ ॥
कृत्वा सिंहासने दिव्ये मेरुकूटसमप्रभे । भूयोऽपि स्नपयामास करकुम्भेन कुञ्जरः ॥ ४७ ॥
ततो भूपतयः सर्वे पट्टबन्धनकारिणः । सद्युमहत्तरा बाले कनत्कनककुम्भकैः ॥ ४८ ॥
विधाय द्युम्नस्वामिस्य छपाभिक्षिप्य मस्तके । राज्यपट्टं पर्व भुङ्क्ते बालस्य नरकुञ्जराः ॥ ४९ ॥

1 पफ कुम्मम्, ब कुम्भमिवम्. 2 पफ विच्छम्, ज विच्छमिवम्. 3 पफ कुम्मम्, ज कुम्भमिवम्. 4 पफ कुम्मम् ब कुम्भमिवम्. 5 पफ कुम्मम्, ज कुम्भमिवम्. 6 पफ चितया 7 पफ कुम्मम्, ज कुम्भमिवम्. 8 [शरीरेण]. 9 पफ कुम्मम्, ज कुम्भमिवम्.

क्रमेण यौवनं प्राप्य पुष्पदीरस्वामिपत्तने । चकार दुर्मुखो राज्यं कण्टकैः परिवर्जितम् ॥ ५० ॥
पूर्वजन्मकृतेनाथ धर्मेण पृथुसंपदम् । दुर्मुखः प्राप तेनोच्चैर्धर्मं कुरुत सज्जनाः ॥ ५१ ॥
नमिर्वैराग्यमासाद्य नृपोऽपि स्वयमुत्कटः । गुरोर्वृषभसेनस्य समीपे मुनितामितः ॥ ५२ ॥
ग्रामादिकं परिभ्रम्य तदानीं यतियोगतः । कनकप्रियं पुरं प्राप नानावनमनोरमम् ॥ ५३ ॥
तत्र राजा महासेनः पुत्रहीनः कलङ्कभाक् । बभूव तन्महादेवी विमलसेना मनःप्रिया ॥ ५४ ॥
अत्रैव नगरे रम्ये पद्मावनविशोरणे । गङ्गायक्षो कुम्भकोऽस्य विमलास्याऽभवत् प्रिया ॥ ५५ ॥
अनयोस्तनया जाता रूपयौवनगर्विता । विमलदेवीति विख्याता कलाविज्ञानकोविदा ॥ ५६ ॥
अन्यदापि दोषाय विधाय स्वगृहाजिरे । यतायत्न्यत्र तौ धसाः स्थितौ कलशं प्रति ॥ ५७ ॥
तत्काले कालभानीय चन्द्रायनविसर्जितम् । बभूव विमलदेवी च व्याकुला तत्सुता तदा ॥ ५८ ॥
विमलदेवी समालोक्य विलापं कुर्वती तदा । नमिः साधुर्वचनैर्मां प्रतिष्ठस्वैर्यया कृपी ॥ ५९ ॥
यदि त्वं बालिके मुग्धे नरमिच्छसि सांप्रतम् । प्रवेशयामि ते गेहं भाण्डकानि ततो वद ॥ ६० ॥
विमलदेवी तदाकर्ण्य तद्वचो निजगाविदम् । अहं कुमारिका साधो विद्यामन्यपारि पावन ॥ ६१ ॥
किंतु मस्थितयौ साधो विधेये यदि संगतौ । यदि मां प्रयच्छतस्तौ च ततो नान्यमहं नरम् ॥ ६२ ॥
यथापि साधुना नूपो विमलदेवी पुरःस्थिता । देवी नृपतिरस्कारकारिणी निजरूपतः ॥ ६३ ॥
विधायिममपितं दृष्ट्वा पर्यायेयं मनस्विनि । स्वस्थानेन समाण्डानि यद्वान्ते येन यान्तरम् ॥ ६४ ॥
आदाय तत्क्षणादम्बं तेन स्थापनि तानि च । [ ] ॥ ६५ ॥
तदास्न्वं प्रतिष्ठानि भाण्डकानि विलोक्य तौ । तोषपूरितचेतस्कावमूर्ता दम्पती तदा ॥ ६६ ॥
ज्ञात्वा भाण्डकवृत्तान्तं विमलदेवीनिवेदितम् । कुम्भकारो ददावस्मै हृष्टचेताः सकन्यकाम् ॥ ६७ ॥
कुम्भकारसुतां तत्र परिणीय नमिः पुनः । एकवर्षं तया सार्धं स्थितवान् प्रीतमानसः ॥ ६८ ॥
विधाय सुखं हर्षं नमिना सह सादरम् । समाता गर्भिणी बाला विमलदेवी मनोरमा ॥ ६९ ॥
एकस्मिन् दिवसे प्रोक्तं विमलदेव्या नमिस्तदा । निरुत्साहतयाऽस्मेहा कथं वासन्ति ते वद ॥ ७० ॥
विमलदेवीवचः श्रुत्वा नमिना करपालिका । कृत्वा सुवर्णसत्पुत्तली धनधान्यसहारिणी ॥ ७१ ॥
अथ गोविन्दनामाढ्यो भवधारी द्विजोत्तमः । नमिं प्राप्य परिश्रान्तो ययाचे करपालिकाम् ॥ ७२ ॥
विप्रस्य वचनं श्रुत्वा नमिर्विधाभिमन्त्रितम् । अनयाऽवस्थया तस्मै प्रददौ करपालिकाम् ॥ ७३ ॥
यथैकदिवसे नूनं यत्किंचिल्लभते द्विज । असां सर्वं तत्सामर्थ्यं तावन्यं भवता सदा ॥ ७४ ॥
नमिवाक्यं समाकर्ण्य गोविन्दो निजगावमुम् । अहो प्रजापते सत्यमेवमस्त्विति सज्जन ॥ ७५ ॥
नमिदत्तां समादाय गोविन्दः करपालिकाम् । विख्यातं पत्तनं यातो मानाजनसमाकुलम् ॥ ७६ ॥
प्रविशन्तं समालोक्य पुरमध्यं द्विजं तिमम् । पुरुरूपा महादेव्या विमलसेनाऽभिधानया ॥ ७७ ॥
उपवासविधिं सत्वामध्यस्थीसमाविधम् । कुर्वाणया समानेतुं निजविप्रः प्रवेशितः ॥ ७८ ॥
दृष्ट्वाऽसौ पुरमध्यस्थं पुरस्कृत्य स ब्राह्मणः । विमलसेनमहादेवीसमीपं नीतवांस्तदा ॥ ७९ ॥
भोजनं षड्रसोपेतं यथेष्टविधिपूर्वकम् । प्रददौ विमलसेनाऽसौ विप्राय ब्रह्मचारिणे ॥ ८० ॥

---

1 पफ स्वपन्नम. 2 पफ सुमम, ब्र सुपष्ठीसम्. 3 सुमम, ब्र सुपष्ठीसम्. 4 In all the Mss. the verse No. 71 is made up of three lines, i. e., विमलदेवीवच ...to चनधान्यसहारिणी. It appears that perhaps the second line of No. 65 is missing I have kept it blank and adjusted the other lines. 5 पफ तवया. 6 पफ सुमम, ब्र सुपष्ठीसम्.

प्रधनामेन्द्रनीलाग्निमहारत्नकदम्बकैः । मूल्यहीनैर्महादेवी कृत्वा सा करपालिकाम् ॥ ८१ ॥
वसनेन समाच्छाद्य शशिशङ्खनिभेन ताम् । विश्वसेना ददावस्मै भिक्षाचार्याय भक्तितः ॥ ८२ ॥[1]
मौनस्थेन समालम्ब्यो नवयज्ञसमागृह्य । गृहीतकरताम्बूले निर्जगाम तदालयात् ॥ ८३ ॥
आगत्य तद्गृहं शीघ्रं गोविन्दः प्रीतमानसः । नमये रत्नसंपूर्णां ददौ तां करपालिकाम् ॥ ८४ ॥
नानारत्नभृतां तत्र समादाय स्वहस्ततः । विश्वदेव्यै प्रदायासौ जगादेतां नमिः पुनः ॥ ८५ ॥
तव गर्भे सुतो भावी द्वात्रिंशल्लक्षणान्वितः । जातमात्रस्त्वया नून मोक्तव्योऽयं श्मशानके ॥ ८६ ॥
पुत्रहीनेन भूपेन काले प्राप्तेन सुन्दरि । राजहस्ती समादाय तद्राज्ये स्थापयिष्यति ॥ ८७ ॥
एवमुक्त्वा प्रियां गेहे तदालयात् प्रीतमानसाम् । नमिर्मुदितचेतस्को मौनमादाय तस्थिवान् ॥८८॥[2]
विश्वदेवी सुतं पुत्रं प्रसूता चारुलक्षणम् । आदाय तं श्मशाने च मुमोच नमिवाक्यतः ॥ ८९ ॥
अथ देवरती राजा तत्पुरे छत्रवर्जितः[3] । कालगोचरतां प्राप्तो चात्मपुण्योदयादपि ॥ ९० ॥
नृपमभिविमुक्तेन तदानीं राजहस्तिना । श्मशानात् पाणिनादाय स्वपृष्ठे स्थापितः शिशुः ॥ ९१ ॥
ततः सिंहासने मुक्त्वा बालं कुञ्जरनायकः । अभिषेकं चकारास्य धर्मकुम्भेन चात्मना ॥ ९२ ॥
राज्यपट्टं नृपा बद्ध्वा कुमारस्य महत्तराः । पादारविन्दमानेमुर्मस्तकन्यस्तपाणयः ॥ ९३ ॥
क्रमेण वृद्धिमासाद्य तदा कलशप्रिये पुरे । राज्यं कलशनामार्य चकार पृथुधर्मतः ॥ ९४ ॥
विश्वदेवीमपहाय वैराग्याहितमानसः । नमिः स्वगुरुमासाद्य दीक्षितस्तदनुज्ञया ॥ ९५ ॥
भूयोऽपि[4] विहरन् प्राप पुरिमोपपदं पुरम् । आपणारामसागरसौधवापीविराजितम् ॥ ९६ ॥
बभूव मध्यदेशे च मूलस्थानं महापुरम् । सिंहसेनो नृपस्तस्य सिंहसेनाऽस्य कामिनी ॥ ९७ ॥
अनयो रूपसंपन्ना नीलोत्पलदलेक्षिका । कन्या वसन्तसेनास्या तिष्ठत्यन्तःपुरान्तरे ॥ ९८ ॥
ततो नमिमुनिः प्राप्य मूलस्थानं पुरं परम् । यामद्वये च भिक्षार्थं प्रविष्टो राजमन्दिरम् ॥ ९९ ॥
ततः प्रविष्टमात्रः सन् कन्यां तां वीक्ष्य स चिरम् । परस्परं तयोस्तत्रानुरागो महानभूत् ॥१००॥
दरसद्मे प्रविश्यासु नमिस्तत्र दिने दिने । वसन्तसेनया सार्धं कन्यया रमतेऽनिशम् ॥ १०१ ॥
यमिनाऽऽत्मा सं नक्तं भुञ्जानाया निजेच्छया । गर्भो वसन्तसेनाया बभूव रतियोगतः ॥१०२॥
कन्यां वसन्तसेनास्यां दृष्ट्वा धात्री सुभाषत । यथात् केन गर्भस्ते विहितः पुत्रि मे वद ॥१०३॥
धात्रीवचनमाकर्ण्य कन्या प्रोवाच तां पुनः । नक्तमेको मुनिः प्राप्तस्तेन गर्भः कृतो मम ॥१०४॥
नृपस्त्री धात्रिका प्राह स्वकर्णस्थानवाननाम् । यस्मिन् दिने मुनिः प्राप्तस्तद्दिनं वेत्सि बालिके ॥१०५॥
नृपो धात्री सका प्राह मातर्नो वेद्मि तद्दिनम् । धात्र्योदिता पुनः कन्या विज्ञापननिमित्ततः ॥१०६॥
स्वसमं रन्तुकामस्य मुनेरस्य नितम्बिनि । कर्तव्यो गच्छतः पृष्ठे त्वया कुङ्कुमहस्तकः ॥ १०७ ॥
आगतस्य पुनर्नक्तं कन्यया तस्य तत्कृतम् । ज्ञातोऽसौ तेन चिह्नेन प्रभाते पुरि सर्वरे[5] ॥१०८॥
ततोऽसौ तद्भटैर्नीतः स्वगृहं भाषितः पुनः । सांप्रतं भगवन् शीघ्रं मा भोगं प्रशमं नय ॥ १०९ ॥
तस्माद्वाक्यतः साधुः कन्यया सह निर्भयः । आदित्यभवनं प्राप मूलस्थानसमुद्भवम् ॥ ११० ॥
तद्गर्भे नभस्विनाम पुत्रो भासुरविग्रहः । उत्पादितः पुनस्तूपमादित्येन प्रभावता ॥ १११ ॥
नमिरादित्यरूपेण तेजोऽभ्यागमनोदिता । एवं प्रसिद्धिमायातो लोके विस्मितमानसे ॥ ११२ ॥

---

1 पच पुस्तम्, ज गुप्तसितम्. 2 पच. विदम्, ज विद्यमितम्. 3 ज छत्रवर्जितः. 4 ज भूयोऽसौ. 5 पच. सर्वे.

भुक्तिस्तोपमस्य स्वामी प्रयातेऽस्तमितेऽहनि । कण्ठप्रियेऽपि मध्याह्ने मूलस्थाने दिनात्यये ॥ ११३ ॥
वसन्तसेनया सार्धं कामभोगं निषेव्य सा । एवं कृतप्रयोगोऽयं नमिस्तिष्ठति सत्पुरे ॥ ११४ ॥
दुर्मुखेन सुतेनास्मा कर्मक्रमेण विरागिणा । ददौ जैनेश्वरीं दीक्षां तथा नमस्विना नमिः ॥ ११५ ॥
विहरन्तोऽपि चत्वारो जिनभक्तिपरायणाः । निगमं कुम्भकारस्य संप्राप्ता दिवसात्यये ॥ ११६ ॥
आपाके मृत्तिमध्ये च कुम्भकारगृहान्तिके । तत्पुरग्रामकामेन चत्वारोऽपि मुनीश्वराः ॥ ११७ ॥
कुम्भकोऽपि तमापाकं नक्तं मुनिसमन्वितम् । ददाह कुट्टमाण्डार्थं चित्रभानुसमाभयात् ॥ ११८ ॥
उपसर्गं सहित्वाऽमुं चत्वारोऽपि यतीश्वराः । आराधनां समाराध्य निर्वाणमगमंस्परम् ॥ ११९ ॥

॥ इति श्रीराजमुनिकथानकमिदम् ॥ ९८ ॥

*

९९ उर्वशीकथानकम् ।

प्रथमा देवलोकेषु ब्रह्मलोके हि विश्रुता । इदं हि चिन्तितं तेन चन्द्रानन्दमिच्छता ॥ १ ॥
विष्णुलोके तथा स्वर्गे शक्रविष्णुमहेश्वराः । समा देवहिता सर्वे तूर्णमायान्ति सादराः ॥ २ ॥
मत्समीपं च कोऽप्येति भक्तिनिर्भरमानसः । नाहमेकोऽत्र तिष्ठामि ब्रह्मलोके ममोच्छ्रितः ॥ ३ ॥
चिन्तयित्वा चिरं ब्रह्मा स त्रिलोकदिदृक्षया । ब्रह्मलोकविरक्तात्मा मर्त्यलोकं समाययौ ॥ ४ ॥
दृष्ट्वा विष्णुमहादेवबुद्धायतनादिभासितम् । स स्थितो वनः सर्वसत्त्वग्राहकमानसः ॥ ५ ॥
तत्र सिद्धवर्णानि सद्गुणानि सर्वतः । साम्परार्थं सगीतानि लोकः कारयति स्म सः ॥ ६ ॥
तत्संस्कारं समालोक्य क्रोधमाधाय चेतसि । ब्रह्मशालां जगामाशु ब्रह्मलोकपराङ्मुखः ॥ ७ ॥
महारूपं समालोक्य तत्र पूजाविवर्जितम् । प्रथा कोपपरीतात्मा ध्यायतीति स मानसे ॥ ८ ॥
सुरब्रह्महृषीकेशेभ्यो हि विप्रप्रियचैत्यकाः । चतुराम्भोरि मया सायकवाऽप्येते प्रमादिनः ॥ ९ ॥
कर्ता हर्ता स्वयंभूश्च प्रजापतिरिह क्षितौ । हिरण्योपपदो गर्भो लोकवित्स पितामहः ॥ १० ॥
तथाऽपि सर्वलोकेन परिभूतोऽस्मि सांप्रतम् । मत्क्रियायां महत्त्वं ये च तैर्ध्येयोऽहमक्षया ॥ ११ ॥
स्वपूजास्थानमिच्छन् स महारण्यं प्रविश्य च । तपः कर्तुं समारब्धं सामान्यनरदुष्करम् ॥ १२ ॥
दिव्यवर्षसहस्राणि पर्यायमस्य वेधसः । गतानि वनविस्रस्य कुर्वाणस्य तपः परम् ॥ १३ ॥
वर्षकालप्रमाणानि सन्त्यत्र देववासिनाम् । मनुष्यादिप्रमाणं तु प्रथमं परिकीर्तितम् ॥ १४ ॥
ऋषिप्रमाणमपरं स्फुटं दिव्यप्रमाणकम् । कालप्रमाणमन्यच्च तथा ब्रह्मप्रमाणकम् ॥ १५ ॥
मनुष्यादिप्रमाणं तु प्रथमं प्रतिपाद्यते । त्रिंशन्मुहूर्तसंयुक्तमहोरात्रमिदं भवेत् ॥ १६ ॥
त्रिंशद्दिवससंभूतो मासो भवति निश्चितम् । एवं द्वादशभिर्मासैर्वर्षमेकं प्रभाष्यते ॥ १७ ॥
मनुष्याणां हि यः शुक्लः पक्षो भवति सर्वदा । तत्पितॄणां दिनं चैकं निगदन्ति मनीषिणः ॥ १८ ॥
यस्तु कृष्णः पुनः पक्षः सैव रात्रिः प्रकीर्तिता । उभयं तद्दिवारात्रिरेकमहोरात्रमिदं भवेत् ॥ १९ ॥
एभिस्त्रिंशदहोरात्रैर्दिव्यो मासो भवत्ययम् । एवं द्वादशभिर्मासैर्दिव्यं वर्षं मतं बुधैः ॥ २० ॥
एतेन वर्षमानेन समार्धायुःसहस्रकम् । अन्यैर्दुष्करं कर्म ब्रह्मणा विहितं तपः ॥ २१ ॥
एवंविधं तपः सत्या कुर्वाणस्य तपो विधिम् । महावने महाभासे कानने महदाश्रमे ॥ २२ ॥

---

1 चपक त्रिविधितार्थे 2 चपक चतुर्मुखम्, ज चतुर्मुखमिदम्. 3 ब 'सदृशत' 4 [कारयति]. 5 [स्म]. 6 चपक 'परीतात्मा 7 चपक मत्क्रियायां 8 [विधिः]. 9 चपक महाभाग

देवकोटयस्त्रयस्त्रिंशद् भूतानामपि सत्वरा । अथाष्टकोट्यो नून मार्तण्डा द्वादशापि च ॥ २३ ॥
एकादश तथा रुद्रा विष्णुरीशोऽपि च स्वयम् । मिलिता देवपुत्राश्च न पश्यन्ति विधिं क्वचित् ॥२४॥[1]
अदृष्टा वेधस क्वापि महादेवो हरिं जगौ । विष्णो न दृश्यते ब्रह्मा मया सर्वत्र वीक्षित ॥ २५ ॥
तद्वाक्यतो महादेवो विष्णुना गदित पुन । अन्वेषणा विधेरस्य क्रियते क्वापि शंकर ॥ २६ ॥
तदुक्तेन मुकुन्देनापि खगपा प्रेषिता द्रुतम् । गवेषणार्थमेतस्य ब्रह्मणोऽमुर्दिशो दश ॥ २७ ॥
चतुर्दशस्वमु ते तस्य भवनेषु गवेषणम् । चक्रु सप्रमर्श गुफा दृष्टास्त्व न कुत्रचित् ॥ २८ ॥
भुवनेषु समस्तेषु वीक्षितोऽपि विधि प्रभो । न दृष्ट क्वापि सोऽस्माभि कथित भवत स्फुटम् ॥२९॥
विष्णुनाऽपि हर प्रोक्तो यदीमं द्रष्टुमिच्छसि । तदन्तं मयसन्देशाद् वासुदेव प्रवेशय ॥ ३० ॥
तदुक्तेन ततो देवै सर्वैरपि ससंभ्रमै । प्रेषितो वायुदेवोऽथ तदन्तं प्राप वेगत ॥ ३१ ॥
अक्षिपक्ष्मनिमेषोऽयं वरस्त्रोपित्तविग्रहः । पूर्वाशाभिमुखो धीर समीरणकृतासन ॥ ३…
धराश्रितैकसत्पादो जानुस्थितपराङ्घ्रिकः । कृतोर्ध्वबाहुयुगलो गणेश्रीकुम्भकान्वितः ॥ ३… ॥
घोर तप प्रकुर्वाण पञ्चकूर्चमयकर । दृष्टो वायुकुमारेण सिविर्निमवनस्थित ॥ ३२ ॥ ॥
वासुदेव समालोक्य वेधस दूरतोऽपि सन् । परावृत्य ततो देशात्यगाम च सुरान्तिक … ३ ॥
जगौ वायुकुमारोऽपि देवानेव ससम्भ्रम । दृष्टो ब्रह्मा मया कापि कुर्वाणं तप …
तत्तदेववचः श्रुत्वा महादेवो जगाद तान् । यथा नन्द्यादयो ब्रह्मा तपसो भ… ॥ ५ ॥
तज्ज्ञात्कृत्यमो यायम्यायते न मनागपि । जाते सत्युत्तमेऽस्मिन् का प्रभा … ॥ ६ ॥
तद्वाक्य समाकर्ण्य जगौ नन्दीश्वरोऽप्यमुम् । केनोपायेन नाशोऽस्य … ॥ ७ ॥
अत्रान्तरे हरिः प्राह तमेवं पुरत स्थितम् । स्त्रीनिमित्तेन नाशोऽस्य … यत् ॥ ८ ॥
एवं निगदिते तेन भूय प्रोक्तोऽमरैरयम् । त्वं कर्म परम वे… …तण
सर्वदेववचः श्रुत्वा जगौ विष्णुर्दिवौकस । विवाहे शंकर … ॥
श्रुत्वा विष्णुदितं तत्र महादेवो हरिं जगौ । इन्द्र त्व…
निशम्य शंकरस्योक्त चक्रे नर्तकपेटकम् । तिलोत्तमा…
सप्तपार्श्वेऽखिलकरहारिभि प्रभुपादपै । फलपुष्प…
ततो नर्तितुमारब्धा तत्पुरः सा तिलोत्तमा । … यया प्रभिची परा ॥ १ ॥
दृष्ट्वा स्वपुरतो वेधा नृत्यन्तीं तां तिलोत्तमाम् । … तमङ्गल ॥ २ ॥
ततोऽन्यदिवसे जाते दक्षिणस्यां दिशि … …देवीकरार्पितम् ॥ ३ ॥
ब्रह्मा विलोक्य तां देवीं नृत्यन्तीं स्वपुर … …पता चतुर्था प्रति ॥ ४ ॥
मुखं पराङ्मुखं कृत्वा चेत् पश्यामि … …राधारवेदिन ॥ ५ ॥
यदि मे तपसः किंचिन्माहात्म्यं … जग्राह भिन्नदेशस्थिताम् ॥ ६ ॥[4]
इत्यचिन्तितमात्रेण द्वितीयं … चैकको स मुनि क्रमात् ॥ ७ ॥
यावद्विलोक्यते ब्रह्मा द्वितीयेन … तस्मै स मुनिमुदा ॥ ८ ॥
पूर्वोक्तविधिना तस्य मन्मय… चतुर्दश्यामाराधयितुमागतः ॥ ९ ॥
यावत् पश्यति तद्वत्स … …नें मुखं मृतकप्रतिमास्थितम् ॥ १० ॥

---

1 पफ कुम्भम्, ज कुम… 4 पफ कुम्भम्, ज कुम्भकान्वितम्.
3 चतुर्मुखकमिदम्. 5 पफ मु…

पूर्वोक्तविधिना नूनं ब्रह्मणस्तपसः फलम् । तिलोत्तमा सुरेशार्थे चतुर्मुखमभवन्मुखम् ॥ ५६ ॥
ततोऽन्यस्मिन् दिने जाते मस्तकोपरि तस्य च । तथा बभूव वक्त्रस्य सन्मनोहरपञ्चमम् ॥ ५७ ॥
पञ्चवर्षसहस्रस्य फलेन तपसः स्फुटम् । ब्रह्मणो मस्तके जातं पञ्चमं गार्दभं शिरः ॥ ५८ ॥
पृष्ठोपरि प्रनृत्यन्ती ब्रह्मणा तां तिलोत्तमाम् । ध्यातं मम तपो नष्टं समस्तं धरणीतले ॥ ५९ ॥
भर्तव्यो मां विहायैषा भूर्तीं यावन्न गच्छति । मन्मस्तकस्थितं पादं तावत् पश्याम्यतो ध्रुवम् ॥ ६० ॥
चतुर्मुखो विचिन्त्यैवं तत्पादग्रहणकाङ्क्षी । ऊर्ध्वं प्रसारयामास निजं दीर्घभुजद्वयम् ॥ ६१ ॥
तेन प्रसारितेऽस्मिन् प्रसाधिप्रायमञ्जसा । ज्ञात्वा सर्वाणि नष्टानि ब्रह्मदेवो मुखान्यतः ॥ ६२ ॥
नष्टेषु तेषु सर्वेषु शिरसा पञ्चमेन च । पूत्कृतं खरशब्देन हि गता हा तिलोत्तमे ॥ ६३ ॥
तिलोत्तमाऽपि संप्राप्य नाकं वेगेन तोषतः । महादेवादिदेवानां तपोभङ्गं ययौ विधेः ॥ ६४ ॥
ततस्तिलोत्तमामिन्द्रः प्रेषयत् पुरतः स्थिताम् । व्रजे त्वं मानवा सार्धं एकवर्षं प्रयाप्य ॥ ६५ ॥
तिलोत्तमामहादेव्या रूपलावण्ययुक्तया । पतिर्नीमितो ब्रह्मा स्ववशात्समेतया ॥ ६६ ॥
तत्र समस्तदेवोर्वशी ब्रह्मणोऽन्तिके । प्रेक्षतारसं च संजाता चतुर्थांऽन्यया सह ॥ ६७ ॥
ततोऽस्य ब्रह्मणः सौख्यं सुधानस्य निषेवया । उर्वश्या सह संजातो वसिष्ठो नाम नन्दनः ॥ ६८ ॥
उर्वशी वेधसः कान्ता चञ्चली प्रापकस्मा । वसिष्ठस्तत्सुतो सिद्धो वेदविद्विदितस्तराम् ॥ ६९ ॥

तथा चोक्तम्—

उर्वशी ब्रह्मणो भार्या वेश्या विख्यातसुन्दरी ।
तस्याः पुत्रो वसिष्ठाख्यो वेदविप्रगणे स्थितः ॥ ७० ॥

॥ इति श्रीब्रह्मोर्वशीमेलापककथानकम् ॥ ९९ ॥

*

१०० धन्यमित्रादिकथानकम् ।

इहान्यास्यवनान्तेऽस्ति सिद्धोपासनाश्रिते । एकत्र्यामिधं नाम पुरं सुरपुरोपमम् ॥ १ ॥
तत्पुरे धनदत्ताख्यो बभूव धनवारिधिः । तत्प्रिया धनदत्ताख्या तत्पुत्रो धन्यमित्रकः ॥ २ ॥
धनपोरपरा पुत्री धनमित्रा धनप्रिया । रूपादिगुणसर्वाङ्गी पीनोन्नतघनस्तनी ॥ ३ ॥
अन्यदा निर्धनौ भूत्वा तदा तौ धनपि मृतम् । मातृभ्यां सहितौ यातौ कौशाम्बीं धनमित्रकौ ॥ ४ ॥
महादुःखेन तत्रत्याभ्यां विप्रश्याभ्यां महाप्रभाः । यत्र मणीश्वराः दृश्य बहुपुण्यसमन्विताः ॥ ५ ॥
आगच्छतोस्तयोर्मार्गे विविधमणिदक्षयोः । अन्योन्यभारमासक्तिरभवद् धन्यमित्रयोः ॥ ६ ॥
परस्परं समालोक्य स्वस्वार्थं प्राप्तौ तकौ । हित्वा वेत्रवतीतोये तान्मणीनायतौ गृहम् ॥ ७ ॥
तदानीं मणयस्तेऽपि सुकुमारा मुनीश्वरे । गिलिता रोहितमत्स्येन महामीनेन वेगतः ॥ ८ ॥
कस्यचिद्धीवरस्येन तन्मीनो जालयोगतः । बद्ध्वा निनाय विक्रेतुं धीवरो विपणान्तरम् ॥ ९ ॥
तन्माता बहुमूल्येन गृहीत्वा तं झषं द्रुतम् । आनिनाय तकं गेहं सुतप्राघूर्णकेच्छया ॥ १० ॥
तन्मीनमपाटयत्से च मध्यतो मणमायताः । तज्जनन्या द्रुतं दिव्या गृहीता स्वोपभुक्त्या ॥ ११ ॥
आदाय तान् मणीन् दिव्यान् पुत्रपुत्रीषु सत्वरे । बभूव मारणे बुद्धिस्तन्मातुर्धनतृष्णया ॥ १२ ॥
पश्चात्तापं विधायाशु तथा ते मणयस्तया । अनर्घमूल्यसंयुक्ताः स्वसुताभ्यां समर्पिताः ॥ १३ ॥

---

1 पक तिलम्, क तिलमत्तिम्. 2 [मानवाः]. 3 [मिलित्वा]. 4 [नन्दनः]. 5 पक °मसपणियोः.

सुताऽपि तान् मणीन् प्राप्य मातरं भ्रातरौ तथा । निहन्मीति मतिं चक्रे लोभतः किं न जायते ॥१४॥
तथाऽप्यनुभयं प्राप्य तदा ते मणयोऽमलाः । भ्रात्रोः समर्पिता प्रीता सोपस्थितचित्तया ॥१५॥
विलोक्य तान् मणीन् पुत्रान् भुक्तान्यांस्तदनीहये । महावैराग्यसंपन्नावभूतां भ्रातरादिमौ ॥१६॥
परस्परं समालोच्य तद्वृत्तान्तमशेषतः । चत्वारोऽपि तके भक्त्या जिनाय ददिरे मणीन् ॥ १७ ॥
हित्वा परिग्रहं सर्वं [1]धनमित्रादयस्तदा । मुदा दमवराभ्यासे जिनभक्ताः प्रवव्रजुः ॥ १८ ॥

॥ इति [2]श्रीधनमित्राख्यभ्रातृचयकथानकम् ॥ १०० ॥

*

१०१ सागरदत्तकथानकम् ।

अत्रैव भरतक्षेत्रे जम्बूद्वीपोपलक्षिते । विषये वत्सकाख्यस्य कौशाम्ब्याख्याऽभवत् पुरी ॥ १ ॥
धनमित्रोऽभवत् धन्यो धनदत्तो धनप्रियः । यशोधरादयः पौरा वसन्त्यस्यां परिस्फुटम् ॥ २ ॥
अन्यदा भाण्डमादाय द्वात्रिंशद् वाणिजाः[3] पुरः । धनमित्रादयः सर्वे वणिज्यायै प्रतस्थिरे ॥ ३ ॥
कृतकोलाहलस्थानैर्व्याधोन्मुक्तशरव्रजैः । गृहीता दस्युभिः सर्वे [4]नीत्वा गह्वरान्तरे ॥ ४ ॥
एकैकशो विषं क्षिप्त्वा मद्ये मांसे च भोजने । विषमिश्रितमाहारं भुक्त्वा ते दस्यवो मृताः ॥ ५ ॥
अथ सागरदत्ताख्यस्तन्मध्ये वाणिजो महान् । अपरं न मृतिं प्राप्तो रात्रिभोजनवर्जनात् ॥ ६ ॥
दृष्ट्वा वणिग्जनान् सर्वान् स चौरान् मृतिमागतान् । महावैराग्यसंपन्नो बभूवायं महामनाः ॥ ७ ॥
ततः सागरदत्तोऽयं विहाय सकलं धनम् । मुदा सागरसेनान्ते तपो जैनमशिश्रियत् ॥ ८ ॥

॥ इति श्रीद्वात्रिंशद्वणिग्जनचौरलुण्टनपरस्परविषाहारभक्षण-
समस्तमरणसागरदत्ततपोग्रहणकथानकम् ॥ १०१ ॥

*

१०२ जिनदत्तकथानकम् ।

मणिचन्द्राभिधानेऽस्ति देशे मणिमती पुरी । अस्यां मणिपती राजा तत्प्रिया पृथिवी मता ॥ १ ॥
मणिचन्द्रोऽनयोः पुत्रो बभूवोर्जितशासनः । प्रतापसाधितारातिगुणरञ्जितभूतलः ॥ २ ॥
अन्यदा भूपतिर्दृष्ट्वा पलितं स्वशिरःस्थितम् । वैराग्यमगमत् सद्यो महादेवीकरार्पितम् ॥ ३ ॥
मणिचन्द्राभिधानस्य पुत्रस्य जितवैरिणः । राज्यपट्टं बबन्धाशु तत्पिता वसुधां प्रति ॥ ४ ॥
अवधिज्ञानयुक्तस्य स्थितस्य प्रासुके वने । महाद्रुमधरस्यान्ते गुरोराचारवेदिनः ॥ ५ ॥
अन्तःपुरेण सर्वेण सामन्तैर्बन्धुभिः सह । दीक्षां मणिपती राजा जग्राह जिनदेशिताम् ॥ ६ ॥
ततः श्रुतधरतां प्राप्य कृत्वान्यान्यासयोगतः । पुरीमुज्जयिनीं प्राप्य चैकाकी स मुनिः क्रमात् ॥ ७ ॥
महाश्मशानसोपाने श्रीमदुज्जयिनीमठे । सह प्रतिमया रात्रौ संतस्थे स मुनिर्मुदा ॥ ८ ॥
अथ कापालिको विद्यां वेतालाख्यां श्मशानकम् । सिद्धवरचतुरस्यामाराधयितुमागतः ॥ ९ ॥
अन्वेषयन् मुदा प्राप्यं स्थाने शवकत्रयम् । ददर्शाशु मुनिं शुभ्रं ध्यानप्रतिमास्थितम् ॥ १० ॥

---

1 [धन°]. 2 [श्रीधनमित्राख्य°]. 3 पफ द्विणिजः. 4 पफ गुम्फ, प गुम्फनितम्.
5 [मत्र]. 6 ज दस्युतो.

दृष्ट्वा तं निश्चलं तत्र प्रादाय सुतकद्वयम् । तस्यास्य मुखिकं पक्के नरकं कपालिके पुरा ॥ ११ ॥
तत्कपालेऽग्निना तप्ते सिद्धिं याति परां सति । तदा प्रवादयामास साधुना चालितं शिरः ॥ १२ ॥
तन्मस्तके घटे क्षिप्रं भयवेपितविग्रहः । अर्धसिद्धं परं हित्वा नष्टः[1] कापालिकस्ततः ॥ १३ ॥
तद्धर्मध्यानप्रवृत्तसमाधानपरायणः । स साधुध्यानान्तस्थः स्थितो सुतकसम्पदा ॥ १४ ॥
प्रभातसमये जाते रविणा निर्मलीकृते । अर्धदग्धो मुनिर्दृष्टो नरेणैकेन साधुना ॥ १५ ॥
अर्धदग्धं मुनिं दृष्ट्वा स नरः कृपयार्द्रधीः । विवेश नगरं तूर्णं पताकाध्वजशोभितम् ॥ १६ ॥
तत्पुरे जिनदत्ताख्यो धनवान् श्रेष्ठितामितः । तद्भार्या धनदत्तासीत् तत्सुतो धनदत्तकः ॥ १७ ॥
द्यूतं पानं तथा वेश्या कुत्सिता परदारकम् । हिंसास्तेयं पुनर्मांसभक्षणं व्यसनं स्मृतम् ॥ १८ ॥
अमीभिः सप्तभिर्ग्रस्तो व्यसनैः साधुनिन्दितैः । तत्सुतो निन्दिताचारो विद्वज्जनसदम्भकः ॥ १९ ॥
तद्गृहं स परिप्राप्य जिनदत्तं जगावसौ । अर्धदग्धः श्मशानान्ते साधुरेको वितिष्ठते ॥ २० ॥
निशम्य तद्वचः श्रेष्ठी श्मशानं प्राप्य वेगतः । आदाय तं मुनिं[2] तस्मात् स्वगृहं नीतवानसौ ॥ २१ ॥[3]
तद्गृहं प्राप्य वेगेन जिनदत्तोऽतिदुःखितः । वैद्यं श्रीदत्तनामानं पप्रच्छेदं ससंभ्रमः ॥ २२ ॥
साधुरेषोऽग्निना दग्धो मद्गृहे व्यवतिष्ठते । केनोपायेन वैद्येश शोभनो जायते वद ॥ २३ ॥
जिनदत्तवचः श्रुत्वा श्रीदत्तो निजगाद तम् । सोमशर्मगृहे तैलं लक्षपाकाख्यमस्ति वै ॥ २४ ॥
लक्षपाकेन तैलेन शरीरं तस्य योगिनः । शोभनं जायते साधो सर्वेऽभ्यङ्गमात्रतः ॥ २५ ॥
श्रीदत्तवाक्यमाकर्ण्य जिनदत्तस्त्वरान्वितः । सोमशर्मगृहं प्राप मणिकुट्टिममुत्तमम् ॥ २६ ॥
दृष्ट्वा तुंकारिकाभिख्यां योषितं तद्गृहे पुनः । सुखासनस्थितां प्राह तत्प्रदत्तासनस्थितः ॥ २७ ॥
लक्षपाकमिदं तैलं विद्यते तव मन्दिरे । अस्मभ्यं देहि तद्भद्रे तेन मुग्धे प्रयोजनम् ॥ २८ ॥[4]
जिनदत्तवचः श्रुत्वा जगौ तुंकारिकाऽपि तम् । प्राप्य वेश्मान्तरं श्रेष्ठिन् गृहाणैकं हि तत्कुटम् ॥ २९ ॥
तद्वाक्यतः पुनः श्रेष्ठी गत्वा तद्गृहान्तरम् । जग्राह कुम्भमेकं स सतैलपरिपूरितम् ॥ ३० ॥
आगच्छतोऽस्य वेगेन मणिकुट्टिमभूतले । करात्स्रस्तः स पतत्राशु संप्राप खण्डखण्डताम् ॥ ३१ ॥
जिनदत्तः पुनः प्राप्य तां जगाद भयान्वितः । एकस्तैलघटो भग्नो मत्करात् पतितो भुवि ॥ ३२ ॥
श्रेष्ठिवाक्यं समाकर्ण्य विहस्योवाच तं सका । द्वितीयं घटमादाय गच्छ त्वं निजमन्दिरम् ॥ ३३ ॥
तद्गृहाभ्यन्तरं प्राप्य जिनदत्तोऽतिदुःखितः । यावद् गृह्णाति हस्तेन सोऽपि मत्तोऽद्भुतं पतत् ॥ ३४ ॥
ततो भूयोऽपि तां प्राप्य समयोऽसौ जगाविमम् । द्वितीयोऽपि घटो भग्नः पतितो मत्करात् भुवि ॥ ३५ ॥
निशम्य भारतीमस्य जगादैषा वणिक्पतिम् । अन्यं तैलघटं भद्र गृहाण त्वं भयोज्झितः ॥ ३६ ॥
तद्वाक्येन परिप्राप्य तद्गृहान्तरमादरात् । तृतीयोऽपि घटो भग्नो गृह्णता पाणिना द्रुतम् ॥ ३७ ॥
श्रेष्ठिवाक्यं समाकर्ण्य ब्राह्मणी विकसन्मुखी । जिनदत्तं जगादेति स्मेरवक्त्रसरोरुहम् ॥ ३८ ॥
विश्वस्ततां परिप्राप्य भयवर्जितमानसः । गृहाणान्यं कुटं भद्र घटस्थानान्तरस्थितम् ॥ ३९ ॥[5]
निशम्य तद्वचः श्रेष्ठी दध्यौ विस्मितमानसः । ब्राह्मणीयं महासत्त्वा क्षान्तिभूषितविग्रहा ॥ ४० ॥
भग्नान् घटानिमान् नूनं पश्यन्तेऽस्य कारणम् । एतामहं प्रपृच्छामि महाक्षान्तिप्रयोजनम् ॥ ४१ ॥
चिन्तयित्वा चिरं श्रेष्ठी जगावेतां पुरःस्थिताम् । कुतः कोपं न यासि त्वं घटे ते घर्म गते ॥ ४२ ॥[6]

---

1 पच प्रदाय. 2 पच नरकस्थित 3 पच तत्पुरे. 4 पच कुमन, ज कुमकमिरस्य. 5 पच कुमन, ज कुमकमिरस्य. 6 [सर्वांगाम:]. 7 पच कुमन, ज कुमकमिरस्य. 8 पच कुमन ज कुमकमिरस्य. 9 पच निशम्य ज निशम्यमिरस्य.

जिनदत्तवचः श्रुत्वा यमाणेम सकौतुकम् । तोषपूरितचेतस्का परमामथमीयुषा ॥ ४३ ॥
नानादुःख मया प्राप्त कोपेन विहितेन भोः । यावज्जीवमतोऽमुष्य गृहीतं व्रतमुत्तमम् ॥ ४४ ॥
स्मरणेनामुना भद्र सज्जनानन्ददायका । यशोऽप्याशसमस्ताशा न रुष्याऽहं तवोपरि ॥ ४५ ॥
यथा श्रावक सम्प्राप्तं मया दुःखं सुदारुणम् । कृपा सपदया लोके कथयामि तथा शृणु ॥ ४६ ॥
अत्रैव भरतक्षेत्रे मेदपाटस्योर्विषयो महान् । आनन्दनगरं रम्यं शिवशर्मा द्विजोऽभवत् ॥ ४७ ॥
कमलश्रीः प्रिया तस्य वेदवेदाङ्गशालिनः । अष्टौ पुत्रास्तयोर्जाताः शिवभूत्यादयोऽनघाः ॥ ४८ ॥
तन्मध्ये नवमी जाता कन्याऽहं प्रियवदा । भद्रास्या रूपसंपन्ना समस्तजनवल्लभा ॥ ४९ ॥
समस्तशास्त्रनिष्णाता कलाविज्ञानकोविदा । तत्स्वजनजनव्रातमहानन्दविधायिनी ॥ ५० ॥
समस्तनगरस्यान्तः पित्रा तेन प्रदापिता । घोषणेय नृपादेशात् समस्तजनसाक्षिका ॥ ५१ ॥
मत्सुतां वक्ति यो लोकः पुरे हुंकारिकामिति । धनापहार एतस्य क्रियते निर्विकल्पकम् ॥ ५२ ॥
कोऽपि तत्सवने लोकस्तद्भयेन भणिष्यते । न मां हुंकारिकां वक्ति जिनदत्त जिनप्रिय ॥ ५३ ॥
यतो लोकेन मन्नाम द्वितीयं विहितं शुभे । अहुंकारिकमेहेति प्रसिद्धं जनविश्रुतम् ॥ ५४ ॥
अनयाऽवस्थया भद्र कुमारी सोमशर्मणा । परिणीता द्विजेनाहं रूपलावण्यसंयुता ॥ ५५ ॥
हुंकारिकामिमां नूनं न जल्पामि महामते । परिणीयामुना नीता श्रीमदुज्जयिनीमिमाम् ॥ ५६ ॥
तत्रोऽहं स्वगृहे भद्र तिष्ठामि प्रमदान्विता । ब्राह्मणोऽपि न मां जातु वक्ति हुंकारिकामिमाम् ॥५७॥
अन्यदा विप्रशालायां समस्तपुरमाहने । प्रेक्षा दत्ता मृकुन्दाय गीतनृत्यविलासिने ॥ ५८ ॥
तत्र महाद्युमो भद्र नर्टं द्रष्टुं समागतः । नर्तकं स्वमन्दिरे कान्तो नागच्छति चिरादपि ॥ ५९ ॥
तदेर्ष्यामरक्रान्ता रोषपूरितमानसा । कपाटयुगलं दत्त्वा तिष्ठामि शयनस्थिता ॥ ६० ॥
हावभावविलासाढ्यं विप्रप्रेमान्वितं नटम् । दृष्ट्वा मद्भोऽपि संप्राप्तः स्वगृहं निजलीलया ॥ ६१ ॥
तावत्स्वकरप्रकृत्या कपाटद्वयमादरात् । गृह्णन् मन्नाम सोऽत्यर्थं तिष्ठति द्वारमाश्रितः ॥ ६२ ॥
मदास्य समासाद्य तद्वाक्यं शृण्वती स्थिता । तावन्मधुरया वाचा वक्ति मां स पुनः पुनः ॥ ६३ ॥
हले माहनि मानार्हे महादेवि मनःप्रिये । द्वारमुद्घाटय क्षिप्रं त्वद्दुःखानां स्मराम्यहम् ॥ ६४ ॥
श्रुत्वाऽस्य जिनदत्त श्रेष्ठिन् वाक्यमसमीक्षितम् । भूयो मया परिध्यातं कोपारुणितनेत्रया ॥ ६५ ॥
विश्वासयं करोम्यद्य यथास्याग्र विचेतसः । न याति येन मां हित्वा नटमन्यत्र वासरम् ॥ ६६ ॥
चिन्तयन्ती चिरं यावत् तिष्ठामि शयनस्थिता । तावद्रुटेन भूयोऽपि सारनादेन जल्पितम् ॥ ६७ ॥
अयि हुंकारिके मूढे मत्तमातङ्गगामिनि । उद्धाटयसि किं नेदं द्वारं रमणि दुर्जने ॥ ६८ ॥
जिनदत्त मया भूयश्चिन्तितं तदुदितम् । निराकरोऽनेन विप्रेण विहितो मम मानकः ॥ ६९ ॥
न स्थातव्यमधुनानेन विप्रेण द्वेषकारिणा । तद्द्वेषेणापि सचिन्त्य शय्यातोऽहं समुत्थिता ॥ ७० ॥
समुत्थायाशु च शीघ्रं द्वारं कृत्वा निरर्गलम् । निर्गता सहसा दिव्यरूपविभूषिता ॥ ७१ ॥
द्वारं पिधाय विप्रोऽपि कोपारुणनिरीक्षणः । शय्यातलगतः कान्तः सुष्वाप वनिर्जां पते ॥ ७२ ॥
नानातरुसमाकीर्णमशोकवनमागता । चौरैस्तत्र गृहीताऽहं महामरणदायिभिः ॥ ७३ ॥
ततः स्वपल्लिकां नीता स्वनायाय कृतात्मना । भर्त्रा जिनयशेनाथ दत्तवन्तो भविष्यता ॥ ७४ ॥
तेनापि लोपरूपेण गृहीताऽस्मि वणिक्पते । ममैषा गणिका नूनं पट्टपत्नी भविष्यति ॥ ७५ ॥

1 अ मोयकरो. 2 अ महाकुन 3 पत्र भवत्पत्नी. 4 [महामरण].

एवं संचिन्त्य मुग्धेन कस्मिंश्चिदपि दिने सति । मम प्रकर्तुमेतेन प्रारब्धं शीतलाञ्जनम् ॥ ७६ ॥
ततो देवतया शीघ्रं स्तम्भितोऽयं सुदुःखधीः । विधाय महती पूजां क्षमयित्वा मुमोच माम् ॥ ७७ ॥
अथ पाठं प्रविष्टस्य सार्थवाहस्य गोपतेः । दत्ता धनेन तेनाहं महता भयवेदिना ॥ ७८ ॥
तेनापि मम मूढेन विधातुं शीतलाञ्जनम् । प्रारब्धं च विमुक्ताऽहं स्तम्भितेनामुना भयात् ॥ ७९ ॥
तेनापि भयभीतेन धनेन महता पुनः । दत्ताऽहं पारसीकस्य सवित्तस्य[1] कुटुम्बिनः ॥ ८० ॥
तस्माच्च पोषणं कृत्वा सुखासनविधानतः । कुटुम्बी सोऽपि यत्नेन मम दुःखितचेतसः ॥ ८१ ॥
सर्वं गृहादि श्रीखण्डं मत्कृतेऽपि प्रपञ्चधीः । कृते हि रुधिरागस्य कम्बलान्तस्य सादरम् ॥ ८२ ॥
अत्रान्तरे मम भ्राता द्रोणदेवाभिधानकः । ययाम पारसीकान्तं स्वनामादेशतो ध्रुवम् ॥ ८३ ॥
सुवर्णं विधास्याद प्रियमेतेन गच्छता । तिष्ठन्ती पुरमध्येऽहं जिनदत्त विलोकिता ॥ ८४ ॥
पारसीकप्रभुं दृष्ट्वा विधाय मम मोचनम् । अनेनोपायिनी श्रेष्ठिन्नानीय प्रेमकारिणा ॥ ८५ ॥
मूल्यं समर्पितं तेन द्रोणदेवेन सादरम् । सुहृदस्य निजकान्तस्य विधिना सोमशर्मणः ॥ ८६ ॥
जलूकाभिर्यतो रक्तमाकृष्टं मत्तनोरिदम् । ततः प्रभृति वातेन गृहीतं मे शरीरकम् ॥ ८७ ॥
मच्छरीरं समालोक्य वातग्रस्तं प्रयत्नतः । पृष्टो वैद्योऽमुना श्रेष्ठिनौषधं सोमशर्मणा ॥ ८८ ॥
सोमशर्माभियुक्तेन वैद्येन प्रीतिकारिणा । लक्षपाकमिदं तैलं कथितं वातहानये ॥ ८९ ॥
सर्वसारसमा दीप्ता चारुरूपसमन्विता । जिनदत्त ममानेन तैलेन विहिता तनुः ॥ ९० ॥
सम्यक्त्वादि समादाय जिनधर्मं गुरोः पुनः । इदं व्रतं मया साधो गृहीतं जिनभक्तितः ॥ ९१ ॥
यथा ममापि न कस्य निष्ठुरे विहिते गुरौ । रोषो भुवि विधातव्यः स हि दुःखकरो नृणाम् ॥ ९२ ॥
[2]जिनदत्त त्वया पृष्टं नितान्तं शान्तिकारणम् । यथावृत्तं मया सर्वं यत्नतः प्रतिपादितम् ॥ ९३ ॥
यावन्मात्रेण तैलेन विधत्ते ते प्रयोजनम् । तावन्मात्रं गृहीत्वेदं वैयावृत्यं मुने कुरु ॥ ९४ ॥
एवं निगद्य हृष्टात्मा तदा तुंकारिकाऽपि तम् । जिनभक्तिसमायुक्ता योपमास्य[3] स्वमङ्गलम् ॥ ९५ ॥
श्रुत्वा तुंकारिकावाक्यं जिनभक्तिपरायणम् । प्रशंसां विधायासौ वचोभिः प्रेमसंभवैः ॥ ९६ ॥
तत्तैलघटमेकं हि प्रदाय प्रीतमानसः । निजगेहं ययौ शीघ्रं जिनदत्तो धनप्रियः ॥ ९७ ॥
शरीरमखिलमेतस्य मुनेस्तत्तैलयोगतः । जिनदत्तप्रयत्नेन बभूव कनकच्छविः ॥ ९८ ॥
जिनदत्तगृहाभ्याशे तत्कारितजिनालये । जग्राह स मुनिर्धीरश्चातुर्मासीं यथागमम् ॥ ९९ ॥
अथ ताम्रमयं कुम्भं मणिरत्नादिसंभृतम् । तस्याशुभकस्थाने जिनदत्तो निखातवान् ॥ १०० ॥
रत्नकुम्भं समालोक्य निखातं वणिजेन तम् । कुबेरोपपदो दत्तस्तत्सुतो व्यसनान्वितः ॥ १०१ ॥
ततश्च कुम्भमादाय स्वमहस्तनूरुहः । निखातवानयं तूर्णं पश्यतोऽन्यत्र योगिनः ॥ १०२ ॥[4]
तातेन स्थापितं दृष्ट्वा गृहीतं सत्सुतेन च । साधुस्तत्रासुरासीनस्तत्त्वार्थध्यानचिन्तकः ॥ १०३ ॥
राद्धान्तं पठतो भक्त्या तपः साधु प्रकुर्वतः । चातुर्मासिकयोगोऽस्य समाप्तिं प्रययौ मुनेः ॥ १०४ ॥
चातुर्मासिकयोगान्ते जिनदत्तान्तिकं तदा । आपृच्छ्य क्षमयित्वा च निर्ययौ स मुनिः पुरात् ॥ १०५ ॥
श्रीमदुज्जयिनीतोऽयं निर्गत्य क्रोशमन्तरम् । स्वाध्यायध्यानतस्तस्थौ तत्पवीयवकारणात् ॥ १०६ ॥
जिनदत्तो धनं तत्र ताम्रकुम्भगतम् । अदृष्ट्वा चिन्तयामास विस्मयव्याप्तमानसः ॥ १०७ ॥
इमं रत्नमयं कुम्भं वेद्म्यहं मुनिरप्यसौ । तृतीयः कोऽपि नो वेत्ति गृहीतं साधुना धनम् ॥ १०८ ॥

---

1 ज सवित्तस्य [सवित्तस्य]. 2 [भोजनात्]. 3 पफ कुम्भम् ज कुम्भमीरम्. 4 पफ कुमार ज कुमारमीरम्.

एवं विचिन्त्य मूढात्मा जिनदत्तस्तदन्तिकम् । सम्प्राप्तस्तत्क्षणेनायं धनमिच्छल्पमानसः ॥ १०९ ॥
निरीक्ष्य तं मुनिं नत्वा हृदयम्यमहाधनः । जगादेति वचः श्रेष्ठी मायया तस्पुरः स्थितः ॥११०॥
यावन्मुनिपदाम्भोजं न दृष्टं सुरपूजितम् । तावन्न भोजनं नूनं विदधामि मनागपि ॥ १११ ॥
एवमुक्त्वा मुनेनाहं माययाऽपि सदन्तिकम् । प्रेषितो जिनभक्त्या च भक्तिनिर्भरचेतसा ॥११२॥[1]
जिनदत्तोदितं श्रुत्वा ज्ञाततत्कुटिलाशयः । जगाम सद्गृहं हृष्टो मन्दमन्दगतिक्रियः ॥ ११३ ॥
कुर्वन् जिनस्तुतिं भक्त्या स्वाध्यायं पञ्चभेदकम् । तच्चैत्यमन्दिरे तस्थौ पञ्चपञ्च दिनानि सः ॥११४॥
अन्येद्युर्जिनदत्तोऽस्य सन्ध्याऽनेहसि सत्वरम् । समं कुबेरदत्तेन जगाम मुनिसंनिधिम् ॥ ११५ ॥
मुनिं श्रेष्ठी सुतो माया तदा कृतजिनस्तुतिः । समापणादिकं कृत्वा सर्वे तस्थुर्यथासनम् ॥११६॥
अत्रान्तरे मुनिं प्राह जिनदत्तस्त्वरान्वितः । कथानकं यथा ब्रूहि महापुरुषसेवितम् ॥ ११७ ॥
जिनदत्तवचः श्रुत्वा जगौ साधुरिमं पुनः । त्वमेव प्रथमं ब्रूहि कुशलो धर्मसत्कथाम् ॥ ११८ ॥
साधुवाक्यं समाकर्ण्य जिनदत्तो जगावमुम् । ममोपरि दयां कृत्वा शृणु त्वं मत्कथानकम् ॥११९॥
कराटविषये साधो पद्माद्रिनगरं परम् । वसुपालो नृपस्तत्र धर्मलोकात्तशासनः ॥ १२० ॥
सोमसङ्घाधिपत्ये राज्ञो जितशत्रोर्नरेशिना । वसुपालेन कार्याय दूतः सम्प्रेषितो द्रुतम् ॥ १२१ ॥
पथावलक्ष्मीमध्ये क्षुधापञ्चाकदर्थितः । तस्मूलस्थितो दूतः प्राप मूर्च्छा क्षितौ पतन् ॥ १२२ ॥
मूर्च्छागतं समालोक्य तं नरं वानरो वने । स्वशरीरं जले क्षिप्त्वा समागत्य तत्समीपताम् ॥१२३॥
धूनयित्वा निजं देहं दूतोपरि स वानरः । पश्चात् प्रवीजनं चक्रे समलैः स्वसत्तनैः ॥ १२४ ॥
ततः स चेतनां प्राप्य दूतो भूमेः समुत्थितः । नीतो महाह्रदं तेन वानरेण कृपावता ॥ १२५ ॥
ह्रदमध्यं प्रविश्याशु जलं तत्र पपाय च । दूतो विभ्रम्यकोऽसौ मूर्खा दध्याविति स चेतसि ॥१२६॥
जले सेवत्र वा मार्गे पुरतो गच्छतो मम । हत्वा हरिमिमं चर्म गृहीत्वाम्य ससंभ्रमम् ॥ १२७ ॥
शीतलेन चलेनेदं परिपूर्णं त्वरान्वितः । नवाम्भिर्वं पुनर्देशं निर्विघ्नं येन याम्यहम् ॥ १२८ ॥
एवं विचिन्त्य तं नीत्वा पश्चातो भ्रष्टपातकः । जघान तत्त्वं दूतो कृतघ्नोऽसौ निषादधीः ॥१२९॥
तेन गोमवकं कृत्वा भृत्वा तु नीरसंयतः । जगाम स्वमतं देशं दूतः स्वगतियोगतः ॥ १३० ॥
स दूतो भगवन् कस्मे पतितो बलमन्तरा । भक्तेनाम्य संदत्तं जीवितं बलदर्शनात् ॥ १३१ ॥
स दूतस्तं हरिं हत्वा सोपकारं गतः क्वचित् । कुकर्मैवंविधं कर्तुं क्षमं किं तस्य पावन ॥ १३२ ॥
निशम्य तद्वचो योगी बभाषेमं ससंभ्रमम् । न युक्तं कृतमेतन कर्मेदं श्रावक स्फुटम् ॥ १३३ ॥
त्वयाऽपि श्रावक स्पष्टं कथितं यत् कथानकम् । धर्मार्थसंगतं चारु शुभकर्मरसायनम् ॥ १३४ ॥

॥ इति श्रीवृतमर्कटकारणं जिनदत्तकथानकमिदम् ॥ [१०२०१] ॥

*

१०२०२ कपिलाब्राह्मणीकथानकम् ।

तदाकर्ण्य पुनः प्राह जिनदत्तं दिगम्बरः । आकर्णयैकचित्तेन कथयामि कथानकम् ॥ १ ॥
विषये वत्सकावत्यां कौशाम्ब्यां पुरि ब्राह्मणः । शिवशर्माऽभवत् तस्य कपिला नाम गेहिनी ॥२॥
अथ विप्रे गते क्वापि वहिर्वृत्तिनिमित्ततः । शिवशर्माभिधानेन दृष्टं नकुलपोतकम् ॥ ३ ॥
तमादाय ततो विप्रो गृहमागत्य वेगतः । तद्भार्यायै समर्प्येमं जगादेत्थं पुरः स्थितः ॥ ४ ॥
मम पुत्रविहीनाया भवत्या शोकहानये । नकुलो नन्दनो भावी पालयेममतः प्रिये ॥ ५ ॥

1 पक पुस्तम्, अ पुस्तकमिदम्. 2 [संदरोत्पत्तीदम्]. 3 पच पुस्तम् अ पुस्तकमिदम्.
१ मं १९

जीवितः सत्वरं व्याघ्रस्त्वद्दीयौषधयोगतः । अस्मानेव क्षुधाग्रस्तः प्रसभं भक्षयिष्यति ॥ १० ॥[1]
ज्येष्ठेरितं समाकर्ण्य कनिष्ठोऽपि जगाद तम् । तिर्यञ्चोऽपि हि केचिच्च क्षमं यान्त्युपकारतः ॥११॥
तेन रोगाभिभूतस्य व्याघ्रस्यार्हं[2] महामते । वैयावृत्त्यं करिष्यामि दिव्यौषधविधानतः ॥ १२ ॥[3]
कनिष्ठवचनं श्रुत्वा जगौ ज्येष्ठोऽपि तं पुनः । वैयावृत्त्यं निषिद्धोऽपि यद्येतस्य करिष्यसि ॥ १३ ॥
तिष्ठैक यस्य तावत्त्वं मुहूर्तमपि दुर्विधम् । करोमि निपतः प्रातर्गानवृक्षाधिरोहणम् ॥ १४ ॥[4]
एवं निगद्य तं तत्र भ्रातरं बुद्धिवर्जितम् । आरुरोह समुत्तुङ्गं धनमित्रो महातरुम् ॥ १५ ॥
तत्समीपं परिप्राप्य कनिष्ठः कौतुकान्वितः । चिक्षेप पुण्डरीकं स स्फुरं लोचनरागिणम् ॥ १६ ॥
दिव्यौषधं समादाय तन्नेत्रे कौतुकेक्षणा[5] । तल्लोचनद्वये तेन वाग्रसेन मृतं धनम् ॥ १७ ॥
तदौषधिप्रभावेन लोचने तस्य तत्क्षणात् । काचकामलदोषेण विमुक्ते ते बभूवतुः ॥ १८ ॥
समुत्थाय ततो देशात् क्षुधाग्रस्तमानसः । वैद्यं जघान दुष्टात्मा पुण्डरीकः खलोऽहितः ॥१९॥[6]
भवन्त तस्य किं युक्तं कर्तुमीदृग्विचेष्टितम् । हता कृतोपकारोऽपि येन वैद्यो दुरात्मना ॥ २० ॥[7]
जिनदत्तवचः श्रुत्वा जगौ योगी तकं पुनः । ईदृशं कर्म नो युक्तं कर्तुं श्रावक तस्य हि ॥ २१ ॥
॥ इति श्रीजिनदत्तेन मुनिकथितं वैद्यकथानकम्[8] ॥ [१०२*३] ॥

*

१०२*४ वृषभकथानकम् ।

जिनदत्त गुणाधान जिनधर्मपरायण[9] । शृणु त्वमेकचित्तेन मत्कथानकमादरात् ॥ १ ॥
मज्ञ्नामकरेऽत्रोऽस्ति[10] चम्पास्यायां पुरि द्विजः । वेदवेदाङ्गसंयुक्तः सोमशर्माभिधानकः ॥ २ ॥
क्रियाचारसंपन्ना भर्तृभक्तिपरायणा । सोमिल्या[11] सोमशर्मा च बभूवास नितम्बिनी ॥ ३ ॥
सोमिल्लायाः सुतो जातो रूपराजितविग्रहः । सोमशर्मा पुनर्वन्ध्या सपत्नी द्वेषमिच्छति ॥ ४ ॥
अन्यदा तद्गृहं दृष्टो भद्रादिवृषभोऽविशत् । निहत्य तत्सुतं क्रुद्धा तद्विषाणे मुमोच सा ॥ ५ ॥
भद्रादिवृषभस्तस्मादग्रसितशिशुस्तदा । भ्रम्यन् पुरान्तरे दृष्टः पौरेण सकलेन सः ॥ ६ ॥
दृष्टोऽयं सर्वलोकेन कुतोऽयं बालघातकः । भुवनेषु[12] समस्तेषु प्रवेशं लभते न च ॥ ७ ॥
अन्यदा जिनदत्तोऽसौ श्रावको जिनमन्दिरे । तस्थौ कृष्णचतुर्दश्यां निशि प्रतिमया सुधीः ॥ ८ ॥
तस्यामेव च शर्वर्यां जिनदत्तप्रिया तदा । अभ्यास्यानं परिप्राप्ता लोकतो नरसंभवम् ॥ ९ ॥
पुरमध्ये सदास्थानं तदा शोधयितुं पुनः । अमितवस्य फालस्य समीपे व्यवतिष्ठते ॥ १० ॥
तत्रागतस्य वेगेन भद्रादिवृषभः सकः । निजमस्तेऽखिला तस्य फालं चिक्षेप तत्पुरः ॥ ११ ॥
दृष्ट्वा तं वृषभं लोकस्तत्फालधवलं तदा । स्तुवन् सुचरितमेव संजगाद परस्परम् ॥ १२ ॥
अनेन विधिना सोऽपि शोधयित्वा स्वकं पुनः । चचार पूर्ववत् तोषात् पुरमध्ये निजेच्छया ॥१३॥
युक्तं किं वक्तुमीदृक्षं वाक्यं लोकस्य सज्जन । येन दोषविहीनोऽपि वृषभः शिशुघातकः ॥१४॥[13]
मुनिवाक्यं समाकर्ण्य जिनदत्तो जगाविमम् । तस्य लोकस्य नो युक्तं वचनं वक्तुमीदृशम् ॥ १५ ॥
किंतु साधो भवास्थानं धर्मसंबन्धकारणम् । आकर्णयैकचित्तेन कथयामि तथापरम् ॥ १६ ॥[14]
॥ इति श्रीमुनिनिवेदितजिनदत्तद्वितीयकथानकमिदम् ॥ [१०२*४] ॥

*

1 पफ युग्मम्, ज युग्मकमिदम्. 2 पफ व्याघ्रस्यार्थं 3 पफ युग्मम्, ज युग्मकमिदम्. 4 पफ युग्मम्, ज युग्मकमिदम्. 5 [कौतुकेक्षणः]. 6 पफ दुरात्मोप° 7 पफ युग्मम्, ज युग्मकमिदम्. 8 ज द्वितीयं वैद्यकथानकमिदम्. 9 पफ °परायण 10 [°देशे°]. 11 पफ सोमिल्ल 12 [भवनेषु]. 13 पफ युग्मम् ज युग्मकमिदम्. 14 ज युग्मकमिदम्.

नकुलः कान्तवाक्येन तया कपिलया सदा । वृद्धिं नीतो विनीतात्मा तत्प्रेक्षणविधायकः ॥ ६ ॥
अन्यदा दैवयोगेन कपिलायां मनोरमः । बभूव नन्दनो रूपी स्वजनानन्ददायकः ॥ ७ ॥
बालकं मञ्चके सुप्तं विधाय नकुलस्य सा । समर्प्य कपिला याता नदीकूलं घटं प्रति ॥ ८ ॥
प्रसुप्ते दारके गेहे शून्ये मत्सरवर्जितः । ररक्ष भीतचेतस्को भ्रातृसेवापरायणः ॥ ९ ॥
अत्रान्तरे गृहं सर्पः प्रविष्टो भीमविग्रहः । दष्टो बालोऽमुना वेगात् पश्चाद्भ्रममत् पुनः ॥ १० ॥
पुनरागत्य वेगेन स सर्पोऽपि निपातितः । तद्रक्ताक्तमुखास्यो विदितो व्यवतिष्ठते ॥ ११ ॥
अथ सा ब्राह्मणी प्राप्य स्वगेहं सुतवत्सला । मञ्चकस्थं शिशुं तत्र ददर्श मृतिमागतम् ॥ १२ ॥
मृतं तं बालकं दृष्ट्वा कपिला क्रुद्धमानसा । मुसलेन समाहत्य ममार नकुलं खलम् ॥ १३ ॥
दृष्ट्वाऽथो बालमञ्चस्थं मृतं भीमं भुजङ्गमम् । सम्यग्विमृश्य परिज्ञातं बालो दष्टोऽमुना ध्रुवम् ॥ १४ ॥
गुडाञ्जनसमानाभो भीमदंष्ट्रोऽतिविग्रहः । नकुलेनापि खेलेन निहतोऽयं भुजङ्गमः ॥ १५ ॥
पुत्रकल्पो मया मूढापरीक्षणशीलया । पुत्रवर्जितया कष्टं निहतो मन्दभाग्यया ॥ १६ ॥
पुत्रं सर्पहतं दृष्ट्वा नकुलं च निपातितम् । बभूव सुमहद्दुःखं कपिलाया भुवस्तले ॥ १७ ॥
अतो भावक किं युक्तं कर्तुमीदृग्विचेष्टितम् । येन सपक्षे दोषे नकुलो निहतोऽन्यथा ॥ १८ ॥
अपरीक्षणशीलानां सहसा कार्यकारिणाम् । पश्चात्तापो भवत्येव जगति प्राणधारिणाम् ॥ १९ ॥

तथा चोक्तम्—

अपरीक्षितं न कर्तव्यं कर्तव्यं सुपरीक्षितम् ।
पश्चाद् भवति संतापो ब्राह्मणीनकुले यथा ॥ २० ॥[1]

श्रुत्वा मुनिवचः सत्यं जिनदत्तो जगावमुम् । विचारस्तु नाथ नो युक्तं यदीदं खलु योषितः ॥ २१ ॥
कथानकमिदं साधु विपक्षिप्रीतिकारणम् । धर्मार्थानुगतं लोके युष्माभिः कथितं मम ॥ २२ ॥
किं पुनर्मम योगीन्द्र सुरासुरनतक्रम । धर्मार्थसंगतं चारु कथानकमिदं शृणु ॥ २३ ॥

॥ इति श्रीकपिलाब्राह्मणीनिषद[3] जिनदत्तनिवेदित
मुनिकथानकम् ॥ [१०२*२] ॥

१०२*३ वैद्यकथानकम् ।

काशीजनपदे रम्ये वाराणस्यां पुरि प्रभुः । जितशत्रुः प्रिया चास्य रूपिणी कनकप्रभा ॥ १ ॥
बभूवास्य नरेन्द्रस्य वैद्यः श्रेयान् महाधनः । धनदत्तः कलापारो धनदत्ता च तत्प्रिया ॥ २ ॥
अनयोर्नन्दनौ ख्यातौ वैद्यशास्त्रपराङ्मुखौ । धनमित्रस्तयोराद्यो धनचन्द्रोऽपरो मतः ॥ ३ ॥
ताते च निधनं प्राप्ते तज्जीवनमपि द्रुतम् । कुलायातान्यवैद्याय वितीर्णं जितशत्रुणा ॥ ४ ॥
तस्मिन्नपि हृते वैद्यौ स्वदेशं त्यजतो द्रुतम् । चम्पकाख्यां पुरीं प्राप्तौ भ्रातरौ वैद्यकं प्रति ॥ ५ ॥
शिवभूत्याख्यवैद्यस्य समीपं भ्रातरौ ततः । समस्तं वैद्यकं ज्ञात्वा निवृत्तौ स्वगृहं प्रति ॥ ६ ॥
दृष्ट्वाऽन्धमिमं कञ्च पुण्डरीकं पथि स्थितम् । कनिष्ठो धनचन्द्राख्यो धनमित्रं जगाविति ॥ ७ ॥
व्याघ्रस्यास्यौषधं भ्रातर्ददामि परमोदयम् । कीर्तिर्धर्मोऽपि मे यत्र जीवितेऽस्मिन् प्रजायते ॥ ८ ॥
धनचन्द्रवचः श्रुत्वा धनमित्रो जगावमुम् । व्याघ्रस्य पापिसत्त्वानामुपकारो न शान्तये ॥ ९ ॥

---

1 (दृष्टे). [वतो]. 3 क युक्तमिदम् 4 कप भिषक् 5 The Mss. do not put any numbers for these stories. I have treated them as sub-stories of 102, and added the numbers in square brackets. 6 कप युक्तम् क युक्तमिदम्

जीवितः सद्यं व्याघ्रस्त्वदीयौषधयोगतः । अस्मानेव क्षुधाग्रस्तः प्रसभं भक्षयिष्यति ॥ १० ॥[1]
ज्येष्ठेरितं समाकर्ण्य कनिष्ठोऽपि जगाद तम् । तिर्यञ्चोऽपि हि केचिच्च शर्म यान्त्युपकारतः ॥११॥
तेन रोगाभिभूतस्य व्याघ्रस्याहं[2] महामते । वैयावृत्त्यं करिष्यामि दिव्यौषधिविधानतः ॥ १२ ॥[3]
कनिष्ठवचनं श्रुत्वा जगौ ज्येष्ठोऽपि तं पुनः । वैयावृत्त्य निषिद्धोऽपि यद्येतस्य करिष्यसि ॥ १३ ॥
तिष्ठैक घस्र तावत्त्वं मुहूर्तमपि दुर्विधम् । करोमि नियतं भ्रातर्यावद्वृक्षाधिरोहणम् ॥ १४ ॥[4]
एवं निगद्य तं तत्र भ्रातरं बुद्धिवर्जितम् । आरुरोह समुत्तुङ्गं धनमित्रो महातरुम् ॥ १५ ॥
तत्समीपं परिप्राप्य कनिष्ठः कौतुकान्वितः । विवेद पुण्डरीकं स स्फुटं लोचनरोगिणम् ॥ १६ ॥
दिव्यौषधं समादाय तन्नेत्रे कौतुकेक्षणा[5] । तल्लोचनद्वयं तेन तद्रसेन भृतं घनम् ॥ १७ ॥
तदौषधिप्रभावेन लोचने तस्य तत्क्षणात् । काचकामलदोषेण विमुक्ते ते बभूवतुः ॥ १८ ॥
समुत्थाय ततो देशात् क्षुधाग्रस्तमानसः । वैद्यं जघास दुष्टात्मा पुण्डरीकः खलोऽहितः ॥१९॥
भदन्त तस्य किं युक्तं कर्तुमीदृग्विचेष्टितम् । हतः कृतोपकारोऽपि येन वैद्यो दुरात्मना ॥ २० ॥[7]
जिनदत्तवचः श्रुत्वा जगौ योगी वचः पुनः । ईदृक्षं कर्म नो युक्तं कर्तुं श्रावक तस्य हि ॥ २१ ॥
॥ इति श्रीजिनदत्तेन मुनिकथितं वैद्यकथानकम्[8] ॥ [१०२*३] ॥

*

१०२*४ वृषभकथानकम् ।

जिनदत्त गुणाधान जिनधर्मपरायण[9] । शृणु त्वमेकचित्तेन मत्कथानकमादरात् ॥ १ ॥
भद्रनामकदेशोऽस्ति[10] चम्पाख्यायां पुरि द्विजः । वेदवेदाङ्गसंयुक्तः सोमशर्माभिधानकः ॥ २ ॥
जिनाचाररतपत्नी भर्तृभक्तिपरायणा । सोमिल्ला[11] सोमशर्मा च बभूवास्य नितम्बिनी ॥ ३ ॥
सोमिल्लया सुतो जातो रूपराजितविग्रहः । सोमशर्मा पुनर्वन्ध्या सपत्नीद्वयमिच्छति ॥ ४ ॥
अन्यदा तद्गृहं ह्ये भद्रादिवृषभोऽविशत् । निहत्य तत्सुतं क्रुद्धा तद्विषाणे मुमोच सा ॥ ५ ॥
भद्रादिवृषभस्तुङ्गशृङ्गस्थितशिशुस्तदा । भ्राम्यन् पुरान्तरे दृष्टः पौरेण सकलेन सः ॥ ६ ॥
दृष्टेनं सर्वलोकेन कृतोऽयं महापातकः । भुवनेषु[12] समस्तेषु प्रवेशं लभते न च ॥ ७ ॥
अन्यदा जिनदत्तोऽसौ श्रावको जिनमन्दिरे । तस्थौ कृष्णचतुर्दश्यां निशि प्रतिमया सुधीः ॥ ८ ॥
तस्यामेव च शर्वर्यां जिनदत्तप्रिया तदा । अभ्याख्यान परिप्राप्ता लोकतो नरसङ्गमम् ॥ ९ ॥
पुरमध्ये सकलस्नानं तदा शोधयितुं पुनः । अभितप्तस्य फालस्य समीपे व्यवतिष्ठते ॥ १० ॥
तत्रागत्य वेगेन भद्रादिवृषभः सकः । निजशृङ्गेऽग्निना तप्तं फालं चिक्षेप तत्पुरः ॥ ११ ॥
दृष्ट्वा तं वृषभं लोकस्तत्फालस्थवदनं तदा । शुद्धः शुद्धतरामेष सञ्जजल्प परस्परम् ॥ १२ ॥
अनेन विधिना सोऽपि घोषयित्वा स्वकं पुनः । चचार पूर्ववत् सोऽयात् पुरमध्ये निवेष्टया ॥१३॥
युक्तं किं वक्तुमीदृक्षं वाक्यं लोकस्य सज्जन । येन दोषविहीनोऽपि वृषभः शिशुघातकः ॥१४॥[13]
मुनिवाक्यं समाकर्ण्य जिनदत्तो जगाद तम् । तस्य लोकस्य नो युक्तं वचनं वक्तुमीदृशम् ॥ १५ ॥
किन्तु साधो मदाख्यानं धर्मसम्बन्धकारणम् । आकर्णयैकचित्तेन कथयामि तवापरम् ॥ १६ ॥[14]
॥ इति श्रीमुनिनिवेदितजिनदत्तद्वितीयकथानकमिदम् ॥ [१०२*४] ॥

*

1 पफ पुस्तम्, अ पुस्तकमिदम्. 2 पफ व्याघ्रस्यार्थं. 3 पफ पुस्तम्, अ पुस्तकमिदम्. 4 पफ पुस्तम्, अ पुस्तकमिदम्. 5 [कौतुकेक्षणात्]. 6 पफ दलस्त्रोय°. 7 पफ पुस्तम्, अ पुस्तकमिदम्. 8 अ द्वितीयं वैद्यकथानकमिदम्. 9 पफ °परायण. 10 [°देशे°]. 11 पफ सोमिला. 12 [भवनेषु]. 13 पफ पुस्तम् अ पुस्तकमिदम्. 14 अ पुस्तकमिदम्.

१०२*५ तापसगजकथानकम् ।

अथ गङ्गानदीकूले हस्तियूथं मनोरमम् । अन्योन्यरमणासक्तं वसति प्रीतमानसम् ॥ १ ॥
यूथाधिपतिस्तत्र श्वेतकर्णीति विश्रुतः । गन्धहस्ती प्रिया तस्य भद्राख्या बभूवाऽभवत् ॥ २ ॥
तत्सुतः श्वेतकर्णीति बभूव कलभः कलः । लब्धोऽथ निजयूथेन नितान्तं कलभप्रियः ॥ ३ ॥
कदाचित् संभ्रमन् क्वापि वनेऽसौ निपतन् भुवि । विषमूत्रमिषानेन तापसेन विलोकितः ॥ ४ ॥
उपचारेण तं नीत्वा तापसः पश्चिमात्मनः । पुपोष भोज्यभक्षेण विविधेन मुहुर्मुहुः ॥ ५ ॥
तत्तापसयत्नेन प्रसह्य क्रमतः करी । सर्वलक्षणसंपूर्णो गन्धहस्ती बभूव सः ॥ ६ ॥
ततः श्रेणिकराजेन याचितोऽसौ पुनः पुनः । तापसेन न दत्तोऽसौ महाप्रीतिकारिणा ॥ ७ ॥
भूयोऽपि याचितोऽनेन तापसोऽयं नरेशिना । करिणाऽदीयमानेन तपस्वी निहतो रुषा ॥ ८ ॥
भगवन् किं गजस्यास्य तत्तोषणपरायणम् । निहतं तापसं युक्तं महाप्रीतिविधायकम् ॥ ९ ॥
श्रावकस्य वचः श्रुत्वा बभाषेमं यतीश्वरः । हन्तुं स्वपोषकं श्रेष्ठिन् गजस्यास्य न युज्यते ॥ १० ॥
॥ इति श्रीजिनदत्तनिवेदिततृतीयतापसगजकथानकमिदम् ॥ [१०२*५] ॥

*

१०२*६ आम्रकथानकम् ।

श्रावकेदं मम स्पष्टं धर्मोपाख्यानं शुभप्रियम् । शृणु त्वमेकचित्तेन कथयामि तवाधुना ॥ १ ॥
कुरुजाङ्गलदेशेऽस्ति हस्तिनागपुरं परम् । विश्वसेनोऽत्र भूपालः प्रियधर्माऽस्य गेहिनी ॥ २ ॥
पुरपूर्वदिशो भागे कोकिलालापसुन्दरम् । महाम्रवनमुत्तुङ्गं भूपेनानेन कारितम् ॥ ३ ॥
निजकाले तत्र सर्वे सहकाराः समुद्गताः । पुष्पस्तबकभारेण फलैरपि चिरेश्चिरे ॥ ४ ॥
चूतवृक्षेषु चैतस्मिन् सर्पमादाय लोभितः । फलिते भक्षयन्तीमं तदा मुदितमानसा ॥ ५ ॥
चूतवृक्षेऽत्र तिष्ठन्त्या भक्षयन्त्या भुजंगमम् । तस्याः पतित एकस्मिन् फले हि विषबिन्दुकः ॥ ६ ॥
तदाम्रं विषयोगेन पक्वं सपदि शोभनम् । आरामोद्यानपालेऽपि दत्तो भूपस्य तत्पुरः ॥ ७ ॥
तेनापि भूभुजा तच्च महादेव्याः समर्पितम् । साऽपि तत्फलमास्वाद्य सद्यः पञ्चत्वं ययौ ॥ ८ ॥
श्रुत्वा पञ्चत्वमायातां महादेवीं नरेशिना । छिन्नं चाम्रवनं रोषात्तन्निरूपितकारिणा ॥ ९ ॥
युक्तं किं श्रावकैतस्य छेत्तुमाम्रवनं परम् । एकाम्रविहिते दोषे सर्वे चूता हि खण्डिताः ॥ १० ॥
श्रावकस्तद्वचः श्रुत्वा जगौ साधुं पुरः स्थितम् । इदं कर्तुं मुने राज्ञो न युक्तं चाम्रनाशनम् ॥ ११ ॥
॥ इति श्रीसाधुजिनदत्तकथिततृतीयकथानकम् ॥ [१०२*६] ॥

*

१०२*७ शिवनितरुकथानकम् ।

मुने मदीयमाख्यानं धर्मसम्बन्धकारणम् । आकर्णयैकभावेन कथयामि तव स्फुटम् ॥ १ ॥
माहिष्मतीपुरादेकदा वसुशर्मा व्रजोऽव्रजन् । विन्ध्यमध्ये हरिं भीमं गर्जन्तं प्रददर्श सः ॥ २ ॥
दृष्ट्वा भयानकं धान्वा सिंहमर्दितकारिणम् । आरोह तमसाऽरं शिवनेस्तरुमादरात् ॥ ३ ॥

---

1 पक पुष्पम्, ज पुष्पमिश्रम्. 2 ज 'सिवरचतुर्भि' 3 प 'पुत्रैर्' 4 ज 'लोकिलालापमी. 5 पक धर्मपूर्ण 6 पक पुष्पम्, ज पुष्पमिश्रम्. 7 [चिरं]. 8 [बहुतरं].

तत्रस्थस्य नरस्यास्य भयविह्वलचेतसः । ततो जगाम सिंहोऽपि स्वनादापूरिताम्बरः ॥ ४ ॥
ततोऽन्येन नरेणाशु दृष्ट्वा[1] राजनरा वने । आहूतास्ते समायातास्तत्समीपं क्षणेन च ॥ ५ ॥
दृष्ट्वा समीपकान् भावान् पुरुषांस्तांस्तरोरधः । समुत्तीर्य ततो वृक्षाज्जगादेति किमागताः ॥ ६ ॥
श्रुत्वा तद्वचनं तेऽपि जगुस्तं सेवसंगताः । नृपभेरीनिमित्तार्थं पश्यामोऽत्र वने तरुम् ॥ ७ ॥
निशम्य तद्वचः सोऽपि जगादैतान् पुरः स्थितान् । भेरी शिवनिवृक्षेऽत्र जायते नृपतेः परा[2] ॥८॥
ततस्तद्वचनेनाशु तत्रैस्तोपमागतैः । खण्डितः स तरुः शीघ्रं नृपभेरीनिमित्तकः ॥ ९ ॥
कण्ठीरवभयात्त्रीमायेन वृक्षेण रक्षितः । कारापयितुमेतस्य छेदं किं युज्यते मुने ॥ १० ॥[3]
जिनदत्तवचः श्रुत्वा जगादेमं यतीश्वर । इदं न युज्यते कर्तुं नरस्यास्य कुधीमतः ॥ ११ ॥

॥ इति श्रीसिंहभयरक्षितशिवनितरुच्छेदोपदेशाख्यायकपुरुषजिनदत्तमुनि-निवेदितचतुर्थकथानकमिदम् ॥ [१०२*७] ॥

१०२*८ सर्पकथानकम् ।

किंतु धर्मार्थसंयुक्तं महापुरुषसंमतम् । आकर्ण्यैकचित्तेन कथयामि कथानकम् ॥ १ ॥
विनीताख्यमहादेशे साकेतायां पुरि प्रभुः । चन्द्रमुखोऽभवत् तस्य भार्या चन्द्रमती शुभा ॥ २ ॥
शतानि पञ्च दाराणामस्य सन्ति महास्त्रियाम् । शक्रपत्नीसमानानां रूपसौभाग्यधारिणाम् ॥ ३ ॥
अनेन भूभुजा रम्या नन्दनोद्यानमध्यगा । कारापिता महावापी स्वर्णसोपानराजिता ॥ ४ ॥
हंसकारण्डवक्रौञ्चसकुन्तरवशोभना । पद्मेन्दीवरसंछन्ना जलकल्लोलसंकुला ॥ ५ ॥[4]
तत्रस्थडिण्डुकैः सार्धं नानावर्णमनोहरैः । रमन्ते सरसि चात्र नृपस्यास्य पुरस्त्रियः ॥ ६ ॥
अन्यदा रक्तलोलाक्षो लेलिहानोऽसितप्रभः । विवेश तां महावापीं क्रोधजिह्वो भयंकरः ॥ ७ ॥
दृष्ट्वा समागतं सर्पं जगौ तान् वृद्धडिण्डुकः । सर्वेऽपि मद्वचः सत्यं समाकर्णयतादरात् ॥ ८ ॥
अमुष्मात् सर्पतो नित्यं विनाशो नो भविष्यति । तस्मादिमं द्रुतं दूरं निर्वासयत सज्जनाः ॥ ९ ॥
तद्वृद्धवचनं सर्वैर्डिण्डुकैर्नाभिसंमतम् । सोऽपि मौनं समादाय तस्थौ चकितमानसः ॥ १० ॥
अत्रान्तरे नृपेणामा सर्वमन्तःपुरं द्रुतम् । अवतीर्य जलक्रीडां विधातुं वापिकाजले ॥ ११ ॥
तत्र डिण्डुकसान्निध्यात् सर्पपोतोऽतिचञ्चलः । गृहीतोऽसौ महादेव्या पाणिना पद्मकान्तिना ॥१२॥
क्षणे गृहीतमात्रेण तेन सर्पेण कोपतः । करे दष्टा महादेवी मृता तद्विषयोगतः ॥ १३ ॥
वापीजलात् समुत्तीर्य दन्तशूकोऽपि वेगतः । ननाश क्वापि दुष्टात्मा नास्ति मद्रं हि जीवितम् ॥१४॥
ततो नृपो रुषं प्राप्य महादेवीविनाशनात् । जीवघातनादिदेशासौ डिण्डुकानां प्रति प्रति ॥ १५ ॥
मार्यन्ते स्म च पाठेन डिण्डुकानखिलानरम् । भूपादेशेन ते जन्तुर्नियति केन रक्षयते ॥ १६ ॥
जिनदत्तनृपस्यास्य युक्तं किं कर्तुमीदृशम् । येन सर्पकृते कोपे डिण्डुका निहता वद ॥ १७ ॥[5]
अनूचानवचः श्रुत्वा जिनदत्तोऽपि तं जगौ । न युक्तं डिण्डिकान् हन्तुं नृपस्यैव निरागसः ॥१८॥

॥ इति श्रीजिनदत्तसाधुनिवेदितचतुर्थसर्पकथानकम् ॥ [१०२*८] ॥

1 [दृष्ट्वा]. 2 क परा. 3 पच युग्मम्, ज युग्मकमिदम्. 4 पच युग्मम्, ज युग्मकमिदम्. 5 पच युग्मम्, ज युग्मकमिदम्. 6 पच युग्मम्, ज युग्मकमिदम्. 7 पच चतुर्थ.

१०२.९ चौरकथानकम् ।

किंतु साधो ममाख्यानं विद्वज्जनमनोहरम् । त्वं मायैकविधेन कथ्यमानमशेषकम् ॥ १ ॥
अत्रैव भरतक्षेत्रे श्रीमदुज्जयिनी[1] पुरी । तस्यां महीपतिः[2] श्रीमान् बभूव श्रीपतिः प्रभुः ॥ २ ॥
रूपलावण्यसर्वाङ्गी लीलोत्सवकम्पिका । बभूवास्य महीशस्य श्रीमती दयिता परा ॥ ३ ॥
अत्रैव नगरे श्रेष्ठी नानाधनसमन्वितः । बभूव समुद्रदत्ताख्यो महासामन्तवल्लभः ॥ ४ ॥
जयन्ती कोकिलां वाचा चक्षुषीमपि सुलोचनाम् । प्रिया समुद्रदत्तस्य समुद्रं[4] मणिभूषणा ॥ ५ ॥
अथ भाण्डागारमध्यान्तं विवेश पृथिवीपतेः । चौरः[3] सर्वकलापारः सुशौरिकस्तिमिरान्वितः ॥ ६ ॥
गृह्णन् सारं धनं तत्र दृष्टोऽयं रक्षपालकैः । ततः पलायितः शीघ्रं तत्रस्थात् स सर्पवत् ॥ ७ ॥
तच्छ्रेष्ठिसद्मस्थितकूपके प्रविष्टस्तस्करस्त्वरा । मार्गितश्चारक्षितानेन भिरिकाऽन्येन सर्वतः ॥ ८ ॥
ततस्तन्मार्गतः प्राप्य तलाराः श्रेष्ठिने जगुः । हंश्रेष्ठिन् क्वापि ते दृष्टो न वा वद यथायथम् ॥ ९ ॥
निशम्य तद्वचः श्रेष्ठी समाधेताम् पुरः स्थितान् । न दृष्टोऽयं मया दृष्टो येन तं परिपृच्छत ॥ १० ॥
श्रुत्वा ते श्रेष्ठिनो वाक्यं तलाराः शान्तचेतसः । जग्मुर्नानान्तिकं तूर्णं क्षपितक्षपितस्कराः ॥ ११ ॥
रक्षकसंगते श्रेष्ठी नीत्वाऽन्तु निजमापणम् । भाण्डसमुद्गं दत्त्वा सस्नेहं समभूषयत् ॥ १२ ॥
रत्नादिसंयुतं दृष्ट्वा श्रेष्ठिनो विस्मितं सत्कं । तद्गन्धलुब्धचेतस्को जघान यमिवा पतिम् ॥ १३ ॥
साधो किं तस्य चौरस्य युक्तं श्रेष्ठिनिपातनम् । तत्पत्नीविश्वासस्य कर्तुं तन्मानितस्य च ॥ १४ ॥
श्रावकस्य वचः श्रुत्वा जगौ योगी वचः पुनः । तस्य चौरस्य नो युक्तं कर्तुं श्रेष्ठिनिपातनम् ॥ १५ ॥

॥ इति[5] श्रीजिनदत्तकथितमुनिप्रथमचौरनिहतश्रेष्ठिकथानकम् ॥ [१०२.९] ॥

*

१०२.१० मयूरकथानकम् ।

किं पुनर्मदाख्यानं महापुरुषसंभवम् । पच्यमानस्य श्रुत्वा त्वमाकर्णय सांप्रतम् ॥ १ ॥
अत्रैव भरतक्षेत्रे कौशाम्बी परमा पुरी । बभूव नृपात्मनामाभ्यां नृपतिः शासिताहितः ॥ २ ॥
पूर्णिमाचन्द्रसदृक्ष सुपक्षभरवनायति । बभूवास्य महादेवी सुन्दरी सर्वसुन्दरी ॥ ३ ॥
ततो मध्याह्नवेलायां मेरुदत्ताख्यो मुनीश्वरः । विवेशेमां पुरीं रम्यामनुक्रमविधानतः ॥ ४ ॥
श्रमसेकेन भक्तेन नृपात्मस्तवर्तिनः । चर्यामार्गेण संविष्टे धृतोऽसौ [6]राजमन्दिरे ॥ ५ ॥
पद्मरागो मणिस्तत्र मयूरेण पलायया । गिलितो वीक्षितोऽनेन साधुना साधुपक्षिणा ॥ ६ ॥
यावज्जिनस्तुतिं योगी करोत्येकाग्रमानसः । एष तावदिदं पृष्टो भरेण मणिपालिना ॥ ७ ॥
मुने मणिस्त्वया दृष्टो यदि क्वापि नरेशिनः । ततो वद यथाभूतं सत्यमापदवत्सर ॥ ८ ॥
निशम्य तद्वचः साधुरवादीत् तं भरं पुनः । भार्य येपि न पश्यामि तव रत्नं परं क्वचित् ॥ ९ ॥
दृष्टेन साधुनानेन भूयोभूयः प्रपच्छतः । तथाऽपि मोदितं किंचिन्मपि संबन्धकारणम् ॥ १० ॥
विदित्वा मार्जितं साधुरुपसर्गं परामयम् । शरीराहारसंबन्धं सावद्यं चकार सः ॥ ११ ॥
अभितप्तेन तेनैव प्रेषितस्तद्धरेण सः । तथापि जायते क्षोभो न मनागपि योगिनः ॥ १२ ॥
अत्रान्तरे मयूरोऽयं मठप्रमाणि पुनः । संप्राप मुनिसामीप्यं विहसीभूतमानसः ॥ १३ ॥

1 पफ श्रीमदुज्जयनी. 2 [पत्नी]. 3 ज चोरः. 4 पफ समुद्रम्, ज समुद्रवीरम्. 5 पफ इति निर्° 6 पफ राजमन्दिरे.

ददतः पुस्यसास यष्टिघात मुनेर्हुतम् । मयूरस गले लग्नः स पातो दैवयोगतः ॥ १४ ॥
मयूरस्तोऽमुष्मात् यष्टिघाताद् भुवस्थले । पपात स मणिः सद्यो नरेन्द्राग्निसमीक्षितः ॥ १५ ॥
दृष्ट्वा मणिं सभामध्ये शिखिकण्ठविनिर्गतम् । चक्रुर्नृपादयः सर्वे मुनेरस्य क्षमापणम् ॥ १६ ॥
नृपादिवचनं श्रुत्वा स्वनिन्दनपरायणम् । जगादैतान् स योगीन्द्रो मस्तकन्यस्तपाणिकान् ॥ १७ ॥
स्मर्तुं परवचनं खस्य नरेन्द्र यदि वा प्रभु । मुनीनां कल्पते नैवं यथोक्तागमचारिणाम् ॥ १८ ॥
मुनिवाक्यं समाकर्ण्य घनमोगपराङ्मुखम् । नृपाद्योऽभवन् सर्वे श्रावका विस्मयान्विताः ॥ १९ ॥
सापराधमपि स्पष्टं परदोषं न मुच्यते । मुनीनां वक्तुमन्येषां जिनदत्त मनागपि ॥ २० ॥[1]
निशम्य योगिनो वाक्यं जिनदत्तो निस्तरः । विलक्षो विस्मयोपेतस्तस्यौ स्वमुक्तवित्त ॥ २१ ॥
ततः कुबेरदत्तोऽपि तत्सुतो भोगनिःस्पृहः । दध्यौ स्वमानसे धीरः पितृस्नेहपराङ्मुखः ॥ २२ ॥
उपसर्गो महानस्य तस्मिन् कृत ईदृशः । करोति यावदन्यं न मत्तातो लोमलम्पटः ॥ २३ ॥
तावद्धनमहं सर्वं लोमिनोऽस्य पितुर्हुतम् । अर्पयामि सुखं येन तिष्ठत्ययमतन्द्रितः ॥ २४ ॥
एवं संचिन्त्य चोत्थाय पट्टमानीय सत्करम् । पितुः समर्पयामास तत्सुतो निगदन्निदम् ॥ २५ ॥
सम्यक्सनत्कुमारेण गृहीतं तद्धनं मया । तथाऽपि योगिनः पापतिरस्कारं ददास्यरम् ॥ २६ ॥[2]
स्ववाक्यतिनम्रो हि गृहीत्वाऽस्य पदद्वयम् । पश्चात्तापं करोत्येष भूयो भूयोऽतिलज्जितः ॥ २७ ॥
मुनेः क्षमापणं कृत्वा हित्वा सर्वं परिग्रहम् । समं कुबेरदत्तेन जिनदत्तो वनप्रियः[3] ॥ २८ ॥
मुनेर्वसिष्ठेः पार्श्वे महावैराग्यसंगत । दधौ दैगम्बरीं दीक्षां संसारार्णवतारिणीम्[4] ॥ २९ ॥
नानातपः प्रकुर्वाणावभ्यासितपरीषहौ । विहरन्तौ धरापृष्ठे सत्सुखौ यथागमम् ॥ ३० ॥

–इति वणककथानकमिदम्–

॥ महाप्रतिपदनुकारिकान्तर्गतकथामकनियसमुनिकथानकमिदम् ॥१०३॥[5]

*

१०४ पिण्याकगन्धकथानकम् ।

अथास्ति विषये सारे कान्ते पञ्चालनामनि । काम्पिल्यनगराभिख्यं पुरं सुरपुरोपमम् ॥ १ ॥
अमुष्मिन् पुरे राजा नाम्ना रत्नप्रभः प्रभुः । विद्युन्मती महादेवी तस्य विद्युत्समप्रभा ॥ २ ॥
तस्यैव भूपतेः श्रेष्ठी बभूव श्रावको महान् । जिनदत्ताभिधस्तस्य जिनदत्ता प्रिया परा ॥ ३ ॥
अथान्योऽत्र पुरे श्रेष्ठी द्वात्रिंशद्धनकोटिकः । नाम्ना पिण्याकगन्धोऽभूत् तत्प्रिया सुन्दरी मता ॥ ४ ॥
तत्सुतो विष्णुदत्तोऽभूत् कलाविज्ञानपारगः । स्वसा पिण्याकगन्धस्य सुमित्रा मित्रवत्सला ॥ ५ ॥
काम्पिल्यनगरासन्नपिप्पलग्रामवासिने । दत्ता सागरदत्ताय श्रेष्ठिने साऽनुजा क्रमात् ॥ ६ ॥
तत्सुता सूर्यमित्रासीत् सूर्यदीप्तिसमप्रभा[7] । महालावण्यसंयुक्ता कन्दोद्दलोचना ॥ ७ ॥
अथ रत्नप्रभो राजा नगरासन्नभूतले । [8]प्रजायोऽसहस्रेभ्यो वनं बहुविधं तदा ॥ ८ ॥
महासरोवरं रम्यमगाधं दीर्घमायतम् । कारापयति दृष्ट्वाला धर्मविन्यस्तमानसः ॥ ९ ॥
तस्मिन् सरोवरे रम्ये खनतोऽत्रेण तत्पराम् । कुण्डलेन वैवेन वृद्धेन चिरजीविना ॥ १० ॥

---

1 पफ क्षमम् ब क्षमममितम्. 2 पफ अनुरुक्तम्, ब अनुरुक्तममितम्. 3 ब जितप्रियः. 4 ब नैवदारिणीम्, 5 ब वणककथानकमिदम्, 6 पफ have no number but ब has 103. 7 पफ निवत्त° 8 पफ सूर्यमित्राख्य° 9 [महाबीत]. 10 पफ कुणक ब कुणकमितम्.

अथ परमया क्षेपकुम्भीश्वतभृता तदा । लब्ध्वा मञ्जूषिकां[1] तेन नीता सा निजमन्दिरम् ॥ ११ ॥[2]
एकं कुम्भं समादाय सौवर्णं स तदन्तरा । [3]वर्षीयांश्चोपसंपूर्णो जिनदत्तान्तिकं ययौ ॥ १२ ॥
गृहीत्वा तत्कुम्भं तेन लोहमूल्येन मोहिना । कारयित्वा जिनसार्धं स्थापिता जिनमन्दिरे ॥ १३ ॥
ततोऽन्यदिवसे चान्या तत्कुम्भी स्थविरेण सा । जिनदत्तान्तिकं तेन समानीता प्रमोदिना ॥ १४ ॥
विलोक्य तत्कुम्भं सोऽपि जिनदत्तेन भाषितः । ममस्कुम्भेन मे भद्र गच्छ त्वं न प्रयोजनम् ॥ १५ ॥
ततः स्वकुम्भीं[4] तेन प्राप्य पिण्याकमन्दिरम् । दत्ताऽसौ लोहमूल्येन गृहीताऽनेन लोभिना ॥ १६ ॥
ज्ञात्वा स्वर्णकुम्भीं ह्यः पिण्याको निजगादमुम् । कियन्त ईदृशा भद्र तिष्ठन्ति कुम्भकास्तव ॥ १७ ॥
पिण्याकवचनं श्रुत्वा जगादैषोऽपि तं पुनः । भद्रेदृक्कुम्भिकानां मे तिष्ठत्येकोनकं शतम् ॥ १८ ॥
एकैकं तं समादाय कुम्भकं लोहनिर्मितम् । अहन्यहनि ते श्रेष्ठिन् ददामि सकलानपि ॥ १९ ॥
एवं निगद्य पिण्याकं लोभकष्टनिकायकम् । मन्दमन्दगतिर्वृद्धो जगाम निजमन्दिरम् ॥ २० ॥
आदाय कुम्भमेकैकं पिण्याकाय दिने दिने । ददाति लोहमूल्येन स्थविरोऽसौ[6] समन्वितः ॥ २१ ॥
अथ पिण्याकोऽमुना यावद्दत्ताः कुम्भिकाः स्फुटम् । दत्ताः पिण्याकगन्धाय परमेका स्थिता सका ॥ २२ ॥
अत्रान्तरे समागत्य ग्रामात् पिप्पलपूर्वकात् । स्वसा सुमित्रनाम्न्यस्य श्रेष्ठिनं निजगादिदम् ॥ २३ ॥
विवाहं सर्पमिश्राया मत्सुतायाः सहोदरः । वर्तते साधुना कर्तुं नेच्छामि भवता विना ॥ २४ ॥
स्वसुर्वचनतः श्रेष्ठी समाहूय निजं सुतम् । जगाद वचसा साधं विष्णुदत्तं पुरःस्थितम् ॥ २५ ॥
लोहः कुम्भीन् समादाय प्रभाते चागमिष्यति । द्रम्मकेन महान्यायात् ग्रहीतुं तां त्वमर्हसि ॥ २६ ॥
एवं निगद्य तं श्रेष्ठी सुमित्रावचनादरम् । जगाम पिप्पलग्रामं तत्कुम्भास्थितमानसः ॥ २७ ॥[7]
लोहोऽन्यदिवसे जाते गृहीत्वा तां कुम्भीमसौ । विष्णुदत्तं परिप्राप्य गृहाणेमां जगाद च ॥ २८ ॥
धनकेनोदितेनापि विष्णुदत्तेन सा कुम्भी । न गृहीता गतः सोऽपि तामादाय पथान्तरम् ॥ २९ ॥
दृष्ट्वा नृपनरैः सोऽपि तमोर्ड विशिखान्तरे । नीतवान् नृपसामीप्यं समाश्रितकुम्भान्वितम् ॥ ३० ॥
आदाय तां कुम्भीं राजा तत्करात्स्वपाणिना । ज्ञात्वा तदन्तरं सर्वं नूनं स्वर्णकुम्भान्वितम् ॥ ३१ ॥
राजसमो नृपः प्राह तमोर्डं पुरतः स्थितम् । एकोनोनं शतं शीघ्रं कुम्भानामानय द्रुतम् ॥ ३२ ॥[8]
राजसमदूतमिदं निशम्य वचनं शठः । भयवेपितसर्वाङ्गो जगादेति वचः स्फुटम् ॥ ३३ ॥
भूता स्वर्णकुम्भेनोर्वीमभूपा नरकुञ्जर । [10]लब्ध्वा तव समासारं तडागे खनता मया ॥ ३४ ॥
एका कुम्भी च तन्मध्ये प्रभूतामुरुचेतसा । जिनदत्ताय मे दत्ता लोहमूल्येन भूपते ॥ ३५ ॥
अथानवतिरन्यास्ताः कुम्भिका लोहमूल्यतः । दत्ता [11]पिण्याकगन्धाय नरवृन्दारक स्फुटम् ॥ ३६ ॥
एका कुम्भी समादाय नरनाथ त्वदन्तिकम् । आयातः सांप्रतं नूनमतः कुरु यथायथम् ॥ ३७ ॥[12]
निशम्योड्वचो राजा जिनदत्तान्तिकं द्रुतम् । नरं संप्रेषयामास स्वर्णसत्कुम्भं प्रति ॥ ३८ ॥
तत्सद्वचनेनाशु जिनदत्तो भयान्वितः । आदाय काञ्चनीं मूर्तिमाजगाम नृपान्तिकम् ॥ ३९ ॥
राजानं नृपं नत्वा जिनदत्तो यथाविधि । समाभ्युपस्थितो धीरो धीरगम्भीरया गिरा ॥ ४० ॥
अज्ञानता मया राजन्नोड्डहस्तात् गुणप्रिय । गृहीतेयं कुम्भी सारा काञ्चनी लोहमूल्यतः ॥ ४१ ॥
काञ्चनीं तु परिज्ञाय परमां भूपतेऽनया । मया कारापिता जैनी प्रतिमेयं विनिश्चिते ॥ ४२ ॥[13]

---

1 ज लब्ध्वा मञ्जूषिका पर कुम्भम ज कुम्भमिदम्. 3 पफ धर्मोबोनाद 4 पफ यतऽर्थ 5 पर कुम्भम्, ज कुम्भमिदम्. 6 [स्थविरोऽसौ]. 7 [कुम्भी] 8 पफ निजम्, ज निजमिदम्. 9 पर कुम्भम्, ज कुम्भमिदम्. 10 [लब्ध्वा]. 11 पर पिण्याकगन्धाय 12 पर यथायथम्, ज यथायथमिदम्. 13 पफ विनिश्चम्, ज विनिश्चमिदम्.

जिनदत्तवचः श्रुत्वा नरेन्द्रोऽपि चमाप तम् । निर्दोषः सन् समादाय प्रतिमां याहि मन्दिरम् ॥४३॥
तद्वाक्यतः प्रधन्येशं जिनदत्तस्तयान्वितः । भूपसन्मानितो धन्यो[1] जगाम निजमन्दिरम् ॥ ४४ ॥
तदा पिनाकगन्धस्य कुशीभिः सह तद्धनम् । स्वगेहं प्रापयामास स्वनरैर्नरकुञ्जरः ॥ ४५ ॥
तत्सुतादिकुटुम्बं च कृत्वा निगडसंयुतम् । कारागारे तरां भीमे स्थापयामास भूपतिः ॥ ४६ ॥
अथ पिनाकगन्धोऽपि क्षिप्रक्षामतनुस्तदा । आगच्छन्तं च कश्चित् तं पप्रच्छेति नरं शठः ॥ ४७ ॥
भो भो नर पुरेऽस्माकं कुशलं किं न वा वद । सोऽपि तद्वाक्यतः प्राह कुशलं न गृहे तव ॥४८॥
कुशीदोषेण ते श्रेष्ठिन् गृहीतं सकलं धनम् । कुटुम्बं च धृतं राज्ञा त्वदीयं व्यवतिष्ठते ॥ ४९ ॥
निशम्य तद्वचः श्रेष्ठी स्वजङ्घायुगलं रुषा । चूर्णयित्वा सुपाषाणैर्निजपादयुगं तथा ॥ ५० ॥
पञ्चत्वप्राप्तवानेष तृतीयप्रस्तरे[2] शठः । द्वाविंशतिसमुद्रायुर्जातो लल्लकनामनि ॥ ५१ ॥

॥ इति श्रीषष्ठनरकसमुद्भवतृतीयप्रस्तरलल्लकनामधेयगमनद्वाविंशति-
सागरायुःस्थितिपरिग्रहपरायणपिनाकगन्ध-
श्रेष्ठिकथानकमिदम् ॥ १०४ ॥[3]

*

१०५ हस्तकश्रेष्ठिकथानकम् ।

अङ्गाभिधमहादेशे पुरी चम्पाभिधा परा । धनप्रवाहनो राजा बभूवास्यां प्रजापतिः ॥ १ ॥
रूपिणी तत्प्रिया रम्या सुन्दरीकाभिधा प्रिया । पीनोन्नतकुचद्वन्द्वा पुण्डरीकनिभेक्षणा ॥ २ ॥
तस्यैव नृपतेः श्रेष्ठी बभूव धनसंयुतः । स लुब्धनामकोऽस्यापि भार्या नागवसुः परा ॥ ३ ॥
रूपयौवनसंपन्ना कलाविज्ञानकोविदा । अभूतां नन्दनौ साधू नन्दिताशेषबान्धवौ ॥ ४ ॥
यक्षोपपदो दत्तस्तयोर्ज्यायानभूत् सुतः । नागोपपदको दत्तः कनिष्ठोऽपि यथाक्रमम् ॥ ५ ॥
लुब्धश्रेष्ठी पुनः स्वर्णौ द्वौ हयौ द्वौ गजौ मृगौ । द्वौ यक्षौ द्वौ मिथौ दिव्यौ विधाय स्वगृहे न्यधात् ॥६॥
इत्येकं वृषभं दिव्यं पद्मरागविनिर्मितम् । द्वितीयं तत्समं कर्तुं चक्रे यत्नमहर्निशम् ॥ ७ ॥
सप्तरात्रं घटे धारः सपाते पतति ध्रुवम् । महाजलभरापूर्णा विवेशासौ सुरापगाम् ॥ ८ ॥
प्रासादस्थितया देव्या स्थितया सुरसं प्रति । काष्ठान्युत्तारयन् दृष्टो नक्तं गङ्गाजलस्थसौ ॥ ९ ॥
निरीक्ष्येमं महादेवी गृह्णन्तं काष्ठसंचयम् । जगाद भूपतिं नक्तं विस्मयव्याप्तमानसम् ॥ १० ॥
पश्य पश्य प्रिय क्षिप्रं चित्रं गुरुतरं प्रभो । विद्यतेऽस्मत्पुरे कोऽपि महादारिद्र्यपीडितः ॥ ११ ॥
येनेदृशे घने देवे वर्षति दुःस्थितो नरः । कोऽपि गृह्णाति काष्ठानि गङ्गावाहव्यवस्थितः ॥ १२ ॥
आहूयेमं प्रभातेऽस्मै प्रदेहि विविधं धनम् । येन दारिद्र्यपङ्केन स्पृश्यतेऽयं न जातुचित् ॥ १३ ॥[4]
महादेवीवचः श्रुत्वा प्रभातसमये सति । आजुहाव नरैरेतं नराधीशः समागतम् ॥ १४ ॥
दृष्ट्वा स्वपुरवास्तव्यं श्रेष्ठिनं विहसन् मनाक् । जगाद विस्मितस्वान्तो भूपतिर्लुब्धवाणिजम् ॥१५॥
भो भो नर गृहाणेदं मदीयं विविधं धनम् । येन तिष्ठसि[6] संतुष्टो मदीये नगरे चिरम् ॥ १६ ॥[7]
निशम्य भूपतेर्वाक्यं लुब्धश्रेष्ठी जगाविमम् । महताऽपि धनेनेश न कार्यं मे मनागपि ॥ १७ ॥
किं तु मे विद्यते चैकोऽन्यायनाय हरिर्गृहे । तत्समं यदि देहि त्वं गृह्णाम्येतं तव स्फुटम् ॥१८॥[8]
लुब्धश्रेष्ठीवचः श्रुत्वा भूपतिः प्राह तं पुनः । गत्वा मद्गोकुले श्रेष्ठिन् गृहाण वृषभं परम् ॥ १९ ॥

---

1 [धन्यो]. 2 ज "प्रस्तारे" 3 पफज put No 104. 4 ज चातुरक्रमीदम्. 5 पफ omit No. 14 6 [तिष्ठसि]. 7 पफ युग्मम्, ज युग्मकमिदम्. 8 पफ युग्मम्, ज युग्मकमिदम्.
9 मे ॥

श्रेष्ठी नृपस्य वाक्येन प्राप्य तद्गोकुलं द्रुतम् । स्वगोपक्षितम तत्र न पश्यति वृषं परम् ॥ २० ॥
यावत्स मोऽकुलत् प्राप्य नरेन्द्रं वक्ति वाणिज । मद्गोपतिसमस्ताम विद्यते वृषभो न च ॥ २१ ॥
स्वगोकुलेऽखिले रक्षन् मल्लीवर्दसंनिभ । न दृष्टो वृषभो यावत् केनापतो वृषं विना ॥२२॥
आकर्ण्य तद्वचो राजा श्रेष्ठिनं निजगौ तदा । समायो वृषभो मद्य कीदृशो मे प्रदर्शय ॥ २३ ॥
नरेन्द्रवचनं श्रुत्वा लुब्धश्रेष्ठी जगाद तम् । गत्वा मद्भवन नृप गोपतिर्मम दृश्यताम् ॥ २४ ॥
नृपालः श्रेष्ठिवाक्येन तद्गृहे कौतुकाशया । हरिद्रत्नादिभूम्यानि पश्यतीमानि तत्पथा ॥ २५ ॥
कानिचित्काञ्चनैर्दिव्यैः कृतानि वरशिल्पिभि । कानिचिन्मौक्तिकैर्दिव्यैः कानिचित्प्रवालकैः ॥२६॥
कानिचिच्चन्द्रकान्ताभैः कानिचिद्विसनिभैः । पुष्परागेन्द्रनीलैश्च मणिभिर्भान्ति कानिचित् ॥२७॥
विलोक्यैतानि भूम्यानि चित्ररूपाणि तद्गृहे । ततश्चत्वचेतस्को विस्मयं नृपतिर्ययौ ॥ २८ ॥
पद्मावतीप्रसूनाभपद्मरागविनिर्मितम् । ददर्श नृपती रम्यं वृषभं मूल्यवर्जितम् ॥ २९ ॥
दृष्ट्वेमं वृषभं रम्यं विस्मयव्याप्तमानसः । जगाद श्रेष्ठिनं तत्र सोपकण्ठकिवाक्रकः ॥ ३० ॥
स्वबलीवर्दसंकाशो मद्गृहे न कदाचन । ममेदमधुना श्रातं मधुना वस्तितेन किम् ॥ ३१ ॥
नितान्तं पद्मसोपेदं सर्वशाखाविपु स्थितम् । चकार भोजनं नृप मद्गृहे प्रीतमानसः ॥ ३२ ॥
सुवर्णपात्रिकां भृत्वा नानारत्नैः प्रमोदभृतः । तस्मिन्ना नामवस्तारत्ना लुब्धश्रेष्ठिको ददौ ॥ ३३ ॥
नानारत्नभृतां पात्रीं महारत्नविनिर्मिताम् । त्वं देहि नरनाथाय भार्यया सौ प्रणोदितः ॥ ३४ ॥
रत्नपत्नी समानाम प्रसारितकरद्वय । भूपाल्सुरत्नतत्त्वो श्रेष्ठी दानपराङ्मुखः ॥ ३५ ॥
रत्नपत्करं दृष्ट्वा संप्रदानपराङ्मुखम् । धनेऽप्यसार्गाङुम तस्य स्पष्टहस्तामिषं नृपः ॥ ३६ ॥
इदं नाम विधायास्य सार्थकं नरकुञ्जर । विस्मयव्याप्तचेतस्को जगाम निजमन्दिरम् ॥ ३७ ॥
तद्गृहार्थं महालोभगृहीतः स्पष्टहस्तकः । जगाम सिंहलद्वीपं बोधिसो यथा धनं प्रति ॥ ३८ ॥
चत्वारोऽन्यैः प्राप्य कनकम्य स वाणिजः । वार्धिमध्ये रतिं प्राप मित्रबोधिसकः सुधीः ॥३९॥
तत्र स्वमन्दिरे सर्वो पद्मसार्थं मयकरः । रत्नद्विननिधि तत्र तीक्ष्णदंष्ट्रे निविष्टते ॥ ४० ॥
न कस्यचित् कदाचिच्च धनान्ते स्यातुमप्ययम् । ददाति दन्तशूकोऽसि भीषिताशेषजन्तुकः ॥४१॥
ततो गरुडदत्तेन ज्येष्ठपुत्रेण रोषतः । निहतोऽयं मतायुः संप्रतुर्थं नरकं ययौ ॥ ४२ ॥
ततो गरुडदामिस्यैः बलपर्वे स तत्क्षणे । जातो द्वात्रिंशदायुर्नारकः पापकर्मतः ॥ ४३ ॥
योऽसौ गरुडनामाभ्य ज्येष्ठपुत्रस्तुरीयके । श्वभ्रे धृतिं परिप्राप्य तदायुर्नारकोऽभवत् ॥ ४४ ॥
मायावन्या समं दुःखी नागदत्तो विवेकवी । धर्मं श्रुत्वा मुनेः पार्श्वे बभूव श्रावको महान् ॥४५॥
कामभोगान् विहायाशु संसारत्रस्तमानसा । सुमनान्ते प्रवव्राज धीरा नामवसुंधरम् ॥ ४६ ॥
नागदत्तोऽपि संपास्य धर्मं श्रावकगोचरम् । प्रययौ पयतावाधि सुखपापानपोमतः ॥ ४७ ॥
विमाने मन्दिरोपास्ये ब्रह्मलोकप्रभुत्व । देवो दशसमुद्रायुर्वभूवोऽसौ महाप्रभुः ॥ ४८ ॥
नागवस्वर्यिका साध्वी धर्मोपानवने स्मृत । विधायानशनं कृत्वा महाशुक्रेऽभवत् सुरः ॥ ४९ ॥
साष्टदसपरो भीमपातुपनरकोद्भव । ततो निःसृत जातोऽयं वृषभास्यमिरो वशी ॥ ५० ॥
योऽसौ गरुडदत्ताख्यो ज्येष्ठपुत्रोऽपि तद्भव । नागकामाभिघो व्याघ्रसंप्रियवमवद् वशी ॥५१॥

1 पद्म omit No. 20 2 [देवायतो]. 3 पद्म कुम्भम्, ज्ञ कुम्भमित्य. 4 पद्म विपल्प, ज्ञ विल्पमित्य. 5 [भूल्यदूरे] 6 ज्ञ रत्नश्याभिषं 7 [बोधिसत्वोऽव धनं]. 8 ज्ञ यथा. 9 पद्म कल्पनीयम्बरे. 10 पद्म पौषाय

अमूत्सुरमे ग्रामे तस्य व्याधस्य वल्लभे । दुर्गा-गङ्गाभिधे तत्र कृष्णाङ्गे रक्तलोचने ॥ ५२ ॥
तत्रै दुर्गाभिधानाया ज्येष्ठया निश्चयोपितः । विस्तीर्णे सति तेनासौ मुसले दन्तपूर्वके ॥ ५३ ॥
एवं सति कुवेऽन्येन महा रुष्टा कनिष्ठिका । सोदिता से प्रभातेऽहं दासामीदं विनिर्ययौ ॥ ५४ ॥
ततोऽन्यदिवसे जाते धनुर्मुक्तशरेण सः । सदृढवर्षरो हस्ती निषादेन निपातितः ॥ ५५ ॥
ततो मृतः पुनः सोऽयं विन्ध्याख्यमहीधरे । संजातः कौवकः पक्षी पूर्वपापफलोदयात् ॥ ५६ ॥
मृतः चपर्द्धिपातेन तद्गिरौ तेन पापिना । दग्धो दवाग्निना पक्षी कौचके नीडयः सकः ॥ ५७ ॥
ततोऽपि सिंहलद्वीपे प्रविठासवयवर्तिनि । विन्ध्यानदी चमूवाम चलत्कल्लोलसङ्कुला ॥ ५८ ॥
निक्षिप्तं समुद्रस्य यत्र देशे पटोलके । जातः कर्कटकः पापात् पक्षिजीवः सुदुःखितः ॥ ५९ ॥[1]
मल्लवामिधो व्याधः कृत्वा कालं सुदुःखतः[2] । सञ्जातो धीवरः पापः कुटीग्रामसंभवः ॥ ६० ॥
समुद्रसमये तस्मिन् मुक्तागारे स धीवरः । मौक्तिकानि समादातुं समायातो निजलीलया ॥ ६१ ॥
कृत्वा तन्मौक्तिकैः पुञ्जं विन्ध्याख्यसरितस्तटे । यावद्याति च सोऽन्यत्र धीवरो मौक्तिकाशया ॥ ६२ ॥
तावन्निःसृत्य वेगेन कर्कटः कुहरान्तरात् । गृहीत्वा तानि सर्वाणि मौक्तिकानि बिलं ययौ ॥ ६३ ॥
मुक्त्वा बिलान्तरे तानि मौक्तिकान्यखिलान्यसौ । कर्कटोऽदर्शनीभूय तस्मादन्यत्र लोपतः ॥ ६४ ॥
एवं धीवरमुक्तानि मौक्तिकानि पुनः पुनः । गृहीत्वा तानि यात्येष कुलिशो बिलान्तरे ॥ ६५ ॥
पश्चात्मौक्तिकान्वेषं कुर्वाणो निजमन्दिरे । धीवरेण हतः कोपात् कर्कटः[3] पञ्चतामितः ॥ ६६ ॥
अथाङ्गविषये नूनमम्बुदावर्तपर्वते । कासवल्कनामास्ति ग्रामो जनधनान्वितः ॥ ६७ ॥
मधुपुलककचे नाम ग्रामेऽस्मिन् कृषीवलः । भृत्यो नन्दिमित्राख्योऽस्य तत्प्रिया कुमित्राभिधा ॥ ६८ ॥
तयोर्नन्दनः कान्तः करमाख्यः स कर्कटः । धीवरोऽपि मृतिं प्राप्य तद्ग्रामेऽभूत् किशोरकः ॥ ६९ ॥
अथ वृषस्य मध्यस्थं तं किशोरं मनोहरम् । रक्षति प्रीतचेतस्को करमः करमाननः ॥ ७० ॥
किशोरमथवृन्दस्थं दृष्ट्वा तं पूर्ववैरिणम् । रुष्टो निहन्ति सोऽत्यर्थं करमो यष्टिमुष्टिभिः ॥ ७१ ॥
अश्वोऽपि तं कृतेनोर्वैर्विघातोत्कलितं महत् । घनपादप्रहारेण जघान करमं रुषा ॥ ७२ ॥
एवं याति तयोः काले वैरेण महता तदा । परस्परसमायातविह्वलीकृतचेतसोः ॥ ७३ ॥
अन्यदा चारणास्तुङ्गमम्बुदावर्तपर्वतम् । चत्वारो मुनयः प्रापुर्धर्मचिन्त्यस्वमूर्तयः ॥ ७४ ॥
प्रथमोऽनन्तवीर्याख्यः परो देवोपपादिकः । अन्यः श्रीनिलयो योगी श्रीधर्मश्चेत्यमी क्रमात् ॥ ७५ ॥
विलोक्य करमः सार्धूलसपर्वतशिरःस्थितान् । जगाम तत्समीपत्वं करमो धर्मवाञ्छया ॥ ७६ ॥
गत्वा मुनीन् स भावेन चतुरोऽपि यथाक्रमम् । समायाजर्जरसंपन्नस्तत्समीपे निविष्टवान् ॥ ७७ ॥
धर्मं विनोदितं श्रुत्वा करमः प्रीतमानसः । अनन्तवीर्यसामीप्ये जग्राह जिनपालनम् ॥ ७८ ॥
नत्वा मुनीन् स निर्गत्य तत्समीपादरं सुधीः । गत्वा तदश्वसामीप्यं दुर्दिने सति सुप्तवान् ॥ ७९ ॥
सुप्तं करममालोक्य तदश्विना पूर्ववैरिणा । गले दन्तौ समादाय मारितोऽयं पदाहतः ॥ ८० ॥
तेनाश्वेन हतः सन् स सौधर्मे धर्मसंभवे । अभ्यन्तरसभामध्ये चलत्कान्तविमानके ॥ ८१ ॥
हारराजितवक्षस्कः कर्णकुण्डलशोभितः । पञ्चपल्योपमायुष्को जातो देवो महर्द्धिकः ॥ ८२ ॥
भरतस्यमहादेशे चम्पाख्यायां पुरि प्रभुः । विमलवाहननामाभूत् तत्प्रिया विमलप्रभा ॥ ८३ ॥
तस्येभ्यो धनदत्ताख्यः श्रेष्ठी प्राणसमोऽभवत् । रूपयौवनसंपन्ना चास्य मलमति प्रिया ॥ ८४ ॥

1 ज च्या था. 2 पफ दुर्गया. 3 पफ कुम्भ, ज मुक्तगिरम्. 4 ज प ह्यत. 5 पफ दुर्दिन. 6 पफ दुर्दिन.

सोऽनुभूय सुखं देवो ब्रह्मकान्तविमानके । भवदेवोऽन्वयो रूपी कुमारोऽभवदिद्धधीः ॥ ८५ ॥
अस्यामेव पुरि श्रीमान् पद्मदेवोऽमरप्रियः । इभ्यो बभूव तद्भार्या पद्मादेवी जनप्रिया ॥ ८६ ॥
नन्दिघोषविमानेशो योऽसौ देवः सुखैषितः । जिनदेवकुमारोऽभूदेतयोः प्रीतचेतसोः ॥ ८७ ॥
पूर्वस्नेहानुबन्धेन तयोः प्रीतिरनुत्तरा । रामलक्ष्मणयोर्यद्वद् बभूव श्रेष्ठिपुत्रयोः ॥ ८८ ॥
अन्यदा धर्मसद्युक्तो जिनपादाम्बुजषट्पदः । मेरुप्रभगुरोः पार्श्वे जिनदेवोऽभवन्मुनिः ॥ ८९ ॥
क्रमेण जिनदेवोऽयं जिनागमविशुद्धधीः । महासंघाधिपो जातो धर्माख्यानपरायणः ॥ ९० ॥
पूर्वप्रेमानुबन्धेन भवदेवोऽपि निःस्पृहः । जिनदेवान्तिके दीक्षां जग्राह जिनदेशिताम् ॥ ९१ ॥
अन्यदा गुरुमापृच्छ्य भवदेवो महामुनिः । विहरन् क्वापि विभ्रष्टः कलिङ्गविषयं ययौ ॥ ९२ ॥
ऐरावतीनदीतीरे नन्दिग्रामसमुद्भवे । भवदेवोऽत्र सत्तस्थे तदातापनयोगतः ॥ ९३ ॥
उपसंहृत्य तं योगं भवदेवः कदाचन । ददर्श तन्नदीतीरे स्वर्णकुम्भं धनान्वितम् ॥ ९४ ॥
आदाय तं निजस्कन्धे खात्वा भूमिं निधाय च । तस्योपरि शिलां तत्र निदधे महतीं पुनः ॥ ९५ ॥
तत्कुम्भरक्षणार्थं च तन्मनस्को धनतृष्णया । दृढातापनयोगं भवदेवो दिने दिने ॥ ९६ ॥
आतापनां ददात्येष जनस्य महदद्भुतम् । भवदेवः समुत्तीर्य ततोऽसौ याति पत्तनम् ॥ ९७ ॥
तत्र भिक्षां विधायाशु भवदेवो विशुद्धधीः । दृढातापनयोगं तत्रैत्य धनाशया ॥ ९८ ॥
दिने दिने दिनं सर्वं शिलाऽऽतापनयोगतः । शर्वरीप्रतिमास्थोऽयं तत्रैव स तिष्ठते ॥ ९९ ॥
एवं तपः प्रकुर्वाणमनुपमं नक्तंदिवं मुनिम् । देवीयं मन्दिरा नाम ददर्श निधिपालिका ॥ १०० ॥
पार्थिवस्वरूपसंपन्ना दिव्यालंकारभूषिता । हसन्ती तं जगादेति दिव्यरूपसमन्विता ॥ १०१ ॥
इदं तपस्त्वया साधो विहितं ननु सांप्रतम् । महीग्रामं परित्याज्य मत्समं सर्वमात्मनः ॥ १०२ ॥
देवीवचनमाकर्ण्य जगौ साधुरिमां तदा । मत्सम किं खले भूपे त्वं वृथा कुम्भीप्सया ॥ १०३ ॥
अनूचानवचः श्रुत्वा देवता निभृतादसुम् । विस्मयव्याप्तचेतस्का तत्प्रियालापकारिणी ॥ १०४ ॥
निर्लज्जस्त्वं तदा साधो लोभदूषितमानसः । येनेत्थं व्रतं प्राप्य देवानामपि दुर्लभम् ॥ १०५ ॥
भवितव्यादिपूर्वस्य कुम्भस्योपरि संस्थितः । तपः करोषि क्लेशेन संसारभयनिर्भयः ॥ १०६ ॥
देवतावचनं श्रुत्वा प्रतिबोधपरायणः । स निन्दागर्हणायुक्तो बभूव सहसा मुनिः ॥ १०७ ॥
देवतावाक्यसंबुद्धः संसारभयमानसः । जिनदेवगुरोः पार्श्वे जगाम स यतीश्वरः ॥ १०८ ॥
आलोचनाविधिं कृत्वा प्रव्रज्यां चापि निर्मलाम् । भवदेवो बभौ योगी गुरोराचारवेदिनः ॥ १०९ ॥
जिनदेवाभिधानेन निजेन गुरुणा सह । वचनाख्यपुरं प्राप भवदेवो विशुद्धधीः ॥ ११० ॥
तत्र राजा सुकेत्वाख्यो बभूवोद्धतशासनः । प्रिया केतुमती चास्य लक्ष्मीवत्स्थितमानसा ॥ १११ ॥
बभूवास नरेन्द्रस्य सुभद्राख्यो वणिक्पतिः । श्रीदत्ता गेहिनी तस्य श्रीदत्तेव सपत्निका ॥ ११२ ॥
सर्वलोककृतानन्दः सर्वलोकमनोहरः । बभूव भुवनस्यास्ते महाबाहुः सुतोऽनयोः ॥ ११३ ॥
महानिवृत्तिवियोगेन दृष्ट्वेमं पुष्पितं सताम् । भवदेवमकारोदं निदानं मन्दबुद्धिकः ॥ ११४ ॥
पुष्पविमानभीष्टं नियतं तपसः फलात् । जन्मजन्मनि मे पुत्रं भवतु प्रीतिकारणम् ॥ ११५ ॥
सनिदानं धृतिं कृत्वा भवदेवो भवप्रियः । सांसारिकसुखासंगनितान्तस्थितमानसः ॥ ११६ ॥
सनत्कुमारसंभूतसम्भूतसद्विमानके । बभूव भासुरो देवः सप्तसागरजीवितः ॥ ११७ ॥
आराधनां समाराध्य विधिना स चतुर्विधाम् । द्वाविंशतिसमुद्रायुर्जिनदेवोऽच्युते ययौ ॥ ११८ ॥

---

1 पफ कुम्भम्, ख कुम्भीरम्. 2 पफ कुम्भम्, ख कुम्भीरम्. 3 पफ कुम्भम्, ख कुम्भीरम्.
4 पफ कुम्भम्, ख कुम्भीरम्. 5 पफ कुम्भम्, ख कुम्भीरम्.

अवन्त्याख्यमहादेशे श्रीमदुज्जयिनी पुरी । तस्यां सिंहबलो राजा श्रीषेणाऽस्य च कामिनी ॥ ११९ ॥
रूपान्वितसर्वाङ्गी नीलोत्पलदलाम्बका । कीर्तिशुभ्रीकृताकाशा कीर्तिषेणा सुताऽनयो: ॥ १२० ॥
तस्य भूपतेरस्य श्रेष्ठी बहुधनान्वित: । सुबन्धुर्बन्धुसंपन्नो धनश्रीरस्य गेहिनी ॥ १२१ ॥
वामनूनविमानेशो भवदेवचरोऽमर: । च्युत्वा सनत्कुमारात् स धनश्रीगर्भमाययौ ॥ १२२ ॥
तस्मिन् गर्भस्थिते सर्वे बान्धवा जनकादय: । कालगोचरतां प्राप्ता युगपद्दुःखपीडिता: ॥ १२३ ॥
स्वेषु तेषु सर्वेषु बान्धवेष्वसुखार्दिता । धनश्री गर्भिणी प्राप तदा क्षिप्रानदीतटम् ॥ १२४ ॥
तत्रासौ रोदनं दीना धनश्री: कुर्वती तराम् । मेदामहानरेणाशु पर्वतेन विलोकिता ॥ १२५ ॥
तत: स्वसारमामाप्य पर्वतेन स्वमन्दिरम् । नीता कृपावता क्षिप्रं धनश्री: प्रेमकारिणा ॥ १२६ ॥
धनश्रीस्तद्गृहे दीना प्रसूता दारकं शुभम् । मेदजनामसंयुक्तो बभूवेऽसौ[1] शनै शनै: ॥ १२७ ॥
अथ धनप्रिय: श्रेष्ठी भवच्छ्रीषेणनामक: । बन्धुरसा महानेष स परं क्रूरमानस: ॥ १२८ ॥
नागश्री तत्प्रिया हृद्या तत्सुता रूपशालिनी । तिलकश्रीरिति ख्याता सर्वश्रीतिलका भुवि ॥ १२९ ॥
एष पूर्वभवे नूनमासीन्नागवसुर्ध्रुवं । कुमार: सनत्कुमारोऽय मेदज:[2] स्फुटदस्तक: ॥ १३० ॥
पञ्चोर्ध्वशालायां मेदजतिलकश्रियो: । पूर्वस्नेहानुरागेण बभूव प्रीतिरुत्तता ॥ १३१ ॥
अन्यदा मधुमासे च संप्राप्ते श्रेष्ठिमन्दिरे । हिन्दोलके विरूढौ तौ मेदजतिलकश्रियौ ॥ १३२ ॥
हिन्दोलनं प्रकुर्वन्तौ दृष्टौ तौ श्रेष्ठिना रुषा । आहत्य निजपादेन 'दोलयतोऽन्य[3] वियोजित' ॥ १३३ ॥
स्वेच्छाविहारिण: शीघ्रं त्वं यासि मम मन्दिरात् । पश्चि जगाम तद्वाक्यान्मेदजो मातरं प्रति ॥१३४॥
किंवदन्ती च सा तेन समाख्याता पर्वतस्य च । कथितां तां समाकर्ण्य दुःखितौ तौ बभूवतु: ॥ १३५ ॥
श्रीमदुज्जयिनी प्राप्य मेदजो निजमातुलम् । भवश्रीषेणनामानं ययाचे तत्सुतामिमाम् ॥ १३६ ॥
मेदजवचनं श्रुत्वा महाप्रहसमन्वितम् । भवश्रीषेणनामेमं जगादेति धनातुर: ॥ १३७ ॥
तिलकश्रीप्रमाणां त्वं स्वर्णस्य प्रतिमां यदि । ददासि मे नियतं भद्र ततो यच्छामि तेऽङ्गजाम् ॥१३८॥[4]
निशम्य मातुलस्योक्तं क्षोभदूषितचेतस: । संप्राप्य मातरं प्राह मेदज: पुरत: स्थिताम् ॥ १३९ ॥
तिलकश्रीसमं दिव्यं जातरूपं महाम्बमम् । याचते मां तव भ्राता सोपरोधं सगौरवम् ॥ १४० ॥
पुत्रवाक्यं समाकर्ण्य धनश्रीर्निजगादसुम् । लालिता निहतोऽनेन गृहीतं धनमप्यद: ॥ १४१ ॥
यद् दु:खसमाक्रान्ता मेदपर्ति समाश्रिता । तिलकश्रीसमं स्वर्णं कुत: प्राप्नोमि बालक: ॥ १४२ ॥
जननीप्रोक्ते स मेदज[5] प्रविश्य गहनं वनम् । महाटवीं समासाद्य मुनामि स्वमत स्थितम् ॥ १४३ ॥
अत्रान्तरे सुर: पूर्वो नागदत्ताभिधानक: । तप: कृत्वाऽच्युतं प्राप्य य: प्राप[6] सुरनायताम् ॥१४४॥
मुनिरूपं समादाय मेदजं प्राप्य वेगत: । नागदत्तचर: शक्रो जगादेमं ससंभ्रमम् ॥ १४५ ॥
त्वं मेदज: कुतस्तात समुद्युक्तमहातरुम् । अधिरूढागत: क्षिप्रं मुमसि त्वं तु मे वद ॥ १४६ ॥[7]
भगवन् यदहं लप्से तिलकश्रियमुन्नताम् । ततो जीवाम्यहं नक्षे वाऽन्यथा यामि पञ्चताम् ॥१४७॥
मेदजवचनं श्रुत्वा शक्र: साधुर्जगादसुम् । किं कारणमिमां कन्यां न प्राप्नोषि वदाशु मे ॥१४८॥
इन्द्रसाधुवच: श्रुत्वा मेदजोऽपि जगाद तम् । तिलकश्रीसमं स्वर्णं याचते मातुलो हि माम् ॥१४९॥
मेदजवाक्यमाकर्ण्य कन्याप्रापणतत्परम् । पूर्वस्नेहानुरागेण देवसाधुरवोचत ॥ १५० ॥

1 पच शनुर्बृहु॰ 2 [मेदज] 3 ज बाधे तो 4 फ आपनमु॰ 5 पफ मेदज: 6 पफ दोलम्योऽर्धं. 7 [मेदज॰]. 8 पफ पुम्मम ज पुमकमिस्म. 9 [बालक]. 10 ज प्राप 11 पफ पुम्मम, ज पुत्रकम्.

युष्मदीयेऽस्मदीये च वंशे यः कुलसंततिम् । जानाति स ममेत्युक्तं मेदज्ञो वणिजां पतिः ॥२१७॥
यस्त्विमां संतर्ति भूप न जानाति सभान्तरे । तस्य धूर्तस्य चार्यैव कर्तव्यो निग्रहस्त्वया ॥२१८॥
देवश्रेष्ठिवचः श्रुत्वा नरेन्द्रो निजगावमुम् । एवं भवतु साधूक्तं भवतामपि संमतम् ॥ २१९ ॥
ततोऽवादि नरेन्द्रेण मेदज्ञो वणिजां पतिः । सांप्रतं नियमं श्रेष्ठिन् ब्रूहि मत्कुलसंततिम् ॥२२०॥
इदं भूपेन संपृष्टः श्रेष्ठी मेदज्ञनामकः । भूपस्य चात्मनश्चापि न विवेद कुलान्वयम् ॥ २२१ ॥
मूकभावं समाधाय स्थिते मेदज्ञवाणिजे । देवश्रेष्ठी ततोऽवादि मधुरोक्त्या सभान्तरे ॥ २२२ ॥
सांप्रतं परमार्थेन मदुक्तं त्वं निवेदय । येन जायते तोषो मम सम्यग्मनस्य च ॥ २२३ ॥
निशम्य भूपतेर्वाक्यं देवश्रेष्ठी जगावमुम् । आकर्णयैकचित्तेन त्वद्वंशं कथयाम्यहम् ॥ २२४ ॥
धर्मयन्तो नराधीश प्रथमोऽभवदन्वये । बभूव साधितारातिः श्रीमदुज्जयिनीपतिः ॥ २२५ ॥
तत्सुतोऽरिंजयो जातस्तत्सुतोऽपि च धीरवः । तत्सुतोऽपि जयन्तोऽभूत् तत्सुतश्चक्रनामकः ॥२२६॥
तत्सुतोऽप्युदयो नाम्ना ततो मेघजयः सुतः । तत्सुतश्चक्रवर्ती च मेघवाहस्ततोऽजनि ॥ २२७ ॥
अधुना त्वं नराधीश मेघवाहननन्दनः । सिंहवाहननामा च जातः सिंहपराक्रमः ॥ २२८ ॥
एते त्वद्वंशजा भूपा नरवृन्दारकस्तुताः । जिनधर्मं समादाय बभूवुः श्रमणा भुवि ॥ २२९ ॥
केचित् स्वर्गं परिप्राप्ताः सुरदेवमनोरमाः । केचिच्च क्षीणकर्माणो मोक्षं बाधाविवर्जितम् ॥२३०॥
त्वद्वंशजातभूपानां परिपाट्या मदन्वये । बभूव मानवो नाम राजश्रेष्ठी महाधनः ॥ २३१ ॥
सुतो महेन्द्रदत्तोऽस्य तस्याप्यक्षोभनामकः । जातो धनपतिस्तस्मात् स्वयंदत्तः सुतस्ततः ॥२३२॥
इन्द्रदत्तस्ततो जातो दयान्तः सागरादिकः । वरुणोपपदो दत्तो मेघदत्तस्ततः सुतः ॥ २३३ ॥
मेघदत्ततनूजोऽहं देवदत्ताख्यो नरेश्वर । जातो भवत्प्रसादेन राजश्रेष्ठी महाधनः ॥ २३४ ॥
एते सर्वेऽपि राजेन्द्र श्रेष्ठिनस्तत्कुलान्वये । जिनधर्मं परिप्राप्य बभूवुः श्रमणोत्तमाः ॥ २३५ ॥
कुलवंशे नरेन्द्रस्य तस्यापि कथितेऽधुना । बभूव भूपतिः प्रीतस्तस्य देववणिक्पतेः ॥ २३६ ॥
ततो जगाद भूपालो नरसिंहं क्रुधातुरः । धूर्तश्रेष्ठिनमेतं च प्राप्तांकुशं खलाधमम् ॥ २३७ ॥
असत्यवादिनं हीनं दुष्टचारसमन्वितम् । नरसिंह श्मशानस्थशूलिकायां निधापय ॥ २३८ ॥
ततो भूपालवाक्येन हस्ताग्रयनियन्त्रितम् । तदा तत्परसंघोऽपि शूलिकान्तं निनाय तम् ॥२३९॥
अथ मौनीश्वरं रूपं समादाय तदन्तिकम् । संप्राप्याह तं देवो हसन् किंचित् तदग्रतः ॥२४०॥
श्रेष्ठिन् द्वादशवर्षाणि समन्यानि च सांप्रतम् । भुंक्ष्व तावन्महाभोगान् सरसं विलक्षभिया ॥२४१॥
साधुवाक्यं समाकर्ण्य जगौ श्रेष्ठी सदा तकम् । पाहि पाहि मुने मां हि न मे भोगैः प्रयोजनम् ॥२४२॥
कारयस्व मुने क्षिप्रं मोचनं मम येन च । तपः करोमि जैनेन्द्रं सर्वदुःखक्षयावहम् ॥ २४३ ॥
ज्ञात्वा तन्निश्चयं साधुः पूर्वसंवादमानसः । तत्करावितगो योगी कोपारक्तनिरीक्षणः ॥ २४४ ॥
रे रे मा मारणं वत्साः कुरुताम्यापराधिनः । यावद् दृष्ट्वा नृपालमागच्छामि तदन्तिकात् ॥२४५॥
देवसाधुर्जगादेमं भूपालं सन्निधिस्थितम् । श्रेष्ठिनः सत्यभूतस्य मा कारयस्व हिंसनम् ॥ २४६ ॥
गुरुसाधुवचः श्रुत्वा जगौ भूपोऽपि तं पुनः । दर्पं राजसमामध्ये प्राप्तोऽयं किं न हन्यते ॥२४७॥
निशम्य भूपतेर्वाक्यं देवसाधुर्जगावमुम् । सोऽहं येन कुलोत्पत्तिः कथिता तव भूपतेः ॥ २४८ ॥

---

1 पच मित्रम्, ज मित्रमित्रम्. पच श्रुत्वा, ज श्रुत्वामित्रम्. 3 [°मिद°सम्]. 4 ज तत्पश्चात्भेदम् 5 पच करेवारः 6 पच इत्यम् ज इत्यमित्रम् 7 पच इत्यम्, ज इत्यमित्रम् 8 [संगम्पार च d]. 9 पच श्रुत्वा, ज श्रुत्वामित्रम्. 10 पच वत्सा

अथापि मत्सुता साधु पूर्वसंबन्धकारणम् । कथयाशु मम स्पष्टं येन संपद्यते सुखम् ॥ २४९ ॥
उक्त्वा तत्पूर्वसंबन्धं तदा पूर्वविधानतः । दिव्यरूपं निजं देवो दर्शयामास भूपतेः ॥ २५० ॥
देवरूपं समालोक्य सवस्त्रस्रग्विमेषं च । जगाम विस्मयं राजा संसदा सह सादरम् ॥ २५१ ॥
दृष्ट्वाऽतिविस्मयमीयुष नृपो नृपजनान्वितः । मेदज्ञश्रेष्ठिसामीप्यं जगाम सुकुतूहली ॥ २५२ ॥
तस्मिन् नरेश्वरे प्राप्ते समस्तजनसंगते । देवो बभाण तद्वृत्तं स्वकीयं च यथाक्रमम् ॥ २५३ ॥
[1]स्फटहस्त्रादिकं सर्वं मेदज्ञस्य भवान्तरम् । स्वकीयं च जगौ देवो जनभूपालसाक्षिकम् ॥२५४॥
श्रुत्वा निजभवं श्रेष्ठी संसारत्रस्तमानसः । महावैराग्यसंपन्नो बभूव क्षणमात्रतः ॥ २५५ ॥
प्राचीनवज्रिणा श्रेष्ठी क्षीरोदजलपूरितैः । अष्टोत्तरशतैः कुम्भैः स्नापितः कनकैस्तदा ॥ २५६ ॥
मेदज्ञोऽपि स्वपुत्रस्य श्रीदत्तस्य महात्मनः । श्रेष्ठिपट्टं बबन्धोच्चैस्तदानीं भूपसाक्षिकम् ॥ २५७ ॥
राज्यादिकस्य लोकस्य कृत्वा भेषा क्षमापणम् । श्रीधर्मगुरुसामीप्ये मेदज्ञोऽशिश्रियत् तपः ॥२५८॥
तिलकश्रीस्तया साध्वी कीर्तिषेणासमन्विता । द्वात्रिंशच्छ्रेष्ठिसद्भार्याः सुव्रतान्ते प्रवव्रजुः ॥ २५९ ॥
सिंहवाहनभूपालो विषवाहनसूनवे । दत्त्वा राज्यश्रियं सर्वां सामन्तादिपुरस्सरम् ॥ २६० ॥
महावैराग्यसंपन्नः सामन्तान्तःपुरान्वितः । श्रीधर्मगुरुसामीप्ये दधौ दैगम्बरं तपः ॥ २६१ ॥
बन्धुकृत्यं विधायास्य यत्नेन महता मुनिः । ययौ प्राचीनवज्री च कृतकृत्यो निजां दिवम् ॥२६२॥
अवगाह्य श्रुतं साधुर्मेदज्ञः स्थिरमानसः । पञ्चग्रामैकविहारी स समस्तवसुधातलम् ॥ २६३ ॥
अन्यदा विहरन् क्वापि मेदज्ञः स मुनिः क्रमात् । कौशाम्बीनगरीं प्राप पताकावलिराजिताम् ॥२६४॥
तस्यां बभूव भूपालो गन्धर्वानीकनामकः । अङ्गारदेवनामास कलादः कुशलः क्षितौ ॥ २६५ ॥
मणिभिः पद्मरागाद्यैः स्वकान्त्योद्योतिताम्बरैः । कुर्वन् मुकुटमेतस्य भूपतेः स तिष्ठति ॥ २६६ ॥
गृहमङ्गारदेवस्य रममाणो निजेच्छया । काकतालीययोगेन संप्राप क्षिक्षापकः ॥ २६७ ॥
पक्षक्षपणान्तरं भ्राम्यन् मेदज्ञाख्यो महामुनिः । तत्कलादगृहं प्राप प्रलम्बितभुजद्वयः ॥ २६८ ॥
दृष्ट्वा स्वगृहमायातं चर्यामार्गेण योगिनम् । मन्दं मध्याह्नवेलायां कलादो निरपान्मुनिः[4] ॥२६९॥
अत्रान्तरे प्रभादीप्तं पद्मरागमणिं परम् । शिखी जग्राह तं पश्यन् मुनिनाऽस्य विलोकितः ॥२७०॥
यावदायाति वेगेन तं प्रदेशं मणीच्छया । तावदङ्गारदेवोऽपि न पश्यति मणिं क्वचित् ॥ २७१ ॥
अपश्यंस्तं मणिं सोऽपि साधुं पृच्छति सत्वरम् । दृष्टो मणिस्त्वया क्वापि प्रदेशेऽत्र वद प्रभो ॥२७२॥
मुनिर्मौनव्रती भूयः पृष्टोऽनेन प्रपञ्चतः । सकृद्भूयोऽपि यासामि पञ्चवारं मम्यमावदः ॥ २७३ ॥
तस्माद्ब्रूहि प्रयत्नेन गृहीतः केन तं मणिम् । कृत्वा प्रसादमत्युग्रं स्वकलादस्य मम प्रभो ॥ २७४ ॥
यदा पृष्टोऽप्ययं साधुर्न किंचिद्वक्ति मौनतः । तदा कोपेन तेनास्य कृता घातादिका क्रिया ॥२७५॥
यष्टिघाते मुनेरस्य ददतः क्रूरचेतसः । मयूरगलसंलग्नस्तदातो दैवयोगतः ॥ २७६ ॥
ततो यष्टिप्रहारेण शिखिपत्रगलोदरम् । पद्मरागमणिः सोऽस्य निर्गत्य पतितो भुवि ॥ २७७ ॥
उपसर्गावसाने च तत्कलादगृहादरम् । अकृत्वाहारसंबन्धो[6] निजगाम स धीरधीः ॥ २७८ ॥
कौशाम्बीकपुरं त्यक्त्वा देवपादाभिधं गिरिम् । आरुरोह समुत्तुङ्गं मेदज्ञाख्यो मुनिस्तदा ॥ २७९ ॥
यावज्जीवं विधायात्र शरीराहारवर्जनम् । नियमं स मुनिर्धीरः कायोत्सर्गेण तस्थिवान् ॥ २८० ॥
एवं स्थित्वा मुनिस्तत्र क्षपकश्रेणिकारणात् । आप शमश्रेणीचारं शुक्लध्यानं प्रविष्टवान् ॥२८१॥

---

1 [स्फटहस्त्रादिकं]. 2 पपक गुम्फम् अ गुम्फमिरम्. 3 अ मायान्. 4 [नयारोऽप्रीतिम्मुनिम्]. 5 [तेन तो मतिः]. 6 ['संबन्धो'].

यदि हारस्वरूपोऽपि भुक्त्वा भोगान् समं तया । ततः प्रभवसि क्षिप्रं कन्यकां ददामि ते ॥१५१॥
मेदज्ञोऽपि समाकर्ण्य सुरत्नसुमेरैषा । अभाषीत् तं विनीतात्मा तत्कन्याऽनुरागतः ॥ १५२ ॥
पापते यदि मे साधो तिलकश्रीसमागमः । ततस्त्वदूचन सर्वं करोमि शिरसा द्रुतम् ॥ १५३ ॥
मेदज्ञस्योदितं श्रुत्वा कन्याकुलितचेतसः । भास्करप्रभुनिः प्राह बहुधाऽनुकम्पमानसः ॥ १५४ ॥
सम्मार्जनादिकं सातु कारयित्वा स्वसाधनाः । सिते प्रसारिते वस्त्रे सर्वार्था गच्छति प्रकटम् ॥१५५॥
एवं निगद्य कस्यसं मेदज्ञं पाकशासनः । जगाम स्वालयं तूर्णं बहुभाग्यानुतत्परः ॥ १५६ ॥
गते पुरन्दरे सोऽपि पूजाद्युचितं चेतसः । तोषपूरितचेतस्को जगाम निजमन्दिरम् ॥ १५७ ॥
प्रसमेदितेन तेनापि स्वगृहे गगनान्तरः । सितवस्त्रोपरि क्षिप्रं कनकं प्रापि तत्प्रसादात् ॥ १५८ ॥
मेदज्ञस्तां समादाय सद्धर्मनियमाप्य सः । जगाम विस्मितस्वान्तः पुलकाञ्चितविग्रहः ॥ १५९ ॥
कनकस्वर्णनिर्माणां गृहीत्वा सत्क्रियान्वताम् । सांप्रतं मातुल क्षिप्रं देहि मे तिलकश्रियम् ॥ १६० ॥
निशम्य वचनं श्रेष्ठी श्रुतपूर्वां कनकां पुरः । विस्मयव्याप्तचेतस्को जगादेतं कृतस्मितः ॥१६१॥
क्षीरोदवारिधिं भद्र यदानयसि सत्वरम् । ततोऽहं कन्यकां तेऽद्य ददामि तिलकश्रियम् ॥१६२॥
तथाप्यतः परिमाप्य मत्सरं स्नेहवत्सलम् । समानेतुं विनीतात्मा तिलकश्रीसमुत्सुकः ॥ १६३ ॥
मात्सर्यं तुल्यको वक्ति यदि त्वं क्षीरवारिधिम् । आनयसि महाभाग तन्वीं दास्यामि ते द्रुतम् ॥१६४॥
श्रुत्वाकर्ण्य समाकर्ण्य सपादेनं तदन्तिकम् । अन्यां कन्यां गृहीत्वा त्वं शुभ कस्मादि श्रोमनाः ॥१६५॥
अस्मात्कुमारिकारूपोऽसौ कित्यन्तेपवतस्ततः । ददाति किं निजां कन्यां दुष्टचित्तः स ते वद ॥ १६६ ॥
मन्मामो याचते मामस्मात्मनां प्रतिपातनाम् । सर्वत्रमरमयी साधो सा मे नास्ति किमत्र हि ॥१६७॥
इन्द्रस्यापि समाकर्ण्य तस्मिन्नर्थे सुधा ददौ । चिन्तामणिप्रयानेन कुरु त्वमभिवाञ्छितम् ॥ १६८ ॥
ततो गत्वा वनात् भोगो मायामोऽनेन ददामि ते । यत्किंचित्पापसे नूनं किमन्यैः परिमार्गितैः ॥१६९॥
स्वामिने वचनं श्रुत्वा श्रेष्ठी तं निजगौ तदा । क्षीरोदमानय क्षिप्रं येन पश्यामि तं पुनः ॥१७०॥
मेधिवाक्येन तेनापि गत्वा तद्वने पुनः । चिन्तामणिप्रभावेणाशु यस्मिन्दं वारणादरः ॥ १७१ ॥
स्रो यो क्षीरसमुद्रः स भवनीयेणमन्दिरम् । आगम्य त्वरितं श्रेष्ठी येन त्वां पश्यति द्रुतम् ॥१७२॥
श्रुत्वा तदिदं अर्घ्यं महारवसमन्विता । सर्वतोऽप्युत्कलोलः प्रकटवर्णजलौघकः ॥ १७३ ॥
महागजस्वनेनायं प्रापयन्नगरीमिमाम् । क्षीरवारिनिधिराऽऽगन्तुं प्रवृत्तो मातवाकरः ॥ १७४ ॥
दृष्ट्वा क्षीरसमुद्रं तं प्रापयन्तं यतो पुरीम् । मेदज्ञमेष्ठिनं प्राह संभ्रमात्तं भनोऽस्थितः ॥ १७५ ॥
एषो भवत्प्रापोऽयमस्मासु दिने न कस्यचित् । तस्मान् साधुना नाथ क्षीरवारिधिनीरतः ॥१७६॥
सततवचनात् तेन चिन्तामणिनिवारितः । समुद्रावस्तो यद्भूतार्थं तदानी क्षीरवारिधिः ॥१७७॥
तस्मिन् क्षीरोदधौ तेन मेदज्ञेन निराकृते । विस्मितोऽर्थं महान् सोऽपि पुरुषः सकलैर्नरैः ॥१७८॥
विपाधामर्थमेतस्य प्रविशाय स मातुलः । ददावस्मै महामुदा सस्तुवां तिलकश्रियम् ॥ १७९ ॥
महाविभूतियोगेन श्रीमद्धर्मनीपतिः । कीर्तिपिण्डा ददावस्मै स्वकन्यां श्रीसमप्रभाम् ॥ १८० ॥
रूपलावण्यसंपन्ना प्रतिष्ठत् कन्यका पराः । परिणीतास्तथाऽनेन राजश्रेष्ठिसमुद्भवाः ॥ १८१ ॥
राजश्रेष्ठिमहापदं प्राप्य कृत्स महीपतिः । पूजयामास तं वीरं मेदज्ञं परंपरा ॥ १८२ ॥
एवमिर्वरनारीमी रूपराजितमूर्तिभिः । मेदज्ञो बुभुजे भोगान् दिनानि कतिचित्सुखी ॥१८३॥

1 पफ कुम्मम्, ब कुम्भकीरम्. 2 पफ कुम्मम्, ब कुम्भकीरम्. 3 पफ कुम्मम् ब कुम्भकीरम्. 4 पफ कुम्मम्, ब कुम्भकीरम्. 5 पफ कुम्मम्, ब कुम्भकीरम्. 6 पफ कुम्मम्, ब कुम्भकीरम्. 7 पफ कुम्मम्, ब कुम्भकीरम्. 8 पफ कुम्मम् ब कुम्भकीरम्. 9 पफ कुम्मम्, ब कुम्भकीरम्.

विज्ञप्तं तदा श्रेष्ठी मेरदत्तः सुरसाधुना । आगत्य गदितः क्षिप्रं भोगसंसक्तमानसः ॥ १८४ ॥
रमन् श्रेष्ठिन् कुतो मूढ नितरां भोगसंपदा । न करोपि तपो जैनं महाविमलकारणम् ॥ १८५ ॥
निशम्य तद्वचः श्रेष्ठी समापेयं पुरःस्थितम् । भोग द्वादश वर्षाणि भुक्त्वाऽहं तिलकप्रिया ॥१८६॥
पश्चात्तपः करिष्यामि संसारोच्छेदकारणम् । भवत्सार्धं विनीतात्मा तत्कर्मक्षेपपस्थितः ॥ १८७ ॥[1]
मेरदत्तवचनं श्रुत्वा भोगयाचनतत्परम् । एवमस्त्विति संभाष्य ययौ शक्रो निजास्पदम् ॥१८८॥
गतेषु द्वादशाब्देषु भुञ्जानस्यास्य संपदम् । आगत्य तत्समीपं च जगादैवं सुराधिपः ॥ १८९ ॥
सावधानः पुनः प्राह मेरदत्तं सुखकुञ्जरम् । देहि द्वादशवर्षाणि ममान्यानि सुखं प्रति ॥ १९० ॥
इन्द्रस्तस्योपरोधेन भोगसंसक्तचेतसः । जगाम निजमावासं सकृपाकृष्टमानसः ॥ १९१ ॥
मेरदत्तोऽपि तया सार्धं सरसं तिलकप्रिया । मनसः प्रियया भोगं भुञ्जानो व्यवतिष्ठते ॥ १९२ ॥
पुनः समाप्तिमाप्तेषु वर्षेषु द्वादशाब्दसु । संप्राप्य स सुराधीशः प्राहेमं भोगलोलुपम् ॥ १९३ ॥
मेरदत्त सांप्रतं मूढ कुरु जैनं तपोऽमलम् । नाकापवर्गसौख्यानि येन सन्ति तव स्फुटम् ॥१९४॥
तद्वाक्यं समाकर्ण्य मेरदत्तो निजगाद सुरम् । भूयो द्वादश वर्षाणि देहि मे वत सुखं प्रति ॥१९५॥
इन्द्रस्तदुपरोधेन दत्त्वा तावन्मितानि च । जगाम प्रीतचेतस्को निजनाकं महामनाः ॥ १९६ ॥
पूर्णेषु द्वादशाब्देषु देवः संप्राप्य तं जगौ । मेरदत्त कुरु जैनेन्द्रं तपो निर्वृतिकारणम् ॥ १९७ ॥
देववाक्यं समाकर्ण्य मेरदत्तोऽमरकुञ्जरम् । जगाद भासुराकारं कोपस्फोटितलोचनः ॥ १९८ ॥
कोऽसि त्वं वद किं नाम कः सामर्थ्यो महान् स्थितः । भूयो भूयोऽपि मां प्राप्य येनेदं भाषसे कुरु ॥ १९९
हित्वा देवोपमान् भोगान् नमस्तेन करोमि किम् । गृहसिद्धेन को नाम भिक्षां भ्रमति मूढधीः ॥२००॥[2]
आकर्ण्य तद्वचो देवो दध्यौ मनसि धीरधीः । महाव्यामोहग्रस्तो भोगान् कथमयं मुञ्चति ॥२०१॥
यथा करोम्यहं किंचित् कार्यं भवति तद्धितम् । अस्य सति यथाऽर्थं हि भोगनिःस्पृहमानसः ॥२०२॥
चिन्तयित्वा चिरं देवस्तद्व्रतग्रहणेच्छया । बभूव विह्वलीभूतमानसप्रसरः क्षणम् ॥ २०३ ॥
ततोऽन्यस्मिन् दिने जाते मेरदत्तश्रेष्ठिनि द्रुतम् । नरेन्द्रसेवया याते भूपालभवनं प्रति ॥ २०४ ॥
तदन्तरे गृहद्वारे तदीये पुरुषाधिपान् । गृहीत्वा सायकप्रायावान् स्थापयित्वा भयानकम् ॥ २०५ ॥
मेरदत्तरूपमादाय तत्समानाकृति द्रुतम् । आस्थाय्य स्थितो विशेषाशो तद्गृहान्तरमास्थात् ॥ २०६ ॥[3]
आदाय तत्परीवारमन्तःपुरजनादिकम् । तदाकृतिधरो देवस्तस्थौ मुदितमानसः ॥ २०७ ॥
एवं तत्र स्थिते देवे मेरदत्तः प्राप्य भूपतिम् । विशन् स्वमन्दिरद्वारं निषिद्धो द्वारपालकैः ॥ २०८ ॥
यस्मिन् गृहान्तरे श्रेष्ठिन् मा प्रवेशं विधत्स्व भो । आस्ते ममाधिपो भोगं भुञ्जानस्तिलकप्रिया २०९
स गृहाभ्यन्तरं गन्तुं लभमानो न तद्वरे । राजान्तिकं जगामाशु मेरदत्तो विस्मयाकुलः ॥२१०॥
मेरदत्तोऽपि नृपं प्राप्य जगादेदं सविस्मयः । मद्गृहान्तरमाविश्य कोऽपि धूर्तः स्थितो नृप ॥२११॥
स्वगृहे लभमानोऽहं प्रवेशं नरकुञ्जर । त्वदन्तिकं परिप्राप्तस्त्वत्कृपाकुलमानसः ॥ २१२ ॥
तद्वाक्यतः समाहूतो देवश्रेष्ठी महीभुजा । आगत्य स्वोचितस्थाने निविष्टो नृपचोदितः ॥ २१३ ॥
तयोः श्रेष्ठिनोर्मध्ये समानाकारधारिणोः । मेरदत्तो निश्चयं कर्तुं न शशाक महीपतिः ॥ २१४ ॥
ततो बोधं समादाय विस्मयव्याप्तमानसः । सर्वं सर्वं समानत्वं संशयी स विनिश्चिने ॥२१५॥
नृपः ततोऽमरश्रेष्ठी सचिवादिसमन्वितम् । जगौ तदा समाप्यैवं स्वनादापूरिताम्बरः ॥ २१६ ॥

1 पच पुष्पम् ज पुष्पमितम्. 2 पच भिक्षाम् ज भिक्षामितम् 3 पच स्थाम् ज पुरस्थितम् 4 [नरकुञ्जर]. 5 [भोः].

युष्मदीयेऽस्मदीये च श्रेष्ठि च कुलसंततिम् । जानाति स समेघूर्तं मेदज्ञो वणिजां पतिः ॥२१७॥
यस्त्विमां संतति भूप न जानाति सभान्तरे । तस्य धूर्तस्य चावैव कर्तव्यो निग्रहस्त्वया ॥२१८॥[1]
देवश्रेष्ठिवचः श्रुत्वा नरेन्द्रो निजगावमुम् । एवं भवतु साधूक्तं भवतामपि संमतम् ॥ २१९ ॥
ततोऽवादि नरेन्द्रेण मेदज्ञो वणिजां पतिः । सांप्रतं नियमं श्रेष्ठिन् ब्रूहि मत्कुलसंततिम् ॥२२०॥
इदं भूपेन संप्रष्टः श्रेष्ठी मेदज्ञनामकः । भूपस्य चासनस्यापि न विवेद कुलान्वयम् ॥ २२१ ॥
मूकभावं समासाद्य स्थिते मेदज्ञवाणिजे । देवश्रेष्ठी ततोऽवादि भूभुजेदं सभान्तरे ॥ २२२ ॥
सांप्रतं परमार्थेन मद्वंशं त्वं निवेदय । येन जायते तोषो मम सभ्यजनस्य च ॥ २२३ ॥
निशम्य भूपतेर्वाक्यं देवश्रेष्ठी जगाविमुम् । आकर्णयैकचित्तेन त्वद्वंशं कथयाम्यहम् ॥ २२४ ॥
वर्धयन्तो नराधीश प्रथमोऽभवदन्वये । बभूव खापितारातिः श्रीमद्युवतिनीपतिः ॥ २२५ ॥
तत्सुतोऽरिंजयो जातस्तत्सुतोऽपि च धीरजः । तत्सुतोऽपि जयन्तोऽभूत् तत्सुतश्चक्रनामकः ॥२२६॥
तत्सुतोऽप्युदयो नाम्ना ततो मेघंजयः सुतः । तत्पुत्रश्चक्रवर्ती च मेघवाहस्ततोऽजनि ॥ २२७ ॥
अधुना त्वं नराधीश मेघवाहननन्दनः । सिंहवाहननामा च जातः सिंहपराक्रमः ॥ २२८ ॥
एते त्वद्वंशजा भूपा नरकुन्तारकस्तुताः । जिनधर्मं समादाय बभूवुः श्रमणा भुवि ॥ २२९ ॥
केचित् स्वर्गं परिप्राप्ताः सुरदेवमनोरमाः । केचिच्च क्षीणकर्माणो मोक्षं चाबाधिसर्वितम्[2] ॥२३०॥
त्वद्वंशजातभूपानां परिपाट्या मदन्वये । बभूव मानवो नाम राजश्रेष्ठी महाधनः ॥ २३१ ॥
सुतो महेन्द्रदत्तोऽस्य तस्याप्यक्षोमनामकः[3] । जातो धनपतिस्तस्मात् सर्वदत्तः सुतस्ततः ॥२३२॥
इन्द्रदत्तस्ततो जातो दत्तान्तः सागरादिकः । पद्मोपपदो दत्तो मेघदत्तस्ततः सुतः ॥ २३३ ॥
मेघदत्ततनूजोऽहं मेदज्ञाख्यो नरेश्वर । जातो भवत्प्रसादेन राजश्रेष्ठी महाधनः ॥ २३४ ॥
एते सर्वेऽपि राजेन्द्र श्रेष्ठिनस्तत्कुलान्वये । जिनधर्मं परिप्राप्य बभूवुः श्रमणोत्तमाः ॥ २३५ ॥
कुलवंशे नरेन्द्रस्य त्वस्यापि कथितेऽधुना । बभूव भूपतिः प्रीतस्तदा देववणिक्पतेः ॥ २३६ ॥
ततो जगाद भूपालो नरसिंहं कृपातुरः । धूर्तश्रेष्ठिनमेतं च प्राप्तंकृत्य खलाधमम् ॥ २३७ ॥
असत्यवादिनं हीनं दुराचारसमन्वितम् । नरसिंह श्मशानस्थशूलिकायां निधापय ॥ २३८ ॥[4]
ततो भूपस्य वाक्येन हस्तद्वयनियन्त्रितम् । तदा तलारसंघोऽपि शूलिकान्तं निनाय तम् ॥२३९॥
अथ मौनीश्वरं रूपं समादाय तदन्तिकम् । संप्राप्याह तं देवो हसन् किंचित् तदन्तः ॥२४०॥
श्रेष्ठिन् ददाम्यहं मित्र त्वमन्यानि च सांप्रतम् । भुंक्ष्व तावन्महाभोगान् सरसं तिलकमिथा ॥२४१॥
साधुवाक्यं समाकर्ण्य जगौ श्रेष्ठी तदा तकम् । पाहि पाहि मुने मां हि न मे भोगैः प्रयोजनम् ॥२४२॥
कारापय मुने शीघ्रं मोचनं मम येन च । तपः करोमि जैनेन्द्रं सर्वदुःखक्षयावहम् ॥ २४३ ॥[5]
ज्ञात्वा तद्विषये साधु पूर्वसद्भावमानसः । तत्प्रत्यासन्नो योगी कोपात्स्यनिरीक्षणः ॥ २४४ ॥
रे रे मा मारणं वत्सा[6] कुरुतास्यापराधिनः । यावद् दृष्ट्वा नृपमागच्छामि तदन्तिकम् ॥२४५॥
देवसाधुजगादेमं भूपाल सदसि स्थितम् । श्रेष्ठिनः सत्यभूतस्य मा कारापय हिंसनम् ॥ २४६ ॥
गुरुसाधुवचः श्रुत्वा जगौ भूपोऽपि तं पुनः । दोषं राजसभामध्ये प्राप्तोऽयं किं न हन्यते ॥२४७॥
निशम्य भूपतेर्वाक्यं देवसाधुर्जगावमुम् । सोऽहं येन कुलोत्पत्तिः कथिता तव भूपतेः ॥ २४८ ॥

---

1 पच मिरम्म् अ मिरम्मवित्तम्, 2 पच कुम्मम् अ कुम्मविततम्, 3 [°मिध°नम्]. 4 अ तम्मयशोम्य 5 पच मरेध० 6 पच कुलम्म् अ कुलमवित्तम्, 7 पच कुलम्म् अ कुलमवित्तम्, 8 [संगाचार च तं]. 9 पच कुम्मम्, अ कुम्मवित्तम्, 10 पच वत्सा

पानि मभुना साधु पूर्वसंबन्धकारणम् । कथयाशु मम स्पष्टं येन सपद्यते सुखम् ॥ २४९ ॥
स्या तत्पूर्वसम्बन्धं सदा पूर्वविधानतः । दिव्यरूपं निजं देवो दर्शयामास भूपतेः ॥ २५० ॥
वरूपं समालोक्य स्वर्णस्त्रिस्तिमेप च । जगाम विस्मयं राजा संसदा सह सादरम् ॥ २५१ ॥
द्वाऽतिशयमीक्ष्य भूपो भूपजनान्वितः । मेरुश्रेष्ठिसामीप्यं जगाम सुकृतहृही ॥ २५२ ॥
स्मिन् नरेश्वरे प्राप्ते समस्तजनसंगते । देवोऽप्रमाणं तद्रूपं स्वकीयं च यथाक्रमम् ॥ २५३ ॥
कोट्यहस्वारिकं सर्वं मेरुदत्तस्य भवान्तरम् । स्वकीयं च सगो देवो जनभूपालसाक्षिकम् ॥२५४॥
त्वा निखिलं श्रेष्ठी संसारत्रस्तमानसः । महावैराग्यसंपन्नो बभूव क्षणमात्रतः ॥ २५५ ॥
ाचीनपत्निका श्रेष्ठी क्षीरोदजलपूरिते । मध्येवरस्थिते कुम्भे स्थापितः कनककुम्भवत् ॥ २५६ ॥
विद्योऽपि स्वपुत्रस्य श्रीदत्तस्य महात्मनः । श्रेष्ठिपदं च पोषेष्वदानीं भूपसाक्षिकम् ॥ २५७ ॥
ष्वादिकस्य लोकस्य कृत्वा क्षेपं क्षमापणम् । श्रीधर्मगुरुसामीप्ये मेरुदत्तोऽग्रहीत् तपः ॥२५८॥
त्तिलक्ष्मीस्तया साध्वी कीर्तिपिणासमन्विता । द्वात्रिंशच्छ्रेष्ठिसद्भार्या सुव्रतान्ते प्रवव्रजुः ॥ २५९ ॥
सिंहवाहनभूपालो विपवाहनसूनवे । दत्त्वा राज्यमिदं सर्वो सामन्तादिपुरस्सरम् ॥ २६० ॥
महावैराग्यसंपन्नः सामन्तान्तःपुरान्वितः । श्रीधर्मगुरुसामीप्ये दधौ दैगम्बरं तपः ॥ २६१ ॥
न्तुहृत्सं विधायास्य यत्नेन महता मुनिः । ययौ प्राचीनपत्नी च कृतकृत्यो निजं दिवम् ॥२६२॥
वगाय श्रुतं साधुर्मेरुदत्तः स्थिरमानसः । ग्रामैकविहारी स समस्तव्रतसुपात्रतम् ॥ २६३ ॥
अन्यदा विहरन् क्वापि मेरुदत्तः स मुनिः क्रमात् । कौशाम्बीनगरीं प्राप पताकाध्वजविराजिताम् ॥२६४॥
तस्यां बभूव भूपालो गन्धवानीकनामकः । अङ्गारदेवनामास्य कर्मारः कुशलः क्षितौ ॥ २६५ ॥
मणिभिः पद्मरागाद्यैः स्वकरोपार्जितान्यरैः । कुर्वन् मुकुटमेतस्य भूपतेः स तिष्ठते ॥ २६६ ॥
गृहमङ्गारदेवस्य स्वमायो निजेच्छया । काकतालीययोगेन समाप्य शिखावलः ॥ २६७ ॥
पक्षाद्वयान्तरं भ्राम्यन् मेरुदत्ताख्यो महामुनिः । तत्कालात् गृहं प्राप मठम्वितसुखदम् ॥ २६८ ॥
दृष्ट्वा स्वगृहमायातं[1] चर्यामार्गेण योगिनम् । मन्दं मध्याह्नवेलायां कर्मदो निष्पान्मुनिः[2] ॥२६९॥
अत्रान्तरे प्रमादीशं पद्मरागमणिं परम् । शिखी जग्राह तं एतन् मुनिनाऽप्यं विलोकितः ॥२७०॥
यावदायाति वेगेन तं मरेतुं मणीच्छया । तावदङ्गारदेवोऽपि न पश्यति मणिं क्वचित् ॥ २७१ ॥
अपश्यंस्तं मणिं सोऽपि साधुं पृच्छति सत्वरम् । दृष्टो मणिस्त्वया क्वापि प्रदेशेऽत्र वद प्रभो ॥२७२॥
मुनिर्मौनव्रती भूप पृष्टोऽनेन प्रयत्नतः । सकृदुम्भोऽपि भासामि पश्यतां मध्यमागतः[3] ॥ २७३ ॥
तस्माद्ब्रूहि प्रयत्नेन गृहीतः केन तं मणिम् । कृत्वा प्रसादमुत्तुङ्गं[4] स्वकरस्य मम प्रभो ॥ २७४ ॥
यदा पृष्टोऽप्ययं साधुर्न किंचिद्वक्ति मौनतः । तदा कोपेन तेनास्य कृता घातादिकाः क्रिया ॥२७५॥
यष्टिघातं मुनेरस्य ददतः क्रूरचेतसः । मयूरगलसंलग्नस्तातो दैवयोगतः ॥ २७६ ॥
तस्यो यष्टिप्रहारेण शिखावलगलान्तरम् । पद्मरागमणिः सोऽयं निर्गत्य पतितो भुवि ॥ २७७ ॥
उपसर्गावसाने च तस्करस्य गृहान्तरम् । अकृताहारसंपन्नो निर्जगाम स धीरधीः ॥ २७८ ॥
कौशाम्बीकपुरं लग्नं देवपादाभिधं गिरिम् । आरुरोह समुत्तुङ्गं मेरुदत्ताख्यो मुनिस्तदा ॥ २७९ ॥
यावज्जीवं निधायात्र शरीराहारवर्जकम् । नियमं स मुनिर्धीरः कायोत्सर्गेण संस्थितवान् ॥ २८० ॥
एवं स्थित्वा मुनिस्तत्र क्षपकश्रेणिकारणात् । आर्यं प्रथमवीचारं शुक्लध्यानं प्रविष्टवान् ॥२८१॥

---

1 [स्वगृहमायान्तं] 2 पक पुस्तम् अ पुस्तकमिदम्. 3 अ °मध्यगः. 4 [कर्मदोऽभिनिष्क्रान्मुनिम्]. 5 [केन स मणिः]. 6 [पतनतो].

ततः शुक्लध्यानयोगेन सूक्ष्मादौ सांपरायिके । स्थित्वा स्थाने दशाहार्यं मोहनीयं विक्षिपत्[1] ॥ २८२ ॥
ततः क्षीणकषायाख्यस्थाने स्थित्वा सवीरधीः । ध्यानमेकत्ववीचारं द्वितीयं शुक्लमाश्रितः ॥ २८३ ॥
अथमेकत्ववीचारध्यानयोगेन सत्वरम् । अन्तरायं निहन्ति स्म कर्म चावरणद्वयम् ॥ २८४ ॥
सयोगिस्थानमाप्तस्य मेदज्ञस्य मुनेररम् । केवलज्ञानमुत्पन्नं लोकालोकावलोकनम् ॥ २८५ ॥[2]
केवले च समुत्पन्ने मेदज्ञस्य महामुनेः । प्रापुर्वन्दारवः साधुं चतुर्भेदा दिवौकसः ॥ २८६ ॥
ज्ञात्वा देवागमं साधोः कौशाम्बीनगरीमथ । गन्धर्वानीकनामायमाजगाम निजान्वितः ॥ २८७ ॥
स्थितकर्मीरपि क्षिप्रं आर्यिका भक्तितत्परा । प्राप्ता केवलिनं नन्तुं सिंहवाहनसाधुना ॥ २८८ ॥
नागदत्तवरः पुत्रो भक्तिप्रह्वतनूरुहः । अच्युतेन्द्रोऽपि संप्राप नन्तुं केवलिनं तदा ॥ २८९ ॥
नत्वा केवलिनः पादौ धर्मं श्रुत्वा जिनोदितम् । स्वर्गापवर्गसंप्राप्तेः कारणीभूतमञ्जसा ॥ २९० ॥
नाथ किं कारणं ब्रूहि तव साधोऽपि रक्षितौ[3] । नूनमहारदेवेन चोपसर्गः प्रवर्तितः ॥ २९१ ॥
इदं पप्रच्छ राजेन्द्रः कौतुकव्याकुमानसः । गन्धर्वानीकनामायं सुरासुरसत्तरम् ॥ २९२ ॥[4]
गन्धर्वानीकभूपस्य निशम्य वचनं परम् । जगाद केवली चास्य चोपसर्गस्य कारणम् ॥ २९३ ॥
नरेन्द्रवचनं श्रुत्वा केवली निजगाद तम् । विद्यते वैरसंबन्धो राजंस्तस्य मया सह ॥ २९४ ॥
इहैव भरतक्षेत्रे जम्बूद्वीपोपलक्षिते । अङ्गाख्यस्य महादेशो विद्यते जनसंकुलः ॥ २९५ ॥
तत्र चम्पापुरी रम्या विद्यते परमोत्सवा । अस्यां बभूव भूपालोऽमयवाहननामकः ॥ २९६ ॥
विद्यते तन्महादेवी पुण्डरीकाभिधा परा । महाधनसमायुक्तस्तत्र श्रेष्ठी स्वदत्तकः ॥ २९७ ॥
साऽहं पूर्वभवे राजन् कान्ता नामवसर्मम । पुत्रो गरुडदत्तोऽस्यां नामदत्तः कनिष्ठकः ॥ २९८ ॥
हस्त्यश्वादीनि युग्मानि सौवर्णानि बहून्यलम् । स्थापयित्वा गृहे लोभात् प्रस्थितो वाणिज्ययात्रया ॥ २९९ ॥
वार्धिमध्ये निमग्नेऽस्मिन् यानपात्रे मृतिं गतः । भाण्डागारे निजे राजन् जातः सर्पोऽतिविग्रहः ॥ ३०० ॥
अप्रमत्ततया तत्र रक्षन् द्रव्यं दिवानिशम् । ददामि तत्र कस्यापि गृहीतुं लोकस्यालम् ॥ ३०१ ॥
हतो गरुडदत्तेन निजपुत्रेण मूढके । चतुर्थनरकं यातो दशसागरजीवितम् ॥ ३०२ ॥
गरुडस्यापरो दत्तः कालं कृत्वा समाधिना । पूर्वोक्तनरकं प्राप्तो दशवारिधिजीवितम् ॥ ३०३ ॥
चतुर्थनरकादेत्य भूपमार्गपर्वते । गन्धहस्ती समुत्पन्नो मयोत्तुङ्गो महारवः ॥ ३०४ ॥
यूथेन सह तत्राहं रममाणो निजेच्छया । मन्दं मन्थरगामी च तिष्ठामि नरकुञ्जर ॥ ३०५ ॥
तत्र गरुडदत्तोऽपि निःसत्त्वः स कर्मणा । व्याधोऽभूत् कालकव्याख्यस्तद्गिरौ भीमविग्रहः ॥ ३०६ ॥
अनेन निहतो राजन् दन्तार्थं स करी तदा । त्रिकूटपर्वते जातः क्षीरकाख्यो विहंगमः ॥ ३०७ ॥
वनदावे कृतेऽनेन शबरजातेन पापिना । दग्धोऽसौ क्षीरकः पक्षी [5]वरद्विप[illegible] ॥ ३०८ ॥
वार्धिनिम्नानदीतीरे मुक्ताकारे समौक्तिके । बभूव कर्कटः पापो नीडजोऽसौ बृहन्मुखः ॥ ३०९ ॥
अथ तं पञ्चतां प्राप्य स निषादः प्रपञ्चधीः । कुरुनिलाभिधे ग्रामे संजातो मीनबन्धकः ॥ ३१० ॥
तेन मीनारिणा भूयो हरन्मौक्तिकानि सः । कुपितो हतः क्षिप्रं महाकोपविधायिना ॥ ३११ ॥
उत्तरापथदेशे च सोऽप्युदावर्तपर्वते । आनककिंगतग्रामे करमाख्योऽप्यपाठकः ॥ ३१२ ॥
सोऽपि पञ्चत्वमासाद्य मीनबन्धनकारकः । तत्रैव भूपमध्येऽभूद् दुष्टशीलस्तुरंगमः ॥ ३१३ ॥
कदाचिन्मुनिसामीप्यं संप्राप्य करमोऽथवा । जैनं धर्मं स जग्राह पापोपशमकारणात् ॥ ३१४ ॥
धर्मं गृह्णाणोऽस्य जिनधर्मपरायणम् । दन्तैर्गले समादाय जघान स तुरंगमः ॥ ३१५ ॥

1 ब मोहनीयकर्मेण। 2 पक [illegible], ब [illegible]. 3 [[illegible]]. 4 पक [illegible], ब [illegible]. 5 [[illegible]]. 6 पक [illegible] 7 पक [illegible] 8 [[illegible]].

त्वविमानेऽसौ सौधर्मस्वर्गसम्भवे । जातो महर्द्धिको देवो पञ्चपल्योपमस्थितिः ॥ ३१६ ॥
त पुनर्भूप चम्पाख्यनगरीमध्ये । इभ्यः श्रेष्ठिसुतो जातो भवदेवाभिधानकः ॥ ३१७ ॥
रो विधायासौ भवदेवः समाधिना । सनत्कुमारकल्पेऽभूत् सप्तसागरजीवितः ॥ ३१८ ॥
मारतश्च्युत्वा श्रीमदुज्जयिनीमनु । राजन् बभूव मेदज्ञः समस्तवणिजां पतिः ॥ ३१९ ॥
न्द्रोपदेशेन यतित्वं प्राप्य यत्नतः । सहित्वाऽङ्गारदेवस्य चोपसर्गं स केवली ॥ ३२० ॥
स्तो वणिग् यस्तु सोऽद्य मेदज्ञकेवली । बभूव भूपते नूनं ज्ञाताखिलपदार्थकः ॥ ३२१ ॥
मपदो दत्तो ज्यायान् मन्दनोऽपि यः । सोऽयमङ्गारदेवोऽभूत् कृतसंसारहिण्डनः ॥३२२॥
जघन यत्नान्दशूकः स भूपते । हतो गरुडदत्तेन वैरं तेनानयोरभूत् ॥ ३२३ ॥
तोऽपि महाभ्रो तपः कृत्वा जिनोदितम् । अच्युतेन्द्रो बभूवाथ तेनाह प्रतिबोधितः ॥३२४॥
र्मं समादाय नूनं नागवसुप्रियम् । देवलोकं परिप्राप्य देवदेवीमनोहरम् ॥ ३२५ ॥
स्मात् समागत्य श्रीमदुज्जयिनीमथा । अधुनैपार्यिका जाता तिष्ठति प्रीतमानसा ॥ ३२६ ॥
केवलिनो वाक्यं वैरसंबन्धकारणम् । बभूव प्रीतचेतस्को गन्धर्वानीकभूपतिः ॥ ३२७ ॥
स्ववैरसबन्धं संसारार्णवकारणम् । विहाय सकलं सङ्ग वैराग्याहितमानसः ॥ ३२८ ॥
र वन्दनां भक्त्या कृतनिन्दनगर्हणः । जग्राहाङ्गारदेवोऽपि तपः केवलिनोऽन्तिके ॥ ३२९ ॥
ाङ्गारदेवोऽपि तपः कालं समाधिना । जातो ग्रैवेयके मध्ये दिव्यामोदिविमानके ॥ ३३० ॥
रूपधरः श्रीमान् वस्त्राभरणभूषितः । चतुर्विंशत्समुद्रायुरहमिन्द्रो बभूव सः ॥ ३३१ ॥
च्युतो भवं प्राप्य कृत्वा जैनं तपः परम् । ध्रुवमङ्गारदेवोऽयं सिद्धिं प्राप्स्यति नीरजः ॥३३२॥
र्नीकभूपोऽपि बहुभिर्नरकुञ्जरैः । तपो जग्राह जैनेन्द्रं तदा केवलिनोऽन्तिके ॥ ३३३ ॥
केवली कृत्वा विहारं केवलस्य सः । पर्वते सम्मेदसंज्ञाख्ये निर्वाणमगमत् पुनः ॥ ३३४ ॥

॥ इति श्रीफलप्रपुष्पादिसहितस्पर्शहस्तकश्रेष्ठिकथानकम् ॥ १०५ ॥

*

१०६ उग्रसेनवसिष्ठकथानकम् ।

नवनान्तेऽस्ति मथुरा नगरी परा । उग्रसेनो नृपस्तस्यास्तत्प्रिया रेवती मता ॥ १ ॥
सैन्यसंपन्नौ प्रतापाक्रान्तशात्रवौ । कंसातिमुक्तकौ पुत्रौ भवेतामनयोः परौ ॥ २ ॥
दत्तोऽभवत् तस्यां श्रावको दर्शनान्वितः । कान्ता जिनमती तस्य तन्मनोहरणक्षमा ॥ ३ ॥
य श्रेष्ठिनो दिव्या प्रिया कर्मकरी वराम् । जिनेन्द्रभक्तिसंयुक्ता प्रियङ्गुलतिकाभिधा ॥ ४ ॥
म्यग्दर्शनसंपन्ना जिनभक्तिपरायणा । रूपातिशयसंयुक्ता कलाविज्ञानकोविदा ॥ ५ ॥
ीर्येऽन्यदा दिव्यमथुरां परमोदयाम् । वसिष्ठस्तापसः प्राप सितसांपरिवर्जिताम् ॥ ६ ॥
म्यास्यं तपः सोऽयं यमुनाख्यनदीतटे । नानातरुकृतच्छाये स्वच्छपानीयराजिते ॥ ७ ॥
मन्त्रात्य संदीप्ते दिक्षु सर्वासु सादरम् । सूर्याभिनाऽप्यसौ सम्बोधपाकुरुपोऽकरोत् ॥ ८ ॥
सूर्य जपन् वातं पिबन् ऊर्ध्वजटाधरः । पञ्चाग्निमध्येऽसौ एकपादस्थितो तपन् ॥ ९ ॥
पतत्सर्वाङ्गो विह्वलीभूतमानसः । मीनोद्धृतिं विधायासौ पपात यमुनाह्रदे ॥ १० ॥
यत्नं विधायात्र प्रोद्धीर्य यमुनाजलात् । भूपस्तपश्चकारेदं वसिष्ठोऽस्मिन्महातपः ॥ ११ ॥

1 [स्मरतो]. 2 पफ कुम्भम्, ज कुम्भमिरम्. 3 पफ कुम्भम्, ज कुम्भम्. 4 पफ कुम्भम्, — कुम्भम्. 5 ज रस्यै° 6 पफज put No. 104. 7 [सितसाप°]. 8 पफ प्रगीर्य

तत्रत्यमारसम्पन्नाः काश्चिद्दीव्यन्ति सिद्धकाः । काश्चिन्मूर्तिं परिप्राप्ताः स्वकर्म सन्ति मूर्च्छिताः ॥ १२ ॥
एवं पाठं ततो पाठं कुर्वाणो निजवाञ्छया । अज्ञातपरमार्थोऽसौ तिष्ठति प्रीतमानसः ॥ १३ ॥
कालिन्द्याख्यनदीतीरे वसिष्ठं वीक्ष्य योषितः । सम्पादयेऽपि तं नत्वा गच्छन्ति निजमन्दिरम् ॥ १४ ॥
पानीयघटनारीभिः प्रियङ्गुलतिका गता । वसिष्ठपादयोर्जातु न प्रणामं करोति सा ॥ १५ ॥
प्रियङ्गुलतिकां दृष्ट्वा साधोर्नतिमकुर्वतीम् । जगुस्ता योषितस्तां च कोपास्यनिरीक्षणा ॥ १६ ॥
प्रियङ्गुलतिके कस्मान्मुनेः पादकुशेशयम् । हले न वन्दसे भूरि सुरासुरनतं तराम् ॥ १७ ॥
निशम्य तद्वचस्ताश्च प्रियङ्गुलतिका जगौ । भवत्यः स्ववशा नित्यं कृतपुण्यकदम्बकाः ॥ १८ ॥
अहं परवशा पुण्या स्वामिनो ममवेपिता । घटं कुम्भगतं कृत्वा यामि गेहं त्वरावती ॥ १९ ॥
तेन मेऽवसरो नास्ति पतन्त्वा पादयोर्मुने । परप्रेषणकारिण्याः पर्यायो न हि जायते ॥ २० ॥
अन्यच्च भो बुधा योऽसि धर्माधर्मविवेकधीः । स प्रणामं करोत्यस्य योगिनः पादपङ्कजे ॥ २१ ॥
धर्माधर्मफलं नूनं न जानामि मनागपि । वसिष्ठस्यास्य अन्यच्च विद्यामि कथं भवित् ॥ २२ ॥
एवं निगद्य तां वाक्यं प्रियङ्गुलतिकाभिधा । दिने दिने समादाय घटं याति गृहं स्वकम् ॥ २३ ॥
अन्यदा सकला रामा पानीयार्थं समागताः । वसिष्ठाख्यमुनेर्भक्त्या विनेमुः पदपङ्कजम् ॥ २४ ॥
प्रियङ्गुलतिका चैका वसिष्ठनतिवर्जिता । तदा तद्वन्दनाभ्यस्ता पश्यन्ती व्यवतिष्ठते ॥ २५ ॥
एव सा तिष्ठती वाक्यं समस्तरमणीजनैः । हस्तापहस्ततो धृत्वा नीता तन्मुनिसंनिधिम् ॥ २६ ॥
प्राप्याथ तत्समीपं च प्रियङ्गुलतिकामिमाम् । जगुस्ता योषितः क्रोधाद्विस्माकुञ्चितभ्रुवः ॥ २७ ॥
प्रियङ्गुलतिके मुग्धे विशिष्टस्यास्य योगिनः । त्वयाऽवश्यं नतिः कार्या नान्यथा गमनं तव ॥ २८ ॥
निशम्यासां वचः साऽपि तां जगौ क्रुद्धमानसा । धीवरस्य परं पादौ नमाम्यस्य न योगिनः ॥ २९ ॥
प्रियङ्गुलतिकावाक्यं निशम्य कोपमाप्य सः । उग्रसेनं परिप्राप्य वसिष्ठो निजगाविदम् ॥ ३० ॥
दुर्वारोऽद्य वरो राजन् जिनदत्तेन रोषितः । धीवरो गदितो बुद्धिर्महापापविधायकः ॥ ३१ ॥
वसिष्ठवचनं श्रुत्वा कोपमासाद्य वेगतः । प्रतीहारं जगौ राजा सभामध्ये व्यवस्थितः ॥ ३२ ॥
प्रतीहार व्रज द्रुतं समदं जिनदत्तकम् । त्वरितं प्राप्य तत्पार्श्वं महत्त्वं तं समानय ॥ ३३ ॥
नरेन्द्रवचनात् प्राप्य प्रतीहारो वणिग्वरम् । उत्तिष्ठ नृपसामीप्यं त्वमेहि नृपवाक्यतः ॥ ३४ ॥
प्रतीहारस्य वाक्येन जिनदत्तो नृपं ययौ । उग्रसेनोऽपि [illegible] जगौ कोपारुणेक्षणः ॥ ३५ ॥
किं कारणमिमं साधुं धीवरं वदसि स्फुटम् । तद्वाक्यतो नृपं प्राह जिनदत्तोऽपि सादरम् ॥ ३६ ॥
यदहं मासिकं साधुं ब्रवीमि मनसाऽप्यलम् । ततो नरेन्द्र नीतिज्ञो भवतामप्ययं मुनिः ॥ ३७ ॥
जिनदत्तवचः श्रुत्वा जगौ राजा तपोधनम् । किं मुने सत्यमेवेदं यदाह वणिजां पतिः ॥ ३८ ॥
उग्रसेनवचः श्रुत्वा वसिष्ठोऽपि जगाद तम् । न वक्तीदमयं राजन् प्रियङ्गुलतिका जगौ ॥ ३९ ॥
वसिष्ठस्य वचः श्रुत्वा जिनदत्तो नृपं जगौ । यदि सत्यमिदं राजन् मुनेरस्य तपस्विनः ॥ ४० ॥
जैनदत्तं वचः श्रुत्वा गदितोऽयं नरेशिना । अमुना जिनदत्त त्वं निर्दोषोऽसि मदुक्तितः ॥ ४१ ॥
ततो भूपेन साऽऽहूता प्रियङ्गुलतिका द्रुतम् । प्रणम्य भूपतिं भक्त्या निविष्टा नृपसंनिधौ ॥ ४२ ॥
दृष्ट्वा पुरः स्थितां रामां प्रियङ्गुलतिकामिमाम् । उग्रसेनो जगादाशु कोपलोहितलोचनः ॥ ४३ ॥
प्रियङ्गुलतिके पापे त्वं मुनीशं तपोधनम् । ब्रवीषि मासिकं दुष्टे छिनद्मि रसनां तव ॥ ४४ ॥

1 पफ कम्पम्, ख प्रजल्पीयस्. 2 पफ करणा. 3 पफ वता. 4 पफ तुम्यम्, ख तुम्यमीयस्. 5 पफ तुम्यम्, ख तुम्यमीयस्. 6 [मासिकं]. 7 [मासिकं]. 8 पफ तुम्यम्, ख तुम्यम्.

निशम्य भूपतेर्वाक्यं प्रियङ्गुलतिका नृपम् । जगाद विह्वलस्वान्ता रुदन्ती गद्गदाक्षरम् ॥ ४५ ॥
नरेन्द्राहं समुत्पन्ना कर्मभिर्दुष्कृतात्मभिः । पण्यस्त्रीकुलसंभूता परप्रेषणकारिणी ॥ ४६ ॥
स्वामिन्या जलमानेतुं प्रेषिता यमुनानदीम् । यत्र तिष्ठत्ययं योगी कुर्वाणो विविधं तपः ॥४७॥
पानीयघटनारीभिः सम सखीभिरादरात् । गताऽहं जलमानेतुं प्रदेशं त नरेश्वर[1] ॥ ४८ ॥
सर्वा मनोरमा रामा पुण्ययुक्ता महीपते । पतन्ति पादयोर्भक्त्या वसिष्ठस्यास्य धीमतः ॥ ४९ ॥[2]
स्वस्वामिनीभयेनाहं जलमादाय सत्वरम् । नरेन्द्र स्वगृहं यामि स्वकीयोदरपूरणात् ॥ ५० ॥
योषितोऽन्या वदन्त्येव मां नरेश पुनः पुनः । प्रियङ्गुलतिके यामो मुनिं नन्तुं तपोनिधिम् ॥ ५१ ॥
इमा मयोदिता राजन् भवन्त्यः पुण्यसंभवाः । स्वयशाः पादयोरस्य कुरुध्वं पतनं मुने ॥ ५२ ॥
मन्दभाग्या त्वहं दीना दारिद्र्यभयपीडिता । तिष्ठामि दुःखिनी नित्यं पापनिर्मितविभ्रमा ॥ ५३ ॥
समस्तमहिला भूप मां विहाय प्रयत्नतः । वसिष्ठचरणौ नन्तुं प्रययुस्तत्समीपताम् ॥ ५४ ॥
अहं जलभृतौ कुम्भौ समादाय त्वरावती । गता निजगृहं भूप स्वामिनीभयतो द्रुतम् ॥ ५५ ॥
प्रियङ्गुलतिके शीघ्रं वसिष्ठस्यास्य सन्मुनेः । पादयोः पतनं चाद्य कर्तव्यं भक्तितस्त्वया ॥ ५६ ॥
कदापि यदि वा न त्वं पादयोः पतनं खले । ततो न विद्यते मोक्षस्तवाद्य निर्वृतिं विना ॥ ५७ ॥
अर्धचन्द्रं गले दत्त्वा समस्तमहिलाजनैः । पादान्तिकं मुनेरस्य नीताऽहं नन्तुमिच्छया ॥ ५८ ॥
उक्तास्ततो मया राजन् कोपमासाद्य योषितः । महाकष्टकठारार्थं कुर्वन्त्यः पुरुषं[3] तपम् ॥ ५९ ॥
हठकारेण चैतस्य मद्यं चरणवन्दनाम् । कारयिष्यथ भो कस्मान्मीनबन्धनकारिणः ॥ ६० ॥
श्रुत्वा मद्वचनं योगी कुपिताक्रोशनं तथा । छद्म यथाभिरामाणां युवतीनां विहाय माम् ॥ ६१ ॥
योषितस्तद्भयात् भ्रष्टा गतास्ताः स्वगृहीस्वयाम् । तन्मुक्ताऽहं गृहं प्राप्ता नित्यं मुनिभयाकुला ॥६२॥
एतावानेव राजेन्द्र मुनेरस्य पराभवः । मया कृतोऽपरं दोषं न जानामि मनागपि ॥ ६३ ॥[4]
प्रियङ्गुलतिकावाक्यं श्रुत्वा योगी जगादमुम् । इदमभुतपूर्वं किं तव येन विकत्थसे ॥ ६४ ॥
मत्पिता माधवो वृद्धे सर्वलोकपितामहः । जगत्कर्ता जगत्स्याद प्रजापालो जनप्रियः ॥ ६५ ॥
एवमादिगुणस्यास्य ज्येष्ठपुत्रो गुणाकरः । चतुर्वेदसमायुक्तः सर्वशास्त्रार्थकोविदः ॥ ६६ ॥
ब्रह्मचारी सदा योगी कुर्वाणस्तापसं तपः । वायुभक्षणं चापि भूपे मां मात्सिकं[5] च किम् ॥६७॥
वसिष्ठवचनं श्रुत्वा प्रियङ्गुलतिका जगौ । यदि त्वं लक्षणं वेत्सि मात्सिकस्य[6] ततो वद ॥ ६८ ॥
श्रुत्वा तद्वचनं साधुर्जगावेतां पुरःस्थिताम् । यो मीनमारणं कुर्यात् स भवेद् भुवि मात्सिकः[7] ॥६९॥
आकर्ण्य तद्वचः साऽपि जगावेवं स्फुटाक्षरम् । यद्येवं त्वमसि स्वयं हन्ति[8] मत्स्याननारतम् ॥७०॥
तथापि साधुना चापि चेष्टितेऽद्य कथं खले । निहन्मि[9] मात्सिकान् पापे त्वं ब्रूहि मम सांप्रतम् ॥७१॥
वसिष्ठवचनं श्रुत्वा न्यगदत् त पुनः सका । पाठीनोत्कलनं कृत्वा वदे त्वं ममसि द्रुतम् ॥ ७२ ॥
समस्तभुवनस्यातकीर्तिशुभ्रीकृताम्बर । मुने शुष्कजटाभारान्विहंसि शफरीगणान् ॥ ७३ ॥
यदि मद्वचनं साधो न मन्यसि सांप्रतम् । ततो निजं जटाभारं विरलीकुरु संसदि ॥ ७४ ॥[10]
स्वत्वसद्वचनात् तूर्णं स्थलीकृतनिरीक्षणः । यथ[11] संक्षीणकारार्यं जटाभारं समान्तरे ॥ ७५ ॥
वर्षाघनाघनोन्मुक्ता जलधारा इव द्रुतम् । पतन्ति तज्जटाभाराच्छफर्यो नृपसंसदि ॥ ७६ ॥

---

1 पफ नेश्वर. 2 [नरेश्वर]. 3 [परुषं]. 4 पफ कुलकम्, ज कुलकमिदम्. 5 [मात्सिकं]. 6 पफ षड्गुणकम्, ज षड्गुणकमिदम्. 7 [मात्सिकस्य]. 8 [मात्सिकः]. 9 फ हंति [हंसि]. 10 [मत्स्यकान्]. 11 पफ त्रिकम्, ज त्रिकमिदम्. 12 [जवा: संघो].

क्वचिन्नीपपरिच्छन्न क्वचिन्नीपसमन्विताः । क्वचिन्मूर्ध्नि परिप्राप्ता दृश्यन्ते मुनि भूभुजा ॥ ७७ ॥[1]
दृष्ट्वा मासस्थितं मूर्खं पञ्चाग्न्याश्रयमन्तरात् । पूजयित्वा नृपो भक्त्या भिक्षाहेतुस्थितमपि ॥ ७८ ॥
तत्र समागतं सर्वं विस्मयव्याप्तमानसम् । उग्रसेनो जगादाशु सोपकण्ठक्रियात्मकः ॥ ७९ ॥
जिनधर्मं प्रकुर्वन्ति ये नरा ज्ञानिनस्त्वके । अयमज्ञानसंपन्नो वसिष्ठः कुरुते तपः ॥ ८० ॥[2]
नृपालवचनं श्रुत्वा तदा सातिशयान्वितम् । जिनधर्मं सुखाधारं जगृहुर्बहवो नराः ॥ ८१ ॥
उग्रसेननृपो रोषाद् वसिष्ठं स्वपुरादरम् । नूनं निर्घाटयामास बहिरक्रमनादरम् ॥ ८२ ॥
गन्धावतीनदीगङ्गासङ्गमं प्राप्य सत्वरम् । कुर्वंस्तपो वसिष्ठोऽयमास्ते पञ्चाग्निनामकम् ॥ ८३ ॥
अत्रान्तरे नमेस्तीर्थे वीरभद्रो गणेश्वरः । तत्सङ्गमं परिप्राप मुनिपञ्चशतावृतः ॥ ८४ ॥
दृष्ट्वाऽमुं तापसं तत्र जगावेको यतिर्मुदा । उग्रं तपो भवेल्लोके तापसानां यशस्विनाम् ॥ ८५ ॥
तत्साधुवचनं श्रुत्वा वीरभद्रो जगावमुम् । यत्ते जीववधं चैषां कुर्वतां कीदृशं तपः ॥ ८६ ॥
वीरभद्रवचः श्रुत्वा वसिष्ठोऽपि जगाद तम् । भो भो मुने किमस्माकं कुरुषे त्वेन निन्दनम् ॥ ८७ ॥
को मया निहतो साधो कृतो जीववधो मुनि । कथं चाज्ञानसंयुक्तं तपो भवति मे वद ॥ ८८ ॥[3]
वसिष्ठस्य वचः श्रुत्वा जगादैवं यतीश्वरः । स्वगुरुं क्व गतं वेत्सि ज्ञानी यद्यसि तं वद ॥ ८९ ॥
निशम्य मुनिचन्द्रस्य वचनं सत्यतावहम् । वसिष्ठोऽपि जगादैवं कोपलोहितलोचनः ॥ ९० ॥
तापसानां तपो घोरं विधाय नष्टकल्मषम् । मर्त्यलोके समुत्पन्नो मद्गुरुः परमोदयः ॥ ९१ ॥
दिव्यं सुखं मनोहारि हारकुण्डलशोभितः । भुञ्जानो मद्गुरुः स्वर्गे वसन्नत्र साधो तिष्ठते ॥ ९२ ॥[4]
आकर्ण्य तद्वचः साधुर्जगादैव परिस्फुटम् । त्वद्गुरुर्न गतः स्वर्गं तिर्यग्योनिमुपाश्रितः ॥ ९३ ॥
काष्ठस्य दह्यमानस्य चान्तरे वह्निनाऽस्य च । महाभुजङ्गमो जातो दह्यमानो वितिष्ठते ॥ ९४ ॥[5]
तदाकर्ण्यतः समादाय कुठारं कोपसंगतः । काष्ठमुत्पाटयामास स वसिष्ठोऽन्येन सत्वरम् ॥ ९५ ॥
काष्ठमध्ये ततो दृष्ट्वा दह्यमानं भुजङ्गमम् । वसिष्ठश्चिन्तयामास विस्मयव्याप्तमानसः ॥ ९६ ॥
संदेहमन्तरेणायं जिनधर्मो दयापरः । सर्वसत्त्वसुखाधारः सर्वधर्मोपरि स्थितः ॥ ९७ ॥
चिन्तयित्वा चिरं सोऽपि भक्तिप्रह्वतनूरुहः । संप्राप्य तं गुरुं नाथं जगादेति ससंभ्रमः ॥ ९८ ॥
जिनधर्मं परं साधो वक्तुं सर्वशरीरिणाम् । चिन्तामणिसमं लोके कथयेश ममाधुना ॥ ९९ ॥[6]
वसिष्ठवचनं श्रुत्वा वीरभद्रो गणेश्वरः । जैनं धर्मं जगादास्मै सर्वसत्त्वसुखास्पदम् ॥ १०० ॥
हित्वा स तापसं धर्मं वसिष्ठो मुनिवाक्यतः । महावैराग्यसंपन्नो बभूव श्रमणो महान् ॥ १०१ ॥
मिथ्यात्वमपरित्यक्तस्ततोऽसौ निजसूरिणा । समर्पितः श्रुतार्थं च शिवगुप्ताय सूरये ॥ १०२ ॥
पोषयित्वा स षण्मासं शिवगुप्तोऽपि सत्वरम् । अमुं समर्पयामास शिवभद्राय सूरये ॥ १०३ ॥
पोषयित्वा स भूयोऽपि षण्मासं सुमतेर्गुरोः । अमुं समर्पयामास शिवभद्रो गणाधिपः ॥ १०४ ॥
विधाय पोषणं चास्य षण्मासं तेन सूरिणा । निरस्तः क्षान्तिकादाशु निर्विघ्नेन मुनिः सकः ॥ १०५ ॥
ततो निगत्य वेगेन संप्राप्यैकविहारताम् । स मुनिर्विहरंश्चार मथुरां नगरीं पराम् ॥ १ ६ ॥
मासातपं प्रकुर्वाणो गोवर्धनगिरौ सति । संतिष्ठते मुनिर्धीरः सम्यासितपरीषहः ॥ १ ७ ॥
एवं हि तिष्ठतस्तत्र कुर्वाणस्य तपः परम् । देवता वशतां प्राप्य यमगुर्सं पुरः स्थिताः ॥ १०८ ॥

---

1 पच भिक्खम्, ब भिक्खमीरम्. 2 पच भिक्खम्, ब भिक्खमीरम्. 3 पफ कुसुम, ब कुसुमीरम्. 4 पच कुसुम्, ब कुसुमीरम्. 5 पफ कुसुम्, ब कुसुमीरम्. 6 पफ भिक्खम्, ब भिक्खमीरम्. 7 प omits No. 103

आज्ञां देहि मुनेऽस्माकं तपोराशिसमुज्ज्वलाम् । भवतां धर्ममूर्तीनां किं कुर्मो वयमागताः ॥१०९॥
निशम्य तद्वचः साधुस्तोषसंतुष्टमानसः । जगाद विस्मयोपेता देवता विनयस्थिताः ॥ ११० ॥
यदा प्रयोजनं मे स्याद् भवतीभिः कृपाबलात् । मदन्तिकं तदा भद्रा द्रुतमागच्छत स्फुटम् ॥१११॥
निशम्य योगिनो वाक्यं देवता प्रीतचेतसः । यथागमं पुनर्जग्मुः स्मृतसाधुगुणान्तराः ॥ ११२ ॥
उग्रसेनादिभिर्भूपैर्वसिष्ठोऽभ्यगतः क्षितौ । विहाय तापसं धर्मं दीक्षितो जिनशासने ॥ ११३ ॥
कृत्वा मासोपवासं च पारणार्थं विशुद्धधीः । मथुरास्थां पुरीं यातु विवेश प्रहरद्वये ॥ ११४ ॥
विश्रुतोऽस्य पुरे दत्ता घोषणा भूभुजा तदा । दास्यामि पारणामस्मै वसिष्ठमुनयेऽन्वहम् ॥११५॥
योऽन्यः कोऽपि ददात्यस्मै पारणं नियतं मम । स दण्ड्यः पञ्चभिर्दण्डैर्भविष्यति महीतले ॥११६॥
भिक्षार्थं भ्रमतः साधोः क्रमेण गृहतो गृहम् । न कोऽपि पारणामस्मै ददाति नृपभीतितः ॥११७॥
सर्वं पुरं परिभ्रम्य प्रविष्टो राजमन्दिरम् । न दृष्टो भूभुजा योगी निर्जगाम तदालयात् ॥ ११८ ॥
गोवर्धनगिरिं प्राप्य वसिष्ठमुनिरादरात् । मासोपवासमादाय तस्थौ मुदितमानसः ॥ ११९ ॥
ततो मासोपवासान्ते प्रविश्य मथुरां पुरीम् । भिक्षामप्राप्य भूयोऽपि आरुरोह नगं तकम् ॥१२०॥
मासोपवासमादाय भूयोऽपि स मुनिः सुधीः । तस्थौ धृतिबलोपेतस्तद्गिरौ विजितेन्द्रियः ॥१२१॥
भूयो मासोपवासान्ते प्रविशन् मथुरां मुनिः । भिक्षार्थं वृद्धया नार्या दृष्टो मौनी कथंचन ॥१२२॥
सा मुनिं वीक्ष्य तं प्राह भूभुजा विहितोऽनयः । निषिद्धः सकलो लोको भिक्षायै न ददाति ते ॥१२३॥
वृद्धनारीवचः श्रुत्वा कोपमासाद्य वेगतः । गोवर्धनगिरिं गत्वा तस्थावित्थं स देवताः ॥ १२४ ॥
चिन्तितानन्तरं प्राप्य निगदन्ति तदा मुनिम् । आगम्य देहि चादेशं क्षिप्रं किमपि सांप्रतम् ॥१२५॥
निशम्य तद्वचः साधुः प्राहैताः पुरतः स्थिताः । उग्रसेननृपस्याशु गत्वा कुरुत हिंसनम् ॥ १२६ ॥
साधुवाक्यं समाकर्ण्य नृपहिंसापरायणम् । विस्मयव्याप्तचेतस्का देवता निगदन्त्यमुम् ॥ १२७ ॥
नाथ निर्ग्रन्थरूपेण स्थितस्य तव शोभनम् । हिंसोपदेशनं दातुं युज्यते न मनागपि ॥ १२८ ॥
देवतावचनं श्रुत्वा भूयोऽपि निजगाद सः । अन्यजन्मनि मे सर्वा निदेशं कुरुतादरात् ॥१२९॥
उग्रसेनस्य दुष्टस्य चान्यजन्मनि देवताः । मद्वार्तां प्रयत्नेन कुरुताशु निपातनम् ॥ १३० ॥
एवं निगद्य वा भूत्वा निदानं कल्मषमप्यलम् । स मुनी रेवतीगर्भमाससाद प्रचण्डधीः ॥ १३१ ॥
रेवतीगर्भसंभूते सन्मुनौ तन्मनीरकम् । निरीक्ष्य दुर्बलं नाथं पप्रच्छेदं महीपतिः ॥ १३२ ॥
त्वम्भीरं महादेवि त्वं मत्प्राणवल्लभे । किंकारणमिदं जातं दुर्बलं वद मेऽधुना ॥ १३३ ॥
उग्रसेनवचः श्रुत्वा रेवती तन्मनःप्रिया । जगादेमं च कृच्छ्राद् वचसाश्रयमीयुषा ॥ १३४ ॥
यतः प्रभृति कोऽप्येष जीवो माऽन्तर्गर्भमाश्रितः । ततो मे दोहलो जातः सुदारुणसुखप्रदः ॥१३५॥
अनेन कारणेनेश दुर्बला नितरामहम् । संजाता कथितं ते च मया कुरु यथोचितम् ॥ १३६ ॥
निशम्य रेवतीवाक्यं उग्रसेनो जगावमुम् । कोऽशुभो दोहलो वर्ते नाम यो मे न पार्यते ॥१३७॥
तत्सत्यवाक्यतः सा च हित्वा लज्जां वधूवरम् । जगाद निष्ठुरस्वान्ता निजकान्तं पुरःस्थितम् ॥१३८॥
त्वदीयं हृदयं नाथ नूनं कर्तिकया यदि । निकृत्य रुधिरं सर्वं पिबामि करसम्पुटैः ॥ १३९ ॥
इदं मे दोहदं नाथ क्रूरनिष्ठुरचेतसः । संजातमधुना सर्वं मया ते परिकीर्तितम् ॥ १४० ॥

1 [क्षोपदे]. 2 पफ युग्मम्, ज युग्ममिदम्. 3 पफ मदन्तिक. 4 पफ युग्मम्, ज युग्ममिदम्. 5 ज निपतत् 6 पफ युग्मम्, ज युग्मम्. 7 पफ त्रिकम्, ज त्रिकमिदम्. 8 पफ त्रिकम्, ज त्रिकमिदम्. 9 [कर्तिकया]. 10 पफ त्रिकम्, ज त्रिकमिदम्.

कर्णाभिमीणपरिलक्ष्या कर्णिभिर्मीनसमन्विता । कर्णाभिमूर्धा परित्राश्य दृश्यन्ते भुवि मुग्धा ॥ ७७ ॥[1]
दृष्ट्वा मात्स्यकीं भूमौ पतितास्याश्च्यन्तरम् । पृष्टयित्वा नृपो भूत्वा विस्मयविस्मितमानसः ॥ ७८ ॥
ततः समाचर्ण सर्वं विस्मयमप्याशमानसम् । उग्रसेनो जगादाशु कोपकम्पकिताङ्गकः ॥ ७९ ॥
जिनधर्मं प्रकुर्वन्ति ये नरा ज्ञानिनस्त्वके । अयमज्ञानसंपन्नो वसिष्ठः कुरुते तपः ॥ ८० ॥
नृपतत्वचनं श्रुत्वा तदा सातिशयान्वितम् । जिनधर्म सुखाधारं जग्राहुर्बहवो नराः ॥ ८१ ॥
उग्रसेननृपो रोषाद् वसिष्ठं स्वपुरात्तरम् । नूनं निघाटयामास सद्भिरक्तमन्यास्तरम् ॥ ८२ ॥
यन्मास्त्वीनरहीगङ्गासंगमं प्राप्य सत्वरम् । कुर्वंस्तपो वसिष्ठोऽसमाख्ये पञ्चाग्निनामकम् ॥ ८३ ॥
अत्रान्तरे नभस्तीर्थे वीरभद्रो गणेश्वरः । तत्संगमं परिप्राप मुनिपञ्चशतावृतः ॥ ८४ ॥
दृष्ट्वाऽसौ तापसं तत्र जगादैको यतिर्युवा । उग्रं तपो भवेल्लोके तापसानां यशस्विनाम् ॥ ८५ ॥
तत्साधुवचनं श्रुत्वा वीरभद्रो जगाद्गुरुः । यते जीववधं चैषां कुर्वतां कीदृशं तपः ॥ ८६ ॥
वीरभद्रवचः श्रुत्वा वसिष्ठोऽपि जगाद तम् । भो भो मुने किमस्माकं कुरुषे त्वेन निन्दनम् ॥ ८७ ॥
को मया निहतः साधो कृतो जीववधो भुवि । कथं वाऽज्ञानसंयुक्तं तपो भवति मे वद ॥ ८८ ॥[2]
वसिष्ठस्य वचः श्रुत्वा जगादैवं यतीश्वरः । त्वगुरुः क गतं वेत्ति ज्ञानी यदसि तद् वद ॥ ८९ ॥
निशम्य मुनिचन्द्रस्य वचनं सत्यतावहम् । वसिष्ठोऽपि जगादेवं कोपक्षोभितलोचनः ॥ ९० ॥
तापसानां तपो घोरं विधाय मधुरं करम् । जगल्लोके समुत्पन्नो मद्गुरुः परमोदयः ॥ ९१ ॥
दिव्यं सुखं मनोहारि हारकुण्डलभूषितः । भुञ्जानो मद्गुरुः स्वर्गे स साधो वितिष्ठते ॥ ९२ ॥[3]
वाक्यमेतस्य साधुर्वचमापेव परिस्फुटम् । त्वद्गुरुर्न गतः स्वर्गं तिर्यग्योनिमुपाश्रितः ॥ ९३ ॥
काष्ठस्य दह्यमानस्य चान्तरे वह्निनाऽस्य च । महाभुजङ्गमो जातो दह्यमानो वितिष्ठते ॥ ९४ ॥[4]
तदाकर्ण्य ततः समादाय कुठारं कोपसंगतः । काष्ठमुत्पाटयामास स वसिष्ठोऽनेन सत्वरम् ॥ ९५ ॥
काष्ठमध्ये ततो दृष्ट्वा दह्यमानं भुजङ्गमम् । वसिष्ठश्चिन्तयामास विस्मयव्याप्तमानसः ॥ ९६ ॥
संदेहमन्तरेणायं जिनधर्मो दयापरः । सर्वसत्त्वसुखाधारः सर्वधर्मोपरि स्थितः ॥ ९७ ॥
चिन्तयित्वा चिरं सोऽपि भक्तिभरसमन्वितः । संप्राप्य तं गुरुं नाथ जगादेति ससंभ्रमः ॥ ९८ ॥
जिनधर्मं परं साधो वन्द्यं सर्वशरीरिणाम् । चिन्तामणिसमं लोके कथयेश ममाधुना ॥ ९९ ॥
वसिष्ठवचनं श्रुत्वा वीरभद्रो गणेश्वरः । जैनं धर्मं जगादास्मै सर्वसत्त्वसुखास्पदम् ॥ १०० ॥
हित्वा स तापसं धर्मं वसिष्ठो मुनिवाक्यतः । महावैराग्यसंपन्नो बभूव श्रमणो महान् ॥ १०१ ॥
मिथ्यात्वभयपरित्यक्तस्ततोऽसौ निजसूरिणा । समर्पितः श्रुतार्थं च शिवगुप्ताय सूरये ॥ १०२ ॥
पोषयित्वा स षण्मासं शिवगुप्तोऽपि सत्वरम् । धर्मं समर्पयामास शिवभद्राय सूरये ॥ १०३ ॥
पोषयित्वा स मूयोऽपि षण्मासं सुमतेर्गुरोः । धर्मं समर्पयामास शिवभद्रो गणाधिपः ॥ १०४ ॥
विधाय पोषणं चास्य षण्मासं तेन सूरिणा । निरस्तः क्षान्तिकयाद्राशु निर्विघ्नेन मुनिः सकः ॥ १०५ ॥
ततो निर्गत्य वेगेन संप्राप्यैकविहारताम् । स मुनिर्विहरन्नार मथुरां नगरीं पराम् ॥ १०६ ॥
मासातपं प्रकुर्वाणो गोवर्धनगिरौ सति । सतिष्ठते मुनिर्मासमध्यासितपरीषहः ॥ १ ७ ॥
एवं हि तिष्ठतस्तत्र कुर्वाणस्य तपः परम् । देवता वसतां प्राप्य श्रमणस्यं पुरः स्थिताः ॥ १०८ ॥

---

1 पफ मिथ्यम्, ब मिथ्यमीत्यम्, 2 पफ मिथ्यम्, ब मिथ्यमीत्यम्, 3 पफ युग्मम्, ब युग्मकीत्यम्, 4 पफ युग्मम्, ब युग्मकीत्यम्, 5 पफ युग्मम्, ब युग्मकीत्यम्, 6 पफ मिथ्यम्, ब मिथ्यमीत्यम्, 7 फ omits No. 103

यदि कलिङ्के नूनं त्वत्पुत्रो न भवत्ययम् । सोदरो भागिनेयो मे चोग्रसेनशरीरजः ॥ १७४ ॥
जरासन्धेन तुष्टेन दत्त्वा जीवंयशां सुताम् । मथुराविषयो दत्तः कंसायाक्लिष्टचेतसे ॥ १७५ ॥
ततोऽयं मथुरां प्राप्य पित्रा जनकमाहवे । कंसोऽमु स्थापयामास गोपुरद्वारकोपरि ॥ १७६ ॥
कोद्रवोदनसंपूर्णं शरावं हि सकाञ्जिकम् । कंसादेशेन भुङ्क्तेऽसौ तदा पठविवर्जितम् ॥ १७७ ॥
दृष्ट्वा पमानमीदृश्यमतिमुक्तकबालकः । दीक्षामादाय जैनेन्द्रीं तस्थौ मुदितमानसः ॥ १७८ ॥
ततः कंसेन तुष्टेन वसुदेवः सपत्तने । आनीतः प्रीतियुक्तेन सस्नेहं स स्थितिष्ठते ॥ १७९ ॥
मित्रवत्यां पुरि श्रीमान् देवकिर्नाम भूपतिः । कंसस्य सादरश्चासीत् पितृव्यः स्नेहतत्परः ॥१८०॥
बभूव तन्महादेवी धनदेवी मनःप्रिया । तत्सुता देवकी नाम रूपलावण्यसंयुता ॥ १८१ ॥
दत्ता कंसेन तुष्टेन वसुदेवाय देवकी । परिणीता विधानेन तद्गृहे सा स्थितिष्ठते ॥ १८२ ॥
पुष्पवत्यां च देवक्यां संजातायां महोत्सवः । तन्नैः कर्तुमारब्धस्तूर्यमङ्गलनिस्वनैः ॥ १८३ ॥
सुप्रतीकस्थितान्येषा नववस्त्राणि सादरम् । आदाय मस्तके स्वेन स्वकीये निजगामिना ॥ १८४ ॥
कलगीतं प्रगायन्ती मुनिमोहनकारणम् । कामिनीजनमध्यस्था नटन्ति पटहैः कलैः ॥ १८५ ॥
मथुराख्यपुरीमध्ये कृतलोकमहोत्सवे । जीवंयशा प्रनृत्यन्ती भ्राम्यति प्रीतमानसा ॥ १८६ ॥
दृष्ट्वाऽतिमुक्तकं साधुं चर्यामार्गेण तत्पुरे । तदा मध्याह्नवेलायां प्रविष्टं गोचरं प्रति ॥ १८७ ॥
विलोक्येमं मुनिं मार्गे रूपयौवनगर्विता । हसन्तीदं जगादासौ मन्दमन्दगतिक्रिया ॥ १८८ ॥
एहि देवर देवक्या पुत्रत्वो वर्तते महान् । तेन शीघ्रं परिप्राप्य मत्समं नर्तनं कुरु ॥ १८९ ॥
जीवयशावचः श्रुत्वा तदा साधुजनोज्झितम् । अतिमुक्तकयोगीन्द्रो जगादैतां पुरः स्थिताम् ॥१९०॥
अस्माकं नर्तनं भद्रे युज्यते न तपस्विनाम् । तेन त्वमेव सतोषान्नर्तनं कुरु बालिके ॥ १९१ ॥
एवमुक्ताऽपि सा तेन तथाऽपि वदतीदृशम् । नर्तनं गीतसंयुक्तं कुरु सार्धं मया मुने ॥ १९२ ॥
तद्वाक्यतोऽतितुष्टेन मुनिनाऽभ्या महानयम् । शापोऽलीकतया हीनो वितीर्णो दुष्टचेतसः ॥१९३॥
यत्कृते मस्तके कृत्वा वस्त्राणि विविधानि च । नर्तनं कुरुषे बाढं कलगीतं मदातुरा ॥ १९४ ॥
तस्या यो नन्दनो भावी नन्दितारोषबान्धवः । स ते भर्तुः खले नूनं करिष्यति निपातनम् ॥१९५॥
तद्वाक्यतस्तया तानि शिरोवस्त्राणि रोषतः । मस्तकात् सहसा मुक्त्वा प्रमुक्तानि सरोदनम् ॥१९६॥
विलोक्यैतानि वस्त्राणि तन्मुक्तानि धरातले । आदेशो विहितोऽनेन द्वितीयोऽस्य तपस्विना ॥१९७॥
न केवलमिमं कंसं त्वत्पतिं स हनिष्यति । त्वत्तातं च जरासन्धं त्रिखण्डाधिपतिं खले ॥ १९८ ॥
तद्वाक्यतः समादाय तानि वस्त्राणि हस्ततः । पादयित्वा रुषा मुक्त्वा ममर्द चरणेन सा ॥१९९॥
विलोक्य तानि वस्त्राणि मर्दितानि सपादतः । चक्रे तृतीयमादेशमिमं साधुः स सत्यवाक् ॥२००॥
त्वत्कुलं निःकुलं कृत्वा त्रिखण्डायामपि क्षितौ । देवकीनन्दनो राज्यं सकलं स विधास्यति ॥२०१॥
अन्तरायं विधायासौ निःसृत्य नगराद्‌दूरम् । उद्यानेषु तरोमूले सुखं तस्थौ मुनीश्वरः ॥ २०२ ॥
जीवंयशा निधायाङ्गे तानि वस्त्राणि दुःखिनी । स्वगृहं प्राप्य कंसस्य जगौ मुनिवरोदितम् ॥२०३॥
मुनिवार्तां समाकर्ण्य स्वकान्तापरिभाषिताम् । वसुदेवं वरं कंसो ययाचे भयविह्वलः ॥ २०४ ॥
वसुदेवमहाराज प्राक्तनं देहि मे वरम् । देवकी मद्गृहे नूनं प्रसूतिं विदधातु रम् ॥ २०५ ॥
कंसवाक्यं समाकर्ण्य तत्स्वभावमजानता । प्रतिपन्नं तदा सर्वं वसुदेवेन तोषिणा ॥ २०६ ॥

1 पफ त्रिवाक्यम्, ज त्रिवाक्यमिदम्, 2 पफ त्रिवाक्यम् ज त्रिवाक्यमिदम्, 3 पफ तुम्यम्, ज तुभ्यमिदम्, 4 [यदेव]. 5 पफ त्रिवाक्यम्, ज त्रिवाक्यमिदम्,

ततो मायाप्रपञ्चेन मृत्युना कृतचोदिता । प्रसूता दारकं दिव्यं पूर्वस्येव दिवाकरम् ॥ १४१ ॥
ततोऽसौ जातमात्रोऽपि रत्नकम्बलवेष्टितः । स्वनामाङ्कसमासक्तकंसमञ्जूषिकां श्रितः ॥ १४२ ॥
महामत्स्यासंगपूरितायामसेपतः । उग्रसेनेन भूपेन यमुनायां प्रवाहितः ॥ १४३ ॥[1]
ततोऽसौ कंसमञ्जूषा यमुनाजलपूरतः[2] । कौशाम्ब्याख्यपुरीं प्राप्य तस्थौ तत्तटसंगमे ॥ १४४ ॥
अथ प्रभातकाले तां कौशाम्बीनगरीभवा । ददर्श कंसमञ्जूषां कल्पपाली रजोदरी ॥ १४५ ॥
पिधायोद्घाटनं तस्याः[3] दृष्ट्वा तन्मध्यगं शिशुम् । आदाय तां निनायासौ संतुष्टा निजमन्दिरम् ॥१४६॥
कंसमञ्जूषिकान्तस्थो यतो लब्धोऽनया शिशुः । कंसनाम कृतं तस्य स्वगुणानुगतं ततः ॥ १४७ ॥
ततो वृद्धस्तनेनाशु वृद्धिं नीतोऽनया शिशुः । सप्तवर्षतो जातो रूपराजितविग्रहः ॥ १४८ ॥
हन्ति पौरशिशून् बालः सर्वदा यष्टिघाततः । निर्घाटितः स्वतो गेहाज्जनोपालम्भतोऽनया ॥ १४९ ॥
तया निर्घाटितः कंसस्तां पुरीं सुरिकाभिधाम् । जगाम सहसा रम्यां पताकाध्वजतोरणैः ॥ १५० ॥
गृहीतशस्त्रशास्त्रार्थो वसुदेवोपदेशतः । शरं च परमं लब्ध्वा तस्थौ कंसोऽपि संमदी ॥ १५१ ॥
मगधाख्यमहादेशे पुरे राजगृहाभिधे । अर्धचक्री बभूवासौ जरासन्धाभिधो नृपः ॥ १५२ ॥
अभवत् तन्महादेवी कलिङ्गोपपदा यथा । अनयोरङ्गजा तन्वी नाम्ना जीवयशा परा ॥ १५३ ॥
आदेशोऽत्र कृतस्तस्याः सत्यनैमित्तिकेन च । यथेयं विधवा कन्या भविष्यत्यल्पकालतः ॥१५४॥
यः पोदनपुराधीशं नृपं सिंहरथाभिधम् । बद्ध्वा नयति मत्पार्श्वं तस्मै दास्यामि कन्यकाम् ॥१५५॥
इयं प्रघोषणा दत्ता जरासन्धेन भूभुजा । समुद्रविजयाभ्याशे समाप्ता विधियोगतः ॥ १५६ ॥
समुद्रविजयः श्रुत्वा वृत्तान्तमशेषतः । ससैन्यं वसुदेवं च प्रजिघाय तदन्तिकम् ॥ १५७ ॥
पोदनाख्यपुराभ्याशे स्कन्धावारं निधाय सः । छायाघातनियोगेनायात् वसुदेवोऽपि तत्पुरम् ॥१५८॥
सिंहानां[5] विरुद्धानि समादाय ससैन्यकात् । छद्मत्वेन च तत्सैन्यं भावयामास भूपतिः ॥१५९॥
ततः सिंहरथं युद्धे वसुदेवोऽपि सादरम् । चकार विरथं शस्त्रदानी कंससारथिः ॥ १६० ॥
वसुदेवस्ततः प्राह तदा कंसं पुरः स्थितम् । बद्ध्वा सिंहरथं वत्स त्वमानय मदन्तिकम् ॥ १६१ ॥
अथ सिंहरथं बद्ध्वा वसुदेवरथे मुदा । कंसोऽपि च चकारेमं मत्तमातङ्गविभ्रमः ॥ १६२ ॥
योधयां च प्रदायेमां वसुदेवोऽपि तत्पुरे । कंसेन सहसा युद्धे धृतः सिंहरथो नृपः ॥ १६३ ॥
ततः सिंहरथं क्रूरं वसुदेवः सकंसकः । मुदा समर्पयामास जरासन्धस्य भोगिनः ॥ १६४ ॥
दृष्ट्वा पुरःस्थितं कंसं कोपपूरितमानसः । पप्रच्छ पितृसम्बन्धं जरासन्धः कुतूहली ॥ १६५ ॥
जरासन्धवचः श्रुत्वा कंसोऽपि निजगाद तम् । शौण्डीगर्भतोऽस्मीह कौशाम्बीनगरीभवः ॥१६६॥
रजोदरी च तद्भार्या रूपराजितविग्रहा । तत्सुतः कंसनामाहं शस्त्रशास्त्रकलान्वितः ॥ १६७ ॥
श्रुत्वा तद्वचनं राजा कौशाम्बीनगरीभवम् । दूतं प्रवेशयामास कंसस्य जननीं प्रति ॥ १६८ ॥
पुरस्कृत्य समञ्जूषां दूतः कंसस्य मातरम् । मुदा समर्पयामास जरासन्धस्य सत्वरम् ॥ १६९ ॥
जरासिन्धो[8] निरीक्ष्येमां समञ्जूषामथापत । कंसस्ते जन्मतो मध्ये वद त्वं मे यथायथम् ॥१७०॥
निशम्य भारतीमस्य जगादैषा नरेश्वरम् । रत्नकम्बलसंयुक्तां कंसमञ्जूषिकामिमाम् ॥ १७१ ॥
सुतसमन्वितां चार्वीं दर्शयित्वा समान्तरे । कंसो मन्नन्दनो नायं कंसमञ्जूषिकासुतः ॥१७२॥[9]
कंसमञ्जूषिकामध्ये रत्नकम्बलकं तदा । उग्रसेनस्य नामाङ्कमङ्कितं वाचयानसौ ॥ १७३ ॥

1 पफ कुमार, अ कुमारमिरत. 2 पफ जलपूरिता. 3 फ तस्य. 4 अ तस्या. 5 अ सैंहानि 6 पफ ससैन्यकात्. 7 [तोऽसौ पाण्मयौ]. 8 [जरासन्धो]. 9 पफ कुमार, अ कुमारमिरत.

दारकां मातृदेवीनां वसुदेवो निधाय सः । नन्दभार्यां जगादेमां यशोदाख्यां मुदान्वितः ॥२४०॥
असमञ्जसकोपमासाद्य किं यासि त्वरितं मुधा । आगच्छ दारकं शीघ्रं ते यच्छामि मनोरमम् ॥२४१॥
दारकं शोभनाकारं महापुरुषलक्षणम् । गृहीत्वा वत्समस्मात्त्वमियाहि स्वं निजमन्दिरम् ॥ २४२ ॥
तद्वाक्यतो यशोदाऽपि विधाय विनिवर्तनम् । आदाय दारकं तुष्टा जगाम निजमन्दिरम् ॥२४३॥
यशोदायास्ततो बालः स्नानपानादियोगतः । तद्गृहे वृद्धिमायाति तदानीं बालचन्द्रमाः ॥ २४४ ॥
वसुदेवोऽपि तां बालामादाय निजपाणिना । मुदा समर्पयामास देवक्याः प्राप्य मन्दिरम् ॥२४५॥
एवं कृतेऽमुना तत्र प्रभातसमये सति । देवक्या दारिका जाता कंसेन विदिता सका ॥ २४६ ॥
विधाय चिपिटं घ्राणं देवक्याः कंसभीतितः । वृद्धिं नीता सका कन्या रूपराजितविग्रहा ॥२४७॥
ततो यौवनमासाद्य जिनधर्मेण भाविता । सुव्रतान्ते प्रवव्राज बाला हित्वा नृपाङ्गजान् ॥ २४८ ॥
संघेन महता युक्ता विहरन्ती पुरादिकम् । विन्ध्यपर्वतसामीप्यं सम्प्राप्ता सा तपस्विनी ॥ २४९ ॥
भीममिल्लान् समालोक्य विन्ध्यमध्ये भयाकुला । कायोत्सर्गेण सा तस्थौ संघोऽपि पुरतो गतः ॥२५०॥
दृष्ट्वा तामार्यिकां तत्र कायोत्सर्गेण्यवस्थिताम् । देवतामिति ते नत्वा वदन्तीदं मलिम्लुचः ॥२५१॥
देवते यदि तं सार्थं कनकादिसमन्वितम् । लुण्टयित्वा पुनः शीघ्रमागच्छामस्त्वदन्तिकम् ॥२५२॥
तत्त्वत्रे महतीं पूजां करिष्यामः सुचेतसः । एवं निगद्य तां नत्वा ययुर्मुदितचेतसः ॥ २५३ ॥
काकतालीययोगेन हत्वा सार्थं धनादिकम् । प्राप्य ययुः प्रदेशं तं दस्यवः प्रीतचेतसः ॥२५४॥
दृष्ट्वा तामार्यिकां तत्र मृतां सिंहेन चर्चिताम् । तदङ्गुलित्रयं भक्त्या स्थापयित्वोर्ध्वसंगतम् ॥२५५॥
ततः कोलाहलं कृत्वा नर्तनं चापि तत्पुरः । तस्काराः महतीं पूजां चक्रुर्विनतमस्तकाः ॥ २५६ ॥
स्थापयित्वा यतो दुर्गे विन्ध्ये भक्तिपरायणैः । दस्युभिः पूजिता सा च नता पुष्पकदम्बकैः ॥२५७॥
ततः प्रभृति सा जाता दुर्गादेवी धरातले । नामद्वयसमायुक्ता तथैव विन्ध्यवासिनी ॥ २५८ ॥
लोके प्रसिद्धिमायातं तत्तीर्थं हिंसनोद्यतम् । तथाऽपि धर्मसंघं च कृतपर्वतनामकम् ॥ २५९ ॥
अथ कृष्णोऽपि यातोऽलं वृद्धिं नन्दस्य गोकुले । कंसगेहे समुत्पन्नाः समुत्पाता महास्तदा ॥२६०॥
दृष्ट्वेमं भीषणं कंसः पप्रच्छ सहसाऽऽकुलः । सत्यं शकुनिसंज्ञेन तदा नैमित्तिकं समीः ॥ २६१ ॥
मद्गृहे केन कार्येण चोत्पातो जायते महान् । नैमित्तिक समालोक्य कथयाशु मम स्फुटम् ॥२६२॥
कंसोदितं समाकर्ण्य जगौ नैमित्तिकोऽपि तम् । तव शत्रुः समुत्पन्नो नन्दगोष्ठे स तिष्ठति ॥२६३॥
नैमित्तिकोदितं श्रुत्वा संदेहपरिवर्जितम् । अन्यजन्मनि याः सिद्धास्ता देवीर्ध्यातवानसौ ॥ २६४ ॥
ध्यातमात्रास्ततः सर्वा भयवेपितविग्रहाः । युगपत् तं समायाताः किं कर्तव्यसमुद्यताः ॥ २६५ ॥
शिरःस्थितकरद्वन्द्वा विकसन्मुखपङ्कजाः । दृष्ट्वा पुरःस्थिता देवीः कंसोऽपि निजगौ तदा ॥ २६६ ॥
नन्दगोष्ठे समुत्पन्नो मद्वैरी योऽभिसिष्ठते । मच्छिद्रान्वेषिणस्तस्य कुरुताशु निपातनम् ॥ २६७ ॥
पूतना स्वकसंयुक्ता तथान्या यमलार्जुना । शकटं च ततस्तोऽपि कंसस्य पुरतः स्थिताः ॥ २६८ ॥
कंसादेशं परिप्राप्य ययुः परमदेवताः । बालभावे स्थितं कृष्णं निहन्तुं नन्दगोकुले ॥ २६९ ॥
वृषभोऽप्यसुरं दृष्टो पूतकारा भुजंगमः । तथा चाणूरमल्लोऽपि कंससंते पुरः स्थिताः ॥ २७० ॥
एते यथापि सम्प्राप्य कंसादेशेन सत्वराः । युगपत्ते वासुदेवेन रणं कर्तुं समुद्यताः ॥ २७१ ॥

1 क सम्पीतः. 2 पफ युग्मम्, क युग्मम्. 3 [चर्चिताम्]. 4 पफ युग्मम्, क युगलम्. 5 पफ युग्मम्, क युगलम्. 6 पफ तत. 7 पफ युग्ममिदम्, क युगलमिदम्.

ततः कंसोऽपि संप्राप्य वसुदेवाद् वरं परम् । जगाम स्वगृहं मन्दं तोषकण्टकिताङ्गकः ॥ २०७ ॥
वसुदेवः समाकर्ण्य मुनीन्द्रादेशमुत्तमम् । चक्रे तद्दर्शनोत्कण्ठं भृशं तत्कारणं हृदि ॥ २०८ ॥
आबालत्वाद् विलोक्याथ निष्ठुरत्वं स्वचेतसि । पुरलोको निनन्देति[1] कंसस्य वरयाचनम् ॥ २०९ ॥
अतिमुक्तकसामीप्यं देवक्या सह सादरः । परिप्राप्य समप्राक्षीन्मुनिमेवं प्रयोजनम् ॥ २१० ॥
भगवन् मत्सुतो भावी कः कंसस्य बलीयसः । करिष्यति वधं पूत जरासंधस्य च स्फुटम् ॥ २११ ॥
पृथिवीमण्डलं तस्य नगराकरमण्डितम्[2] । पालयिष्यति को नाथ कथयैतन्मम प्रभो ॥ २१२ ॥
तत्कालेऽस्य महादेवी धनदेवीव देवकी । आत्मप्राप्तां समालम्ब्य सफलां सा व्यवस्थिता ॥ २१३ ॥
तदस्तमुक्ताशापाशत्वादात्तु युगलत्रयम् । ऊर्ध्वं जगाम भूमौ च पपातैकं करात्क्रमम् ॥ २१४ ॥
भूयोऽप्यपूर्वं यथावैकमपरं चाष्टकं द्रुतम् । विलोक्यैतान्यथाशानि वसुदेव जगौ मुनिः ॥ २१५ ॥
अष्टपुत्रा भविष्यन्ति देवक्या नरकुञ्जराः । तन्मध्ये प्रथमाः षट् मोक्षं यास्यन्ति निश्चितम् ॥ २१६ ॥
सप्तमो यः सुतो भावी त्वदीयः परमोदयः । नवमो वासुदेवोऽयं महापौरुषसंगतः ॥ २१७ ॥
कंसं महाहवे हत्वा जरासन्धं च दुर्मदम् । त्रिखण्डमेदिनीनाथो नरनाथ भविष्यति ॥ २१८ ॥[3]
योऽष्टमो नन्दनो भावी नरेन्द्र तव सुव्रती । निहत्याशेषकर्माणि सोऽपि मोक्षं गमिष्यति ॥ २१९ ॥
मुक्तास्तिमौक्तिकं वाक्यं सत्यभूतमपि क्षितौ । तथाऽपि तौ ततो भूपौ चिन्तामेतामुपागतौ ॥ २२० ॥
आवयोर्नन्दनः कोऽपि कंसं घातिष्यति बली । मुनिं नत्वा ततौ तुष्टौ जग्मतुर्निजमन्दिरम् ॥ २२१ ॥
अतिमुक्तकनामोऽपि कुर्वाणो विविधं तपः । स्वमनोवाञ्छितं देशं जगाम प्रीतमानसः ॥ २२२ ॥
अत्रान्तरे निजं गेहं कंसेन सह सादरात् । आनीता देवकी तत्र प्रसूता दारकद्वयम् ॥ २२३ ॥
भद्रिलाख्ये पुरे श्रेष्ठी सुप्रतिष्ठो बभूव सः । अलकाऽस्य[4] प्रिया भार्या पीनोन्नतघनस्तनी ॥ २२४ ॥
अथ देवतया तस्मात् समानीय प्रयत्नतः । अलकाया मनोहरमिथुनके निहताविमौ ॥ २२५ ॥
अलकाया समुत्पन्नं तदा युग्मद्वयं मृतम् । नष्टमादाय तदेव्या देवक्या हि समर्पितम् ॥ २२६ ॥
प्रभातसमये ज्ञातं मृतं तद्बालकद्वयम् । कंसेन मारितं हीदं शिलायामिति चिन्तितं नरैः ॥ २२७ ॥
एवं क्रमोऽपरस्यापि देवकीबालकस्य च । पुत्रयुग्मद्वयस्यापि ज्ञातव्याः कुशलैर्नरैः ॥ २२८ ॥
चरमाङ्गिनीतानां तत्पुत्राणां महौजसाम् । षण्णामपि च नामानि कथयामि समासतः ॥ २२९ ॥
देवदत्तो भवेदाद्यस्तथाऽन्यो देवपालितः । मुनिदत्तोऽपरो ज्ञेयस्तथाऽन्यो मुनिपालितः ॥ २३० ॥
ज्ञेयः शत्रुघ्ननामाऽन्यो जितशत्रुस्तथापरः । एते षडपि विज्ञेया देवकीकुक्षिसंभवाः ॥ २३१ ॥
देवक्याः सप्तमः पुत्रो नक्तं जातो जनार्दनः । धारितो वसुदेवेन छत्रधारी हलायुधः ॥ २३२ ॥
अनेन विधिना भ्रात्रोरनयो[7] स्नेहनिर्भरा । देवी नृपसरूपेण तत्पुरे निशि गच्छति ॥ २३३ ॥
यमुनाख्यानदीतीरं दृष्ट्वा तौ दारकान्वितौ । मुहूर्तमात्रं मोहस्थौ पश्यन्तौ तस्थतुर्दिशि ॥ २३४ ॥
अथ देवकिभूपालो देवक्याः प्रमनोत्सवे । धनधान्यसमाकीर्णं प्रददौ गोकुलं मुदा ॥ २३५ ॥
गोकुलस्य पतिर्नन्दो यशोदा तत्प्रियाऽभवत् । रूपराशिविशालाक्षी पीनोन्नतकुचद्वया ॥ २३६ ॥
अन्यदा सा समादाय गन्धपुष्पादिकं बलिम् । मातृगेहं ययौ हृष्टा पुत्रयाचनतत्परा ॥ २३७ ॥
भक्त्याऽऽलीयप्रयोगेन सुता लब्धा तया परा । देवतान्ते समादाय नक्तं याता स्वान्विता ॥ २३८ ॥
पुरतो मातृदेवीनां विधायेमां च दारिकाम् । मातृगेहात् सका देवी निर्ययौ नन्दनान्विता ॥ २३९ ॥

---

1 [निनिन्देति]. 2 पफ नगराकारं 3 पफ त्रिखण्डम्, ज त्रिखण्डभरतम्. 4 पफ युग्मम्, ज युग्मभिरतम्. 5 पफ युग्मम्, ज युग्मभीरतम्. 6 पफ ज्ञाताः 7 [भ्रात्रोरनयो].

दारकं मातृदेवीनां वसुदेवो निधाय सः । नन्दभार्यां जगादेमां यशोदाख्यां मुदान्वितः ॥२४०
वसम्य क्षेपमासाद्य किं यासि त्वरितं मुधा । आगच्छ दारकं शीघ्रं ते यच्छामि मनोरमम् ॥२४१
दारकं शोभनाकारं महापुरुषलक्षणम् । गृहीत्वा दत्तमस्माभिर्याहि त्वं निजमन्दिरम् ॥ २४२
तद्वाक्यतो यशोदाऽपि विधाय विनिवर्तनम् । आदाय दारकं तुष्टा जगाम निजमन्दिरम् ॥२४३
यशोदायास्ततो बालः स्तनपानादियोगतः । तद्गेहे वृद्धिमायाति तदानीं बालचन्द्रमाः ॥ २४४
वसुदेवोऽपि तां बालामादाय निजपाणिना । मुदा समर्पयामास देवक्याः प्राप्य मन्दिरम् ॥२४५
एवं कृतेऽमुना तत्र प्रभातसमये सति । देवक्या दारिका जाता कंसेन विदिता सका ॥ २४६
विधाय चिपिटं घ्राणं देवक्याः कंसभीतितः । वृद्धिं नीता सका कन्या रूपराजितविग्रहा ॥२४७
ततो यौवनमासाद्य जिनधर्मेण भाविता । सुव्रतान्ते प्रवव्राज बाला हित्वा नृपात्मजान् ॥ २४८
संघेन महता युक्ता विहरन्ती पुरादिकम् । विन्ध्यपर्वतसामीप्यं समापत् सा तपस्विनी ॥ २४९
भीमभिल्लान् समालोक्य विन्ध्यमध्ये भयाकुला । कायोत्सर्गेण सा तस्थौ संघोऽपि पुरतो गतः ॥२५०
दृष्ट्वा तामार्यिकां तत्र कायोत्सर्गव्यवस्थिताम् । देवतामिति ते नत्वा वदन्तीदं मलिम्लुचाः ॥२५१
देवते यदि तं सार्थं कनकादिसमन्वितम् । लुण्टयित्वा पुनः शीघ्रमागच्छामस्त्वदन्तिकम् ॥२५२
तवाग्रे महतीं पूजां करिष्यामः सुचेतसः । एवं निगद्य तां नत्वा जग्मुर्मुदितचेतसः ॥ २५३ ।
काकतालीययोगेन हत्वा सार्थं धनादिकम् । प्राप्य जग्मुः प्रदेशं तं दस्यवः प्रीतचेतसः ॥२५४
दृष्ट्वा तामार्यिकां तत्र मृतां सिंहेन चर्चिताम् । तदङ्गुलित्रयं मत्वा स्थापयित्वोच्चसंगतम् ॥२५५
ततः कोलाहलं कृत्वा नर्तनं चापि तत्पुरः । तस्याङ्ग महतीं पूजां चक्रुर्विनतमस्तकाः ॥ २५६
स्थापयित्वा यतो दुर्गे विन्ध्ये भक्तिपरायणैः । दस्युभिः पूजिता सा च नता पुष्पकदम्बकैः ॥२५७
ततः प्रभृति सा जाता दुर्गादेवी धरातले । नामद्वयसमायुक्ता तथैव विन्ध्यवासिनी ॥ २५८ ॥
लोके प्रसिद्धिमायाता तत्तीर्थं हिंसनोद्यतम् । तयाऽपि धर्मसंबन्धं कृतपर्वतनामकम् ॥ २५९
अथ कृष्णोऽपि यातोऽलं वृद्धिं नन्दस्य गोकुले । कंसगेहे समुत्पन्नाः समुत्पाता महाखदा ॥२६०
दृष्ट्वेमं भीषणं कंसः पप्रच्छ सहसाऽऽकुलः । सर्वं शकुनिशमार्पं तदा नैमित्तिकं समी ॥ २६१ ।
मद्गेहे केन कार्येण चोत्पातो जायते महान् । नैमित्तिक समालोक्य कथयाशु मम स्फुटम् ॥२६२॥
कंसोदितं समाकर्ण्य जगौ नैमित्तिकोऽपि तम् । तव शत्रुः समुत्पन्नो नन्दगोष्ठे स तिष्ठति ॥२६३॥
नैमित्तिकोदितं श्रुत्वा [illegible] । अन्यजन्मनि याः सिद्धास्ता देव्यः पर्युपस्थिताः ॥ २६४ ।
ध्यातमात्रास्ततः सर्वा भयवेपितविग्रहाः । युगपत् तं समायाताः किं कर्तव्यसमुद्यताः ॥ २६५ ।
शिरःस्थितकराब्जा विकसन्मुखपङ्कजाः । दृष्ट्वा पुरःस्थिता देवीः कंसोऽपि निजगौ तदा ॥ २६६ ।
नन्दगोष्ठे समुत्पन्नो मद्वैरी योऽधितिष्ठते । मच्छिद्रान्वेषिणस्तस्य कुरुताशु निपातनम् ॥ २६७ ॥
पूतना काकसंयुक्ता तथान्या यमलार्जुना । शकटं च ततस्तेऽपि कंसस्य पुरतः स्थिताः ॥ २६८ ॥
कंसादेशं परिप्राप्य ययुः परमदेवताः । बालमार्गे स्थितं कृष्णं निहन्तुं नन्दगोकुले ॥ २६९ ॥
वृषभोऽश्वस्तथा दृष्टे पूतकारा भुजंगमः । तथा चाणूरमल्लोऽपि कंसस्यैते पुरः स्थिताः ॥ २७० ॥
एते पञ्चापि संप्राप्य कंसादेशेन सत्वराः । युयुत्से वासुदेवेन रणं कर्तुं समुद्यताः ॥ २७१ ॥

1 स चर्चिता 2 पप कुम्भम्, ज कुम्भम्, 3 [चर्चिताम्]. 4 पप कुम्भम्, ज कुम्भम्, 5 पप कुम्भम् ज कुम्भम्, 6 पफ तत्र. 7 पप युयुत्सेयम् ज युयुत्सीयम्.

वासुदेवबलाभ्यां हि हतः कंसो महाहवे । संसारसागरं भीमं पर्यटन् स वितिष्ठते ॥ २७२ ॥
उग्रसेनस्ततो राज्ये निजे शक्रोपमे तदा । स्थापितो वासुदेवेन प्रेमसंबन्धमिच्छता ॥ २७३ ॥

॥ इति श्रीउग्रसेनवधनिमित्त वसिष्ठमुनिनिदानकरण-
कथानकमिदम् ॥ १०६ ॥

*

१०७ सागरदत्तकथानकम् ।

अवन्तीविषये चासीत् श्रीमदुज्जयिनी पुरी । श्रेष्ठी सागरदत्तोऽस्यां प्रिया तस्याभ्यसंयुता ॥ १ ॥
दारिद्र्योपद्रुतः सोऽयं सिंहलद्वीपमागतः । ततोऽनर्घ्यमणिं प्राप्य निवृत्तः स्वपुरं प्रति ॥ २ ॥
स्वकीयं देशमासाद्य दृष्ट्वा तत्र सरोवरम् । मुक्त्वा मणिं जलं पीत्वा विस्मृत्यासाविमं ययौ ॥ ३ ॥
तत्रैकपामरक्षेत्रं चारयंश्छगलेन सः । दृष्ट्वा तत्र मणिं दिव्यं जग्राह मतिवर्जितः ॥ ४ ॥
चूर्णयित्वा मणिं मूढः पाषाणेन स पामरः । वपन्न तच्चूर्णं क्षेत्रे मतिवर्जितमानसः ॥ ५ ॥
अत्रान्तरे वणिक् प्राप्तस्तं प्रदेशं त्वरान्वितः । विलोक्य तं नरं तत्र पप्रच्छेत्थमिदं पुनः ॥ ६ ॥
भद्र मणिस्त्वया क्वापि क्षेत्रे चापश्यता ध्रुवम् । यदि दृष्टस्ततो ब्रूहि सांप्रतं मम पामर ॥ ७ ॥
श्रुत्वा तद्वचनं सोऽपि जगादेवं वणिक्पतिम् । दृष्टो मयाऽत्र पाषाणस्तत्र यतः स्फुरत्प्रभः ॥ ८ ॥
चूर्णयित्वा तकं क्षिप्रं पाषाणेन मया पुनः । तच्चूर्णं सांप्रतं ग्रावस्तोत्रच्छन्नं वितिष्ठते ॥ ९ ॥
विलोक्य तद्गुणं श्रेष्ठी प्रालेभ पुनरब्रवीत् । चूर्णितः स मणिर्यत्र तं प्रदेशं प्रदर्शय ॥ १० ॥
तद्वाक्यतः पुनस्तेन स प्रदेशः प्रदर्शितः । स्फुरत्प्रभं च तच्चूर्णं ददर्शासौ विचक्षणः ॥ ११ ॥
यदि द्रव्येण ते कार्यं नर जातु प्रजायते । मणिचूर्णमिदं देहि मूल्येन विविधान्तरे ॥ १२ ॥
विक्रयं कुर्वता तस्य त्वयाऽनर्घ्यं धनेन च । क्षयपमावितायास्मै देयं तदाहवस्य वै ॥ १३ ॥
एतस्य तद्दैर्घ्यमूल्यं समस्तं वसुधातले । क्षयपमावितस्त्वास्य देहि तस्मै प्रयत्नतः ॥ १४ ॥
उपदेशमिदं दत्त्वा पामराय स वाणिजः । शेषं चूर्णं समादाय तन्मध्ये प्रययौ पुनः ॥ १५ ॥
तेनापि तन्मध्ये रम्यं पूर्वोक्तविधिना ध्रुवम् । दर्शितं सर्वलोकस्य तदानीं विविधान्तरे ॥ १६ ॥
न परः कोऽपि तत्सार्थं कृत्वा प्राप्नोति तत्परः । दत्त्वाऽस्मै वाञ्छितं द्रव्यं गृहीतं तत्परेण विना ॥ १७ ॥

इति श्रीसागरदत्तश्रेष्ठिकथानकमिदम् ॥ १०७ ॥

*

१०८ लक्ष्मीमतीकथानकम् ।

मगधाविषये रम्ये लक्ष्मीग्रामो महाधनः । अभवत् सोमदत्तोऽत्र ब्राह्मणो वेदपारगः ॥ १ ॥
लक्ष्मीमती प्रिया चास्य रूपयौवनगर्विता । आत्मानं मण्डयन्तीयं सर्वकाले वितिष्ठते ॥ २ ॥
अन्यदा माघवेनाभा तिष्ठन्त्या निजमन्दिरे । लक्ष्मीमत्या विलासिन्या मानिन्या मदनिर्भरम् ॥ ३ ॥
पक्षोपवाससंयुक्तो मध्याह्नसमये सति । मुनिः समाधिगुप्ताख्यो मन्दमन्दगतिक्रियः ॥ ४ ॥
गृहाद्गृहान्तरं गच्छन् भिक्षार्थं कृशविग्रहः । सोमदेवगृहं दिव्यं विवेशानुक्रमेण सः ॥ ५ ॥

---

1 पच read इति श्रीहरिषेणाचार्यकृते श्रीमद् बृहत्कथाकोशे कथीमं 2 पच add [illegible]
3 [तदेव पामरः क्षेत्रे]. 4 [तोले]. 5 [पामरः]. 6 पचज [illegible]. 7 All the Mss put the No 106 8 पचज विरामविरम्.

विलोक्य सोमदेवोऽमुं गृहे भिक्षार्थमागतम् । अभ्युत्थानं विधायासौ वन्दनां च जगौ प्रियाम् ॥६॥
साधोरस्य सतो भिक्षां देहि त्वं भक्तितः प्रिये । एवमुक्त्वा बहिर्गेहाद्विजगामायमादरात् ॥ ७ ॥[2]
मण्डयन्ती निजं वक्त्रं गृहीतमुकुरा[3] तदा । मुनिबिम्बं समालोक्य संक्रान्तं मणिदर्पणे ॥ ८ ॥
आक्रोशनं विधायास्य तदा निष्ठुरवाक्यतः । द्वारं विहाय[4] गेहस्य संतस्थे रूपगर्विता ॥ ९ ॥[4]
तेन दोषानुबन्धेन सप्तमे दिवसे तदा । गृहीताऽम्बरकुष्ठेन बाधिता स्वजनैर्गृहात् ॥ १० ॥
त्यक्तेनेङ्गं विधायासौ दुर्गन्धामोदिताशकम् । लक्ष्मीमती ममाराशु ज्वालेबोक्तिपुष्करे ॥ ११ ॥
ततो मृता सती सा च लक्ष्मीग्रामे पुरोस्थिते । गृहे गर्भमध्यास्य रजकस्य कुधीमतः ॥ १२ ॥
जाता खीमखरीगर्भे गर्दभी दुष्टलक्षिका । दुग्धमप्राप्नुवन्तीव ममार चिरकालतः ॥ १३ ॥
सन्निवेश च सा ग्रामे गन्धोपपन्नसूकरी । जाता भूयो मृतिं प्राप्य शुनी पापगरीयसी ॥ १४ ॥
ततः कालं परिप्राप्य जातेयं कुक्कुरी[5] पुनः । पचन्ती वने दग्धा महादावाग्निना मृता ॥ १५ ॥
लाटदेशसमुत्पन्नभृगुकच्छपुरान्तिके । बभूवाथ मत्स्यग्रामो नर्मदातीरसंभवः ॥ १६ ॥
निर्विसिन्धो बभूवात्र धीवरः पापकारकः । मण्डूकी तत्प्रिया क्रूरा कठोरध्वनिनादिनी ॥ १७ ॥
दुर्भगा दुर्मगा रूपा दुर्गन्धा काणिकाभिधा । कृष्णवर्णा बृहद्दन्ता बभूव तनयाऽनयोः ॥ १८ ॥
दुर्गन्धां तां समालोक्य पितृभ्यां स्नेहवर्जिताम् । विधाय नर्मदातीरे कुटिकां स्थापिता तदा ॥१९॥
नावा पतुबनं तत्र मूल्येनोत्तारयत्यसौ । सतिष्ठते महादुःखाद्दुर्गन्धापघनान्विता ॥ २० ॥
अन्यदा विहरन् क्वापि तदानीं परमोदयः । मुनिः समाधिगुप्तोऽयं संप्राप नर्मदातटम् ॥ २१ ॥
निरावरणदेहं तं शीतकाले शिलातले । विलोक्य तत्र सा साधुं बभूव कृपयार्द्रधीः ॥ २२ ॥
शीतवाताभिभूतस्य हिमदग्धतनोरपि । ददौ तृणानि सा दृष्ट्वा पार्श्वयोरुभयोरपि ॥ २३ ॥
सम्प्रपाप्य मुनिं प्राप्य प्रभातसमये तदा । जैनं धर्ममुपश्रुत्य पप्रच्छेदं कृतानतिः ॥ २४ ॥
अन्यजन्मनि मे नाथ दृष्टो भवान् क्वचिन्मुनः । कृत्वा दयां प्रसादं च कथयैतन्मम प्रभो ॥२५॥
धीवरीवाक्यमाकर्ण्य जगादाम्बा महामुनिः । लक्ष्मीमत्यादिकं जन्म लक्ष्मीग्रामादिसंभवम् ॥२६॥
निजं भवान्तरं श्रुत्वा लक्ष्मीमत्यादिकं मुनेः । जातिस्मरत्वमासाद्य संजाता क्षुल्लिका तदा ॥२७॥
धर्मप्रियोऽर्यिकाया हि धर्मविन्यस्तचेतसः । ततः समाधिगुप्तेन क्षुल्लिकेयं समर्पिता ॥ २८ ॥
विहरन्ती तदा प्राप महत्तरिकयान्विता । ग्रामं सोपारकं नाम मगधाधिपयोऽक्रमम् ॥ २९ ॥
ततो धर्मप्रिया सा च जिनधर्मपरायणा । नागिलश्राविकायाश्च प्रयत्नेन समर्पिता ॥ ३० ॥
तच्छ्राविकास्तात् साध्वी[6] देवकम भक्तवती । तिष्ठति क्षुल्लिका जैनमन्दिरे धर्मतत्परा ॥ ३१ ॥
एकान्तरोपवासेन शिथिलीभूतविग्रहा । तदा द्वादशवर्षाणि चकार विविधं तपः ॥ ३२ ॥
सल्लेखनां विधायाशु सनिदानं मृतिं च सा । जाताऽच्युतेन्द्रपौलोमी कृतनद्योगसन्मतिः[7] ॥ ३३ ॥
पञ्चाशत्पञ्चयुक्तानि पल्यान्यत्र विलासिना । अच्युतेन्द्रेण सा साकं बुभुजे भोगमुत्तमम् ॥ ३४ ॥
अत्रैव भरतक्षेत्रे वैदर्भविषये सति । कुण्डिनाख्यं पुरं रम्यं बभूव परमोदयम् ॥ ३५ ॥
अत्रैव पत्तने दिव्ये भेषजो नाम भूपतिः । बभूव तन्महादेवी चारुरूपा यशोमतिः ॥ ३६ ॥
अच्युतात् सा समुत्तीर्य दर्शं लक्ष्मीमती चरी । रुक्मिणो ह्यनुजा जाता रुक्मिणी तनयाऽनयोः ॥३७॥
अन्यदा नारदः प्राप सत्यभामागृहं परम् । कनत्कनककर्मक्रिचित्रकमकुट्टिमभूतलम् ॥ ३८ ॥

---

1 पच-अ पुस्तकेषु 2 [शुद्ध]. 3 [निषाय]. 4 पच-अ पुस्तकेषु 5 पच-अ पुस्तकेषु, 6 [कुकुरी]. 7 पच-अ पुस्तकेषु. 8 अ 'मता साध्वी. 9 अ 'कृत तद्योग'

स्वमुखं दर्पणे सत्या पश्यन्ती विधुनिर्मिते । ददर्श नारदं नासौ पुरः स्थितमपि स्फुटम् ॥ ३९ ॥
ततो निर्गत्य तद्देशात् कोपप्रज्वलितलोचनः । नारदः सहसा दध्यौ दध्याविति स चेतसि ॥ ४० ॥
निहन्मि किं खलामेतां स्वपापात् ख्यापयामि किम् । किं वा द्वीपान्तरे पापां क्षिपामि खलचेष्टिताम् ॥ ४१ ॥
एवं कृते सति क्षिप्रं विष्णुः शोकेन तप्यते । चिन्तयाम्यपरं किंचिदेतस्याः शोककारणम् ॥ ४२ ॥
योषितामपरं दुःखं विद्यते न धरातले । सपत्नीं रूपिणीं हित्वा सर्वावयवसुन्दरीम् ॥ ४३ ॥
इदं संचिन्त्य निर्यातो नारदः प्रीतमानसः । जगाम रुक्मिणीगेहं जनकन्यासुसंगतम् ॥ ४४ ॥[1]
सुखासनोपविष्टः सन् विनतः कन्यया तराम् । विष्णुचित्रपटं[2] रम्यं रुक्मिण्याः प्रददौ स च ॥ ४५ ॥
चित्रोऽस्य सत्पटं कन्या विचित्राकारराजितम् । मुमूर्च्छ सहसा तत्र तत्प्रहृतमानसा ॥ ४६ ॥
शीतखण्डोदकसेकेन तथा व्यजनवायुना । रुक्मिणी बोधमासाद्य नारदं निजगाविति ॥ ४७ ॥
रूपराजितदेहस्य महिलानुगतस्य नु । पटोऽयं कस्य मे ब्रूहि रूपमेतन्महामुने ॥ ४८ ॥[3]
निशम्य नारदो वाक्यं रुक्मिण्याः प्रीतमानसः । जगाद सरसं कन्यां पुष्पिकासहितामिति ॥ ४९ ॥
सुराष्ट्रविषये कान्ते पुरी द्वारमती परा । तस्यां बभूव भूपालो विष्णुर्विदितशासनः ॥ ५० ॥
रूपेण मन्मथो[4] भद्रे कल्पवृक्षः सदानवः । गम्भीरत्वेन रत्नेशं विभवेन पुरन्दरम् ॥ ५१ ॥
स्थिरत्वेन नगाधीशं पवनं च समीरणम् । धिया सुरगुरुं नीत्या शुक्रं वा यो जयेद् भुवि ॥ ५२ ॥
यादवाम्बरचन्द्रस्य कंसयोनिविदारणे । पटोऽयं राजते चित्रे वासुदेवस्य तस्य सः ॥ ५३ ॥[5]
नारदीयं वचः श्रुत्वा कोपपूरितमानसा । जगाद रुक्मिणी साध्वी जयकुम्भारिपम् ॥ ५४ ॥
यास्यामि किन्नरसम्पन्नां माघमासस्य नारद । चन्दनं षष्ठिमासाद्य विनन्तुं माधवीस्थिताम् ॥ ५५ ॥
मयि तत्रैव नानन्दमानयात्र महामुने । आदाय मां प्रयासेन संगमोऽयं मम स्फुटम् ॥ ५६ ॥
रुक्मिणीवाक्यमाकर्ण्य विश्वस्तीकृत्य तां पुनः । जगाम नारदः[6] शीघ्रं विष्णुपार्श्वं मुदान्वितः ॥ ५७ ॥
निरीक्ष्य नारदं विष्णुः सहसोत्थाय सादरम् । शोभनासनगं कृत्वा ननामैनं ववन्दिवान् ॥ ५८ ॥
अन्योन्यकुशलं पृष्ट्वा समासन्नौ यथोऽत्र ते । तत्पूर्णमुदितचेतस्का पट-कथन-नारदः ॥ ५९ ॥
प्रसमरं ततः स्मित्वा नारदो रुक्मिणीपटम् । विष्णोः प्रदर्शयामास सजीवमिव सत्वरम् ॥ ६० ॥
निरीक्ष्य तत्पटं सद्यो विष्णुर्मूर्च्छामुपागतः । भूमावपि पतनं प्राप्तः सिक्तश्चन्दनवारिणा ॥ ६१ ॥
स्वस्थीभूय पुनः प्राह नारदं विस्मितो हरिः । पटस्था कस्य कन्येयं रूपिणी वद मेऽधुना ॥ ६२ ॥
विष्णुवाक्यं समाकर्ण्य नारदो निजगावमुम् । भीष्मकन्यामिमां विद्धि रुक्मिणीं भुवि विश्रुताम् ॥ ६३ ॥
कुण्डिनाख्यपुरं गत्वा यदि त्वं यासि सत्वरम् । ततोऽहं ते प्रदास्यामि निश्चितं रुक्मिणीमिमाम् ॥ ६४ ॥[7]
नारदस्य वचः श्रुत्वा पप्रच्छ हरिः पुनः । क्षिप्रं मयोऽजनि गम्यमनप्रयमीर्णं महामुने ॥ ६५ ॥
दशार्हांश्च समारुह्य विमाने खगमे तदा । तदुद्यानवनं प्रापुर्नानानोकहसंकुलम् ॥ ६६ ॥
अथ सा रुक्मिणी प्राप्ता तदुद्याने मनोहृता । माधवीमर्चितुं व्याजात् नानापुष्पकरैर्नरैः ॥ ६७ ॥
हरिर्ददर्श तां कान्तां मनस्तापविनाशिनीम् । कन्दर्पमिव तं मानी सारमारं वरंवरम् ॥ ६८ ॥
आयुक्ता विनयप्रह्वा तदुद्यानवने स्थिताम् । जगाद हृष्टगात्रो यो वचसा विस्मयान्वितः ॥ ६९ ॥
चन्द्रिकाभवनानन्द भीष्मराजन्यात्मजे । कुरु पदं विमाने मे यानाभ्यासनमर्हसि ॥ ७० ॥

1 [illegible] 2 [illegible] 3 [illegible] 4 [illegible] 5 [illegible] 6 [illegible] 7 [illegible] 8 [illegible] 9 [illegible] 10 [illegible] 11 [illegible] 12 [illegible]

निशम्य तद्वचो बाला तत्प्रहृष्टलोचना । आरुरोह कराकृष्य तद्विमानं मनस्विनी ॥ ७१ ॥
अत्रान्तरे हरिः प्राह तज्जनानुरवासिनः[1] । तोषपूरितचेतस्को शिशुपालादिकान्नरम् ॥ ७२ ॥
वसुदेवसुतेनामा बलभद्रेण रुक्मिणी । नीतेयं वासुदेवेन समागच्छन्तु भो जनाः ॥ ७३ ॥
एवमुक्त्वा समापूर्य पाञ्चजन्यं कलस्वनम् । आदाय रुक्मिणीं विष्णुर्ययौ द्वारवतीं प्रति ॥ ७४ ॥
निशम्य तद्वचः प्रौढं पाञ्चजन्यध्वनिं[2] कलम् । भीष्मो रुक्मी क्रुधं प्राप शिशुपालोऽपि तत्पतिः ॥७५॥ •
गण्डस्थलात् स्खलद्दानकर्दमीकृतभूतलैः । महायोधसमारूढैर्नगोत्तुङ्गैः करेणुभिः ॥ ७६ ॥
मनःपवनसंवेगैः कर्णचामरवीजितैः । अश्ववारसमारूढैः स्फूरीपृष्ठैः कलस्वनैः ॥ ७७ ॥
तुरङ्गमसमायुक्तैः केतुमालाविराजितैः । विचित्रमणिसन्दोहैरथ्यापद्मयै रथैः ॥ ७८ ॥
चापमुद्गरकुन्तासिपाशचक्रादिपाणिभिः । भटैर्यमभयाकारैर्वज्रसायकधेनुकैः ॥ ७९ ॥
एभिः सर्वं तदा क्रुद्धैः कृताकूपारनिस्वनैः । भीष्मोऽथ रुक्मिणा सार्धं शिशुपालेन निर्ययौ ॥ ८० ॥[3] ॥
दृष्ट्वा पितृबलं प्राप्तं पूरिताखिलमण्डलम् । जगाद रुक्मिणी कान्तं बाष्पाकुलितलोचना ॥ ८१ ॥
मत्कृते संक्षयः[4] प्राप्तो जीवितस्य जनार्दन । किं करोम्यधुना पापा पुण्येन परिवर्जिता ॥ ८२ ॥
अस्मादुत्तिष्ठ याहि त्वं कुतोऽपि बलसंगतः । एतद्बहुबलं प्राप्तं भवतस्तव बान्धव ॥ ८३ ॥
रुक्मिण्या वचनं श्रुत्वा भयसंत्रस्तचेतसः । जगादेति प्रियां विष्णुः कोपारुणनिरीक्षणः ॥ ८४ ॥
पश्य पश्य प्रिये शक्तिं मदीयामपि मुग्धिके । मां भीतिमेदिनि प्राप्य किं भयं यासि कातरे ॥८५॥[5] ॥
एवं निगद्य तामेष करस्थां वज्रमुद्रिकाम् । भस्मसात्प्रापयामास निन्ये पाणिद्वयविमर्दनात् ॥ ८६ ॥
धनुर्गुणविमुक्तेन शरेणैकेन वेगिना । भेदं च सप्ततालानां चकार युगपद्धरिः ॥ ८७ ॥[6]
दृष्ट्वाऽस्य शक्तिसामर्थ्यं रुक्मिणी प्रीतमानसा । जगादेमं महाशक्तिं वचसाऽमर्यमीयुषा ॥ ८८ ॥
पितरं भ्रातरं हित्वा मम नाथ परिस्फुटम् । शिशुपालादिसैन्यस्य कुरु त्वं विनिपातनम् ॥ ८९ ॥[7]
आकर्ण्य रुक्मिणीवाक्यं हरिविक्रमशालिना । प्रतिपन्नं तदा सर्वं हरिणा तद्बलेन च ॥ ९० ॥ ॥
एवं प्रवर्तिते यावत् तदालापः परस्परम् । तावत् परबलं प्राप्तं समुद्रसमविभ्रमम् ॥ ९१ ॥
दृष्ट्वा बहुबलं प्राप्तं स्वसमीपं जनार्दनः । आश्वास्य रुक्मिणीं भीतां क्रोधारक्तनिरीक्षणः ॥ ९२ ॥
विमानमम्बरे कृत्वा रुक्मिणीं नारदान्विताम् । सबलो रथमारुह्य विमानाद् भुवमाययौ ॥ ९३ ॥
विलोक्य रथमारूढं शिशुपालो हरिं पुरः । बलभद्रं च भीष्मोऽपि सपुत्रः प्राप कोपतः ॥ ९४ ॥[8]
दृष्ट्वा पुरःस्थितं विष्णुं शिशुपालो जगाद्विभुम् । भीष्मोऽपि बलभद्रं च करवालार्पितविग्रहम् ॥ ९५ ॥ ॥
रेरे खल दुराचार रुक्मिणीहरणप्रिय । शस्त्रेणमत्समं युद्धं कुरु भीरु पलायनम् ॥ ९६ ॥[9]
तद्वाक्यतो रुषं प्राप्य निजगाद हरिस्तकम् । भीष्मं यदोऽपि युद्धस्व यदि शक्तिर्भवेत् तव ॥९७॥
एवमुक्तोऽमुना कोपात् तामसास्त्रं स मुक्तवान् । तेन मूढीकृतं सर्वं विष्णुसैन्यं गतभ्रमम् ॥ ९८ ॥
ततः कोपेन तेनाशु केशवेन बलेन च । उद्योतास्त्रेण दीप्तेन तामसास्त्रं निराकृतम् ॥ ९९ ॥
निभीकृतनभोमार्गं व्याप्तोपोतितपुष्करम् । ससर्ज मुमोचाथ दहनास्त्रं सुधीरधीः ॥ १०० ॥ ॥
विष्णुना बलभद्रेण शर्मं सद्दहनास्त्रकम् । हतं स्वकीयपाशेन वारुणास्त्रेण वेगतः ॥ १०१ ॥

1 [तज्जनम् पुर]. 2 ज पाञ्चजन्यं 3 पफज चतुःपुष्कमिदम्. 4 [संक्षय]. 5 पफज त्रिष्टुभमिदम्. 6 पफज चतुःपुष्कमिदम्. 7 पफज युग्ममिदम्. 8 पफज युग्ममिदम्. 9 पफज युग्ममिदम्.

ततो गुणाकलकलकरलेषनालीकविहङ्गमान् । शिशुपालो मुमोचाशु पन्नगान् केशवं प्रति ॥ १०२ ॥
कीर्णपक्षं सुहस्तं दीर्घकायं प्रमोञ्ञलम् । नागान् प्रति मुमोचायं वैनतेयं जनार्दनः ॥ १०३ ॥
विलोक्य गारुडं बाणं विष्णुमुक्तं गतप्रभाः । विहाय वैष्णवीं सेनां दुद्रुवुस्ते भुजंगमाः ॥ १०४ ॥
ततो रविसमानेन चक्रेण स्फुरितत्विषा । शिशुपालशिरोऽनेन विष्णुमुक्तेन खण्डितम् ॥ १०५ ॥
अत्रान्तरे बलेनापि बद्धा तौ नागपाशकैः । आनीतौ च स्वसामीप्यं बलिनौ भीष्म-रुक्मिणौ ॥ १०६ ॥
शिशुपाले हते भीष्मे सपुत्रेऽपि धृते सति । स्थितं सर्वं भटैः शूरैर्मौनमिव पवित्रम् ॥ १०७ ॥
ततो वैतालिकं वंशं जयशब्दं मनोऽभवत् । पेठुर्नागयपसोनैः सनाकापुरिवाम्बरः ॥ १०८ ॥
शिशुपालं हतं दृष्ट्वा धृतं भीष्मं च रुक्मिणम् । परितोषं परिप्राप रुक्मिणी नारदोऽपि च ॥ १०९ ॥
ततस्तौ पश्चात् भङ्क्त्वा पूर्वमायौ रणाजिरात् । नारायण-बलौ शीघ्रं निर्गतौ हरिविक्रमौ ॥ ११० ॥
अथ तौ रथमारूढौ रुक्मिणीसहितौ तदा । सैन्यसागरमध्यस्थौ लोपकल्पकितानकौ ॥ १११ ॥
तूर्यध्वनिनादेन जयशब्देन बन्दिनाम् । बधिरीकृतसर्वाशं वैजयन्तीविराजितम् ॥ ११२ ॥
वितानस्तम्भसंघाते कृतशोभां समन्ततः । सपौरां द्वारिकां कान्तां प्रविष्टौ बल-केशवौ ॥ ११३ ॥
शोभने दिननक्षत्रे योगे च रजनीपतौ । रुक्मिणीमुपयेमेऽसौ वासुदेवः समङ्गलम् ॥ ११४ ॥
रुक्मिणी जिनधर्मेण विहितेन पुरातने । जाता विष्णोर्महादेवी प्राणेभ्योऽपि गरीयसी ॥ ११५ ॥
रूपयौवनलावण्यविलासादिसमेतया । रुक्मिणीप्रीतिकारिण्या शीलाम्भोजविनाशया ॥ ११६ ॥
वासुदेवः प्रभुञ्जानो भोगान् योगीन्द्रसंनिभान् । संतिष्ठते दिवानक्तं यथैव दिवि वासवः ॥ ११७ ॥
रुक्मिण्या सह संपर्कं विष्णुः प्राप्य मनोरमम् । सत्यभामां सुरूपां हि मनसाऽपि न पश्यति ॥ ११८ ॥
भीष्मोऽपि रुक्मिणा सार्धं प्राप्य सन्मानमुत्तमम् । हरितः प्रययौ शीघ्रं कुण्डिनाख्यपुरं मुदा ॥ ११९ ॥
आपृच्छ्य नारदो विष्णुं बलभद्रं च कौतुकात् । सत्यभामागृहं रम्यं जगाम हसितेच्छया ॥ १२० ॥
सत्याऽपि नारदं दृष्ट्वा समुत्थाय प्रयत्नतः । प्रददौ विष्टरं भक्त्या नारदाय प्रशान्तधीः ॥ १२१ ॥
रुक्मिणीप्रियमं मद्रे मत्प्रसादेन कुर्वती । साम्प्रतं तिष्ठ पापिष्ठे चिरकालं खले भुवि ॥ १२२ ॥
एवं निगद्य तां हासात् कृत्वा प्रणमनं तथा । नारदः प्रययौ तूर्णं संतुष्टः स्वमनीषितम् ॥ १२३ ॥
अथ सा रुक्मिणी नत्वा सर्वसत्त्वहितं गुरुम् । संयमश्रीसमीपे च प्रवव्राज मनस्विनी ॥ १२४ ॥
बद्ध्वा तीर्थकरं गोत्रं तपः कृत्वा जिनाज्ञया च । रुक्मिणी शीलमाहात्म्याज्जातो दिवि सुरो महान् ॥ १२५ ॥
देवसौख्यं ततः प्राप्य तपः कृत्वाऽप्यनुत्तरम् । निहत्याशेषकर्माणि मोक्षं यास्यति नीरजाः ॥ १२६ ॥

॥ इति श्रीलक्ष्मीमतीसमाधिगुप्तमुनिजुगुप्साफलसंजातकुष्ठमरण
गर्दभीगर्भशूकरीचाण्डालपदुमीपीवर्तसमाधिगुप्तधर्मश्रवण
क्षुल्लिकाव्रतग्रहणाच्युतेन्द्रस्त्रीपौलोमीरुक्मिणी
तपश्चरणदेवसमयधरणीमनुष्यागमनतप
श्चरणमोक्षगमनसम्प्रापणलक्ष्मीमती-
कथानकमिदम् ॥ १०८ ॥[5]

*

1 पश्चात् विलम्बितम्   ष्णमाक्षे   3 [जाव].   4 सुसंस्थितम्   5 All the Mss. put No 108

१०९ चित्तसंभूतकथानकम् ।

काशीजनपदे रम्ये पुरी वाणारसी परा । अस्यां कृषीवलो निःस्वः सुषेणाख्योऽभवत् पुरि ॥ १ ॥
गन्धारी तस्य भार्याऽऽसीन्मनोनयनवल्लभा । अनयोश्चित्तसंभूतनामभूतां तनयौ क्रमात् ॥ २ ॥
सुशीलौ सर्वशास्त्रेषु रूपिणौ गुणसागरौ । कुलमात्मीयकं हित्वा यातौ तौ परमण्डलम् ॥ ३ ॥
नर्तनं विप्रवेषेण कुर्वन्तौ गीतमप्यदः । तिष्ठतस्तौ धरापृष्ठे कलकण्ठौ मनस्विनौ ॥ ४ ॥
अन्यदा नर्तनं रम्यं पुरे राजगृहे परे । नर्तकीवेषतो गीतं कुर्वाते तौ सुरोपमम् ॥ ५ ॥
संभूतस्य समाठोऽस्य नर्तनं कुर्वतः परम् । स्त्रीवेषेण सुधर्मोऽपि मोहितोऽभूत् पुरोहितः ॥ ६ ॥
कालेन बहुनाऽनेन ज्ञातेयं स्त्री न पुंस्त्वतः । एष दिव्यो नरः कोऽपि कलाविज्ञानकोविदः ॥ ७ ॥
दिव्यरूपधरायास्मै संभूताय महात्मने । लक्ष्मीमती स्वसा दत्ता स्वकेयं च सुधर्मणा ॥ ८ ॥
संभूतस्य कुले ज्ञाते कालेन बहुनाऽमुना । ततस्तौ लज्जितौ सन्तौ गतौ पाटलिपुत्रकम् ॥ ९ ॥
ततोऽमुष्मिन् पुरे ताभ्यां कुर्वद्भ्यां निशि नर्तनम् । भ्रातृभ्यां रञ्जितो लोकः कौमुदीसुमहामहे ॥१०॥
तत्र समुदिते सूर्ये विज्ञातौ स्वप्रभुणा तकौ । नरनर्ताविमौ नूनं योषितौ भवतो न च ॥ ११ ॥
काशीजनपुरं प्राप्य गुरुन्ध्यानाख्ययोगिनः । जिनधर्मं ततौ श्रुत्वा दीक्षां दैगम्बरीमितौ ॥ १२ ॥
समस्तमागमं श्रुत्वा जिनधर्मपरायणौ । तपोभिः कृशदेहौ तौ गतौ राजगृहं परम् ॥ १३ ॥
कृत्वा पक्षोपवासं च पारणार्थं पुरान्तरम् । प्रविवेश पुरीं भ्रान्त्वा संभूताख्यो महामुनिः ॥ १४ ॥
भिक्षार्थं पर्यटन् साधुस्तदा राजगृहान्तरे । ददर्श च सुधर्माणं भाक्तं न तं पुरोधसम् ॥ १५ ॥
दृष्ट्वाऽमुं पुरमध्ये च वेपमानशरीरकम् । ननाश तदनु पापः वसुधर्मा पुरोहितः ॥ १६ ॥
पापतोऽस्य मुनेस्तत्र संभूताख्यस्य वेगतः । तेजोऽग्निर्निर्गतो अभवत् तेन व्याप्ता दिशो दश ॥१७॥
तं वृत्तान्तं परिज्ञाय ज्येष्ठश्चित्ताभिधो मुनिः । आजगाम महावेगाद् विस्मयव्याप्तमानसः ॥१८॥
अनेन मुनिना शीघ्रं कृत्वागमनमादरात् । संभूताख्यमुनेस्तत्र तेजोनिवारणं कृतम् ॥ १९ ॥
ज्ञात्वा तन्मुनिमाहात्म्यं भयवेपितविग्रहः । पुरोधा विस्मितस्वान्तो वसुधर्मा पलायितः ॥ २० ॥
अत्रान्तरे समादाय चक्रिरूपं च देवता । महाविभूतियोगेन मुनिसेवां करोति सा ॥ २१ ॥
मुनिसेवां प्रकुर्वाणां देवतां विभवान्विताम् । संभूताख्यमुनिर्मूढो निदानमकरोदिदम् ॥ २२ ॥
विद्यते मम माहात्म्यमेतस्य तपसो यदि । अन्यजन्मन्यहं चक्री भवेयं[1] च ततः स्फुटम् ॥ २३ ॥
कृत्वा निदानमीदृक्षं मृतः संभूतको मुनिः । सौधर्मे धर्मसंयोगाज्जातो देवो महर्द्धिकः ॥ २४ ॥
अत्रैव भरतक्षेत्रे जम्बूद्वीपोपलक्षिते । काम्पिल्ये नगरे चास्ति पञ्चालविषयोद्भवम् ॥ २५ ॥
ब्रह्माख्यो भूपतिस्तत्र विद्यते परमोदयः । बभूव तन्महादेवी धनदेवीव सुन्दरी ॥ २६ ॥
चक्री द्वादशमो रूपी ब्रह्मदत्ताभिधो बली । संभूताख्यचरो देवो जातः पुत्रोऽनयोर्भुवि ॥ २७ ॥
संसारसागरं भ्रान्त्वा वसुधर्मा पुरोहितः । सूपकारो बभूवायं ब्रह्मदत्तस्य चक्रिणः ॥ २८ ॥
अथ भोजनवेलायां विस्तृतायां महीपतेः । क्षुधारम्याभिभूतस्य ब्रह्मदत्तस्य चक्रिणः ॥ २९ ॥
भाजनं समपात् तेन सूपकारेण वेगतः । अत्युष्णं पायसं क्षिप्तं स्वपाणिभ्यां मनोहरम् ॥ ३० ॥
अत्युष्णं पायसं दृष्ट्वा चक्रिणा रोषमीयुषा । सूपकारो हतोऽनेन मस्तकेऽसिसमेन सः ॥ ३१ ॥
पायसेन मृतिं प्राप्य सूपकारो वराककः । लवणाम्भोधिमध्यस्थे द्वीपेऽभूद् व्यन्तरामरः ॥ ३२ ॥

---

1 [भवेयं च]
२ ये ३१

स्मृत्वा खदिरसम्बन्धं प्रेमाख्याय तापसम् । फलानि दर्शयामास दिव्यान्येष महीपते ॥ २३ ॥
नीत्वा समुद्रमध्येऽमुं फलकोभेन चक्रिणम् । मापयन् प्रेक्षतां चक्रेऽमार सहसाऽमरः ॥ २४ ॥
पश्चात्स्मृतिं परिप्राप्य ब्रह्मदत्तो दुराशयः । सप्तमं नरकं प्राप घोरं दुःखसमाकुलम् ॥ २५ ॥

॥ इति श्रीनिदानविधानकरणसप्तमनरकगमन संभूतिकथानकमिदम् ॥ १०९ ॥

*

११० पुष्पदत्ताकथानकम् ।

अत्रैव भरतक्षेत्रे चित्रधामपुरेऽभवत् । पुष्पचूले नृपोऽस्यापि पुष्पदन्ता प्रिया प्रिया ॥ १ ॥
तस्या रूपसमेत्वापा धात्रिका नित्यपण्डिता । कलाविज्ञानसंपन्ना यौवनेन समन्विता ॥ २ ॥
अन्यदा विहरन् क्षितिं संघेन महता युतः । अमरप्रभयोगीन्द्रस्तत्पुरोद्यानमाययौ ॥ ३ ॥
श्रुत्वा मुनिं परिप्राप्तं पुष्पचूलो नरेश्वरः । नत्वा धर्ममुपश्रुत्य तदन्ते मुनितामितः ॥ ४ ॥
पुष्पदन्ताऽपि तद्देवी धात्रीसमन्विता सती । यमितागमिनीपार्श्वे तदानीमर्यिकाऽभवत् ॥ ५ ॥
ततस्तपः समादाय पुष्पदन्तार्यिका तदा । कुलैश्वर्यमदोन्मत्ता महागर्वसमन्विता ॥ ६ ॥
अन्यासामर्यिकाणां च वन्दनां कर्तुमिच्छति । नो मूढात्मा प्रमादात्त कुर्याद् वा मायया सदा ॥ ७ ॥[1]
दुस्सहक्षयस्य वक्त्रस्य दुर्गन्धस्यापि सर्वदा । सुगन्धद्रव्यचूर्णेन करोत्येषा सुधूपनम् ॥ ८ ॥
एवं प्रकुर्वती दृष्ट्वा पुष्पदत्ता दिने दिने । तन्महत्तरिका तां च जगादेति विचक्षणा ॥ ९ ॥
गन्धवसाशरीराणां संस्कारो द्रव्ययोगतः । कर्तुं न युज्यते पुत्रि भवत्येतत्तपस्विनाम् ॥ १० ॥[4]
समहत्तरिकावाक्यं श्रुत्वा तां प्राह मायया । मच्छरीरं स्वभावेन सुगन्धं रूपसंयुतम् ॥ ११ ॥
मायाशल्येन संयुक्तं तपो धातुकया सह । पुष्पदन्तार्यिका कृत्वा सौधर्मेऽजनि सा पुनः ॥ १२ ॥
अत्रैव भरते वर्षे चम्पायां पुरि विश्रुते । श्रेष्ठी सागरदत्ताख्यो धनश्रीरस्य गेहिनी ॥ १३ ॥
सौधर्मदिवि सा धात्री धनश्रीतनयाऽभवत् । धनमित्राख्यया युक्ता रूपातिविभ्रमा ॥ १४ ॥
मायाशल्येन संयुक्ता पुष्पदन्ताऽपि तत्सुता । जातेयं धनमित्राया दासी पूतिमुखी परा ॥ १५ ॥
ततः सागरदत्तेन पृष्टो नैमित्तिकोऽन्यदा । धनमित्रावरः को वा भविष्यति वदाशु मे ॥ १६ ॥
श्रुत्वा सागरदत्तस्य श्रेष्ठिनो वचनं तदा । नैमित्तिको जगादेममोघवचनो भुवि ॥ १७ ॥
त्वद्वने यं नरं दृष्ट्वा निषण्णं रूपशेखरम् । लाभो दीनारलक्षस्य भविष्यति तव स्फुटम् ॥ १८ ॥
तथा हि पूतिमुख्याश्च यं दृष्ट्वा नरपुङ्गवम् । मुखं दुर्गन्धतां हित्वा साधुगन्धं भविष्यति ॥ १९ ॥
नरेन्द्रकृतसन्मानः कीर्तिव्याप्तदिगन्तरः । स पतिर्धनमित्रायास्तव सुताया भविष्यति ॥ २० ॥
ततः सागरदत्तोऽपि नैमित्तिकनिदेशतः । समस्तनरवृन्दस्य चकारेदं परीक्षणम् ॥ २१ ॥
अत्रान्तरे महाभाग्यो वसुदेवो नराधिपः । वनं सागरदत्तस्य संप्राप्त पर्यटन् क्वचित् ॥ २२ ॥
दृष्ट्वा सागरदत्तोऽयं वसुदेवं वनस्थितम् । लाभं दीनारलक्षस्य लेभे तत्संगमादरात् ॥ २३ ॥
दृष्ट्वा पूतिमुखी भूपं तत्कलं सद्गुणस्य च । हित्वा दुर्गन्धतां सद्यः सुगन्धत्वं समाप सा ॥ २४ ॥
अथ सागरदत्तोऽस्मा सुतया धनमित्रया । चकार वसुदेवस्य पाणिग्रहणमङ्गलम् ॥ २५ ॥

॥ इति [7]श्रीपुष्पदत्तार्यिकामायाकृतनिन्दाकथानकमिदम् ॥ ११० ॥

*

1 क 'पत्रिणी' 2 पफल पुष्पदन्तीत्यम्. 3 [पुष्पदन्ता]. 4 पफल पुष्पदन्तीत्यम्. 5 [पुष्पदन्ता']. 6 पफल [illegible]. 7 [श्रीपुष्पदन्ता'].

१११ मरीचिकथानकम् ।

विषये [1]पुष्कलवत्यां विशिष्टजनसंकुले । मधुपूर्वं वनं रम्यं बभूव मधुकान्वितम् ॥ १ ॥
नानानोकुहसंछन्ने नानापक्षिरवाकुले । वसति प्रीतचेतस्को म्लेच्छो नाम पुरूरवाः ॥ २ ॥
अन्यदा विहरन् क्वापि नष्टमार्गो महामुनिः । समाधिपूर्वको गुप्तो तद्वनं प्रविवेश सः ॥ ३ ॥
ततः पर्यटताऽनेन गहने श्रान्तचेतसा । दृष्टः पुरूरवा म्लेच्छो मार्गभ्रमयुतेन सः ॥ ४ ॥
नानाजनसमेतस्य महादेशस्य सत्वरम् । ब्रूहि मार्गं मम स्पष्टं येन यामि वनेचर ॥ ५ ॥
मुनिवाक्यं समाकर्ण्य धर्मशीलः पुरूरवाः । जगादार्यं मुनेरस्य मार्गं देशस्य शोभनम् ॥ ६ ॥
पुरूरवोवचः श्रुत्वाऽवक्कीदं महामुनिः । कृपाऽऽक्रान्तापरिष्वक्तहृदयो निजगादमुम् ॥ ७ ॥
महामार्गेण खिन्नस्य देहस्य मृदुमानसः । अटवीविप्रनष्टस्य मम मार्गस्त्वयोदितः ॥ ८ ॥
भवाटवीप्रनष्टस्य दुःखगोत्रावगाहिनः । धर्मपाथेयहीनस्य मोक्षमार्गं ब्रवीमि ते ॥ ९ ॥[3]
साधूदितं समाकर्ण्य बभाषेऽयं पुरूरवाः । मोक्षमार्गस्य पन्थानं प्रदर्शय मम स्फुटम् ॥ १० ॥
गृहिधर्मप्रयोगेन सम्यक्त्वादिपुरस्सरः । तदा तस्य समादिष्टः साधुना तद्धितैषिणा ॥ ११ ॥
श्रावकं धर्ममासाद्य कालं कृत्वा पुरूरवाः । सौधर्मे धामवद् देवः सागरैकप्रजीवितः ॥ १२ ॥
ततश्च्युत्वाऽभवत् पुत्रश्चक्रिणो भरतस्य सः । मरीचिसंज्ञया युक्तो धारिणीकुक्षिसंभवः ॥ १३ ॥
दीक्षितः पुरुदेवेन मरीचिर्नाभिसूनुना । सभायां स्वस्तुतिं श्रुत्वा सांख्यधर्मं दिदेश सः ॥ १४ ॥
भूयो मिथ्यात्वदोषेण परिभ्रम्य भवार्णवम् । अभवच्च महावीरः तीर्थकृत्परमः पुनः ॥ १५ ॥

॥ इति श्रीमरीचिकथानकमिदम् ॥ १११ ॥

*

११२ कुलजमहापुरुषकथानकम् ।

अवन्तीविषये चास्ति श्रीमदुज्जयिनी पुरी । शूरसेनो नरेन्द्रोऽस्यां शूरसेनाऽस्य गेहिनी ॥ १ ॥
अनयो रूपसंपन्नः शूरवीरो जनप्रियः । शूरवीरोऽभवत् पुत्रः कलाविज्ञानकोविदः ॥ २ ॥
क्ष्वेडविच्छेदनार्थं च नरेन्द्रविषघातिनाम् । वैद्यानां संग्रहोऽनेन प्रभुणा विहितो गृहे ॥ ३ ॥
तेषां संपूजनं राजा भोजनाच्छादनादिना । शूरवीरनिमित्तेन करोति सततं वरम् ॥ ४ ॥
अन्यदा शूरवीरोऽसौ प्रासादशिखरस्थितः । दष्टो भीमभुजङ्गेन पपात भुवि निःक्रियः ॥ ५ ॥
एवंस्थिते कुमारेऽस्मिन् विषार्ते वैद्यपुङ्गवाः । आहूता युगपत् सर्वे नरेन्द्रेण समागताः ॥ ६ ॥
यथाक्रमं निविष्टेषु तेषु सर्वेषु सादरम् । एवमुक्तं नरेन्द्रेण पुत्रशोकविचेतसा ॥ ७ ॥
शूरवीरकुमारस्य मत्पुत्रस्य प्रयत्नतः । अस्माभिर्युगपत् प्रोक्ता यूयं कुरुत जीवनम् ॥ ८ ॥[4]
नृपालस्य वचः श्रुत्वा सोमशर्मा द्विजः पुनः । कुशलोऽष्टाङ्गवेदेषु जगादेति महीपतिम् ॥ ९ ॥
पापं दिननक्षत्र वारवेलामुहूर्तकम् । दंष्ट्राद्यशुभमेतैश्च दष्टो नृप न जीवति ॥ १० ॥
श्रुत्वा तद्वचनं भूयो बभाणेमं महीपतिः । भवतां संग्रहोऽस्माभिः पुत्रार्थं विहितो ननु ॥ ११ ॥
आकर्ण्य नृपतेर्वाक्यं सोमशर्मा जगादमुम् । वार्तिकः कुरुते कर्म संग्रहानुगतं नृप ॥ १२ ॥
तथापि प्रभुणा भूयो सोमशर्मा तदुक्तितः । मत्पुत्रोऽयं कुवैद्येषु सत्सु प्रेतगतः कथम् ॥ १३ ॥

---

1 [पुष्कलावत्यां]. 2 ['मथ]. 3 पफज मिथ्यमेतद्. 4 पफज मिथ्यमेतम्. 5 पफज दुष्कम्. 6 पफ दुष्कम्, ज दुष्कम्. 7 [तत्वैद्य]

भूयो नरेन्द्रवाक्येन सोमशर्मा जगाद तम् । दर्शयामि तथाप्येव समाहात्म्यं नराधिप ॥ १४ ॥
एवमुक्त्वा समाहूतास्तेन सर्वेऽपि पन्नगाः । भवनं राजराजस्य संप्राप्ता भयविह्वलाः ॥ १५ ॥
आगतेषु समस्तेषु पन्नगेषु नृपाज्ञया । भूयोऽपि गदितास्तेन तदानीं सोमशर्मणा ॥ १६ ॥
योऽपराधी भवेन्मध्ये तिष्ठत्वत्र स मण्डले । येऽपराधपरित्यक्ताः स्वगृहं यान्तु तेऽखिलाः ॥१७॥
सोमशर्मवचः श्रुत्वा सर्वे ये दोषवर्जिताः । स्वमन्दिरं गता यस्तु सदोषः स परं स्थितः ॥ १८ ॥
एकस्मिन् पन्नगे भीमे स्थिते तत्र समण्डले । भूयोऽपि पुनस्तेन तदानीं सोमशर्मणा ॥ १९ ॥
सर्पाणां द्वे कुले राजन् विद्येते वसुधातले । गन्धनाख्यं कुलं चैकमगन्धनकुलं परम् ॥ २० ॥
गन्धने ये कुले जाता विषं गृह्णन्ति तेऽञ्जसा । अगन्धनकुलं पूर्वं प्रथमं ते मयोदितम् ॥ २१ ॥
येऽगन्धनकुले जाता मानिनः कुलसंभवाः । निजां कुलस्थितिं यातु त्यजन्ति न ते नृप ॥ २२ ॥
अनेन कारणेनैष सर्पश्चैव कुलोद्भवः । अगन्धनकुलोत्पन्नो मानराश्रितविग्रहः ॥ २३ ॥
स्वकुलस्थितिसंतानमत्यन्तेषितविग्रहः । अमुना कारणेनायं न गृह्णाति विषं प्रभो ॥ २४ ॥
इष्यतेऽस्य वरं मृत्युर्न कुलस्थितिलोपनम् । मानिनो मरणायापि वाञ्छन्ति न कुलक्षयम् ॥ २५ ॥
सोमशर्मोदितं श्रुत्वा नन्दनं जीवनं प्रति । जगादेमं सभाऽध्यक्षं लोकविस्मयदो नृपः ॥ २६ ॥
जीवितस्य चिरं सर्पः पश्चात्तं यातु वा ध्रुवम् । तथाऽपि स्वविषं भूतं गृह्णातु पुनरप्ययम् ॥२७॥
नरेन्द्रवाक्यतो ज्ञात्वा धारणं मनसि ध्रुवम् । जगाद पन्नगं सर्वं सोमशर्मा पुरःस्थितम् ॥ २८ ॥
भो भो अगन्धकुलस्य मत्सरोर्जितमनस तु । गृहाण विषमात्मीयं यदीत्थं स न वाञ्छति ॥ २९ ॥
ज्वालापूर्णं विभावसुं क्षिप्रं प्रज्वाल्य वह्निना । सोमशर्मा जगादेमं सभामध्ये विचक्षणः ॥ ३० ॥
इदं नागकुमार त्वं गृहाण विषमादरात् । न गृह्णासि यदि क्षिप्रं ततोऽग्नौ विश भासुरम् ॥३१॥
सोमशर्मवचः श्रुत्वा नागपन्नगोऽपि तत्क्षणम् । तदानीं विस्मयोपेतो दध्याविति स चेतसि ॥३२॥
अगन्धने कुले नूनं मर्यादेयं समुद्गता । तेन मुक्तं विषं यच्च गृहीतं न केनचित् ॥ ३३ ॥
दिनमध्येऽपि वा मासे वर्षे वा निश्चयेन च । मर्तव्यं जन्तुभिः सर्वैर्भ्रम्यद्भिर्भवसंकटे ॥ ३४ ॥
हित्वा स्वकुलमर्यादामपवादयुतेन किं । अवश्यमेव मर्तव्यं मयाऽपि भवकानने ॥ ३५ ॥
तत् स्वकुलमर्यादां पालयन् मत्कुलागताम् । मरामि येन नो निन्द्यो भवामि निजगोत्रजैः ॥३६॥
चिन्तयित्वा चिरं चित्ते नागेन्द्रो मृत्युनिर्भयः । प्रविश्य ज्वलितं वह्निं ममार सहसा सुधीः ॥३७॥

तथा चोक्तम्–

वरं प्रविष्टं ज्वलिते हुताशने न चापि भग्नं चिरसंचितं व्रतम् ।
वरं हि मृत्युः शुचिशुद्धकर्मणो न शीलभङ्गस्य स्खलितस्य जीवितम् ॥ ३८ ॥

तिर्यग्भावसमुत्पन्नो ज्ञानहीनोऽपि चेदहिः । अनादाय विषं मुक्तं प्राप्तो मृत्युमयं सुधीः ॥ ३९ ॥
उत्कृष्टकुलजातेन साधुनाऽप्यभिमानिना । गृह्यते तपो येन जिनादिगुरुसाक्षिकम् ॥ ४० ॥
कषायाक्षविषं यान्तं मरणे समुपस्थिते । व्रतीनां कुलमर्यादां जिनादिगुरुभिर्भुवि ॥ ४१ ॥
हित्वेमां कुलमर्यादां महापुरुषसेविताम् । कषायाक्षविषादानं न कर्तव्यं स्वचेतसि ॥ ४२ ॥

॥ इति श्रीकुलजमहापुरुषकथानकमिदम् ॥ ११२ ॥

•

११३ गन्धमित्रकथानकम् ।

ततः सुकोशलाभिख्ये विषये परमोदये । अस्त्ययोध्यापुरी रम्या सानुसरसीधने ॥ १ ॥
विपतेऽस्यां महाराजो यशःसेनो हिताहितः । प्रिया जयमतिस्तस्य महाजयमतिः प्रिया ॥ २ ॥
अभूतामनयोः पुत्रौ कलाविज्ञानशालिनौ । जयसेनो मतः पूर्वो गन्धमित्रोऽपरो मतः ॥ ३ ॥
अन्यदा प्राप्य वैराग्यं राज्यं ज्येष्ठाय सूनवे । युवराज्यं कनिष्ठाय यशःसेनो ददौ विभुः ॥ ४ ॥
त्रिःपरीत्य तमीशानं नत्वा भक्त्या पुनः पुनः । मुनिसागरसामीप्ये ददौ दीक्षां स भूपतिः ॥ ५ ॥
योऽसौ ज्येष्ठसुतस्तस्य स्थितो जनकविष्टरे । राज्यमादाय वेगेन गन्धमित्रेण घाटितः ॥ ६ ॥
किन्तु स गन्धमित्रस्य नक्तं पश्यति सदा । जयसेनः स्वसैन्येन तस्थौ दूरस्थितो रुषा ॥ ७ ॥
पीनोन्नतकुचद्वन्द्वैर्नीलोत्पलदलेक्षणैः । गन्धमित्रोऽपि राजेन्द्रः पञ्चमी रमणीशतैः ॥ ८ ॥
पञ्चेन्द्रियेषु मध्येऽसौ घ्राणेन्द्रियपरस्तराम् । भुञ्जानः परमान् भोगांस्तस्थौ मुदितमानसः ॥ ९ ॥[1]
अन्यदा गन्धमित्रोऽसौ सर्वदेवीसमन्वितः । जयसेनेन विज्ञातः स्थितो यः सरयूह्रदे ॥ १० ॥
ज्ञात्वाऽमुं सरयूभागे तदानीमुपरिष्टके । नानातरुप्रसूनानि विषपूर्णीकृतान्यलम् ॥ ११ ॥
तं तदा जलपूरेण मन्दमन्दप्रवाहिना । जयसेनः स्थितस्तत्र मुमोचाशु रुषान्वितः ॥ १२ ॥[2]
तद्देवीभिः समादाय विषपुष्पाणि तान्यलम् । दत्तानि रमणायास्मै तत्करे तामिरादरात् ॥ १३ ॥
आदाय चित्रवर्णानि तानि घ्राणाय रागतः । गन्धमित्रो मृतिं प्राप्य जगाम नरकं पुनः ॥ १४ ॥
ज्येष्ठोऽपि जयसेनाख्यो गृहीत्वा राज्यमात्मनः । भुञ्जानः परमान् भोगान् सुखं तस्थौ स्वपत्तने ॥ १५ ॥

॥ इति श्रीघ्राणेन्द्रियसमायुक्तनरकगमनगन्धमित्रकथानकमिदम् ॥ ११३ ॥

*

११४ पञ्चालगन्धर्वदत्ताकथानकम् ।

नगरे पाटलीपुत्रे हृतशत्रुकदम्बकः । राजा गन्धर्वदत्तोऽभूत् सर्वलोकमनोहरः ॥ १ ॥
अभूत् तन्महादेवी पीनोन्नतकुचान्विता । गन्धर्वोपपदा सेना कन्दोट्टदललोचना ॥ २ ॥
गन्धर्वोपपदा दत्ता पद्मकोमलपाणिका । गन्धर्वे विषये दक्षा गन्धर्वमदगर्विता ॥ ३ ॥
अस्यैव नृपतेरासीत् पुत्रिका लोललोचना । कलाकलापसंयुक्ता विज्ञानादिगुणान्विता ॥ ४ ॥
गन्धर्वविधिना यो हि कुमारीं मां विजेष्यते । तस्य भार्या भविष्यामि सगरोऽयं मम स्फुटम् ॥ ५ ॥
अथवा मां न कोऽप्यत्र गन्धर्वेण विजेष्यते । ग्रामत्रयेण युक्तेन तथा सप्तस्वरैरपि ॥ ६ ॥
जितमानी ततः क्षिप्रं ज्वालामालितपुष्करे । करिष्यामि जनाध्यक्षं प्रवेशं निर्विकल्पकम् ॥ ७ ॥
आदाय ब्रह्मचर्यं सा निश्चितं तावत्कालिकम् । पुत्रिकेयं तदा तस्थौ प्रतिज्ञारूढमानसा ॥ ८ ॥
अस्यामेव स्थितायां च प्रतिज्ञारूढचेतसि । स्वयंवरायमायाता नानानरगणास्तदा ॥ ९ ॥
स्वमन्दिराद् विनिःसृत्य नरनारीसमन्विता । तस्थौ गन्धर्वदत्ताऽपि सा स्वयंवरमण्डपे ॥ १० ॥
गतैरेकदिने तस्मिन् सप्तभिः सप्तभिर्दिनैः । वादं करोति सा बाला गन्धर्वेण नरोत्तमैः ॥ ११ ॥
गन्धर्वदत्तया तत्र कालेन बहुना तया । समितास्ते नराः सर्वे गान्धर्वेण निराकृताः ॥ १२ ॥
विजयार्धनगासन्ने पोदनाख्ये पुरोत्तमे । एकः पञ्चालनामासीदुपाध्यायः कलान्वितः ॥ १३ ॥

1 (रथो). 2 पकाज युक्तमिदम्. 3 पफज युक्तमिदम्. 4 पप कुमारीं. 5 ज पद्मज्म्.

गन्धर्वविषये दिव्ये विपञ्चीविषयेऽपि च । किंनरो वा कलस्वानस्तुम्बुरोऽसौ वितिष्ठते ॥ १४ ॥
अन्यदागत्य तत्सार्धं नरैः संभ्रममागतैः । वार्ता गन्धर्वदत्ताया कथिताऽस्य सकौतुकैः ॥ १५ ॥
पुत्रिका पाटलीपुत्रे किंनरीव कलस्वना । निर्जित्य सकलं लोकं गीतेन व्यवतिष्ठते ॥ १६ ॥
निशम्य तद्वचः प्रोक्तं पञ्चालः कृतनिश्चयः । ततः पञ्चभिरायुक्तः शिष्याणामाय तत्पुरम् ॥ १७ ॥
यदि कोऽपि नरः क्षिप्रमागच्छति मदन्तिकम् । सुप्तसोत्थापनं भद्र कुरु ततो मम स्फुटम् ॥ १८ ॥
शिष्यमेकं निधायाथ अशोकाख्यतरोरधः । मुखप्रसारणं कृत्वा सुप्तोऽस्य सपरिश्रमः ॥ १९ ॥
अन्ये ते वाग्मिनः सर्वे कौतुकव्याप्तमानसाः । विविशुः पाटलीपुत्रं पताकाशतशोभितम् ॥ २० ॥
अत्रान्तरे परिज्ञाय सहसा सहचारिभिः । चतुर्भिर्मेलितैस्तत्समैर्द्रुमन्त्रगामिभिः ॥ २१ ॥
वसनं चर्कर्पूरश्रीखण्डकुसुमाक्षतम् । ताम्बूलादिकमादाय रागात् पञ्चालमाप सा ॥ २२ ॥
प्रसारितमुखं भीमं पञ्चालं सपरिश्रमम् । ददर्शो दन्तुरं तत्र सघर्घरमलं सखा ॥ २३ ॥
ततो गन्धर्वदत्ता च तत्समीपे विलोक्य सा । अत्रमेकं जगादेति वचः साश्चर्यमीयुषा ॥ २४ ॥
भो भो भद्र वद क्षिप्रं कोऽयं सत्यमादरात् । पञ्चालोऽयमुपाध्यायो यः सुप्तो व्यवतिष्ठते ॥ २५ ॥
निशम्य तद्वचस्तस्य जगादेमां मनस्विनी । भवेत् पञ्चालनामायमुपाध्यायः परिस्फुटम् ॥ २६ ॥
तथाप्यतः परिज्ञाय पञ्चालं भीमवक्त्रकम् । दन्तुरं च चिरेण विरक्ता दुःखिता सती ॥ २७ ॥
ततोऽशोकतरुं पात्वा बलसुम्मेन सादरम् । विधाय कुङ्कुमाद्यैस्तैरुल्लिख्य मुहुर्मुहुः ॥ २८ ॥
पुष्पमालाभिराछाद्य धूपं दत्त्वा पुनः पुनः । ताम्बूलमप्यथः कृत्वा त्रिःपरीत्य प्रणम्य तम् ॥ २९ ॥
जगाम विस्मितस्वान्ता तद्विरक्ता गतप्रभा । गन्धर्वोपपदा दत्ता पुत्रिका हृष्टमानसा ॥ ३० ॥
यावदस्य मुखे भीमे पञ्चालस्य सरस्वती । पिण्डितापत्य तावत्ते कुतो नेय व्यवस्थिता ॥ ३१ ॥
एवं निगद्य तं दृष्ट्वा पञ्चालोद्वीर्णमानसा । तूर्णं गन्धर्वदत्ताऽपि जगाम निजमन्दिरम् ॥ ३२ ॥
ततः प्रबोधमासाद्य पञ्चालो वीक्ष्य पादपम् । पूजितं केन मे सत्यं ब्रूहि शिष्य यथायथम् ॥ ३३ ॥
निशम्य तद्वचः शिष्यो जगादेमं ससंभ्रमः । नारी त्वदन्तिकं प्राप्ता पञ्चसखीपरिवारिता ॥ ३४ ॥
भवन्तं वीक्ष्य संसुप्तं पुष्पधूपादितत्परा । अशोकं पूजयित्वा च प्राहेदं वनितोत्तमा ॥ ३५ ॥
दन्तुरमुखे यावदस्य देवी व्यवस्थिता । तावत्तत्र ततो कस्मात् स्थितेयं सरस्वती ॥ ३६ ॥
एवं निगद्य सा कन्या जगाम निजसदनम् । पञ्चालस्तद्वचः श्रुत्वा रुषा यातो नृपान्तिकम् ॥ ३७ ॥
उपाध्यायो नृपेणोक्तस्तुभ्यं किं क्रियते वद । तदाप्यसोऽमुना प्रोक्तो नृपतिः प्रीतमानसः ॥ ३८ ॥
राजन् गन्धर्वदत्तान्ते मठावासं निरूपय । तेनापि प्रभुणा तस्य प्रतिपन्नं मनीषितम् ॥ ३९ ॥
पञ्चालोऽपि तदभ्याशे स्थितो गेहे कलस्वनाम् । वीणामादाय सगेयं नादितुं प्रवृत्तो निशि ॥ ४० ॥
तद्गीतध्वनिमाकर्ण्य पञ्चालहृतमानसा । मदनिह्वलचेतस्का चचालासौ सविस्मया ॥ ४१ ॥
प्रासादात् पतमासाद्य पञ्चतामपि सत्वरम् । भर्वं गन्धर्वदत्तयं संसारं भवदुःखदम् ॥ ४२ ॥

॥ इति श्रीपञ्चालोपाध्यायगीतश्रवणमरणकथानकमिदम् ॥ ११४ ॥

११५ भीमनृपतिकथानकम् ।

अत्रैव भारते वासे कम्पिल्लाख्यं पुरं परम् । तत्र राजाऽभवद् भीमो जिह्वेन्द्रियवशीकृतः ॥ १ ॥
बभूवास्य महादेवी सोमश्रीरतिवल्लभा । तनयोऽनयोर्नन्दनः शूरो भीमदासो भयानकः ॥ २ ॥
तेन राज्ञा महापूजा जिनानां क्षीणकर्मणाम् । प्रवर्तिताऽतिभावेन त्रिषु नन्दीश्वरेष्वपि ॥ ३ ॥
दिनान्यष्टौ समारभ्य जीवानां भयवेपिनाम् । अमारिघोषणां राजा चकार स्वकुलोचिताम् ॥ ४ ॥
अथ नन्दीश्वरान्ते च पिशिताशाऽभवत् प्रभोः । अत्यन्तदुर्धराऽसाध्या तद्व्याकुलितचेतसः ॥ ५ ॥
आहूय मारनामानं महानसिकमादरात् । जगादैवं ममाद्यैव रे रे त्वं मांसमानय ॥ ६ ॥
निशम्य भूभुजो वाक्यमनाठोच्य स सूदकः । श्मशानं प्राप्य वेगेन मृतं बालं ददर्श तम् ॥७॥
बालमादाय सम्प्राप्य संस्कृत्य निजमन्दिरे । ददौ भूपाय तन्मांसं जघासेदं स सम्पदः ॥ ८ ॥
आस्वाद्य तत्स्वादु हृष्टो जगौ सूदं स भूपतिः । मद्याय मोदनं सृष्टं सजातं मांसभक्षणात् ॥ ९ ॥
भूपवाक्यं समाकर्ण्य याचयित्वाऽभयं नृपम् । बालमांसमिदं पक्वं भक्षितं वे नरेश्वर ॥ १० ॥
आकर्ण्य तद्वचः सत्यमिदमेव दिने दिने । सूपकार समेतद्धि समानय सुसंस्कृतम् ॥ ११ ॥
दत्त्वा मोदकमेकैकं हत्वा बालं दिने दिने । बालहीनं पुरं सर्वं सूदश्चक्रे नृपं प्रति ॥ १२ ॥
जग्धबालं नृपं ज्ञात्वा सामन्ता हि महत्तराः । दुष्टं निर्घाटयामासुः सूदेन सह पत्तनात् ॥ १३ ॥
समस्तभुवनव्यापिनिहितोत्क्षेपशासनम् । भीमदासो हि तत्पुत्रश्चक्रे राज्यं यथाविधि ॥ १४ ॥
ततो विन्ध्याटवीमध्ये भुक्त्वा सूदं बुभुक्षितः । मेखलाख्यं पुरं प्राप भीमोऽपि भीमविग्रहः ॥ १५ ॥
ज्ञात्वा भीमं नरं क्रूरं तत्पुरोद्वेगकारिणम् । जघान वसुदेवोऽयं नरभक्षणकारिणम् ॥ १६ ॥
नरमांसादनं कृत्वा जिह्वेन्द्रियवशीकृतः । जगाम नरकं भीमो वसुदेवनिपातितः ॥ १७ ॥

॥ इति श्रीनरमांसभक्षणकारिजिह्वेन्द्रियवशीकृतभीमनृपतिनरकगमनकथानकमिदम् ॥ ११५ ॥

११६ मर्तृमित्रकथानकम् ।

मल्लिपत्तने दिव्ये श्रेष्ठी धनपतिर्महान् । इभ्यस्तद्वल्लभा चासीद्धनश्रीः श्रीसमप्रभा ॥ १ ॥
तत्पुत्रो मर्तृमित्रोऽभून्नन्दितात्मीयबान्धवः । तत्प्रिया देवदत्ता च रूपराजितविग्रहा ॥ २ ॥
मर्तृमित्रादयः सर्वे द्वात्रिंशच्छ्रेष्ठिनन्दनाः । सभार्यास्तत्पुरोद्यानं जग्मुर्मुदितचेतसः ॥ ३ ॥
तस्मिन् वसन्तसेनाख्यः श्रेष्ठिपुत्रोऽस्य कामिनी । आसीद् वसन्तमालाख्या वसन्तश्रीसमप्रभा ॥४॥
उरःशिरःसमाधारं कृत्वाऽसौ स्नेहनिर्भरम् । सुप्ता वसन्तमालेयं स्वधवेनामुना समम् ॥ ५ ॥
उरःशिरःसमाधारं विधायासौ सुसंगतम् । देवदत्ताऽपि संसुप्ता मर्तृमित्रधवान्तिके ॥ ६ ॥
एवं प्रसुप्तयोस्तत्र द्वन्द्वयोः सुखमिच्छया । विहृमार्यां समालोक्य रुचिरां चूतमञ्जरीम् ॥ ७ ॥
वसन्तोपपदं सेन समुत्तारं मनःप्रियम् । भुञ्जे वसन्तमालेयं नितान्तं प्रीतमानसा ॥ ८ ॥
राजते सुन्दरी नाम चूतस्य नवमञ्जरी । यां विलोक्य यां याति वेगं च नयनं जरी ॥ ९ ॥

---

1 ज ॰मार्टी॰ 2 ॰ ॰॰॰, 3 ॰॰ ॰॰॰ 4 ॰॰ ॰॰॰, 5 [भुक्त्वा]. 6 ज (॰॰॰॰).

गन्धर्वविषये दिव्ये विपञ्चीविषयेऽपि च । किंनरो वा कलस्वानस्सुरेन्द्रो विनिष्ठते ॥ १४ ॥[1]
अन्यदास्य तत्कार्ये मेरौ संभ्रममागतैः । वार्ता गन्धर्वदत्ताया कथिताऽस्य सकौतुकैः ॥ १५ ॥
पुत्रिका पाटलीपुत्रे किंनरीव कलस्वना । निर्जित्य सकलं लोकं गीतेन व्यवतिष्ठते ॥ १६ ॥[2]
निशम्य तद्वचः प्रोक्तं पञ्चालः कृतनिश्चयः । अतैः पञ्चभिरायुक्तः शिष्याणामाप तत्पुरम् ॥ १७ ॥
यदि कोऽपि नरः क्षिप्रमागच्छति मदन्तिकम् । सुखसोत्थापनं भद्र कुरु ततो मम स्फुटम् ॥ १८ ॥
शिष्यमेकं निधायायमशोकद्रुमसंतोरणे । मुखप्रसारणं कृत्वा सुप्तोऽयं सपरिश्रमः ॥ १९ ॥[3]
अन्ये ते चात्मिनः सर्वे कौतुकव्याप्तमानसाः । विविशुः पाटलीपुत्रं पताकावलिशोभितम् ॥ २० ॥
अत्रान्तरे परिज्ञाय सहसा सहचारिभिः । बहुभिर्वेष्टिता संघैर्दुम परमामिमि ॥ २१ ॥
वसन्ततन्वकर्पूरमीलन्मकुसुमास्यम् । ताम्बूलादिकमादाय रागात् पञ्चालमाप सा ॥ २२ ॥
प्रसारितमुखं गीतं पञ्चालं सपरिश्रमम् । ददर्श दन्तुरं[4] तत्र सबर्बरगलं सखा ॥ २३ ॥
ततो गन्धर्वदत्ता च तत्समीपे विलोक्य सा । अग्रमेकं जगादेति वचः साश्चर्यमीयुषा ॥ २४ ॥
भो भो भद्र वद क्षिप्रं ममेदं सत्यमादरात् । पञ्चालोऽयमुपाध्यायो यः सुखे व्यवतिष्ठते ॥ २५ ॥
निशम्य तद्वचःश्रेष्ठे जयादर्शा मनस्विनी[6] । भवेत् पञ्चालनामायमुपाध्यायः परिस्फुटम् ॥ २६ ॥
तद्वाक्यतः परिज्ञाय पञ्चालं भीमवक्त्रकम् । दन्तुरं च विचेत्य विरक्ता दुःखिता सखी ॥ २७ ॥
ततोऽस्योक्तरं वाक्यं वक्त्रमुच्चैन सादरम् । विचार्य[7] कुङ्कुमाद्यैश्चैरनुलिप्य मुहुर्मुहुः ॥ २८ ॥
पुष्पमालाशिरस्यैव धूपं दत्त्वा पुनः पुनः । ताम्बूलमप्यथ कृत्वा विपरीत प्रणम्य तम् ॥ २९ ॥
यथाय विस्मितस्वान्ता तद्विरक्ता गतप्रभा । गन्धर्वोपपदा दत्ता पुत्रिका दुःखमानसा ॥ ३० ॥
यावदस्य मुखे न्यसि पञ्चालस्य सरस्वती । विच्छिपादप तावच्चे क्षुब्धो नेयं व्यवस्थिता ॥ ३१ ॥
एवं निगद्य तं दृष्ट्वा पञ्चालोऽपीतमानसा । तूर्णं गन्धर्वदत्ताऽपि जगाम निजमन्दिरम् ॥ ३२ ॥[8]
ततः प्रबोधमासाद्य पञ्चालो वीक्ष्य पादपम् । पृच्छितं केन मे सत्यं ब्रूहि शिष्य यथायथम् ॥ ३३ ॥
निशम्य तद्वचः शिष्यो जगादेदं ससंभ्रमः । नारी त्वदन्तिकं प्राप्ता पण्यस्त्रीपरिवारिता ॥ ३४ ॥
भवन्तं वीक्ष्य सद्रूपं पुष्पधूपादिसंपदा । अशोकं पूजयित्वा च प्राहेदं वनितोत्तमा ॥ ३५ ॥
उपाध्यायमुखे यावदस्य देवी व्यवस्थिता । तावदत्र ततो कस्मान्न स्थितेयं सरस्वती ॥ ३६ ॥
एवं निगद्य सा कन्या जगाम निजसद्मनम् । पञ्चालस्तद्वचः श्रुत्वा त्वरा यातो नृपान्तिकम् ॥ ३७ ॥
उपाध्यायो नृपेणोक्तस्तुभ्यं किं क्रियते भद्र । तदा कथ्यतोऽमुना प्रोक्तो भूपतिः प्रीतमानसः ॥ ३८ ॥
राजन् गन्धर्वदत्तान्ते महावासं निरूपय । तेनापि भूभुजा तस्य प्रतिपन्नं मनीषितम् ॥ ३९ ॥
पञ्चालोऽपि तदभ्यासे स्थितो गेहे कलस्वनाम् । वीणामादाय संगेयं नादितुं प्रवृत्तो[10] निशि ॥ ४० ॥
श्रीभिन्ननिनादमाकर्ण्य पञ्चालद्भुतमानसा । मदविह्वलचेतस्का यमुनासौ सविस्मया ॥ ४१ ॥
प्रासादात् पातमासाद्य पञ्चतामपि सत्वरम् । मर्त्यं[11] गन्धर्वदत्ताख्यं संसारे भवदुःखदम् ॥ ४२ ॥

॥ इति श्रीपञ्चालोपाध्यायगीतश्रवणमरणकथानकमिदम् ॥ ११४ ॥

1 पफज कुब्जकितम्. 2 पफज कुपककितम्. 3 पफज कुब्जकितम्. 4 ['धेरिथ'] 5 अ ददर्शे [दर्शोत्सुक]. 6 पफ omit the second line of No 25 and the first line of No. 26. 7 [विचार्य]. 8 फ पञ्चालो वीक्ष्य 9 पफज विस्मयितम्. 10 अ प्रवृत्ते 11 [मर्त्य].

उपाध्यायोऽमस्त्येमं नितरां नृपभीतितः । ददाति राजपुत्राणामुपदेशं प्रयत्नतः ॥ ४२ ॥
मदर्थं वट्टके कृत्वा गृहीत्वाऽऽमलकान्यलम् । अमुष्मन् पृथिवीपृष्ठे याहि त्वं निम्नगातटम् ॥ ४३ ॥
एवं निगद्य तं तत्र भर्तृमित्रामिषं तदा । राजपुत्रैः समं याति द्रोणः स्नानाभिधान्यया ॥ ४४ ॥
तालसूचीसमुच्छेदकारणं सप्रवर्त्य सः । यदानीं राजपुत्राणां प्रययौ स्वमनीषितम् ॥ ४५ ॥
तन्मार्गानुपदं तूर्णं गृहीत्वाऽऽमलकानि सः । चारुकाष्ठोल्कस्थानि भर्तृमित्रः समाययौ ॥ ४६ ॥
दृष्ट्वाऽर्ध्यं तालवृक्षावसातादकरणानि च । तन्मध्ये प्रददौ स्थानि भर्तृमित्र[1] पचान्परम्[2] ॥ ४७ ॥
दृष्ट्वा तस्पदसस्थानि पदान्यन्यानि रोपतः । भर्तृमित्रं वदन्त्येते राजपुत्राः स्वरस्वनाः ॥ ४८ ॥
भर्तृमित्र त्वया भूमौ मुक्तामलकवट्टकम्[3] । तालसूची नरा छिन्ना भूरीभूतस्वचेतसा ॥ ४९ ॥[4]
कुमारवचनं श्रुत्वा भर्तृमित्रो जगाविमून् । अमुष्य[5] वट्टकं भूमौ तालसूची छिन्ना मया ॥ ५० ॥
निशम्य भर्तृमित्रस्य वचनं ते जगुः पुनः । तच्छेदनविधानं च दर्शयास्माकमीदृशम् ॥ ५१ ॥
ततस्तावकं तेन चोर्ध्वं छित्वा तदुक्तितः । सूचीच्छेदं विधायैषां कारणं दर्शितं तदा ॥ ५२ ॥
दृष्ट्वा तत्करणं तेऽपि विस्मयव्याप्तमानसाः । जग्मुर्निवास्यं सर्वे द्रोणेन सहसा सह ॥ ५३ ॥
शिक्षयित्वा धनुर्वेदं भित्वा चन्द्रकवेधकम् । मेघमालाभिधा रूपां[6] मेघसेनस्य कन्यका ॥ ५४ ॥
ततो द्वादशवर्षाणि भुञ्जानो निजलीलया । मेघमालासमं भोगान् भर्तृमित्रोऽवतिष्ठते ॥ ५५ ॥[7]
अथ लेखान् बहूंस्तत्र पितृमातृसबान्धवाः । तदन्ते प्रेषयामासुः प्रीतिविस्फुरितेक्षणाः ॥ ५६ ॥
मेघमालाऽपि तल्लेखान् भर्तृमित्रस्य[8] गेहिनी । नूनं न दर्शयामास तद्यानभयविह्वला ॥ ५७ ॥
अन्यदा स्थविरः कोऽपि नरः प्राप्य तदन्तिकम् । बहिः स्थितस्य तल्लेखं दर्शयामास वेगतः ॥५८॥
लेखार्थं तं परिज्ञाय भर्तृमित्रः सहाङ्गनः । आशुगं रथमारुह्य प्राप भीममहावनम् ॥ ५९ ॥
अत्रान्तरे सुवेगाख्यो म्लेच्छराजो महाबलः । विलोक्य मेघमालाया रूपं जातोऽतिचञ्चलः ॥६०॥
तस्या हरणकामोऽसौ अज्ञातं तत्तटेऽर्गलम् । मार्गरोधं विधायाशु भर्तृमित्रस्य तस्थिवान् ॥ ६१ ॥
तत्सैन्येन समं युद्धं भर्तृमित्रस्य कुर्वतः । सर्वं गतानि क्षयाणि चापमेकं विहाय तम् ॥ ६२ ॥
मेघमालां समुत्थाप्य तद्रथादाशु भूतले । तत्सन्मुखममीयाय भर्तृमित्रो रथान्वितः ॥ ६३ ॥
तन्नूपुररवं श्रुत्वा किन्नरस्वरसन्निभम् । यावत् पश्यति तद्रूपं सुवेगः प्रीतमानसः ॥ ६४ ॥
तावच्छिद्रं समासाद्य भर्तृमित्रेण वेगतः । अक्षिद्वये स्वबाणेन विद्धः शातेन शालिना ॥ ६५ ॥
ततो मृतिं परिप्राप्य सुवेगो म्लेच्छनायकः । जगाम नरकं भीमं महादोषेण चक्षुषः ॥ ६६ ॥

॥ इति श्रीभर्तृमित्रनिहतसुवेगम्लेच्छनायकगमनकथानकमिदम् ॥ ११६ ॥

*

११७ नागदत्ताकथानकम् ।

अत्रैव भरतक्षेत्रे नासिक्याख्ये पुरोत्तमे । आसीत् सागरदत्ताख्यो गृहनाथो महाधनः ॥ १ ॥
नागदत्ता चलत्कान्त्या तत्प्रिया प्रियवादिनी । श्रीकुमारोऽनयोः पुत्रः श्रीषेणा तनयाऽभवत् ॥२॥
नन्दगोपोऽभवत् तत्र गोपालो रूपराजितः । नागदत्ताऽमुना सार्धं तिष्ठति प्रीतमानसा ॥ ३ ॥
अथैकस्मिन् दिने मूढा नागदत्ता स्वमन्दिरे । तदा व्याजेन केनापि तस्थौ मुदितमानसा ॥ ४ ॥
ततः सागरदत्तोऽपि या पुरस्कृत्य कौतुकम् । हरिद्रापश्चिमे यामे चारणार्थं वनं ययौ ॥ ५ ॥

1 [भर्तृमित्र]. 2 पफ० पद्यान्परम्. 3 [मुक्त्वा]. 4 पफज० मुक्तमितम्. 5 [अमुष्या]. 6 [स्पृश]. 7 पफज० मुक्तमितम्. 8 [लेखान् भर्तृ].

तस्मादिमां प्रयच्छ त्वं चूतमञ्जरीमवरसंनिभाम्। चिन्तयन्ती कामिनां चेतो येन कर्म करोम्यहम् ॥ १० ॥
श्रुत्वा वसन्तमालाया वचनं निजयोषितः । कामी वसन्तसेनोऽपि वचसा निजवल्लभाम् ॥ ११ ॥
निषिद्धः किं ददाम्येतां तव सुन्दरि शोभनाम् । नूनं किमुत्थितो वृद्धि मन्मनोहरमञ्जरी ॥ १२ ॥
निशम्य वचनं कान्ता निजगाद वचो पुनः । हृद्यं नो देहि तां नाथ सुखाया मम सांप्रतम् ॥ १३ ॥
तदाकर्ण्य समाकृष्य निषङ्गाद् बाणमुत्तमम् । धनुर्गुणे समासज्य मुमोचेम स तां प्रति ॥ १४ ॥
स बाणो मञ्जरीं हत्वा तरौ तत्रापि निश्चलः । द्वितीयोऽप्यमुना मुक्तस्तत्रस्थः सोऽपि तत्समः[1] ॥ १५ ॥
मुक्ताश्च पुङ्खतो मुक्तास्तावद्येन मया कृतम् । यावत्तस्या मञ्जरी चूतात् पतिता तत्पुरो परम् ॥ १६ ॥
वसन्तोपपदः सेनस्तां समादाय मञ्जरीम् । ददौ वसन्तमालायाः साहसेन सुकौतुकः ॥ १७ ॥
दृष्ट्वा तां मञ्जरीं दत्तां तेन तस्यै स्वयोषिते । देवदत्ता जगादेति भर्तृमित्रं स्मरान्विता ॥ १८ ॥
स्वामिन् ममापि तां क्षिप्रं देहि चूतस्य मञ्जरीम् । महीमिव वसन्तस्य येन कर्म करोम्यहम् ॥ १९ ॥
देवदत्तावचः श्रुत्वा भर्तृमित्रोऽपि तद्वने । अज्ञातचापविन्यासो धनुर्ज्ञानतमस्तकः ॥ २० ॥
विभासोऽपरमेतस्या भर्तृमित्रः प्रतारकम् । मुखं निशोत्तरीयेण सुखाया सिद्धे वने ॥ २१ ॥
धनुर्वेदनिमित्तेन देशत्यागं विधाय सः । भर्तृमित्रो द्रुतं प्राप पुरं मेघपुरं परम् ॥ २२ ॥
मेघसेनो नृपस्तत्र चमूभेदकशासनः । तत्प्रिया रूपसंपन्ना स्त्री[2] वेगवती भुवि ॥ २३ ॥
कलाविज्ञानसंयुक्ता सुन्दरी सुभगा परा । अभवद् विनयोपेता मेघमाला सुताङ्गयोः ॥ २४ ॥
रूपयौवनसंपन्नां तां नैमित्तिकोक्तितः । स्वयंवरः कृतः पित्रा चन्द्रकोपपदम्पथः ॥ २५ ॥
नरप्रमाणकं स्तम्भमेकं कृत्वा तदग्रतः । सहस्रारकसंयुक्तं चक्रं संस्थाप्यते शुभे ॥ २६ ॥
तस्योपरि स्थितो नूनं वेधकः कुष्ठो नरः । चक्रकोदण्डसद्बाणो वैशाखस्थानान्वितः[5] ॥ २७ ॥
भ्रमतोऽस्य विद्धव्यस्य चक्रस्य सहसा सकृत् । मार्गं[6] विमार्गयन् मन्दं यत्नवान् संविविद्धे ॥ २८ ॥
नरप्रमाणकस्तम्भादुत्थो धनुःशरः । पदानि सप्त संप्राप्य तिष्ठति प्रथमे युगम् ॥ २९ ॥
त्रीणि त्रीणि पदान्यस्य तत्पुरः प्राप्य निश्चितम् । भवन्ति सप्तयुग्मानि युगानि स्थिरतायुतैः ॥ ३० ॥
युगेभ्यः सप्तसंख्येभ्यः संप्राप्य युगमष्टमम् । अतः परं प्रवेष्टानि पदानि त्रीणि कोविदैः ॥ ३१ ॥
चक्रस्य भ्रमतस्तत्र युगमयन्त्रयोभयत । बाढं कार्मुकमन्यो लक्ष्यमानो विविद्धे ॥ ३२ ॥
एवं स्थिते सति क्षिप्रं युगसप्तमाग्रके । स्थितो विविद्धे सर्वो नरसंघः कृतध्वनिः ॥ ३३ ॥
दृष्ट्वा तं चान्द्रकं वेधं भयनिष्ठुरमानसः । सविष्ठते नरनाथस्थयुग्मप्रदर्शनेच्छया ॥ ३४ ॥
अत्रान्तरे महाक्षेपकसंघट्टसंकुले । भर्तृमित्रः परिप्राप पुरं मेघपुरं प्रभुः ॥ ३५ ॥
नानाशिष्यसमायुक्तं धनुर्वेदपरायणम् । द्रोणाचार्यं ददर्शासौ भर्तृमित्रोऽपि तत्पुरे ॥ ३६ ॥
अस्मै विविधरत्नानि भर्तृमित्रो वितीर्य च । धनुर्वेदकृते शिष्यो बभूवानुमतोऽस्य सः ॥ ३७ ॥
वायुधानि तदाऽशिक्षत् तदुपाध्यायशासनात् । कुर्वाणो विनयं तस्य भर्तृमित्रोऽवतिष्ठते ॥ ३८ ॥
तत्तपोवनसमीपस्थं पर्यन्तं प्राप्य सर्वदा । नानातरुसमायुक्तं फलपुष्पोपशोभितम् ॥ ३९ ॥
देवतार्चनयोग्यानि फलपुष्पाणि सादरम् । समादाय ददात्यस्मै भर्तृमित्रो दिने दिने ॥ ४० ॥
तेन तत्पर्यन्तस्येदं तत्कालप्रभृति स्फुटम् । चापपर्वदिनं नाम जातं पुष्पादिसंज्ञकम् ॥ ४१ ॥

---

1 पत्रङ्क [illegible], 2 [illegible], 3 [illegible]. 4 [भाव], 5 [वैशाख°].
6 [मार्ग]. 7 [illegible].

तथा पद्मावती चेति नीलोत्पलदलाम्बिका। एता विष्णोर्महादेव्यो भवन्त्यष्टौ कलान्विताः ॥१४॥
चक्रं गदा तथा शक्तिः खड्गो रविमणिः स्फुटम्। शङ्खः शार्ङ्गं हरेः सप्त सन्ति रत्नानि सर्वदा १५
रक्षन्त्यष्टौ सहस्राणि देवीनामस्य योगिनः। रत्नादिकं सदा विष्णोः प्रमादरहितात्मनः ॥ १६ ॥
समस्तयादवैः सार्धं भोगान् भोगीन्द्रसंनिभान्। द्वारवत्यां प्रभुञ्जानः सुखं तस्थौ जनार्दनः ॥१७॥
अन्यदा विहरन् ऋषिः नेमिः केवलसंयुतः। ऊर्जयन्तगिरेस्तुङ्गे शिखरे स्थितवानसौ ॥ १८ ॥
नेमिनाथं समाकर्ण्य दशार्हा यत्र भक्तितः। वासुदेवो बलेनामा वन्दनार्थं समाययुः ॥ १९ ॥
त्रिःपरीत्य समीशानं वन्दित्वा च पुनः पुनः। तदन्ते शुश्रुवुर्धर्मं द्विभेदं यादवाः परम् ॥ २० ॥
बलदेवः समालोक्य वासुदेवस्य संपदम्। पप्रच्छेदं विनीतात्मा नेमिनाथं स कौतुकः ॥ २१ ॥
भगवन् वासुदेवस्य महाराज्यसमागमः। कियन्तं कालमासाद्य भविष्यति वदाशु मे ॥ २२ ॥[1]
निशम्य बलदेवस्य वचनं ससदि स्फुटम्। नेमिनाथो जगादेमं प्रीतिविस्फारितेक्षणम् ॥ २३ ॥
अद्यप्रभृति भूपाल वर्षे द्वादशमात्रके। लोकलक्ष्यसमाकीर्णा नंक्ष्यति द्वारिका पुरी ॥ २४ ॥
एतावति गते काले विष्णोश्चापि महात्मनः। भविष्यति बल क्षिप्रं राज्यलक्ष्मीपरिक्षयः ॥२५॥[2]
निशम्य नेमिचन्द्रस्य वचनं च हितं नृणाम्। बलभद्रो बभाषेमं केवलामललोचनम् ॥ २६ ॥
समस्तजनमुख्याया द्वारवत्या जिनेश्वर। सांप्रतं ब्रूहि मे नाथ विनाशः केन हेतुना ॥ २७ ॥[3]
बलदेवोदितं श्रुत्वा नेमिनाथो जगावमुम्। कादम्बरीनिमित्तेन विनाशोऽस्या भविष्यति ॥ २८ ॥
तथापि बलदेवेन भूयोऽपि च जिनेश्वरः। वद मे द्वारवत्या हि विनाशं को विधास्यति ॥ २९ ॥
बलस्य वचनं श्रुत्वा कौतुकव्याप्तचेतसः। हरिवंशनभश्चन्द्रो नेमिचन्द्रो जगावमुम् ॥ ३० ॥
हिरण्यनाभिपुत्रोऽस्य रोहिण्या हि सहोदरः। मुनिर्द्वीपायनः क्रुद्धः शम्बुवाक्यसमीरणात् ॥ ३१ ॥
कालं कृत्वा पुनः सद्यो धूमकेतुरभिख्यया। अमरोऽग्निकुमाराणां भविष्यति विमोहकः ॥ ३२ ॥
भवन्तौ भ्रातरौ हित्वा सबन्धुपरिवारिकाम्। द्वारिकां धक्ष्यति क्षिप्रं द्वीपायनचरोऽसुरः ॥ ३३ ॥
जरत्कुमारहस्तेन भर्त[4] क्षुरिकयाऽनया। मरणं वासुदेवस्य भविष्यति विसंशयम् ॥ ३४ ॥[5]
नेमिनाथवचः श्रुत्वा वन्दित्वाऽमुं सुभक्तितः। प्रविष्टौ द्वारिकां शीघ्रं सजनौ बलकेशवौ ॥ ३५ ॥
ततो द्वारवतीमद्यं समस्तं नृपवाक्यतः। मुक्तं रेवतकोद्याने कदम्बतरुसंकुले ॥ ३६ ॥
ततो जरत्कुमारोऽपि हित्वा द्वारवतीं पुरीम्। कृत्वा विन्ध्यपुरं तस्थौ विन्ध्यपर्वतमस्तके ॥ ३७ ॥
निखाने[6] मल्लिकाकारां विधाय क्षुरिकामसौ। चिक्षेप वारिधौ क्षिप्रं नानाग्राहसमाकुले ॥ ३८ ॥
पतन्ती वारिधौ सा च मीनेन गिलिता तदा। स मत्स्यो धीवरैर्बद्धो जालेन विधियोगतः ॥३९॥
ततस्तन्मल्लिकाखण्डं काकतालीययोगतः। लब्धं जरत्कुमारेण तन्मत्स्यस्य विदारिते ॥ ४० ॥
द्वीपायनमुनिर्हित्वा सुराष्ट्रविषयं द्रुतम्। पूर्वदेशं जगामासौ तपःशोषितविग्रहः ॥ ४१ ॥
ततो द्वादशवर्षाणि स्थित्वाऽन्यत्र महातपाः। अजानन्नधिकं मासं द्वारिकामाजगाम सः ॥ ४२ ॥
ततो रेवतकोद्यानमध्यस्थे तत्पुरान्तिके। ऊर्ध्वग्रीवनगे योगी तस्थौ प्रतिमया दिने ॥ ४३ ॥
अथ शम्बुकुमारादिकुमाराः समविभ्रमाः। ययू रेवतकोद्यानं क्रीडानिहितमानसाः ॥ ४४ ॥
पीत्वा कादम्बरीतोयं दृष्ट्वा द्वीपायनं पथि। आतापमास्थितं तत्र ध्यायन्तं तत्त्वमादरात् ॥ ४५ ॥
गलन्मायमभापादादिष्टकोपललेष्टुभिः। आपूर्य सुतरां साधुं कुमारा निविशुः पुरीम् ॥ ४६ ॥

---

1 पपत्र पुस्तकमिदम्, 2 पपत्र पुस्तकमिदम्, 3 पपत्र पुस्तकमिदम् 4 [तम्] 5 पपत्र वा पुस्तकमिदम् 6 [विशन्तु].

शुश्रूषन्ति ता भार्याः पश्यन्त्या श्रीकुमारकम् । हतः सागरदत्तोऽयं सुतो नन्देन तत्क्षणे ॥ ६ ॥
नागदत्ताऽपि गोपेन हते सागरदत्तके । स्नेह मुक्त्वा प्रमुग्धाना नन्देन सह तिष्ठति ॥ ७ ॥
शुश्रूषां सततं चक्रे श्रीकुमारः स्वमातरि । उक्तोऽथ जननया नन्दस्तन्मूर्तिं प्रति क्रुध्या ॥ ८ ॥
मत्सुतं श्रीकुमाराख्यं मन्महादेवपरिषम् । निपातय प्रिय क्षिप्रं निलयं कूपवेश्मम् ॥ ९ ॥
नागदत्तावचः श्रुत्वा नन्दगोपोऽपि तत्स्मृतिम् । चिन्तयन् सर्वदा कुत्र तिष्ठति क्रूरमानसः ॥१०॥
श्रीकुमारं पुरस्कृत्य यावद्गच्छति गोधनम् । तावत् स्वभगिनी वार्तामिमामस्य ब्रवीति सा ॥११॥
स्वपिताऽनेन गोपेन निहतो निशि बान्धव । अधुना निश्चितं पापो मारयं ते विधास्यति ॥१२॥
श्रुत्वा वा पश्चिमे यामे विभावर्या प्रयत्नतः । श्रीकुमारोऽपि संतस्थे मूलकेऽन्यत्र सुखंकर ॥१३॥
तन्मार्गेणैव संप्राप्य नन्दगोपोऽपि सत्वरम् । स्थाणुं जघान खड्गेन श्रीकुमारेच्छया खलः ॥ १४ ॥
तेनापि श्रीकुमारेण गृह्यमाणो समेत्य सः । हत्वा प्रासेन नन्दोऽयं धरायां विनिपातितः ॥ १५ ॥
गर्तं निहत्य तं नन्दं श्रीकुमारोऽपि वेगतः । आदाय गोधनं शीघ्रं स्वगृहं पुनरागतः ॥ १६ ॥
श्रीकुमारोऽपि संपृच्छ्यमानो नागदत्तया । नन्दस्त्वदन्तिकं पुत्र प्रेषितो मे न वर्तते ॥ १७ ॥
निशम्य जननीवाक्यं श्रीकुमारेण भाषितम् । नाहं वेद्मि तकं नन्द प्रासं पृच्छ त्वमम्बिके ॥१८॥
तदाकर्ण्य समालोक्य प्रासं च रुधिराक्तकम् । निहतोऽनेन मे कान्तो नागदत्ता रुषं ययौ ॥१९॥
श्रीकुमारं समालोक्य सनिद्रं पल्यङ्के । मुसलेन समाहत्य नागदत्ता ममार तम् ॥ २० ॥
निहतं भ्रातरं दृष्ट्वा श्रीषेणाऽपि तत्सुता । ममार मातरं कोपान्मुसलेन निहत्य सा ॥ २१ ॥
नागदत्ताऽपि सा दुष्टा पतिपुत्रविनाशिनी । स्वसुतानिहता कोपात् संभ्रमीति भवार्णवे ॥ २२ ॥

॥ इति श्रीस्पर्शनेन्द्रियार्थं नन्दगोपसमासक्तनागदत्ताकथानकमिदम् ॥११७॥

*

११८ द्वीपायनकथानकम् ।

सुराष्ट्रविषये रम्ये पुरग्रामादिसंपदा । बभूव वारिमध्यस्था नाम्ना द्वारवती पुरी ॥ १ ॥
मणिकुट्टिमसद्भित्तिस्वर्णप्राकारराजिता । नवयोजनविस्तीर्णा दैर्घ्ये द्वादशयोजनैः ॥ २ ॥
महारत्नविनिर्माणा महागोपुरगोपुरा । द्वाराणि पश्चिमादीनि चतुर्दिक्षु स्थितानि च ॥ ३ ॥
मणिकाञ्चननिर्माणाः प्रासादा गगनस्पृशः । तस्यां वसन्त्यसंख्याताः श्रेष्ठिनां कुलकोटयः ॥ ४ ॥
युधिष्ठिरादिसदृशा लोकपालसमप्रभाः । वसन्ति स्म तदा तस्यां दशार्हा दश शोभनाः ॥ ५ ॥
तन्मध्ये प्रथमः सारः समुद्रविजयो महान् । बभूव तन्महादेवी शिवाख्या शिवविग्रहा ॥ ६ ॥
नन्दनो नेमिनाथोऽभूत्तयोर्गुणसागरः । दीक्षामादाय जैनेन्द्रीं केवली विजहार सः ॥ ७ ॥
तन्मध्ये दशमोऽस्मिं च वसुदेवोऽभवन्नृप । रोहिणी तन्महादेवी बलदेवोऽनयोः सुतः ॥ ८ ॥
तथाऽयं वसुदेवस्य देवकीकुक्षिसंभवः । नवमो वासुदेवोऽभून्नन्दनः स जनार्दनः ॥ ९ ॥
बभूवुर्यदुभूपानां सहस्राणि दश स्फुटम् । बलादिकुमाराः स्युः पञ्चाशत्सहस्रकाः ॥ १० ॥
रूपयौवनयुक्तानां जनार्दनहिताश्रयाम् । अर्धाष्टकोटयः सन्ति यादवानां महात्मनाम् ॥ ११ ॥
रमणीनां सहस्राणि षोडशास्य महात्मनाम् । नृपतीनां च तावन्ति मुकुटांशुविराजिनाम् ॥ १२ ॥
रुक्मिणी सत्यभामा च तथा जाम्बवती परा । सुसीमा लक्ष्मणा गौरी गान्धारी चारुविभ्रमा ॥१३॥

---

1 पश्यन्त्या पुत्रकम्. 2 ॥ नन्द तत्सुतिः. 3 All the Mss. put No. 116 4 पश्यन्त्या श्रीकुमारकम्.

तथा पद्मावती चेति नीलोत्पलदलाम्बिका। एता विष्णोर्महादेव्यो भवन्त्यष्टौ कलयाऽन्विताः ॥१४॥
चक्रं गदा तथा शक्तिः खड्गो रत्नमणिः स्फुटम्। शङ्खः शार्ङ्गं हरेः सप्त सन्ति रत्नानि सर्वदा १५
रक्षन्त्यष्टौ सहस्राणि देवीनामस्य योगिनः। रक्षादिकं सदा विष्णोः प्रमादरहितात्मनः ॥ १६ ॥
समस्तयादवैः सार्धं भोगान् भोगीन्द्रसंनिभान्। द्वारवत्यां प्रभुञ्जानः सुखं तस्थौ जनार्दनः ॥१७॥
अन्यदा विहरन् सोऽपि नेमिः केवलसंयुतः। ऊर्जयन्तगिरेस्तुङ्गे शिखरे स्थितवानसौ ॥ १८ ॥[1]
नेमिनाथं समाकर्ण्य दशार्हा दश भक्तितः। वासुदेवो बलेनामा वन्दनार्थं समाययुः ॥ १९ ॥
त्रिःपरीत्य तमीशानं वन्दित्वा च पुनः पुनः। तदन्ते शुश्रुवुर्धर्मं द्विभेदं यादवाः परम् ॥ २० ॥
बलदेवः समालोक्य वासुदेवस्य संपदम्। पप्रच्छेदं विनीतात्मा नेमिनाथं स कौतुकः ॥ २१ ॥
भगवन् वासुदेवस्य महाराज्यसमागमः। कियन्तं कालमासाद्य भविष्यति वदाशु मे ॥ २२ ॥[2]
निशम्य बलदेवस्य वचनं संशयं स्फुटम्। नेमिनाथो जगादेदं प्रीतिविस्फारितेक्षणम् ॥ २३ ॥
अद्यप्रभृति भूपाल वर्षे द्वादशमासके। लोकद्रव्यसमाकीर्णा नङ्क्ष्यति द्वारिका पुरी ॥ २४ ॥
एतावति गते काले विष्णोश्चापि महात्मनः। भविष्यति बल क्षिप्रं राज्यलक्ष्मीपरिक्षयः ॥२५॥[3]
निशम्य नेमिचन्द्रस्य वचनं च हितं नृणाम्। बलभद्रो जगादेदं केवलामललोचनम् ॥ २६ ॥
समस्तजनमुक्तायाः द्वारवत्या जिनेश्वर। सांप्रतं ब्रूहि मे नाथ विनाशः केन हेतुना ॥ २७ ॥[4]
बलदेवोदितं श्रुत्वा नेमिनाथो जगावमुम्। कादम्बरीनिमित्तेन विनाशोऽस्या भविष्यति ॥ २८ ॥
अथापि बलदेवेन भूयोऽपि च जिनेश्वरः। वद मे द्वारवत्या हि विनाशं को विधास्यति ॥ २९ ॥
बलस्य वचनं श्रुत्वा कौतुकव्याकुलचेतसः। हरिवंशनभश्चन्द्रो नेमिचन्द्रो जगावमुम् ॥ ३० ॥
हिरण्यनाभिपुत्रोऽस्य रोहिण्या हि सहोदरः। मुनिर्द्वीपायनः क्रुद्धः शम्बुवाक्यसमीरणात् ॥ ३१ ॥
कालं कृत्वा पुनः सद्यो धूमकेतुरभिख्यया। अमरोऽग्निकुमाराणां भविष्यति विमोल्बणः ॥ ३२ ॥
भवन्तौ भ्रातरौ हित्वा सबन्धुपरिवारिकाम्। द्वारिकां धक्ष्यति क्षिप्रं द्वीपायनचरोऽसुरः ॥ ३३ ॥
जरत्कुमारहस्तेन सर्वं क्षुरिकयाऽनया। मरणं वासुदेवस्य भविष्यति विसंशयम् ॥ ३४ ॥
नेमिनाथवचः श्रुत्वा वन्दित्वाऽर्हं सुभक्तितः। प्रविष्टौ द्वारिकां शीघ्रं सजनौ बलकेशवौ ॥ ३५ ॥
ततो द्वारवतीमद्यं समस्तं नृपवाक्यतः। मुक्तं रैवतकोद्याने कदम्बतरुसंकुले ॥ ३६ ॥
ततो जरत्कुमारोऽपि हित्वा द्वारवतीं पुरीम्। कृत्वा विन्ध्यपुरं तस्थौ विन्ध्यपर्वतमस्तके ॥ ३७ ॥
निशान्ते मल्लिकाकारं विधाय क्षुरिकामसौ। चिक्षेप वारिधौ क्षिप्रं नानाग्राहसमाकुले ॥ ३८ ॥
पतन्ती वारिधौ सा च मीनेन गिलिता तदा। स मत्स्यो धीवरैर्बद्धो जालेन विधियोगतः ॥३९॥
ततस्तत्क्षुरिकाखण्डं काकतालीययोगतः। लब्धं जरत्कुमारेण तच्छरस्य निविष्टवे ॥ ४० ॥
द्वीपायनमुनिर्हित्वा सुराष्ट्रविषयं द्रुतम्। पूर्वदेशं जगामासौ तपःशोषितविग्रहः ॥ ४१ ॥
ततो द्वादशवर्षाणि स्थित्वाऽन्यत्र महातपाः। अज्ञानादधिके मासे द्वारिकामाजगाम सः ॥ ४२ ॥
ततो रैवतकोद्यानमध्यस्थे तत्पुरान्तके। ऊर्ध्वग्रीवनगे योगी तस्थौ प्रतिमया दिने ॥ ४३ ॥
अथ शम्बुकुमारादिकुमाराः समविभ्रमाः। ययू रैवतकोद्यानं क्रीडानिरतमानसाः ॥ ४४ ॥
पीत्वा कादम्बरीतोयं दृष्ट्वा द्वीपायनं पथि। आतापमास्थितं तत्र ध्यायन्तं तत्त्वमादरात् ॥ ४५ ॥
गलप्रमाणमापादाद्दिष्टकोपललोष्टुभिः। आपूर्य सुतरां सायं कुमारा विविशुः पुरीम् ॥ ४६ ॥

---

1 पफज सुयलमिरम्, 2 पफज सुयलमिरम्, 3 पफज सुयलमिरम्, 4 [जय] 5 पफज मद्दःमुम्मसिरम्, 6 [विदास्य].

तद्वृत्तान्तं परिज्ञाय तदानीं बल-केशवौ । द्वीपायनमुनेः पार्श्वं जग्मतुस्त्रस्तचेतसौ ॥ ४७ ॥
विपरीतं प्रणम्यैतावूचतुर्मुनिसत्तमम् । महामुने कुमारेभ्यः क्षम्यतां दुरनुष्ठितम् ॥ ४८ ॥
निशम्य तद्वचः साधुर्निष्ठुरीभूतमानसः । अङ्गुलीद्वयमुत्क्षिप्य जातः पूर्वोदितोऽसुरः ॥ ४९ ॥
प्राप्तस्य पञ्चतापाग्निं द्वीपायनमुनेस्तदा । प्रविष्टौ विह्वलस्वान्तौ द्वारिकां बल-केशवौ ॥ ५० ॥
विभङ्गज्ञानतो ज्ञात्वा स्वं कुमारहतं तदा । ददाह द्वारिकां सर्वां दितिजोऽसौ बल-केशवौ ॥ ५१ ॥
दग्धे निर्गत्य तौ वेगात् ततो द्वारवतीपुरात् । उत्तीर्य नर्मदां प्राप्तौ गहनं बल-केशवौ ॥ ५२ ॥
कौशाम्बवनमध्यस्थ विष्णोः पादहतस्य च । मृतिर्जरत्कुमारेण पूर्वभक्तिक्रिया कृता ॥ ५३ ॥
षण्मासमात्रकं यावत् स्कन्धेन वहनं हरेः । बलदेवेन देवेन बोधितेन भयक्षतः ॥ ५४ ॥
दीक्षामादाय जैनेन्द्रीं तुङ्गिकाख्यगिरौ बलः । सहेत्वरां विपाकाप्तो ब्रह्मलोकं जगाम सः ॥ ५५ ॥

॥ इति श्रीशाम्बकुमारादिकुमारोपद्रुतकोपविधानसंयुक्तमुनिद्वीपायनकथानकमिदम् ॥ ११८ ॥

*

११९ सगरपुत्रकथानकम् ।

विनीताख्यमहादेशे विनीता विद्यते पुरी । तीर्थेऽजितजिनेन्द्रस्य सगरोऽस्यां महीश्वरः ॥ १ ॥
अन्तःपुरसहस्राणि सन्ति षण्णवतिः स्थितौ । चतुर्दशास्य रत्नानि निधिभिर्नवभिः सह ॥ २ ॥
दिव्या चमूर्वरं भोज्यं दिव्यान्याभरणानि च । शय्यासने मनोहारि वाहनं नाटकं पुरम् ॥ ३ ॥
एतैर्दशभिरेतस्य सम्राजस्य महात्मनः । दशाङ्गोऽयं महाभोगो मनोनयनसुन्दरः ॥ ४ ॥

तथा चोक्तम्—

भाजनं भोजनं शय्या चमूर्वाहनमासनम् ।
निधिरत्नं पुरं नाट्यं भोगस्तस्य दशात्मकः ॥ ५ ॥

यस्य षष्टिसहस्राणि पुत्राणां परमौजसाम् । सदा याचयमानानां पितरं शासनं गुरुम् ॥ ६ ॥
कदाचिच्छासनं दत्तमिदं तेषां महात्मनाम् । रूपयौवनयुक्तानां सारं समरवर्जितम् ॥ ७ ॥
कैलासपर्वते सन्ति भवनानि जिनेशिनाम् । चतुर्विंशतिसंख्यानि कृतानि मणिकाञ्चनैः ॥ ८ ॥
सुरासुरनराधीशैर्वन्दितानि दिवानिशम् । यास्यन्ति दुःषमे काले नाशं तस्करकादिभिः ॥ ९ ॥
तस्मादुत्खातिकां सारां विधातुं सकलामपि । गत्वाऽस्य पर्वते पुत्राः शीघ्रं कुरुत भास्वराम् ॥ १० ॥
पितुराज्ञां परिप्राप्य कैलासं समनुत्तमम् । प्रापुः क्षणेन गर्वेण कृतक्रोधाऽऽकुलात्मना ॥ ११ ॥
यावत् खनन्ति ते शैलं रत्नदण्डेन सत्वरम् । तावदेकः स्थितो देवो दिवि वारयतीत्यमून् ॥ १२ ॥
भो भो राजसुत त्वं खन तत्र नगोपरि । मा विनाशय भूतात्मन् रत्नदण्डेन मद्गृहम् ॥ १३ ॥
एवमुक्तास्तथाऽप्येते देवेन स्वरनादिना । खनन्ति रत्नदण्डेन पर्वतं मानशालिनः ॥ १४ ॥
भीमं भगीरथं हित्वा दृष्टिविषविषेण ते । भस्मसात्तावदानीता दर्पेण स्वरभीभुपा ॥ १५ ॥
तदभौ दीनचेतस्कौ संप्राप्तौ चक्रिणः सभाम् । जानुविन्यस्तमूर्धानौ दृष्ट्वा भीम-भगीरथौ ॥ १६ ॥
विद्युद्विलसचञ्चल्यं जीवितं देहिनामिदम् । कदलीगर्भनिःसारं यौवनं रूपसंपदम् ॥ १७ ॥
संध्यारागसमा प्रीतिर्बन्धुभिः सह सर्वदा । भोगीभोगसमान् भोगान् भीमाकारकपालिनः ॥ १८ ॥

मत्वेदं सकलं फल्गु दत्त्वा पौत्राय संपदम् । भागीरथ्यभिधानाय समस्तजनसाक्षिकम् ॥ १९ ॥
आपृच्छ्य सकलान् बन्धून् म्लानवक्त्रसरोरुहान् । संप्राप्य तरसा तत्र अमरोपपदं वनम् ॥ २० ॥
सर्वभूतहितं नत्वा सर्वभूतहितं गुरुम् । जग्राह सगरो दीक्षां समं भीमेन सूनुना ॥ २१ ॥
विज्ञायागमसद्भावं हितं साधुजनाश्रितम् । तदा तप्त्वा तपो घोरं सामान्यनरदुष्करम् ॥ २२ ॥
निहत्याशेषकर्माणि शत्रुभूतानि देहिनाम् । भीमेन सह संप्राप सगरो मोक्षमक्षयम् ॥ २३ ॥
॥ इति [1]श्रीमानावठ्ठपुत्रसगरचक्रवर्तिषष्टिसहस्रपुत्रकथानकमिदम् ॥ ११९ ॥

*

१२० कुम्भकारकथानकम् ।

मगधाख्यमहादेशे बृहद्ग्रामो महाधनः । कुम्भकारोऽभवत् तत्र सिंहोपपदो बलः ॥ १ ॥
कुम्भकारो वृषं भृत्वा भाण्डकानां निरन्तरम् । भरणोपपदं ग्रामं समापत् खिन्नमानसः ॥ २ ॥
ततोऽस्तमनवेलायां ग्रामान्तर्निवासाय च । भाण्डकानि विचित्राणि तत्रस्थः स विक्रिणते ॥ ३ ॥
आकर्ण्य भाण्डकी वार्ता ग्रामस्थास्तत्र योषितः । भो मूल्यं ते प्रदास्यामो गृहीत्वा भाण्डकानि वा ॥४॥
एवमुक्त्वा तकं तस्मात् प्रीतिविस्फारितेक्षणाः । निजं निजं गृहं प्राप्ता हसन्त्यः कृतविस्मयाः ॥५॥[4]
वृषभं क्षेपभाण्डानि स्थापयित्वा तदन्तिके । नगर्यां निवसद् यावत् कुम्भकारो विनिद्रिते ॥ ६ ॥
तत्काले प्राप्य सामर्थ्यं केचिद् ग्रामसंभवाः । कुमाराः कुम्भकारेण गीतं यस्य च कुर्वते ॥ ७ ॥
अन्ये यदि स्थिताः केचित्तदा तत्कुम्भमाश्रिताः । गृहीत्वा तद् वृषं शीघ्रं जग्मुर्मुदितमानसाः ॥८॥
कुम्भकारोऽपि तां रात्रिं गमयित्वा सुखं स्थितः । अपश्यद् वृषभं तत्र ग्राममध्यं जगाम सः ॥ ९ ॥
भाण्डकानां च तन्मूल्यं वृषभं स गृहे गृहे । याचते योषितो याव मिथ्याभावप्रवादकाः ॥१०॥
स्थिताश्च सप्तवर्षाणि कुम्भकारो रुषान्वितः । निनाय भस्मसाद्भावं तं ग्रामं धान्यसंभृतम् ॥११॥
स्वधर्मस्य परधर्मस्य कुण्ठनेह दुर्धिया । नाशः कृतस्तथा नैव कर्तव्यः सुधिया सदा ॥ १२ ॥
॥ इति श्रीबृहद्ग्रामसंभवसिंहबलकुम्भकारकथानकमिदम् ॥ १२० ॥

*

१२१ मृगध्वजकथानकम् ।

विनीताख्यमहादेशे साकेताख्याऽभवत् पुरी । तस्यां सीमंधरो राजा जिनसेनाऽस्य कामिनी ॥१॥
तनयो रूपसंपन्नः कुमारोऽभून्मृगध्वजः । मन्त्री सिद्धार्थसंपन्नः सिद्धार्थो भुवि विश्रुतः ॥ २ ॥
तस्यैव भूपतेः श्रेष्ठी धनधान्यसमन्वितः । वृषभोपपदः सेनः प्रसिद्धः सर्वविष्टपे ॥ ३ ॥
श्रेष्ठिनोऽस्याभवद् भार्या रूपसौभाग्यसंपदा । जयश्रीरिति विख्याता गुणपक्षत्रभासिता ॥ ४ ॥
श्रेष्ठिनश्चारुरूपाणि बहुदुग्धप्रदान्यलम् । महिषीणामनेकानि सन्ति यूथानि तस्य च ॥ ५ ॥
तन्मध्ये च महिष्यौ द्वे प्रधाने भवतस्तराम् । सुभद्रा प्रथमा साध्वी भद्राऽन्या परिकीर्तिता ॥६॥
महिष्योरनयोरत्र बभूव प्रेमकारणम् । अभूतां रक्षपालौ द्वौ वृषभौ स्नेहसंगतौ ॥ ७ ॥
एकस्य नाम गोविन्दो द्वितीयस्य च वामनः । एकत्र मिलितावेतौ तिष्ठतो हि दिवानिशम् ॥ ८ ॥
वृषभद्वयमिदं स्पष्टं महिषीणां दिने दिने । अन्योन्यप्रेमसंबन्धं परमैकत्र तिष्ठति ॥ ९ ॥
ततो गोविन्दनामासौ स्वयूथं वामनस्य च । समभ्य यतनो यातः स्वगृहं कारणेच्छया ॥ १० ॥

---

1 पधज्ञ बद्धकमिदम्. 2 ['अथयत्स्थापर']. 3 ज्ञ बकमाडि 4 पधज्ञ दुग्धमिदम्.

महिषीमूषयोर्मध्ये द्वयोरपि तदा पुनः । एकत्र समये सुता सुभद्रा भद्रया समम् ॥ ११ ॥
कृतः पुरात् समागत्य वेगेनागत्य कानने । सुभद्रापठको बालो गोविन्देन प्रभक्षितः ॥ १२ ॥
हतो हतोऽमुनानेन विधिना पठकः शुकः । सुभद्रायाः पठरे बालः सप्तकृत्वो वराककः ॥ १३ ॥
जातो जातो वराकोऽसौ सप्तकृत्वस्ततो वने । हत्वा हत्वाऽतिपापेन गोविन्देन प्रभक्षितः ॥१४॥
यथाऽप्यष्टमवेलायामसौ तत्कुक्षिमाश्रितः । हित्वा सा महिषी यूथं प्रसूताऽन्यत्र पङ्ककम् ॥१५॥
गोविन्देन परिज्ञाय सुभद्राप्रसवं पुनः । अनुमार्गेण संप्राप्य दृष्टा सा पट्टकाऽन्विता ॥ १६ ॥
दृष्ट्वाऽमुं पड्डिकं दूराद् गोविन्दं भयवेपितः । तत्सन्मुखं स संप्राप्य ननाम नतमस्तकः ॥१७॥
स्वपादप्रपतं दृष्ट्वा पड्डकं भयविह्वलम् । गोविन्दोऽपि जगौ वत्स मा भयं व्रज सांप्रतम् ॥ १८ ॥
ततो जातिस्मरो भूत्वा पड्डको विनयान्वितः । गोविन्देन सहायातो महिषीयूथमादरात् ॥ १९ ॥
रूपमादिक्षसेनस्य श्रेष्ठिनः पादयोरयम् । पट्टकः पतितः शीर्षं गोविन्दवचनेन च ॥ २० ॥
चरन्तं तं समादाय तोषपूरितमानसः । साकेताख्यपुरं श्रेष्ठी विवेश परमोत्सवम् ॥ २१ ॥
आस्थानमण्डपस्थस्य श्रेष्ठिवाक्येन वेगतः । सीमंधरनरेन्द्रस्य प्रणामो विहितोऽमुना ॥ २२ ॥
स्वपादप्रणतं दृष्ट्वा चरन्तं धरणीपतिः । सर्वासमेषु चैकैकं धान्यमासं स मुक्तवान् ॥ २३ ॥
विविधान्न प्रविष्टस्य निरतो प्रीतचेतसः । नकुलप्रियचरन्तस्य सुखेन वसतः पुरे ॥ २४ ॥
इन्यः श्रेष्ठितनूजोऽपि नकुलाख्योऽत्र चौरिकम् । कुर्वन् चतुष्पथस्य पदस्थितिं व्यधात् ॥ २५ ॥
ततो जनापवादोऽस्य संजातो नकुलस्य च । चौरिका विहिताऽनेन नकुलेन निरंतरम् ॥ २६ ॥
ततः श्रेष्ठिसुतस्तेन लोहपिण्डं खरागिना । नकुलाख्यस्य संतप्तं मुखे पक्कुलेन च ॥ २७ ॥
नकुलाख्यो चरन्तोऽयं स्वस्थतामधमानसः । हन्वैरादाय तं पिण्डं जगाम नृपसंनिधिम् ॥ २८ ॥
तद्वृत्तं समालोक्य महिषं नृपविस्मयात् । सम्यान् जगाद संतुष्टः सभामध्ये निवासिनः ॥ २९ ॥
यदो सम्या चरन्तोऽयं दोषवर्जितविग्रहः । विराजते वरां लोके महिषो भद्रपूर्वकः ॥ ३ ॥
अन्यदा विचरन् क्वापि महिषो भद्रपूर्वकः । अशोकवनमध्यस्थे वाटसुन्दरिवीथठे ॥ ३१ ॥
विचित्रपरसंयुक्ते रक्तोत्सवविराजिते । संक्रीडते वरां दृष्टः कलगुञ्जनलोककरैः ॥ ३२ ॥
श्रेष्ठिमणिमुतैः सार्धं तदशोकवने परम् । आजगाम मुदा रन्तु सानुरागो नृपनन्दनः ॥ ३३ ॥
दृष्ट्वाऽमुं महिषं तत्र क्रीडन्तं निश्चलीकृत्य । सचपमुकोप दुष्टात्मा रक्ताशोऽयं नृगम्भव ॥ ३४ ॥
समकर्णनिमित्तेन महिषस्यास्य पश्चिमम् । छित्त्वोरुमानय क्षिप्रं भवन्तो नरकुमार ॥ ३५ ॥
तद्वाक्येन समुत्क्षिप्तो नरेपानेन तत्र च । पादत्रयेण संप्राप्य नृपान्त्य महिषोऽपतत् ॥ ३६ ॥
विलोक्य महिषं राजा मर्तुकामं समान्तरे । सल्लेखनां ददावस्मै नमस्कारपुरस्सरम् ॥ ३७ ॥
समाधिमरणं प्राप्य महिषो भद्रपूर्वकः । सौधर्मे धर्मसंयोगाज्जातो देवो महर्द्धिकः ॥ ३८ ॥
तद्वृत्तान्तं परिज्ञाय मन्त्री सिद्धार्थनामकः । राज्ञा संप्रेषितः कोपात् तत्कुमारवधं प्रति ॥ ३९ ॥
ततस्ते मन्त्रिणा सर्वे कुमारा राजपुत्रकाः । मुनिसद्धान्तिकं नीता दीक्षितास्ते यथाक्रमम् ॥ ४० ॥
तापसिता च तदीक्षा मन्त्री राजान्तिकं गतः । प्रोक्तोऽयं भूभुजा रोषात् सर्वे ते निहितास्त्वया ॥४१॥
उक्तस्तद्वाक्यतो राज्ञा मन्त्रिणा कुण्ठेन च । राजन् मया वने सर्वे कुमारा मुक्ता ध्रुवम् ॥४२॥
राज्ञा तद्वाक्यतो मन्त्री भूयोऽपि गदितो रुषा । मन्त्रिन् राजकुमारास्ते कथं सुनिहितास्त्वया ॥४३॥

क्षाम्यतोऽमुना स्थातं तद्गतध्यानं सदा । मृगध्वजस्य कैवल्यं नरेन्द्रस्य सभान्तरे ॥ ४४ ॥
मृगध्वजस्य कैवल्ये संजाते सति सत्वरम् । आजगाम तदन्ते च सीमंधरनरेश्वरः ॥ ४५ ॥
ततो मयूरवरन्तस्य संन्यासे विहिते सति । अमरत्वे तदा क्षिप्रं देवागमनकारणम् ॥ ४६ ॥
नत्वा केवलिनः पादौ श्रुत्वा धर्मं तदन्तिकम् । सीमंधरनरेन्द्रोऽसौ पप्रच्छेद् कुतूहली ॥ ४७ ॥
मृगध्वजवरन्तस्य पित्रादेरस्य च पावन । ब्रूहि मे वैरसंबन्धं संसारार्णवकारणम् ॥ ४८ ॥
ततोऽश्वग्रीवसंबन्धं सेनापत्यादिकं तथा । जगाद केवली सर्वं सीमंधरमहीभृते ॥ ४९ ॥
श्रुत्वा तद्वैरसंबन्धं सीमंधरनृपादयः । बभूवुः श्रावका भव्याः सम्यक्त्वाभरणप्रभाः ॥ ५० ॥

॥ इति श्रीमहासोमसमन्वितमृगध्वजराजकथानकमिदम् ॥ १२१ ॥

•

१२२ कार्तवीर्यकथानकम् ।

विनीताविषये रम्ये कोशलाख्यपुरीमध्ये । तीर्थे श्रीवासुपूज्यस्य कार्तवीर्यो नृपोऽभवत् ॥ १ ॥
प्रबुद्धपद्मसद्वक्त्रा पद्मपाणिपदद्वया । बभूव तन्महादेवी चार्वी पद्मावती प्रिया ॥ २ ॥
अयोध्याख्यपुरीपार्श्वे नानानोकुहसंकुले । तापसस्याभवत् पल्ली महावनसमुद्भवा ॥ ३ ॥
बभूव तापसस्तत्र यमदग्न्यभिधानकः । तत्प्रिया तापसी नाम रेणुका तन्मनःप्रिया ॥ ४ ॥
श्वेतोपपदको रामो माहेन्द्रोपपदोऽपि च । अभवत् तत्सुतः कान्तो बटुवल्कलभासुरः ॥ ५ ॥
अन्यदा वरदत्ताख्यो विहरन् कुं महामुनिः । तत्तापसाश्रमान्तेऽसौ तस्थौ तत्पल्ले सुधीः ॥ ६ ॥
तदन्ते रेणुका श्रुत्वा जैनं धर्ममनुत्तरम् । संजाता श्राविका हृद्या सम्यग्दर्शनलम्भतः ॥ ७ ॥
रेणुकायै स योगीन्द्रो भगिनीस्नेहतो मुदा । कामधेनुं ददावस्यै परशुविद्यां विधाय च ॥ ८ ॥
अन्यदा कार्तवीर्योऽरं हस्तिबन्धनकारणात् । आजगाम वनं राजा यमदग्निनिषेवितम् ॥ ९ ॥
यमदग्निगृहे भुक्त्वा रेणुकाकृतभोजनम् । कामधेनुं समादाय लोभतोऽसौ गृहं ययौ ॥ १० ॥
समित्भारं समादाय वनात् संप्राप्य मन्दिरम् । रेणुकां शोकसंतप्तां दृष्ट्वासौ भयोऽपि ताम् ॥ ११ ॥
श्वेतरामो विलोक्यैनां मातरं पुरतः स्थिताम् । जगादेति वचो मातर्दुःखिनी किं वदाशु मे ॥ १२ ॥
निशम्य तद्वचो माता जगादेवं विषादिनी । पुत्र मन्मन्दिरं राजा कार्तवीर्यः समागतः ॥ १३ ॥
मद्गृहे भोजनं कृत्वा सुखं स्थित्वाऽत्र पुत्रक । बलात्कारेण तामेव कामधेनुं ययौ पुरीम् ॥ १४ ॥
अनेन हेतुना पुत्र दुःखसंततमानसा । तिष्ठाम्यत्र वने भीमे सामर्थ्यपरिवर्जिता ॥ १५ ॥
निशम्य जननीवाक्यं तन्मार्गेण रुषान्वितः । तदानीं प्रस्थितो गन्तुं कामधेनुकृते ततः ॥ १६ ॥
प्रस्थितो प्रस्थितो गन्तुं श्वेतरामं जगौ पिता । कार्तवीर्यो महावीर्यस्त्वया जेतुं न शक्यते ॥ १७ ॥
यदि तथानुमार्गेण त्वं गच्छसि बलीयसः । स्वजनन्या वितीर्णेयं विद्या परमयोगिना ॥ १८ ॥
असाध्यां देवदानवानां सर्वशत्रुक्षयंकरीम् । परशुं च महाविद्यां गृहीत्वा याहि तं प्रति ॥ १९ ॥
पितृवाक्येन चादाय परशुं शत्रुभीतिदम् । श्वेतरामो ययौ पश्चात् कार्तवीर्यस्य भूभुजः ॥ २० ॥
श्वेतरामेण संप्राप्य कार्तवीर्यो महाहवे । ससैन्यः सकुटुम्बस्तेन परशुना हतो रुषा ॥ २१ ॥
कार्तवीर्यो हतोऽनेन श्वेतरामेण संगतः । असह्यवेदनं घोरं जगाम नरकं सतः ॥ २२ ॥
ततो निःक्षत्रियं कृत्वा सप्तकृत्वो धरातलम् । परशुपदो रामो बभूव स महीपतिः ॥ २३ ॥

---

1 पद्मक कुम्भमिदम्, [illegible] प
निःक्षत्रियम्, 6 [हतः परशुना रुषा]

अथ नैमित्तिकोऽप्राक्षि सुखदानेन पराक्रमम् । अधुना मरणं कस्माद् भविष्यति वदाशु मे ॥२४॥
निशम्य स्वरूपतः क्षिप्रं जगौ नैमित्तिकोऽपि तम् । समस्तक्षत्रियाख्यार्णं मरणाशङ्किमानसम् ॥ २५ ॥
भाजने भोजनं क्षिप्रं पायसं यस्य जायते । नियतं ते महीपाल वधकः स भविष्यति ॥ २६ ॥
एवं नैमित्तिकादेशाद् भोजनं भाजनेषु च । दीयतेऽहर्निशं यस्मात् क्षत्रियाणां हि तज्जनैः ॥२७॥
अत्रान्तरे सुभूमस्य भोजनं भाजने स्थिते । स्थितं नराधिपाध्यक्ष जातं तत्पायसं द्रुतम् ॥ २८ ॥
परश्वधपदं रामे रणे हत्वाऽक्षिपात्मने । सुभूमोऽयं बभूवाशु चक्रवर्ती हताहितः ॥ २९ ॥
सुभूमेन च तस्मादेकविंशतिवारकम् । पृथिवीमण्डलं सर्वं कृतं ब्राह्मणवर्जितम् ॥ ३० ॥

॥ इति श्रीयमदग्नितापससुतपरशुरामनिधनीकृतकार्तवीर्यनृप
कथानकमिदम् ॥ १२२ ॥

*

१२३ सिंहकेसरकथानकम् ।

दक्षिणापथदेशेऽस्ति धनधान्यसमाकुलम् । पुरमिन्द्रपुराकारं पञ्च किंशुकादिकम् ॥ १ ॥
नृपोऽत्र विजयादित्यो यशान्वीतो बलमानिकः । प्रियाऽस्य विजयादित्या बभूव वनितोत्तमा ॥ २ ॥
अभवत् सेवकस्तस्य सिंहविक्रमपण्डितः । मन्यमानो नरं लोकं सिंहकेसरनामकः ॥ ३ ॥
अन्यदाकर्ण्य तं तत्र महाभद्रपुरःसरम् । आजगाम तदभ्यासं सिंहकेसरकोऽपरः ॥ ४ ॥
पुरे पद्मरथस्य निजनामनिमित्तकम् । द्वयोर्मर्त्ययोस्तत्र संजातं परमं रणम् ॥ ५ ॥
युद्धं प्रकुर्वतोस्तत्र द्वयोरपि परस्परम् । खड्गधेनुसमाघातवर्णनिःसृतरक्तयोः ॥ ६ ॥
द्वितीयमर्त्यकेनास्य सिंहकेसरकस्य च । मुक्तं विपाटितं तेन करवालक्रिया द्रुतम् ॥ ७ ॥
अभवाळं विनिःक्रान्तं शरीरं बलान्तरात् । पद्मपुष्पसंकाशं प्रगळकोटितोत्करम् ॥ ८ ॥
वामहस्तेन तद्धृत्वा फरकं च प्रक्षिप्य मम । असिधेनुं समादाय दक्षिणेन हि पाणिना ॥ ९ ॥
गुञ्जाफलसमानाक्ष संदष्टदशनच्छद । दधाव कोपतो वेगात् द्वितीयं सिंहकेसरम् ॥ १० ॥
इन्दीवरसमानाभकरवाल्याऽसिधेनुया । तत्सन्मुखं परिप्राप्य जठरं तेन पाटितम् ॥ ११ ॥
ततोऽत्र तत्र पातितो द्वितीयः सिंहकेसरः । स्थितोऽग्रे पञ्चत्वं प्राप्तः प्रथमः सिंहकेसरः ॥ १२ ॥
प्रशंसितो भटैः सर्वैः समस्तेन जनेन च । रम्यो बलपराजेन प्रथमः सिंहकेसरः ॥ १३ ॥

॥ इति श्रीमहाशूरमल्लसिंहकेसरकथानकमिदम् ॥ १२३ ॥

*

१२४ नीलसिंहकथानकम् ।

दक्षिणापथदेशेऽस्त्युत्तमं च कलापुरम् । नीलसिंहोऽत्र भूपालः श्रावको दर्शनान्वितः ॥ १ ॥
उपवासं विधायार्यं पञ्चमीदिवसे सिते । तिष्ठति प्रीतिचेतस्को नीलसिंहः स्वपत्तने ॥ २ ॥
एवं स्थितस्य संप्राप्य छिद्रं दायादसंपदा । दायादपरचक्रं च तस्योपरि समागतम् ॥ ३ ॥
दायादसैन्यमायातं निरीक्ष्य हतमङ्गलम् । ससैन्यसमुदायेन तस्थौ तत्सन्मुखः स च ॥ ४ ॥
सैन्ययोः स्थितयोश्च द्वयोरपि भयानकम् । प्रवृत्ते दारुणं युद्धे कुन्तप्रासासिभासुरे ॥ ५ ॥

---

1 [चर्म]. 2 पच राजन्यो 3 [नर्म]. 4 पच हतं 5 पचज विचमिषम्.

धनुर्गुणे समासज्य प्रतिपक्षनराधिपः । मुमोच शातनाराचं नीलसिंहं प्रति क्रुधा ॥ ६ ॥[1]
स नाराचोऽरिसंक्षिप्तो नीलसिंहस्य सत्वरम् । ततो ललाटमध्येन कपालान्तर्विवेश च ॥ ७ ॥
ललाटस्थेन तेनाशु मूर्च्छाविह्वलमानसः । तस्मान्मुक्तसमीपाय नीलसिंहो रुषान्वितः ॥ ८ ॥
दृष्ट्वा तं भीषणाकारं गर्जन्तं कण्ठनिस्वनम् । ननाश प्रतिपक्षोऽसौ भयवेपितविग्रहः ॥ ९ ॥
भित्त्वा परबलं धन्ये ललाटस्थिततोमरः । नीलसिंहः परिप्राप स्वगृहं जनवीक्षितः ॥ १० ॥
आयातस्य गृहं तस्य स नाराचोऽपि सज्जनैः । उत्खातः कुशलैः प्राप नीलसिंहो हि मूर्च्छनम् ॥ ११ ॥
चेतनां प्राप्य भूयोऽपि श्रीखण्डादिकसेवनात् । यथापि निमलोकेन नीलसिंहोऽयमीप्सितम् ॥ १२ ॥
यावच्च गृह्यते यस्य शरीरं तच्च वायुना । तावत् पेयं पिब क्षिप्रं शरीरारोग्यकारणात् ॥ १३ ॥
निशम्य तद्वचो धीरो जगादैतान् पुरः स्थितान् । निवृत्तिरस्य मे नूनमाहारस्य जलस्य च ॥ १४ ॥
सहित्वा नीलसिंहोऽपि क्षुधाद्यन्यापरिश्रमम् । तद्दिनं सुस्थितो निन्ये स्मृतजैनपदाम्बुजः ॥ १५ ॥
पश्चिमप्रहरकालेऽस्य मार्तण्डे चोदिते सति । चकार महतीं पूजां जिनानामभिषेकिणीम् ॥ १६ ॥
स्थित एष परिप्राप्य महापुरुषसंभवम् । कालं कृत्वा समाधानान्नीलसिंहो ययौ दिवम् ॥ १७ ॥

॥ इति श्रीमहावीरपुरुषनीलसिंहनृपतिकथानकमिदम् ॥ १२४ ॥

*

१२५ शिवभूतिकथानकम् ।

दक्षिणापथदेशोऽस्ति पुरं पौलहरिरं परम् । शिवभूतिर्बभूवात्र ब्राह्मणो ब्रह्मसंभवः ॥ १ ॥
कौमारब्रह्मचारित्वं भूत्वा यच्छते पुनः । कृत्वाऽमुनाऽशठासंगं नाशितं लोकजीवितम् ॥ २ ॥
यत्कृतं दुष्कृतेनाथ पापं सर्वाङ्गसंभवम् । काष्ठराशिं विधायाशु विवेश ज्वलनं पुनः ॥ ३ ॥
चितोपरि स्थितो भारं स्मरन्तपसः सः । शिवभूतिर्धृतिं प्राप्य कृतनिन्दनगर्हणः ॥ ४ ॥

॥ इति श्रीशिवभूतिविप्रकथानकमिदम् ॥ १२५ ॥

*

१२६ अवन्तिसुकुमालकथानकम् ।

विषये वत्सकावत्यां कौशाम्बीनगरीभवः । बभूवातिबलो राजा श्रीकन्यारमणीपतिः ॥ १ ॥
सोमशर्माऽभवद् विप्रो नृपतेरस्य वल्लभः । तज्जाया काश्यपी नाम्नी[2] रूपयौवनराजिता ॥ २ ॥
परस्परसुखासङ्गसक्तमानसयोस्तयोः । अग्निभूतादिकौ भूती बभूवतुरिमौ सुतौ ॥ ३ ॥
पितुर्वाक्यमकुर्वाणौ मूर्खौ मूर्खप्रियौ तकौ । सदम्यधनसंयुक्तौ संजातौ निष्ठुराशयौ ॥ ४ ॥
जनके पञ्चतां प्राप्ते दायादैः प्रकदर्थितौ । धनहेतोर्नृपं प्राप्तौ तत्समं दीनमानसौ ॥ ५ ॥
नरेन्द्रेण तयोर्वित्तं समस्तं मूर्खकारणात् । गोत्रजानां समस्तानां वितीर्णं क्रमशस्तदा ॥ ६ ॥
ततस्तौ दुःखितौ सन्तौ प्राप्य राजगृहं पुरम् । ऊचतुः सूर्यमित्रस्य पितुर्मरणमादरात् ॥ ७ ॥
निशम्य सूर्यमित्रेण तद्वार्ता दुःखभीरुणा । सहाध्यायमध्ये च कृतौ तौ शास्त्रकोविदौ ॥ ८ ॥
विद्यास्थानानि सर्वाणि सूर्यमित्रप्रसादतः । जातवेदादिकन्याभ्यां[4] विज्ञातानि कुतूहलात् ॥ ९ ॥
तत्र कौशाम्बिकां प्राप्य दृष्ट्वाऽतिबलभूपतिम् । निजवृत्तिं च तौ सर्वां तस्मात्तु स्वपुरे मुदा ॥ १० ॥
सूर्यमित्रोऽपि संप्राप्य बोधं राजगृहे पुरे । सोधर्ममुनिसामीप्ये दीक्षां दैगम्बरीं दधौ ॥ ११ ॥

---

1 पकड पुष्पमित्तम्. 2 [ग्राम]. 3 ज नाम 4 ज जातवेदाते [जातवेदाते].

सिद्धक्षेत्राणि सर्वाणि वन्दित्वा भक्तिवत्सलः । भिक्षार्थमागमन्नाथः कौशाम्बीं नगरीं मुनिः ॥ १२ ॥
गृहाद् गृहान्तरं गच्छन् पुण्यराशिनिधानतः । अग्निभूतिगृहं निन्ये सूर्यमित्रमुनिं क्रमात् ॥ १३ ॥
अग्निभूतिसुतस्यापि सुखावस्थानकारणात् । निमन्त्रिता द्विजास्तत्र तिष्ठन्ति बहवस्तदा ॥ १४ ॥
अग्निभूतिर्मुनिं दृष्ट्वा सन्मुखं प्राप्य भक्तितः । भक्त्यादिगुणसंयुक्तवरस्थानमपूपुजत् ॥ १५ ॥
दत्त्वाऽऽहारविधिं तस्मै मुनये भक्तिवत्सलः । अग्निभूतिस्तदा पुण्यं बबन्ध भवभेदकम् ॥ १६ ॥
वितीर्णे चाथ दानेऽस्मै तदानीमग्निभूतिना । वसुधारादिकं गेहे बभूवाश्चर्यपञ्चकम् ॥ १७ ॥
दृष्ट्वाऽऽश्चर्यमिदं सारमग्निभूतिगृहे द्विजाः । तं सूर्यमुनिं दृष्ट्वा नमस्यन्ति सभक्तिकाः ॥ १८ ॥
वायुभूतिः परस्तस्य बहुशिष्यसमन्वितः । व्याख्याने विदधत् तत्र न नमस्यति तं मुनिम् ॥ १९ ॥
दृष्ट्वा स्तम्भसमाकारं वायुभूतिं तदग्रजः । पाणिनादाय सद्भेदं प्रमादेऽपि निषेधयन् ॥ २० ॥
वायुभूते मुनेरस्य महासत्त्वेन धीमता । संजाता परमा लक्ष्मीरस्माकं देवनिर्मिता ॥ २१ ॥
तत उत्तिष्ठ शुचे वत्स गत्वाऽस्य समीपताम् । वन्दनां कुरु भावेन समस्तमलनाशिनीम् ॥ २२ ॥
अग्निभूतिवचः श्रुत्वा वायुभूतिर्जगावमुम् । अज्ञानस्याशुचेरस्य कारयसि मां नुतिम् ॥ २३ ॥
वायुभूतिवचः श्रुत्वा अग्निभूतिर्विषादयन् । मुनिपार्श्वं कृतार्थं च वन्दनं चक्रे स्वयम् ॥ २४ ॥
यतोऽसि त्वं दुराचार वेदविप्रकुलेन च । येनास्य योगिनः पादौ मानितौ न नमस्यसि ॥ २५ ॥
एवं निगद्य तं दुष्टं वैराग्योपगतस्ततः । अग्निभूतिर्विहायाशु गृहावासमिदं ययौ ॥ २६ ॥
विहाय सकलं सर्वं महावैराग्यसंयुतः । अग्निभूतिर्ललौ दीक्षां सूर्यमित्रान्तिके सुधीः ॥ २७ ॥
अत्रान्तरे ययौ रोषं वायुभूतिं पुरः स्थितम् । अग्निभूतिप्रिया दीना सोमदत्ता रुदत्यसौ ॥ २८ ॥
दुर्जनस्त्वं सदा लोके दुर्जनानामपि स्फुटम् । येनास्य वेदिनो शिष्यमुपकारं न वेत्सि च ॥ २९ ॥
अधीत्य सकलान् वेदान् साङ्गोपाङ्गांस्तदन्तिके । पादयोः पतितुं मूढ सूर्यमित्रस्य लज्जसे ॥ ३० ॥
तस्य विप्रसभामध्ये निशम्य वचनं तदा । मिथ्यात्वोपहतः कोपात् पादेन निहतं शिरः ॥ ३१ ॥
गच्छ त्वं यत्र ते भर्ता विक्लवेक्षणमानसः । एवं निगद्य सा तेन पाटिता स्वनिकेतनात् ॥ ३२ ॥
निशम्य तत्तिरस्कारं सोमदत्ताऽपि तत्क्षणम् । चकारेदं निदानं सा कोपारुणनिरीक्षणा ॥ ३३ ॥
निहत्य त्वां भवत्पादं दुष्टमन्यत्र जन्मनि । पूर्वमेव शिरोघाति भक्षयिष्यामि निश्चितम् ॥ ३४ ॥
एवं निगद्य तं कोपात् निःश्वस्य च मुहुर्मुहुः । सोमदत्ता हि मृत्वाऽसौ भ्रमन्ती भवसागरम् ॥ ३५ ॥
वायुभूतिरपि विप्रमभिमानकलङ्कितः । चकारायं तिरस्कारं सूर्यमित्रमहामुनेः ॥ ३६ ॥
उदुम्बरमहाकुष्ठेन कुथितश्चैव मिश्रजः । तत्पापतो मृतिं प्राप दुःखः सप्तदिनान्तरे ॥ ३७ ॥
भद्रकाख्यवनान्तस्थ चम्पाख्यायां महापुरि । महासरोवरोपान्ते वासुपूज्यनिषद्यकाम् ॥ ३८ ॥
गत्वा भक्तिसमायुक्तैरग्निभूत्यादिसाधुभिः । तद्वन्दनार्थमायातः सूर्यमित्रो महामुनिः ॥ ३९ ॥
सूर्यमित्रः स्वचित्तेन शुद्धो नत्वा निषद्यकाम् । बभूव तत्क्षणेनैव चतुर्ज्ञानसमन्वितः ॥ ४० ॥
जिनपादानुरक्तस्य सूर्यमित्रस्य योगिनः । वायुभूतिस्तिरस्कारं कृत्वा यो दुर्विपाकतः ॥ ४१ ॥
कौशाम्बिकाप्रभावस्य तस्य विघ्नकारिणः । विपाकस्य लंघस्य गृहे जातः स गर्दभी ॥ ४२ ॥
मृत्वा पापेन तस्यासौ गुरूपैव खरी तदा । बभूव भीषणाकारा तीक्ष्णदंष्ट्रा च सूकरी ॥ ४३ ॥

---

1 ब कौशाम्बीनगरीं 2 पकव 'नास्तरम्' 3 क भेदी ब 'भेदे. 4 ब समया 5 ब ध्योगिनः 6 पकज शिवलयिताम्. 7 पकज विस्मयितम्. 8 पकज विस्मयितम्. 9 पकज कुष्ठमितम्. 10 पकज विस्मयितम्. 11 ब कुञ्चितं 12 पकज कुष्ठमितम्. 13 क लहस 14 पकज कुष्ठमितम्.

सूकरी सुतिमासाद्य चम्पाख्यायां पुरि स्फुटम् । मातङ्गकुलसंभूता शुनी भीषणविग्रहा ॥ ४४ ॥
शुनी मृतिं परिप्राप्य मातङ्गश्रेष्ठिमन्दिरे । कुमारी लोचनात् त्यक्ता चम्पायामभवत् पुनः ॥ ४५ ॥
जम्बूफलानि पक्वानि खादयन्ती तरोरधः । अग्निभूतिर्विलोक्येमां सवैराग्यो जगौ गुरुम् ॥ ४६ ॥
एतस्यामप्यवस्थायामस्या योगीन्द्र योषितः । चाग्वे न च वैराग्यं तु मनागपि मे वद ॥ ४७ ॥[1]
अग्निभूतिवचः श्रुत्वा सूर्यमित्रो जगावमुम् । वायुभूतिर्भवद्भ्राता यो स्तो द्विजमानव[2] ॥ ४८ ॥
गर्दभी सूकरी दुष्टा शुनी पापगरीयसी । भ्रान्त्वा जन्मान्तराण्येष दुर्गन्धेयं मितिष्ठते ॥ ४९ ॥
सूर्यमित्रगुरोर्वाक्यं निशम्य करुणापरः । अग्निभूतिरिमां प्राह दुर्गन्धां पुरतः स्थिताम् ॥ ५० ॥
प्राग्भवे त्वयेदृक्षं दुर्मुखं तिरस्कारेण योषितः । महाख्येनाधुना पुत्रि गृहाणाणुव्रतान्यरम् ॥ ५१ ॥[3]
अग्निभूत्युपदेशेन संप्राप्याणुव्रतानि सा । दुर्गन्धा मरणं प्राप मिथ्यात्वेन मलीमसा ॥ ५२ ॥
अथ चम्पापुरं श्रीमांश्चन्द्रवाहननृपतिः । अस्य चन्द्रमती भार्या बभूव वनितोत्तमा ॥ ५३ ॥
अस्यैव च नरेन्द्रस्य नागशर्मा पुरोहितः । अभवद् ब्राह्मणी कान्ता त्रिवेदी तन्मनःप्रिया ॥५४॥
अजायत तयोः पुत्री दुर्गन्धा प्राग्विरूपिता । नागश्रीरिति विख्याता नागिनीव फलस्वना ॥५५॥
अन्यदा सूर्यमित्रोऽसौ विहरन् क्वापि भूतलम् । चम्पानागवरोद्याने नागवेश्मनि तस्थिवान् ॥५६॥
पद्मनागस्तथाऽन्योऽपि नागान्तः संयताधिकः । पद्मनागस्तयोऽप्येते तिष्ठन्त्यत्र मनोहरे ॥ ५७ ॥
सामन्तमन्त्रिकन्याभिर्नागश्री परिवारिता । जगाम भक्तिसंपन्ना तद्वनं नागमर्चितुम् ॥ ५८ ॥
नागपूजां विधायात्र गन्धपुष्पादिसंपदा । सूर्यमित्रगुरुं प्राप नागश्रीस्तत्समन्विता ॥ ५९ ॥
तत्र नागश्रियं दृष्ट्वा कन्यासंघातसंगताम् । अग्निभूतिर्विलोक्येमां बभूव स्नेहसंयुतः ॥ ६० ॥
नागश्रियं विलोक्येमां कुतः स्नेहोऽभवन्मम । एतत् सर्वं यथादृष्टं कथयाशु महामुने ॥ ६१ ॥
अग्निभूत्युदितं श्रुत्वा सूर्यमित्रो जगाद तम् । आकर्णयैकचित्तेन कथयामि तव स्फुटम् ॥ ६२ ॥
आसीत् पूर्वभवे यो हि वायुभूतिस्तवानुजः । मद्गुप्त्या विधायात्र पञ्चतामगमत् पुनः ॥ ६३ ॥
गर्दभी सूकरी पापाच्छुनी मातङ्गिकाऽपि च । नागश्रियमिमां विद्धि सांप्रतं त्वं मदुक्तितः ॥६४॥[4]
कथिते सूर्यमित्रेण समस्ते तद्भवान्तरे । नीताऽग्निभूतिसूर्येण नागश्रीपथिनी मुदम् ॥ ६५ ॥
श्रुत्वा भवान्तरं सर्वं स्वकीयं सूर्यमित्रतः । जग्राहाणुव्रतैः सार्धं नागश्रीर्दर्शनं मुदा ॥ ६६ ॥
नागश्रीरुदिता भूयः सूर्यमित्रेण सूरिणा । अणुव्रतानि सर्वाणि मा मोक्ष्यसि कदाचन ॥ ६७ ॥
स्तुत्वेयं सूर्यमित्रस्य पादपद्मं मनोहरम् । अग्निभूतेरपि क्षिप्रं जगाम निजमन्दिरम् ॥ ६८ ॥
ज्ञात्वा नागश्रियं कन्यां जिनधर्मपरायणाम् । जगाद नागशर्मेमां वाचया क्रूरया द्विजः ॥ ६९ ॥
पुत्रि त्वं मत्सुता साध्वी ब्राह्मणान्वयसंभवा । जिनधर्मेण संबन्धो न तेऽसौ युज्यते शुभि ॥७०॥
तस्मादिदं व्रतं पुत्रि लोकबाह्यं जिनोदितम् । मुञ्च महाख्यतस्त्वमपि त्वं मदोभयव्याधिका ॥७१॥[5]
पितुर्वचनमाकर्ण्य जिनधर्मपराङ्मुखम् । जगादेयं पुनः कन्या नागश्रीः श्रीसमप्रभा ॥ ७२ ॥
यस्य पार्श्वे मया धर्मो गृहीतो जिनपुङ्गवः । तस्य पार्श्वे परित्याज्य मुञ्चाम्यनेन द्रुतं पुनः ॥ ७३ ॥[6]
ततो नागश्रियं हस्ते गृहीत्वा निर्ययौ पिता । तस्य कार्ये महावीरोऽरं सुते त्वपि निर्मितम् ॥७४॥
एवं निगद्य तौ यावत् प्रवृत्तौ पथि तं प्रति । यावद् मलिम्लुचं बाहोर्दृढपाशेन रोपितम्[7] ॥ ७५ ॥
व्यनिन्य पुष्करेणाशु नीयमानं पुराद्बहिः । लोकेन वेष्टितं यावत् पश्यन्तौ सकौतुकम् ॥ ७६ ॥

---

1. पपत्र पुस्तकमिदम्. 2 फ द्विजमानव. 3 पपत्र पुस्तकमिदम्. 4 पपत्र विपत्रमिदम्.
5 पपत्र विपत्रमिदम्. 6 पपत्र पुस्तकमिदम्. 7 फ रोपितम्.

दृष्ट्वाऽमुं तस्करं बद्धं नागश्री पितरं जगौ । तात किं कारणं बद्धो युवाऽयं रूपवानिव ॥ ७७ ॥
मुख्यवचनतोऽनेन सदनी नागशर्मणा । भूप नरा कुतो बद्धो नीयतेऽयं महान्नर ॥ ७८ ॥
नागशर्मवचः श्रुत्वा जगुरेते नराः पुनः । श्रेष्ठिपुत्रोऽमुना बहवो गृहीता धनकोटिका ॥ ७९ ॥
याचितोऽपि धनं पार्श्वे दातुमिच्छति नैष कः । अनेन निहतः सोऽयं कारणात्स्या मृतिं गतः ॥ ८० ॥
अनेन कारणेनायं नरः पुरुषघातकः । नरेन्द्रवचनाद् बद्धो नीयते दण्डपाशिकैः ॥ ८१ ॥
निशम्य वचनं तस्य नागश्रीर्निजगादमुम् । इदं व्रतं मया तात गृहीतं मुनिसंनिधौ ॥ ८२ ॥
जीवानां मृत्युभीरूणां जीवनं वाञ्छितं सदा । कायेन मनसा वाचा न करोमि वधं पितः ॥ ८३ ॥
इदं व्रतं समर्प्याशु मुनेर्वधनिपातनम् । मया त्वन्मतकारिण्या कर्तव्यं जनक स्फुटम् ॥ ८४ ॥
इत्येषु भाषितार्थेषु वचनबाहुपश्चिता । भवतां पश्यतां यामि श्मशानं तूर्यनिस्वनैः ॥ ८५ ॥
मुनिकर्णां मुनीन्द्रस्यास्यां चितास्थायां निजां तनुम् । निक्षिप्य पश्यतां क्षीणं यामि तात त्वदग्रतः ॥ ८६ ॥
निशम्य स्वसुतावाक्यं नागशर्मा जगाद ताम् । तिष्ठस्विदं व्रतं पुत्रि तव तन्वि ममापि च ॥ ८७ ॥
त्वत्सुख वाञ्छिता यार्थ धर्मं च जिनदेशितम् । नूनं जीवयथाः पुंसा न कर्तव्यो मुमुक्षुणा ॥ ८८ ॥
तेन व्रतमिदं तन्वि मा समर्पय योगिनः । अन्यानि यानि सर्वाणि शुभ तानि तदन्तिके ॥ ८९ ॥
यावदेवं सुतां शास्ति नागशर्मा पथि स्थितम् । आगच्छन्तं नरं तावद् ददर्श करयन्त्रितम् ॥ ९० ॥
दृष्ट्वाऽमुं नागशर्माऽपि पप्रच्छान्यं नरं पुनः । को दोषो विहितोऽनेन येन बद्धो भयत्रस्त ॥ ९१ ॥
निशम्य स नरस्तूर्णं वचनं नागशर्मणः । जगाद वचसा घोरं कौतुकव्याकुलमानसम् ॥ ९२ ॥
अत्रैव देवदत्ताख्यो यज्ञदत्तोऽपि वाणिजः । गोधूमचणकादीनां संग्रह यन्त्रयुक्तये ॥ ९३ ॥
एतौ धनधान्यमादाय क्रयार्थं लाभलालसौ । श्रीपुरात् सहसा प्राप्तौ चम्पाख्यां नगरीमिमाम् ॥ ९४ ॥
धान्यं क्रयक्रयेदं श्रेष्ठी विक्रयार्थमिहस्थितः तदा । विस्तीर्णं धनलोभेन धान्यं विविधमेदकम् ॥ ९५ ॥
अत्रैव नगरे सारे सारश्री नाम वाणिजः । मायया कुरुते चौर्यं हृदयसंभ्रमरूपया ॥ ९६ ॥
यथाख्याभिधानस्य श्रेष्ठिनस्य धनेशिनः । नीयते सकलं धान्यं नरैस्तैर्न मायिना ॥ ९७ ॥
तद्गेहमिदिचित्रस्य तदा चित्रकरेण च । लिखितं चित्रकर्मेदं वन्दनार्थं जनप्रियम् ॥ ९८ ॥
पश्यातरमनोहारि शुभकर्मरसायनम् । दृष्ट्वा मास्थानकं सोऽयं जगाद स विवेकिनः ॥ ९९ ॥
कस्मिन्नपि पुरे श्रेष्ठी धनपालो महाधनः । तत्पुत्रो दन्दशूकेन स दष्टो धनदत्तकः ॥ १०० ॥
निर्विषीकरणे दक्षो लोकविख्यातकीर्तिकः । तन्निमित्तं समाहूतो विषदो धनकेन च ॥ १०१ ॥
तन्मध्ये हि परलोकस्थतानं विषदस्तदा । नरके तिष्ठतु ते पुत्र सर्पदष्टो धनाधिप ॥ १०२ ॥
विषव्याप्तसमस्ताङ्गं विहस्तीभूतमानसम् । त्वन्नन्दनं विधास्यामि प्रभाते निर्विषं ध्रुवम् ॥ १०३ ॥
एवमुक्त्वा धनाधीशं सुतशोककदर्थितम् । जगाम विषदस्तूर्णं स्वमनीषितमग्रतः ॥ १०४ ॥
चतुर्थे मायदक्ष्य तत्समीपे नरान्तरम् । स्थापयामास तत्रात सहस्रमर्म्यसंश्रकम् ॥ १०५ ॥
तदेकदे भेकूकं हन्तुं नरः प्राप्य वनान्तरम् । आदायमं पुनः शीघ्रमाजगाम तदन्तिकम् ॥ १०६ ॥
अन्यो निर्गत्य मध्यार्थं तानि चाराय सत्वरम् । मागदष्टान्तिक प्राप भयवेपितविग्रहः ॥ १०७ ॥
अपराऽपि समानेतु विनिःसृत्य तदन्तिकात् । गृहीत्वाऽमुं परिप्राप नाम्नदष्टसमीपकम् ॥ १०८ ॥
अन्योऽजगरस्य तं तत्र मातरीपरि पश्यन् । विषव्याप्तसमस्ताङ्गं तस्यै तमीरितवाचया ॥ १०९ ॥
एवं ते दशक सर्वे लोभपूरितमानसाः । अभिषेकं विधायाशु मिलकं मध्ययन्त्यतम् ॥ ११० ॥

---

1 [दृष्ट्वाशिंडिः]. 2 पफल त्रिफलमिदम्. 3 पफ, चतुरङ्गमिदम्, अ चतुरङ्गमिदम्.
4 [दम्भत]. 5 पफल त्रिफलमिदम्.

सुपदामागतीतायाः सम्प्राप्य विपदौ ततः । जीवनं श्रेष्ठिपुत्रस्य चक्रतुर्भयपोषयः ॥ १११ ॥
जीविते श्रेष्ठिपुत्रेऽस्मिन् मणिसर्पादिसंपदा । पूजयामास तौ श्रेष्ठी विपदौ प्रीतमानसः ॥ ११२ ॥
एवं नरेण चैकेन तोषपूरितचेतसा । तदानीं नरसिंहस्य[1] कथ्यमाने कथानके ॥ ११३ ॥
दृष्टिमोहं विधायैषा रथकाया प्रयत्नतः । चतुर्धान्यं मिमीतेऽसौ वणिजो हस्तसंज्ञया ॥ ११४ ॥
चौरिकाव्यवहारेण धान्ये च प्रमितेऽखिले । धर्माधिकारिणेऽन्योन्यं व्यवहारं चकार सः ॥ ११५ ॥
ततः सामनिकैः सर्वैर्मांसपक्षोपरि स्फुटम् । असत्यचौरिकावादः स्थापितस्तत्पुरान्तरे ॥ ११६ ॥
विग्रहस्तत्परस्येदं[2] समस्तजनसाक्षिकं । चारित्रे नरनाम्नेन तस्य मायाविभाषिणः ॥ ११७ ॥
निशम्य वचनं तस्य नागश्रीर्मतिशालिनी । जगाद पूर्ववत् सर्वं तत्त्वतो जनकस्य सा ॥ ११८ ॥
नागश्रियो वचः श्रुत्वा धर्मचिन्ताप्तचेतसः । समार्पयतां पुनस्तत्र तोषपूरितमानसः ॥ ११९ ॥
व्रतद्वयमिदं भद्रे त्वदन्ते तिष्ठतु स्फुटम् । व्रतान्यन्यानि सर्वाणि मुनेरर्पय शोभने ॥ १२० ॥
दृष्ट्वाऽपरं नरं मार्गे नागश्रीपरिनोदिताः । पप्रच्छ नागशर्मेदं नीयमानं क्षितिं प्रति ॥ १२१ ॥
को दोषो विहितोऽनेन येन बद्धः प्रयात्ययम् । तदाकर्ण्य जगादाशु स नरः प्रीतमानसः ॥ १२२ ॥
नागशर्मोदितं श्रुत्वा तन्मध्ये प्रीतमानसः । जगादेति वचो मन्दमेकः कोऽपि नरः स्फुटम् ॥१२३॥
चम्पापुरीसमीपस्थपुरं शैलपुरं परम् । बभूव मस्तनामास्यो[3] राष्ट्रकूटकुटुम्बिकः ॥ १२४ ॥
तद्भार्या जयका चासीत् तत्सुतौ नन्दघोषकौ । नन्दाय ज्यायसे दत्ता मातुलेन स्वकन्यका ॥१२५॥
अकृत्वा भवनं तस्या नन्दोऽपि धनतृष्णया । यात्रया[4] चलितः क्षिप्रं नूनं द्वादशवर्षया ॥ १२६ ॥
देशान्नन्दो न चायाति वाणिज्यार्थं गतस्तदा । घोषकाय वितीर्णा सा मातुलेन स्वकन्यका ॥१२७॥
करोति भवनं यावद् घोषोऽस्यास्तद्दिने सति । नन्दोऽपि तावदायातो दूरदेशात् स्वपत्तनम् ॥१२८॥
दत्ता भूयोऽपि सा कन्या नन्दाय जनकेन च । इच्छन् न रूपसंयुक्ताऽपि ज्यायसाऽनेन कन्यका ॥१२९॥
नन्दघोषपरित्यक्ता तदा षोडशिकाऽपि सा । रूपयौवनसंयुक्ता पितृगेहे वितिष्ठते ॥ १३० ॥
तस्मिन्नेव पुरे रूपी नागशर्मसुतोऽभवत् । कद्रुकागर्भसंभूतो नागदत्ताभिधानकः ॥ १३१ ॥
भार्याचतुष्टयं हित्वा देवीरूपसमप्रभम् । षोडशिकासमं रेमे नागदत्तः कुवीरपम् ॥ १३२ ॥
षोडशिकां समादाय तत्प्रहतमानसः । चम्पापुरीं पुरीं प्राप्य नागदत्तो महातुरः ॥ १३३ ॥
गृहीत्वा रत्नकैरेष परनारीनिषेवितम् । आस्थानमण्डपस्थस्य भूपस्याप समर्पितः ॥ १३४ ॥
करपिलाऽन्यसौ रामां रूपराजितविग्रहाम् । राजाऽस्य दर्शयामास चित्रभानुसमप्रभाम् ॥१३५॥
एतत्सर्वं समास्थातमास्थानमतिसुन्दरम् । तद्वरेण पथि स्थाय नागश्रीनागशर्मणो[5] ॥ १३६ ॥
स्तोकमार्गमतिक्रम्य नरमेकं परस्तुतिम् । पूर्वोक्तविधिना बद्धं पश्यन्तौ तदा तकौ ॥ १३७ ॥
नागश्रीवचनेनाशु नागशर्मा विलोक्य तम् । पप्रच्छान्यं नरं तत्र बद्धोऽयं केन हेतुना ॥ १३८ ॥
निशम्य भारतीमस्य जगादैको नरोऽपि तम् । यो बद्धो नीयते मद्र धीरपुण्यः स गोपकः ॥१३९॥
तत्तुष्टेन भूपेन नितान्तं स्वस्वगोकुले । धीरपुण्याय गोपाय वितीर्णा धेनवः पराः ॥ १४० ॥
एकैकां धेनुमादाय सामन्तादिमये स्वयम् । तस्मै समन्विरे गोपो देव्याः कामदुधामपि ॥ १४१ ॥
तद्वृत्तान्तं महादेव्या भूपाऽग्रे निवेदितम् । धीरपुण्येन गोपेन राजन् मनोज्ञका हता ॥ १४२ ॥
महादेवीवचः श्रुत्वा भूपैरन्यैरुदाहृतम् । रामवनेन गोपेन मदीया धेनवो हताः ॥ १४३ ॥

---

1 [नरसिंहस्य]. 2 पपस्त्र पुष्पश्रीसम्, 3 [°मसिषोरितः]. 4 [मातुमात्यस्य]. 5 पक पामपा 6 पपस्त्र पुष्पश्रीसम्,

निशम्य वचनं राजा महादेवीमहीसुताम् । कोपलोहितभीमाक्षस्तदोचे दक्षणासिखम्[1] ॥ १४४ ॥
प्राप्य कृत्वा स्थितं योऽयं महाक्षेमप्रवर्तितम् । दूरं नयत देशं हि धीरपुण्यनिष्कासितम्[2] ॥ १४५ ॥
निशम्य स्ववचस्तत्र मयदेवस्तिनिग्रहः । नागश्रीर्नागसम्पूर्णं जगादेति विशुद्धधीः ॥ १४६ ॥
अहिंसा सत्यमस्तेयं स्वदाररतिकारणम् । धनादिकप्रमाणं च व्रतान्येतान्यमूनि मे ॥ १४७ ॥
अर्पितेषु समस्तेषु व्रतेष्वेतेषु योगिनाम् । तात पूर्वोक्तयोपास्तु मासम्या सकलं मया ॥ १४८ ॥[3]
नागश्रीवचनं श्रुत्वा नागशर्माऽवदत् वचम् । सुमताणुव्रतैरेभिर्मम त्वं पश्यसि सुते ॥ १४९ ॥
मधुमस्तादि पद्मानि हितकारीणि देहिनाम् । एतानि सारभूतानि मार्गमिच्छसि कस्यचित् ॥ १५० ॥
अस्माकमपि चैतानि योगिभिः प्राक्तनैः सुते । कथितानि विशिष्टानि स्वहितावारवेदिभिः ॥ १५१ ॥
किं पुनस्तस्य नग्नस्य श्रमणस्य कदर्थनम् । कृत्वा लज्जाविहीनस्य गम्यमः सग्रह सुते ॥ १५२ ॥
येनान्यलोकपापानां नितान्तं सुखपेशलम् । श्रमणोऽयं गताचारो न करोति प्रतारणम् ॥ १५३ ॥[4]
एवं निगद्य तां बालां नागशर्मा रुषान्वितः । जगादीत् च मुनिं धीरं तारनादेन द्रुतः ॥ १५४ ॥
भो भो मुने कृतो हेतोर्मत्सूनुप्रतारणम् । कृतं त्वया वद क्षिप्रं निर्लज्ज गुणवर्जित ॥ १५५ ॥[5]
आकर्ण्य तद्वचः साधुर्भाषितमेवं पुरःस्थितम् । मत्पुत्र न नागश्रीस्त्वत्सुता मत्सुता स्फुटम् ॥ १५६ ॥
एवं निगद्य तं विप्रं प्राह नागश्रियं मुनिः । एहि पुत्रि ममाभ्याशं धर्मसंसक्तमानसे ॥ १५७ ॥
श्रुत्वा साधुवचो दीनं नागश्री प्रीतमानसा । सूर्यमित्रस्य सामीप्यमाजगाम त्वरान्विता ॥ १५८ ॥
सूर्यमित्राभिधानाभ्यां मुनिभ्यामात्मनोऽन्तिके । नागश्रियं विधायाशु नागशर्मा प्रभाषितः ॥ १५९ ॥
गच्छ त्वं ब्राह्मण क्षिप्रं स्थानतोऽस्मत । यावन्न भूभुजाऽस्माभिर्युद्ध्यपि च कदर्थ्यसे ॥ १६० ॥
श्रुत्वा मुनिवचस्तत्र नागशर्मा स ब्राह्मणः । समाकर्ण्य महाऽन्यायमुच्चरन् वचसा द्रुतम् ॥ १६१ ॥
चन्द्रवाहनसामीप्यं संप्राप्य निजगादिदम् । महाराजावहं मुष्टे नग्नश्रमणकैः शठैः ॥ १६२ ॥
नागश्रियं समादाय यावन्नो यान्ति ते वनात् । तावन्मया समं शीघ्रं तत्र त्वं याहि भूपते ॥ १६३ ॥[6]
श्रुत्वा तद्वचनं राजा नानाजनसमन्वितः । कौतुकव्याप्तचेतस्कः सूर्यमित्रान्तिकं ययौ ॥ १६४ ॥
अत्रान्तरे जगौ विप्रो वचनं नृपसाक्षिकम् । नागश्रीर्मत्सुता मार्गैर्वितीर्णा मम भूपते ॥ १६५ ॥
निशम्य सूर्यमित्रोऽपि वचनं नागशर्मणः । जगादेदं पुरो धीरं नृपादिजनसाक्षिकम् ॥ १६६ ॥
नागश्रीर्मत्सुता नूनं शृणु मद्वचनं नृप । अध्यापिता मया वेदांश्चतुरः स्तुतिपूर्वकम् ॥ १६७ ॥
सूर्यमित्रवचः श्रुत्वा नरेन्द्रो निजगाद तम् । नागश्रियं वेदपाठं कारयस्व महामुने ॥ १६८ ॥
चन्द्रवाहनभूपस्य निशम्य वचनं तदा । नागश्रियं जगादेति सूर्यमित्रो महामुनिः ॥ १६९ ॥
वायुभूतिचर क्षिप्रं त्वं नागश्रीः स्फुटाक्षरम् । मदध्यापितवेदानां पठनं कुरु सांप्रतम् ॥ १७० ॥[7]
सूर्यमित्रवचः श्रुत्वा तदा जातिस्मरी मुदा । पपाठ सकलान् वेदाध्यायश्रीरिति सत्वरम् ॥ १७१ ॥
ओंकारं प्रथमं कृत्वा स्वरवर्णप्रभेदतः । चतुःषष्टिसमायुक्तं पपाठ क्रमविभागतः ॥ १७२ ॥
सूत्रानुपक्रमेणेदं समस्तं विधिपूर्वकम् । ऋग्वेदं च पपाठान्तं नागश्रीर्नृपसाक्षिकम् ॥ १७३ ॥
ततः सुवर्णभेदेन सप्तसंहितिवादितः । सूत्रबन्धादितः प्रोक्तो यजुर्वेदोऽनया क्रमात् ॥ १७४ ॥
सामवेदस्ततः प्रोक्तस्तथाऽथर्वणनामकः । अष्टादशपुराणानि तथोक्ता धर्मसंहिताः ॥ १७५ ॥
मीमांसान्यायशास्त्राणि चतुर्दश नृपाग्रतः । विद्यास्थानानि सर्वाणि भाषितानि तदाऽनया ॥ १७६ ॥[8]

---

1 [रक्तदृशिखम्]. 2 पफज्ञ कुत्सीतम 3 पफज्ञ निष्कामितम्. 4 पफज्ञ चतुगुणम्, 5 ज गुरुर्वोक्तम्, 6 पफज्ञ कुत्सीतम्, 7 पफज्ञ कुत्सीतम्, 8 पफज्ञ निष्कामितम्, 9 ज, सूर्यमित्र वचः 10 पफज्ञ कुत्सीतम्, 11 पफज्ञ कुत्सीतम्.

नागश्रीवेदसंपाठं निशम्य वसुधाधिप । सूर्यमित्रं जगौ साधुं सोपकण्ठस्थितात्मकः ॥ १७७ ॥
वेदसार्थं नागश्रीस्तव ज्ञानमहार्णव । नियन्तुं[1] ज्ञातमस्माभिर्न चैव नागशर्मणः ॥ १७८ ॥
किंतु नागश्रियो नाथ दिव्यज्ञानमहेश्वर । वेदप्रपाठसंबन्धं ज्ञातुमिच्छामि सांप्रतम् ॥ १७९ ॥
निशम्य तद्वचः सारं ध्वनिना ह्लादयन् सभाम् । सूर्यमित्रो जगादेति पराशीर्षं सकौतुकम् ॥ १८० ॥
विषये वत्सकावत्यां कौशाम्बी परमा पुरी । अत्रासीदतिबलो राजा श्रीकान्ता तत्प्रियाऽभवत् ॥ १८१ ॥
अग्निमित्रो द्विजोऽस्यासीदग्निला तत्कुटुम्बिनी । तत्सुतो सूर्यमित्रोऽहं सोमशर्मा कनिष्ठकः ॥ १८२ ॥
सोमशर्मप्रिया चासीत् काश्यपी नाम विश्रुता । तन्नन्दनोऽग्निभूतिश्च वायुभूतिरपि क्रमात् ॥ १८३ ॥
मत्तातमरणे राज्ञाऽनुक्रमं जानता वरम् । समर्पितानि सर्वाणि श्रुतिस्थावरकाणि मे ॥ १८४ ॥
मया तानि च सर्वाणि श्रुतिस्थावरकाण्यरम् । सोमशर्मेति तीर्णानि महास्नेहानुकारिणा ॥ १८५ ॥
मगधाविषये चासीत् पुरं राजगृहं तदा । वसुपालो नृपस्तत्र सुप्रभा तन्मनःप्रिया ॥ १८६ ॥
मया तन्नृपतेः पार्श्वे श्रुतिस्थावरकानि च । उपभुक्तानि सर्वाणि महाविद्याप्रभावतः ॥ १८७ ॥
राजप्रसादतस्तत्र भुञ्जानस्योत्तमां श्रियम् । सुखेन मम मद्भ्रातुर्भुवि सह सौख्यतः ॥ १८८ ॥
एवं पञ्चापि तत्काले सोमशर्मा ममानुजः । कालेन पञ्चतां नीतः कालो हि बलवान् भुवि ॥ १८९ ॥
तस्मिन् काले गते नूनमग्निभूतिस्त्वरान्वितः । वायुभूतिसमं यातो भवन्तं विनयात्मये ॥ १९० ॥
सप्तद्वयैकसंयुक्ते काले यावपि भूपते । कृतौ मया प्रयत्नेन वेदस्मृतिविशारदौ ॥ १९१ ॥
ततः कौशाम्बिकां प्राप्य दृष्ट्वाऽतिबलभूपतिम् । स्वश्रुतिस्थावराण्याशु मोचयामासतुस्तकौ ॥ १९२ ॥
समस्तविप्रशालानां मान्यानां निरन्तरम् । व्याख्याने च प्रकुर्वाणौ तस्थतुः स्वपुरे तकौ ॥ १९३ ॥
अग्निभूतिसमं राजन् कम्पनोऽपि पदार्थकः । हिमम्बरगतं सारं चक्रवाहो विशुद्धये ॥ १९४ ॥
वायुभूतिश्चितिं[3] प्राप्य मानदोषेण गर्दभी । शूकरी च शुनी जाता मातङ्गी दीनमानसा ॥ १९५ ॥
कालं कृत्वा च मातङ्गी शुभकर्मानुभावतः । जाता जातिस्मरा भूप नागश्रीर्वरकन्यका ॥ १९६ ॥
जातिस्मरत्वमासाद्य मदुक्तेन कलस्वना । पपाठ सकलं वेदं नागश्रीरियमादरात् ॥ १९७ ॥
वेदसंपाठसंबन्धः कथितो योगिनाऽमुना । महावैराग्यसंपन्नश्चन्द्रवाहनभूपतिः ॥ १९८ ॥
श्रुत्वा जिनोदितं धर्मं स्वर्गमोक्षप्रदायकम् । महाचन्द्रसुतायास्मै दत्त्वा राज्यमकण्टकम् ॥ १९९ ॥
सहस्रैर्बहुभिर्युक्तः सामन्तानां जिनोदितम् । चन्द्रवाहो दधौ राजा सूर्यमित्रान्तिके तपः ॥ २०० ॥
अन्यैरपि तदा लोकैरात्मभक्त्या प्रमोदिभिः । सम्यक्त्वपूर्वको धर्मो गृहीतो जैनपुंगवः ॥ २०१ ॥
सूर्यमित्रगुरोः पार्श्वे नागशर्माऽतिभक्तितः । महावैराग्यसंयुक्तो दीक्षां दैगम्बरीं दधौ ॥ २०२ ॥
नागश्रिया समं साध्वी त्रिवेदी जिनभक्तितः । आर्यिकायन्तिके भीमं तपो जैनमशिश्रियत् ॥ २०३ ॥
हत्वा कर्माष्टकं दुष्टमग्रपर्वतमस्तके । सूर्यमित्रोऽग्निभूतिश्च संप्राप्तः सिद्धिपत्तनम् ॥ २०४ ॥
नागशर्मा तपः कृत्वा दक्षं कर्मविनाशने । अभूदच्युतकल्पेऽसौ देवो भासुरविग्रहः ॥ २०५ ॥
कालं प्रकुर्वती दीना पूर्वस्नेहात् त्रिवेद्यपि । नागश्रीर्मे सुता भूपाभिधानमकरोदिति ॥ २०६ ॥
ततो मातृसुतायुग्मं कालं कृत्वा समाधिना । पद्मगुल्मविमानेऽभूदच्युतस्वर्गसमये ॥ २०७ ॥
देवयुग्मं मनोहारि हारराजितविग्रहम् । द्वाविंशतिसमुद्रायुस्तस्थौ तत्र सुखोचितम् ॥ २०८ ॥
इन्द्रदत्ताभिधश्चासीदिभ्यः श्रेष्ठी महाधनः । नूनं गुणवती भार्या श्रीमदुज्जयिनीभवा ॥ २०९ ॥

---

1 [निर्वर्ं]. 2 पफञ्ज निश्चयमिदम्. 3 [वायुभूतिर्भुवि]. 4 पफञ्ज शुक्लमिदम्. 5 पफञ्ज [illegible]

मायधर्मपरो देवस्ततश्च्युत्वाऽऽयुषः क्षये । पुत्रः सुरेन्द्रदत्तोऽभूत् तयोः प्रेमानुरक्तयोः ॥२१०॥
आसीत् सुभद्रसंज्ञोऽस्य श्रेष्ठीन्द्रः कुलसंभवः । भार्या सर्वयशास्तस्य श्रीमदुज्जयिनीपुरि ॥२११॥
भुक्त्वा तत्र सुखं दिव्यं ततश्च्युत्वा त्रिधेयपि । जाता सर्वयशोगर्भे यशोभद्रा सुकन्यका ॥२१२॥
वितीर्णेयं यशोभद्रा सुभद्रेण च सादरम् । चार्वी सुरेन्द्रदत्ताय कुमाराय महौजसे ॥ २१३ ॥
नागश्रीपूर्विका याऽऽसीत् पद्मगुल्मविमानके । देवस्तु शेषपुण्यः सन् समानुत्सप्तपूर्वकम् ॥२१४॥
भुक्त्वा नाकसुखं दिव्यं च्युत्वाऽसौ तद्विमानकात् । अवन्तीसुकुमालस्त्यो बभूव तनयोऽनयोः ॥२१५॥
अवन्तीसुकुमालाय श्रेष्ठिपदं वितीर्य च । दीक्षां सुरेन्द्रदत्तोऽयं जिनसेनान्तिके दधौ ॥ २१६ ॥
अवन्तीसुकुमालोऽपि नवयौवनराजितः । द्वात्रिंशत्सौधमध्यस्थो द्वात्रिंशत्कन्यकान्वितः ॥ २१७ ॥
हारराजितवक्षस्को द्वात्रिंशद्वनितासखः । अवन्तीसुकुमालोऽयं सुखं तस्थौ स्वसद्मने ॥ २१८ ॥
कुमारं वीक्ष्य तत्कालं जिनधर्मपरायणम् । नैमित्तिकश्चकारेममादेशं तज्जनान्तिके ॥ २१९ ॥
कुमारोऽयं यदा नूनं मुनिं द्रक्ष्यति पावनम् । हित्वा परिग्रहं सर्वं तदा दीक्षां करिष्यति ॥२२०॥
नैमित्तिकोदितं श्रुत्वा तज्जनैर्भीतमानसैः । मुनीनां तद्गृहे दूरात् प्रवेशोऽपि निराकृतः ॥ २२१ ॥
उज्जयिन्यां पुरि श्रीमत्प्रद्योतस्य महीपतेः । ज्योतिर्मालाभिधानाऽस्ति महादेवी मनःप्रिया ॥२२२॥
दक्षिणापथदेशात्तु विक्रेतुं कम्बलत्रयम् । एकेनार्थे समानीतं वणिजा रत्नकम्बलम् ॥ २२३ ॥
ततो महार्घमेवैषां कम्बलानां नरेशिना । अवन्तीसुकुमालस्य जनन्या ग्रहणं कृतम् ॥ २२४ ॥
ततश्चत्वारि खण्डानि दिव्यरूपवराणि च । अतीवानन्ददायीनि समस्तजनचक्षुषाम् ॥ २२५ ॥
स्निग्धस्पर्शगुणोपेता रत्नभासमन्विताः । ततस्ताः सन्ति, रूपाढ्या द्वात्रिंशद् वरकन्यकाः ॥२२६॥
एकैकं योषितः सर्वं नूनं तत्पुत्रिकान्तरम् । एकैककम्बलविशेषो ग्रन्थोऽयं मनीषिभिः ॥ २२७ ॥
नूपुरे श्रवणं तत्र प्रयोतोपोत्थमात्मयोः । वधूजनगमनं गेयाध्यादप्रेमानुरक्तयोः ॥ २२८ ॥
उपचारविधानं च निरुद्धं पाणिबन्धनम् । पानीयरमणं राज्ञो मणिहारविसर्जनम् ॥ २२९ ॥
भूपालस्य घनेनाशु निपुणं सद्गवेषणम् । मणिकुम्भतडागाभ्यां चोपितौ च विलोकनम् ॥ २३० ॥
आश्चर्यकरणं राज्ञः यात्रा तस्याः समागमः । दिव्यभोजनवेलायां दीपिकास्थापने तथा ॥ २३१ ॥
स्नानोदनस्पानां बहूनां रन्धनं परम् । दृष्ट्वैतद् भूभुजा सार्धं सरसं परिभुञ्जनम् ॥ २३२ ॥
सानुरागेण भावेन समालुकनमं पुनः । अवन्तिसुकुमालस्य राज्ञा तन्नामकीर्तनम् ॥ २३३ ॥
मुनिपृष्टविधानं च तन्मुन्यादेशकारणम् । भवत्पुत्रसुतस्तीर्णो भविष्यति विसंशयम् ॥ २३४ ॥
मुनिं दृष्ट्वा तपः साधु प्रकरिष्यत्ययं लघु । नैमित्तिकोदितं सत्यं समस्तभुवनातिगम् ॥ २३५ ॥
महाकालस्य चोपान्ते पादोगमनवस्तुना । साम्यत्वं मुनिर्धीरस्तदा स्वकआप्यया ॥ २३६ ॥
अन्यदा मुनिसंघानां तत्रत्यानां घनागमे । योगग्रहणमेतेषां नानायमहदग्घरिमाम् ॥ २३७ ॥
स्वाध्यायपठनारम्भे सगृहे च प्रवेशनम् । साधूनां साधुवृत्तानां निषिद्धं सदरे स्फुटम् ॥ २३८ ॥
चातुर्मासावसाने च प्रशस्तिपठने कृतम् । श्रुत्वा सविनयं तेषां दीक्षादिस्मरणं तथा ॥ २३९ ॥
मुनिसामीप्यसंप्राप्तिर्मुनिरीक्षादिविस्मया । अवन्तीसुकुमालेन स्वायुषः परिपृच्छनम् ॥ २४० ॥
मुनिभाषणमेतस्य दिवसत्रयजीवनम् । स्वयमेव प्रबोधस्तु स्वयमेव च दीक्षणम् ॥ २४१ ॥
महाकालस्य चोपान्ते चीरवृक्षस्य मूलतः । प्रत्याख्यानं मुनेरस्य यावज्जीवं सुचेतसः ॥ २४२ ॥
मेरुवत्स्थिरचित्तस्य ध्यानाचलनिवासिनः । कषायहीनचित्तस्य शयनं मृतकासना ॥ २४३ ॥

1 पर श्रेष्ठीन्द्रक 2 पक सुधी. 3 अ हम्यो तत 4 पर समाभिर्दं 5 परत्र सुकुमारन.

अग्निभूतेः प्रिया याासीत् सोमदत्ताऽन्यजन्मनि । तत्पुत्रो नागशर्मा च सोमभूतिरपि स्फुटम् ॥२४४॥
सुमित्रो महामानी चाग्निभूतिस्तपो दधौ । श्रुत्वा धर्म मुनेः पार्श्वे श्राम्यति स्माजवंजवम् ॥२४५॥
विधाय पुत्रसंमुक्त्य संसारपरिहिण्डनम् । सोमदत्ताऽभवद् भूपा महाकालवने शिवा ॥ २४६ ॥
नागशर्मादयो भ्रान्त्वा चत्वारोऽपि भवार्णवम् । तच्छिवानन्दना जाता पापकर्मानुभावतः ॥२४७॥
दिनानि सप्त सद्मास्ते तदानीं पातवाटे । क्षुधापम्पापरिभ्रान्ता निजबालकसंयुता ॥ २४८ ॥
पूर्ववैरानुबन्धेन तत्पादरुधिरं तदा । सा शिवा पातुमारब्धा सुकुमालमुनेरियम् ॥ २४९ ॥
खादयन्त्या तदा पादं तन्मुनेः शिवया तदा । समाधिमरणेनाय यक्षे काले दिनत्रये ॥ २५० ॥
विमाने नलिनीगुल्मे नाके चाच्युतनामनि । द्वाविंशतिसमुद्रायुः सुकुमालोऽमरोऽभवत् ॥ २५१ ॥
तस्याश्चतुर्थके यामे रजन्या देवनिस्वनः । श्रवणं तच्छरीरस्यसमागमनमत्र च ॥ २५२ ॥
भूयोऽपि तदलङ्कारत्यजनं दर्शनं ततो । शिठापकरणं तासां नितान्तं हतचेतसाम् ॥ २५३ ॥
अभ्यर्थ्ये विधायाशु जनन्या सह दीक्षणम् । तपः कृत्वा समाधानाद् देवलोकसमागमः ॥२५४॥
सुकुमालमुनौ नूनमच्युतं कल्पमाश्रिते । एतत्सर्वं प्रवक्तव्यं नितरां कुशलैर्नरैः ॥ २५५ ॥[1]
श्रीमदुज्जयिनीतोऽयं दक्षिणद्वारगोचरः । लोकमार्गमतिक्रम्य स प्रदेशो विराजते ॥ २५६ ॥
यत्रावन्तीसुकुमालोऽयं यत्र कालगतो मुनिः । कापालिकैः प्रदेशोऽसौ रक्ष्यतेऽद्यापि पुण्यभाक् ॥२५७॥
तत्र कापालिकानां च दत्त्वा मूल्यं बहु स्फुटम् । पुण्यबुद्ध्या दहन्त्येते मृतकानि महाजनाः ॥२५८॥
देवैर्गन्धोदके मुक्ते तस्मिन् काले मृते मुनौ । सुगन्धीभूतसर्वाङ्गा जाता गन्धवती नदी ॥२५९॥
सप्तधर्मामितरां तत्र कृते कलकले सति । बभूव लोकविख्यातो देवः कलकलेश्वरः ॥ २६० ॥

॥ इति श्रीअवन्तिसुकुमालमुनिकथानकमिदम् ॥ १२६ ॥

*

१२७ सुकोशलकथानकम् ।

विनीताविषये चास्ति कोशला नगरी वरा । प्रजापालो नृपस्तस्यां तत्प्रिया सुप्रभा प्रभा ॥ १ ॥
इभ्यः सिद्धार्थनामासीत् तच्छ्रेष्ठी राजवल्लभः । द्वितीयं तस्य नामेदं दिव्यं धनपतिः पतिः ॥ २ ॥
द्वात्रिंशद्वनितास्वामी द्वात्रिंशद्धनकोटिकः । तन्मध्ये वल्लभाऽस्यैषा जयावतिरङ्गना ॥ ३ ॥
भार्यया तया सुतोत्पत्तिं जयवत्या सहान्यदा । संतस्ये प्रीतचेतस्कः सिद्धार्थः सौधमस्तके ॥ ४ ॥
एवं हि तिष्ठतस्तस्य श्रेष्ठिनः प्रीतचेतसः । प्रासादशिखरे रम्ये सुधाशुभ्रीकृताम्बरे ॥ ५ ॥
उत्क्षिपन्ती शिरः प्रीत्या सख्या स्वर्णशलाकया । केशमध्येऽस्मिन्नवकाशे ददर्श पलिताङ्कुरम् ॥ ६ ॥[2]
जगाद मुष्टिमध्येऽसु तत्प्रिया निजनाथमिति । दूतः समागतो नाथ स्वदन्तं किं न पश्यसि ॥७॥
निशम्य तद्वचः श्रेष्ठी सिद्धार्थोऽपि सविस्मयः । दिशोऽवलोकनं कृत्वा जगादेमां स्ववल्लभाम् ॥८॥
देवि देवि कुतो दूतः प्राप्तोऽसौ कस्य वल्लभे । विलोकितोऽधुना यो मे सर्वत्रैव न दृश्यते ॥ ९ ॥
करं प्रसार्य सा देवी यथाप्येनं सकौतुका । नृपदूतं न पश्यामि धर्मदूतं वदामि ते ॥ १० ॥
एवं निगद्य तत्पत्नी विस्मयव्याकुलमानसा । दर्शयामास तं देवी निजहस्ताग्रव्यवस्थितम् ॥ ११ ॥[3]
दृष्ट्वा पलितमेकं स विद्याधरयुगं तथा । जातिस्मरत्वमासाद्य प्रव्रज्यां कर्तुमुत्थितः ॥ १२ ॥
अत्रान्तरे समागत्य मन्त्रिमित्रैरिमिराददात् । तपः कुर्वन् सुसिद्धार्थो वारितस्त्वदितेन्यया ॥ १३ ॥

1 [वर्धते]. 2 पफज्ञ पञ्चकमित्रम्. 3 पफज्ञ पुत्रकमित्रम्. 4 पफज्ञ पुत्रकमित्रम्. 5 पफ पुत्रमित्रकम्.

भवांश्च समायातो द्रष्टुकोऽनुक्रमेण हि । महापुरुषसंघानामाधारः प्रथितो भुवि ॥ १४ ॥
भवान् सोऽधुना नाथ तपः कर्तुं समिच्छसि । निर्मूलत्वं क्षयं याति वह्निदग्धस्तरुर्यथा ॥ १५ ॥
तेन त्वं तिष्ठ तावत्त्वं भुञ्जानो भोगसुत्तमम् । यावत् प्रजायते पुत्रः प्रीणिताशेषबान्धवः ॥ १६ ॥
मन्त्रिवाक्यं समाकर्ण्य सिद्धार्थः शिथिलात्मकः । जगाद सचिवान् सार्धं वैराग्याहितमानसः ॥ १७ ॥
भवद्वचनतस्तावत् तिष्ठामि गृहसंगतः । यावत् पुत्रं न पश्यामि समुत्पन्नं कुलध्वजम् ॥ १८ ॥
उत्पन्ने पुनः पुत्रे कुलदीपे जनोत्सवे । मयाऽवश्यं तपो घोरं विधातव्यं निःस्पृहत्वे ॥ १९ ॥
निशम्य वचनं तस्य मन्त्रिभिर्हृष्टमानसैः । प्रक्षिप्तं कल्याणानेकोपविस्फारितेक्षणैः ॥ २० ॥
अन्यदा श्रेष्ठिनो भार्या पुत्रार्थं यक्षपूजनम् । कुर्वाणा मुनिना प्रोक्ता दिव्यज्ञानैकचक्षुषा ॥ २१ ॥
भाविके लौकिका देवाः पुत्रं सौख्यं धनं तथा । वितरन्ति न लोकेभ्यो जैनो धर्मो ददात्यलम् ॥ २२ ॥
तेन त्वं लौकिकान् देवान् धर्मानपि विहाय च । तिष्ठ संतोषसंयुक्ता जिनशासनभाविता ॥ २३ ॥
अद्यप्रभृति सर्वस्व सप्तमे दिवसे सति । त्वद्गर्भे नन्दनो भावी नन्दिताशेषबान्धवः ॥ २४ ॥
ततो देवी विहायेमं मिथ्यात्वं मुनिवाक्यतः । सवाक्कायमनःसंगं तस्थौ सम्यक्त्वभूषिता ॥ २५ ॥
उद्योतयन् दिशां चक्रं सूर्यो वा तनुतेजसा । जयमत्या सुतो जातः सर्वलक्षणभूषितः ॥ २६ ॥
न परं कोऽपि वार्तां स्वगृहे पत्तनेऽप्यवेत् । आश्चर्यं श्रेष्ठिनी सा च कस्यचिदपि शासति ॥ २७ ॥
एवं दिनेषु गच्छत्सु कदाचिद्दैवयोगतः । चेटिकैका विनिर्याता बहिरन्तःपुरादरम् ॥ २८ ॥
द्वितीया चेटिका चैतां वदति भीतमानसा । पश्य पश्य गूढे जातो जयमत्याः शरीरजः ॥ २९ ॥
न परं स्वगृहे कोऽपि तथा राजकुले पुरे । जयमत्या महादेव्या पुत्र जात जगौ सुता ॥ ३० ॥
महाद्वारस्थितेनेन कुसुमाक्रान्तचेतसा । सोमशर्मद्विजेनेदं तदा तद्वचनं श्रुतम् ॥ ३१ ॥
श्रुत्वा तद्वचनं ह्यो दिनेऽन्यस्मिन् स ब्राह्मणः । जीवपुत्रकमादाय करे श्रेष्ठिगृहं ययौ ॥ ३२ ॥
विलोक्य श्रेष्ठिनं विप्रो जगाद प्रीतमानसः । जयमत्याः सुतः श्रेष्ठिन् समुत्पन्नस्तव प्रभो ॥ ३३ ॥
सोमशर्मवचः श्रुत्वा सिद्धार्थः पुलकाञ्चितः । वस्त्राद्यं प्रदायास्मै ददौ ग्रामञ्च पुनः ॥ ३४ ॥
कृत्वा तत्पूजनं श्रेष्ठी गत्वा जयमतीगृहम् । दृष्ट्वा पुत्रमुखं चाशु तुतोष सुतसंगतः ॥ ३५ ॥
जिनस्य पूजनं कृत्वा मन्त्रपुण्याक्षतादिभिः । [illegible]भिधं नाम चकार तनयस्य सः ॥ ३६ ॥
श्रेष्ठिनो दारके जाते विनीतविषयेऽखिले । बभूवानन्दसंतोषसंपदा जनपदस्य च ॥ ३७ ॥
अत्यन्तकोपमासाद्य सिद्धार्थतनयस्य सः । सुकोशलाभिधं नाम ददौ नागरिको जनः ॥ ३८ ॥
अत्रान्तरे महात्मासौ सिद्धार्थो राजसत्तमः । श्रेष्ठिपदं बबन्धाशु सुकोशलसुतस्य सः ॥ ३९ ॥
सामन्तैर्बन्धुभिः सार्धं तथा श्रेष्ठिसुतैरपि । जिनधर्मसामीप्ये श्रेष्ठी येन तपोऽग्रहीत् ॥ ४० ॥
हित्वा जयमतिं भार्यां श्रेष्ठिनोऽन्याः शुभेतराः । जिनधर्मपरमानम्य मुमुक्षान्ते प्रपन्नकाः ॥ ४१ ॥
ततो निजगृहे कोपाज्जयमत्या विषण्णया । मुनीनां साधुवृत्तीनां प्रवेशो हि निवारितः ॥ ४२ ॥
ततो जयमतिर्धृत्वा सिद्धार्थस्योपरि क्रुधम् । तस्थौ कन्दर्पसंततस्था मौनसौम्यविधिष्ठिता ॥ ४३ ॥
यौवनेन समारूढं मा तनूजं भिक्षुं यथा । हित्वाऽन्यं निर्धनसान्ताः श्रमणानां मतं भितः ॥ ४४ ॥
सुकोशलकुमारस्य कुर्वती सकलाः क्रियाः । तद्विभूतीः प्रपश्यन्ती तस्थौ जयमतिः सुखम् ॥ ४५ ॥
सुकोशलकुमारस्य सुनन्दा स्तनपायिका । नन्दा रमणदा धात्री सुमतिर्भोजनप्रदा ॥ ४६ ॥
सुमना मानदा धात्री वेषस्य मण्डनप्रदा । एताभिः पञ्चभिस्तत्र वृद्धिं नीतः सुकोशलः ॥ ४७ ॥

1 पपठज निष्क्रमिष्यम्, 2 पपठज निष्क्रमिष्यम्, 3 पपठज [illegible], 4 पपठज [illegible], 5 ज [illegible] 6 फ [illegible]

सुकोशलकुमारेण विप्रता यौवनं घनम् । परिणीता विधानेन द्वात्रिंशद्वरकन्यकाः ॥ ४८ ॥
सुकोशलकुमारस्य भोगसंसक्तचेतसः । नैमित्तिकवचःस्मारेणमात्रेदं कृतनिश्चयम् ॥ ४९ ॥
पितृरूपं यदा बालो द्रक्ष्यति प्रीतमानसः । तदा निर्ग्रन्थतां प्राप्य तपः साधु करिष्यति ॥ ५० ॥
ततो धैर्यं समासाद्य जयमत्या स्वमन्दिरे । भिक्षार्थमपि साधूनां प्रवेशो विनिवारितः ॥ ५१ ॥
कारापिता कुमारार्थं स्वगृहाजिरगोचरा । जयमत्या च वापाली हरिहस्तिक्रमोचिता ॥ ५२ ॥
एकत्रिंशत्तु पञ्चपद्सप्ताष्टकभूमिकाः । प्रासादा विधुसंकाशाः कारिता बहवोऽनया ॥ ५३ ॥
तन्मध्ये पृथिवीसारे प्रासादे गगनस्पृशि । तस्थौ सुकोशलः प्रीत्या मातृधात्र्यादिसंयुतः ॥ ५४ ॥
अथ मध्याह्नवेलायां भिक्षार्थं मुनिपुंगवम् । अस्थिचर्मावशेषं च युगान्तनिहितेक्षणम् ॥ ५५ ॥
मासोपवासिनं धीरं प्रविशन्तं स्वमन्दिरे । सुकोशलो ददर्शैनं प्रासादशिखरस्थितः ॥ ५६ ॥[1]
दृष्ट्वाऽमुं स्वगृहं प्राप्तं विस्मयव्याप्तमानसः । सुकोशलो विनीतात्मा पप्रच्छेदं स्वमातरम् ॥ ५७ ॥
अम्ब किंनामधेयोऽयं पुरुषः प्राप्य मद्गृहम् । भूयो विनिर्गतः कस्मात् कथयैतन्ममाधुना ॥५८॥[2]
सा कौशलं वचः श्रुत्वा शोकक्षेपसमन्विता । जगौ जयमतिः पुत्र तदानीं सुखमानसम् ॥ ५९ ॥
पुत्र कोऽपि नरोऽनन्योऽनाथः स्वजनवर्जितः । धनभक्तपरित्यक्तो भिक्षामप्राप्नुवन् क्वचित् ॥६०॥
समस्तनगरं भ्रान्त्वाऽदत्तदानो गहिल्लकः । प्रविष्टो मद्गृहं तात भ्रमणो दृष्टमत्तकः ॥ ६१ ॥
श्रुत्वा जयमतीवाक्यं सुव्रता नाम धात्रिका । जगाद स्वामिनीं तुष्टां मुनिविद्वेषकारिणीम् ॥ ६२ ॥
मुनिहीलनसंयुक्तं वचनं तव भाषितुम् । नूनं जयमति क्रूरं न मनागपि युज्यते ॥ ६३ ॥
त्वदीयकुलसंभूता बहवः श्रेष्ठिनन्दनाः । तथा राजसुता हित्वा विभूतिं तृणवत् क्षितौ ॥ ६४ ॥
विहाय सकलं संगं भोगनिःस्पृहमानसाः । महावैराग्यसंपन्ना प्रविश्य हि तपोवनम् ॥ ६५ ॥
प्राणधारणार्थं[4] च भिक्षां गृह्णन्ति साधवः । ग्रामादौ[5] शुद्धचेतस्का जिनधर्मपरायणाः ॥ ६६ ॥
तेनेदं हीलनं वाक्यं मुनीनां शुद्धचेतसाम् । योयुज्यते न ते वक्तुं संसारार्णवकारणम् ॥ ६७ ॥
धात्रिकाया वचः श्रुत्वा सुव्रताया जगौ सखी । तूष्णीभावं समासाद्य तिष्ठ त्वं धात्रिके द्रुतम् ॥६८॥
स्थितायां मौनभावेन तस्यां जयमतीरणात् । जगाद सुप्रभाभिख्या धात्री वचनमादरात् ॥ ६९ ॥
व्यापैर्ध्यवनैर्मुक्तं शरीरं योगिनामिदम् । जायते न सौख्यस्य कारणं जयति ध्रुवम् ॥ ७० ॥
यतो येन दृश्यन्ते रागद्वेषमपापका । व्यापैर्ध्यवनैर्मुक्ता धीराः शुद्धाः सुमेधसः ॥ ७१ ॥
व्यापैर्ध्यवनैर्मुक्तास्तथाऽन्ये श्रेष्ठिसूनवः । पुण्यहीना हि ते भिक्षां न लभन्ते कदाचन ॥ ७२ ॥
भद्रमारी यथैकोऽत्र क्रीत्वा काष्ठानि दुःखितः । भाण्डाय दुर्बलः पापो भोजनार्थं भ्रमत्तरम् ॥७३॥
लिङ्गिवेषं समादाय तयोर्वा पुत्रिकोऽपि वा । येनेन येन येनापि पंक्तयष्टिः पुरान्तरे ॥ ७४ ॥
अत्रैव नगरे श्रेष्ठी विद्यते भीमनामकः । वर्जितो बन्धुभिर्दीनो धननीजनकादिभिः ॥ ७५ ॥
पुण्यहीनस्तरां सोऽयं पापवशाद्धनं धनम् । सुधानसत्पुरे भिक्षां भ्राम्यति स निरन्तरम् ॥७६॥
अन्यः शाकनिकस्तत्र[7] पितामहस्योऽभवत् पुरे । दत्त्वा शाकं धनं सोऽयं गृह्णाति धनहस्ततः ॥७७॥
धनं दत्त्वा जनाधारो गृह्णाति कनकं परम् । भारविक्रेण तत्सर्वं गृहीतं यक्षोऽद्भुतः ॥ ७८ ॥
यदि वेषं समादाय भोजनाभावतः सकः । भिक्षार्थं नगरं सर्वं भ्राम्यति क्षपयोज्झितः ॥ ७९ ॥
कुमार तेन जानीहि लोके नानाविडम्बनाः । एवमाद्याः प्रदर्श्यन्ते नराणां पुण्यतो विना ॥ ८० ॥
कारणेनामुना वत्स सत्यं जानीहि मद्वचः । अतः स्थिरमतिर्भूत्वा कुरु राज्यं सुखप्रदम् ॥ ८१ ॥[8]

1 पफ सुलक्षणीश्च, ज सुलक्षणा. 2 पफज सुगम्य. 3 पफज त्रिदशभीश्वरम्. 4 [प्राणसंधारणार्थं]. 5 फ भ्रमातो. 6 पफज भद्रमुखभीमस्य. 7 [शाकविक्रेता]. 8 [illegible]

निशम्य तद्वचस्तत्र चित्ते दध्यौ सुकोशलः । महाधनमिदं लोकैः कृतं मक्खनीमत्वात् ॥ ८२ ॥
यावदेवं कुमारोऽयं ध्यायति क्षणमात्रकम् । तावदागत्य वेगेन सूपकारेण भाषितः ॥ ८३ ॥
देव भोजनवेला च सांप्रतं वर्तते तव । क्रियतां भोजनं स्वच्छशरीरस्थितिकारणम् ॥ ८४ ॥
तथा यथमसन्निर्मीता धात्रिका सुमतादिका । तद्भार्या रूपसंपन्ना नामानीमानि बिभ्रति ॥ ८५ ॥
स्वयंप्रभा मता पूर्वं श्रीदत्ता श्रीसमप्रभा । तथा मित्रमती चार्या सुप्रभा सेनयाऽन्विता ॥ ८६ ॥
चन्द्रसेनया सार्धं सोमश्री श्रीमती परा । तथा चन्द्रमती सेना भानुमित्रा रविप्रभा ॥ ८७ ॥
प्रियङ्गुसुन्दरी चान्या प्रिया प्रियमती परा । श्यामा श्यामलतामिख्या वरा विद्युल्लता वत्र ॥८८॥
चित्रलक्ष्मीस्तिरीक्षा श्रीकान्ता श्रीसमप्रभा । सुषेणा परा दिव्या तथा धनमती प्रिया ॥ ८९ ॥
विजया वैजयन्ती च सर्वमालाऽपराजिता । दमयन्ती केतुमाला धनश्रीर्धन्यया सह ॥ ९० ॥
चन्द्रश्रीरिति सर्वासी रमणीभिः प्रचोदितः । विधाय मज्जनं नाथ भोजनं कुरु सांप्रतम् ॥ ९१ ॥
श्रुत्वा तद्वचनं तत्र कौतुकव्यासमानसः । जगादेदं पुनः क्षीणं तदभ्यर्थं सुकोशलः ॥ ९२ ॥
यावदेवद् विज्ञातं समस्तं वस्तु सत्वरम् । तावन्मयोदितं भक्तं विदधामि न भोजनम् ॥ ९३ ॥
तेनेदं धन्यया एष रूपस्थ मनस्विनि । निवेदय मम क्षिप्रं सुमते तथ्यवाक्यतः ॥ ९४ ॥
कुमारवचनं श्रुत्वा धात्रिका प्रथमा तदा । जगाद सुमतामिख्या तद्वृत्तान्तं यथागतम् ॥ ९५ ॥
त्वत्पिता पुत्र सिद्धार्थो यो चाऽऽसीत् तव सद्गुणम् । श्रेष्ठिपदं प्रदत्त्वाऽसौ निःस्पृहो मुनितामितः ॥९६॥
तन्मन्दिरेऽद्य भिक्षार्थं प्रविष्टः क्रमतोऽद्भुतः । भूयो विनिर्गतस्तात तपःक्षोभितविग्रहः ॥ ९७ ॥
तव जनन्यादेशेन द्वारपालैर्निराकृतः । अन्तरायो मुनेरस्य जातः संक्रुद्धचेतसः ॥ ९८ ॥
सुमत्यावाक्यमाकर्ण्य जगादेवं सुकोशलः । मयाऽपि मुनिरूपेण भोक्तव्यं नान्यथा पुनः ॥ ९९ ॥
एवं निगद्य तां वेगाद् विनिर्गत्य निजमन्दिरात् । ददर्श प्रासुकोद्याने तं यतीशं सुकोशलः ॥ १० ॥
विमुक्तक्लेशपर्यं तं विलोक्य सहसा मुनिम् । जातिस्मरो बभूवाशु कुमारस्तुष्टमानसः ॥ १ १ ॥
तद्गुरोऽनेन विज्ञाता मया पञ्च स्वगोचराः । यथाक्रममिमे सर्वे ससारत्रस्तचेतसा ॥ १ २ ॥
सिंहचन्द्रो नगोत्तुङ्गो यती मल्लमुनिस्वरः । तदन्यमूर्त्य हस्ती सिद्धार्थो मल्लनोदकः ॥ १०३ ॥
पद्मावती च सा तस्य बभूव मल्लाऽपि च । याभ्यां सह मुदा तत्र रममाणस्य सर्वदा ॥१०४॥
यमान्तरे विलोक्यैषा मल्ला तं स्वा मये । पद्मावती सहाश्वर्तं दीव्यन्तं निजलीलया ॥१०५॥
ईर्ष्यामहाभरप्रस्ता मल्लापद्मसरस्तटात् । पातं विधाय सा क्षिप्रं ममार विधियोगतः ॥ १ ६ ॥
अङ्गवत्समहादेशे महाचम्पापुरीमध्ये । सम्यक्त्वगुणाधारो राजाऽऽसीद् गन्धवाहनः ॥ १०७ ॥
दर्शनाभुक्तं शीलं गुरुसेवागुणार्णवम् । जिनप्रवचनप्रवीणत्वं सम्यक्त्वानाम्यमूल्यकम् ॥ १०८ ॥
कैलासकूटसंकाशं जिनायतनमुत्तमम् । सहसोपगतं कूटं तेन कारापितं भुवि ॥ १०९ ॥
सुता सागरदत्तस्य सुरूपा नाम विश्रुता । वितीर्णा नागदत्ताय पित्रा चम्पापुरीमध्ये ॥ ११० ॥
तस्या गर्भे समुत्पन्ना केशिनी नाम कन्यका । पद्मावती स्वयं पश्चादियं सत्सुखमागता ॥ १११ ॥
जातोऽसुतः सुरूपायाः पुनः कर्मानुभावतः । वरवाहो धनसंपन्नः श्रेष्ठी भुवनविश्रुतः ॥ ११२ ॥
अन्यदा मधुमासे च दृष्ट्वा जिनचरालये । सुकेशिनीमिमां राजा पप्रच्छान्यं कुतूहलात् ॥ ११३ ॥
कस्येयं रूपसंपन्ना विपाकदलोचना । कुमारी भूरि मे प्रीतिं मनसानन्ददायिनी ॥ ११४ ॥

1 [विद्युल्लताख्या]. 2 पपत्र पद्मावत्यम्. 3 पपत्र विमलमतिम्. 4 पपत्र विमलमतिरः 5 पपत्र सुनमम्. 6 पपत्र सुनमम्.

श्रुत्वा तद्वचनं सोऽपि चचाणेमं सकौतुकम् । सुतेयं नागदत्तस्य श्रेष्ठिनस्तव भूपते ॥ ११५ ॥
निशम्य भारतीमस्य विस्मयव्याप्तचेतसः । सहस्रकूटतो राजा निर्जगाम बहिर्द्रुतम् ॥ ११६ ॥
सम्पूर्णयौवनां दृष्ट्वा कन्यामेतां धनाधिपः । स्वरूपां प्राह कस्माय वक्ष्यामि वद सांप्रतम् ॥ ११७ ॥
निशम्य तद्वचः साऽपि चचाणेमं पुरःस्थितम् । मह्यमप्युत्तमुतायेयं जितशत्रोय दीयताम् ॥ ११८ ॥
सुरूपावचनं श्रुत्वा मन्त्रिणा सपुरोहितः । नागदत्तान्तिकं तूर्णं वरणार्थं विसर्जितः ॥ ११९ ॥
केनापि तत्समीपस्थं गत्वाऽयं विनिवारितः । सोऽपि तद्वाक्यतस्तस्थौ भूपालवचनानुगः ॥ १२० ॥
ततः स्वनरवाक्येन कोपकम्पितविग्रहः । कन्यावरणतो राजा श्रेष्ठिगेहं ययौ क्षणात् ॥ १२१ ॥
कृत्वा विनमनं श्रेष्ठी गन्धपुष्पाक्षतादिभिः । गन्धमादनभूपाय प्रददौ तां स्वकन्यकाम् ॥ १२२ ॥
तत्र चत्वारि वर्षाणि तया सार्धं महीपतिः । काममोगान् प्रभुञ्जानस्तस्थौ मुदितमानसः ॥ १२३ ॥
कलिङ्गाधिपती राजा हस्तिसंक्षोभणे सति । वनहस्तिप्रवेशार्थं वारिवन्धं ययौ द्रुतम् ॥ १२४ ॥
वारिबन्धान्तरं दृष्ट्वा विभ्रान्तं वनहस्तिनम् । सुकेशिन्या स पप्रच्छ धात्रिकां धरणीपतिः ॥ १२५ ॥
निशम्य भूपतेर्वाक्यं जगौ धात्री नराधिपम् । राजन् हस्तिसमूहं हि सुकेशिन्याः प्रदर्शय ॥ १२६ ॥
भो भो चित्रकर स्पष्टं विधाय मणिकुट्टिमे । हस्तियूथं महादेव्यै त्वं प्रदर्शय सांप्रतम् ॥ १२७ ॥
एवं निगद्य तं राजा सन्मान्य धनसंपदा । द्रुतं प्रेषयामास महादेवीसमीपकम् ॥ १२८ ॥
स्पष्टं चित्रकरः सद्वस्तुलिकाभिर्विधाय सः । हस्तियूथं सजीवं वा दर्शयामास तत्पुरः ॥ १२९ ॥
नियपूर्वमवोपेतं हस्तियूथं मनोहरम् । सुकेशिनी प्रपश्यन्ती तस्थौ मुदितमानसा ॥ १३० ॥
अत्रान्तरे चिरं रन्त्वा नृपतिर्वनहस्तिना । कृत्वाऽङ्कुशं स्ववशं तस्मादाजगाम प्रियान्तिकम् ॥ १३१ ॥
ततः सुकेशिनीपार्श्वात् समायातं नरं नृपः । पप्रच्छ तोषसंजातरोमाञ्चाञ्चितविग्रहः ॥ १३२ ॥
भो भो नर मया दान्ते नितान्तं वनहस्तिनि । सुकेशिनी वद क्षिप्रं सतुष्टा किं ममोपरि ॥ १३३ ॥
नरेन्द्रवचनं श्रुत्वा स नरः प्राह भूपतिम् । न सा संतोषमायाता प्रत्युतैवं जगाद च ॥ १३४ ॥
मल्यं प्राप्य किं कान्तो दान्त्वा मलयसुन्दरम् । हस्तिनं भूधराकारं गजलक्षणलक्षितम् ॥ १३५ ॥
येनेमं कुम्भिनं दान्त्वा मेघकोपमविग्रहम् । मदन्तिकं नरं कान्तः प्राहिणोतीति मेदद्वयी ॥ १३६ ॥
आकर्ण्य तद्वचो राजा मानसैक्लमधिष्ठितः । स्वसैन्यसमुदायेन जगाम मलयाचलम् ॥ १३७ ॥
तत्राऽतिरथमाहूय महाभटसुभाप च । क्षिप्रमानय स्पष्टं गजं मलयसुन्दरम् ॥ १३८ ॥
नृपवाक्यं समाकर्ण्य स भटो बहुभिर्भटैः । जगामान्तिकमेतस्य गजस्य मदमुद्वहन् ॥ १३९ ॥
दूराद् विलोक्य तं नागं भयवेपितविग्रहाः । वशीकर्तुमशक्तास्ते नृपान्तं पुनरागमन् ॥ १४० ॥
विलोक्य भूपतिः सर्वांश्चरान् स्वान्तिकमागतान् । उवाचेदं पुनः कोपात् स्फुरदधरसरोरुहान् ॥ १४१ ॥
रेरे शठं दुराचारं हत्वा तं करिणं नराः । क्षिप्रमानीयतां सार्धं तन्मौक्तिकरदानपि ॥ १४२ ॥
नृपाज्ञां ते परिप्राप्य हत्वा तं करिणं रणे । तन्मौक्तिकानि दन्तौ च समर्पयन्नृपतेः पुरः ॥ १४३ ॥
आदाय भूपतिस्तस्मान्मौक्तिकानि रदानपि । चम्पापुरीं जगामाशु तोषपूरितमानसः ॥ १४४ ॥
आदाय निजहस्तेन नरेन्द्रः प्रीतमानसः । सुकेशिन्यै ददौ तूर्णं तन्मौक्तिकानि रदानपि ॥ १४५ ॥
सुकेशिनी समालोक्य तन्मुक्ताफलदन्तकान् । सपादुभ्यां ममाराशु मोहतः किं न जायते ॥ १४६ ॥
चेष्टितमिदं ज्ञात्वा कोविदाश्चर्यकारणम् । तस्थौ विस्मितचेतस्को राजाऽप्य गः समादनः ॥ १४७ ॥

---

1 [घनिनयमान]. 2 पफज सुप्समीरम, 3 ब रोमाञ्चानिते 4 पफज सुगस्मीरम, 5 पफ मेरुदे॰ 6 पफज मिक्कमिरम, 7 पफ °दन्तिभम,

विदित्वाऽऽश्चर्यमेतस्या नागदत्ताख्यरूपया । प्रियङ्गुश्रिया सार्कं वराङ्गोऽपि महामना ॥ १४८ ॥
जिनधर्मसुपाश्रुत्य वैराग्याहितमानसः । यशोधरसकाशे च चत्वारोऽपि प्रवव्रजुः ॥ १४९ ॥[1]
नत्वा केवलिनः पादौ भक्त्या विस्मयमानसः । सुकेशिनीसुतं चाशु पप्रच्छ धरणीपतिः ॥ १५० ॥
भूपालवचनं श्रुत्वा यशोधरमुनीश्वरः । सुकेशिनीभवानस्य जगादेति महीभृतः ॥ १५१ ॥
दक्षिणापथदेशोऽस्त्यथ मधुरानगरी मता । वसति गन्धर्वभूपालो गन्धर्वरथभूपतिः ॥ १५२ ॥
तस्यैव भूपतेः श्रेष्ठी बभूवार्थे सुदर्शनः । रूपयौवनसंपन्ना वीरश्रीरस्य गेहिनी ॥ १५३ ॥
प्रियङ्गुदर्शनाभिख्यो नन्दनो बन्धुनन्दनः । अन्योन्यप्रेमसम्पृक्तसख्यमेतयोरनयोरभूत् ॥ १५४ ॥
तस्मिन्नेव पुरे श्रीमान् वणिक्श्रेष्ठी प्रियंवदः । बभूवास्य प्रिया दिव्या विजया पद्मपद्मा ॥ १५५ ॥
रूपनिर्जितसर्वाङ्गी सर्वलोकमनोहरी । कलाकौशलनिष्णाता कीर्तिनामा सुताऽनयोः ॥ १५६ ॥
तूर्यमङ्गलनिस्वानैर्वितीर्णा जनकेन च । प्रियङ्गुदर्शनायैषा परिणीता विधानतः ॥ १५७ ॥
अन्यदा वारिबन्धेन बद्धो वनगजो महान् । गन्धर्वप्रभुणा नीलस्कन्धपुरावनवर्तिना ॥ १५८ ॥
प्रशस्तेव दिने सर्वैरध्यक्षसमागतम् । महीधरसमुत्तुङ्गं रूपिणं वनकुञ्जरम् ॥ १५९ ॥
पारिषदं विलोक्यैनं कीर्तिपर्याससमन्वितः । [2]प्रियङ्गुदर्शनस्तोपाविरत्नसमकरोत् तदा ॥ १६० ॥
गुणाढ्यसमारोप भीमसर्पेण कोपतः । प्रियङ्गुदर्शनो दृष्टः सद्भिर्विधिविमाय स ॥ १६१ ॥
मलयाद्रौ समुद्रे च पश्चिमार्णवरोधसि । महाचन्दनसद्गन्धवासिताशासमाकुले ॥ १६२ ॥
नीलाञ्जनसमच्छायो विभ्रद्विजमरन्दकः । प्रियङ्गुदर्शनो जातो हस्ती मलयसुन्दरः ॥ १६३ ॥
तत्रार्या कीर्तिसंज्ञा च कुन्दपुष्पसमप्रभा । बभूव वल्लभा तस्य मलया नाम हस्तिनी ॥ १६४ ॥
परस्परसुखासंभवत्कमानसयोस्तयोः । पूर्वजन्मानुबन्धेन बभूव प्रीतिरुत्तमा ॥ १६५ ॥
रक्तोत्पलसमानाया मन्दमन्दगतिक्रिया । पद्मावती बभूवास्य द्वितीया करिणी प्रिया ॥ १६६ ॥
मलयायै वितीर्याथो गतोऽयं पद्मादिकम् । पद्मावत्यै ददौ पश्चादनुक्रमविधानतः ॥ १६७ ॥
श्वेतरक्तसरोजाभ्यां यथा मध्ये व्यवस्थितम् । नीलोत्पलं तरां याति रमणीयत्वमञ्जसा ॥ १६८ ॥
श्वेतरक्ताभयोर्मध्ये करिण्योरनयोः स्थितः । तथाऽयं कुञ्जरो याति नीलनीरदसंनिभः ॥ १६९ ॥
नाम्ना सह गिरौ तत्र भुञ्जानो हस्तिनं सुखम् । तस्थौ मुदितचेतस्कः करी मलयसुन्दरः ॥ १७० ॥
अन्यदा तत्समं हस्ती पद्माकरसरोवरे । स्नात्वा पीत्वा जलं शीतं जग्राह कमलद्वयम् ॥ १७१ ॥
पद्मद्वयं समादाय करेण स करी पुनः । पश्यामि मलयास्येदं पौरुषं मयि तिष्ठते ॥ १७२ ॥
मलया वामपार्श्वे च पूर्वेण स्थापिताऽमुना । पद्मावती तथा तस्य दक्षिणा करिणी परम् ॥ १७३ ॥
मदविह्वलचित्तेन परमार्थमजानता । वितीर्णं प्रथमं पद्मं पद्मावत्यै हि हस्तिना ॥ १७४ ॥
मलयायाः पुनः पश्चाद् वितीर्णं नलिनं मुदा । निजहस्तेन तेनैव स्फुटेन विलासिना ॥ १७५ ॥
पश्चाद् वितीर्णमेतेन कमलं मम मानिना । पूर्वेण वञ्चिताऽस्मीति सदुःखा मलयाऽभवत् ॥ १७६ ॥
ईर्ष्यया सा च संभक्ता सपत्न्या गिरिमस्तकात् । कृत्वा निदानमत्यर्थं ममार मलया द्रुतम् ॥ १७७ ॥
ततो मृता सती पश्चान्मलया मलयाचले । अकामनिर्जरायोगेन समभूदिह सुकेशिनी ॥ १७८ ॥
हस्तिनीभिः समानीतं कृच्छ्रपरमं गजम् । पारिषदं नमोऽस्तुभ्यं विलोक्यैतं महागजम् ॥ १७९ ॥
जातिस्मरत्वमासाद्य विह्वलीभूतमानसा । मानसे दुःखसंपूर्णे ध्यायतीति सुकेशिनी ॥ १८० ॥
मम कमलदाता हि करी मदनसुन्दरः । शोकमस्तं चकारासौ मदविह्वलमानसः ॥ १८१ ॥

---

1 पपात्र दुष्क्रियम्, 2 चप प्रियङ्गुदर्शन

विस्मृत्य मां पुनर्भूर्तं पद्मावत्या समं सुखम् । भुङ्क्ते प्रीतचेतस्को नितरां व्यवतिष्ठते ॥ १८२॥
चिन्तयित्वा चिरं चेदं नृपश्चिन्तयतीप्सितम् । पद्मावत्या यथा याति वियोगं विदधे तथा ॥१८३॥
मध्यान्तरे नरो योऽस्य तदन्ते प्रेषितस्त्वया । दान्ते हस्तिनि मे पृच्छ किं सतुष्टा सुकेशिनी ॥१८४॥
समागत्य ततस्तेन पुरुषेण तथोदितम् । सुकेशिनी न सतुष्टा महाराज मनागपि ॥ १८५ ॥
तथोदितं यथा भद्र तिष्ठन् मलयपर्वते । पद्मावत्या समं हस्ती दान्तो मलयसुन्दरः ॥ १८६ ॥
प्रापयसि मां पृच्छां स्वनरेण यतो मम । तुष्टा सुकेशिनी भद्र न सतुष्टा यतो सकः ॥ १८७॥
सं ध्यापयितरां राजन् खेदेनातिगरीयसा । तदन्तं प्राप्य वेगेन पृच्छेदेतां सुकेशिनीम् ॥ १८८॥
देवी कोऽसौ क यास्यन्यो गजो मलयसुन्दरः । तिष्ठत्यत्र त्वया भद्रे क दृष्टो ब्रूहि मेऽधुना ॥१८९॥[1]
निशम्य तद्वचः स्पष्टं गूहयन्ती स्वभावरात् । बभाण दयितं भीता पुरस्थं सा सुकेशिनी ॥१९०॥
स्वामिन्नहमतिक्रान्ते भवेऽनुभ्रमिक्षगोचमे । विजयार्धेऽभवं नूनं खेचरी रूपशालिनी[2] ॥ १९१ ॥
दक्षिणापथमासाद्य प्रियेण सह सत्वरम् । मलयाद्रिं समुत्तुङ्गं प्राप्तया रमणीयकम् ॥ १९२ ॥
पद्मावत्या समं तत्र तदा क्रीडन् मदालसः । वनहस्ती मया कान्तो दृष्टो मलयसुन्दरः ॥ १९३ ॥[3]
तदानयत् स्वसैन्येन कृत्वोऽनहस्तेन सः[4] । मलयाद्रौ दृष्टोऽयं पद्मावत्या समं नृप ॥ १९४ ॥
दृष्टाऽहं भीषणाकारं द्विरदं स नराधिप । आदिदेश तदा क्रुद्धस्तद्वधार्थं नरान्तरम् ॥ १९५ ॥
ववल्गधावन्यत शीघ्रमायुधैर्मार्गणादिभिः । तद्वधैर्निहतो नागो गतायुर्भुवमागतः[5] ॥ १९६ ॥
विलोक्य त गजं भूमौ पतितं गतजीवितम् । मृता पद्मावती तूर्णं करमाक्रम्य पादयः ॥ १९७ ॥
तस्मिन् गजेश्वरे तत्र मृत्युगोचरतामिते । विमत्यय परं यक्षः पक्षिणोऽपि कृतस्वनाः ॥ १९८ ॥
तत्कुम्भतः समादाय मौक्तिकमम्यक्कयम् । करिदन्तद्वयं शीघ्रं चम्पामाप नरेश्वरः ॥ १९९ ॥
मौक्तिकानि करे दन्तौ तद्वक्षस्र कुतूहलात् । सुकेशिन्याः समायाया दर्शयामास भूपतिः ॥२००॥
विलोक्य मौक्तिकादीनि तद्वक्ष्य सुकेशिनी । महाशोकभराक्रान्ता दध्यौ मनसि दुःखिनी ॥२०१॥
तिष्ठन् सुखेन मद्भर्ता कुञ्जरो निबठील्या । भूपेन यमता नीतः कथं मद्वचनाद्धतः ॥ २०२ ॥
चिन्तयित्वा चिरं दीना तदानीं सा सुकेशिनी । तदन्तमौक्तिकादीनि परिरभ्य मृतिं ययौ ॥२०३॥[6]
दृष्ट्वा मृतां तदा तूर्णं राजाऽयं गन्धमादनः । पप्रच्छ योगिनं देवी क गोत्सन्ना भवद् भ्रमे ॥२०४॥
गन्धमादनभूपस्य निशम्य वचनं परम् । जगाद तद्वधं साधु केवलज्ञानलोचनः ॥ २०५ ॥
सुपदृविषये भानुनगरं गिरिपूर्वकम् । सद्ध्ययोऽतिरयो राजा गोमिनी तत्प्रियाऽभवत् ॥ २०६ ॥
रूपराजितसर्वाङ्गी सर्वलोकमनोहरी । सुकेशिनीचरी तस्याः सुता जाता मनोहरी ॥ २०७ ॥
तस्यैव नृपतेरासीद् विश्वपास्य पुरोहितः । कुबेरश्री प्रिया चार्वी फुल्लोद्भवदलोचना ॥ २०८ ॥
च्युत्वा कृत्वा तयोरासीत् करी मलयसुन्दरः । पुत्रः कुबेरकान्ताख्यः सर्वावयवसुन्दरः ॥ २०९ ॥
पद्मोत्तनगरे चासीद् राजश्रेष्ठी महाधनः । धनेश्वराभिधो भोगी धनश्रीरस्य सुन्दरी ॥ २१० ॥
च्युत्वा कृत्वा पराङ्गोऽपि रूपराजितविग्रहः । बभूव तत्सुत प्रेयान् श्रीधरः श्रीधराभिधः ॥२११॥
श्रीधरो जनतानन्दः सन्तापाङ्कितमानसः । अथ कुबेरकान्तस्य सुहृदत्यन्तवल्लभः ॥ २१२ ॥
कुबेरश्रीः प्रिया तस्य रक्तकम्पनकारणात् । प्रासादशिखरात् पातं विधाय मरणं श्रिता ॥ २१३ ॥

1 पपक्ष त्रिरूपमिदम्. 2 पप रूपशालिनी 3 ज पञ्चपुष्पकमिदम्. 4 पप omit the second line of No. 193 and the first line of No. 194. 5 पपक्ष पुष्पमिदम्. 6 पक्ष पञ्चपुष्पं 7 पपक्ष त्रिरूपमिदम्.

दृष्ट्वा शोकसमाक्रान्तं श्रीधरं सुहृदं तदा । जगौ कुबेरकान्तोऽसौ साध्वसः किं विषीदसे ॥ २१४ ॥
श्रुत्वा कुबेरकान्तस्य वचनं श्रीधरोऽप्यसुम् । जगाद विस्मितस्वान्तो म्लानवक्त्रसरोरुहः ॥२१५॥
क्षत्रिया कण्ठेनोर्वे कृत्वा पादुरर्प तनोः । जगाम स्वगृहं यत्र मत्तमातङ्गगामिनी ॥ २१६ ॥
दृष्ट्वा तदङ्गनां यान्तीं मन्त्रियेर्ष्यावशानुगा । जय प्रासादतः पातं विधाय मृतिमागता ॥ २१७ ॥
• श्रीधरस्य वचः श्रुत्वा प्रासादपतितामिमाम् । दृष्ट्वा कुबेरकान्तोऽपि जगादेमं सविस्मयः ॥२१८॥
यक्षस्य मन्त्रिया शीघ्रं मत्प्रापच्छमखकम् । पतित्वा मृतिमापन्ना सा प्रियेर्ष्यावशात् यथा ॥२१९॥
एवं कुबेरकान्तोऽपि यावद्वदति तत्पुरः । तावज्जातिस्मरो जातो विस्मयव्याप्तमानसः ॥ २२० ॥
तत्र कुबेरकान्तः स्वं चरितं पूर्वजन्मनि । निजपट्टे लिलेखाथ निजहस्तेन विस्मयन् ॥ २२१ ॥
ततो गृहीत्वा वेषं समादाय त्वरान्वितः । ऊर्जयन्तं नगं जातो मल्ल्यां मार्गयमाणो ॥ २२२ ॥
• विद्याधरस्वस्रेऽत्रैव ऊर्जयन्तधराधरे । विकुर्वणादिविद्यानामुपदेशं हि लब्धवान् ॥ २२३ ॥
मल्ल्या नाम चादाय तूर्णं वेगवत्तरम् । दृष्ट्वा मनोहरी कान्तं जाता जातिस्मरी तदा ॥२२४॥
ततो मनोहरी दृष्ट्वा नामधारामिधां सखीम् । तूर्णं प्रवेशयामास तत्पट्टं चान्तिकम् ॥ २२५ ॥
दृष्ट्वा कुबेरकान्तोऽपि तत्सखीं तद्विधेषिणीम् । तस्यै समर्पयामास तं पटं स्वमनोहरम् ॥२२६॥
पूर्वजन्मसमोपेतं तं पटं वीक्ष्य चाग्रतः । सखीसमर्पितं सद्यो मुमूर्च्छ मनोहरी ॥ २२७ ॥
• अथ कुबेरकान्तोऽपि वेषमामस्य तदा । हित्वा निजपट्टं कोपात् विवेश सद्याकृतिः ॥ २२८ ॥
दृष्ट्वा पट्टगतं तत्र विजयोऽपि जयप्रियः । सर्वं कुबेरकान्तं तं पप्रच्छेदं कुतूहली ॥ २२९ ॥
उन्मत्तकः कथं जातः पुत्र सज्जनवल्लभः । भूयो विभ्रम्यतां प्राप्य कथयैतन्ममाधुना ॥ २३० ॥
निशम्य वचः पितुः क्रमाकुञ्चितमानसः । ऊचे कुबेरकान्तोऽसौ मुक्तनिश्वाससुन्मनाः ॥२३१॥
मनोहरीकृतो जातो नूनं मुग्धककुरम् । राजगेहे विलोक्येमां गतो विभ्रमतां पुनः ॥ २३२ ॥
• एवं निगद्य तं प्रीतो विद्यासामर्थ्यमस्य च । मुदा कुबेरकान्तोऽपि दर्शयामास सत्वरम् ॥२३३॥
विद्यासामर्थ्यमेतस्य विलोक्य सहसा तदा । स्वयंवरे मुमोचाशु पुष्पमालां मनोहरी ॥ २३४ ॥
कुबेरोपपदं कान्तं दृष्ट्वा कन्यावृतं तदा । चुक्षोभ राजसंघातः समुद्रो वा विधूदये ॥ २३५ ॥
जित्वा तान् भूपतीन् सर्वान् संग्रामे जनसंक्षये । उपयेमे विधानेन कुमारोऽथ मनोहरीम् ॥२३६॥
सोपारकपुरस्थानं नानानोकहराजितम् । मनोहरीसमं प्राप कुमारः प्रीतमानसः ॥ २३७ ॥
• ततोऽशनिनिपातेन मस्तके प्रहतौ तकौ । समं बभूवतुस्तत्र मृत्युगोचरतामितौ ॥ २३८ ॥
विजयार्धनगोत्तरश्रेणिमध्येविमोचरम् । अलकापुरं दिव्यं विद्यते धनसंकुलम् ॥ २३९ ॥
प्राक् श्रीधरचरो राजा चण्डवेगोऽत्र पत्तने । अभवत् मृतिसंपन्नो विद्युदामापतिर्महान् ॥ २४० ॥
कुमारोपपदः कान्तः कालं कृत्वा पुरामरे । अनयो रूपसंपन्नो विद्युन्माली सुतोऽभवत् ॥ २४१ ॥
अत्रैव नगरे चासीन्मेघमाली खगेश्वरः । जाता विद्युच्छाया हि रविबिन्दुप्रियापतिः ॥ २४२ ॥
• कालं कृत्वा तु या तत्र सा तदाऽशनिपाततः । मनोहरी चरी नाम बभूव तनयाऽनयोः ॥२४३॥
अन्यदा चण्डवेगेन विद्युन्माली तद्विरम । ऊर्जयन्तगिरिं यातो नन्तुं नेमिजिनेश्वरम् ॥२४४॥
शिखरं चोर्जयन्तस्य पूर्वं विलोक्य सः । विद्युन्माली समूर्च्छोऽजनि जातो जातिस्मरस्तदा ॥२४५॥
स्मृत्वा मनोहरीं तत्र मासक्षपणयोगतः । प्रज्ञप्तिनामसंयुक्तां विद्यां ध्यानेन प्रसाधिता ॥ २४६ ॥

---

1 [चन्द्रे]. 2 ब मिजयो विजयः 3 प ब ज पुष्पमिरम्. 4 [सुमूर्च्छान्तः]. 5 प ब ज विश्वमिरम्. 6 ब तस्योत्तमो.

तव प्रशस्तिरूपाय खगादेशं पुरःस्थितम् । करोमि प्रेषणं तेऽहमादेशं देहि मे प्रभो ॥ २४७ ॥
ततो विद्याकुमारेण प्रोक्ता तद्वचनेन सा । मनोहरीचरीं ब्रूहि खेचरीमिदमादरात् ॥ २४८ ॥
विद्युन्मालीवचः श्रुत्वा प्राप्य सा तं जगाविति । मनोहरि स्मर क्षिप्रं पूर्वस्थानं प्रयत्नतः ॥२४९॥
विद्यादेवतया प्रोक्तं निशम्य श्रुतमादरात् । विरलोपपदा वेगा जाता जातिस्मरी पुनः ॥ २५० ॥
चण्डवेगोऽपि तां दृष्ट्वा तथा संतुष्टमानसः । विवाहं तत्समं चक्रे चित्तसंयोगकारणात् ॥ २५१ ॥
गच्छन्तौ क्वापि तौ दृष्ट्वा हिमवत्पर्वतोपरि । सवीतौ पद्मतायाघिं प्रतिसूर्येण सद्युगे ॥ २५२ ॥
ततो गङ्गानदीतीरे वरे पश्चिमदक्षिणे । अस्ति कोशलदेशस्था साकेता नगरी परा ॥ २५३ ॥
तस्यां सागरसेनाख्यो विद्यते वणिजां पतिः । धनश्रीरस्य कान्ता च रूपातिशयशालिनी ॥२५४॥
विद्युन्मालीचरो सत्त्वा रूपराजितविग्रहः । बभूव विनयोपेतः सिद्धार्थस्तनयोऽनयोः ॥ २५५ ॥
मगधाधिपये चासीत् पुरे राजगृहाभिधे । समुद्रविजयः श्रेष्ठी तत्प्रिया सुमतिः प्रिया ॥ २५६ ॥
ततो विरलवेगाऽपि कालं कृत्वा सुताऽनयोः । बभूव सुन्दराकारा जयादिमविलक्षणा ॥ २५७ ॥
वितीर्णा जनकेनेयं सिद्धार्थेन प्रमाणवता । परिणीता विधानेन सा कान्ता श्रेष्ठिनाऽमुना ॥ २५८ ॥
अथ सौधोपरि स्पष्टं तिष्ठन् सत्कान्तया सह । विद्याधरयुगं गच्छद् गगने चाल्पविग्रहम् ॥ २५९ ॥
दृष्ट्वेदं सुन्दराकारं सिद्धार्थः प्रीतमानसः । मूर्च्छामासाद्य वेगेन जातो जातिस्मरः पुनः ॥ २६० ॥[1]
मात्रं विहाय मामेव महावैराग्यसंगतः । विनयधरसामीप्ये दीक्षितो मत्पिता ध्रुवम् ॥ २६१ ॥
विहरन् महीं विद्वे भिक्षार्थं मन्पिता ततः । धृतो न केनचित् साधुः सिद्धार्थः पूर्वमान्यवः ॥२६२॥
अहं च चण्डवेगाख्यः कालं कृत्वा महामनाः । जातो जयमतीगर्भे नूनं पुत्रः सुकोशलः ॥२६३॥
स्मरन् पद्ममवान् यावत् सिद्धार्थस्तात्मनोऽपि च । तावदन्तुभवः सर्वो जयमत्या सहागतः ॥२६४॥
सुभगा तत्प्रिया माता तदन्तं गुर्विणी प्रिया । गर्भस्थस्यैव पुत्रस्य राज्यं दत्त्वा तदाऽखिलम् ॥२६५॥
सिद्धार्थाख्यगुरोः पार्श्वे सुतस्यास्य महात्मनः । सुकोशलो दधौ दीक्षां तदा जैनेश्वरीं मुदे ॥२६६॥[4]
तदा जयमती क्रूर आर्तध्यानपरायणा । कालं कृत्वाऽभवद् व्याघ्री मगधाधिपये गिरौ ॥२६७॥
अथ वर्षर्तौ साधू चातुर्मासोपवासिनौ । तस्थतुर्वृक्षमूले तौ पितापुत्रौ घनागमे ॥ २६८ ॥
ततो घनागमेऽतीते पारणार्थं महामुनी । प्रवृत्तौ नगरं गन्तुं तौ सिद्धार्थसुकोशलौ ॥ २६९ ॥
दृष्ट्वा तौ योगिनौ तत्र कोपारुणनिरीक्षणा । दुढौके सहसा व्याघ्री सा तदा पद्मसम्भवा ॥ २७० ॥
आरम्य तौ निरालम्बं प्रत्याख्यानं महामुनी । ध्यायन्तौ परमं तत्त्वं कायोत्सर्गेण तस्थतुः ॥२७१॥
सिद्धार्थं प्रथमं व्याघ्री विदार्य नखकोटिभिः । ममार परमं कोपात् तनयं च सुकोशलम् ॥२७२॥
पितापुत्रौ तदा साधू कालं कृत्वा समाधिना । दिवि सिद्धार्थसिद्धौ तावहमिन्द्रत्वमापतुः ॥२७३॥
विद्भुभिः सह सा व्याघ्री भर्तारं तनयं तथा । भक्षयित्वा तथा पापा स्वस्थाने तस्थुषी पुनः ॥२७४॥
सुकोशलकरे दृष्ट्वा कनकादितिलकं तदा । व्याघ्री स्वनिन्दनासक्ता जाता जातिस्मरी पुनः ॥२७५॥
संसारनिन्दनं कृत्वा सर्वत्यागं मतिं तथा । सुरलोकं सका प्राप्य शुभध्यानपरायणा ॥ २७६ ॥
श्रीधन्यादिप्रमुखाः कान्ताः सिद्धार्थस्य महात्मनः । सुकोशलस्य च क्षिप्रं गुणाधान्ते प्रवव्रजुः ॥२७७॥
उग्रं तपो विधायाशु समाधिं प्राप्य ताः पुनः । सुरलोकं परिप्रापुर्नानाशोभकलम्बनम् ॥ २७८ ॥
यथावत्या वराङ्गस्य सुकोशलनृपस्य च । यशोधरमुनेः पार्श्वे श्रुत्वा धर्ममिदमादरात् ॥ २७९ ॥

1 पप सिर्व. 2 [विलवेगे]. 3 [illegible] 4 [illegible]
१ [illegible]

वैराग्याहितचेतस्के गृहवासविरक्तधीः । तुतोष भूपतिः सद्यो मन्मथमदननामकः ॥ २८० ॥
दन्तिवाहनपुत्राय दत्त्वा राज्यं सुधीमते । कोशेभहरिशारिसमस्तजनसाक्षिकम् ॥ २८१ ॥
सामन्तसचिवसंयुक्तो हित्वा सर्वं परिग्रहम् । यशोधरान्तिके दीक्षां प्रददौ गन्धमादनः ॥ २८२ ॥
मन्मथमदनपत्न्यो हि देवीरूपसमप्रभाः । दधुर्जैनेश्वरीं दीक्षां यथावत्सार्यिकान्तिके ॥ २८३ ॥
मन्मथमदनयोगीशः कृत्वा नानाविधं तपः । जगाम ध्वस्तकर्मारिः सिद्धिं पाण्डुकपर्वते ॥ २८४ ॥

॥ इति श्रीसुकोशलकथानकमिदम् ॥ १२७ ॥

*

१२८ गजकुमारकथानकम् ।

सौराष्ट्रविषये चासीत् पुरी द्वारवती परा । यस्यां नराधिपः श्रीमान् वसुदेवो महाप्रभः ॥ १ ॥
आसीद् गन्धर्वदत्तास्य तत्प्रिया रूपशालिनी । यस्यां गजकुमाराख्यस्तनयः पुरुविक्रमः ॥ २ ॥
अन्यदा पोदनाख्ये तु पुरे राजापराजितः । बभूव तत्प्रिया भार्या नाम्नेयमपराजिता ॥ ३ ॥
वसुदेवोपरि क्रूरो रोषपूरितमानसः । असौ संतिष्ठते मानी सपत्नो धनसंपदा ॥ ४ ॥
प्रार्थंहस्तः समुत्पत्य यस्तमानयति द्रुतम् । मदन्तिकं ददाम्यस्मै वरमिष्टं विसंशयम् ॥ ५ ॥
इमं प्रघोषणा दत्ता वसुदेवेन तत्पुरे । नानाजन्तुसमेतेन कोपाकम्पितचक्षुषा ॥ ६ ॥
श्रुत्वा तां घोषणां तत्र निशाम्य सकोपं सः । पोदनाधिपतिं यातः कुमारो गजपूर्वकः ॥ ७ ॥
बद्ध्वा तं संयुगे भीमे चापराजितनामकम् । कुमारो वसुदेवस्य मुमोच पुरतो द्रुतम् ॥ ८ ॥
दृष्ट्वा तं भीषणं बद्धं वसुदेवो जगाविदम् । वरं वृणु प्रदास्यामि ते कुमार मनोगतम् ॥ ९ ॥
वसुदेववचः श्रुत्वा कुमारो निजगाद तम् । स्वच्छन्दो विहराम्यत्र पुरेऽहं तात सर्वतः ॥ १० ॥
वितीर्णे वसुदेवेन वरे यथाविधेन सः । पुरमध्ये तदा स्वेच्छं कुमारो रमते तराम् ॥ ११ ॥
कुमारोऽन्यदिनं तत्र पांसुलश्रेष्ठिभार्यया । सुरता सह संतुष्टो रमते मन्मथार्दितः ॥ १२ ॥
विलोक्य पांसुलश्रेष्ठी कुमारं दुर्णयोत्थितम् । असमर्थो रुषं प्राप्य मनसि स्थितवानसौ ॥ १३ ॥
अत्रान्तरे कुमारोऽयं नेमिनाथान्तिके गुरौ । धर्मं श्रुत्वा प्रवव्राज वैराग्याहितमानसः ॥ १४ ॥
तथा गजकुमारोऽपि कुर्वाणो विविधं तपः । प्राप रैवतकोद्यानं नानातरुविराजितम् ॥ १५ ॥
पादोपगमनं स्वस्थं प्रारभ्यात्र वने सुधीः । उद्यानमध्यया तस्थौ कुमारो मदवर्जितः ॥ १६ ॥
ज्ञात्वा पांसुलकः श्रेष्ठी तदवस्थं महामुनिम् । लोहकीलान् समादाय तदन्तं प्राप कोपतः ॥ १७ ॥
दिक्षु सर्वासु कोपेन शरीरलोहकीलकैः । कीलयित्वा मुनेरस्य जगामायं स्वमालयम् ॥ १८ ॥
मुनिर्गजकुमारस्य सहित्वा वेदनामिमाम् । कालं कृत्वा समाधानाद् देवलोकं जगाम सः ॥ १९ ॥

॥ इति श्रीगजकुमारकथानकमिदम् ॥ १२८ ॥

*

१२९ सनत्कुमारचक्रीकथानकम् ।

कुरुजाङ्गलदेशेऽस्ति हस्तिनागपुरं परम् । कुरुवंशसमुद्भूतो विश्वसेनोऽत्र पार्थिवः ॥ १ ॥
बभूव तन्महादेवी सहदेवी प्रियंवदा । पुत्रः सनत्कुमारोऽस्याश्चक्रवर्ती चतुर्थकः ॥ २ ॥
दशाङ्गभोगसंयुक्तं चक्रवर्तीसुखं सकः । रूपातिशयसंपन्नो भुञ्जानो व्यवतिष्ठते ॥ ३ ॥
अन्यदा प्रथमे कल्पे सौधर्माख्याधिनायकम् । पुरन्दरः स्थितः सभ्ये हरिविष्टरमाश्रितः ॥ ४ ॥

समस्मिन् स्थिते चक्रे देवः संगमनामकः । ईशानकल्पतः प्राप सौधर्मेन्द्रसमीपताम् ॥ ५ ॥
तस्मिन् समागते देवे नष्टं तेजोऽमरेशिनाम् । नूनं चन्द्रगणस्येव दिननाथोदये सति ॥ ६ ॥
ततो विस्मितचेतोभिः शक्रः पृष्टः सुरैरिदम् । केनेश कारणेनाथ ब्रूहि देवो रविप्रभः ॥ ७ ॥
निशम्य तद्वचस्तेषां सौधर्मेन्द्रो जगाविदम् । आचाम्लवर्धमानाख्यं तपोऽनेन कृतं पुरा ॥ ८ ॥
भूयोऽपि भणितो देवैः पुनरुक्तं पुरन्दर । ईदृशोऽन्योऽपि किं रूपी विद्यते देवलोकतः ॥ ९ ॥
ततो बिडौजसा प्रोक्तं भूयो देवाः पुरः स्थिताः । नितान्तविस्मितस्वान्ताः करकुड्मलमस्तकाः ॥१०॥
हस्तिनागपुरे रूपी कुरुवंशसमुद्भवः । चक्री सनत्कुमाराख्यो विद्यते तेजसाऽधिकः ॥ ११ ॥
मात्सर्यप्रेरितः श्रुत्वाऽस्य तथा विक्षेपकृत् । विजयो वैजयन्तोऽपि तदन्तं विबुधोऽगमत् ॥१२॥
पश्चादुपान्तिकं प्राप्तौ प्रतिहारविसर्जितौ । ताभ्यां विलोकितश्चक्री प्रमेखेलनगुम्भितः ॥ १३ ॥
निरीक्ष्य चक्रिणं देवौ विस्मयव्याकुलमानसौ । ऊचतुर्युगपत् तथ्यमिमं सत्यं व्यवसितम् ॥ १४ ॥
यो नौ सनत्कुमारेश तेजो रूपं च यौवनम् । यथेन्द्रभाषितं सर्वं विद्यते तेऽधिकं भुवि ॥ १५ ॥[1]
गीर्वाणोदितमाकर्ण्य पृष्टौ तौ चक्रिणा तदा । कौ भवन्तौ कुतः प्राप्तौ ब्रूतं मे सांप्रतं शुभौ ॥१६॥
निशम्य चक्रिणो वाक्यं विस्मयाकुलचेतसौ । अवोचतामिदं देवौ नानासामन्तसेवितम् ॥ १७ ॥
सौधर्मसदसि स्पष्टं तेजो रूपं च यौवनम् । भवतः पुण्ययुक्तस्य सौधर्मेन्द्रेण वर्णितम् ॥ १८ ॥
आवाभ्यां न श्रद्धेयं वचनं सुरसंसदि । एतानि द्रष्टुमायातौ सुरौ सौधर्मनाकतः ॥ १९ ॥
रूपयौवनतेजांसि याद्दृशानि सुरेशिना । अधिकं तानि दृष्टानि आवाभ्यां नराधिप[2] ॥ २० ॥
सांप्रतं प्रभुणाऽऽलाप स्वसामन्तमण्डल । रूपादिगुणसंपन्न यामावो निजमालयम् ॥ २१ ॥[3]
श्रुत्वाऽमरवचश्चक्री रोमाञ्चाञ्चितविग्रहः । कृत्वा स्मितं जयेनैतौ जगाद सदसि स्थितः ॥ २२ ॥
भो भो सुरौ यदस्माकं रूपमिन्द्रेण वर्णितम् । भवद्भ्यां किं पुनर्दृष्टं तिष्ठत घटिकाद्वयम् ॥ २३ ॥
विधाय मज्जनं यावत् कृत्वा मण्डनमुत्तमम् । आदाय पुष्पताम्बूलदिव्यवस्त्रादिकं तथा[4] ॥ २४ ॥
सिंहासनस्थितस्यास्य मम सामन्तसेविनः । रूपयौवनतेजांसि पश्यतं सुरकुञ्जरौ ॥ २५ ॥[5]
श्रुत्वा तद्वचनं देवौ कौतुकव्याकुलमानसौ । मुहूर्तमेकमन्यत्र स्थितौ तद्रूपमीक्षितुम् ॥ २६ ॥
स्नानं विलेपनं भव्यं कृत्वा विभवतो तदा । आजूहाव सुरौ चक्री सिंहासनमधिष्ठितः ॥ २७ ॥
यौवनं रूपमालोक्य तेजोऽप्यस्य महीभृतः । इदं प्रोक्तं पुनस्ताभ्यां सुराभ्यां तत्पुरस्तदा ॥ २८ ॥
अहो रूपं गतं तेजो यौवनं च घनाधिकम् । विद्युत्तेनेन्द्रचापाभं प्रविनश्यति तत्क्षणात् ॥ २९ ॥
श्रुत्वाऽमरोदितं चक्री महाविस्मयमागतः । वसुधाधिप देवानां रूपयौवनकादयः ॥ ३० ॥
प्रथमोत्पत्तिमारभ्य यावदायुःपरिक्षयम् । तावत्प्रभादिना देवा न क्षुभ्यन्ते महाप्रभाः ॥ ३१ ॥
मनुष्याणां[6] पुना राजन् वृद्धिं रूपादयो यथा । यावद् युवत्वमेवात्र प्रसिद्धं सर्वजन्तुषु ॥ ३२ ॥
ततः पश्चात्क्रमी सर्वे हानिं गच्छन्ति देहिनाम् । यावज्जीवितपर्यन्तं तावज्जानीहि मद्वचः ॥ ३३ ॥
सुयौवनोदये राजन् रूपं साधु विलोकितम् । आवाभ्यामधुना सद्यः गतं विच्छायतां क्षणात् ॥३४॥[7]
ततो देवोदितं श्रुत्वा चक्री विस्मितमानसः । पश्यति स्म निजं देहं छायया परिवर्जितम् ॥३५॥
चन्द्ररश्मिसमानाभक्षरत्पित्तमप्यदः । वक्षःस्थलं ददर्शाथ म्लानलावण्यसंपदम् ॥ ३६ ॥
इमां निवर्तनं दृष्ट्वा विभ्रमां चक्रिनायकः । दध्यौ विस्मितचेतस्को महावैराग्यसंगतः ॥ ३७ ॥
एतावति गते काले रूपं तेजोऽपि यौवनम् । मम नष्टमिदं किं न शेषकाले विनश्यति ॥ ३८ ॥

1 पफञ पुष्पमौरम्. 2 [जगादेन]. 3 पफञ [illegible]. 4 ['चनादिकं तथा]. 5 पफञ [illegible]. 6 पफ. मानुष्याणां 7 पफ. विलोकय तम्. 8 पफञ [illegible]

चिन्तयित्वा चिरं चक्री सुतमाहूय सत्वरम् । राज्यपट्टं बबन्धास्य समस्तनृपसाक्षिकम् ॥ ३९ ॥
बाह्यमाभ्यन्तरं सर्वं हित्वा सर्वं विशुद्धधीः । जिनसंभवसामीप्ये प्रवव्राज स चक्रभृत् ॥ ४० ॥[1]
देवौ सनत्कुमारस्य वैराग्यं वीक्ष्य तं तथा । विधाय तोषसंपूर्णौ जग्मतुर्दिवमात्मनः ॥ ४१ ॥
अथ षष्ठोपवासान्ते संवरो धर्मतत्परः । विवेश नगरं योगी भिक्षार्थं कृतयोगवान् ॥ ४२ ॥
दत्तं चीरकपक्केन सागाक्तेन भोजनम् । देवदत्ताभिधानेन नरेणास्य मुनेस्तदा ॥ ४३ ॥
भुक्त्वा तक्रोदनं भूयः स साधुः प्रीतमानसः । षष्ठोपवाससमारब्धे महावैराग्यसंपदः ॥ ४४ ॥
तद्दोषेण मुनेरस्य कण्डूश्वासज्वरादयः । समस्तास्ते समुत्पन्ना व्याधयोऽसुखकारणाः ॥ ४५ ॥
उग्रं तपस्तपो दीर्घं महदस्ति प्रकुर्वतः । मनसा वचसा तन्वा शुद्धस्यास्य मुनेस्तदा ॥ ४६ ॥
चामखेटौषधिः पूर्वं विप्रुजल्लौषधिस्तथा । सर्वौषध्यादयो जाता नूनमौषधिसिद्धयः ॥ ४७ ॥[2]
एवं सनत्कुमारस्य तपो विदधतः परम् । प्रतीकारं न कुर्वन्ति पूर्वकर्मानुभावतः ॥ ४८ ॥
सौधर्मेन्द्रेण भूयोऽपि स्थितेन सुरसंसदि । स्तुतः सनत्कुमारोऽयं कुर्वता मुनिवर्णनम् ॥ ४९ ॥
अहो सनत्कुमारस्य प्रथितं परमं तपः । षाण्मासिकोऽमुना तीव्रसह्यो वापिपरीषहः[3] ॥ ५० ॥[4]
सौधर्मेन्द्रवचः श्रुत्वा तावेव विबुधौ पुनः । संप्राप्य वैद्यवेषेण प्रोचतुर्मुनिपुंगवम् ॥ ५१ ॥
साधुधर्मशरीरस्य त्वदीयस्य महामुने । आवां सुपुण्यवृक्षस्य कुर्वो व्याधिविनाशनम् ॥ ५२ ॥
श्रुत्वा सनत्कुमारोऽपि तदीयं वचनं मुदा । उवाच तौ स्थितौ तस्य पुरतः कुटिलाशयौ ॥ ५३ ॥
यदि वैद्यौ भवन्तौ च प्रसिद्धौ भुवि कोविदौ । संसारव्याधिमत्युग्रं निराकुरुत मे ततः ॥ ५४ ॥
निशम्य तद्वचो भूयो देवौ तावूचतुर्मुनिम् । नूनमावां निराकर्तुं संसारव्याधिमक्षमौ ॥ ५५ ॥
समस्तभुवनस्यास्य महावैद्यो रुजापहः । भर्ता त्वमेकयोगीन्द्र निराकर्तुमलं प्रभो ॥ ५६ ॥
एवं निगद्य तं साधुं तोषविस्फारितेक्षणौ । भूयोऽपि सुस्तुतिं कृत्वा जग्मतुस्तौ सुरालयम् ॥ ५७ ॥[5]
साधुः सनत्कुमारोऽपि कृत्वा कर्मविनाशनम् । अनन्तसुखसंपूर्णं प्रययौ सिद्धिपत्तनम् ॥ ५८ ॥

॥ इति श्रीसनत्कुमारचक्रीकथानकमिदम् ॥ ११९ ॥

*

१२० एणिकापुत्रकथानकम् ।

वैशिशाख्यपुरे आसीत् प्रजापालो महीपतिः । सुनन्दा कामिनी तस्य हरिणी लोललोचना ॥ १ ॥
तस्यैव भूपतेरासीद्धनानन्दाख्यो महाधनः । राजश्रेष्ठी धनानन्दो वन्दितानेकबान्धवः ॥ २ ॥
अभवत् तत्प्रिया भार्या सुनन्दा भुवि विश्रुता । यथावच्छ्राविका जाता सुता सज्ज्ञानतो परा ॥ ३ ॥
एणिका नाम विख्याता भार्या सर्वकलीयसी । दत्ता सागरदत्ताय श्रेष्ठिने जनकेन सा ॥ ४ ॥
अनयोरेणिकापुत्रो नन्दनोऽभवदिद्धधीः । महाविभवसंपन्नो यौवनस्थितिकन्धरः ॥ ५ ॥
वर्धमानजिनः शुद्धेनायुः स्वस्य भ्रातृपितृ । स्तोकमायुः समास्थातं महावीरेण तस्य च ॥ ६ ॥
श्रुत्वाऽयं सन्मतेर्वाक्यं संसारत्रस्तमानसः । प्रवव्राज जिनस्यान्ते महावैराग्यसंयुतः ॥ ७ ॥
ग्रामादिषु कदाचित् विहरन् गतियोगतः । उत्तरीतुं समारूढो नावं गङ्गानदीमध्ये ॥ ८ ॥
गङ्गानदीमध्यन्तेऽसौ नौर्निमग्ना निमूर्छितः । समाधिमरणं प्राप्य निर्वाणमगमत् सकः ॥ ९ ॥

॥ इति श्रीएणिकापुत्रकथानकमिदम् ॥ १२० ॥

*

---

1 पफक्ष पदत्रुटकमिदम्. 2 पफक्ष पुस्तकमिदम्. 3 [व्याधिपरीषहः] 4 पफक्ष पुस्तकमिदम्.
5 पफक्ष पुस्तकमिदम्. 6 पफक्ष पुस्तकमिदम्. 7 पफक्ष त्रिकमिदम्.

१३१ भद्रबाहुकथानकम् ।

अथास्ति विषये कान्ते पौण्ड्रवर्धननामनि । कोटीमतं पुरं पूर्वं देवकोट्टं च सांप्रतम् ॥ १ ॥
तत्र पद्मरथो राजा नताशेषनरेश्वरः । बभूव तन्मता देवी पद्मश्रीरतिवल्लभा ॥ २ ॥
अस्यैव भूपतेरासीत् सोमशर्माभिधो द्विजः । रूपयौवनसंयुक्ता सोमश्री तत्प्रिया प्रिया ॥ ३ ॥
कुर्वाणः सर्वबन्धूनां भद्रं भद्राश्रयो यतः । भद्रबाहुस्ततः ख्यातो बभूव तनयोऽनयोः ॥ ४ ॥
भद्रबाहुः समुखः सन् बहुभिर्बालधारिभिः । देवकोट्टपुरान्तेऽसौ रममाणो वितिष्ठते ॥ ५ ॥
एवं हि तिष्ठताऽनेन रममाणेन तत्पुरे । कुमारैर्बहुभिः सार्धमनया क्रीडया यथा ॥ ६ ॥
एकस्य विहितो वट्टो वट्टकस्योपरि द्रुतम् । त्रयोदशासुना तेषु चतुर्दश निधापिताः ॥ ७ ॥
अत्रान्तरे महामानो वर्धमानः सुरस्तुतः । निर्वाणमगमद् वीरो हतकर्मकदम्बकः ॥ ८ ॥
गोवर्धनचतुर्थोऽसावाचतुर्दशपूर्विणाम् । निर्मलीकृतसर्वाशो ज्ञानचन्द्रकरोत्करैः ॥ ९ ॥
ऊर्जयन्तं गिरिं नेमिं स्तोतुकामो महातपाः । विहरन् क्वापि संप्राप कोटीनगरसुन्दरम् ॥ १० ॥[1]
भद्रबाहुकुमारं च स दृष्ट्वा नगरे पुनः । उपर्युपरि कुर्वाणं तांश्चतुर्दशवट्टकान् ॥ ११ ॥
पूर्वोक्तपूर्विणां मध्ये पञ्चमः श्रुतकेवली । समस्तपूर्वधारी च नानर्द्धिगणभासनः ॥ १२ ॥
देवदानवलोकार्च्यो भद्रबाहुरयं बटुः । स्तोकैरेव दिनैर्नूनं भविष्यति तपोनिधिः ॥ १३ ॥
गोवर्धनो विचार्येममादेश विधिपूर्वकम् । भद्रबाहुबटुं स्वान्ते चकार पितृवाक्यतः ॥ १४ ॥
गोवर्धनमुनिः क्षिप्रं नानाशास्त्रार्थकोविदम् । चकार विधिवत् तत्र भद्रबाहुकुमारकम् ॥ १५ ॥
ततः स्वजनकं प्राप्य दृष्ट्वाऽसुं विधिपूर्वकम् । आजगाम मुनेः पार्श्वे भद्रबाहुर्बटुः पुनः ॥ १६ ॥
महावैराग्यसंपन्नो ज्ञाननिष्पन्नबुद्धिकः । गोवर्धनसमीपेऽरं भद्रबाहुस्तपोऽग्रहीत् ॥ १७ ॥
ततः स्तोकेन कालेन समस्तश्रुतपारगः । गोवर्धनप्रसादेन भद्रबाहुरभून्मुनिः ॥ १८ ॥
श्रुतं समाप्तिमायातमिति सद्भक्तिनोदितम् । भद्रबाहुः प्रभातेऽसौ कायोत्सर्गेण तस्थिवान् ॥ १९ ॥
देवासुरनरैरेत्य भक्तिनिर्भरमानसैः । भद्रबाहुरयं योगी पूजितो बहुपूजया ॥ २० ॥
अथ धर्मोपदेशेन समस्तभव्यपालकः । अभूदसौ सदाचारः श्रुतसागरपारगः ॥ २१ ॥
नानाविधं तपः कृत्वा गोवर्धनगुरुस्तदा । सुरलोकमगामाशु देवीगीतमनोहरम् ॥ २२ ॥
अवन्तीविषयोद्भूतश्रीमदुज्जयनी पुरी । आसीन्मनोहरी वापी सौधापथसरोवरैः ॥ २३ ॥
श्रीमदुज्जयिनीपार्श्वेऽस्मिन् सिप्रानदीतटे । बभूवोपवनं रम्यं नानातरुकदम्बकैः ॥ २४ ॥
चतुर्विधेन संघेन महता परिवारितः । इदं वनं परिप्राप भद्रबाहुर्महामुनिः ॥ २५ ॥
तत्काले तत्पुरि श्रीमांश्चन्द्रगुप्तो नराधिपः । सम्यग्दर्शनसंपन्नो बभूव श्रावको महान् ॥ २६ ॥[6]
कनत्कनकसद्वर्णा विद्युल्लक्षसमप्रभा । अभवत् तन्महादेवी सुप्रभा नाम विश्रुता ॥ २७ ॥
अन्यदाऽनुक्रमेणायं भिक्षार्थं गृहतो गृहम् । भद्रबाहुर्महायोगी विवेश स्थिरमानसः ॥ २८ ॥
अस्या मन्दिरयामिन्या प्रविष्टो यत्र मन्दिरे । भद्रबाहुमुनिस्तत्र जनः कोऽपि न विद्यते ॥ २९ ॥
केवलं विद्यते तत्र दोलिकान्तर्गतः शिशुः । तेनोदितो मुनिः क्षिप्रं गच्छ त्वं भगवन्निति ॥ ३० ॥
श्रुत्वा शिशूदितं तत्र दध्यावेवं स्वचेतसि । भद्रबाहुमुनिर्धीरो दिव्यज्ञानसमन्वितः ॥ ३१ ॥
ईदृशं वचनं तत्र बालस्य श्रूयते तदा[7] । तदा द्वादशवर्षाणि मण्डलेऽस्य न वर्षणम् ॥ ३२ ॥

1 पफक्ष कुलवीरम्. 2 पफक्ष चतुष्कुम्भमीरम्. 3 ज भद्रबाहुना 4 पफक्ष विकल्पमीरम्. 5 [दध्यावेवं]. 6 पफ भद्रबाहुर्मुनिः 7 [यदा]

चिन्तयित्वा चिरं योगी भोजनाद्विनिवृत्य सः। ततो विस्मितचेतस्को जगाम जिनमन्दिरम् ॥३३॥
तत्रापराह्णवेलायां कृत्वाऽऽवश्यकसत्क्रियाम्। संघस्याग्रे समस्तस्य जगादैवं पुरो गुरुः ॥ ३४ ॥
एतस्मिन् विषये नूनमनावृष्टिर्भविष्यति। तथा द्वादशवर्षाणि दुर्भिक्षं च सुदुस्सहम् ॥ ३५ ॥
अयं देशो जनाकीर्णो धनधान्यसमन्वितः। शून्यो भविष्यति क्षिप्रं नृपतस्करलुण्टनैः ॥ ३६ ॥
अहमत्रैव तिष्ठामि क्षीणमायुर्ममाधुना। भवन्तः साधवो यात लवणाब्धिसमीपताम् ॥ ३७ ॥
भद्रबाहुवचः श्रुत्वा चन्द्रगुप्तो नरेश्वरः। अस्यैव योगिनः पार्श्वे दधौ जैनेश्वरं तपः ॥ ३८ ॥
चन्द्रगुप्तिमुनिः शीघ्रं प्रथमो दशपूर्विणाम्। सर्वसंघाधिपो जातो विशाखाचार्यसंज्ञकः[1] ॥ ३९ ॥
अनेन सह संघोऽपि समस्तो गुरुवाक्यतः। दक्षिणापथदेशस्थपुन्नाटविषयं ययौ ॥ ४० ॥
रामिल्लः स्थूलवृद्धोऽपि भद्राचार्यस्त्रयोऽप्यमी। स्वसंघसमुदायेन सिन्ध्वादिविषयं ययुः ॥ ४१ ॥
भद्रबाहुमुनिर्धीरो भयसप्तकवर्जितः। पम्पाक्षुधाश्रमं तीव्रं जिगाय सहसोत्थितम् ॥ ४२ ॥
प्राप्य भाद्रपदं देशं श्रीमदुज्जयिनीभवम्। चकारानशनं धीरः स दिनानि बहून्यलम् ॥ ४३ ॥
आराधनां समाराध्य विधिना स चतुर्विधाम्। समाधिमरणं प्राप्य भद्रबाहुर्दिवं ययौ ॥ ४४ ॥
सुभिक्षे सति संजाते सर्वसंघसमन्वितः। दर्शनज्ञानचारित्रत्रयं सम्यक्प्रकाश्य च ॥ ४५ ॥
भद्रबाहुगुरोः शिष्यो विशाखाचार्यनामकः। मध्यदेशं स संप्राप दक्षिणापथदेशतः ॥ ४६ ॥
रामिल्लः स्थविरो योगी भद्राचार्योऽप्यमी त्रयः। ये सिन्धुविषये याताः काले दुर्भिक्षनामनि ॥४७॥
पानाशनोज्झितैर्हीने काले लोकस्य भीषणे। आगत्य सहसा प्रोचुरिदं ते जनसंनिधौ ॥ ४८ ॥
वैदेशिकजनैर्ध्वस्तैः कृतक्लेशमहाव्यसनैः। भिक्षाप्रदास्ततो लोका भोक्तुमर्थं न लेभिरे ॥ ४९ ॥
रात्रौ निवसतुं न क्षुधाक्रान्तचेतसः। ध्यायसिस्ताम्रपात्रं तद्गृहाविभिः चक्षते ॥ ५० ॥
भवन्तोऽपि समादाय निशि पात्राणि भक्तितः। नूनं कृत्वाऽऽश्रमेऽत्र यस्मा देशिकत्वे भयात् ॥५१॥
समागतगृहे पूर्वं मृत्तो विभ्रम्य मानसा। श्रावको हि दिने जाते कुरुध्वं भोजनं पुनः ॥ ५२ ॥
सत्रोक्तवचनैस्तैर्भोजनं प्रीतमानसैः। अनेन विधिनाऽऽचार्य प्रवितप्रमयेपकः ॥ ५३ ॥
अन्यदैकः मुनिः कोऽपि निर्भीकः क्षीणविग्रहः। भिक्षापात्रं करे कृत्वा विवेश श्रावकगृहम् ॥५४॥
तस्मिन् श्राविका गुम्फाऽभिनवा गुर्विणी तदा। अन्धकारे मुनिं दृष्ट्वा तत्र सा गर्भमामवत्[2] ॥५५॥
तद्वचनभयात् तस्या स गर्भः पतितो द्रुतम्। दृष्ट्वाऽस्तु श्रावकाः प्राप्य यतीशानिदमूचिरे ॥ ५६ ॥
विनष्टः श्रावकः कष्टः मार्यायाः विषाद च। काल हि दुस्तरो ग्रामे भूपतापि निहतः ॥५७॥
यावत् शोभनः काले जायते साधवः स्फुटम्। तावत् वामहस्तेन पुरः कृत्वाऽर्धफालकम् ॥५८॥
भिक्षापात्रं समादाय दक्षिणेन करेण च। गृहीत्वा नक्तमाहारं कुरुध्वं भोजनं दिने ॥ ५९ ॥
श्रावकाणां वचः श्रुत्वा यतयो यतिभिः पुनः। तदुक्तं सकलं शीघ्रं मतिरर्थं मन विधाय ॥ ६० ॥
एवं कृते सति क्षिप्रे काल सुसारतमागते। सुधीभूतजनातो दैन्यभावपरिच्युते ॥ ६१ ॥
रामिल्लस्थविरस्थूलभद्राचार्याः समाधिना। आहूय सकलं संघमित्थमूचुः परस्परम् ॥ ६२ ॥
दिशाकं संघाठकं मूर्छं मुनयः प्रीतमानसाः। निर्ग्रन्थरूपतां साधवः प्राप्य विमुक्तये ॥ ६३ ॥
श्रुत्वा तद्वचनं मार्गं मोक्षस्यादिगम्बरम्। केचिन्निर्ग्रन्थतां केचित्स्मुक्तिमार्गरतचेतसः ॥ ६४ ॥
रामिल्लः स्थविरः स्थूलभद्राचार्यास्त्रयोऽप्यमी। महावैराग्यसंपन्ना विशाखाचार्यमाययुः ॥ ६५ ॥

---

1 [illegible] 2 [illegible] 3 [illegible] ([illegible]). 4 [illegible] 5 [illegible] 6 [illegible] 7 [illegible]

सत्त्वाऽथ कर्कटं सर्पो संसारात् त्रस्तमानसा । नैर्ग्रन्थ्यं हि तपः कृत्वा मुनिरूपं दधुस्ततः ॥ ६६ ॥
इदं च पैगुरीशाख्यं ससारार्णवतारकम् । जिनस्य चिरकल्पं च विधाय द्विविधं मुनि ॥ ६७ ॥
अर्धफलकसंयुक्तमज्ञातपरमार्थकैः । तैरिदं कल्पितं तीर्थं कातरैः शक्तिवर्जितैः ॥ ६८ ॥[1]
सौराष्ट्रविषये दिव्ये विद्यते वलभी पुरी । वप्रपादो नृपोऽस्यां च मिथ्यादर्शनदूषितः ॥ ६९ ॥
बभूव तन्महादेवी स्वामिनी नाम विश्रुता । अर्धफलकयुक्तानां सेव भक्ता तपस्विनाम् ॥ ७० ॥
अन्यदाऽयं नृपस्तिष्ठन् गवाक्षे सौधगोचरे । स्वामिन्या प्रियया सार्धं पश्यति स्वपुरश्रियम् ॥७१॥
प्रपन्नमध्याह्नवेलायां अर्धफलकसंघकः । भिक्षानिमित्तमायातो नृपतेरस्य मन्दिरम् ॥ ७२ ॥
दृष्ट्वार्धफलकं संघं कौतुकव्याप्तमानसः । महादेवीमिमां प्राह महीपालपुरस्सरम् ॥ ७३ ॥
अर्धफलकसंघस्ते महादेवि न शोभनः । न चाय अम्बरसंवीतो न नग्नः सविडम्बनः ॥ ७४ ॥[2]
ततोऽन्यस्मिन् दिने जाते चार्धफलकसंघकः । नगरान्तिकमायातः कौतुकार्थं कलस्वनः ॥७५॥[3]
महादेव्युं नृपतिः संघं प्रधान वचसा हि सः । हित्वा तान्यर्धफलकानि निर्ग्रन्थत्वं समाश्रय ॥७६॥
यदा निर्गं यदा नेष्ट नृपवाक्येन तैरिमे । तदा महीभृता प्रोक्तं नृपोऽप्याश्रयमीप्सुना ॥ ७७ ॥
यदि निर्ग्रन्थरूपं ग्रहीतुं नैव शक्यथ । ततोऽर्धफलकं हित्वा सविडम्बनकारणम् ॥ ७८ ॥
कम्बलेन चाच्छाद्य स्वशरीरं तपस्विनः । तिष्ठत प्रीतचेतस्का मद्वाक्येन महीतले ॥ ७९ ॥
यापनां प्रीतिचित्तानां तदाप्रभृति दिवसं प्रति । बभूव काम्बलं तीर्थं वप्रपादनृपाज्ञया ॥ ८० ॥
तत्र कम्बलिकातीर्थान्नूनं सावलिपत्तने । दक्षिणापथदेशस्थे जातो यापनसंघकः[4] ॥ ८१ ॥

॥ इति श्रीभद्रबाहुकथानकमिदम् ॥ १३१ ॥

*

१३२ समुद्रदत्तादिकथानकम् ।

इन्द्रदत्तादयः सन्ति कौशाम्बीनगरीभवाः । इभ्यश्रेष्ठिकुलोत्पन्ना द्वात्रिंशच्छ्रेष्ठिसुताः ॥ १ ॥
समुद्रदत्ता सन्त्यासन्त प्रीतचेतसः । तथा समुद्रदत्ताख्या भार्याश्च जिनदेवता ॥ २ ॥
कुमारा सुकुमाराङ्गा संसारत्रस्तचेतसः । तेऽन्यु केवलिनः पार्श्वं नन्तु तत्पादकं जनाः ॥ ३ ॥
नत्वाऽन्तुं भक्तितस्ते च पृच्छन्तीदं महामुनिम् । कियत्प्रमाणमस्माकमायुः कथय मे प्रभो ॥ ४ ॥
केवली तद्वचः श्रुत्वा जगादैतान् पुरः स्थितान् । सर्वे स्तोकायुषो यूयं स्वहितं कुरुतादरात् ॥५॥
केवलीरितमाकर्ण्य द्वात्रिंशत् ते कुमारकाः । महावैराग्यसंपन्नास्तदन्तेऽजरं प्रवव्रजुः ॥ ६ ॥
यमुनाख्यनदीतीरे पादोपगमनेन ते । तस्थुस्तज्जलपूरेण नीताः खण्डेन सद्ध्रदम् ॥ ७ ॥
तपोयममयगा धीराः शुभध्यानपरायणाः । समाधिमरणं प्राप्य सुरलोकं ययुस्तके ॥ ८ ॥

॥ इति समुद्रदत्तादिद्वात्रिंशत्कुमारकथानकमिदम् ॥ १३२ ॥

*

१३३ धर्मघोषमुनिकथानकम् ।

चम्पानगरवास्तव्यो धर्मघोषमहामुनिः । सुधीर्मासोपवासान्ते पारणाय ययौ प्रगम् ॥ १ ॥
मार्गश्रमे यम नेच्छन् हरिताङ्कुरपरि स्फुटम् । गङ्गानदीतटस्थायस्तस्थौ पञ्चाकर्दर्पितः ॥ २ ॥
तीव्रतृष्णापरिश्रान्तं ज्ञानिनं मुनिपुङ्गवम् । गङ्गादेवी जलपूर्णं कलशं तत्पुरोऽकरोत् ॥ ३ ॥

---

1 पप्र पुस्तकमिदम्　2 पप्र पुस्तकमिदम्　3 प. omits line 73-75　4 पप्र पन्न

विलोक्योवाच सा देवी यतिं पद्मसरोरुह । पीत्वा जलमिदं साधो पद्मास्येव निराकुल ॥ ४ ॥
गङ्गादेवीवचः श्रुत्वा जगादैतां महामुनिः । यतो न वर्तते पातुं जलमेतन्मनस्विनि ॥ ५ ॥
मुनिवाक्यं समाकर्ण्य गङ्गादेवी त्वरावती । जिनं पूर्वविदेहस्थं सम्प्राप्य निजगाविदम् ॥ ६ ॥
तृष्णया परिमुक्तोऽसौ मुनिरेको जिनेश्वर । ज्ञातो मया जलापूर्णः कलशोऽस्य पुरस्कृतः ॥ ७ ॥
मयाऽभ्युदितः साधुः प्रासुकं शीतलं जलम् । मदानीतं पिब क्षिप्रं तृष्णाऽभावाय पावन ॥ ८ ॥
मुनिर्मद्वचनं श्रुत्वा मां जगाद जिनेश्वर । भवद्दत्तेन नः पातुं देवि तोयं न युज्यते ॥ ९ ॥
दीयमानं मया नाथ न पीतं मुनिना जलम् । किं कारणमिदं ब्रूहि सांप्रतं परमेश्वर ॥ १० ॥
देवीवचनमाकर्ण्य जगादैतां जिनेश्वरः । स्वरविवादयुतं भाषा घनाघनगभीरया ॥ ११ ॥
तिर्यग्देवासुराणां च देवि हस्तेन नो जलम् । सर्वं वा युज्यते लातुं मुनीनां मुक्तचेतसाम् ॥ १२ ॥
सम्यक्त्वं जिनपूजां च प्रातिहार्यं हि योगिनाम् । एतद्वै युज्यते कर्तुं नापरं भोजनादिकम् ॥ १३ ॥
जिनवाक्यं समाकर्ण्य गङ्गादेवी सुभक्तितः । अत्यर्थं प्रवर्षायत् मुनेरस्य सुशीतलम् ॥ १४ ॥
प्रातिहार्ये कृते देव्या शुक्लध्यानगतो मुनिः । निहत्य घातिकर्माणि केवलज्ञानमाप्तवान् ॥ १५ ॥
ततः केवलिनः पार्श्वे देवी धर्मं निशम्य सा । पूजयित्वा मुनिं भक्त्या जगाम निजमालयम् ॥ १६ ॥
धर्मघोषमुनिर्हत्वा शेषकर्मचतुष्टयम् । मोक्षं जगाम शुद्धात्मा निराबाधसुखाकरम् ॥ १७ ॥

॥ इति श्रीसौधर्मघोषमुनिनिर्वाणकथानकमिदम् ॥ १३३ ॥

*

१३४ श्रीधरमुनिकथानकम् ।

अथ सिंहरथो राजा चम्पापुरवरेऽभवत् । सम्यग्दर्शनसंपन्नः श्रावकः सिंहिकापतिः ॥ १ ॥
अंगस्मादभवद् राजा साकेतानगरोत्तमे । सुपतिः श्रावकः श्रीमांस्तत्प्रिया पांडुसालिनी ॥ २ ॥
इलापुरेऽभवद् राजा जितशत्रुः सुदर्शनः । इलाभिधाऽस्य सत्कान्ता रूपयौवनशालिनी ॥ ३ ॥
अन्योन्यप्रीतियुक्तानामेतेषां स्वस्वपत्तने । त्रयाणामपि मित्राणां याति कालः शनैः शनैः ॥ ४ ॥
नन्दीश्वरदिनेष्वेते त्रयोऽपि स्वस्वपत्तने । महामहं प्रकुर्वन्ति जिनानां भक्तितत्पराः ॥ ५ ॥
जितशत्रुरपि स्वस्मिन्नर्धनपत्तने । सपर्यां कर्तुमारेभे जिनानां क्षीणकर्मणाम् ॥ ६ ॥
तत्रागमिष्ट विरूपाक्षा जिनदोषपरा सती । दीर्घदन्तकराळास्या पद्मुद्वृत्तलोचना ॥ ७ ॥
पादचला पृथुजङ्घा सत्त्वानां भयकारिणी । लम्बस्तनी च लम्बोष्ठी विषमास्थिस्थिराकृतिः ॥ ८ ॥
इलापूजार्थमेतेन गच्छन्ती जिनमन्दिरम् । महिलैषा सकृत् यान्ती जितशत्रुमहीभुजा ॥ ९ ॥
जगतीह समस्तैव त्वद्रूपमतिभीषणम् । जिनपूजार्थमेतेषामागतानां शरीरिणाम् ॥ १० ॥
बीभत्सदर्शनोपेतां भवतीं लोकभीतिदाम् । अतो मङ्गलदेहल्या त्वं याहि जिनान्तिकम् ॥ ११ ॥
जितशत्रुवचः श्रुत्वा शोकसक्तमानसा । धार्मिकाऽसौ जगादैवं बाष्पविप्लुतलोचना ॥ १२ ॥
जिनपूजा मया पुत्र न दृष्टा मन्दभाग्यया । न हि पुण्यैर्विना जैनं लभ्यते सुखपङ्कजम् ॥ १३ ॥
धर्मं माहात्म्यकं स्यात्तो विज्ञातोऽत्र मया सुत । मनुष्यत्वेन धर्मो हि लभ्यते जैनपुङ्गव ॥ १४ ॥
एवं निगद्य तं पुत्रं जिनेन्द्रादिकसाक्षिकम् । उपवासं विधायासौ तस्थौ निजगृहे मुदा ॥ १५ ॥

---

1 चक पीत्वाऽऽर्थे. 2 चपकज [illegible]. 3 चपकज [illegible]. 4 [सौधर्म] 5 [[illegible]].
6 चपकज [illegible]. 7 चपकज [illegible]. 8 चपकज [illegible].

निशाथादिम्री पूजां चितवन्त्यर्हिनेशिनाम् । आहूय सा निजाम्बाम्ब पप्रच्छेदं कुतूहलात् ॥१६॥
अम्ब किं कारणं जाता दुर्बला शोकसंयुता । केन वाऽपकृतं तेऽद्य कथयैतन्मम स्फुटम् ॥ १७ ॥
मित्रश्रीरेव श्रुत्वा धात्रिका निजगादमुम् । अहर्निशमहं पुत्र कुर्वती स्वगृहे स्थिता ॥ १८ ॥
नृपोऽपि भूभुजा प्रोक्ता धात्रिका प्रीतमानसा । मनोऽभिवाञ्छितं मातस्त्वं वरं वृहि सांप्रतम् ॥१९॥
नृपोऽभ्यवाचि नृपाळस्तया धात्रिकया तदा । प्रीतोऽसि यदि मे जैनीं पूजां तां मत्कृते कुरु ॥२०॥
नृपोऽप्यसौ समारेभे तदर्थं जिनपूजनम् । धात्रिकाऽप्युपवासं सा चकार प्रीतमानसा ॥ २१ ॥
हिमवद्गिरिसंभूतपद्मह्रदनिवासिनी । विविक्षा तत्तपोमार्गं सामान्यनरदुष्करम् ॥ २२ ॥
निजेन परिवारेण श्रीदेवी प्राप्य तामसौ । दृष्ट्वा तदुपवासान्ते सखी धर्मकुटीरकम् ॥ २३ ॥
महापूजाविधानेन पूजयित्वा पुनः पुनः । श्रीदेवी धात्रिकां भक्त्या जगाम निजमालयम् ॥ २४ ॥
श्रीदेवीविभवं दृष्ट्वा धात्रिका मुग्धमानसा । निदानं तद्विभूत्यर्थं कृत्वा पञ्चत्वमाप सा ॥ २५ ॥
ततो जम्बूमति द्वीपे वास्ये भरतनामनि । जाता पद्मह्रदे देवी समूते हिमवद्गिरौ ॥ २६ ॥
इत्यर्थेनकसानं श्रीदेवी प्राप्य सत्वरम् । लोकानां दर्शयामास स्वप्नमेतन्निशि द्रुतम् ॥ २७ ॥
स्वप्नवशमरमापन्ना श्रीदेवी श्रीगृहं मम । अवतरित्वा द्रुतं भक्तिं कुरु लोक यथाविधि ॥ २८ ॥
यतस्यो येन गम्यन्ते परमिष्टमहद्भुतम् । पूजाविधायिनां पूर्णा भक्त्या तुष्यन्ति देवताः ॥२९॥[1]
कास्यतो विधायाशु श्रीगृहं स्वत्रमूर्जितम् । महिमानं चकारात्र लोकः पुष्पादिसंपदा ॥ ३० ॥
श्रीदेवीश्रीगृहे कल्पाऽपचितिं सज्जनैरलम् । क्रियमाणामिलादेवी ददर्श स्वगृहे स्थिता ॥ ३१ ॥
ततो धारत्र वर्षाणि सुतार्थं पुत्रवर्जिता । श्रीदेवीश्रीगृहे पूजामिलादेवी चकार सा ॥ ३२ ॥
इलादेवीकृत्वा पूजां स्वस्य पुत्र महादरात् । स्वयंप्रभजिनं प्राप्य श्रीदेवी निजगादिदम् ॥ ३३ ॥
भगवन् मत्पुरे पूजादिभ्यस्तानेकलोकेन । इलादेव्याः सुतो भावी न वेत्ति यद् मेऽधुना ॥ ३४ ॥
श्रीदेवीवाक्यमाकर्ण्य स्वयंप्रभजिनोऽवदत् । इलादेव्याः सुतो भावी देवि नाकपरिच्युतः ॥ ३५ ॥
स्वयंप्रभजिनेनोक्तं निशम्य सहसा सका । प्राप्येलाभवनं देवी निशि स्वप्ने जगाद ताम् ॥ ३६ ॥
इलादेवि स्फुटं भावी मत्प्रसादेन त्वत्सुतः । वचमानामिथो देवमभ्युत्था सौधमनाकतः ॥ ३७ ॥
श्रीदेवीवचनं श्रुत्वा कर्णामृतरसायनम् । इलादेवी सुखं तस्थौ तोषकल्पितवाहिनी ॥ ३८ ॥
कल्यो हि यतो देवः श्रीदेव्याश्चमपोऽप्यसुतः । ततः श्रीदत्तनामायं जनकेनेति हर्षितः ॥ ३९ ॥
इत्यर्थनसद्योऽप्यमिलापुरसमुत्करः । इलादेवीसमुत्पन्नो जितशत्रो सुतस्ततः ॥ ४० ॥
साकेताधिपते पुत्र्या अंशुमत्यभिधानया । स्वयंवरं धृतभार्या श्रीदत्तः श्रीसमन्वितः ॥ ४१ ॥
अथासौ समायातः शुकः क्रीडनकोचितः । कलकोलाहलेनैव इत्यमथनपवनम् ॥ ४२ ॥
दीव्यतोरनयोर्द्यूते दम्पत्योरक्षसमये । नार्थं निरुपयोगमन्यमन्योन्यप्रीतचित्तयोः ॥ ४३ ॥
अंशुमत्या जिते कान्ते लीलाविक्षिप्तपक्षकः । लिखति प्रीतचेतस्को भुवि लेखाद्वयं शुकः ॥४४॥[4]
जितायामंशुमत्यां च तथा संततमिद्धधीः । श्रीदत्तेन लिखत्यप लेखामेकां शुको भुवि ॥ ४५ ॥
एवं कृते सति क्षिप्रं भूभुजा रोषमीयुषा । ग्रीवायामाहतो दुःखी ममार यत्र पूरकः ॥ ४६ ॥
ततः पञ्चत्वमासाद्य श्रीरो मन्दकषायतः । बभूव व्यन्तरो देवो रूपराजितविग्रहः ॥ ४७ ॥
अन्यदा मेघमालोक्य सौधस्थो विलयं गतम् । श्रीदत्तभूपतिः सद्यो वैराग्यमगमत् तदा ॥ ४८ ॥
वितीर्य सकलं राज्यं सुताय विनतात्मने । वरधर्मान्तिके नूनं श्रीदत्तो मुनितामित ॥ ४९ ॥

1 पत्र पुष्पम् क पुष्पश्रीरम्, 2 [पश्यामि]. 3 पत्र [illegible] पुष्पश्रीरम्, 4 पत्र [illegible] पुष्पश्रीरम्,
१ गो ४१

गृहीतसर्वशास्त्रार्थो बुधैकविहारताम्[1] । संप्राप्तः श्रीधरो योगी तपोनिश्चितमानसः ॥ ५० ॥
कदाचित् स्वपुराभ्यासे हेमन्ते हिमसंकुले । नर्के प्रतिमया तस्थौ श्रीधरो मम्भीरमम् ॥ ५१ ॥
तत्र श्रीधरो देवो व्यन्तरः श्रीधरं मुनिम् । विवेद पापक स्मृत्वा विभङ्गज्ञानयोगतः ॥ ५२ ॥
वामतस्य च समुदेशं शीतं वातं विधाय सः । सिञ्चति स मुनिं क्रोधात्शठत्वेन भूयसा ॥ ५३ ॥
श्रीधरोऽपि मुनिस्तत्र सहित्वा तं परीषहम् । व्यन्तरेण कृतं घोरं निर्वाणममगमत् ॥ ५४ ॥

॥ इति श्रीधरमुनिकथानकम् ॥ १२४ ॥

•

१२५ वृषभसेनमुनिकथानकम् ।

उज्जयिन्यां पुरि श्रीमान् प्रद्योतो नाम भूपतिः । बभूव तन्महादेवी ज्योतिर्माला प्रयोगमता ॥ १ ॥
अन्यदासौ महीपालो हस्तिनं मदशालिनम् । जगाम सहसा धर्तुं वनं नानानगाकुलम् ॥ २ ॥
आरूढो हस्तिनं तत्र प्रद्योतो मदनिर्भरम् । पदीलाङ्गू पत्नी नायो विवेश गहनं पुनः ॥ ३ ॥
हस्तिनो धावतो वेगात् तच्छाखां प्रगृह्य सः । प्रद्योतनृपतिस्तस्थौ गजोऽन्यत्र गतो वशी ॥ ४ ॥
उत्तीर्य तस्थौ राजा विषयोन्मुखतां व्रजन् । एवं हि खेटकग्रामं संप्रापद् दैवयोगतः ॥ ५ ॥
तत्र खेटसामीप्ये क्षुधापिपासयार्दितः । क्लान्तिं प्राप्य स्थितस्तत्र प्रद्योताख्यो महीपतिः ॥ ६ ॥
जिनपालितसंज्ञस्य ग्रामकूटस्य कन्यका । जिनमतावर्जं तत्र जिनदत्ताऽभवत् प्रथितम् ॥ ७ ॥
दृष्ट्वा तां कन्यकां राजा तृष्णया तृष्यदातुरः । रूपयौवनसंयुक्तां पानीयं स याचते ॥ ८ ॥
पानीयं प्रदायास्मै स्तोकं कन्या पुरस्थिता । कृतैकं कर्करं किंचिदरो नीरं ततिम्यया ॥ ९ ॥
पायमिता शठं नृपं संप्राप्य निजमन्दिरम् । कथयामास तद्वार्तां निजतातस्य कन्यका ॥ १० ॥
ग्रामस्यास्य बहिः कोऽपि नरस्तिष्ठति शोभनः । मत्वा तदन्तिकं शीघ्रं स्वगृहं स समानय ॥ ११ ॥
सुतावचनतस्तेन ग्रामकूटेन वेगतः । निजगेहं समानीतो भूपतिः परमाकृतिः ॥ १२ ॥
यावत् स तिष्ठते राजा तद्गृहे सुखलीलया । तावत् तन्मार्गतः सर्वः स्कन्धावारः समागतः ॥ १३ ॥
पश्ये नराधिपोऽस्मीमिस्तद्गृहे प्रीतमानसैः । ग्रामकूटेन सा कन्या वितीर्णाऽस्मै प्रमोदिना ॥ १४ ॥
ततः प्रीतिं परां प्राप्य सामन्तादिपुरस्सरम् । नरेन्द्रो जिनदत्तायै महादेवीपदं ददौ ॥ १५ ॥
गत्वासौ पूर्वमिताऽत्र महाविभवसंपदा । श्रीमदुज्जयिनीं राजा विवेश परमोत्सवात् ॥ १६ ॥
अन्तःपुरमिदं सर्वं विहाय स नराधिपः । जिनदत्तासमं भोगं बुभुजे प्रीतमानसः ॥ १७ ॥
अन्यदा वारिमध्ये च पतितो मदकुञ्जरः । श्रुत्वा वार्तामिमां राजा निर्जगाम पुराद् बहिः ॥ १८ ॥
तत्काले जिनदत्ताऽपि कुर्वती सास मज्जनम् । श्रुत्वा पर्वं महीर्यान्ति सपेया स्वगृहे स्थिता ॥ १९ ॥
स्नानान्तं निर्गत दृष्ट्वा तदानीं तासुरन्धयः । वदन्ति स्म तदभ्यर्णं कोपविस्फारितेक्षणाः ॥ २० ॥
यत्र पतितमिमं पूर्वं समर्तुं प्राप्तोऽपि गजम् । मत्वा प्रयाद् पथः स्नातुं सान्निकेन दराम्नयम् ॥ २१ ॥
श्रुत्वा तद्वचनं कोपाज्जिनदत्ता स्वरासती । सर्वाभिः मन्दिरं हित्वा तस्थौ सा परवेश्मनि ॥ २२ ॥
विलोक्य हस्तिनं राजा समाप्य निजमन्दिरम् । जिनदत्तामपश्यन् स पप्रच्छ परं नरं पुनः ॥ २३ ॥
नरेन्द्रवचनं श्रुत्वा यथार्थं नरः प्रभुम् । जिनदत्ता रुषं प्राप्य हित्वा भवनमागमत्[10] ॥ २४ ॥

---

1 स कृत्वैव. 2 फज श्रीधरो 3 फज श्रीधरं 4 [श्रीधरं व्यन्तरो मुनिम्]. 5 [श्रीधरमुनिः]. 6 पफ विषयोन्मुखतां 7 ज प्रति-भूपम्. 8 ज प्रमोदिता 9 पफ हस्त. 10 पर्वं च समागमम्.

निसर्गेदं विहायाशु भूत्वा साऽतितपस्विनी । महावैराग्यसंपन्ना संतस्थे परवेश्मनि ॥ २५ ॥[1]
निशम्य वचनं तस्य नरस्य स्वसमागमं[2] । क्षणमेकं पुनर्ध्यासीदिदं मनसि भूपतिः ॥ २६ ॥
शोभते व्रतमीदृक्षं गृहस्थाया न मद्गृहे । योषितोऽस्या वने सर्वैर्निन्दितं साधुभिर्भृशम् ॥ २७ ॥
एवं विचिन्त्य राजेन्द्रः सगर्भां तां स्वसुन्दरीम् । असहायां श्मशानेऽसौ मुमोच प्रीतिवर्जितम् ॥२८॥[3]
ततोऽस्याः सुकुमाराया श्मशाने दरदायिनि । बभूव सुन्दराकारो नवमे मासि बालकः ॥ २९ ॥[4]
तत्प्रठे पश्चिमे यामे रजन्या वृषभं सितम् । ददर्श भूपतिः स्वप्ने सोपविस्फारितेक्षणः ॥ ३० ॥
प्रभातसमये जाते कृत्वाशेषतनुक्रियः । वृषभं मन्त्रिणः स्वप्ने कथयामास भूपतिः ॥ ३१ ॥
निशम्य भूपतेर्वाक्यं जगौ मन्त्री नरेश्वरम् । पुत्रलाभोऽद्य संजातस्तव भूपाल निश्चितम् ॥ ३२ ॥
निशम्य मन्त्रिणो वाक्यं स्वदेवीनां समीपकम् । पुत्रवार्तामुपालब्धुं सचिवं प्राहिणोति सः ॥ ३३ ॥
स्वन्तं प्राप्य वेगेन सचिवो नृपयोषितः । पप्रच्छ पुत्रमुत्पन्नं कस्याश्चिद्दत्तास्तु मे ॥ ३४ ॥
सचिवस्योदितं श्रुत्वा जगुस्ता युगपत्तकम् । अस्माकं दुर्भगानां हि कथं पुत्रो भवं विना ॥ ३५ ॥
भर्तृसङ्गं विना यस्य गर्भोत्पत्तिः कथं भवेत् । अस्माकं पुण्यहीनानां वञ्चितानामनेन भो ॥ ३६ ॥[5]
नृपभार्यावचः श्रुत्वा पुत्रजन्मपरिच्युतम् । सचिवो विस्मितस्वान्तो जिनदत्तान्तिकं ययौ ॥३७॥
जिनदत्तां विलोक्यैव चितायां पुत्रसंगताम् । संप्राप्य भूपतेः पार्श्वं सचिवो निजगौ नृपम् ॥३८॥
देवदेव जनाधार भवतां कथितं मया । कुमारो जिनदत्ताया जातस्त्वत्कुलमण्डनः ॥ ३९ ॥
माहात्म्येन समानीतो जिनदत्तासमं शिशुः । राज्ञा विभवयोगेन स्वगृहं स प्रवेशितः ॥ ४० ॥
यतो विलोकितो नक्तं वृषभः स्वप्नदर्शने । ततो वृषभसेनोऽयं समाहूतो नरेशिना ॥ ४१ ॥
महाविभवयोगेन जिनदत्तां प्रपूज्य च । प्रभुञ्जानोऽन्यया भोगं प्रद्योतोऽयं वितिष्ठते ॥ ४२ ॥
कुमारः सुकुमाराङ्गो रूपराजितविग्रहः । अल्पर्धो बभूवाथ धर्मविन्यस्तमानसः ॥ ४३ ॥
अन्यदा भूभुजा प्रोक्तः कुमारोऽयं विशुद्धधीः । राज्यपट्टं प्रतीच्छ त्वं प्रव्रज्यां कर्तुमिच्छता ॥४४॥
एवमुक्तोऽमुना तत्र कुमारो निजगावमुम् । मनुष्यराज्यपट्टं किं ददासि त्वं मम प्रभो ॥ ४५ ॥
देवमोक्षादिसंयुक्तं राज्यपट्टं महागुणम् । प्रार्थितस्य मम स्पष्टं प्रव्रज्यां कर्तुमर्हसि ॥ ४६ ॥[6]
जगाद भूभुजा भूपस्तनयो मुक्तिलालसः । मनुष्यराज्यपट्टं ते ददामि प्रथमं सुत[7] ॥ ४७ ॥
देवादिराज्यपट्टस्तु तपसा भवति स्फुटम् । मोक्षादिराज्यपट्टोऽपि जिनोक्तज्ञानयोगतः ॥ ४८ ॥
विषमाभोऽपि तातेन प्रद्योतस्येन नन्दनः । अभिनन्दनसामीप्ये तपो जैनमशिश्रियत् ॥ ४९ ॥
विदित्वाऽऽगमसद्भाव महामतिविकल्पतः । बभूवैकविहारी स सेनान्तो वृषभादिकः ॥ ५० ॥
विषये वत्सकावत्यां कौशाम्ब्याख्यपुरान्तिके । देववाटनगे तस्थौ सुधीः प्रतिमया मुनिः ॥ ५१ ॥
एवं वृषभसेनस्य कायोत्सर्गेण तस्थुषः । तद्गिरौ सकलो लोकः श्रावकः पुरि पुण्यवान् ॥ ५२ ॥
तत्पुरे बुद्धदासाख्यो वसति क्रूरमानसः । उपासकांस्तरां द्वेष्टि जिनधर्मं मुनिं तथा ॥ ५३ ॥
यावन्मुनिः प्रविष्टोऽयं चर्यामार्गेण पत्तनम् । ययौ मध्याह्नवेलायां बुद्धदासोऽपि तद्गिरम् ॥५४॥
अग्निपं विधायाशु तच्छिलातलमादरात् । बुद्धदासो गृहं प्राप्य[8] स्वकं न विदितः परैः ॥ ५५ ॥
मुनिर्भिक्षां समादाय तत्पुरे स्थिरमानसः । प्राप्याग्निना ततं सर्वं पश्यतीदं शिलातलम् ॥ ५६ ॥
यावज्जीवं समादाय प्रत्याख्यानं महामुनिः । आरुरोह मुदा धीरसमभिवर्तं शिलातलम् ॥ ५७ ॥

---

1 पत्र ३ पुस्तर्मितम् 2 [स्वसमागमः]. 3 पत्र ३ विवर्जितम्. 4 पत्र ३ पुस्तर्मितम्. 5 पत्र विलोकने. 6 पत्र ३ पुस्तर्मितम्. 7 [ददामि प्रथमं सुत]. 8 [प्राप्य].

पुद्गलासक्तं तत्र सहित्वा तं परीषहम् । वृषभोपपदः सेनः केवलज्ञानमाप्तवान् ॥ ५८ ॥

॥ इति श्रीवृषभसेनमुनिकथानकमिदम् ॥ १३५ ॥

१३६ स्वामिकार्तिक्कथानकम् ।

कार्त्तिकाख्यपुरे दिव्ये राजाऽऽसीदग्निनामकः । भार्या वीरवती तस्य कलाविज्ञानभूषिता ॥ १ ॥
तनयो रूपसंपन्ना षड् सुता कलनिम्नगा । जिनपादार्चनपरा बभूवुरिमकाः पराः ॥ २ ॥
आद्या बन्धुमती नाम श्रीसेना श्रीमती परा । स्वयंप्रभा प्रभापूता कीर्तिर्लक्ष्मीमती सह ॥ ३ ॥
अन्यदा वहति स्पष्टे नन्दीश्वरदिनेषु ताः । सोपवासा जिनेन्द्राणां चक्रुः पूजां प्रसन्नकाः ॥ ४ ॥
जिनशेषां समादाय दत्त्वा यावद्व्रजन्ति ताः । मातृपितृसमं पुण्यस्तावद्दृष्ट्वा मनोज्ञिना ॥ ५ ॥
तन्मध्ये कीर्तिकां दृष्ट्वा कनिष्ठां वरकन्यकाम् । कामाकुलितचित्तेन निरवद्यान्वयासिना ॥ ६ ॥
भ्रान्त्वेक्षणपरतापात्तु निजां पत्नीं सुयन्मन । घातयित्वा विधानेन चोपयेमे नराधिपः ॥ ७ ॥
रमितोऽसौ तयेनामा सुज्ञानाथा मनोरमम् । गर्भोऽभूत् कीर्तिसंज्ञायास्तत्रापापाः सुचेतसः ॥ ८ ॥
नवमे मासि संजाते गर्भे तस्या यथोऽनुकम् । रन्तुं शरवणोद्याने सद्याप्यां मनसिस्थिता ॥ ९ ॥
तत्र शरवणोद्यायां कुमार्यां नीलनीरजे । वाप्यां तत्रामलाम्भोन्यां कीर्तिः क्रीडां चकार सा ॥ १० ॥
तत्क्रीडां विधायास्यां समुत्तीर्य ततो जलम् । प्रसूता दारकं कीर्तिः स्वामिकार्तिकसंज्ञकम् ॥ ११ ॥
कीर्तेः कीर्तिमिवैतस्या रूपराजितविग्रहा । तनया जनया जाता वीरश्रीनामभूषिता ॥ १२ ॥
वीरश्री श्रीसमा कन्या विनीता यौवनेन सा । रोहेटकपुरेशाय क्रौञ्चसंज्ञाय भूभुजे ॥ १३ ॥
श्रीदत्तापि कुमाराय कुमारः शीलमानसः । ज्ञात्वा [illegible] पाठकश्चतुर्वेदसमोऽभवत् ॥ १४ ॥
दृष्ट्वा वसन्तमासेऽस्मिन् कुमारः मातृमान्यकम् । आगतानि कुमाराणां तन्मातामहमन्दिरात् ॥ १५ ॥
पुरुषाः मातरं प्राप्य जगाद पुरतः स्थिताम् । मम मातामहो मातः किं न वा भुवि वर्तते ॥ १६ ॥
श्रुत्वा पुत्रवचो माता दुःखपूरितमानसा । जगाद नन्दन पैतृकः पिता च मेऽपि मातुलः ॥ १७ ॥
जननीवाक्यमाकर्ण्य महावैराग्यसंयुतः । यशोधरगुरोः पार्श्वे प्रव्राज स बालकः ॥ १८ ॥
ज्ञानार्थं सद्गुरोर्नाम विहरन् वसुधान्तरे । स्वामिकार्तिकमार्गोऽयं प्राप्य क्रौञ्चपत्तनम् ॥ १९ ॥
[illegible] तत्र संयमस्य मुनिः सुधीः । धनवर्षेण सन्त्रस्तः [illegible] ॥ २० ॥
तस्मात्कुमारनायं च आतं संगतं परम् । स्थित्वा तत्पुरीसमीपे [illegible] ॥ २१ ॥
[illegible] सद्धर्मप्रमाणम् । तत्र प्राप्य क्षेत्रलं महाव्याधिविनाशनम् ॥ २२ ॥
कर्मात्मिक् स मुनिर्योगी गुणान्तर्निरोधनः । रोहेटकपुरे दिव्ये विहारवनवाटिका ॥ २३ ॥
भार्या क्रौञ्चनरेन्द्रस्य वीरश्रीः श्रीसमप्रभा । दृष्ट्वा तं मुनिं प्रीता प्रातः सोपप्रसिद्धा ॥ २४ ॥
प्रासादस्थितगम्यस्य [illegible] महीभुजा । निषिद्धान् शरहतान् क्रोधात् मुनिः शक्त्या समाहतः ॥ २५ ॥
[illegible] महामुनिः । [illegible] समस्तापन ॥ २६ ॥
संस्मृता धन्या तत्र समाधिं प्राप्य धीरधीः । पुण्योदयात् गत्वा तु स मुनिः स्वामिकार्तिकः ॥ २७ ॥
[illegible] ॥ २८ ॥

॥ इति श्रीस्वामिकार्तिकमुनिप्रामृत्योपसर्गकथानकमिदम् ॥ १३६ ॥

1 [illegible] 2 [illegible] 3 [illegible] 4 [illegible] 5 [illegible] 6 [illegible]
7 [illegible] 8 [illegible] 9 [illegible] 10 [illegible]

१३७ अभयघोषमुनिकथानकम् ।

आसीदभयघोषाख्यः काकन्दाख्यपुरीपतिः । अभयादिमतिर्भार्या तन्नरेन्द्रस्य च वल्लभा[1] ॥ १ ॥
अन्यदाऽनेन भूपेन निर्गतेन पुराद्बहिः । चतुरङ्गेन सैन्येन सहितेन प्रधावता ॥ २ ॥
चतुर्ष्वपि च पादेषु बद्ध्वा कच्छपमादरात् । यष्टिकाग्रे प्रलम्ब्यैतं तत्पुरं प्राविशन्मुदा ॥ ३ ॥
सर्वाङ्गीणं ददस्तोषं भार्याविग्रहसमुत्सुकः । धनः स मासिकस्तूर्णं गच्छतीति समुच्चरन् ॥ ४ ॥[2]
भूपेनाभयघोषेण चक्रं मुक्त्वा भयत्रसः । कच्छपस्यैकघातेन छिन्नं पादचतुष्टयम् ॥ ५ ॥
जीवन् स कच्छपोऽनेन धीवरेण त्वरावता । नीतः स्वमन्दिरं पार्श्वे भयविह्वलचेतसा ॥ ६ ॥
कष्टं हत्वा स दुःखेन तस्यामेव निशि द्रुतम् । नन्दनोऽभयघोषस्य चण्डवेगाभिधोऽजनि ॥ ७ ॥
अथापरेऽभयघोषोऽपि भुञ्जानो भोगसम्पदम् । स्वदेवीभिः समं सारं तिष्ठति प्रीतमानसः ॥ ८ ॥
निरीक्ष्य सहसा चन्द्रं गृहीतं राहुणा तदा । स नरेन्द्रः[3] सवैराग्यो नन्दनान्तेऽग्रहीत् तपः ॥ ९ ॥
भ्रमन्नीतः स सम्प्राप्य श्रीमदुज्जयिनीं पुरीम् । वीरासनेन सन्तस्थेऽभयघोषमहामुनिः ॥ १० ॥
चण्डवेगाभिधानेन तत्पुत्रेणास्य कोपतः । पूर्ववैरेण सञ्छिन्नं हस्तपादचतुष्टयम् ॥ ११ ॥
सहित्वाऽभयघोषोऽपि चण्डवेगोपसर्गकम् । केवलज्ञानमुत्पाद्य प्रययौ मोक्षमक्षयम् ॥ १२ ॥

॥ इति अभयघोषमुनिकथानकमिदम् ॥ १३७ ॥

*

१३८ विद्युच्चरमुनिकथानकम् ।

अत्रैव भारतक्षेत्रे मिथिलानगरीपतिः । आसीद् वामरथो राजा शूरः पद्मरथान्वये ॥ १ ॥
तस्य तन्महादेवी रूपयौवनसंयुता । इष्टा बन्धुमती नाम बन्धुलोकमनःप्रिया ॥ २ ॥
आरक्षिकोऽभवत् तत्र यमदण्डो यमोपमः । चौरो विद्युच्चरः ख्यातश्चतुःषष्टिकलान्वितः ॥ ३ ॥
चोरयन् सारवस्तूनि बहुमूल्यानि तत्पुरे । भूमौ निधापयत्येष विद्युच्चौरः कलान्वितः ॥ ४ ॥
कुष्ठरोगसमाक्रान्तः कुथितास्थिलविग्रहः । दिने देवकुले सोऽयं निर्विण्णो व्यवतिष्ठते ॥ ५ ॥
दिव्यदेहधरो नक्तं कृत्वा लोकमनो बहु । कामं गणिकया सार्धं भुञ्जानः स वितिष्ठते ॥ ६ ॥
अन्यदा व्याघ्रवद् नक्तं प्रविश्य मणिकोशलात् । हारं वामरथस्यास्य गृहीत्वा निर्ययौ द्रुतम् ॥ ७ ॥
यमदण्डं समाहूय प्रभातसमये सति । जगौ वामरथो राजा निद्राघूर्णितलोचनः ॥ ८ ॥
अद्य भद्र प्रविश्यैको महाशयनं नरः । दिव्यरूपधरः श्रीमान् विद्युदुद्योतदेहकः ॥ ९ ॥
मोहं निधाय मे देव्याः पश्यतो भूपचेतसः । सुरदर्पं समादाय मुक्ताहारं स निर्ययौ ॥ १० ॥
यदि त्वं तस्करं भूप लभसे दिनसप्तके । ततस्ते शोभनं नूनमन्यथा दण्डमर्हसि ॥ ११ ॥
श्रुत्वा वामरथस्योक्तं तदानीं दण्डपाशिकः । चौरस्यान्वेषणं कर्तुं निर्गतोऽसौ नृपान्तिकात् ॥ १२ ॥
भ्रममाणश्चत्वरवीथीषु सप्तस्वपि दिनेष्वमुम् । कुर्वाणोऽन्वेषणं चौरं यमदण्डो न दृष्टवान् ॥ १३ ॥
वनान्तं देवकुलं धृत्वा संध्यायां सप्तमे दिने । तस्करो दण्डपेतस्के नृपान्ते बन्धुमुपगतः ॥ १४ ॥
वचने गुटिकां दिव्यां गृहीत्वा रक्षकामतः । मायारूपधरस्तत्र मायारूपं प्रकुर्वताम् ॥ १५ ॥
सुरेन्द्रविमानानां कृत्वागमनं परम् । अनेन मायया सार्धमिन्द्रजालस्य दर्शनम् ॥ १६ ॥
क्षणोऽयं तस्करो नैव तस्करो गुटिकाधनम् । आदाय महार्घं च विरूपाणि चरिष्णुकम् ॥ १७ ॥

---

1 [वल्लभा]. 2 [धनोऽस्य मास]. 3 [illegible] 4 [illegible] 5 [illegible] 6 [illegible] 7 [illegible]

श्लोकत्रयनिबद्धं मद्वचनं धूर्तसंभवम् । तच्चौरभाषितं सर्वं ज्ञातव्यं कोविदैरिदम् ॥ १८ ॥
आरक्षिकेण नृपस्य कौतुकव्याप्तचेतसः । रूपस्य च परावर्तदर्शनं विहितं ध्रुवम् ॥ १९ ॥
धनाढ्यो देशिको भूपो यमदण्डेन नाशितः । कारणेन विना नूनं लोकस्य वचनं स्थिरम् ॥ २० ॥[1]
संदेहमन्तरेणैव तस्करो भवति स्फुटम् । नरेन्द्रहारचौर्योत्थं तत्प्रत्ययवचनं स्थिरम् ॥ २१ ॥
आरक्षिकेण नीतोऽहं श्मशानं शर्वरीमुखे । हिमपातकृताकम्पे माघमासे सुखप्रदे ॥ २२ ॥
द्वात्रिंशद्वेदना घोराश्चौरसंबन्धकारणाः । क्रियमाणा मया कोपे प्रापयिष्यन्ति पञ्चताम् ॥ २३ ॥
श्लोकद्वयेन च प्रोक्तं वचनं भयभीषणम् । तच्चौरभाषितं ज्ञेयं विद्वद्भिः कृतनिश्चयैः ॥ २४ ॥[2]
ततः प्रभातकाले च यमदण्डेन वेगतः । नृपस्य पुरतः प्रोक्तं तस्करोऽयं नरेश्वर ॥ २५ ॥
प्रत्यक्षं भूपतेरेव वदति भीतमानसः । शृणु मद्वचनं भूप तस्करो न भवाम्यहम् ॥ २६ ॥
श्रुत्वा तद्वचनं राज्ञा दत्त्वाऽभयमतीव सः । जगाद विस्मितस्वान्तस्तस्करं भीतिवर्जितम् ॥ २७ ॥
त्वं चौरोऽसि महासत्त्व विहितानर्थकारण । न वा कथय मे शीघ्रं नितान्तं कौतुकेक्षिण ॥ २८ ॥[3]
निशम्य भूपतेर्वाक्यं जगादेदं मलिम्लुचः । विद्युच्चराभिधश्चौरविटो भुवि भवाम्यहम् ॥ २९ ॥
तथापि मद्भुजा भूपो ऽपि शुद्धः पुरतः स्थितः । द्वात्रिंशद्वेदना नष्टं कथं सोढा त्वया वद ॥ ३० ॥
नृपालवचनं श्रुत्वा महाविस्मयकारणम् । विद्युच्चरो जगादैवं नानाशास्त्रविशारदम् ॥ ३१ ॥
मुखारविन्दतः साधोः श्मशानस्थस्य धीमतः । श्रुतं नानाविधं दुःखं मया नरकसंभवम् ॥ ३२ ॥
शर्वरीसहितं दुःखं मया तेन विनिर्मितम् । इदं नरकदुःखस्य न समं लक्षभागतः ॥ ३३ ॥
इदं मया परिज्ञाय दुःखस्य सहनं नृप । कथितं तेऽखिलं सत्यमद्भुतं श्रुतं यथा ॥ ३४ ॥
विद्युच्चौरोदितं श्रुत्वा नरेन्द्रो निजगाद तम् । शोभनं शृणु तुष्टोऽहं वरं ब्रूहि ददामि ते ॥ ३५ ॥
क्षोणीनाथवचः श्रुत्वा न्यगदत् तस्करोऽप्यमुम् । अभयं देहि मित्रस्य तलारस्य मम प्रभो ॥ ३६ ॥
दत्त्वाऽभयं पुनः प्रोचे तस्करं धरणीश्वरः । यमदण्डः कथं मित्रं तव ब्रूहि ममाधुना ॥ ३७ ॥
धराधरवचः श्रुत्वा जगौ विद्युच्चरोऽपि तम् । आवयोर्मित्रहेतुत्वं शृणु त्वं नरकुञ्जर ॥ ३८ ॥
अथास्ति वसुधासारे दक्षिणापथगोचरः । आभीरविषयो नाम धनधान्यसमन्वितः ॥ ३९ ॥
तस्मिन् बेन्नानदीतीरे परं बेन्नातटं पुरम् । जितशत्रुनृपस्तस्य प्रिया जयमतिः प्रिया ॥ ४० ॥
अन्योन्यस्नेहसंयुक्तमनसोरनयोरहम् । विद्युच्चराभिधस्तोको नरेश्वरकलान्वितः ॥ ४१ ॥
अत्रैव नगरे भूप यमनामा तलारकः । तत्प्रिया यमुना देवी यमदण्डस्तदङ्गजः ॥ ४२ ॥
पाठकाले सखिकान्ते चौरशास्त्रमिदं मया । शिक्षितं धरणीपाल समस्तं गुरुशासनम् ॥ ४३ ॥
अनेन यमदण्डेन तस्यैवान्ते नरेश्वर । तलारधामिदं शास्त्रं शिक्षितं सकलं तदा ॥ ४४ ॥
एवं कृते सति क्षिप्रं मयाऽस्य गदितः पुनः । आरक्षिकोऽसि यत्र त्वं तत्र चौरोऽस्मि भूपते ॥ ४५ ॥
श्रुत्वा मद्वचनं राजन्नेषोऽपि निजगाद माम् । यदि चौरोऽसि यत्र त्वं तत्राहं रक्षकः परः ॥ ४६ ॥
कृतप्रतिज्ञयोरेवमावयोरत्र पत्तने । अन्योन्यप्रेमसंगेन याति कालः शनैः शनैः ॥ ४७ ॥
दत्त्वा राज्यमिदं मह्यं मत्पिता मोक्षनिःस्पृहः । अभिनन्दनसामीप्ये दधौ जैनेश्वरं तपः ॥ ४८ ॥
अस्यापि जनको राजन् दत्त्वाऽस्मै स्वपदं सुधीः । तस्यैव च गुरोरन्ते तपो जैनमशिश्रियत् ॥ ४९ ॥
बेन्नातटपुरे तत्र नानाजनसमाकुले । करोमि विपुलं राज्यं कण्टकैः परिवर्जितम् ॥ ५० ॥

---

1 पकाज चतुःश्लोकमिदम्. 2 पकज श्लोकमिदम्, ज श्लोकम्. 3 पकाज त्रिश्लोकमिदम्. 4 पक श्लोकमिदम्, ज श्लोकम्. 5 The text in क is mutilated. 6 [मायास्वसा]. 7 पकाज विरम्य. 8 [विद्युच्चराभिध] 9 [रक्षक].

पुराणं मयि सर्वं कुर्वाणो नरनायकः । मम ततस्तत्र याति नष्ट विस्मतन्द्रित ॥ ५१ ॥
मत्सर सकलं राजन् रक्षताऽनेन चौरत । मध्यमुखस्करोऽस्पर्श तलारोऽद्य च तत्पुरे ॥ ५२ ॥
न श्रेमनमिदं कार्यं सिधातु नगरेऽत्र मे । तस्करो यत्र भूपाळस्तत्र किं क्रियते मया ॥ ५३ ॥
चिन्तयित्वा चिर तत्र मन्त्रयेन गरीयसा । आरक्षिकमदं हित्वा स्वदन्तमयमागत ॥ ५४ ॥
पुष्पमालमदृशार्जुं कुर्वाणोऽस्य परीक्षणम् । अद्य समागतो राजन् भवदीय पुरं ध्रुवम् ॥ ५५ ॥
यामयोरेव संबन्ध प्राकृत प्रकटो महान् । नरवृन्दारक स्पष्ट कथितस्ते मयाऽखिलः ॥ ५६ ॥
हाराटिक धन सर्वं भूपाळस्य पुरो ऽमु । तदा समर्पयामास विद्युच्चौरः समान्तरे ॥ ५७ ॥
लेखेऽपि सकल दिव्यं स्वकीय तत्पुरोऽक्रमम् । जग्राह विस्मितस्वान्तस्तोपविस्फारितेक्षण ॥५८॥
इम निगद्य वृत्तान्त भूपस्य पुरतोऽखिलम् । तस्यौ मुदितचेतस्को विद्युच्चौरो नृपान्तिके ॥ ५९ ॥
अथ विद्युच्चरस्यान्तं विज्ञातात्मेयकारणे । मन्त्रिभि प्रहितो दूतो विन्यातस्पुरादरम् ॥ ६० ॥
विद्युच्चौरं परिप्राप्य जगौ दूतोऽपि तत्पुर । आगत्य स्वपुरं क्षीम कुरु राज्यमकण्टकम् ॥ ६१ ॥
यमाऽस्य सकल ज्ञात्वा वृत्तान्तं दूतवाक्यत । विद्युच्चौराभिधो नूनं भागिनेयो ममागत ॥ ६२ ॥
भागिनेयं परिज्ञाय यमाऽऽर्यं निजगायमुम् । ददामि ते सुतां वत्स प्रतीच्छ द्रुतमादरात् ॥ ६३ ॥
समकर्म्य वचस्तस्य मातुलस्य विपाश्चित । चमदण्डसमेतोऽसौ जगामाशु स्वपत्तनम् ॥ ६४ ॥
तत्र पुर समाहूय समस्तजनसाक्षिकम् । राज्यपट्टं चयन्यास तदा विद्युच्चर सुधी ॥ ६५ ॥
हित्वा परिग्रह सर्वं पञ्चसामन्तसमत । गुणसेनान्तिके दीक्षां दधौ विद्युच्चरस्तदा ॥ ६६ ॥
पञ्चमतः प्रकुर्वाण शिष्याणां पञ्चभि शतै । तामलिन्त्री पुरीं प्राप मन्द विद्युच्चरो मुनिः ॥ ६७॥
कस्युपस्माश्रवर्तिन्या दुर्गया सहसा मुनि । गदितोऽस्य महाभक्त्या नतया ललदाम्बुजे ॥ ६८ ॥
यतत् समाप्तिमायाति मसूजा परमेश्वरा । तावन्मा पत्तने याहि सदयं दिनपञ्चकम् ॥ ६९ ॥
तस्मात् वचस्तस्या शिष्यै प्रेरितमानस । विवेश नगरीं धीर पताकापङ्क्तिराजिताम् ॥ ७० ॥
तामलिन्त्रीपुरस्यास्य समीपे परिधिरयम् । तस्थौ पश्चिमदिग्भागे नक्तं प्रतिमया मुनि ॥ ७१ ॥
स स्थिते मुनी तत्र रात्रौ देवतया तया । कृता दशोपसर्गोऽयं विहित क्रूरचित्तया ॥ ७२ ॥
तमदंशोपसर्गं तं सहित्वा मेरुनिश्चलः । विद्युच्चर समाधानाद्विमानमगमद्द्रुतम् ॥ ७३ ॥

॥ इति श्रीविद्युच्चरमुनिकथानकमिदम् ॥ ११८ ॥

*

११९ गजकुमारकथानकम् ।

अथ भारतवित्तिकाख्यायां नगर्यामभवत् प्रभु । इक्ष्वाकुवंशसंभूत उपधुपचक्रधर ॥ १ ॥
अभवत् तन्महादेवी पद्मावत्यभिधानिका । तनयोऽनन्तवीर्याख्योऽनन्तवीर्य परोऽनयोः ॥ २ ॥
शतानि पञ्च पुत्राणां सन्ति तस्य महीभुत । रूपयौवनयुक्तानां चक्रपाण्यादिशालिनाम् ॥ ३ ॥
धर्मोपरिचरो राजा स्वकीयान्तःपुरान्वित । महाप्रमोदसंयुक्त प्रमदावनं ययौ ॥ ४ ॥
तत्र पद्मावती देवी द्वितीया चामितप्रभा । तृतीया सुप्रभा चाथ चतुर्थापि प्रभावती ॥ ५ ॥
महादेवीभिरेताभि क्रीडितु सह तद्वने । सुलक्षणास्यमवाप्यन्ते वृक्षोपरिचर नृपम् ॥ ६ ॥
मदलोपपदा जगा विपुलंपुष्पवान्विता । तदा प्रशंसयामास रममाणा वनान्तरे ॥ ७ ॥

1 [स्थं]. 2 ज तामलिन्त्रीपुरी. 3 [परमेश्वर]. 4 पफ: भागारोपसर्ग 5 ——

विद्युद्दंष्ट्रो रुषं प्राप्य नीत्वा स्वनगरं प्रियाम् । आजगाम पुनः क्षिप्रं तद्वने खेचरेश्वरः ॥ ८ ॥
सुदर्शनाख्यधात्र्या हि धनया स्थितया रुषा । अस्मात्प्रोत्सारयामास विद्युद्दंष्ट्रखगेश्वरः ॥ ९ ॥
एवं कृतेऽमुना कोपान्मिथ्यादर्शनसंयुतः । सर्वोपरिचरो राजा ममार सहसाऽत्र सः ॥ १० ॥
मृताऽऽर्तध्यानतो राजा तद्वनेऽमललोचनः । कृष्णाञ्जनशरीराभो वनहस्ती बभूव सः ॥ ११ ॥
पद्मावत्यादिका भार्या सम्यग्दर्शनसंयुता । विधायानशनं तस्मात् समुद्भूता सुरेव सा ॥ १२ ॥
विमाने स्वस्तिकावर्ते प्रथमस्वर्गसंभवे । पवसोऽपि महादेव्यो बभूव रूपसंयुता ॥ १३ ॥
तृतीयदिवसे यातेऽनन्तवीर्यस्वरक्षकः । जगाम सहसा रन्तुं तदुद्यानवनं मुदा ॥ १४ ॥
तस्मिन्नवत्रसंनिष्पन्नविज्ञानलोचनम् । मुनिं सागरसेनाख्यं ददर्शानन्तवीर्यकः ॥ १५ ॥
नत्वाऽसौ भक्तितो राजा शोकसंतापसमन्वितः । अवधिज्ञानसंपन्नं पप्रच्छेदं महामुनिम् ॥ १६ ॥
भगवंल्लोकपूज्यानन्द सुरखेचरवन्दित । भविता क्व गतिं नाथ मत्तो ब्रूहि ममाधुना ॥ १७ ॥
निशम्यानन्तवीर्यस्य वचनं मुनिसत्तम । वचसा सत्यरूपेण यथावेदं पुरः स्थितम् ॥ १८ ॥
सुदर्शनाख्यधात्र्यन्त विद्युद्दंष्ट्रेण कोपतः । त्वत्पिता मरणं नीतः शिलासंछादितमुखे ॥ १९ ॥
आर्तध्यानान्मृतिं प्राप्य मिथ्यादर्शनयोगतः । बभूवात्र वने कृष्णो भीमघोषो गजाधमः ॥ २० ॥
श्रुत्वा महामुनेर्वाक्यं तदाऽनन्तबलोऽगदत् । कथमयं नाथ मे ब्रूहि जिनधर्मं ग्रहीष्यति ॥ २१ ॥
वाक्यमनन्तवीर्यस्य वचनं मुनिनायकः । अवधिज्ञानसंपन्नो यथावेदं स्फुटाक्षरम् ॥ २२ ॥
गत्वा तद्धस्तिसामीप्यमेवं वद शुभाशयम् । यशोपरिचर क्षिप्रमहि साधुसमीपताम् ॥ २३ ॥
त्वदीयवचनं श्रुत्वा निश्चलचित्त एव च । जातिस्मरत्वमासाद्य सर्वो धर्मं ग्रहीष्यति ॥ २४ ॥
मुनिवाक्येन संप्राप्य तदन्तं नरकुञ्जरः । जगाम मुनिवाक्येन वनगं सिन्धुसिन्धुरम् ॥ २५ ॥
धनवाऽनसथा धन मुनिमाश्रय कोपतः । जिनधर्मं प्रसादात्तु सुखितां येन गच्छसि ॥ २६ ॥
श्रुत्वाऽनन्तबलप्रोक्तं निगदं हृदयेप्सितम् । मुनिपार्श्वं ययावादिधर्मसिन्धुसमाकुलः ॥ २७ ॥
पुरःस्थितमहर्षिं साधुगणानुचरं पुरा । धर्मं गृहाण महाभव्याधुना जिनदेशितम् ॥ २८ ॥
जातिस्मरत्वमासाद्य सर्वोऽयं मुनिवाक्यतः । जग्राह मनसा धर्मं पवित्रं जिनभाषितम् ॥ २९ ॥
अस्मादणु सम्यक् विधाय मुनिपादनिवेदनात् । गृहीत्वाऽनशनं तूर्णं पञ्चत्वमगमत् करी ॥ ३० ॥
देवो नागकुमारोऽभूत् त्रिपल्योपमजीवितः । हारराजितवक्षस्कः सुन्दरो धाममन्दिरे ॥ ३१ ॥
अन्यदा जननीं ज्ञात्वा विज्ञायावधियोगतः । रूपाजिनसमीपं तु वन्दितुं सहसाऽगमत् ॥ ३२ ॥
ततः सुधामनामानं समाहूय स्वनन्दनम् । दत्त्वानन्तवीर्योऽयं निजराज्यमकण्टकम् ॥ ३३ ॥
बाह्यमाभ्यन्तरं संगं हित्वाऽनन्तबलस्तदा । दधौ सागरसेनान्ते दीक्षां दैगम्बरीमिमाम् ॥ ३४ ॥
निहत्य घातिकर्माणि कृत्स्नदुःखानि दुर्दिनाम् । मुक्तिं जगाम शुद्धात्माऽनन्तवीर्यो महामुनिः ॥ ३५ ॥
अथ नागकुमारोऽसौ नन्दीश्वरमहामहम् । विधाय मन्दरं प्राप्य वन्दनार्थं जिनेशिनाम् ॥ ३६ ॥
विद्युद्दंष्ट्रं गिरौ तत्र स्थितं सार्धं निजप्रियाम् । देवो नागकुमारोऽसौ सकलत्रं ददर्श तम् ॥ ३७ ॥
नीत्वा वार्धिविमध्ये स सकलत्रं निमज्जयन् । पूर्ववैरानुबन्धेन ममार स युगे सह ॥ ३८ ॥
सम्प्रत्यग्रमिव मध्ये विद्युद्दंष्ट्रा सहामुना । पञ्चानर्कविशत्याद्य प्रथमं नारकं ययौ ॥ ३९ ॥
तत्र निःसृत्य दुःखेन विद्युद्दंष्ट्रखगः सुहृत् । बभूव पुण्डरीकाख्यो लोभिमदहीनपरः ॥ ४० ॥

1 पत्र °बल्या°. 2 पत्रज पुण्ट्यीरस्. 3 पत्रज विमानीरस्. 4 [°बन्दिगगर]. 5 पत्रज निर्दयीरस्. 6 ए Leo an emendation of ... 7 पत्रज पुण्डीरस्.

हस्तिनागपुरे कान्ते कुरुवंशसमुद्भवः । राजा विजयदत्तोऽभूद् विजयाऽस्य नितम्बिनी ॥ ४१ ॥
देवो नागकुमारोऽपि च्युत्वा कल्पाऽऽर्तवर्जितः । गुरुदत्ताभिधो रूपी बभूव तनयोऽनयोः ॥ ४२ ॥
अन्यदाऽस्मादष्टवर्षस्य दत्त्वा राज्यं महामतिः । जिनसेनान्तिके दीक्षां जग्राह जिनदेशिताम् ॥४३॥
हस्तिनागपुरे रम्ये गुरुदत्तोऽपि तत्सुतः । चकार विपुलं राज्यं त्रिदिवे वा पुरन्दरः ॥ ४४ ॥
लाटदेशाभिधे देशे बहुलोकधनान्विते । पूर्वोत्तरदिशाभागे द्रोणिमद्भूधरस्य च ॥ ४५ ॥
आसीच्चन्द्रपुरी रम्या सितप्रासादसंकुला । बहुलोकसमाकीर्णा धनधान्यसमन्विता ॥ ४६ ॥
चन्द्रकीर्तिरभूत्तस्यां नरेन्द्रो जितशात्रवः । चन्द्रलेखा महादेवी तस्य चन्द्रसमानना ॥ ४७ ॥
जिनमत्यादिकास्तस्या बभूवुः सप्त कन्यकाः । तन्मध्ये पश्चिमा जाताऽभयादिमतिरुत्तमा ॥ ४८ ॥
गुरुदत्तोऽपि तां कन्यां तदर्थं याचिते[1] तराम् । तत्पिता मनसाऽपीमां दातुं नेच्छति रूपिणीम् ॥४९॥
अनेन कारणेनाशु स्कन्धावारेण भूयसा । वेष्टयित्वा पुरीमस्य गुरुदत्तोऽपि तस्थिवान् ॥ ५० ॥
ततो महाहवो जातो गुरुदत्तस्य भीषणः । चन्द्रकीर्तिनृपेणामा बहुप्राणक्षयावहः ॥ ५१ ॥
ततो महीन्द्रदत्तस्य स्थितस्य रणमस्तके । सकङ्कणोऽरिणा छिन्नः केनचित् पातितः करः ॥ ५२ ॥
गृहीत्वा तं करं क्षिप्रं चिल्लिका गगनस्थिता । भ्राम्यति स्म यशोऽस्यैव दर्शयन्तीव नाकिनाम् ॥ ५३ ॥
भ्रमन्त्याश्चिल्लिकाया खे स्थिताया निजमन्दिरम् । पपात सहसा व्योम्नः करोऽभयमतेः पुरः ॥५४॥
श्वशुरस्य[3] करं दृष्ट्वा महाकटकराजितम् । कन्यया धात्रिका पृष्टा भूषणं पतितं कुतः ॥ ५५ ॥
कन्यावचनमाकर्ण्य धात्रिका निजगादमूम् । विस्मयव्याप्तचेतस्कां किंचिच्चकितमानसाम् ॥ ५६ ॥
इह ते पुत्रि संग्रामे प्रवृत्ते जनसंक्षये । कस्यचित् केनचिच्छिन्नः करोऽयं पतितो भुवि ॥ ५७ ॥
धात्रिकावाक्यमाकर्ण्य कन्येयं विकसन्मुखी । सविस्मया च संजाता तदानीं क्षणमात्रकम् ॥५८॥
अत्रान्तरे भयग्रस्तश्चन्द्रकीर्तिर्नरेश्वरः । ददौ कन्यामिमां प्रीतो गुरुदत्ताय धीमते ॥ ५९ ॥
अनया भार्यया सार्धं गुरुदत्तस्य तिष्ठतः । आगत्य सहसा लोको जगादेवं पुरोऽस्य सः ॥ ६० ॥
द्रोणिमत्पर्वतस्यान्ते स्थितेन नरपुंगव । व्याघ्रेणोपद्रुतो देव सकलोऽपि दुरात्मना ॥ ६१ ॥
श्रुत्वा लोकवचो राजा गुरुदत्ताभिधो रुषा । स्वसैन्यसमुदायेन द्रोणिमत्पर्वतं ययौ ॥ ६२ ॥
श्रुत्वा कलकलारावं तत्सैन्यस्य करिस्वनम् । प्रविवेश गुहामध्यं व्याघ्रो भयविह्वलः ॥ ६३ ॥
यदा तन्मारणं कर्तुं शक्नुवन्ति न तद्भटाः । तदा गुहामुखे वह्निर्ज्वालितस्तैस्तृणादिभिः ॥ ६४ ॥
[illegible] महाधूमेन वह्निना । ज्वालोद्योतितखेनाशु व्याघ्रो मृतिमुपागमत् ॥ ६५ ॥
चन्द्रपुर्यामभूद् विप्रो भवशर्माभिधः पुरि । तत्प्रिया मादनी नाम जिनदेवी मनःप्रिया ॥ ६६ ॥
मृत्वा व्याघ्रोऽभवत् पुत्रस्तयोः प्रेमानुरक्तयोः । कपिलो नाम विख्यातः कपिलाऽस्य च तत्प्रिया ॥६७॥
ततो बहूनि वर्षाणि भुक्त्वा भोगान् यथेच्छया । सम्मानमभयमत्याऽस्मा चन्द्रपुर्यामनारतम् ॥ ६८ ॥
हस्तिभिर्मैत्रिभिस्तुङ्गैर्वातवेगैस्तुरङ्गमैः । रथैः कनकनिर्माणैः पादातैः कृतनिस्वनैः ॥ ६९ ॥
सहितो बन्दिवृन्देन तूर्यमङ्गलनिस्वनैः । गुरुदत्तो विवेशाशु हस्तिनागपुरं परम् ॥ ७० ॥[7]
ततोऽभयमतिर्भार्या कालेन कलनिस्वना । सुतया भद्रनामानमसूत तनयं परम् ॥ ७१ ॥
अन्यदा तत्पुराभ्याशे धरणीभूषणं गिरिम् । नानाशिलातलोपेतं तरुषण्डविराजितम् ॥ ७२ ॥
भरताभरणनामायमाचार्यः श्रुतसागरः । आजगाम तपोराशिर्मुनीनां सप्तभिः शतैः ॥ ७३ ॥[8]

1 प विवेशे फ विवेशा. 2 [कान्ते]. 3 [श्वशुरस्य]. 4 पफज पुष्पमिदम्. 5 पफज पुष्पमिदम्. 6 पफज पुष्पमिदम्. 7 पफज चिह्नमिदम्. 8 पफज पुष्पमिदम्.

आकर्ण्य तं मुनिं प्राप्तं गिरावत्र मनोरमे । आजगाम महाभक्त्या गुरुदत्तस्तदन्तिकम् ॥ ७४ ॥
त्रिः परीत्य मुनिं भक्त्या नत्वाऽमुं स निविश्य च । पप्रच्छ स्वान् भवान् पूर्वान् गुरुदत्तः कृताञ्जलिः ॥
गुरुदत्तोदितं श्रुत्वा मुनिचन्द्रो महामुनिः । कृपाकूपारसंपृक्तमानसो निजगाविदम् ॥ ७६ ॥
आसीदन्यभवे राजन् राजोपरिचरोऽप्यहिः । ततो नागकुमारोऽपि गुरुदत्तोऽसि सांप्रतम् ॥ ७७ ॥
श्रुत्वा भवानतीतांस्तु राजापि मुनीरितान् । पप्रच्छ स्वभवं पूर्वमभयादिमतिप्रियम् ॥ ७८ ॥
अभयादिमतस्तस्य निशम्य मुनिनायकः । अभाषीत् तद्भवान् सम्यग्ज्ञानविज्ञानलोचनः ॥ ७९ ॥
आसीद् गरुडवेगाख्यो गगनपुरेऽत्र च । तत्प्रिया गोमती नाम सञ्जाता पूर्वजन्मनि ॥ ८० ॥
अन्यदैतां पुरीं धर्मी विहरन् गतियोगतः । मुनिः समाधिगुप्ताख्यः संप्राप्तस्तत्र सत्तमः ॥ ८१ ॥
मधुमांससुरापानत्यागप्राणिवधोज्झनम् । व्रतमेतत् समादाय गत्वा स्वं स्वगृहं पुनः ॥ ८२ ॥
तद्देवेन पुनस्तस्या महर्षिनिचिते गृहे । पयस्तस्यास्त्वया भुक्तं गवास्तत्त्वमनीपितम् ॥ ८३ ॥
तत्क्षणेन तया त्वं च स्वप्रदानाश्रिता सती । कृत्वा निदानजान् भोगान् संप्राप्ता प्रवरामरम् ॥८४॥
जाता त्वं चन्द्रलेखायास्तनया मतिशालिनी । अभयादिमतिः पुत्रि दयार्द्रीकृतमानसा ॥ ८५ ॥
त्वया गर्भस्थया तस्मिन् धर्मचिन्तस्वचेतसा । त्वन्मातुश्चन्द्रलेखाया बभूव हृदि दोहदः ॥ ८६ ॥
सर्वजन्तोः प्रयोज्यापि नाघाहमस्थिखादिनाम् । अभयं सत्यसारेण ददामि वसुधातले ॥ ८७ ॥
त्वन्मातुरस्य वाक्येन सर्वत्र विषयस्थिते । जीवाभयप्रदानोऽस्या विहिता घोषणा ध्रुवम् ॥८८॥
अनेन कारणेनार्ये जनकेन दयान्विता । अभयादिमतिः प्रोक्ता समस्तानुपमात्मिकम् ॥ ८९ ॥
श्रुत्वाभयमतिः पूर्वं भवं मुनिवरोदितम् । अभयार्यिकापार्श्वे प्रवव्राज मनस्विनी ॥ ९० ॥
गुरुदत्तः सुपुत्राय श्रीदत्ताय श्रियं पराम् । दत्त्वाऽमितमुनेः पार्श्वे तपो जैनमशिश्रियत् ॥ ९१ ॥
अथ भक्तं समादाय कपिला दधिमिश्रितम् । क्षेत्रं जगाम दुष्टात्मा स्वकीयं पतिशासनात् ॥ ९२ ॥
कपिलो विस्मितः धर्मं व्याहृत्येन क्षुधार्दितः । क्रुद्धो मध्याह्नवेलायां प्रययौ निजमन्दिरम् ॥९३॥
दृष्ट्वा निजगृहे रुष्टः कपिलः कपिलां जगौ । दुष्टे किं कारणं भक्तं मुक्त्वा स्वगृहमागता ॥ ९४ ॥
अहमपारि पापिष्ठ क्षुधापन्नाकदर्थित । तिष्ठामि दुष्टचेतस्का दुर्जनानां सुदुर्जनि ॥ ९५ ॥
कपिलस्त्विति मानस्य कपिलापि जगाम तम् । तदेव भक्तमादाय गता यत्र मनःप्रिय ॥ ९६ ॥
गत्वा तां पुनस्तत्र क्षुधापन्नचेतसम् । आगता स्वगृहे नाथ ममपतिनिमित्तका ॥ ९७ ॥
कपिलया पथि भुक्त्वा न्यगादीत् कपिलापि ताम् । मुनिना तेन किं नोक्तमिदं वाक्यं पुरस्त्वया ॥९८॥
अन्यथेत्थं गतो मिश्रो द्रव्यमादाय चान्तिके । क्षेत्रस्य कथयं कस्तु क्षुधाक्रममानसः ॥ ९९ ॥
निशम्य कपिलेनोक्तं जगाद कपिलापि तम् । इदं मुनिगिरा प्रोक्ते किं वच्मि मतनिस्पृहा ॥१००॥
मुनिस्त्यक्तोऽपि नो किंचित् किं निमुग्ध्यानमः । ध्यानारूढो विशुद्धात्मा मूर्ध्नां प्राप्य तस्थिवान् ॥१०१॥
तदाकर्ण्य रुषा दिव्या कपिलः कपिलागिरि । क्षपामुखेऽपि दुष्टात्मा आयतने हृदये ॥ १०२ ॥
धार्मिकेण समादाय कर्पासं च विशुद्धः । प्रतिमास्थं मुनिं प्राप्य कपिलोऽदितलोचनः ॥ १०३ ॥
पादमूले तं साधुं पादस्पर्शसमागतान् । पश्चात् कर्पासमास्तु निनान्ते विद्रवर्जितम् ॥ १०४ ॥
तत्स्पर्शशरीरं चित्रं निम्नपादाग्रकं कुपः । कपिलोऽपि मनःशाठ पूरयन्नुपपन्नः ॥ १०५ ॥
अप्याप्य वह्नौ धार्मो गुरुत्वा महामुनिः । सम्प्राप्य कनकध्याने स्वाध्यायस्थलोचनम् ॥ १०६ ॥

1 पत्त्र कृताञ्जलिः. 2 पत्त्र [illegible]. 3 पत्त्र [illegible]. 4 पत्त्र [illegible]
5 पत्त्र [illegible]. 6 पत्त्र [illegible]

यथा केवलं ज्ञात्वा गुरुदत्तमहामुने । चतुर्विधा परिप्राप्ता नन्तुं केवलिनं तदा ॥ १०७ ॥
दृष्ट्वाऽतिशयमीदृशं गुरुदत्तस्य योगिनः । कृत्वा स्वनिन्दनं पार्श्वं प्राप्य केवलिनं द्विजः ॥ १०८ ॥
नत्वा केवलिनः पादौ श्रुत्वा धर्मं जिनोदितम् । पप्रच्छ स भवान् पूर्वान् कपिलो भयवेपितः ॥१०९॥
श्रुत्वाऽस्य वाचिकं शीघ्रं गुरुदत्तोऽपि केवली । जगाद तद्भवान् पूर्वान् संक्षेपेण यथाक्रमम् ॥११०॥
व्याधीस्त्वं प्रथमं भद्र विधुरः सुखेश्वरः । इतो नागकुमारेण मृत्वा रत्नप्रभामितः ॥ १११ ॥
ततो निर्गत्य खेदेन तोष्मिमत्पर्वतोपरि । पुण्डरीको महाकायः शार्दूलो भयंकरः ॥ ११२ ॥
गुरुदत्तेन भूपेन तद्गिरौ धर्मवासितधीः । नीतोऽसि सांप्रतं जातः कपिलः कपिलापतिः ॥ ११३ ॥[1]
श्रुत्वा केवलिनो वाक्यं हित्वा वैरं पुरातनम् । बभूव कपिलः सद्यस्तदन्ते मुनिपुंगवः ॥ ११४ ॥
अमिश्रेण्य गृहीतार्थो गृहीतैकविहारकः । यथास्थमनशायी च कौशल्यं विषयं ययौ ॥ ११५ ॥
गिरिशिखरके भीमे शुष्कस्थाणुकयोपरि[2] । कपिलः शर्वरीयोगं जग्राह स्थिरमानसः ॥ ११६ ॥
तस्याधःस्थे वार्हं क्षिप्त्वा नष्टः स पामरः । अजानस्तं मुनिं तत्र जगाम स्वं निकेतनम् ॥ ११७ ॥
उपसर्गं सहित्वाऽन्नं चित्रभानुसमुद्भवम् । कपिलः शुद्धचेतस्कः काठं चक्रे समाधिना ॥ ११८॥
ततोऽच्युतेऽच्युते कल्पे हारकुण्डलराजितः । द्वाविंशतिसमुद्रायुर्जातो देवो महर्द्धिकः ॥ ११९ ॥
ततोऽसौ कौटुम्बः प्राप्य प्रभाते वल्कलं हुतम् । तत्र तं मुनिमालोक्य वह्निना भस्मसात्कृतम् ॥१२०॥
विधाय निन्दनं स्वस्य गर्हणं च सुदुःखितः । तस्मिन्समौ स्वयं क्षिप्त्वा देवो हीनोऽभवत् पुनः ॥१२१॥
बाधुरन्ते सको विन्ध्ये नानाव्यालनगाकुले । श्वेतहस्ती बभूवाशु भीमरूपः सितध्वजः ॥१२२॥
अन्यदा तं गजं दृष्ट्वा कुर्वन्तं जनसंक्षयम् । अच्युतेन्द्रः समायातस्त्वरा बोधयितुं वने ॥ १२३ ॥
बोधयित्वा तकं शीघ्रं नयध्वान्तेऽद्युतिमिः । अच्युतेन्द्रो दिवं यातो गजोऽपि प्रथमं ययौ ॥१२४॥
संयमास्त्वं तपः शान्तं गजोऽयं प्रीतमानसः । चकारानुदिनं तत्र क्षान्तिभूषितविग्रहः ॥ १२५ ॥
अन्यदा गजवृन्दं च दावानलशिखाहतम् । अधो न्यग्रोधवृक्षस्य तस्थौ संभयमानसम् ॥ १२६ ॥
दावानलशिखरं तत्र ज्वालभासितपुष्करः[3] । शुष्कशाखो वहलाग्निर्निर्वाणं तद्वक्षोपरि ॥ १२७ ॥
स्वं ज्वलति तद्वृक्षे सम्यग्दृष्टिगजस्य च । पादमूलेऽखिलसत्त्वाः प्रविष्टा भयकम्पिताः ॥ १२८ ॥
सम्यग्दर्शिको मृत्वा दावानलशिखाहतः । क्षान्तिभूषितचेतस्कः सहस्रारे सुरालये ॥ १२९ ॥
पद्मगुल्मविमानेऽभून्मुकुटहारविराजितः । अष्टादशसमुद्रायुः सुरो रूपमनोहरः ॥ १३० ॥
ततो भवधरो देवश्च्युत्वा राजगृहे पुरे । श्रेणिकस्य महादेव्या गर्भे सोऽयं धनप्रियः ॥ १३१ ॥
श्रेणिकस्य महादेव्या रूपवत्या धनप्रियः । तस्मिन् गर्भस्थिते देव्या दोहदं समभूदिदम् ॥१३२॥
आमिस्थ गज इन्तुं प्रावृट्काले सविद्युति । स्कन्धावारेण सर्वेण प्रविश्य गहनं परम् ॥ १३३ ॥
न्यग्रोधस्य फलवाप्त्यै दिव्यशाखाविशालिनः । फलप्रसमृद्धस्य चित्रपादपशोभिनः ॥ १३४ ॥
रजनीसंनिभे यामे श्वेतस्य घनहस्तिनः । स्वभे प्रदर्शनं जातं मम नाथाय शोभनम् ॥ १३५ ॥
धनप्रियो वचः श्रुत्वा श्रेणिको दुःखिताशयः । अभयादिकुमारं च समाहूयाभ्यधादिदम् ॥१३६॥
कुमार सुकुमाराङ्ग मतिराजितमानस । उपायं ब्रूहि मे शीघ्रं दोहदस्य धनप्रियः ॥ १३७ ॥
तातीयं वचनं श्रुत्वा कुमारोऽभयपूर्वकः । तदुपायं जगादेमं श्रेणिकस्य पुरस्त्वरा ॥ १३८ ॥
विपश्ये विजयार्धस्य दक्षिणस्यां दिशि प्रभो । आकाशतिलकाभिख्या नगरी परमोत्सवा ॥ १३९ ॥
बभूवासां पुरि श्रीमान् खेचरेन्द्रो मनःप्रियः । कनकोपचरा माद्य तत्प्रिया मनसः प्रिया ॥१४०॥

1 पचक गुण्डमितस्य. 2 पच 'स्थाणूपरि. 3 [जाले]. 4 ज पर्यं स बध्यमिक: [सोऽग्रामसनिभः].
5 पचक फलाकुलमितस्य.

नीलोत्पलदलश्यामा कन्दोट्टदललोचना । कनकोपपदा विद्या बभूव तनयाऽनयोः ॥ १४१ ॥
साधयन्ती तदा विद्यां खेचरी रूपशालिनीम् । चित्रपूर्वमतिः खेटो जग्राह करपल्लवे ॥ १४२ ॥
श्रुत्वा तत्क्रन्दन्ती च मनोगत्यादिखेचरा । ऊचुस्तं स्वरनादेन कोपारुणनिरीक्षणा ॥ १४३ ॥
तिष्ठ द्वादश वर्षाणि भूत्वा भूगोचरः खग । प्रायश्चित्तमिदं वृत्तं तस्य ते समागते ॥ १४४ ॥
अनेन कारणेनाय प्राप्य राजगृहं पुरम् । खेचरः प्रीतवर्धनस्कन्धसौ कामजनपदे ॥ १४५ ॥
वर्षैकादशस्वपि पूर्णेष्वयन्ते खेचरे स्थिते । दृष्ट्वा पप्रच्छ तं विद्यां कुमारोऽभयपूर्वकः ॥ १४६ ॥
तदाख्यातो विशीर्णास्ता विद्याः खेटेन तस्य च । कुमारः साधयामास विद्यास्तं सुधीरधीः ॥ १४७ ॥
तत्र साधितविद्योऽसौ कुमारोऽभयपूर्वकः । समं विद्याधरेन्द्रेण चकार स्थिरसङ्गतिम् ॥ १४८ ॥
अन्यदा दोहदार्थं स्मरात् कुमारः प्रीतमानसः । सस्मार तस्य मित्रस्य विद्यादानविधायिनः ॥ १४९ ॥
कुमारस्मरणं ज्ञात्वा तदा दोहदसंभवम् । खेचरेन्द्रः परिप्राप्य तन्मित्रं प्रेमतत्परः ॥ १५० ॥
तदिदं दोहदं कृत्वा विद्याधरमहेश्वरः । ततः पूर्णां परिप्राप्य जगाम स्व निकेतनम् ॥ १५१ ॥
अथ मासेष्वतीतेषु नवसु क्रमतोऽस्य च । जातो गजकुमाराख्यस्तनयो धर्मभूषितः ॥ १५२ ॥
अत्रान्तरे समायातः सुमतिः सुमतिर्मुनिः । पूजितः सर्वलोकेन भक्तितः कृतवन्दनः ॥ १५३ ॥
समीपेऽस्य मुनेः श्रुत्वा धर्मं पूर्वभवं निजम् । जगामोपशमं धीमान् कुमारो गजपूर्वकः ॥ १५४ ॥
तत्समीपे ततः प्राप्य कुमारो जैनपुङ्गवम् । गृहीत्वाऽऽगमसद्भावं प्राप्तश्चैकविहारताम् ॥ १५५ ॥
अन्यदा विहरन् क्वापि कश्चिद्विषयोत्सवम् । पुरं दन्तिपुराभिख्यमाजगाम महामुनिः ॥ १५६ ॥
तत्पश्चिमदिशो भागे स मुनिर्गजपर्वते । समाहात्यपनायोगं सुधीः कर्मनिहानये ॥ १५७ ॥
पुरन्दरपुराभीके सुरमानसहारिणि । वसति प्रीतवेषस्के नरसिंहो नरेश्वरः ॥ १५८ ॥
अभवत् तन्महादेवी सुमतिः सुमतिस्वराम् । गुणपालः सुतस्तस्य निहताशेषशात्रवः ॥ १५९ ॥
बुधमन्त्रप्रयोगज्ञो मन्त्री निष्ठुरमानसः । बुद्धदासोऽभवत् तस्य नरेन्द्रस्य महामते ॥ १६० ॥
गजपर्वतमभ्यस्य समालोक्य मुनिपुङ्गवम् । गुणपालो यथाभेदं भणितं पुरतः स्थितम् ॥ १६१ ॥
किं कारणमयं योगी पर्वतेऽत्र समुन्नते । संस्थितोऽत्यन्तशान्तो दिवाकरकराहतः ॥ १६२ ॥
गुणपालवचः श्रुत्वा बुद्धदासो जगावमुम् । राजन् शरीरमेतस्य गृहीतं वज्रवायुना ॥ १६३ ॥
निशम्य बुद्धदासस्य वचनं भूपतिर्जगौ । वदैतस्य मुनेः शीघ्रमौषधं वातनाशनम् ॥ १६४ ॥
आकर्ण्य भूपतेर्वाक्यं बुद्धदासो जगावमुम् । शिलातलमिदं सर्वं क्रियते वह्निनोपमम् ॥ १६५ ॥
भिक्षानिमित्ततो यावन्मुनिर्यातः पुरं प्रति । तावच्छिलातलं सर्वं कारितं वह्निनाऽमुना ॥ १६६ ॥
दूरं देवतया प्रोक्तो मुनिर्भिक्षां प्रति व्रजन् । मुनीन्द्र लोकपापुष्टे यत्तवेष्टं तत्कुरु द्रुतम् ॥ १६७ ॥
निशम्य देवतावाक्यं स मुनिर्वीतसंशयः । आजगाम पुनर्धीरस्तद्देवापि शिलातलम् ॥ १६८ ॥
कृत्वाऽनशनादिकं सोऽसौ नियमं यावज्जीविकम् । तस्मिन् शिलातले तस्थौ कायोत्सर्गेण धीरधीः ॥ १६९ ॥
उपसर्गं सहित्वाऽसौ कृत्वा काठं समाधिना । अन्तकृत्केवली भूत्वा निर्वाणं गतवानसौ ॥ १७० ॥
दृष्ट्वा गजकुमारस्य तदाऽतिशयमीदृशम् । बुद्धदासोऽभवत् तूर्णं सम्यग्दर्शनसंयुतः ॥ १७१ ॥
गुणपालः स्वपुत्राय भरपालय संपदम् । दत्त्वा तदा ददौ दीक्षां सुमतं तं जिनेश्वरम् ॥ १७२ ॥

॥ इति श्रीगजकुमारमुनिकथानकमिदम् ॥ १३९ ॥



1 [illegible] 2 [illegible] 3 [illegible]

१४० चिलातमित्रकथानकम् ।

घोषाख्यग्रामिधानोऽत्र मगधाविषयोद्भव । सार्थवाहोऽभवत्कोऽपि सार्थेन महता सह ॥ १ ॥
यशोधरामिध दृष्ट्वा मुनिमेकविहारिणम् । भ्राम्यन्तं ग्राममध्येऽमुं क्रमतो गृहतो गृहम् ॥ २ ॥
मधुक्षमाप्रयुक्तोऽयं दयार्द्रीकृतमानस । भिक्षादान ददावस्मै सार्थवाह स साधवे ॥ ३ ॥[1]
तत्पात्रे धृति कृत्वा जम्बूद्वीपे मनोरमे । पल्यैकजीवितो देवो जातोऽसौ महाप्रभ ॥ ४ ॥
सार्थवाहचरो देवो भुक्त्वा भोगं तदुद्भवम् । प्रश्रेणिकसुतो जातश्चिलातास्यो विशुद्धधी ॥ ५ ॥
ततः प्रश्रेणिको राजा श्रीमदुज्जयिनी पुरीम् । दूतं प्रवेशयामास सुप्रायणकुमारकम् ॥ ६ ॥
श्रीमदुज्जयिनीनाथ प्रद्योतोऽपि नराधिप । सुप्रायणं घ्नन्नाशु संग्रामे जनसंक्षये ॥ ७ ॥
सार्धेन महताऽऽगत्य कुमार कुणिकनामकः । हत्वा सुप्रायणं तूर्णं निन्ये राजगृहं पुरम् ॥ ८ ॥
ततः प्रद्योतभूपालो समागत्य वेगत । ससैन्यसमुदायेन ययौ प्रश्रेणिकं प्रति ॥ ९ ॥
श्रुत्वा प्रद्योतमायान्तं स्वपुरासन्नगोचरे । प्रश्रेणिकस्स्वपुत्रांश्च शीघ्रं वापयामास घोषणम् ॥ १० ॥
यस्त्वा प्रद्योतभूपालं यच्छमानयति द्रुतम् । मदन्तिकं ददाम्यस्मै वरमिष्टं विसंशयम् ॥ ११ ॥[2]
तच्चिलातपुत्रोऽपि श्रुत्वा जनकघोषणाम् । बलाद्विकारतं बद्ध्वा प्रद्योतं प्रददौ पितु ॥ १२ ॥
तत प्रद्योतमालोक्य तुष्ट प्रश्रेणिको नृप । ददौ चिलातपुत्राय वरमेतमुदारधी ॥ १३ ॥
सर्वीयपेक्ष्मया पुत्र पुरे राजगृहेऽनिशम् । तिष्ठ द्वादशवर्षाणि भोगसंसक्तमानस ॥ १४ ॥[3]
ततः प्रश्रेणिको राजा वितीर्यास्मै स्वसम्पदम् । जिनसेनान्तिके दीक्षां जग्राह जिनदेशिताम् ॥१५॥
तच्चिलातपुत्रोऽपि श्रेणिकेन क्षय गते । कुर्वाणो विनयं चार्के स्वदेशादपसारित ॥ १६ ॥
तूर्णं निर्धाटितोऽनेन निर्गत्य शनकैर्वनम् । मातामहान्तिक प्राप चिलातो दीनमानस ॥ १७ ॥
दुर्गस्थेऽद्द विधायाश्र गृहीत्वा देशमण्डकाम् । भुञ्जान परम भोग चिलातो व्यवतिष्ठते ॥ १८ ॥
एव चिलातपुत्रस्य याति काल शनैः शनै । बभूत् प्राणप्रियोऽत्यय भर्तृमित्राभिध सखा ॥१९॥
मातुलो रुद्रदत्तास्य सुभद्रां स्वसुतामसौ । दातु नेच्छति तां कन्यां भर्तृमित्राय शोभनाम् ॥२०॥
सहस्रे पञ्चभि सार्धं भटानां तत्पुर द्रुतम् । गृहीतु तामसौ कन्यां भर्तृमित्रो ययौ सखा ॥ २१ ॥
यत्र भर्तृमती कन्यां विवाहसमये सति । भर्तृमित्र समादाय सुभद्रां प्रययौ तत ॥ २२ ॥
तत्पश्चात् ससैन्येन कृतकोलाहलेन स । दृष्ट्वा श्रेणिकः कोपात् सहसाकृष्टकार्मुकः ॥ २३ ॥
तत्रयेनामुना कन्या भर्तृमित्रेण चागत । निहता व्यन्तरी जाता सुभद्रा दैवयोगत ॥ २४ ॥
भर्तृमित्रस्तत शीघ्रं भयवेपितविग्रह । वैभारपर्वतं गुहामारुरोह भयातुर ॥ २५ ॥
तत्पर्वतस्थितं दृष्ट्वा शिष्याणां पञ्चभि शतै । मुनिदत्तं मुनिं प्राप्य प्रणम्येदमसौ तदा ॥ २६ ॥
भवसागरयोपेत गुणरत्नमहोदधे । किंचिदर्पयं साधो मयितं ब्रूहि सांप्रतम् ॥ २७ ॥[4]
निशम्य तद्वच साधुः किंचिदर्थपदं स्थिदम् । जगौ धर्मसमायुक्त भर्तृमित्रस्य धीरधी ॥ २८ ॥
संसारसागरं घोरं तरीतुं यदि वाञ्छसि । मुनिरूपं ततो धृत्वा साम्प्रतं तिष्ठ शोभनम् ॥ २९ ॥[5]
दीक्षामादाय जैनेन्द्रीं तदानीं मुनिवाक्यतः । तस्थौ चिलातपुत्रोऽयं प्रायोपगमनं प्रति ॥ ३० ॥
ज्ञात्वा चिलातमित्रं च कायोत्सर्गव्यवस्थितम् । प्रणन्तुं श्रेणिकः प्राप स्कन्धावारसमन्वित ॥३१॥
त्रिपरीत्य च तं भक्त्या पूजयित्वा प्रसूनकैः । वन्दित्वा श्रेणिको भूयो विवेश निजपत्तनम् ॥३२॥

---

1 चफज कुमकमितम्. 2 चफज कुणम्. 3 चफज कुणम्. 4 चफज कुमकमितम्. 5 चफ कुम्म्. ज कुणम्.

विभङ्गज्ञानतो ज्ञात्वा सुभद्रा व्यन्तरी रुषा । सौलिकारूपमादाय तन्मुनेः शिरसि स्थिता ॥ २३ ॥
चञ्च्वग्रप्रहारेण सौलिका क्रूरमानसा । चक्षुर्युग्मं मुनेरस्य जग्राह विरसैरुत[1] ॥ २४ ॥
दीर्घमत्कुणकाभिश्च कीटिकाभिः पुनः पुनः । स्वानसः खाद्यमानोऽपि ध्यानाचलमधिष्ठितः ॥ २५ ॥
महोपसर्गं साधूपसर्गमिमं दुःसहम् । सोढ्वा चिलातमित्रोऽगात् सिद्धिं सर्वार्थपूर्वकम् ॥ २६ ॥

॥ इति श्रीचिलातमित्रकथानकमिदम् ॥ १४० ॥

*

१४१ धान्यकुमारमुनिकथानकम् ।

अथ पूर्वविदेहस्थे वीतशोकाभिधे पुरे । अशोकसंज्ञको राजाऽशोकमायापतिः सुधीः ॥ १ ॥
वलीवर्दमुखं बद्ध्वा स्वकृषिक्षेत्रमागतः । राजा निगद्यते नूनं धान्यसंग्रहलम्पटः ॥ २ ॥
ग्राम्यकुलस्य स्तनांस्तासां स्तनपाने प्रति प्रभुः । महानसेऽखिलं कर्म कारयत्यति पोषितः ॥ ३ ॥
एवं भक्षति तत्काले शिरसो वेदनस्य च । महारोगोऽभवत् सद्यो भूपतेरस्य दारुणः ॥ ४ ॥
उत्सर्गं भक्तसमुत्थं ग्राम्यकृत्स्य महीपतिः । कृत्वा तत्रासने चास्ते वेदनाव्याकुलाङ्गकः ॥ ५ ॥
अत्रान्तरे महायोगी प्रविष्टस्तस्य मन्दिरम् । दुर्बलाङ्गः स भिक्षार्थं युगान्तर्निहितेक्षणः ॥ ६ ॥
विलोक्य भूपतिः साधुं समुत्थाय निजासनात् । समेपत्न्या ददावस्मै भिक्षादानं प्रयत्नतः ॥ ७ ॥
तदौषधप्रभावेन रोगो ध्वस्तस्तदीयजः । सद्यो मुनेः क्षयं प्राप दुःसाध्योऽपि नियम्यते ॥ ८ ॥
सोदनासमासमदुःखव्याकुलमानसः । जगाम पञ्चतां राजा कृतधर्मपरिग्रहः ॥ ९ ॥
अत्रैव भरतक्षेत्रे धर्मरत्नसमुद्भवे । ग्रामकोपपदं कण्ठं नगरं समभूत् परम् ॥ १० ॥
बभूव तत्पुरे राजाऽरिषेणो रणाङ्कितः । नन्दिमत्यभिधानाऽस्य रमणी रमणोचिता ॥ ११ ॥
अन्या महीश्वरस्य प्रजापालनकारिणः । निषिवेणुप्रिया चासीद् रूपराजितविग्रहा ॥ १२ ॥
राजाऽशोकचरो मृत्वा भोगिस्थाहारदानतः । सुतो धान्यकुमाराख्यो नन्दिमत्या बभूव सः ॥ १३ ॥
आरम्भात् स्थिरमनाद् दमदत्तः प्रकीर्तितः । अनन्तवीर्यनामार्यं निषेणेयसुतोत्पतः ॥ १४ ॥
महासङ्गतमाभूनम्रोऽप्यमपराजितः । दुर्योधनसमा प्रोक्तः स्कन्धावारसमाश्रयात् ॥ १५ ॥
धन्विमद्रथतोऽन्येषां संग्रामे स्फुरणीरिते । मनःअप्रसमापाद्यापिक्षणः प्रकीर्तितः ॥ १६ ॥
तस्य मन्त्री सुबुद्ध्याख्यो भ्रातृजो धान्यनामकम् । इत्यमाजुषते सार्धं मासपर्योपहवासकः ॥ १७ ॥
दमदत्तादिनामानि गुणयुतान्यनन्तकम् । उच्चारयितुमेतस्य जातु शक्यति न क्वचित् ॥ १८ ॥
अन्यदा मन्त्रिपाऽन्येन पिशुनत्वमुपेयुषा । उक्तोऽयं तारनाथेन कुमारो धान्यनामकः ॥ १९ ॥
निशम्य तद्वचः क्रोधात् कुमारः प्रत्यवादन । मयात्वेन स मां नाम धान्यमाहूयसे कुतः ॥ २० ॥
कुमारवचनं श्रुत्वा जगौ मन्त्री शर्कं पुनः । अधान्यकुलसंभूतत्वेन धान्यो भयोदितः ॥ २१ ॥
दमदत्तादिनामानि गृह्णन्ति न तानि ते । मुनीनां हि भवत्यन्ते कुमार कथयाम्यहम् ॥ २२ ॥
दमनादिन्द्रियाणां हि दमदत्तो भवेन् मुनिः । उग्रचर्याविधानेनानन्तवीर्यस्तथा भवेत् ॥ २३ ॥
परीषहोपसर्गैश्च न कदाचित् पराजितः । यतोऽपराजितो ज्ञेयो कुमार मुनिनायकः ॥ २४ ॥
रागद्वेषादयो येन वैरिणो विषमा जिताः । जितशत्रुस्ततो ज्ञेयो नरनागमुनीश्वरः ॥ २५ ॥
एवमेतानि नामानि मुनीनां शुद्धचेतसाम् । भवन्ति ते न युज्यन्ते नरकुमार जातुचित् ॥ २६ ॥[4]
मन्त्रिणो वाक्यमाकर्ण्य कर्णशूलविधायकम् । अवदन्मातुलं भूपः कुमारो भोगनिस्पृहः ॥ २७ ॥

---

1 प वैरिकः फ वैरिकः. 2 [औषधं]. 3 पफ इविस्मयं 4 पफज कुमारमिति.

गुणयुक्तानि नामानि यथैतानि भवन्ति मे । सर्वाणि मातुल क्षिप्रं तथैवं विदधाम्यहम् ॥ २८ ॥[1]
तथापि मन्त्रिणा भूयः कुमारः पुरतः स्थितः । एष भवतु विसृष्टो नरवृन्दारकप्रभो ॥ २९ ॥
एवं प्रबोधिते तस्मिन् कुमारे बुद्धिशालिनि । सुबुद्धिनामयुक्तेन मन्त्रिणा मातुलेन हि ॥ ३० ॥
अत्रान्तरे जिनो नेमिः केवली संघसेवितः । आजगाम तदुद्देशं महापल्लवदेशतः ॥ ३१ ॥[2]
नेमिनाथं समालोक्य स्वपुरोद्यानमागतम् । प्राप धान्यकुमारोऽयं भक्तिनिर्भरमानसः ॥ ३२ ॥
त्रिःपरीत्य तमीशानं भक्त्या नत्वा पुनः पुनः । पप्रच्छ स्वभवं धान्यः कुमारो नेमिनायकम् ॥ ३३ ॥
कुमारवचनं श्रुत्वा केवलज्ञानलोचनः । नेमिनाथो जगादेदं महावैराग्यसंगतम् ॥ ३४ ॥
कुमारान्यभवे राजाऽशोकनामाऽभवत्[3] प्रभुः । सांप्रतं धान्यनामा त्वं स्वल्पायुर्भोगनिःस्पृहः ॥३५॥
कृत्वा कालं समाधानात् कुमार त्वं सुधीरधीः । निहताशेषकर्माणि सिद्धिं यास्यसि नीरजाः ॥३६॥[4]
जन्मजन्मभवं श्रुत्वा स्वस्यायुः स्वल्पमप्यदः । नेमिनाथान्तिके दीक्षां कुमारः समशिश्रियत् ॥३७॥
दीक्षामादाय जैनेन्द्रीं पूर्वकर्मानुभावतः । भिक्षां धान्यकुमारोऽयं लभते न कदाचन ॥ ३८ ॥
कदाचिद्दैवयोगेन लभते यदि पारणम् । भूयोऽपि वमनं योगी विदधाति पुनः पुनः ॥ ३९ ॥
अनेन साधुना सार्धं यदि भिक्षां भ्रमत्यसौ । पूर्वकर्मानुभावेन लभते न मनागपि ॥ ४० ॥
कदाचिद्दैवयोगेन प्राप्नोति यदि भोजनम् । भूयश्छर्दिं करोत्येष प्राक्तनाशुभगौरवात् ॥ ४१ ॥
अन्यदा वीक्ष्य तच्छर्दिं दत्तो विष्णुकयौषधौ । मुनेश्छर्दिर्न संजाता तदौषधविधानतः ॥ ४२ ॥
प्रायश्चित्तादिकं कृत्वा प्रतिक्रमणमेव च । विहरन् स मुनिः प्राप तदानीं शूरपत्तनम् ॥ ४३ ॥
तत्पुरोत्तरदिग्भागे यमुनापूर्वरोधसि । तस्थौ प्रतिमया धीरः स मुनिः कर्महानये ॥ ४४ ॥
अथ शौरिपुरे राजा साधिताराति मण्डलः । बभूव यमुनापङ्को यमुनापतिरूपभी ॥ ४५ ॥
मृगयार्थं महासैन्यः कोपात्मनिरीक्षणः । जगाम यमुनापङ्कस्तां दिशं दैवयोगतः ॥ ४६ ॥
ततो निवर्तमानः सन् प्रतिमास्थं तकं मुनिम् । विलोक्य स नराधीशः सहसाऽस्य स्व ययौ ॥४७॥
दर्शनेनास्य भद्रस्य शकुनोऽपि न मेऽभवत् । जगाम स्वपुरं राजा पूरयित्वा शरैरिमम् ॥ ४८ ॥
उपसर्गं सहित्वाऽस्य धीरो धान्यमुनिस्तदा । मोक्षं जगाम शुद्धात्मा निहताशेषकर्मकः ॥ ४९ ॥
मुनेर्धान्यकुमारस्य सिद्धिक्षेत्रं तदद्भुतम् । विद्यते पूज्यतेऽद्यापि भव्यलोकैर्निरन्तरम् ॥ ५० ॥
स नृपो यमुनापङ्कः प्राप्य कुष्ठं हि तद्भवे । जगाम नरकं घोरं रौद्रध्यानपरायणः ॥ ५१ ॥

॥ इति श्रीधान्यकुमारमुनिकथानकमिदम् ॥ १४१ ॥

१४२ अभिनन्दनादिमुनिकथानकम् ।

अत्रैव भरते वास्ये दक्षिणापथसंभवे । विद्यते विभवोपेतं कुम्भकारकृतं पुरम् ॥ १ ॥
दण्डकाख्योऽभवद् राजा तत्पुरे साधिताहितः । तत्प्रिया सुव्रता नाम रूपयौवनगर्विता ॥ २ ॥
तस्यैव भूपतेर्मन्त्री बालको नाम विश्रुतः । जिनशासनविद्वेषी मुनिसंघपराङ्मुखः ॥ ३ ॥
अभिनन्दनपूर्वाणि तत्पुरं जनसंकुलम् । शतानि पञ्च साधूनामागतानि निजेच्छया ॥ ४ ॥
वादेन चतुरङ्गेण खण्डकाख्येन साधुना । जितोऽयं बालको मन्त्री सभायां नृपसंनिधौ ॥ ५ ॥
तेनावदेन[6] महादेव्या कूटगर्भं विधाय च । राजाऽयं रोषमानीतो मन्त्रिणा मुनिभिः समम् ॥ ६ ॥

1 पफख्ख गुणसमिम्, 2 पफख्ख गुणभिम्, 3 [राजाऽशोकनामा°]. 4 पफख्ख निरक्षमिम्, 5 [ययौ]. 6 [दैवयोगेन].

तेन कोपानुबन्धेन मृगुसाऽसुखकारिणा । दुष्टमन्त्रिमतेनाशु मुनयो यन्त्रपीडिताः ॥ ७ ॥
शतानि पञ्च साधूनां विधायाराधनं सदा । समाधिं प्रतिपन्नानि निश्चयात् किं न साध्यते ॥ ८ ॥

॥ इति श्रीअभिनन्दनादिपञ्चशतमुनिकथानकम् ॥ १४२ ॥

*

१४३ चाणक्यमुनिकथानकम् ।

पुरेऽस्ति पाटलीपुत्रे नन्दो नाम महीपतिः । सुमता तन्महादेवी बिम्बाधरदलोपमा ॥ १ ॥
कविः सुबन्धुनामा च शकट्यारस्तथापरोऽप्यमी । समस्तलोकविख्याता नृपतेरस्य मन्त्रिणः ॥ २ ॥
अस्मिन्नेव पुरे चासीत् कपिलो नाम माहनः । तद्भार्या देविला नाम चाणक्यस्तत्सुतः[1] सुधीः ॥३॥
वेदवेदाङ्गसंयुक्तः सर्वशास्त्रार्थकोविदः । समस्तलोकविख्यातः समस्तजनपूजितः ॥ ४ ॥[2]
नीलोत्पलदलश्यामा पूर्णिमाचन्द्रसन्मुखी । यशोमतिः प्रिया चास्य यशोव्याप्तदिगन्तरा ॥ ५ ॥
कपिलस्य सुता तन्वी नाम्ना बन्धुमती[3] परा । विधिना कन्यका दत्ता मन्त्रिणे कपिलेन सा ॥ ६ ॥
प्रत्यन्तवासिभूपानां क्षोभो नन्दस्य भूभुजः । कविना मन्त्रिणा सर्वो यथावृत्तो निवेदितः ॥ ७ ॥
कविवाक्येन भूपालो नन्दो मन्त्रिणमब्रवीत् । प्रत्यन्तवासिनो भूपान् धनं दत्त्वा वशं कुरु ॥ ८ ॥
नरेन्द्रवाक्यतोऽनेन मन्त्रिणा कविना तदा । वितीर्णं द्रव्यमेकैकं राज्ञां प्रत्यन्तवासिनाम् ॥ ९ ॥
अन्यदा नन्दभूपालो भाण्डागारिकमेककम् । पप्रच्छेदं क्रियन्मात्रं विद्यते मद्गृहे धनम् ॥ १० ॥
नन्दवाक्यं समाकर्ण्य धनपालो जगाविदम् । भाण्डागारे धनं राजन् किंचिन्न विद्यते तव ॥ ११ ॥
प्रत्यन्तवासिभूपानां कविना तव मन्त्रिणा । नरेन्द्र दत्तमेतेषां त्वदीयं सकलं धनम् ॥ १२ ॥[4]
निशम्य तद्वचो राजा क्रुधरससमन्वितम् । अन्धकूपे सकं वेगान्मन्त्रिणं निदधौ स्म ॥ १३ ॥
एकैकं सक्तुकं तत्र शरावं भक्तसंभृतम् । दीयते शुभयोगेन तस्मै हि दिने दिने ॥ १४ ॥
तदान्तरे कविः प्राह कुटुम्बं निजमादरात् । अन्धकूपसमासंगदुःखसंतप्तमानसः ॥ १५ ॥
वैरनिर्यातने यो हि समर्थो नन्दभूपतेः । स परं भोजनं भुङ्क्तां शरावेऽत्र समस्तके ॥ १६ ॥[5]
कविवाक्यं समाकर्ण्य तत्कुटुम्बो जगाद तम् । त्वमेव भोजनं भुङ्क्ष्व शरावे सौख्यं ध्रुवम् ॥१७॥
ततः कुटुम्बमेतेन कविनासन्नवर्तिना । अन्धकूपान्तरे खात्वा बिलं तत्सुगोचरम् ॥ १८ ॥
तदवस्थः प्रभुञ्जानः शरावे सौदनं तदा । एवमुक्त्वा बिलं कृत्वा कविस्तस्थौ रुषान्वितः ॥ १९ ॥
वर्षत्रयमतिक्रान्तं तत्रस्थस्य कवेः स्फुटम् । जीवनं चास्य संजातं मृतमन्यत् कुटुम्बकम् ॥ २० ॥
किंवदन्तीं तकां ज्ञात्वा कवेः कोपारुणेक्षणे । प्रत्यन्तवासिभिः भूपैर्वेष्टितं नन्दपत्तनम् ॥ २१ ॥
ज्ञात्वा कवेः क्षणं राज्ञा नन्देनापमुत्तारणी । पादयोः पतनं कृत्वा कूपादुत्तारितः पुनः ॥ २२ ॥
क्षमापणं विधायास्य नन्देनायं प्रभाषितः । वरं ब्रूहि महाबुद्धे प्रसन्नोऽस्मि तव स्फुटम् ॥ २३ ॥
नन्दस्य वचनं श्रुत्वा कविरूचे नरेश्वरम् । स्वहस्तेन मया द्रव्यं दातव्यं ते न चान्यतः ॥ २४ ॥
निशम्य वचनं तस्य भूभुजा मन्त्रिणः कवेः । प्रतिपन्नं समामध्ये पालवृन्दसमाकुले ॥ २५ ॥
अन्यदा भ्रमताऽनेन कविना द्रव्यमिच्छता । दर्भसूचीः खनन् दृष्टश्चाणक्यस्तत्र संगतः ॥ २६ ॥
दृष्ट्वाऽमुं कविना पृष्टश्चाणक्यः सपुरः स्थितः । भद्र किं कारणं दर्भसूचीः खनसि मे वद ॥२७॥
कवेर्वचनमाकर्ण्य चाणक्यो निजगाविदम् । दर्भसूच्याऽनया विद्धो व्रजन् पादे सुनीक्ष्णया ॥२८॥

1 ज चाणक्य° 2 पफज्ञ सुखमितम्. 3 ज देविली 4 पफज्ञ सुखमितम्. 5 पफज्ञ

यस्य पादमिमं भिन्नमनया रुधिरारुणम् । क्षेपतोन्मूलयाम्येतां दर्भसूचीं नरोत्तम ॥ २९ ॥
तथापि कविना भूयश्चाणाक्य त्रिजविग्रह । खातं यत्तु त्वया विप्र पर्याप्तं खननेन ते ॥ ३० ॥
कविवाक्यं समाकर्ण्य चाणाक्यो निजगाविमम् । तदाग्रहसमुत्पन्नविस्मयव्याप्तमानसः ॥ ३१ ॥
मूलं नोन्मूल्यते यस्य तत्किं खातं भवेद् भुवि । स किं हतो नरैः खड्गैश्छिद्यते यस्य नो शिरः ॥३२॥
यावन्मूलं न चाप्नोति दर्भसूच्याः कृतागसः । भूयो भूयः प्रयत्नेन तेन तावत् खनाम्यहम् ॥३३॥[1]
निशम्य तद्वचः सत्यं नन्दस्य सचिवः कविः । दध्यौ स्वचेतसि स्पष्टं विस्मयाकुलमानसः ॥३४॥
नन्दभूपालवंशस्य समर्थस्य महीतले । नाशं करिष्यति क्षिप्रं एष कोऽपि महानरः ॥ ३५ ॥
चिन्तयित्वा चिरं तत्र सभामध्ये जनाकुले । श्लोकमेकं लिलेखेमं कविर्विस्मितचेतसा[2] ॥ ३६ ॥
नरेणैकशरीरेण नयशास्त्रयुतेन च । व्यवसायेन युक्तेन जेतुं शक्या वसुंधरा ॥ ३७ ॥
अन्यदाप्य विलोक्यात्र श्लोकमेकं विचक्षणः । लिलेख निजहस्तेन चाणाक्यो धीरमानसः ॥३८॥
नरेणैकशरीरेण नयशास्त्रयुतेन च । व्यवसायेन युक्तेन जेतुं शक्या वसुंधरा ॥ ३९ ॥[4]
एवं लिखितमालोक्य कविः श्लोकं मनोहरम् । चाणाक्योपरि संतुष्टचेतसाश्चर्यमीयुषा ॥ ४० ॥
अन्यदा भार्यया सार्धं चाणाक्योऽत्र निमन्त्रितः । कविनाश्चर्ययुक्तेन तद्गृहं स गतोऽशितुम् ॥४१॥
तत्रैव कविना तेन चाणाक्यस्य गृहाजिरे । दीनारा यद्वत् शीघ्रं निक्षिप्तास्तु परीक्षितुम् ॥४२॥
यशोमत्या गृहीतास्ते दीनाराः स्वगृहाङ्गणे । आदाय तान् पुरस्तुष्टा जगौ चाणाक्यमादरात् ॥४३॥
ददाति कपिला[5] नन्दो ब्राह्मणेभ्यो मनःप्रियाम् । तदन्तिकं परिप्राप्य गृहीत्वा गम्यतामरम्[6] ॥४४॥[7]
भार्यावचनमाकर्ण्य चाणक्यो निजगाद ताम् । त्वयाप्यतः प्रगृह्णामि गत्वा तां कपिलामहम् ॥४५॥
तत्संप्रधारणं श्रुत्वा कविमन्त्री कुतूहलात् । इदं निवेदयामास नन्दस्य प्रीतचेतसः ॥ ४६ ॥
बहुगुणसमायुक्तं महाराज समुज्ज्वलम् । गोसहस्रं प्रदेहि त्वं ब्राह्मणेभ्यः सुभक्तितः ॥ ४७ ॥[8]
कविवाक्यं समाकर्ण्य नन्दोऽपि निजगाद तम् । गोसहस्रं ददाम्येव ब्राह्मणानानय द्रुतम् ॥४८॥
ततश्चाणक्यमाहूय नरेन्द्रवचनादरम् । कविर्निवेशयामास प्रधानाग्रासने तदा ॥ ४९ ॥
उपविष्टः स चाणक्यो दर्भासनकदम्बकम् । कुण्डिकाभिर्वृसीकाभी कृत्वा तस्थौ नृपान्तिके ॥५०॥
तत्राज्य कविना प्रोक्ते महानन्दो जगाविदम् । तदग्रमासनं चैवं युक्तं विप्राः समागताः ॥ ५१ ॥
चाणक्यतो विहायैकं विप्रं स द्विजः पुनः । एकैकमासनं मुक्तं भूयः प्रोक्तोऽनुनेष्यम् ॥ ५२ ॥
महानन्दो वदत्येवं भवन्तः भक्तितत्पराः । अग्रासने परो विप्रो गृहीतो भूभुजा महान् ॥ ५३ ॥
मत्त राजगृहाद् दूरे निर्गत्य त्वरितं द्विज । गत्वा बहिर्गृहद्वारं तिष्ठ त्वं सुखमाहितः ॥ ५४ ॥
निशम्य वचनं तस्य चाणक्यो रक्तलोचनः । जगाद कर्तिकाहमास्ते नरं परुषस्वनः ॥ ५५ ॥
इदं न युज्यते कर्तुं भवतो न्यायवेदिनः । भोजनार्थं निविष्टस्य स्वगृहे मयि रासनम् ॥ ५६ ॥
भवन्न मठे दत्त्वा चाणक्यो वाग्मिनोऽसुभाः । तन्निमित्तं ग्रं प्राप्य निर्गतस्तद्गृहाद्बहिः ॥ ५७ ॥
नन्दवंशक्षयं शीघ्रं विदधामि विनिश्चयम् । एवं विचिन्त्य चाणाक्यो निजगाद वचः स्फुटम् ॥५८॥
यदीच्छति नरः कोऽपि राज्यं निहतकण्टकम् । ततो मदन्तिके शीघ्रं तिष्ठतु प्रीतमानसः ॥५९॥
चाणाक्यवचनं श्रुत्वा नरः कोऽपि जगाविदम् । अहमिच्छामि भो राज्य दीयतां मे द्रुतं प्रभो ॥६०॥
निजहस्तेन तं हस्तं समादाय त्वरान्वितः । चाणक्यो रोषसंपूर्णो निर्जगाम पुरादरम् ॥ ६१ ॥

1 पक्ष पुनरमिदम्. 2 पक्ष विस्मितमिदम्. 3 [कविर्विस्मित]. 4 ष omits vv. 38-39. 5 पक्ष कपिलां. 6 [गृहीत्वागम्यतामरम्]. 7 पक्ष पुनरमिदम्. 8 पक्ष सुभक्तितः, ज सुभक्त्या. 9 पक्ष सुभक्त, ज सुभक्त्या. 10 ज चाणक्यो. 11 पक्ष कर्तिव' [कर्तिव'].

वातवेगं समारुह्य तुरङ्गं प्रीतमानसः । अथाहत्य तकं शीर्षं चाणाक्यो निजलीलया ॥ ६२ ॥
जलदुर्गं प्रविश्यासौ वार्धिमध्ये सुधीरधीः । राज्यमन्वेषयन्नास्ते चाणाक्यः कृतनिश्चयः ॥ ६३ ॥
एवं हि तिष्ठतस्तस्य नेरपत्केन येमतः । प्रत्यन्तवासिभूपस्य निवेदितमिदं वचः ॥ ६४ ॥
जलदुर्गे महानेकः समुद्रजलसंभवे । तिष्ठति प्रीतचेतस्को नरनाथः सुबुद्धिमान् ॥ ६५ ॥
प्रत्यन्तवासिभूपोऽपि निशम्यास्य वचः परम् । निनाय तं निजस्थानं चाणक्यं मतिशालिनम् ॥ ६६ ॥
पर्वतान्तं परिप्राप्य भूपाः प्रत्यन्तवासिनः । भक्तं प्रवेशयामासुर्धनेन च सकलं तदा ॥ ६७ ॥
ततोऽमी नन्दभूपालं भूपाः प्रत्यन्तवासिभिः । उपायैर्भेदमानीतास्तत्सुखादुपमागताः ॥ ६८ ॥
प्रत्यन्तप्रभुभूपालैर्नन्दो दण्डं प्रयाचितः । अयं शक्ति न ते नूनं ददामि भवतां करम् ॥ ६९ ॥
ततोऽमीनन्दभूपानां मन्त्रभेदं विधाय च । निषाद्यैर्न छलेनैषां भ्रान्तिसंभ्रान्तचेतसाम्[4] ॥ ७० ॥
तेन नन्दं निहत्याशु सुपुरे कुसुमनामनि । चकार विपुलं राज्यं चाणाक्यो निजबुद्धितः ॥ ७१ ॥
कृत्वा राज्यं चिरं कालं अभिषिच्यात्र तं नरम् । श्रुत्वा जिनोदितं[6] धर्मं हित्वा सर्वं परिग्रहम् ॥ ७२ ॥
मतिवर्धनसाध्वन्ते महावैराग्यसंयुतः । दीक्षां जग्राह चाणाक्यो जिनेश्वरनिवेदिताम् ॥ ७३ ॥[7]
विहरन् गतियोगेन शिष्याणां पञ्चभिः शतैः । वनवासं परिप्राप्य दक्षिणापथसंभवम् ॥ ७४ ॥
तत्र पश्चिमदिग्भागे महाक्रौञ्चपुरस्य सः । चाणक्यो[8] गोकुलस्थाने कायोत्सर्गेण तस्थिवान् ॥ ७५ ॥[9]
बभूव तत्पुरे राजा सुमित्रो नाम विश्रुतः । तत्प्रिया रूपसंपन्ना विनयोपपदा मता ॥ ७६ ॥
मन्त्री सुबन्धुनामास्य नन्दस्य मरणेन सः । चाणक्योपरि[10] संकुध्य तस्थौ तच्छिद्रवाञ्छया ॥ ७७ ॥
तत्र क्रौञ्चपुरेशस्य महासामन्तसेविनः । सुबन्धुर्बन्धुसंपन्नः समीपे तस्य तस्थिवान् ॥ ७८ ॥
अथ क्रौञ्चपुराधीशः श्रुत्वा मुनिसमागमम् । महाविभूतिसंयुक्तस्तं यतिं वन्दितुं ययौ ॥ ७९ ॥
चाणक्यादिमुनीन् नत्वा स सपूजां विधाय च । महाविनयसंपन्नो विवेश निजपत्तनम् ॥ ८० ॥
ततोऽस्तमनवेलायां यतीनां शुद्धचेतसाम् । सामिं करीषमादाय तत्समीपेऽपि रोषतः ॥ ८१ ॥
विधाय तेन दहनं पापराशिसमानकम् । महाक्रोधपरीताङ्गः सुबन्धुर्नरकं ययौ ॥ ८२ ॥[11]
चाणक्याद्या[12] मुनिश्रेष्ठाः शिष्यपञ्चशतैः सह । पादोपगमनं कृत्वा शुक्लध्यानमुपेयिवान् ॥ ८३ ॥
उपसर्गं सहित्वेमं शुभं सुविहितं तदा । समाधिमरणं प्राप्य चाणक्यः[13] सिद्धिमीयिवान् ॥ ८४ ॥
तत्र पश्चिमदिग्भागे दिव्यक्रौञ्चपुरस्य सा । निषद्यका मुनेरस्य वन्द्यतेऽद्यापि साधुभिः ॥ ८५ ॥

॥ इति चाणाक्यमुनिकथानकम् ॥ १४३ ॥

१४४ वृषभसेनमुनिकथानकम् ।

महाराष्ट्रविषये सारे दक्षिणापथसंभवे । आसीज्जनसमाकीर्णे विषया भरताभिधः ॥ १ ॥
कुम्भकनगरे तत्र राजा धर्मपणोऽभवत् । धर्मावती प्रिया चास्य पद्मपत्रनिभेक्षणा ॥ २ ॥
ईर्ष्यको जिनधर्मस्य साधुवर्गस्य निन्दकः । बभूव रिपुको मन्त्री पापात्मा कठोरधीः ॥ ३ ॥
अन्यो वृषभसेनाख्यो मुनिर्धर्मसमाधृतः । ग्रामग्रामं भ्रमन् प्राप कुम्भकनगरान्तिकम् ॥ ४ ॥
श्रुत्वा धर्मघोषो भूपो मुनिर्मर्म समागमम् । सार्धं जनैः सह संप्राप वन्दितुं भक्तितत्परः ॥ ५ ॥

1 [अन्तरान्ते]. 2 पञ सुप्तम्, ज सुप्तम्. 3 ज चाणाक्ये 4 [°संभ्रमम्°]. 5 पञ सुप्तम् ज सुप्तम्. 6 [जिनोदितं]. 7 पञ सुप्तम् ज सुप्तम्. 8 ज चाणाक्ये 9 पञ सुप्तमितम्. 10 ज चाणक्योपरि. 11 पञ सुप्तम् ज सुप्तम् 12 ज चाणक्याद्यो 13 ज चाणाक्य.

गच्छन्त नृपसंयुक्त दृष्ट्वा लोकं समुत्सुकम् । पप्रच्छ रिष्टको मन्त्री क्व यात्येष नराधिप ॥ ६ ॥
रिष्टकोक्तं समाकर्ण्य लोको वदति तं पुनः । राजा मुनिगणं नन्तुं याति भक्तिसमन्वितः ॥ ७ ॥
लोकोदितं निशम्याशु रिष्टकः कोपसंगतः । पक्षे वृषभसेनेन महावादं सुदुष्टधीः ॥ ८ ॥
ततो वृषभसेनेन सदा धैर्यवताऽन्तिके । स्याद्वादवादिनाऽनेन रिष्टकोऽयं पराजितः ॥ ९ ॥
जितोऽयं मुनिनाऽनेन वादेन नयशालिना । नक्तमग्निसमूहेन ज्वालिता वसतिः क्रुधा ॥ १० ॥
मुनिर्वृषभसेनाख्यो मुनिभिः सहसा सह । उपसर्गं सहित्वाऽसौ कृतकाठो दिवं ययौ ॥ ११ ॥

॥ इति श्रीवृषभसेनमुनिकथानकमिदम् ॥ १४४ ॥

*

१४५ श्रीपालकथानकम् ।

पुष्पाद्विषये रम्ये दक्षिणापथगोचरे । तत्राटवीपुराभिख्यं बभूव परमं पुरम् ॥ १ ॥
राजो राजाऽवसत् तत्र प्रतिपक्षक्षयादिकः । रूपिणी तन्महादेवी प्रिया शिवमतिः परा ॥ २ ॥
यस्यैव नृपतेरासीन्मन्त्री पद्मरथिर्नृपः । सम्यग्दर्शनसंपन्नः श्रावको नितरां भुवि ॥ ३ ॥
तत्प्रिया श्रीमहादेवी भाविकाचारविग्रहा । गुणी रूपी कुमारोऽस्याः श्रीपालः श्रीसमन्वितः ॥४॥
आचार्यो वसुपालाख्यो गुणशीलमहोदधिः । संघनायस्तपोराशिस्तत्पुरे वसति स्म सः ॥ ५ ॥
अन्यदा श्रीमहादेवी परिवारसमन्विता । भाद्रपदसितपक्षे च चतुर्थीदिवसान्विते ॥ ६ ॥
गृहकर्मविधिं कृत्वा वास्तुपूजाक्षतान्विता । महाविनयसंपन्ना लक्ष्मीश्रीरूपसंनिभा ॥ ७ ॥
उपवासं ग्रहीतुं सा श्रीः पञ्चम्या जिनप्रिया । स्नात्वाऽपराह्णवेलायामाजगाम जिनालयम् ॥ ८ ॥[1]
कृत्वा चैत्यनमस्कारं जिनभक्तिपरायणा । प्रापाशु श्रीमहादेवी वसुपालसमीपताम् ॥ ९ ॥
कृत्वा गुरौ परां भक्तिमुपवासं तदन्तिके । पञ्चम्यां श्रीमहादेवी तस्थौ विनयसंगता ॥ १० ॥
वसुपालगुरोः पार्श्वे निविष्टां वीक्ष्य मातरम् । श्रीपालस्तत्सुतः प्राह विनयानतमस्तकः ॥ ११ ॥
उपवासो हि पञ्चम्या गृहीतो यस्त्वयाऽम्बिके । ममापि जायतां सोऽद्य पापविध्वंसकारणम् ॥१२॥[2]
कुमारवचनं श्रुत्वा श्रीदेवी निजगाद तम् । एवं भवतु मत्पुत्र शोभनं विहितं त्वया ॥ १३ ॥
वसुपालगुरुं नत्वा भक्तिरुद्गततनूरुहा । जगाम श्रीमहादेवी लीलया निजमन्दिरम् ॥ १४ ॥
श्रीपञ्चमीदिने जाते मध्याह्ने तं परीक्षितुम् । जगाद श्रीमहादेवी श्रीपालं निजनन्दनम् ॥ १५ ॥
कुमार सुकुमारात्र मच्चित्तानन्दकारण । बुभुक्षाग्रस्तचेतस्क भोजनं कुरु बालक ॥ १६ ॥
जननीवाक्यमाकर्ण्य श्रीपालो निजगाद ताम् । उपवासो गृहीतोऽपि पञ्चम्यास्त्वत्सम मया ॥१७॥
भक्तीधर्मसमुद्भूतो गुणरञ्जितभूतलः । सांप्रतं तव मुञ्चामि म्रियमाणोऽपि मातृके ॥ १८ ॥
श्रीपालवचनं श्रुत्वा जगौ तं जननी पुनः । उपवासं कुरु स्तोकं हसन्त्या गदितं मया ॥ १९ ॥
कुमारेणोदिता माता मया सद्भावतोऽम्बिके । उपवासो गृहीतोऽद्य जिनसिद्धादिसाक्षिकः ॥२०॥
उपवासस्त्वया नूनं गृहीतो यन्मुनेः स्फुटम् । समीपे तव मुञ्चामि संगरोऽयं ममाम्बिके ॥ २१ ॥
निशम्य वचनं माता पुत्रस्य कृतनिश्चयम् । गोपमाताय संतस्थे विस्मयव्याकुलमानसा ॥ २२ ॥
यथाक्रमनवेलायामादित्येऽस्तमनं गते । उपवासपरिश्रान्तः कुमारः समजायत ॥ २३ ॥
द्रव्ये सुशीतलैस्तस्य त्वङ्लोमैरपि स्फुटम् । तापस्तथाऽपि कायस्य प्रशमं याति न कश्चित् ॥२४॥

---

1 पप भावकचारे 2 पफज विध्वंसितम्. 3 पफ गुप्पम्, ज गुप्पम्. 4 पफ गुप्पम्, ज गुप्पम्. 5 [लोक]. 6 पफ गुप्पम्, ज गुप्पमिप्स 7 [बोधमानेन]

यदा नोपसर्गं याति तदा पञ्चत्वमीरके । बहिर्गृहान्तरे वीर्यं तदा प्रत्याख्य भाषितः ॥ २५ ॥
यस्मादित्थमिमं पुत्र प्रोक्तं मातुरन्तमम् । मोचनं कुरु तेनाथ विकल्पो न विधीयते ॥ २६ ॥
मातृवाक्यं समाकर्ण्य श्रीपालो निजगादमूम् । स्नेहनिर्भरचेतस्कां भयवेपितविग्रहाम् ॥ २७ ॥
क्षत्रियाः कुलसंजाता मानिनः समरेऽम्बिके । जीवितव्यं न मन्यन्ते यथा पौरुषसम्पदा ॥ २८ ॥
जीवितं यातु नो वा न नयन्ते स्वपौरुषम् । युध्यन्ते परचक्रेण सह संग्रामलम्पटाः ॥ २९ ॥
एवमप्यासि जैनेन्द्रं सर्वसत्त्वहितं परम् । जानासि त्वम्बिके धर्मं हिताहितविवेकिनी ॥ ३० ॥
जीयते म्रियते वाऽसि योद्धव्यं सह सेनया । परीषहचम्वा भद्रे नितान्तं भीमया मया ॥ ३१ ॥
मातृके यदि जीवामि प्रत्यूषे प्रोदिते रवौ । तदाऽशनप्रभृति स्यान्मम नूनं मनस्विनि ॥ ३२ ॥
अथवैवं न जानामि साधुमार्गेण साधुना । अशनस्य समस्तस्य प्रत्याख्यानं ममाम्बिके ॥ ३३ ॥
आराधनासमायुक्तः समाधिर्मम जायताम् । देवाधिदेवता वीरो जिनेन्द्रः शरणं परम् ॥ ३४ ॥
उक्त्वैवं मातरं दीनां श्रीपालो धर्मसुदर्शी । जलकुम्भं च सत्वरं विवेश जलसंभृतम् ॥ ३५ ॥
चतुराहारं विहायार्यं श्रीपालः सकलं तदा । शीतलध्यानमाविष्टस्तस्थौ मुदितमानसः ॥ ३६ ॥[1]
एवं व्यवस्थिते पुत्रे जननी पुत्रवत्सला । समस्तभुवने वीर्यं प्रत्याख्य निजगादमुम् ॥ ३७ ॥
पश्य पुत्र रविं दीप्तं द्योतिताखिलभूतलम् । मोचनं कुरु तेनाशु येन मे जायते सुखम् ॥ ३८ ॥[2]
निशम्य वचनं मातुः श्रीपालः स्थिरमानसः । जगाद जननीं दीनां शोकसंतप्तचेतनाम् ॥ ३९ ॥
यावन्न गुरवो यत्र संसारोत्तारणक्षमाः । तावन्मया न भोक्तव्यं म्रियमाणेन मातृके ॥ ४ ॥[3]
उक्तमात्रेण पुत्रेण चाहूता गुरवोऽनया । ते वदन्ति तदा प्राप्य पुत्रावितोऽप्युपद्रुतः ॥ ४१ ॥
यदं मिथ्यानिमित्तेन संप्राप्यस्त्वसहं सुत । महाभयं स्फुटं यातं साम्प्रतं कुरु मोचनम् ॥ ४२ ॥
गुरुवाक्यं निशम्याशु हसित्वा न्यगदत्तकम् । यथाम्ब त्वत्प्रसादेन तरिष्यामि किल प्रभो ॥ ४३ ॥
प्रत्याख्यानं भयवद्भिर्निर्मलधर्मकोविदैः । संसारसागरे भीमे प्रपातो मे भविष्यति ॥ ४४ ॥[4]
कुमारनिश्चयं ज्ञात्वा गुरुभिस्तत्त्ववेदिभिः । संसारसागरोत्तारतरण्डीभूतविग्रहैः ॥ ४५ ॥
उत्तमार्थं समुद्दिष्टं प्रतिक्रमणदण्डकम् । संस्कारे स्थापितो धीरः श्रीपालो हितमिच्छुभिः ॥ ४६ ॥[6]
सहित्वा धीरचित्तोऽसौ क्षुधातृष्णापरिश्रमम् । समाधिमरणं प्राप्य श्रीपालस्त्रिदिवं ययौ ॥ ४७ ॥
तृष्णाभिभूतदेहेन बालेनापि पटीयसा । प्रत्याख्यानं न तत्यजे श्रीपालेन यशस्विना ॥ ४८ ॥

॥ इति श्रीपालकथानकमिदम् ॥ १४५ ॥

*

१४६ नामवादिकथानकम् ।

दक्षिणापथदेशेऽस्ति नगरं कुणिपत्तनम् । राजाऽत्र विजयादित्यो वीरधीर्विजयावतिः ॥ १ ॥
तस्य पत्तनराजस्य नामवादी बभूव सः । श्रावकः परमः श्रेष्ठी सम्यग्दर्शनभूषितः ॥ २ ॥
जिनपादाब्जसंपन्ना श्राविका दर्शनान्विता । अभवच्छ्रेष्ठिनस्तस्य रमणीयं वसुंधरा ॥ ३ ॥
अन्यदा सकले देशे धान्येन परिवर्जिते । दुर्भिक्षं दुर्धरं जातं बुभुक्षाग्रस्तजन्तुकम् ॥ ४ ॥
तत्र मध्याह्नवेलायां नामवादी वणिक्पतिः । जिनदेवस्तुतिं कृत्वा गृहे भोक्तुं स तस्थिवान् ॥ ५ ॥

1 पफ सुखम्, ज सुखमीरम्. 2 पफज सुखमीरम्. 3 पफज सुखमीरम्. 4 पफ सुखम् ज सुखमीरम्. 5 [संप्राप्यस्त्वसहं]. 6 पफ सुखम्, ज सुखमीरम्. 7 फ has lost some letters. 8 पफ सुखम् ज सुखमीरम्.

रूपी क्षुधा गृहीतास्य क्षुधापम्याकदर्थित । श्रेष्ठिनं प्राप वेगेन क्षुधानं नरकुञ्जरः ॥ ६ ॥
क्रेरोदनमादाय सनिविश्य तदन्तिके । निजे मुखे स चिक्षेप बुभुक्षाग्रस्तमानस ॥ ७ ॥
मत्न तेन निक्षिप्ते चौदने वदने निजे । नामवादी जगादेमं कल्पसमविभ्रमम् ॥ ८ ॥
हस्तयो पादयो कृत्वा नर प्रक्षालनं पुन । भाजनेऽन्यत्र विभज्य वरं भोजनं कुरु ॥ ९ ॥
सोऽसौ श्रेष्ठिवाक्येन हस्तपादादिधावनम् । विधाय भोजनं कर्तुमुपविष्टोऽन्यभाजने ॥ १० ॥
ततो यदृच्छया भुक्त्वा भावम्याशु विधानतः । ताम्बूलं ससमादाय विधायानेन वस्पनम् ॥११॥
निर्वस्य तद्गृहाद् दूरं लब्धवेग्रसमागम । आत्मानं निन्दितुं सक्तः पथिक शुद्धभावनः ॥ १२ ॥
क्षुधाभिभूतदेहेन कृतं कर्म त्विदं मया । पाटयित्वोदरं स्वस्य खड्गेन्या मुखं गतः ॥ १३ ॥
शरीरविहस्तान्तं दृष्ट्वाऽसु भावकोऽवदत् । भयोमनमिदं मद्र त्वयाऽत्र विहितं तराम् ॥ १४ ॥
श्रुत्वाऽस्य वचनं पान्थो विहितानुशयो जगौ । मयाऽद्य भक्तमुच्छिष्टं निक्षिप्तं वदने निजे ॥१५॥
अतोऽयं विहितं कर्म मया त्वानुचितं भुवि । करोमि तदहं मित्र येन मे जायते सुखम् ॥ १६ ॥
उदरादिक्रियां चार्वी क्रियमाणामपि क्षितौ । अनिच्छन् सर्वदा यो हि गुरुकर्मवशीकृतः ॥१७॥
अतस्तत्करणात् सोऽयं जुगुप्सां प्राप्य भोगतः । शुभकर्मानुभावेन श्रेष्ठिपार्श्वं समाययौ ॥ १८ ॥
विहाय सकलं संगं बाह्यमाभ्यन्तरं सकः । समाधिमरणं प्राप्य कालं कृत्वा दिवं ययौ ॥ १९ ॥

॥ इति श्रीनामवादिश्रेष्ठिमहाहारार्थिपुरुषकथानकम् ॥ १४६ ॥

१४७ शालिसिक्थकथानकम् ।

सप्तद्वीपसमुद्राणां क्रमतः स्थितिशालिनाम् । पश्चिमो जलधि[1] प्रान्त्यः स्वयंभूरमणोऽभवत् ॥ १ ॥
योजनानां सहस्राण्येष पञ्च विष्कम्भतो झषः । सहस्रयोजनायामस्तत्कर्माविति दीर्घकः[2] ॥ २ ॥
स्वयंभूरमणस्यस्य तस्य मीनस्य वेगिन । शालिसिक्थप्रमाणोऽन्य शालिसिक्थमिषो[3] झष ॥३॥
महाशरीरसमेतोऽयं क्रूरचित्तोऽतिचञ्चलः । तस्य कर्णमले सारस्तिष्ठति मीतमानसः ॥ ४ ॥[7]
अन्यदाऽस्य महामीनो भोजनार्थं बृहन्मुखः । मुखं प्रसार्य यावच्च तिष्ठति क्रूरचेतनः ॥ ५ ॥
एवं हि तिष्ठतस्तस्य झषस्य विलासिनः । मीनकच्छपमाण्डूकाः प्रविशन्ति मुखान्तरम् ॥ ६ ॥
षण्मासावधिपर्यन्ते मुखे सकोसमीयुषि । तदंष्ट्रान्तरतो येऽस्यासे गच्छन्ति यथायथम् ॥ ७ ॥
विलोक्य तस्य तच्छुद्रान् मण्डूकादीन् झषानपि । दध्यौ तत्कर्णगः पापः शालिसिक्थः सचेतसि ॥ ८ ॥
अज्ञानी मूर्खतोपेतो मत्स्यः स्वार्थपरिच्युतः । दृष्ट्वैतान् पश्यतः पाप स्वैरं तिष्ठति योऽल्पकः ॥९॥
शरीरं मे मुखं यादृग् यदि स्यात् सुमहं भवेदिदम् । ततो नैकोऽपि निर्याति मे मुखादि झषादिकः ॥१०॥
एवं चिन्तयतस्तस्य शालिसिक्थविसारिणः । महतोऽपि च मीनस्य याति काले शनैः शनैः ॥११॥[7]
मनाग्जीवत्वधं कृत्वा बृहन्मीनो मृतिं गतः । प्रयाविंशत्समुद्रायुः सप्तमे नरकेऽभवत् ॥ १२ ॥
शालिसिक्थोऽपि मत्स्योऽयं मृतिं कृत्वा सुदुष्पभी । परिणामवशेनापि सप्तमं नरकं ययौ ॥ १३ ॥

॥ इति श्रीशालिसिक्थकथानकमिदम् ॥ १४७ ॥

---

1 ज जलोधेर्म 2 पफज विष्कम्भितम्. 3 ज मत्स्यम् 4 पप जलधी 5 [शालिसिक्थ].
6 [शालिसिक्थमिषो]. 7 फ has lost some letters. 8 पफज बहुतमन्तशीलम्.

१४८ सुभूमचक्रवर्तिकथानकम् ।

इलावन्त्यां पुरि श्रीमान् कार्तवीर्यो नृपोऽभवत् । रेवती सत्प्रिया भार्या पीनोन्नतकुचद्वया ॥ १ ॥
अष्टमश्चक्रिणां मध्ये सुभूमश्चक्रनायकः । चक्रेण साधितारातिरभूत् तनयोऽनयोः ॥ २ ॥
सूपकारोऽभवत् तस्य सुभूमस्य कुशाग्रधीः । विजयोपपदः सेनो भक्ष्यादिपचने पटुः ॥ ३ ॥
अन्यदा सूपकारेण पायसं शीतलेतरम् । क्षिप्तं भोजनवेलायां भाजनेऽस्य महीभृतः ॥ ४ ॥
तदुष्णं पायसं दृष्ट्वा भाजने चक्रभृत् तदा । पायसोच्छिष्टपात्रेण सूपकारं ममार सः ॥ ५ ॥
मृतः क्षारसमुद्रान्ते रत्नद्वीपान्तरे परे । बभूव व्यन्तरो देवो सूपकारोऽस्य भूपतेः ॥ ६ ॥
तदा तापसरूपेण रत्नद्वीपान्तरादरम् । फलान्यादाय संप्राप्य सुभूमं चक्रिणं सकः ॥ ७ ॥
दृष्ट्वाऽमुं तापसं चक्री पप्रच्छ प्रणम्य सः । फलान्येतानि दिव्यानि कुतो लभ्यानि मे वद ॥८॥
सुभूमचक्रिणो वाक्यं श्रुत्वेदं तापसोऽवदत् । फलान्यमूनि विद्यन्ते मन्मठे परवीरवे ॥ ९ ॥
निशम्य तापसस्योक्तं सुभूमोऽपि जगाद तम् । फलान्येतानि भो साधो दिव्यानि शीघ्रं देहि मे ॥१०॥[1]
विहाय सकलं राज्यं चक्रिणे फललोभतः । निनाय तापसः क्षिप्रं वार्धिमध्ये नरेश्वरम् ॥ ११ ॥
नीत्वा मिथ्यात्वमेव तु सूपकारचरोऽमरः । ममार चक्रिणं कोपात् समुद्रसलिलान्तरे ॥ १२ ॥
व्यन्तरेण हतोऽनेन सुभूमश्चक्रभृत् तदा । सप्तमं नरकं प्राप्य संसारं भ्रमति स्म सः ॥ १३ ॥

॥ इति श्रीसुभूमचक्रवर्तिकथानकमिदम् ॥ १४८ ॥

*

१४९ सुप्तपुरुषराज्यदर्शनकथानकम् ।

अवन्तीविषये दिव्ये श्रीमदुज्जयिनी पुरी । अस्यां बभूवतुर्द्वौ हि दारिद्र्योपहतौ नरौ ॥ १ ॥
काष्ठादिकं समादाय कौशाम्ब्यां पुरि जीवनम् । कुरुतः स्म तौ दीनौ क्षुत्पिपासाभ्यां कदर्थितौ ॥२॥
अन्यदा ज्येष्ठमासे तौ नानानोकहसंकुलम् । तृणकाष्ठादिसंकीर्णं मनुष्यौ जग्मतुर्वनम् ॥ ३ ॥
वैवर्ण्यं काष्ठपूलं गृहीत्वा तौ नरौ वनात् । श्रमश्रान्तसमस्ताङ्गौ सपर्यं प्रापतुः सरः ॥ ४ ॥
मुक्त्वा काष्ठभरं तत्र पीत्वा तोयं सुशीतलम् । स्वेदस्विन्नसमस्ताङ्गौ सुप्तौ तौ सरसस्तटे ॥ ५ ॥
महाविभूतिसंयुक्तं सिंहासनमधिष्ठितम् । सैकोऽन्यराज्यमैक्षिष्ट तयोरेको निद्रयाऽन्वितः ॥ ६ ॥
उत्थितेन द्वितीयेन नरेणोत्थापितः परः । उत्थापनेऽमुना सोऽस्य कुकोपासौ समुत्थितः ॥ ७ ॥
पतित्वा स पुनः सुप्तो भूमौ राज्याभिलाषया । पश्यति स्म न तं राज्यं हरिहस्तिघनादिकम् ॥ ८ ॥
पुनः सुप्तेन नाऽनेन लब्धं राज्यं प्रलोपितम् । तथा सुमानुष्यं जन्म जगद्दुर्लभं पुनः ॥ ९ ॥

॥ इति श्रीसुप्तपुरुषराज्यदर्शनकथानकमिदम् ॥ १४९ ॥

*

१५० धनदेवादिकथानकम् ।

अवन्तीनामसंयुक्ते विषये धनसंकुले । विद्यते पौरसंयुक्ता श्रीमदुज्जयिनी पुरी ॥ १ ॥
श्रेष्ठी सुदत्तनामाऽस्यां धनाढ्यस्त्वकोटिकः । भार्या वसन्ततिलका गणिका रूपशालिनी ॥ २ ॥
वसन्ततिलकागर्भे नग्नीयुगलं रतिम् । धनेन सह कुर्वन्त्याः सम्भूतं दैवयोगतः ॥ ३ ॥
तस्मिन् गर्भे निमाय तच्छरीरेऽनिवारणे । कुष्ठकण्डूरादयो रोगा बभूवुः कृशवेदना ॥ ४ ॥

1 [शीघ्रं दिव्यानि देहि मे]. * [बभूव].

तेषु रोगेषु जातेषु कृतपीडेषु सर्वथा । त्यक्ता वसन्ततिलका सुहृत्स्वश्रेष्ठिना द्रुतम् ॥ ५ ॥
वपुस्तपीडितस्वान्ता रामानरयुग तदा । सुता वसन्ततिलका दुःखिता वेपिताङ्गिका ॥ ६ ॥
गाढदर्प विलोक्यैषा सदुःखकृतरोदनम् । दध्यौ वसन्ततिलका निन्दाखीभूतविग्रहा ॥ ७ ॥
अनेन बाल्यधर्मेण गमस्येनापि पापिना । त्यक्ताऽहं श्रेष्ठिना सद्य स्नेहवर्जितचेतसा ॥ ८ ॥
भोगविभोऽस्ति मे जात समं भर्त्रा धनेच्छिना । पूर्वपापविपाकेन महादुःखविधायिना ॥ ९ ॥
इति विचिन्त्य तां कन्यां रत्नकम्बलमर्पिताम् । नगरीदक्षिणाशायां मुमोच गणिका सका ॥ १० ॥
सुतं च जातमात्रं सा रत्नकम्बलवेष्टितम् । नगर्यामुत्तराशायां तत्याज करुणोज्झिता ॥ ११ ॥[1]
प्रयागनगरात्प्रागाद् गङ्गाकालिन्दिसंगमे । सुसार्थ सार्थवाहोऽस्य सर्वगुणसमन्वित ॥ १२ ॥
सुकेतुस्तां समादाय दारिकां सुकुमारिकाम् । वल्लभायै ददौ तस्य रत्नकम्बलवेष्टिताम् ॥ १३ ॥
नीत्वा वृद्धिं सका कन्यां रूपराजितविग्रहाम् । सुकेतुरमणी तस्याश्चकार कमलाभिधाम् ॥ १४ ॥
सुभद्रसार्थवाहोऽगात् साकेतनगराद्द्रुतम् । श्रीमदुज्जयिनीं प्राप्य बालं च प्रवदक्ष स ॥ १५ ॥
दारकं च समादाय रत्नकम्बलवेष्टितम् । अथ समर्पयामास सुव्रताया सुमोचित ॥ १६ ॥
स्वस्य वृद्धिमानीय सुपुत्रजनविधानत । धनदेवाभिधं नाम चकारास्य च सुमता ॥ १७ ॥
अनयोरन्योऽवृद्धिं क्रमेण नवयौवनाम् । वीवाहमकरोत् ताभ्यां कृत्स्नमुज्जयनीपुरे ॥ १८ ॥
धनदेवस्ततो भार्यां गृहीत्वा कमलाभिधाम् । साकेतानगरीं प्राप्त पताकावलिराजिताम् ॥ १९ ॥
धनदेवोऽनया सार्धं रूपयौवनयुक्तया । साकेतनगरे भोगान् भुञ्जानो व्यवतिष्ठते ॥ २० ॥
अन्यदा धनदेवोऽस्य महासार्थसमावृत । श्रीमदुज्जयनीं प्राप नानाप्रासादतोरणाम् ॥ २१ ॥
धनदेवो विलोक्यैतां वसन्ततिलकां पुरि । सतिष्ठतेऽनया सार्धं भुञ्जानो भोगसुत्तमम् ॥ २२ ॥
साकेतनगरे त्यक्ता धनदेवेन दुःखिनी । तिष्ठत्यप्रीतचेतस्का कमला कमलोपमा ॥ २३ ॥
अन्यदा मुनिदत्ताख्य साधु साधुसमावृत । विहरन् क्वापि संप्राप साकेतनगरं गुणी ॥ २४ ॥
कमला तं मुनिं ज्ञात्वा साकेतोद्यानमागतम् । जगाम प्रीतचेतस्का वन्दनाय समक्षिका ॥ २५ ॥
नत्वा मुनिमिमं भक्त्या धर्मं सम्यक्त्वपूर्वकम् । आदाय कमला याता पप्रच्छ दयितस्य सा ॥ २६ ॥
कमलावाक्यमाकर्ण्य दिव्यज्ञानैकलोचन । धर्मार्थैतां महायागी सतुदुःखसमन्विताम् ॥ २७ ॥
धनदेवाभिधो भर्ता त्वदीय कमले सति । उज्जयिन्या पुरि श्रीमान् सार्थवाहो विशुद्धधी ॥ २८ ॥
वसन्ततिलकां दृष्ट्वा गणिकां जननीमिमाम् । सहानया प्रभुञ्जानो भोगान् संतिष्ठते कुधी ॥ २९ ॥[4]
मुनिदत्तमुनेर्वाक्यं निशम्य कमलाऽमला । जगाद मुनिपं ते मक्तिरुद्भूततनूरुहा ॥ ३० ॥
धनदेवस्य योगीन्द्र वसन्ततिलका मुने । अत्र जन्मनि किं माता भवेदन्यत्र म वद ॥ ३१ ॥
कमलाभारतीं श्रुत्वा जगादैतां मुनीश्वर । कौतुकव्याप्तचेतस्कां महाविस्मयवेगवाम् ॥ ३२ ॥
वाक्यामत्र भवे तावत् संबन्धोऽस्य तया समम् । अन्यजन्मनि संबन्धं कथयामि तवाधुना ॥ ३३ ॥
उज्जयन्यामभूद् विप्र सोमशर्मा पवित्रधी । वेदवेदाङ्गसंयुक्त काश्यपीपतिपूजित ॥ ३४ ॥
अग्निसोमादिकौ सूनू वेदस्मृतिविशारदौ । अभूतां नन्दनावस्य तयो प्रमादनुरक्तयो ॥ ३५ ॥
एते त्रयोऽपि निर्याता श्रीमदुज्जयिनीबहि । पठन्तो वेदवाक्यानि यागच्छन्ति गृह प्रति ॥ ३६ ॥
यावत् पश्यन्ति तावन्ते सद्युग्मं जिनालये । अर्चिकायुगलं चारि कुर्वीमाणं तदन्तरम् ॥ ३७ ॥

---

1 पक्षम धनपुरुषमिदम्. 2 [समागुणकंदुग]. 3 [{चेसम}]. 4 पदम निष्पमिदम्.
5 पुरुष ...

वृद्धस्य हि मुनेः पार्श्वे पठन्ती श्रुतमादरात् । आर्यिकां तरुणीं मूनो दृष्ट्वा वृद्धां गतप्रभाम् ॥३८॥
सोमशर्मा विलोक्यैव प्राह पुत्रौ व्रजन् पथि । वेधसा विहितं सुष्ठु विपरीतमिदं भुवि ॥ ३९ ॥
तरुणी या सुता जाता भार्या वृद्धस्य सा कथम् । वृद्धा तु या हि संजाता भार्या मूनो विधेर्वशात् ॥४०॥
वृद्धस्य यदि वृद्धा स्यात् समरूपा नितम्बिनी । मूनोऽपि तरुणी भार्या तदा साधुसमागमः ॥४१॥
उपहासमिमं कृत्वा साधुयुग्मस्य ते त्रयः । जग्मुर्निजगृहं दुष्टाः पापोपार्जनकारिणः ॥ ४२ ॥
सोमशर्मा द्विजो भद्रे कृत्वा कालं बभूव सा । गर्भे वसन्तसेनाया वसन्ततिलका सुता ॥ ४३ ॥
अग्निसोमादिकौ मूती कालं कृत्वा क्रमेण तौ । जातौ कर्मानुभावेन वसन्ततिलकासुतम् ॥ ४४ ॥
तस्मयाऽतिदुःखेन महाव्याधिपरीतया । जातं सदर्भकयुग्मं पुष्पपुष्पवनीबहिः ॥ ४५ ॥
गृहीतं सार्थवाहाभ्यां तद्युग्मं कृतयत्नम् । महाविभवयोगेन कृतमीनादिमङ्गलम् ॥ ४६ ॥
अग्निभूतिवरो यो हि सोमशर्मा द्विजः सुतः । धनदेवाभिधः सोऽयं त्वत्पतिर्वर्ततेऽधुना ॥ ४७ ॥
अग्निभूतिकनिष्ठो यः सोमभूतिसहोदरः । भ्रान्त्वा त्वं तन्वि सा नूनं कमला कमलोपमा ॥ ४८ ॥
भवतोर्यः पिता पूर्वं सोमशर्मा पलाशपीः । स वेदश्रोत्रियो विप्रः सर्वब्राह्मणपूजितः ॥ ४९ ॥
साऽधुनाभ्रमद् भवे भूत्वा वसन्ततिलकाभिधा । माता साध्वी द्वयोस्तन्वि श्रीमदुज्जयनीभवा ॥ ५० ॥
धनदेवस्त्वया सार्धं पूर्वस्नेहवशीकृतः । रहस्यकाममोगं च भुञ्जानः स विचिष्ठते ॥ ५१ ॥
एवं हि तिष्ठतस्तत्र सस्नेहं सुरतं प्रति । बभूव सुन्दरः पुत्रः पुत्रजन्मामिलाषिणोः ॥ ५२ ॥[1]
मुनिदत्तवचः श्रुत्वा मदीयं जिनदत्तितम् । धर्मं गृहीष्यत सारं तव मे वद सांप्रतम् ॥ ५३ ॥
निशम्य कमलावाक्यं मुनिदत्तमहामुनिः । बभाण तां गिरा स्पष्टं नर्तयन् शिखिनां गणम् ॥ ५४ ॥
स्वप्नान्यत स्फुटं तन्वि तवलोऽपि धनदत्तकौ । विस्मयव्याप्तचेतस्कौ जिनधर्मं गृहीष्यतः ॥५५॥
मुनिदत्तेरितं श्रुत्वा नत्वाऽमुं भक्तितत्परा । क्षुल्लिकारूपमादाय निर्ययौ कमला पुरात् ॥ ५६ ॥
वसन्ततिलकागेहं मन्दिरवनिराजितम् । क्रमेण कमला प्राप श्रीमदुज्जयिनीभवम् ॥ ५७ ॥
तद्गृहे दारकं दृष्ट्वा रुदन्तं पक्ष्मलाननम् । पठन्ती कमला श्लोकं पञ्चरैपाऽस्य सान्त्वताम् ॥ ५८ ॥
पुत्रोऽसि मे शिशो नूनं भ्रातुर्व्योऽसि सहोदरः । त्वं देवरोऽसि मे वत्स भक्तिदानन्ददायकः ॥५९॥
यस्ते पिता स मे कान्तो भ्रात माताविनाद्भवः । मा क्रन्द पुत्र मा क्रन्द कमलेति जगौ शिशुम् ॥६०॥
कमलावाक्यमाकर्ण्य वसन्ततिलका जगौ । अर्थं श्लोकद्वयस्यापि शोभने भूहि मेऽधुना ॥ ६१ ॥
वसन्ततिलकावाक्यं निशम्य कमलाऽपि सा । जगादेमां परिस्पष्टं सोपेक्ष विकसन्मुखी ॥ ६२ ॥
तत्कथा धर्मसंबन्धा महती वाक्यके यदि । श्रोतुमिच्छसि भावेन शृणु त्वं तां वदामि ते ॥६३॥
परिवारसमायुक्ता धनदेवसमन्विता । वसन्ततिलका सखी तत्सुरसकथोत्सुका ॥ ६४ ॥
पद्मपत्रसमानाक्षी कमला कमलानना । सितदन्ता यथादेशं वसन्ततिलकोषिता ॥ ६५ ॥
सोमशर्माऽभवद् विप्रः श्रीमदुज्जयनीपुरि । तत्प्रिया काश्यपी नाम रूपयौवनराजिता ॥ ६६ ॥
अग्निसोमादिकौ मूनी तत्पुत्रौ प्रेमवत्सरौ । कलाविज्ञाननिष्णातौ शास्त्रपारकोविदौ ॥ ६७ ॥
सुताभ्यां सह यानेन यदिर्भूमिविनाश्रयं । साधु दृष्ट्वा स्थितौ साधू नितरां सोमशर्मणा ॥ ६८ ॥
सोमशर्मा मुनिं प्राप्य साधुनिन्दापरायणः । सुता वसन्तसेनाया वसन्ततिलकाऽभवत् ॥ ६९ ॥
सोमशर्मसुतौ कालं कृत्वा द्वावपि शोभने । तद्गर्भे दारकद्वन्द्वं सजात विधियोगतः ॥ ७० ॥
निर्विण्णया त्वया भद्रे तद्दारकयुगं तदा । रत्नकम्बलसंयुक्तं संत्यक्तं नगरीबहिः ॥ ७१ ॥

---

1 क omits the second line of No. 37 and the first line of No 38 2 पकज पुष्पम्. 3 पर पुष्पम् ज पुष्पम्, 4 पर पुष्पनाम्, 5 पक पुष्पम् ज पुष्पम्.

धर्म्यां तत्सार्थवाहाभ्यां सुगर्ठ कुक्षिमागतम् । मीनाक्षमखठं तस्य विहितं विधियोगतः ॥ ७२ ॥
सोऽग्निभूतिसुतो ज्येष्ठस्तत्र वृन्दारिके पुरे । धनदेवः स मां हित्वा त्वदासक्तो विविक्षते ॥ ७३ ॥
सोमभूतिसुतो यो हि तवासीदन्यजन्मनि । कनिष्ठः कमला साऽद्य सपत्नी त्वत्सुता हठे ॥ ७४ ॥
या यक्षसपी प्रिया मेऽद्र तवासीदन्यजन्मनि । साऽपि कालगतो जातः सुतोऽस्य वस्माभिधः ॥७५॥
इदं मे मुनिना सर्वं दिव्यज्ञानेन भाषितम् । सद्बोधनार्थमायाता सांप्रतं त्वत्समीपताम् ॥ ७६ ॥
प्राप्तोत्तमकुले जन्म साधुनिन्दाफलादिदम् । पुंवेदं त्यक्त्वा स्त्रीत्वं त्वं भूयः प्राप्ताऽसत्सोमनम् ॥७७॥
हिंसाऽसत्यं तथा चौर्यं मैथुनं च परिग्रहम् । विधाय पापकर्मेदं मधुमांसादिभक्षणम् ॥ ७८ ॥
भवापारसारसंसारसागरं भीतिदीपितम् । क्रोधमानादिनीरौघं भ्राम्यसि त्वं सुबालिके ॥ ७९ ॥
संसारभ्रमणं सर्वं विहायेदं जुगुप्सितम् । महाभयतोऽधुना सर्वे कुरुध्वं धर्मसंग्रहम् ॥ ८० ॥[1]
तदन्ते समाकर्ण्य चैनं धर्ममहिंसकम् । वसन्ततिलका भीता धनदेवोऽपि संस्थितः ॥ ८१ ॥
सम्यक्त्वादिकमादाय वसन्ततिलका तदा । धनदेवोऽपि संजात श्रावकः परमो भुवि ॥ ८२ ॥
तत्समभाषितं श्रुत्वा तच्चेष्टितमिदं तदा । केचिन्मुनित्वमापन्नाः केचिच्छ्रावकतां पराम् ॥ ८३ ॥

॥ इति धनदेववसन्ततिलकाकमलाकथानकम् ॥ १५० ॥

१५१ सुभोगभूपतिकथानकम् ।

विदेहस्यवनान्तेऽस्ति मिथिला नगरी परा । सुभोगनृपतिस्तस्यां तत्प्रिया च मनोरमा ॥ १ ॥
रूपयौवनसंयुक्तस्तयोर्देवरतिः सुतः । कलाकलापसंयुक्तस्तस्सो स धरणीतले ॥ २ ॥
अन्यदा संघसंयुक्तो दिव्यज्ञानी महातपाः । आययौ तत्पुरोपान्ते गणी देवकुरुः सुधीः ॥ ३ ॥
मुनिं तमागतं श्रुत्वा वन्दनार्थं नरेश्वरः । आजगाम तमुद्देश मिथिलानगरीपतिः ॥ ४ ॥
नत्वा मुनिं प्रयत्नेन श्रुत्वा धर्मं सुखावहम् । पप्रच्छ स समयं पूर्वं ज्ञानाम्भोधिं यतीश्वरम् ॥ ५ ॥
अन्यजन्मन्यहं नाथ कालं कृत्वा यतीश्वर । क्व भविष्यामि मे ब्रूहि निजकर्मवशीकृतः ॥ ६ ॥[2]
निशम्य वचनं साधुः सर्वसत्त्वहितावहः । अगादेवं मुनिर्भूप महादुःखसमुत्कलगतम् ॥ ७ ॥
अद्यप्रभृति राजेन्द्र सप्तमे दिवसे स्फुटम् । कालं कृत्वा शकृत्कूपे[3] स्वकीये त्वं भविष्यसि ॥ ८ ॥
अभिज्ञानमिदं राजन् शिरोभाय भयपदनम् । याने भ्रमरसक्तास्य पश्यसि त्वं पथि द्रुतम् ॥ ९ ॥
निष्प्रवेशकाले च छत्रभङ्गो भविष्यति । मृतिस्तेऽशनिपातेन महागर्जनकारिणा ॥ १० ॥[4]
श्रुत्वेति वचनमाकर्ण्य सत्यभूतं नराधिपः । निजं पुत्रं समाहूय जगादेदं परिस्फुटम् ॥ ११ ॥
अद्यप्रभृति पुत्राहं मृत्वा सप्तदिनान्तरे । कीटः सितो भविष्यामि स्वकीयेऽशुचिवेश्मनि ॥ १२ ॥
बहुपापसमेतस्य गूथवेश्मानुयायिनः । मारणं मम कर्तव्यं त्वयापश्यं शरीरजः ॥ १३ ॥
सुतमेवं निगद्यासौ त्यक्तसर्वपरिग्रहः । अट्टालामाविश्य तस्थौ तद्गीतमानसः ॥ १४ ॥
सप्ताऽशनिप्रपातेन नरेन्द्रः सप्तमे दिने । संजातोऽसौ सितः कीटः पूर्वोक्ताशुचिमन्दिरे ॥ १५ ॥
शिरःक्षिप्तस्ततो दृष्ट्वा पुत्रेणाशुचिमध्यगः । भयवेपितसर्वाङ्गोऽशुचिमध्ये विवेश सः ॥ १६ ॥[5]
प्रविशन्तं तमालोक्य शकृन्मध्ये च कीटकम् । तत्सुतः स्वपदं प्राप्य तस्थौ विस्मितमानसः ॥१७॥
सुभोगभूपतिं दृष्ट्वा तथोत्पन्नं शकृद्गृहे । जैनेश्वरं मतं केचिज्जगृहुर्धर्ममुत्तमम् ॥ १८ ॥

॥ इति श्रीसुभोगभूपतिस्वकीयाशुचिभवनोत्पत्तिकथानकम् ॥ १५१ ॥

---

1 पफज भ्रकम्. 2 पफ पुष्पम्, ज पुष्पम्, 3 ज (अशुचिपदे) 4 पफज [illegible]
5 [प्रविश्य]. 6 पफज शिश्रम्.

१५२ सुकोशलमुनिकथानकम् ।

विनीताविषये कान्ते साकेता नगरी परा । तस्यां कीर्तिधरो राजा सहदेवीप्रियोऽभवत् ॥ १ ॥
परस्परसुखासंगप्रेमसंसक्तचेतसोः । सुकोशलाभिधो रूपी बभूव तनयोऽनयोः ॥ २ ॥
पितापुत्रौ ततो दृष्ट्वा शरीरादेरनित्यताम् । महातपोधनौ जातौ जिनसेनान्तिके द्रुतम् ॥ ३ ॥
चतुर्मासोपवासस्थौ मौद्गिल्यपर्वतस्थले । तस्थतुस्तौ महासाधू तन्मूले घनागमे ॥ ४ ॥
भर्तृपुत्रवियोगेन चार्तध्यानपरायणा । बभूव तद्गिरौ व्याघ्री सहदेवीति भीषणा ॥ ५ ॥
आहारार्थमितस्तावत् नगरं प्रति धीमतः । सुकोशलमुनेस्तत्र तथा कीर्तिधरस्य च ॥ ६ ॥
सहदेवीचरी व्याघ्री कोपारुणनिरीक्षणा । पश्चाद् भक्षितं पापा निर्दयं सकलं कृता ॥ ७ ॥[1]
उपसर्गं सहित्वाऽसु तत्राभीप्सितं द्रुतम् । निर्वाणं जग्मतुर्धीरौ तद्गिरौ तौ तपोधनौ ॥ ८ ॥

॥ इति श्रीसुकोशलमुनिकथानकमिदम् ॥ १५२ ॥

१५३ सुदृष्टिमुनिकथानकम् ।

अवन्तीविषये दिव्ये श्रीमदुज्जयिनी पुरी । प्रजापालो नृपस्तस्यां तत्प्रिया सुप्रभाऽभवत् ॥ १ ॥
तस्यैव नृपतेरासीद् रत्नविज्ञानकोविदः । सुदृष्टिर्नाम विख्यातस्तत्प्रिया विमलाभिधा ॥ २ ॥
तस्य वक्राभिधः शिष्यो विमलाऽप्यमुना सह । तिष्ठति प्रीतचेतस्का कामाकुलितमानसा ॥ ३ ॥
अथ मैथुनवेलायां विमलावचनेन सः । सुदृष्टिर्निहतोऽनेन वक्रेन कुटिलात्मना[2] ॥ ४ ॥
संजातो विमलागर्भे सुदृष्टिर्वरनासिकः । जातिस्मरत्वमासाद्य साध्वसः सिक्थकान्तरौ ॥ ५ ॥
अनेन कारणेनायं बाले बालक्रियोद्यतः । ततोऽवन्तिकुमारस्त्यां समस्तगुणनाभिमाम् ॥ ६ ॥
उद्यानवनयातायाः सुप्रभायाः रतं प्रति । क्रीडयन्त्योऽमिषो हारसूत्रियोऽस्ततां ययौ ॥ ७ ॥
अन्वेषणं प्रकुर्वद्भिश्च वरैर्यत्नतत्परैः । महानुभवतः प्राप्तः स हारस्तृणान्तरे ॥ ८ ॥
मध्ये सुवर्णकाराणां तत्पुरे सकले नराः । हारं न कोऽपि संस्कर्तुं शक्नोति कुशलाशयः ॥ ९ ॥
ततोऽवन्तिकुमारेण गत्वा राजगृहं द्रुतम् । स हारः संस्कृतो दिव्यः प्रमोदोदितपुष्करः ॥ १० ॥
राजा विलोक्य तं हारं संस्कृतं सपुरः स्थितम् । जगाविदं कुमारं तं विस्मयव्याकुमानसः ॥ ११ ॥
इदं सुदृष्टि विज्ञाने त्वया हारे क्व शिक्षितम् । मम विस्मितचित्तस्य कुमार वद सांप्रतम् ॥ १२ ॥
निशम्य भूपतेर्वाक्यं कुमारो निजगाद तम् । आत्मा मया मृतः सन् जनितोऽयं स्वयोनिति ॥ १३ ॥
विमलेयं पुरा भार्या नृप माताऽधुना मम । अपुत्रोऽहं मृतोऽस्या हि संजातस्तनयो नव ॥ १४ ॥[3]
श्रुत्वा सुदृष्टिसंबन्धं नरेन्द्रो बहुभिर्नृपैः । अभिनन्दनसामीप्ये ततो जैनमशिश्रियत् ॥ १५ ॥
अन्येऽपि बहवो लोका महाविस्मयसंगताः । जिनधर्मं सुखाधारं प्रतिपन्नाः सुमेधसः ॥ १६ ॥
ततोऽवन्तिकुमारोऽपि संसारत्रस्तमानसः । पूर्वोक्तस्य गुरोः पार्श्वे दीक्षां दैगम्बरीं दधौ ॥ १७ ॥
मासोपवासः प्रज्ञावान् मन्दरस्थिरमानसः । परोत्तरदिशाभागं प्राप कौरीपुरस्य सः ॥ १८ ॥
अथावन्तिकुमारोऽयं स्थित्वा पश्चिमरोधसि । यमुनायाः समाधानान्निर्वाणं गतवानघौ ॥ १९ ॥

॥ इति सुदृष्टिमुनिकथानकमिदम् ॥ १५३ ॥

1 च कुणपम्, ज कुणपम्, च has lost some letters. 2 ज कुटिलात्मना. 3 अश कुणपम्, ज कुणपम्.

१५४ धर्मसिंहमुनिकथानकम् ।

विषये कोसलाभिख्ये विद्यते कौशलं पुरम् । धर्मसिंहो नृपस्तत्र चन्द्रश्रीरमणो महान् ॥ १ ॥
जिनसेनः सुतस्तस्य रूपराजितविग्रहः । जिनपादारतपरः समस्तजनवल्लभः ॥ २ ॥
दक्षिणापथदेशेऽस्ति कोल्लादिगिरिपत्तनम् । वीरसेनो नृपस्तत्र रूपी वीरवतीप्रियः ॥ ३ ॥
चण्डसिंहः सराजी तत्सुतस्तनयाऽप्यभूत् । पद्मपत्रसमानाक्षी पद्मपाणिपदद्वया ॥ ४ ॥
धर्मसिंहो नरेन्द्रोऽयं धर्मभूषितसन्मतिः । चन्द्रश्रिया समं भोगान् भुञ्जानो व्यवतिष्ठते ॥ ५ ॥
अन्यदा धर्मसिंहोऽयं राजा दमधरान्तिके । धर्मं श्रुत्वा प्रवव्राज त्यक्ताशेषपरिग्रहः ॥ ६ ॥
चन्द्रश्रीरपि तद्भार्या सर्वव्यापारवर्जिता । स्मरन्ती भर्तुरत्यन्तं संतस्थे दीनमानसा ॥ ७ ॥
चण्डभूतोऽपि तां दृष्ट्वा स्वसारं दुःखदुःखिताम् । साधोरन्वेषणां चक्रे ग्रामखेटपुरादिषु ॥ ८ ॥
चण्डभूतो विलोक्येमं साधुं तपसि संस्थितम् । व्रतभङ्गं चकारास्य भूयो भूयः प्रचण्डवाक् ॥ ९ ॥
राजा राज्यश्रियं हित्वा महावैराग्यसंगतः । भूयो जैनेश्वरीं दीक्षां जग्राह गतमत्सरः ॥ १० ॥
तस्य पश्चिमवेलायां चण्डभूतो महाग्रहः । अन्वेषणं चकारास्य साधोरस्य पुनः पुनः ॥ ११ ॥
प्रविशन्तं ततो दृष्ट्वा कोल्लादिगिरिपत्तनम् । दधाव पृष्ठतस्तस्य चण्डभूतः क्रुधान्वितः ॥ १२ ॥
मुनिर्मध्याह्नवेलायां भिक्षां कृत्वा स सत्पुरे । दृष्ट्वाऽमुं चण्डभूतं च दध्यावेव स्वचेतसि ॥ १३ ॥
ग्रहराजेन मे पूर्वं व्रतभङ्गः कृतो बलात् । अधुनाऽयं किमु क्षिप्रं तपोनाशं करिष्यति ॥ १४ ॥
चिन्तयित्वा चिरं योगी विधायालोचनां पुनः । शरीरादेस्तथा त्यागं विदधे हस्तिकलेवरे ॥ १५ ॥[1]
चण्डभूतोऽपि संक्रुद्धस्तत्पुरे सकले तदा । अदृष्ट्वा तं मुनिं क्वापि विवेश निजपत्तनम् ॥ १६ ॥
धर्मसिंहो नृपस्तत्र कालं कृत्वा समाधिना । दिव्यसुन्दरीवरो जातो देवोऽयं दिवि भासुरः ॥१७॥

॥ इति श्रीधर्मसिंहमुनिकथानकमिदम् ॥ १५४ ॥

*

१५५ वृषभसेनमुनिकथानकम् ।

अस्त्य पाटलीपुत्रे नगरे जनसंकुले । वृषभोपपदो दत्त इभ्यः श्रेष्ठी महाधनः ॥ १ ॥
वृषभश्रीः प्रिया तस्य कन्दोद्दललोचना । वृषभोपपदः सेनः सद्गुणस्तत्सुतोऽभवत् ॥ २ ॥
तस्मिन्नेव पुरे भोगी श्रेष्ठी धनपतिर्धनी । श्रीकान्ता तत्प्रिया भार्या धनश्रीस्तत्सुताऽभवत् ॥ ३ ॥
सा वृषभसेनाय वितीर्णा जनकेन च । अनया सह भुञ्जानो भोगांस्तस्थौ सुलीलया ॥ ४ ॥
अन्यदा धर्ममाकर्ण्य जैनं दमवरान्तिके । भोगनिःस्पृहचेतस्कः प्रवव्राज स धीरधीः ॥ ५ ॥
धनश्रीरपि शोकार्ता रोदनारक्तलोचना । तस्थौ गततनुच्छाया कपोलपतितालका ॥ ६ ॥
दृष्ट्वा धनपतिः श्रेष्ठी स्वसुतां दुःखिनीं तदा । साधोरन्वेषणं तस्य सत्पथान्तस्य चकार सः ॥ ७ ॥
दृष्ट्वाऽमुं योगिनं क्वापि आर्यंकृत्य दयान्वितः । कृत्वाऽमुना तपोभङ्गं सुतायै स समर्पितः ॥ ८ ॥
दिनानि कानिचित् स्थित्वा तया सार्कं धनश्रिया । वरदत्तान्तिके दीक्षां जग्राहासौ विशुद्धधीः ॥९॥
अनेन विधिना तेन वारत्रितयमस्य च । तपोभङ्गं विधायास्तु भूयोऽपि तपसि स्थितः ॥ १० ॥
स्वस्तृतीयवेलायां चण्डाऽमुं स्वगृहान्तरे । श्रेष्ठी प्रवेशयामास साधुं साधितमानसम् ॥ ११ ॥
साधन्यवेदनाधारम्याकुलीभूतमानसः । दध्याविदं पुनः साधुः श्रेष्ठिमन्दिरमध्यगः ॥ १२ ॥

---

1 पफल्न त्रिमम्.

धारयं समानेन भवमत्र कृत्वा कयम् । अयं तृतीयवेलायां तपोमहं करिष्यति ॥ १३ ॥
एवं विचिन्त्य तमसा स साधुः साधुचेष्टितः । संन्यासविधिना कालं कृत्वाऽभूत् त्रिदिवेश्वरः ॥१४॥

॥ इति वृषभसेनमुनिकथानकमिदम् ॥ १५५ ॥

१५६ जयसेननृपतिकथानकम् ।

जयसेनो महीपालः श्रावस्तीनगरीपतिः । आसीदुपासकः श्रीमान् वीरसेनाऽस्य वल्लभा ॥ १ ॥
सत्यविक्रमदक्षः कलाविज्ञानकोविदः । वीरसेनोऽभवत् पुत्रस्तयोरत्यन्तवल्लभः ॥ २ ॥
मनसा वाग्भिरवं योगं तथा सार्धं दिवानिशम् । अयं प्रेमाकरो रूपी युवानो व्यवतिष्ठते ॥ ३ ॥
तस्यामेव पुरि शुद्धः शिवगुप्ताभिधानकः । भिक्षुरेकः सतपोऽसौ वसति प्रीतमानसः ॥ ४ ॥
भूपालस्य गुरुः प्रेयाविषयास्यान्तकोविदः । व्याख्यानं विदधातस्य संघस्य पुरतो मही ॥ ५ ॥
अन्यदा विहरन् कापि वृषभो यतिपूर्वकः । यशाचार्यः समायातः श्रावस्तीं संघसंगतः ॥ ६ ॥
जयसेनस्तदाभ्यासे श्रुत्वा यतीश्वरं नृपम् । बौद्धधर्मं विहायाशु बभूव श्रावको महान् ॥ ७ ॥
अनेन भूभुजा तत्र सामन्तान्तःपुरादिकः । महाजनपदः सर्वः श्रावकः परमः कृतः ॥ ८ ॥
स्वकीयं मण्डलं तेन जिनायतनमण्डितम् । कारितं भक्तियुक्तेन जयसेनेन सर्वतः ॥ ९ ॥
एवं कृतेऽमुना राज्ञा जिनधर्मप्रभाविता । शिवगुप्ताभिधो भिक्षुश्चकोपास्मै नरेशिने ॥ १० ॥
शिवगुप्तो स्वं प्राप्य जयसेनस्य चेष्टितम् । निशाम्यं मारणोपायं दध्यौ मनसि दुःखधीः ॥ ११ ॥
अन्यदा श्रेयरक्षसः पृथिवीपुरनायकः । बभूव सुमती राजा बौद्धधर्मपरायणः ॥ १२ ॥
अनेन भूभुजाऽन्यापि शिवगुप्तो निजो गुरुः । पुरस्तेषु विहायेमं जयसेनो जिनं श्रितः ॥ १३ ॥
निशम्य तद्वचः कोपी शिवगुप्तः स्वरष्यतिः । लेखं प्रवेशयामास जयसेननृपान्तिके ॥ १४ ॥
बुद्धधर्मं विहायेमं समस्तसुखकारणम् । जयसेन दुराचार जिनधर्मं प्रपन्नवान् ॥ १५ ॥
मां यदीच्छसि रे मूढ जिनधर्मं विहाय च । ततो बुद्धोदितं धर्मं गृहाण सुखवाञ्छया ॥ १६ ॥
लेखस्य दर्शनेनापि जयसेनो जिनप्रियः । ग्रहीतुं नेच्छति क्रूरं बुद्धधर्मं मनागपि ॥ १७ ॥
एवं ह्यनिच्छतस्तस्य बुद्धधर्मं मनीषिणः । जिनधर्मानुरक्तस्य जयसेनस्य योगिनः ॥ १८ ॥
ज्ञात्वा दम्भसंयुक्तं सहस्रभटनामकम् । समीपं प्राहिणोति स्म सुमतिः सुमतिर्नृपः ॥ १९ ॥
श्रावस्तीं नगरीं प्राप्य जयसेनं प्रवेक्ष्य च । हस्त्यश्वरथपादातैः स्कन्धावारो व्यवस्थितः ॥ २० ॥
स्कन्धावारं समादाय सहस्रभटनायकः । घनाघनघनध्वानधीरनिर्घोषया गिरा ॥ २१ ॥
स्कन्धावारो महीयोऽसौ न कोऽपि नरकुञ्जरः । जयसेनं दुराचारं यो निहन्ति निराकरिषम् ॥२२॥
निशम्य वचनं तस्य दीनं गद्गदभाषिणः । उपासको जयासेतं तदालीनमभिसारकः ॥ २३ ॥
भवन्तश्चिन्तितं स्वैरं मयं हित्वा शरीरजम् । कृत्वाऽहं बुद्धचेतस्कं जयसेनं निहन्म्यहम् ॥ २४ ॥
एवं निगद्य तं प्राप्य सेनान्तं वृषभादिकम् । मिथ्यात्विनयवेषेण प्रवव्राजाभिधारकः ॥ २५ ॥
एवं तपःस्थितं श्रुत्वा जयसेनो नराधिपः । तद्वन्दनार्थमायातो भक्तिपुलकतनूरुहः ॥ २६ ॥

---

1 All the Mss. put No 155 2 पफ शिवगुप्तभेषाभवः 3 [जयसेनस्तदभ्यासे].
4 ज 'रयमिश्रम्. 5 पफ प्रेमाकरो 6 पफज गुरुस्विन्नम्. 7 पफ गुरुम्, ज गुरुमिन्नम्.
8 [बद्धवित्तान]. 9 पफज गुरुम्.

सत्तपित्वा वनं सर्वं जिनायतनमागतः । जिनं मुनिगणं नत्वा प्रविश्यात्र जिनालयम् ॥ २७ ॥
तस्थौ भयनिमित्तेन जिनचैत्यालयान्तरे । विवेश भक्तिसंपन्नो राजाचार्योऽभिसारकः ॥ २८ ॥
जिनस्नपनगर्भसामयोऽपि प्रीतमानसः । स्वदुःखसुखसंपन्नास्तिष्ठन्ति कृतजल्पनाः ॥ २९ ॥
धर्मसंपादयोर्यावच्छिरसा भूतलस्पृशा । करोति पतनं राजा जानुस्पृष्टमहीतलः ॥ ३० ॥
तावत्तत्र वेगेन खड्गधेनुं सिताननाम् । हत्वा तया गले भूप नष्टोऽयमभिसारकः ॥ ३१ ॥[1]
छुरिकाप्रहारेण विह्वलीभूतमानसः । पतित्वा धरणीपीठे ममारायं महीपतिः ॥ ३२ ॥
तं महीपतिं दृष्ट्वा पतितं त जिनाग्रतः । दध्यौ स्वचेतसि क्षिप्रमाचार्योऽयं कृपाप्रधीः ॥ ३३ ॥
उपद्रवोऽयमीदृक्षः शमनं याति निश्चितम् । न जिनात्मविघातेन विहितेन महीतले ॥ ३४ ॥
एवं विचिन्त्य योगीन्द्रो नृपरक्तं प्रगृह्य सः । करेणैतां च तत्कुक्षौ लिलेखाक्षरपङ्क्तिकाम् ॥३५॥
ममेदं कर्म नो लोकैः विहितं निपतं भुवि । कृतमेतदिदं क्षिप्रमभिसारेण सांप्रतम् ॥ ३६ ॥
लोकापवादभीतेन शुनिक्षेपविधायिना । उपद्रवविनाशार्थं मया स्वस्य वधः कृतः ॥ ३७ ॥
एवंविधां हि तत्कुक्षौ लिखित्वाक्षरपङ्क्तिकाम् । स्वनिन्दनादिकं कृत्वा जिनेन्द्रपदसंनिधौ ॥३८॥
जिनेन्द्रदीक्षया शुद्धः सर्वत्यागं विधाय च । स्मरन् पञ्चनमस्कारं धर्मध्यानपरायणः ॥ ३९ ॥
छुरिकयोदरं हत्वा कृपयात्म्याऽतितीक्ष्णया । समाधिमरणं प्राप्य सूरिरेष दिवं ययौ ॥ ४० ॥[2]
वीरसेनकुमारोऽपि दृष्ट्वैतौ मृतिमागतौ । उपसर्गं चकारास तपस्य सकलस्य सः ॥ ४१ ॥
जिनमन्दिरसंस्थितौ प्रवाच्याक्षरपङ्क्तिकाम् । आचार्यलिखितां सम्यक् निजाभिज्ञानसंगताम् ॥४२॥
स्वनिन्दनविधिं कृत्वा जिनधर्मविधायकः । वीरसेनकुमारोऽयं तस्थौ कृतजिनस्तुतिः ॥ ४३ ॥

॥ इति [3]श्रीअभिसारराजनिहतजयसेननृपतिकथानकमिदम् ॥ १५६ ॥

१५७ शकटालमुनिकथानकम् ।

आसीत् पाटलीपुत्रे नन्दो नाम महीपतिः । सुनन्दा तन्महादेवी नन्दिताशेषबान्धवा ॥ १ ॥
तस्यैव नृपतेर्मन्त्री शकटालो महामतिः । महाप्रभुत्वमापन्नः प्रीणिताशेषभूपतिः ॥ २ ॥
[4] साधुजनाकीर्णे विषये वत्सकाभिधे । आसीदत्र धनापूर्णा कौशाम्बी नगरी परा ॥ ३ ॥
उपर्यिवासवत्सरसां तत्रार्या कपिलाभिधा । ब्रह्मभूतां सुतो तस्यां रूपराजितविग्रहौ ॥ ४ ॥
तापोऽग्न्यभिधो ज्ञेयो वेदस्मृतिविवर्जितः । सोमिल्लारमणीकान्तो मुग्धभावो प्रियंवदः ॥ ५ ॥
परो वेदवेदाङ्गः[5] स्मृतिशास्त्रार्थकोविदः । समस्तलोकविख्यातः सुभमास्यप्रियापतिः ॥ ६ ॥
अन्यदा दुःखसंतप्ता सोमिल्ला हीनमानसा । उपोषिता प्रयत्नेन व्रतं दुःखक्षयविधिम् ॥ ७ ॥
पारणे विधास्य भूर्तकर्कशतायुजः । द्विजस्य भोजनं पश्चात्तस्य विधियोगतः ॥ ८ ॥
इदं विचिन्त्य सा तत्र सोमिल्लाऽपरनामकम् । भोजयित्वा निजं कान्तं मधुपानविधानतः ॥ ९ ॥
तस्माऽस्मै कृष्णवस्त्राणि तथा कृष्णयुगद्वयम् । कृष्णोपकरणं मा त विसर्जन जुगुप्सितम् ॥१०॥[6]
भुक्त्वा तद्भोजनं सोऽपि निर्गत्य शनकैर्गृहात् । उत्कोऽश्मनया भूतो विवेश गहनं वनम् ॥११॥
नानाश्वापदसंकीर्णे नानातरुसमाकुले । पादयोर्हि पपात्य देवतायाः भयोज्झितः ॥ १२ ॥

---

1 पव दुध्यम् ज धुनाभिरम् 2 पफज दुध्यम् 3 ज श्रवणशक्तिरिभ 4 पव सर्वजनगर 5 पफ No. 156 ज No 155 6 [°वेदाङ्गविद्°]. 7 पफज °मनुजक्षमीरम्.

ददृशाऽसुं देवता दिव्यं स्वपात्रपतितं घने । दृष्टो वरमिमं शुष्य ददावासौ कृपावती ॥ १३ ॥
नानाशास्त्रकलाभ्यासमतुर्वेदपरागमी । त्वं काव्यनाटकोपेतः संक्षेपेण भविष्यसि ॥ १४ ॥
एवं निगद्य सा देवी संप्रेष्य निजमन्दिरम् । तोषपूरितचेतस्कः स्वदेशे स निजास्पदे ॥ १५ ॥
एवं संस्थितेऽमुष्मिन् कौशाम्बीनगरान्तिके । वटग्रामेऽभवद् विप्रः सर्वेशर्मा धनप्रियः ॥ १६ ॥
* वसुमित्रा प्रिया तस्य नयनोनयनवल्लभा । पुत्रो वररुचिस्तस्यां बभूव विनयान्वितः ॥ १७ ॥
ततो वररुचिः पूर्वं नमुचिश्च बृहस्पतिः । इन्द्रदत्तोऽप्यमी सर्वे पठनार्थं विनिर्ययुः ॥ १८ ॥
एकसंस्थो भवेदाद्यः स्फुटं वररुचिर्द्विजः । द्विसंस्थो नमुचिः प्रोक्तस्त्रिसंस्थोऽयं बृहस्पतिः ॥ १९ ॥
इन्द्रदत्तश्चतुःसंस्थो यथाक्रममवस्थिताः । उपाध्यायगृहे सर्वे पठन्ति प्रीतचेतसः ॥ २० ॥
अपरे मानवश्रेष्ठाश्चतुर्णामपि सर्वदा । संस्थामेकां ददात्येष पाठनार्येन सर्वदा ॥ २१ ॥
* एकया संस्थया तत्र नूनं वररुचिर्द्विजः । स्वीकरोति तदुक्तार्थं समस्तमपि मूलतः ॥ २२ ॥
एवं वररुचिः संस्थां प्रथमामपि शोभनाम् । ददाति नमुचिः स्वयं तथादत्ते तदुक्तिकम् ॥ २३ ॥
ददाति नमुचिर्भूयः संस्थामेकां द्वयोरपि । तथा बृहस्पतिः क्षिप्रमादत्ते तेन भाषितम् ॥ २४ ॥
भूयो बृहस्पतिः संस्थामिन्द्रदत्तस्य चैकिकाम् । ददाति प्रीतचेतस्के यथा धीरसमीरया ॥ २५ ॥
तदुक्तमिन्द्रदत्तोऽपि यथावस्थितमादरात् । संस्थाचतुष्टयेनापि गृह्णाति सकलं श्रुतम् ॥ २६ ॥
* अनेन विधिना सर्वे वेदवेदार्थपारगाः । पठन्तोऽनुदिनं दृष्टा बभूवुः सामवेदिनः ॥ २७ ॥
तत सर्वेऽपि ते पुण्याः प्रयाय गुरुदक्षिणाम् । एकवर्णमनोहारि गोसहस्रसमुद्भवम् ॥ २८ ॥
नगरे पाटलीपुत्रे पताकाबलिशालिनि । प्रभुनन्दसमीपं ते तोषविस्फारितेक्षणाः ॥ २९ ॥
अत्रान्तरे महीपालो नन्दाख्यो नन्दिताननः । कालगोचरतां प्राप्तो विधिं को वाऽपलापयेत् ॥ ३० ॥
देहसंक्रमणोपेतविषया नमुचिस्तदा । हित्वा शरीरमत्रैव नन्दकायं विवेश सः ॥ ३१ ॥
* एष भूतेऽमुना नूनमुत्थाय सहसा पुनः । मन्त्रविसंस्तने राज्ये तस्थौ मुदितमानसः ॥ ३२ ॥
एकवर्णगवां दिव्यं सहस्रं बहुदुग्धकम् । वररुच्यादिविप्रेभ्यो ददौ नन्दः सतोषकः ॥ ३३ ॥
गोसहस्रमिदं विप्रमुपाध्यायस्य ते पुनः । अन्यस्य कस्यचित्तस्मै प्रेषितं तोषमानसैः ॥ ३४ ॥
गोसहस्रमिदं दृष्ट्वा चोपाध्यायोऽन्तिके तदा । सुखेनापरेभ्यो दत्त्वा चापोऽस्मीत्यथ ॥ ३५ ॥
गोसहस्रमिदं तेन गृहीत्वा सत्वेक्षिताः । मदन्तिके न संप्राप्ताः परस्ते प्रवेशितम् ॥ ३६ ॥
* अनेन नमुचेः शापो मयशिष्यनामकः । स मारणात्मकः शापो वचो वररुचेरपि ॥ ३७ ॥
इन्द्रदत्तस्य शापोऽयं वितीर्णोऽनेन कोपिना । महाप्रहसमुत्थाने महत्त्वे ते भविष्यति ॥ ३८ ॥
शापमेवंविधं लब्ध्वा स्वयोग्यमपरप्रियात् । योगानन्दस्य कुर्वाणाः सेवां तिष्ठन्ति ते पुनः ॥ ३९ ॥
एवं हि तिष्ठतां तेषां मध्ये योपागतं नृपाम् । योगानन्दपरीक्षार्थं शकटालेन पार्थिवः ॥ ४० ॥
अन्येनापि च स्वेन मरणं भक्तिपूरितम् । एवं दिने दिने सार्धं कांचित्केन प्रपञ्चयन् ॥ ४१ ॥
* धनान्यकारसमुत्थे चाणक्यस्य भयानके । सवेग सह पुत्राणां शकटालो निवासितः ॥ ४२ ॥
अत्रैव नगरे श्रेष्ठी दत्तान्तः सागरादिकः । बभूव लोकविख्यातः सुमन्दारस्य प्रियापतिः ॥ ४३ ॥
ततो भोजनवेलायामनेन श्रेष्ठिना सह । एको हि श्रेष्ठिरूपेण विप्राणो भोक्तुमिच्छति ॥ ४४ ॥
उभयोरप्यसत्यस्य तत्समं भोक्तुमिच्छतः । व्यवहारा बभूवार्थं तदा भक्षिविप्राणयोः ॥ ४५ ॥
स्वन्यं भूभुजा तत्र शकटालं महामतिम् । कृपाद्धारितः क्षीममर्थं कौतुकमिच्छता ॥ ४६ ॥

---

1 ज दृष्टः. 2 पफ कुम्भ, ज कुम्भम्. 3 [चण्डापारे].

निर्माल्यस्य सतस्तत्र संबन्धेन परीक्षणम् । कृत्वा निर्घाटितोऽनेन पिशाचोऽपि तदन्तिकात् ॥४७॥
ततो निर्घाटितेऽमुष्मिन् शकटालेन सद्गृहात् । श्रेष्ठिनस्तस्य संजाता सा भार्या वशवर्तिनी ॥४८॥
नन्दोपरि रुषं धृत्वा छिद्रान्वेषी दिवानिशम् । मत्सरगूढमिषत् तस्थौ शकटालः प्रियंवदः ॥४९॥
लब्ध्वा वररुचिर्दिव्यं नन्दराज्यपदं ययौ । नरेन्द्रशेखरीभूतः सतस्से प्रीतमानसः ॥ ५० ॥
अनयोस्तिष्ठतोरेव नन्दो वररुचिं जगौ । कौतुकव्याप्तचेतस्को महासामन्तमध्यगः ॥ ५१ ॥
काव्यस्य मद्गृहीतं चतुर्थं पादमादरात् । करोमि त्वं पुनः शीघ्रं कुरु पादत्रयं बुध ॥ ५२ ॥[1]
नन्दस्य वचनं श्रुत्वा समामध्यानुयायिनः । ऊचे वररुचिः सायमेवं भवतु भूपते ॥ ५३ ॥
ततोऽन्यदिवसे जाते प्रविष्टस्यास्य संसदम् । नन्दो जगाद तं भूयस्त्विदं सन्तुष्टमानसः ॥ ५४ ॥

विपश्चितां मानसराजहंसोऽयं श्रुतिप्रियः सत्स्वराक्षरोक्तिः ।
लब्धो मया काव्यचतुर्थपादो रणं टणं टण्टणटण्टणेति ॥ ५५ ॥

राजहृदयमनोहारि बुधकर्णरसायनम् । काव्यपादत्रयं ब्रूहि प्रथमं त्वं महामते ॥ ५६ ॥[2]
नन्दवाक्यं समाकर्ण्य तोषकल्पितवाचकः । काव्यपादत्रयं प्रोचे पूर्वं वररुचिस्त्विदम् ॥ ५७ ॥

नन्दनस्य[3] राज्ञो मदविह्वलया हस्ताच्च्युतः स्वर्णघटो सुदत्याः ।
सोपानमाश्रित्य करोति शब्दं रणं टणं टण्टणटण्टणेति ॥ ५८ ॥
कपाटमाश्रित्य वराङ्गनायाः सदर्शितो यौवनगर्वितायाः ।
न रोचते तस्य जितेन्द्रियस्य सनूपुरः प्रव्रजितस्य पादः ॥ ५९ ॥

नाप्यागमोऽस्ति शठसस्य न मारुतस्य स्नेहक्षयो न भवति प्रथमप्रदोषे ।
अन्यत्र नूपुररवध्वनिबोधितेन पारापतेन पतता कृतमन्धकारम् ॥ ६० ॥[4]

शृणु शृणु सुचारुरूपं कपिपुत्रो राजपथेन गतः प्रवदन् सः ।
पश्चिमपादमिमं हि पठन्स कर्कशनालमकर्कशनालम् ॥ ६१ ॥
अपि न मेऽस्ति हि कारणबुद्धिस्तस्य पदस्य परस्य न वेद्मि ।
मामिदमद्य भणिष्यति राजा कर्कशनालमकर्कशनालम् ॥ ६२ ॥
उत्पलनालकृताभरणा सा त्वं न गता स्थित एव निराशः ।
अथ कृतं कमलं कमलाक्षि कर्कशनालमकर्कशनालम् ॥ ६३ ॥
अङ्गुलिवर्जनजर्जरिताङ्गं शीर्णविशीर्णपवित्रपलाशम् ।
अथ कृतं कमलं कमलाक्षि कर्कशनालमकर्कशनालम् ॥ ६४ ॥

निशम्य वचनं तस्य शकटालो जगौ नृपम् । राजहंस मतिर्दुष्टा त्वदन्तःपुरनाशिनी ॥ ६५ ॥
मन्त्र्युक्तवचः श्रुत्वा कोपारुणनिरीक्षणः । जगाद किङ्करान् राजा भ्रुकुटीभीषणालिकः ॥ ६६ ॥
इमं वररुचिं दुष्टमन्तःपुरविनाशिनम् । बहिर्नगरतो नीत्वा दुरात्मानं विहिंसत ॥ ६७ ॥[5]
नन्दोदितं समाकर्ण्य गृहीत्वाऽमुं च किङ्कराः । मुक्त्वा वररुचिं मार्गे जघ्नुरन्यं नरं पुनः ॥६८॥
पाटलीपुत्रसंज्ञस्य पुरस्यास्य समीपगम् । पलाशकूटनामानं ग्रामं प्राप्य स तस्थिवान् ॥ ६९ ॥
अथ नन्दस्य भूपस्य नन्दनो दुष्टवाजिना । नीतोऽटवीं तरुच्छन्नां सुनन्दो नाम विश्रुतः ॥ ७० ॥
विघनसमानायां क्षणदायां स सद्मने । न्यग्रोधवृक्षमारुह्य तस्थौ नरपतेः सुतः ॥ ७१ ॥

---

1 पच दुष्टम्, ज दुगत्म. 2 पचज दुष्टमिरम्. 3 [नन्दन]. 4 पचज चतुष्पदमीरम्. 5 पचज दुष्टमीरम्. 6 पचज दुष्टमीरम्.

एवं संतिष्ठतेऽमुष्मिन् एको रिक्षोऽतिचञ्चलः[1] । व्याघ्रभीत्या परिप्राप्य तं वटं पृथुमण्डलम् ॥७२॥
न्यग्रोधकं समारुह्य राजपुत्रसमीपके । स्थित्वा जगादिमं रिक्षो[2] नूनमत्र स्थितो निर्भयः ॥ ७३ ॥
त्वत्कुमारान्तिके यावद्विश्वस्तिष्ठति निर्भयः । तावद्व्याघ्रोऽपि संप्राप्य तत्तटाधःस्थितो भ्रमी ॥ ७४ ॥
मित्र क्षुधापरिश्रान्तस्तिष्ठाम्यत्र पयन्तिके । मुञ्चनरमिमं[3] शुभ भोजनार्थं मम क्षुतम् ॥ ७५ ॥[4]
रिक्षो निशम्य तद्वाक्यं पुण्डरीकं जगाविदम् । क्षुत्क्षामस्तच्चेतस्क वटमूलम्यपाश्रितम् ॥ ७६ ॥
मदन्तिकं परिप्राप्तं शरणार्थं महावने । भद्र कथं प्रमुञ्चामि सुखं नन्दस नन्दनम् ॥ ७७ ॥
आकर्ण्य तद्वचो व्याघ्रो जगादेमं पुरःस्थितम् । कृतघ्ना मानुषाः सन्ति मुञ्चसे तेन मां प्रति ॥७८॥
मूकभावं परिप्राप्य स्वापयित्वा निजान्तिके । कुमारं सोऽपि सुष्वाप निद्राघूर्णितलोचनः ॥७९॥
रिक्षेऽमुष्मिन् प्रसुप्ते च पुण्डरीको जगाद्धमुम् । कुमारेमं प्रमुञ्चाशु येन भुक्त्वा प्रयाम्यतः ॥८०॥
सुनन्दस्तद्वचः श्रुत्वा ययौ व्याघ्रं क्षुधार्दितम् । दुष्टमेनाहमानीतो वनं व्याघ्र मयाद्यहम् ॥८१॥
एकाकी रक्षितोऽनेन वटवृक्षेऽत्र शोभने । कथमेतं प्रमुञ्चामि भवन्तं प्रति सांप्रतम् ॥ ८२ ॥
एवं निगद्य तं तत्र रिक्षो हस्तद्वयेन च । तरसाऽपितः कुमारेण स प्राप्य जगाद्धमुम् ॥ ८३ ॥

स से मं से इ कि चि शु सि[5] मि ।

शुक्लाक्षराणि चैतानि ददामि त्वं नराधम । क्षेपाक्षरेषु यस्यार्थं मूढं याति भवत्यपि ॥ ८४ ॥
अथवा योऽर्थमेतेषामक्षराणां भविष्यति । सर्वेषामपि तं दृष्ट्वा तस्य कार्यं भविष्यति ॥ ८५ ॥
एवमुक्त्वा स च रिक्षो व्याघ्रोऽपि वटदेशतः । अदर्शनीमितां प्राप्य यथास्वं निलयं गतः ॥ ८६ ॥[6]
प्रभातसमये जाते सुनन्दः भीतमानसः । पितुरन्तिकमुद्दिष्टो भूत्वा ययौ स स निकेतनम् ॥ ८७ ॥
यत्नेऽपि तद्गृहे वाक्यं तत्समं वदति स्फुटम् । ततस्तु त्यजन् सर्वं कुमारो व्यवस्थितः ॥ ८८ ॥
नन्दः [7]पद्मशकृत्प्रस्थप्रमाणलोकमक्षेपकम् । तदानीमादिदेशेदं कोपलोहितलोचनः ॥ ८९ ॥
आनयध्वमुपलस्तकं यस्मानीयतां मम । यदि नानयसि क्षिप्रं दण्डयोग्योऽसि सांप्रतम् ॥९०॥
नन्दभूपवचः श्रुत्वा समस्तः श्रुतपूर्वकम् । [8]पद्मशकृत्संचारवनोऽस्ति सत्ताम्बरः ॥ ९१ ॥
पद्मशकृत्वं लोके विलोक्य मयाविहृतम् । इदं वररुचिः प्राह विपश्चित्प्रयतमतः ॥ ९२ ॥
स्नानं विधाय विश्रब्धाः कुरुध्व भोजनं जनाः । प्रवेशयामि तस्माद् प्रभाते यत्नमुत्तमम् ॥ ९३ ॥
विश्रम्भीकृत्य तल्लोकं तदा वररुचिः पुनः । तत्रोपप्राप्ये बुद्धिं यशःरेमां विचक्षणः ॥ ९४ ॥
उपाचष्टभूतान् कुम्भांस्तन्मनस समर्प्य स । इमं प्रवेशयामास नन्दभूपालसंनिधिम् ॥ ९५ ॥[9]
तद्रामवासिलोकेन भृतान् जलभृतान् कुम्भान् । विलोक्य नृपतिः प्राह तल्लोकं बहुविस्मयः ॥९६॥
इदं जलं कुतो लब्धं भवद्भिस्तोपसंगतैः । कुतो यस्य समानीतं जनाः कथयताशु मे ॥ ९७ ॥[10]
नन्दवाक्यं समाकर्ण्य तज्जनो निजगाद तम् । महानिस्वयसंपन्न भयवेपितविग्रहः ॥ ९८ ॥
पद्मशकृत्सद्ग्रामात् समानीतमिदं जलम् । उपायमुत्तमं राजन्स्वामिर्भवदन्तिकम् ॥ ९९ ॥[11]
पद्मशकृल्लोकस्य निशम्य वचनं नृपः । भूयो जगाद तं रुष्टो विस्मयव्याप्तमानसः ॥ १०० ॥
युष्माकं केन संदत्तो बुद्धिदेशोऽयमीदृशः । एतद्वद मे सत्यं यथावृत्तं महत्तराः ॥ १०१ ॥

1 The Mss. uniformly read रिक्ष which is retained but better [ऋक्षो].
2 पक रक्षो [ऋक्षो]. 3 [इमं]. 4 पक क्षुधम्, ज क्षुतम्. 5 पक क्षुधम्, ज क्षुतम्. 6 [ऽ].
